अङ्कः - 13, 2024-25
ISSN: 2249-538X

# वाक्यार्थभारती

A UGC Carelisted and Peer-reviwed research journal

प्रधानसम्पादकः
आचार्यः हंसधरझाः

कार्यकारी सम्पादकः
आचार्यः गणेश ईश्वरभट्टः

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः
श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्
श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी - ५७७१३९

Vol-13, 2024-25
ISSN: 2249-538X

# Vākyārthabhāratī

Chief Editor
Prof. Hansdhar Jha

Executive Editor
Prof. Ganesh Ishwar Bhat

Central Sanskrit University
Established by an Act of Parliament
Accredited with A++ grade by NAAC
Shri Bharati Teertha Center for Excellence in Shastras
Shri Rajiv Gandhi Campus
Menase, Sringeri - 577139

Title : Vākyārthabhārati

Publisher : The Director
Central Sanskrit University
Shri Bharati Teertha Center for Excellence in Shastras
Shri Rajiv Gandhi Campus, Sringeri-577 139 (Karnataka)

E-mail : director-sringeri@csu.co.in

Chief Editor : Prof. Hansdhar Jha

Peer-review Committee : Prof. A. P. Sachidananda,
Ex-Vice Chancellor, Rashtriya Sanskrit Sansthan, Delhi

Prof. Kashinath Nyopane,
Director, Publications, Central Sanskrit University, Delhi

Prof. Madhusudhan Penna,
Director, Sanskrit Academy, Osmania University, Hyderabad

Prof. Dinakar Marathe,
Director, Bharatratna Panduranga vaman Kane Sanskrit study centre,Ratnagiri

Dr. Priyavrat Mishra ,
Associate Professor, Banaras Hindu University, Varanasi

Editorial Board : Prof. Chandrakant
Prof. Ganesh Ishwar Bhat
Dr. Vijayananda Adiga
Dr. Raghavendra P Arolli
Dr. Ramjiyavan Prajapati

Year : 2025

ISSN : 2249-538X

Design : Dr. Raghavendra P. Arolli, Dr. Raveesha N

© All the rights are reserved for Publisher. Provided that contributors are responsible for their respective articles.

**प्रो. श्रीनिवास वरखेड़ी**
कुलपति
**Prof. Shrinivasa Varakhedi**
Vice-Chancellor

**केन्द्रीय संस्कृत विश्वविद्यालयः**
संसद के अधिनियम द्वारा स्थापित
**Central Sanskrit University**
Established by an Act of Parliament

के.सं.वि./कुलपति-101/2025-26/114

दिनाङ्कः -22.07.2025
श्रा. कृ. द्वादशी/त्रयोदशी, वि.सं. 2082



# शुभसन्देशः

## वर्धतां शास्त्रसृष्टिरभिवर्धतां शास्त्रदृष्टिः

श्रुत्युपदिष्टे मार्गे सञ्चरन्तोऽस्मत्पूर्वजाः महर्षयः श्रुत्यर्थोन्नयनाय युक्तिभूयिष्ठानि शास्त्राणि रचयामासुः। शास्त्रं च गहनतत्त्वप्रकाशकमपि भूयो भूयश्चिन्तनमपेक्षते। अत एवाभियुक्तैर्भणितं **"शास्त्रं सुचिन्तितमपि परिचिन्तनीम्"** इति। अधीता विद्या दानेन वर्धते इत्यतः अधिगतविद्यानां शास्त्राध्ययनाध्यापनादिपरम्पराप्रविष्टानां प्रबन्धादिरूपेण तत्प्रकाशनमपि कर्तव्यं भवति। प्राचीनबोधपरम्परासंवाहकः केन्द्रीयसंस्कृतविश्वविद्यालयः शास्त्रप्रचाराय कटिबद्धो वरीवर्ति। तदङ्गभूतः शृङ्गगिरिस्थः शारदामातुः सन्निधौ विराजमानः शास्त्रनिधिसम्पन्नः श्रीराजीवगान्धीपरिसरः प्रदीपकेषु भानुरिव च विराजते। जगदुरूणाम् **अनन्तश्रीविभूषितानां श्री श्री भारतीतीर्थमहास्वामिनां, तत्करकमलसञ्जातानां श्री श्री विधुशेखरभारतीस्वामिनां, जगन्मातुः विद्याधिष्ठात्र्याः शारदाम्बायाः** असीमानुग्रहेण पवित्रेऽस्मिन् शृङ्गगिरिक्षेत्रे प्रतिष्ठापिते श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रे प्रतिवर्षमिव अस्मिन्नपि संवत्सरे विशेषरूपेण **"वाक्यार्थभारती"** इत्याख्या विद्वल्लेखभूयिष्ठा पत्रिका प्राकाश्यमेति इति विज्ञाय मोमुदीति नश्चेतः। पत्रिकेयं विद्वज्जनानां मोदकरं छात्राणां ज्ञानकरं च बोभवीति इत्यहं विश्वसिमि । अवसरेऽस्मिन् प्रकाश्यमानेयं वाक्यार्थभारती चिरं जियादित्याशासे ।

(प्रो. श्रीनिवास वरखेड़ी)
कुलपतिः

56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058 (भारत)
56-57, Institutional Area, Janakapuri, New Delhi -110058 (INDIA)
Ph.: (O) 011-28523949, Website : www.sanskrit.nic.in
E-mail : vc@sanskrit.ac.in/ vicechancellorcsu@csu.co.in

प्रो. रा. गा. मुरली कृष्ण
कुलसचिव (प्र.)
केन्द्रीय संस्कृत विश्वविद्यालय
संसद के अधिनियम द्वारा स्थापित
(पूर्व मे राष्ट्रिय संस्कृत संस्थान,
शिक्षा मन्त्रालय, भारत सरकार के अधीन)

Prof. R. G. Murali Krishna
Registrar (I/c)
Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Under Ministry of Education, Govt. of India)



# शुभाशंसनम्

भारतीयज्ञानपरम्परायां शास्त्रसंरक्षणदृष्ट्या वाक्यार्थस्य काचित् विशिष्टा पद्धतिः वर्तते। इदानीमपि इयं परम्परा पारम्परिकगुरुकुलेषु अविच्छिन्नरूपेण शास्त्रज्ञानां निरन्तरप्रयत्नेन संरक्षिताऽस्ति । भाषायाः साध्ववगमनम्, तस्याः प्रयोगो व्यवहारो वा संस्कृतानुरागिणां भवेदेव। तेन सह नैतिकमूल्ययुक्तं शास्त्रीयं जीवनं यथा सर्वेषां मानवानां भवेत् तथा सर्वेभ्यः मार्गदर्शनमपि संस्कृतज्ञानां शास्त्रविदां कर्तव्यमस्ति । तदर्थं सर्वेषां वेदाङ्गानां पुराणानां धर्मशास्त्र-दर्शनशास्त्राणां महाकाव्य-नाटक-कथा-सुभाषितादिग्रन्थानां च अध्ययनम् अध्यापनं च नितरामावश्यकम्। एतादृशाध्ययनाध्यापनद्वारा प्राप्तं परिनिष्ठितं ज्ञानमेव अन्येभ्यः पथप्रदर्शने दीपायते। वाक्यार्थैः परिस्फुटमिदं ज्ञानं निबन्धद्वारा यदि प्रकाशते तर्हि लोके समेषामुपयोगः स्यात्, येन शास्त्रेषु सन्दिग्धांशानां विमर्शम् अन्येऽपि कर्तुं प्रभवन्ति। एतादृशः प्रयत्नः केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीराजीवगान्धीपरिसरेण "वाक्यार्थभारती" इति शोधपत्रिकायाः प्रकाशनद्वारा प्रतिवर्षं क्रियमाणो वर्तते।

पत्रिकायामस्यां भारतस्य विविधेषु प्रान्तेषु अध्ययनाध्यापनरतानां विदुषां शोधच्छात्राणां च शोधलेखाः विराजन्ते । परिसरे वाक्यार्थपरिषदा प्रतिमासं समायोजितानां परिसरीयविदुषां वाक्यार्थप्रस्तावा अपि सन्ति । शास्त्रसिद्धान्तरक्षणे तथा नूतनानां विचाराणाम् उपस्थापने च एषा पत्रिका उत्तमम् अवसरं कल्पयतीति मनो मे मोमुद्यते । अत्र विद्यमानानां विचाराणां मन्थनं भवन्तः विधाय अन्येभ्यः स्वविचारधाराः प्रसारयन्ति चेत् पत्रिकायाः अस्याः प्रकाशनस्य लक्ष्यं पूर्णं भवतीति भावयामि। अस्याः सम्पादने, प्रकाशने, शुद्धीकरणे च सहकृतवतः सर्वान् अभिनन्दामि शुभकामनाश्च वितरामि ।

(आचार्यः गायत्रीमुरलीकृष्णः)
कुलसचिवः
केन्द्रियसंस्कृतविश्वविद्यालयः, नवदेहली

56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058
56-57, Institutional Area, Janakapuri, New Delhi -110058 (INDIA)
Ph.: (O) 011-28523949, EPABX: 28524993, 28521994, 28524995
EMAIL : registrar@csu.co.in/ ps2registrar@csu.co.in, WEBSITE : www.sanskrit.nic.in

**आचार्यः हंसधरझाः**
**निदेशकः**
**Prof. Hansdhar Jha**
**Director**

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्
श्रीराजीवगान्धीपरिसरः,
मेणसे, शृङ्गेरी - ५७७१३९



# शुभसन्देशः

**संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः ।**
**वेदतत्वार्थसंजुष्टं लोकाऽऽलोककरं शिवम् ॥**

अस्माकं भारतस्य प्रतिष्ठा संस्कृति-संस्कृताश्रिता। संस्कृतं विश्वस्मिन्विश्वे प्राचीनतमा भाषा तु अस्त्येव एतदद्धि आदिकालत एव भारतस्य आत्मनः केन्द्रबिन्दुरूपेण प्रतिष्ठितमस्ति ।

विलक्षणभारतीयज्ञान-विज्ञाननिधेः भारतीयसंस्कृतेश्च स्रोतोरूपसंस्कृतस्य बृहत्तमसंस्थारूपेण यदि काचित्संस्था अस्ति साऽस्त्यस्माकं भारतशासनेन सप्तत्युत्तरोनविंशतिशततमे (1970) ख्रीष्टाब्दे स्थापितः विश्वविश्रुतः केन्द्रीयसंस्कृतविश्वविद्यालयः, यत्र प्राच्यभारतीयविद्यानामध्ययनं, प्रशिक्षणमनुसन्धानञ्च जायमानमस्त्यनवच्छिन्नरूपेण । तत्र हि केन्द्रीयसंस्कृतविश्वविद्यालयस्य त्रयोदशसु परिसरेषु विद्यावैभवसंवलितस्यास्य श्रीराजीवगाँधीपरिसरस्यास्ति किञ्चिद् विशिष्टमेव स्थानम् । परिसरोयं जगन्मङ्गलकारि- शारदाम्बाङ्कगतस्साक्षाच्छिवावतार-जगद्गुरुशङ्कराचार्यकृपा-कवच- परिरक्षितश्शृङ्गगिरिपरिसरः प्रारम्भत एवानवरतं संस्कृतविद्यायाः प्रचारप्रसारयोर्बद्धपरिकरोऽस्ति ।

क्रमेऽस्मिन् परिसरेणानेन च्छात्राणां विदुषाञ्च लेखनकौशलं संवर्धयितुम्पद्यसर्जनपाटवं प्रकटयितुमभ्यर्जितज्ज्ञानञ्च लेखनीमाध्यमेनोद्भासयितुम्परिसरेणानेन नैकविधपत्रिकाणाङ्ग्रन्थानाञ्च क्रियते प्रकाशनम् । तत्र हि च्छात्राणां शोधाध्येतॄणाञ्चोत्साहवर्धनाय समुत्कर्षाय च तेषाङ्गद्यपद्यरचना भवन्त्येव प्रकाशिताः, स्व-स्वशास्त्रधुरीणानां विदुषां सरसास्सारगर्भिता ज्ञानविज्ञानमयाश्शोधनिबन्धा अपि भवन्ति प्रकाशिताः।

तदस्मिन्नेव क्रमे वाक्यार्थपरिषदि वाक्यार्थविधातृभिर्विद्वद्भिस्तदितरैः परिसरीयविद्वद्भिर्देशस्य प्रख्यातैरन्यैर्विपश्चिद्भिः समर्पितैर्विविधैर्ज्ञानविज्ञानमयैश्शोधनिबन्धैर्गुम्फिता त्रयोदशाङ्करूपेण वाक्यार्थभारती-तिनाम्नी शोधपत्रिका प्रतिवर्षमिव ऐषमोऽपि प्राकाश्यमेतीति हर्षप्रकर्षविषयः।

एवं हि शास्त्रेषु बद्धादरैर्यैर्विपश्चिद्भिः परिसरीयेतरैः परिसरीयैर्वा शोधपत्रिकायामत्र प्रदत्तानि ज्ञानविज्ञानमयानि शोधपत्राणि तेषां समेषाङ्कृते हृदयेन सकार्तज्ञ्यं धन्यतामाविष्करोमि ।

एवं हि क्रमेऽस्मिन् साभिवादनं सादरं प्रकटयामि कार्तज्ञ्यङ्कर्मयोगिभ्योऽस्मत्कुलपतिभ्य आचार्यश्रीनिवासवरखेडीमहाभागेभ्योऽपि येषां प्रोत्साहनेन प्रोत्साहिताः सन्त एवंविधानि नैकानि सारस्वतकार्याणि सहजतया कर्तुं प्रभवामो वयम् । तथैवास्माकं कुलसचिवप्रमुखेभ्योऽन्येभ्योऽपि मुख्यालयाधिकारिभ्यो ज्ञापयामि धन्यवादान् येषां सततम्भवति सहयोगोऽस्माकं कृते एवंविधसारस्वतकर्मसु ।

एवमेव क्रमेऽस्मिन्नभिनन्दनीयाः सन्ति अस्माकं विद्वांसः सम्पादकसमितिसदस्याः, ये खलु रात्रिन्दिवं परिश्रम्य पत्रिकाया अस्या विहितवन्तः सम्पादनम् । एवञ्चैतत्पत्रिकासम्पादनकर्मणि ये केचन सन्ति कृतश्रमाश्शिष्टास्तेभ्यः, वाक्यार्थपरिषदः कार्यदर्शिप्रमुखेभ्यः, मूल्याङ्कनसमितिसदस्येभ्यश्च विद्वद्भ्यो धन्यवादान् आविष्करोमि ।

अन्ते च कामये भगवतीं श्रीशारदाम्बां यदस्मत्परिसरस्य सर्वविधहितचिन्तकानां ज्ञानतपोमूर्तीनाङ्करुणावरुणालयानामनन्तश्रीविभूषितानां श्रीश्रीभारतीतीर्थमहास्वामिनां, तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारतीमहास्वामिनाञ्चानुग्रहाशीर्भिः परिसरोऽयं
दिनानुदिनं सर्वतोमुखाभिवृद्धिङ्गच्छेदिति शम् ॥

**वाक्यार्थभारतीनामा शास्त्रीयज्ञानगुम्फिता ।**
**त्रयोदशाङ्करूपेयं स्यात्सच्चित्तानुरञ्जिनी ॥**

विद्वज्जनविधेयः

(आचार्यः हंसधरझाः)
निदेशकः

**आचार्यः चन्द्रकान्तः**
**सहनिदेशकः**
**Prof. Chandrakant**
**Associate Director**

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्
श्रीराजीवगान्धीपरिसरः,
मेणसे, शृङ्गेरी - ५७७१३९



# ॥ जीयाद्वाक्यार्थभारती ॥

**वाक्यार्थश्च विचार्यतां श्रुतिशिर:पक्ष: समाश्रीयतां**
**दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम्**

इत्याचार्यवचनादिदमत्रावगम्यते यत् श्रुतिमत:शास्त्रार्थ:वाक्यार्थश्च विद्वद्भिरनुसन्धेय:कर्तव्यश्चेति। वेदानामर्थावगमसौलभ्याय ऋषय: तपस्यया निरन्तरस्वाध्यायेन च शास्त्राण्यस्मभ्यं प्रादु:। ऋषिभ्य:प्राप्तस्यास्यामूल्यज्ञानामृतस्य शास्त्रप्रपञ्चस्य संरक्षणमधीतिबोधाचरणप्रचारणै:परम्पराप्राप्तैश्च मार्गै:विधेयमस्ति यदनिवार्यं तप: वर्तते। संस्कृतशास्त्राणां संरक्षणाय प्रतिज्ञाबद्ध:केन्द्रीयसंस्कृतविश्वविद्यालय: देशे सर्वत्र स्वपरिसरेषु बहुविधान् कार्यक्रमानसकृदायोजयति। तत्रापि विशेषेण शृङ्गेरीस्थे श्रीराजीवगान्धीपरिसरे श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रं शास्त्रसमुद्धरणायैव समारभ्यमाणं वर्वर्तीति मोदावहो विषय: शास्त्रज्ञानां संस्कृतप्रेमिणाञ्च। तद्दिशि सततं पठनपाठनलेखनकर्मसु श्रद्धावन्तः परिसरस्यास्य प्राध्यापका: छात्राणां बुद्धिवैशद्याय आदर्शवक्यार्थान् वाक्यार्थपरिषन्नामके मञ्चे प्रतिमासं समुपस्थापयन्ति।तेषामुपस्थापितानां वाक्यार्थानां सङ्कलनं विधाय वाक्यार्थभारतीनामकं ग्रन्थमपि बहुभ्य: वर्षेभ्य: प्रकाशयन्तो वर्तन्त इति विशेष:। अस्मिन्नपि वर्षे ग्रन्थरत्नमिदं संस्कृतोत्सवस्य शुभावसरे जगद्गुरूणां श्री श्रीविधुशेखरभारतीस्वामिपादानां करकमलाभ्यां प्राकाश्यं नीयत इति प्रमोदो जायते ।कर्मण्यस्मिन् आचार्याणां गणेश ईश्वर भट्टवर्याणां डा.विजयानन्द अडिगवर्याणां, डा.राघवेन्द्र पि आरोल्लिवर्याणां डा.रामजीयावनप्रजापतिवर्याणाञ्च श्रम: श्लाघ्योऽस्तीत्यतस्ते ह्यभिनन्द्यन्ते।सारगर्भितैश्शास्त्रलेखैस्समलङ्कृतेयं सहृदयानां संस्कृताभिमानिनां पिपठिषूणां छात्राणाञ्च मानसं तोषयन्ती जीयाद्वाक्यार्थभारतीत्याशासान:उभयेषां जगद्गुरूणां श्रीशारदाम्बायाश्च चरणारविन्देषु नतिततिसन्ततिमर्पये।

**शारदाम्बाकृपायुक्ता जगद्गुरुसमादृता।**
**परिसरयशोदात्री जीयाद्वाक्यार्थभारती॥**

विद्वज्जनविधेयः

(आचार्यः चन्द्रकान्तः)
सहनिदेशकः



आचार्यः चन्द्रकान्तः
मार्गदर्शकः



आचार्यः गणेशैईश्वरभट्टः
अध्वदर्शी



डा. बि. विजयानन्द अडिगः
अध्वदर्शी



डा. राघवेन्द्र अरोळ्ळी
अध्वदर्शी



डा. रमजियावन् प्रजापतिः
अध्वदर्शी

# सम्पादकीयम्

अभ्युदयनिःश्रेयसपदप्रदं परमं पवित्रं पन्थानमाश्रिताः प्राञ्चः परमर्षयः साङ्गसरहस्यवेदार्थविज्ञानपरां विचारसरणिम् समारप्सत इति विजानन्त्येव विपश्चिदः । तत्त्वसाक्षात्कारसमर्थमपि प्रमाणं विचारं विना न कात्स्न्र्येन संशयान् उच्छिनत्ति । पौनःपुन्येन विधीयमानो हि विचारः विविधविचिकित्सानां चिकित्सां विधाय दीर्घकालनैरन्तर्यसत्कारासेवितः करतलामलकवद् अपरोक्षं बोधं प्रसूयते । प्रत्यक्षाद्यनवगतमपि तत्त्वं साक्षात्कारयितुं श्रुतिर्हि नः परमं प्रमाणम् । मलिनदर्पणे मुखमिव श्रौतोऽप्यर्थः संशयाद्याकुलितचित्तेषु स्फुटं नावभासते । अतः पुरुषदोषापनयनाय जिज्ञासवः श्रुत्यविरुद्धां न्यायसरणिं समाश्रयेयुः । यथोक्तम्-

श्रोतव्यः श्रुतिवाक्येभ्यः मन्तव्यश्चोपपत्तिभिः ।
मत्वा च सततं ध्येयः ह्येते दर्शनहेतवः ॥ इति ।

किन्तु विचारावसरे, विचारस्य मूलं लक्ष्यं च निश्चितं स्यात् । निर्मूलं पौरुषेयं वाक्यं निर्मूलः पौरुषेयः विचारो वा यथार्थज्ञानं न जनयति । तथैव विचारस्य लक्ष्यं न वादिविजयः, अपि तु तत्त्वावबोधः । तत्त्वावबोधाय अन्तरायभूतास्तु कथाः वर्जनीयाः निरसनीयाश्च भवन्ति । अतः अस्माकं दार्शनिकाः समूलं सफलं च च विचारं समाश्रित्य सूत्रभाष्यव्याख्यानोपव्याख्यानरूपान् भूयसः ग्रन्थान् निर्माय लोकान् उपाकुर्वन् । तेषां ग्रन्थानां परिशीलनेन भूयो भूयः तदर्थविचारेण च अवश्यमेव अविप्लवं ज्ञानम् आविर्भवति । न हि सर्वोऽपि जनः सकृत्प्रयत्नमात्रेण तत्त्वं साक्षात्कर्तुं प्रभवति । अत एव विद्यारण्यमुनयः प्राहुः-

विचार्याप्यपरोक्षेण ब्रह्मात्मानं न वेत्ति चेत् ।
आपरोक्ष्यावसानत्वाद्भूयो भूयो विचारयेत् ॥ इति।

अध्ययनाध्यापनसंशोधनप्रकाशनादिकर्मभिः शास्त्राणां परिरक्षणे निबद्धादरेण केन्द्रीयसंस्कृतविश्वविद्यालयेन राजीवगान्धीपरिसरद्वारा प्रतिवर्षं "वाक्यार्थभारती"नाम्नी शोधपत्रिका समानीयते । अस्मिन्नपि वर्षे इयं पत्रिका सम्प्रति प्रकाशपथम् आगत्य भवतां करकमलम् अलङ्करोतीति प्रमोदामहे वयम् । अत्र प्रकाशिताः नैके विषयाः अस्माकं राजीवगान्धीपरिसरे समायोजितायां वाक्यार्थपरिषदि उपस्थापिताः । तथैव भारतस्य विविधेषु प्रान्तेषु निवसतां विदुषां शोधच्छात्राणां च लेखा अत्र समावेशिताः सन्ति ।

शास्त्रप्रशासनपटवः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतयः आचार्याः श्रीनिवासवरखेडीमहाभागाः पत्रिकायाः प्रकाशने अपेक्षितं मार्गदर्शनं विधाय शुभसन्देशं च प्रदाय प्रकाशनकर्मणि अस्मान् प्रोदसीषहन् । तेभ्यः सप्रणति कार्तज्ञ्यं निवेदयामः । विश्वविद्यालयस्य कुलसचिवा आचार्याः गायत्रीमुरळीकृष्णमहाभागाः शुभाशंसनं वितीर्य

पत्रिकायाः शोभाम् अवीवृधन् । तेभ्यः हृदयेन धन्यवादान् वितन्मः । एवं मार्गदर्शनं शुभसन्देशं च दत्तवद्भ्यः परिसरस्य निदेशकेभ्यः आचार्येभ्यः हंसधरझावर्येभ्यः धन्यताम् आविष्कुर्मः । शोधलेखानां गुणवत्तापरिशीलने सहकृतवद्भ्यः परामर्शसमितिसदस्येभ्यः विश्वविद्यालयस्य प्रकाशनविभागस्य निदेशकेभ्यः आचार्येभ्यः काशीनाथन्योपानेवर्येभ्यः, सहनिदेशकेभ्यः डा गणेशपण्डितवर्येभ्यश्च कार्तज्ञ्यं प्रकटयामः । पत्रिकायाः विन्यासकर्म निर्वर्तितवद्भ्यः डा. रवीश एन् वर्येभ्यः लेखानां परिशोधकर्मणि सहकृतवद्भ्यः कृष्णमूर्तिप्रभृतिभ्यः छात्रेभ्यः च धन्यताम् आविष्कुर्मः । परिसरस्य सर्वस्यापि श्रेयसः निदानभूतानां दक्षिणाम्नायशृङ्गेरीशरदापीठाधीश्वराणां जगद्गुरूणां श्रीश्रीभारतीतीर्थमहास्वामिनां तत्करकमलसञ्जातानां जगद्गुरूणां श्रीविधुशेखरभारतीमहास्वामिनां च पादपाथोजाभ्यां साष्टाङ्गप्रणामान् समर्पयामः ।

सम्पादनसमितिसदस्याः

आचार्यः चन्द्रकान्तः, आचार्यः गणेश ईश्वर भट्टः,

डा विजयानन्द अडिगः, डा राघवेन्द्र अरोळ्ळि, डा रामजियावन् प्रजापतिः च

# विषयानुक्रमणिका


१. संस्कृतशिक्षकप्रशिक्षणपाठ्यक्रमस्वरूपचिन्तनम् – आचार्यः चन्द्रकान्तः . . . . . . . . . . १
२. मार्गनिर्देशः (Guidance) – आचार्यः रामचन्द्रुल बालाजि . . . . . . . . . . . . . . . ६
३. मधुसूदनसरस्वत्याः भक्तिसिद्धान्तः – प्रो. आर् प्रतिभा . . . . . . . . . . . . . . . . . . ९
४. उपनिषच्छब्दार्थसमीक्षा – स्वामी जपसिद्धानन्दः . . . . . . . . . . . . . . . . . . . . . १३
५. अभ्यासाधिकरणनिष्कर्षः – आचार्यः सूर्यनारायणभट्टः . . . . . . . . . . . . . . . . . . २४
६. त्रिवृत्करणम् उत पञ्चीकरणम्? – आचार्यः गणेश ईश्वर भट्टः . . . . . . . . . . . . . . २८
७. 'निष्टर्क्य'शब्दसिद्धिनिरूपणम् – आचार्यः ई. आर्. नारायणन् . . . . . . . . . . . . . . . ३३
८. 'पुष्पं जिघ्रति' इति वाक्यार्थविचारः – आचार्यः नावल्पाक्कम् रामानुज(एन् आर्) श्रीधरन् . . . ३८
९. माध्यन्दिनीयस्वरवर्णोच्चारणविमर्शः – डा. नारायणप्रसाद बरालः . . . . . . . . . . . . ४१
१०. धर्मलक्षणं तल्लक्ष्यं च – डा. एस्. वेङ्कटेशताताचारयः . . . . . . . . . . . . . . . . . ५४
११. आध्यात्मिकशिक्षाग्रन्थेषु प्रतिपादितमनोदुःखपरिहारोपायानाम् अध्ययनम् – डा. दयानिधि शर्मा ५९
१२. याज्ञवल्क्यस्मृतिमिताक्षरादिशा व्यवहाराङ्......विमर्शः – डा. आर् नवीन . . . . . . . . . ६६
१३. चिन्तनविचारः – डा. नारायणवैद्यः . . . . . . . . . . . . . . . . . . . . . . . . . . ६९
१४. सनातनी शैक्षिकानुशासनव्यवस्था – डा. डि. वेणुगोपालरावः . . . . . . . . . . . . . . ७२
१५. तन्यता – डा. अरविन्दकुमारसोमदत्तः . . . . . . . . . . . . . . . . . . . . . . . . . ७९
१६. महाभारते ज्योतिषम् – डा. रतनकुमारपाण्डेयः . . . . . . . . . . . . . . . . . . . . ८३
१७. भारतीयपरम्परायां तन्त्रशास्त्रस्य योगदानम् – डा. ओ. वि. शिबु गुरुपादम् . . . . . . . . ८८
१८. बृहच्छब्देन्दुशेखरदिशा भूवादिसूत्रस्य पदकृत्यविमर्शः – डा. ग्रन्थि वि लक्ष्मीकीर्तिसुधा . . . ९२
१९. शब्दार्थसम्बन्ध – डा. के. नारायणन् . . . . . . . . . . . . . . . . . . . . . . . . . ९६
२०. योगशास्त्रे वर्णितानां भुवनानां तन्निवासिनाञ्च परिचयः – डा. विश्वनाथ हेगडे . . . . . . . १००
२१. स्वभावोक्त्यलङ्कारखण्डनम् – डा. कोम्पेल्लि विनयकुमारः . . . . . . . . . . . . . . . १०५
२२. वेदेषु जीवनदर्शनम् – डा. दुर्गाशरणरथः . . . . . . . . . . . . . . . . . . . . . . . ११०
२३. सामान्यादिपदार्थानां बुद्धिसापेक्षताविचारः – डा. नारायण बि. राय्करः . . . . . . . . . . ११७
२४. वैदिकसाहित्यस्य कानिचित् जनहितकारिणि सूक्तानि – डॉ. शर्वाणी चट्टोपाध्यायः . . . . . १२१
२५. बाध्यबाधकभावः – डा. श्यामसुन्दरः ए . . . . . . . . . . . . . . . . . . . . . . . . १२४
२६. उत्पातसमीक्षा – डा. रमानन्द भट्टः एन्. . . . . . . . . . . . . . . . . . . . . . . . १२७
२७. श्रौतस्मार्तकर्मप्रयोगे अनुषङ्गाधिकरणन्यायसञ्चारः – श्री आदर्श विनायक भट्टः . . . . . . . १३६
२८. नान्तेभ्यः स्त्रियां प्रत्ययाः (सङ्गणकविधिभाषोपयोगी) – डा. शिवकुमारी काटूरि . . . . . . . १४०

२९. भारतीय-योग-परम्परायाः...सम्बन्धस्यानुशीलनम् – डॉ. रविकुमारः शास्त्री . . . . . . . . . १४४
३०. नियमपरिसंख्याविध्योः अपूर्वविधितः भेदविचारः – डा. गोविन्दगोपालकृष्णहेगडे . . . . . १५३
३१. विभक्त्यर्थसङ्घान्वयप्रकारचिन्तनम् – डा. राघवेन्द्रः पी. आरोळ्ळी . . . . . . . . . . . . १५५
३२. शास्त्रपरम्परायां शास्त्रशिक्षणस्य सम्प्रत्ययानां नवचिन्तनम् – डा. रामजियावन प्रजापतिः . . १५८
३३. कालप्रभेदाः – श्री ब्रजेशपाठकः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . १६४
३४. भूगर्भजलानां स्थानानि – डा. माचर्ल उमामहेश्वर रावु . . . . . . . . . . . . . . . . . . . . . . १६७
३५. क्षीरसागरात् चन्द्रोद्भवः - वैज्ञानिकविचारश्च – डा. एम्. श्रीनिवासमूर्तिः . . . . . . . . . . . . १७०
३६. गृहनिर्माणसमये द्वारस्थापनकाले अवधेयाः विचाराः – डा. गणेशकृष्णभट्टः . . . . . . . . . . १७३
३७. भूवादयो धातवः – डा. भारती मदनमोहन . . . . . . . . . . . . . . . . . . . . . . . . . . . . १७७
३८. प्रत्यक्तत्त्वप्रदीपिकोक्तदिशा स्वप्रकाशलक्षणविमर्शः – श्री ब्रह्मभट्ट नचिकेता सञ्जयकुमार् . . . १८०
३९. प्रागभावनिरूपणम् – श्री शशांक शिवराम भट्टः . . . . . . . . . . . . . . . . . . . . . . . . . १८७
४०. वर्तमानकाले ज्योतिषशास्त्रायुर्वेदयोः उपादेयता – डा. अभिषेकगौतमः . . . . . . . . . . . . १८९
४१. "अलम्" भूषणम् उत भावः – डॉ. आयुष दीक्षित . . . . . . . . . . . . . . . . . . . . . . . . १९३
४२. तस्यापत्यमिति सूत्रं किमर्थम् ? – डा. अरुणभट्टः . . . . . . . . . . . . . . . . . . . . . . . . . १९९
४३. भारतीयज्ञानपरम्परायां स्त्रीव्यक्तित्वविमर्शः – डॉ० छबिलालन्यौपानेः . . . . . . . . . . . . २०२
४४. ब्रह्मसूत्रीत्या ज्योतिश्शब्दार्थनिरूपणाधिकरणस्वरूपप्रतिपादनम् – श्री राहुलराजशेखरभट्टः . २०७
४५. संस्कृतरूपकेषु लौकिकन्यायाः – डा. रमेश चन्द्र बरमोला . . . . . . . . . . . . . . . . . . . २१०
४६. मीमांसाशास्त्रीयः अभिधाविज्ञानविमर्शः – श्री प्रशांत गावकर . . . . . . . . . . . . . . . . . २१४
४७. ज्योतिश्शास्त्रदृशा वृत्तिचिन्तनम् – डॉ. विवेकशीलपाठकः . . . . . . . . . . . . . . . . . . . . २१६
४८. 'पूर्वत्रासिद्धम्' इति सूत्रस्य.........कार्यासिद्धत्त्वमतनिरूपणम् – श्री नरसिंहगणेशभट्टः . . . . २२१
४९. बृहच्छब्देन्दुशेखरदिशा भूवादिसूत्रस्य पदकृत्यविमर्शः – डॉ. सौमित्र आचार्यः . . . . . . . . २२६
५०. स्तोकं पचति – श्री चन्द्रमौलि कल्याणः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २३२
५१. अद्वैतनयेऽर्थापत्तिप्रमाणम् – श्री लोकनाथ पण्डा . . . . . . . . . . . . . . . . . . . . . . . . . २३७
५२. पूर्वमीमांसाशास्त्रदिशा क्षणभङ्गवादखण्डनम् – प्रभातकुमारमण्डलः . . . . . . . . . . . . . . २४४
५३. शौनककृत-दत्तपुत्रविधानमातृकायाः.......विश्लेषणम् – सुश्रीः पूर्णिमा थापा . . . . . . . . . २४९
५४. श्लेषालङ्कारः – एस् माधवी . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २५६
५५. भाषावृत्त्यनुसारेण स्थानेऽन्तरतमः इति सूत्रपरिशीलनम् – श्री संखा सुभ्रा गच्छित् . . . . . २६१
५६. पाराशरोपपुराणे अद्वैततत्त्वानुरोधेन जडचेतनविचारः – श्री शक्तिप्रसादः महापात्र . . . . . २६७
५७. दुहादिद्विकर्मकधातुविमर्शः – श्री सौरव पोरेल् . . . . . . . . . . . . . . . . . . . . . . . . . २७१
५८. अभिराजराजेन्द्रमिश्रविरचित.........पर्यालोचनम् – श्री सुमन्तपात्रा . . . . . . . . . . . . . . . २८२
५९. अग्निपुराणान्तर्गतसमाससस्वरूपविमर्शः – श्री तिलकरामः . . . . . . . . . . . . . . . . . . . . २९१

# संस्कृतशिक्षकप्रशिक्षणपाठ्यक्रमस्वरूपचिन्तनम्

आचार्यः चन्द्रकान्तः*
के.सं.वि., रा.गा.परिसरः
शृङ्गेरी

लोके सर्वेषु अपि स्तरेषु पाठ्यक्रम एव छात्रस्य स्तरं शिक्षायाःगुणवत्तां शैक्षिकस्वरूपं सामाजिकपरिवर्तनं सामाजिकापेक्षां च सूचयति तथैव निर्धारयति। तत्रापि च विशेषेण एकविंशतिशतके विज्ञानस्य तन्त्रज्ञानस्य विस्फोटः सर्वेषु क्षेत्रेषु जातः जायमानश्च अस्ति। एतादृशेऽस्मिन् सन्दर्भे समाजनिर्मातृणाम् अध्यापकानां शिक्षाया बहुमहत्वपूर्णं स्थानं वर्वर्ति। कृत्रिमबुद्धिमत्तायाः प्रयोगोऽपि सर्वत्र प्राधान्यमावहद्वर्तते। शिक्षकः समाजस्य निर्माता यथा भवति तथैव समाजपरिवर्तकः समाजपरिवाहकःसंस्कृतेरुद्धारकःसंस्कृतिवाहकश्च वर्तते। अतःअध्यापकशिक्षायाः पाठ्यक्रमे एकविंशतिशतकानुकूलांशाः तथैव परम्परायाः संस्कृतेश्च संरक्षकांशाःअनिवार्येण भवन्ति चेदेव सुरक्षितसमाजस्य निर्माणं भवितुमर्हति। अतः पाठ्यक्रमःकृत्रिमबुद्धिमत्तांशसमन्वितः तन्त्रांशज्ञानसमन्वितः संस्कृतिबोधकांशसमन्वितश्च भवेदिति २०२०राष्ट्रियशिक्षानीतिः अभिप्रैति। तथा हि २०२०- राष्ट्रियशिक्षानीतेःचतुर्थाध्याये विद्यालयसम्बद्धं शिक्षाशास्त्रं कीदृशं भवेदित्युल्लेखसमये समग्राधिगमस्य एकीकृताधिगमस्य आनन्दाधिगमस्य रुचिपूर्णाधिगमस्य च प्राधान्यं प्रतिपादितं विद्यते। विद्यालये एतादृशमधिगमं सम्पादयितुं शिक्षकःतादृशकौशलपूर्णः तादृशशिक्षाशास्त्राभिज्ञश्च तत्रादौ भवेत्। तदर्थम् अध्यापकशिक्षाया पाठ्यक्रमः सन्तुलितःसमावेशी प्रोन्नतः आनन्दपूर्णः कौशलबोधकःभवेत्। समग्राधिगमज्ञानसम्पादनाय अध्यापकशिक्षायाः पाठ्यक्रमे सांस्कृतिकाधुनिकतान्त्रिकप्राविधिकविषयाणां समुचितः समावेशः भवेदेव। संस्कृतशिक्षकशिक्षायाःपाठ्यक्रमःसामान्यशिक्षकशिक्षापाठ्यक्रमापेक्षया अधिकमहत्त्वपूर्णः वर्तते। यतो हि "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा" तस्मात् भारतस्य प्रतिष्ठायाः संस्कृतेश्च रक्षणदायित्वं संस्कृतशिक्षकस्य शिरसि समायाति। अतः संस्कृतशिक्षकशिक्षायाः पाठ्यक्रमःसंस्कृतिप्रबोधकःभवेदेव। प्रासङ्गिकतया वैज्ञानिकतया प्रविधिना च समलङ्कृतःपाठ्यक्रमः भवेत्। साम्प्रतं विद्यमानः पाठ्यक्रमः पाश्चात्यशिक्षाशास्त्रम् अधिकतया समाश्रित्य वर्तते। तत्र संस्कृतेः परम्परायाश्च संरक्षणार्थम् अपेक्षितःकश्चन लघुबिन्दुः अपि न वर्तते। न एतावदेव समकालिकः तन्त्रांशबोधकः बिन्दुःअपि न दृश्यते। अतः२०२०-राष्ट्रियशिक्षानीतिःएतादृशान् अंशान् पाठ्यक्रमे योजयितुमेव आग्रहं करोतीति विशेषः। स्नातकस्तरे संस्कृतच्छात्रःशास्त्रं पठित्वा, शिक्षकःभवितुं शिक्षाशास्त्रे यदा प्रविशति तदा सम्पूर्णरूपेण आधुनिकशिक्षाशास्त्रीयं वा पाश्चात्यशिक्षाशास्त्रीयं वा पद्धतिविशेषं पठितुमनिवार्येण प्रतिबद्धो भवति। तथा च पूर्वं स्नातकस्तरे पठितां शास्त्रीयां पद्धतिं स्मरन् शिक्षाशास्त्रीयां पद्धतिं हीनभावनयावलोकयितुं प्रवृत्तो भविष्यति। शास्त्राध्ययनसमये प्रयुक्ताःबोधनपद्धतय एव भारतीयाः, शिक्षाशास्त्रे सर्वा अपि पाश्चात्याः पद्धतयः इति चिन्तयन् शिक्षाशास्त्रे भारतीयं किमपि नास्ति इति कथयितुं प्रवृत्तो जायते। अतः भारतीयाःशिक्षाशास्त्रीयाः बोधनपद्धतयःशिक्षाशास्त्रे अथवा अध्यापकशिक्षायां पाठ्यक्रमरूपेण समायोज्य बोध्यन्ते चेत् तदा संस्कृताध्यापकशिक्षा आनन्दपूर्णा समग्रा वस्तुतःसमेकीकृता च भविष्यति। उदाहरणार्थं वक्तव्यं चेत् पाश्चात्य पद्धतिमाश्रित्य वाक्यप्रयोगविधिः पर्यायपदविधिः इत्यादिकं बोध्यते। यदि तत्स्थाने शास्त्रीयाःशक्तिग्रहविधयःबोध्यन्ते तर्हि सः छात्रः आनन्देन स्वीकरिष्यति। भारतीयज्ञानपरम्परा अपि संरक्षिता प्रबोधिता भविष्यति।

एकविंशतिशतके पाठ्यक्रमविकासः सङ्कीर्णजगतः मानवेषु परस्परं सम्पर्कसाधनार्थं, छात्राणां निर्माणाय च

***सम्पर्कसूत्रम्** – 94816 52069, Email – chandrakantgi@gmail.com

महत्त्वपूर्णपरिवर्तनं काङ्क्षति । तदा पाठ्यक्रमो नाम किम् इति प्रश्नः समुदेति । एतस्मिन् विषये हेन्रि महोदयः वदति यत् पाठ्यक्रमः तादृशं वाहनमस्ति यच्च शैक्षिकोद्देशानां परिपूर्तिं सम्पादयितुं सक्षमः भवति इति । The curriculum may be considered as the vehicle by and through which we hope to achieve the objectives of education -Henry Jay Auto Bhabha Institute of Education.

तथैव क्रो तथा क्रो महोदयः वदति यत् शैक्षिकोद्देशानां पूर्त्यर्थं विद्यालयस्य सम्पूर्णानुभवानामवताररूपोऽस्ति पाठ्यक्रमःइति । Curriculum embodies all the experience which are utilized by the school to attend the aims of education-Crow and Crow.

अतः एकविंशतिशतके पाठ्यक्रमविकासस्य दृष्टिकोणः पारम्परिकशिक्षाप्रदानेन सह नमनीयः छात्रकेन्द्रितः प्रविधिपरिपोषितः च स्यादेव । एवञ्च शिक्षकशिक्षा पाठ्यक्रमः छात्रकेन्द्रितःविषयकेन्द्रितश्च भूत्वा २०२० राष्ट्रियशिक्षानीतेःलक्ष्यं पूरयन्, समसामयिकसमाजाय योग्यान् शिक्षकान् निर्मातुं सक्षमःनूतनदृष्टिकोणयुतश्च स्यात् । तादृशः नूतनदृष्टिकोणः विशेषेण कैश्चिबिन्दुभिः प्राधान्येन संयुक्तः वर्तेत । ते च बिन्दवःअत्र अधः समुल्लिखिताः तथा तेषां वैशिष्ट्यानि अत्र सङ्कलितानि वर्तन्ते । तथा हि-

1. **अन्तर्विषयस्याधिगमः** - परस्परं सम्बद्धानां विषयाणां मध्ये ऐक्यसम्पादनेन वास्तविक जगति समग्रबोधं प्रतिपादयेत् । २०२० राष्ट्रियनवशिक्षानीतिरपि अन्तर्विषयाधिगमात् बहुविषयाधिगमं प्रति शिक्षाव्यवस्था परिकल्पिता भवेदित्यभिप्रैति । उल्लिखति च भारते बहुविषयाधिगमपरम्परा आसीद्यथा नलन्दादिषु बाणभट्टोक्ताः चतुष्षष्ठिकलाः अध्याप्यन्ते स्म इति । (अ.११.१)
2. आधारभूतं निष्पीडितञ्च शिक्षणम् (Stem & Steam Education) - आधारभूतज्ञानसम्पादनेन सह विज्ञानप्रविधितन्त्रज्ञानकलासु गणितादिविषयेषु च नूतनज्ञाननिर्माणं, समस्यासमाधानं प्रोत्साहयेत् ।
3. **डिजिटलसाक्षरता** - प्रविधिशास्त्रस्य समायोजनार्थम् अधिगमस्य गुणवत्तासम्पादनार्थम्, अन्तर्जालीयशिक्षणस्य समायोजनार्थञ्च अनिवार्येण डिजिटल् साक्षरताविषये विशेषेण अवधानं देयं वर्तते ।
4. **कौशलविकासः** – सांवेगिकबुद्धेः रचनात्मकसम्प्रेषणस्य विमर्शात्मकचिन्तनस्य विषये प्राधान्यप्रदानेन मृदुकौशलविकासः सम्पादयितुं शक्यते । अतः कौशलविकासबिन्दुः समावेशितःस्यात् ।
5. **निजीकृताधिगमः** (Personalised Learning) - बहुविधाधिगमस्य, बहुविधयोग्यतानां च सम्पादनार्थं अस्यावश्यकता वर्तते । साम्प्रतिके काले समूहमाध्यमद्वारा बहवो हि विषया अधिगता भवन्ति । अतः "यो यस्मिन् कर्मणि कुशलःतं तत्र नियोजयेदिति" न्यायानुसारं व्यक्तिः इच्छानुसारमधिगन्तुमवसरः पाठ्यक्रमे प्रकल्पनीयो वर्तते ।
6. **वैश्विकदृष्टिकोणः** - सांस्कृतिकवैविध्यावगमनाय अन्ताराष्ट्रियपरिज्ञानाय वैश्विकविषयाणां समावेशः अपेक्षितः । "समग्रं विश्वं भवत्येकनीडमिति" भारतीयं भव्यं यच्चिन्तनमस्ति तद् पाठ्यक्रमस्य मुखं स्यात् ।

## पाठ्यक्रमविकासे विद्यमानपथ्याह्वानानि (Challenges)

1. अतिवेगेन परिवर्तितानां प्रोन्नतानाञ्च प्राविधिकतन्त्राणां साम्प्रदायिकसन्दर्भे समन्वयःक्लेशकरः विद्यते । अद्य विद्यमानः प्रविधिः श्वः न भविष्यति । एतदनुगुणं पाठ्यक्रमस्य परिवर्तनं सम्पादयितुं समर्थःप्रविधज्ञानसम्पन्नःअनुभवी प्राध्यापकानामभावोऽपि परिपीडयति प्रशासनम् ।

2. वैविध्यस्य समावेशार्थं समावेशीशिक्षायाः प्रचारः प्रसारः समन्वयश्च । समावेशात्मकशिक्षायाः समाजे प्रसारः अपेक्षितमात्रायां नास्ति इत्यस्मात् कारणात् सामाजिकाः अभिभावकाःच झटिति नावीन्यं नाङ्गीकुर्वन्ति । परम्परागतपद्धत्या सह नूतनज्ञानस्य समावेशे महत्काठिण्यमनुभूयते ।
3. आकलनमूल्याङ्कनयोः पद्धतयः, तेषामुपकरणनिर्माणम् । आधुनकरीत्या मूल्याङ्कनपद्धतिमनुसर्तुं ग्रामीणप्रदेशेषु सौविध्यस्याभावःपरिलक्ष्यते । तेन गुणवत्तासम्पादने प्रशिक्षणे एकरूपतासम्पादने च बाधः जायते ।

## भविष्यस्य दृष्टिः

1. कृतकबुद्धिमत्तायाः समायोजनम् । तदाधारेण बोधनम् । भविष्यं मनसि निधाय पाठ्यक्रमःनिर्मातव्यः । प्राविधिकप्रभावेण सर्वत्र बालाःअतिसंवेदनशीलाःशठाश्च जायमानाः सन्ति । तेषां मानसिकतामधीत्य शिक्षका पाठनं कर्तुं मनोवैज्ञानिकदृष्ट्या प्रोन्नताः प्रबुद्धा यथा स्युः तथा मनोविज्ञानं शान्तिशिक्षां प्रविधिविज्ञानं च पाठ्यक्रमे समायोजनीयमस्ति ।
2. समूहमाध्यमद्वारा शिक्षणे वास्तविकतायाः परिज्ञानेन सह अधिगमतल्लीनतायाःसम्पादनम् कर्तुमपेक्षितबिन्दवः प्रशिक्षणपाठ्यक्रमे अन्तर्भावनीया वर्तन्ते ।
3. उद्यमसमाजविद्यालयेषु परस्परं समन्वयसाधनम् । उद्यमशीलता लोके सर्वत्र प्राधान्यमावहद्वर्तते । उद्यमेषु सैद्धान्तिकज्ञानापेक्षया कौशलानां प्राधान्यं भवति । यदा कौशलानां कृते प्राधान्यं समायोज्यते तदा प्रायगिकविषया प्राधान्यं प्राप्नुवन्ति । परन्तु समाजे सामञ्जस्यसम्पादनाय सैन्द्धातिकज्ञानस्यावश्यकता अधिका वर्तते । विद्यालये एतयोः विषययोः सामञ्जस्यं महते क्लेशाय कल्पते ।

एतादृशसन्दर्भे शिक्षकशिक्षायाः पाठ्यक्रमः प्रतिमानपरिवर्तनानुरुपी भवेत् । यदा यः विषयःसामाजिकमान्यतामधिक-तया प्राप्नोति समाजोपयगी जीवनोपयोगी च भवति तदा तस्य विषयस्य समायजनं कर्तुं पाठ्यक्रमे अवसरः स्यात् । प्रशिक्षणाभिकरणमपि एतद्दिशि अवधानं दद्यात् ।

## पाठ्यक्रमस्य स्वरूपम्

1. आधारभूतविषयाः (Fundamental Subjects)- अत्र संस्कृतशिक्षकः भूत्वा साफल्यं प्राप्तुमपेक्षिताः संस्कृतवाङ्मयविषयाः समायोजनीयाः ।
2. शिक्षाशास्त्रीयविषयाः- प्रभावपूर्णशिक्षणपद्धतयः शैक्षिकव्यूहाश्च समायजनीयाः । तथैव मनोविज्ञानविषयाःआ-धुनिकप्राविधिकविषया पाठ्यक्रमे अनिवार्येण भवेयुः ।
3. प्राविधिकसाक्षरताधिगमः । अत्र प्रविधिसम्बद्धनूतनप्रवृत्तीनामभ्यासाः समायोजनीयाः ।
4. सांस्कृतिकविषयाः- विविधतायाः अवबोधः सांस्कृतिकावबोधश्च
5. समस्यासमाधानम् ।
6. विमर्शात्मकचिन्तनम् ।

## पाठ्यक्रमनिर्माणे अवधेयाः (अन्तर्भाव्याः) अंशाः

1. **एकविंशतिशतकस्य कौशलानि -**


ISSN : 2249-538X

1.1 विमर्शात्मकं कौशलं तथा चिन्तनस्य समस्यासमाधानस्य च कौशलम् ।
1.2 सम्प्रेषणस्य कौशलम् । यस्य च विषये महाकविः कालिदासोऽप्यब्रवीत् यथा –

**"श्लिष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता ।**
**यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव" ॥**

1.3 नूतननिर्मित्तेः अन्वेषणकौशलम् । अर्थात् नूतनज्ञानांशस्य अन्वेषणानुसन्धानाभ्यां लोकर्पणं भवेत् । रचनात्मकतायाः शक्तिःशिक्षकेषु वर्धेत ।
1.4 डिजीटल् साक्षरतासम्पादनकौशलम् । प्रायःसर्वेऽपि ज्ञानसम्बद्धांशाःएकविंशतिशतकेस्मिन् अन्तर्जाल-माध्यमेनोपलभ्यन्ते अतःडिजिटल्साक्षरताया आवश्यकताःशिक्षकेषु अपरिहार्याः सन्ति । तस्मात्तादृश-कौशलस्य सम्पादनाय पाठ्यक्रमःसमर्थः यथा स्यात्तथा निर्माणस्यानिवार्यता वर्वर्ति ।

2. **समावेशीशिक्षा** - २०२० राष्ट्रियनवशिक्षानीतौ समेषामपि समानशिक्षाप्रदानार्थं समावेशितशिक्षायाःअनिवार्यता प्रतिपादिता वर्तते । ६.१

2.1 विविधाधिगमावश्यकता कथनम् ।
2.2 सांस्कृतिकदायित्वम् ।
2.3 सामाजिकसांवेगिकाधिगमः ।

3. **प्रविध्याधारिताधिगमः** -

3.1 शैक्षिकप्रविधिशास्त्रसमावेशः ।
3.2 अन्तर्जालीयाधिगमसमावेशः ।
3.3 डिजिटलस्रोतसां उपकरणानाञ्च समावेशः ।

4. **प्रायोगिकानुभवः** -

4.1 अधिकृतपाठनानुभवसमायोजनम्
4.2 परामर्शनं मार्गदर्शनञ्च । (Mentorship)
4.3 प्रतिक्रियात्मकाभ्यासः

## पाठ्यक्रमस्य उपागमाः तदुपस्थापनञ्च

1. **निर्मितिवादोपागमः** (Constructive Approach) -

(क) छात्रकेन्द्रिताध्ययनम् ।
(ख) सक्रियाधिगमव्यूहाः ।
(ग) योजनाधारिताधिगमः ।

2. **अन्तर्विषयोपागमः, एकीकृतपाठ्यक्रमोपागमश्च**

(क) प्रधानविषयेण सम्बद्धानामन्यविषयाणां समायोजनम् ।

(ख) प्रपञ्चस्य वास्तविकतायाः अनुप्रयोगः ।

3. **स्थितिस्थापकप्रतिकृतीनामुपस्थापनस्योपागमः**

(क) अन्तर्जाल (Online) पाठ्यक्रमः ।
(ख) हैब्रिड पाठ्यक्रमः ।

4. **आकलनं मूल्याङ्कनञ्च**

(क) स्वयमाकलनं प्रतिक्रिया च ।
(ख) निरन्तरप्रतिपुष्टिः ।

5. **पथ्याह्वानमवसराश्च (पन्थाह्वानानि)**

(क) परिवर्तनस्याभिमुखीकरणसामर्थ्यम् ।
(ख) परिमितस्रोतांसि ।
(ग) सैद्धान्तिकप्रायोगिकयोः सन्तुलनसामञ्जस्ययोः स्थापनम् ।

6. **अवसराः**

(क) सम्मिश्रणस्य सहभागित्वस्यावसराः ।
(ख) प्रविधिशास्त्राधारितव्यावसायिकविकासस्यावसराः ।
(ग) वैश्विकसम्पर्कस्य ज्ञानविनिमयस्यावसराः ।

## उपसंहारः (Conclusion)

एकविंशतिशतके शिक्षकशिक्षायाः पाठ्यक्रमनिर्माणे दूरदर्शिचिन्तनम् (F Thinking), आविष्कारोपागमः (Innovative Approach)च अपेक्षते । एकविंशतिशतकस्य कौशलानामेकीकरणेन समावेशीशिक्षायाः सुसमर्थनेन प्रविधेः सम्प्रसारणेन च सह एव शिक्षकशिक्षाकार्यक्रमः संकीर्णस्य जगतः आधुनिककक्ष्याप्रकोष्ठस्य कृते समुचितं शिक्षकं निर्मातुं शक्नोति । कृत्रिमबुद्धिमत्तायाः यान्त्रिकाधिगमस्य च एकीकरणमपि भवेत् । वैश्विकशिक्षकशिक्षातन्त्राणां समन्वयः भवेत् । निरन्तरं पाठ्यक्रमस्य परिशीलनं प्रोन्नयनञ्च अपेक्षते । शिक्षकशिक्षाविषये निरन्तरमनुसन्धानेन शिक्षकशिक्षायाः विकासः सम्पादनीयः वर्तते ।

## सहायकग्रन्थसूची


(१) अध्यापकशिक्षा, डा.प्रह्लाद रा. जोशी, २००७ राष्ट्रियसंस्कृतविद्यापीठम् तिरुपतिः ।
(२) व्यक्तित्त्व का मनोविज्ञान, डा.अरुणकुमार सिंह और आशिषकुमार सिंह २०१७ मोतिलाल बनारसीदास नवदेहली ।
(३) उच्चतर शिक्षामनोविज्ञान, डा.एस्.पी.गुप्ता और अलका गुप्ता २०१० शारदापुस्तकभवन इलाहाबाद ।
(४) राष्ट्रियशिक्षानीति २०२० ।
(५) संस्कृत शिक्षण, डा.रघुनाथ सफ़ाया,२०११ हरियाणा साहित्य अकादमी पंचकूला हरियाणा ।
(६) विद्यालयप्रशासनं सङ्घटनञ्च, डा.सन्तोषमित्तलः,डा.फ़तेहसिंहः २००९ राष्ट्रियसंस्कृतसंस्थानम् नवदेहली ।



ISSN : 2249-538X

# मार्गनिर्देशः (Guidance)

आचार्यः रामचन्द्रुल बालाजि*
के.सं.वि., रा.गा.परिसरः
शृङ्गेरी

***लेखसारः*** *–सांप्रतिके काले प्रायः सर्वत्र छात्रेषु अशान्तिः(Unrest) दृश्यते । तत्र बहूनि कारणानि वर्तन्ते । अतः निर्देशनस्य आवश्यकथा वर्तते । यः कोपि मनुष्यः वाञ्छितलक्ष्यप्राप्तौ समस्यानां परिहारे च यदा असमर्थः भवति तत्परिहारमार्गान् ज्येष्ठेभ्यः,आनुभाविकेब्यः स्वीकरणमेव मार्गनिर्देशनं नाम्ना उच्यते । निर्देशनस्य उद्देश्यानि, निर्देशनस्य प्रकाराः, शैक्षिकमार्गनिर्देशनम्, शैक्षकनिर्देशनस्य उद्देश्यानि, व्यावासायिकनिर्देशनम्, व्यावसायिकनिर्देशनस्य आवश्यकता, व्यापसायिकनिर्देशनप्रक्रिया च अस्मिन् प्रबन्धे निरूप्यते ।*

सांप्रतिके काले प्रायः सर्वत्र छात्रेषु अशान्तिः(Unrest) दृश्यते । तत्र बहूनि कारणानि वर्तन्ते । यथा भाविष्यद्विषये अनिश्चितत्वं, राजकीयेषु छात्राणाम् अनावश्यकप्रवेशः, सर्वत्र दृश्यमानासमानताः, पर्याप्तरूपेण व्यवस्थानाम् अभावः, कठिनप्रतिस्पर्धाः (Competition), सांवेगिकस्थैर्याभावः(Emotional Imbalances), गृहे नैतिकस्तराणां लोपः, सम्मर्दपरिवारः, सामाजिकस्थितीनां प्रभावः, धार्मिक-अन्धविश्वासः, विद्यालये दोषयुक्तपाठ्यक्रमः, नैतिकशिक्षायाः अभावः, अध्यापकस्तरेषु न्यूनताः, दोषपूरितपरीक्षा व्यवस्था इत्यादीनि । अतः छात्राः किं कर्तव्यमिति विमूढाः सन्तः कुमार्गेषु प्रवर्तन्ते इति प्रत्यक्षतया अनुभूयमानविषयः । अपि च पूर्वकाले यत्र संयुक्तपारिवारिकस्थितिः (Joint Family System) भवति स्म । तेन गृहे विद्यमान ज्येष्ठाः कनिष्ठानां समस्या परिहाराय सूचनादानार्थम् अवकाशः भवति स्म । अधुनातन काले सा व्यवस्था एव मृग्या । अतः सर्वेषु क्षेत्रेषु मार्गनिर्देशनस्यावश्यकता महती वर्तते ।

यः कोपि मनुष्यः वाञ्छितलक्ष्यप्राप्तौ समस्यानां परिहारे च यदा असमर्थः भवति तत्परिहारमार्गान् ज्येष्ठेभ्यः,आनुभाविकेब्यः स्वीकरणमेव मार्गनिर्देशनं नाम्ना उच्यते । तत्र काश्चन परिभाषाः –

स्किन्नर् महोदयः एवं वदति "युवकानां कृते आत्मनः विषये, अन्येषां विषये, परिवेशे च साञ्जस्यसम्पादयितुं साहाय्यप्रदानप्रक्रिया एव मार्गनिर्देशनं भवति ।"

Guidance is a process of helping young person's to learn to adjust to self, to others and circumstances. - **Skinner**

जोन्स् महोदयः एवं वदति " निर्देशनं नाम सूचनादानं, पथप्रदर्शनं भवति । एतत् साहाय्यापेक्षया अधिकं भवति । To guide means to indicate, to point out, to show the way. It means more than to assist. -**Jones**

उपर्युक्त परिभाषानुसारं ज्ञायते यत् मार्गनिर्देशनम् एकं साहाय्यं भवति यत् योग्येन आनुभविकेन प्रक्षितव्यक्त्या च दीयमानं भवति । तेन अन्यपुरुषः स्वकीययोग्याताः ज्ञात्वा विकासञ्च प्राप्य स्वकीयसमस्यानां समाधानं स्वयमेवान्वेष्टुं शक्नोति ।

## निर्देशनस्य उद्देश्यानि

१. व्यक्तेः योग्यतानां शक्तीनां वा परिज्ञानम् ।

***सम्पर्कसूत्रम्** - 9448618043, Email- drrbalaji2018@gmail.com

२. व्यक्तेः क्षमतानां विकासे सहाय्यदानम् ।
३. व्यक्तिः स्वकीयक्षमतानुसारं शैक्षिक-व्यावसायिक-अवसरज्ञानप्राप्तिः ।
४. व्यक्तिः स्वकीयवातावरणेन साकं समायोजने साहय्यता प्रदानम् ।
५. व्यक्तेः स्वकीयसमस्यानां समाधानाय योग्यताप्राप्तिः ।

## निर्देशनस्य प्रकाराः(Types of Guidance)

१९३३ वर्षे विल्लियम् मरेटिन् प्रोक्टर् ( William Martin Procter ) महोदयः तस्य Educational and Vocational Guidance इत्यमिन् पुस्तके षट् प्रकारकानि निर्देशनानि प्रदर्शितवान् ।

१. व्यावसायिकनिर्देशनम् ।
२. शैक्षिकनिर्देशनम् ।
३. सामाजिक-नागरिककार्येषु निर्देशनम् ।
४. स्वास्थ्य-शारीरिकसमस्यासु निर्देशनम् ।
५. चरित्रनिर्माणाय निर्देशनम् ।
६. समयस्य उत्तम-उपयोगाय निर्देशनम् ।

तत्र विशेषतया विद्यालयेषु प्रधानतया प्रकारद्वयम् आवश्यकम् वर्तते ।

## शैक्षिकमार्गनिर्देशनम्

शिक्षाक्षेत्रे विद्यालयेषु पाठ्यविषयचयनार्थं, भाविशिक्षायाः निर्धारणार्थम्, विद्यालये सामञ्जस्यसम्पादनाय, शैक्षिकप्रक्रि-यायां वाञ्छितपरिवर्तनम् आनेतुं च शैक्षिकमार्गनिर्देशनम् आवश्यकं भवति ।

## शैक्षकनिर्देशनस्य उद्देश्यानि

१. छात्राणां कृते शिक्षासम्बद्धसूचनानां ज्ञानप्राप्तौ साहाय्यकरणम् ।
२. विभिन्नप्रकारकपाठ्यक्रमाणां ज्ञानप्रदानम् ।
३. विभिन्नशिक्षासंस्थानां परिचयदानम् ।
४. प्रवेशसम्बद्धयोग्यतानां विषये सूचनाप्रदानम् ।
५. विभिन्नशैक्षकपरिवेशेषु समायोजनाय साहाय्यदानम् ।
६. प्रतियोगिपरीक्षासुचनाप्राप्तौ साहाय्यदानम् ।
७. छात्राणां विभिन्नरुचीनां क्षमतानां च अवगमनम् ।
८. उद्योगप्राप्त्यर्थ्यम् आवश्यकपाठ्यक्रमाणां चयनार्थं मार्गप्रदर्शनम् ।

तत्रादौ प्रत्येकं छात्रस्य विभिन्नविषयकयोग्यताः ज्ञात्वा तदनुरूपेण मार्गनिर्देशनं कर्तव्यं भवति । अस्मिन् निर्देशने आवश्यकविषयाणां सङ्ग्रहणम् (Collecting Information), मार्गदर्शनप्रदानम् (Rendering Guidance ), अनुवर्तनकार्यक्रमः ( Follow Program ) इति त्रीणि सोपानानि भवन्ति ।

## व्यावासायिकनिर्देशनम्

आधुनिकयुगे बहवः जनाः शिक्षां प्राप्याऽपि आजीविकां प्राप्तये असमर्थाः दृश्यन्ते । अतः आधुनिकयुगेऽस्मिन् व्याव-सायिकमार्गदर्शनम् अत्यन्तप्रधानं भवति । शैक्षिकसंस्थासु छात्रेभ्यः विभिन्नव्यवसायानां ज्ञानप्रदानं छात्रासामर्थ्यानुसारं योग्यव्यवसायचयनम् इत्यादि कार्येषु क्रियमाणसाहाय्यमेव व्यावसायिकमार्गदर्शनमित्युच्यते ।


ISSN : 2249-538X

## व्यावसायिकनिर्देशनस्य आवश्यकता (Needs for Vocational Guidance )

व्यावसायिकनिर्देशने अधोलिखित दृष्टिकोणानाम् आवश्यकता वर्तते ।

१. विभिन्नप्रकारकव्यवसायानाम् उपलब्धिः ।(Variety of Occupations)
२. व्यक्तिगतविभिन्नतानां ज्ञानम् ।(Individual Differences)
३. जीविकोपार्जनदृष्टिकोणः ।(Livelihood View Point)
४. स्वास्थ्यसम्बद्धदृष्टिकोणः ।(Health View Point)
५. समायोजनदृष्टिकोणः ।(Adjustable View Point)
६. मानवसंसाधनानाम् उपयोगः ।(Maximum use of human resources)

## व्यापसायिकनिर्देशनप्रक्रिया (Process of Guidance)

व्यावसायिकनिर्देशनम् एका उद्देश्याधारिता, व्यवस्थिता, योजनाबद्धप्रक्रिया भवति । तत्र एतानि सोपानानि भवन्ति ।

१. औपचारिकभाषणानि ( Orientation Tasks )
२. प्राथमिकसाक्षात्कारः ( Initial Interview )
३. समाजिकार्थिकस्थितेश्च अध्ययनम् (Social and Economic Status Study)
४. मनोवैज्ञानिकपरीक्षणम् (Physiological Testing )
५. विद्यालयजीवनस्य अध्ययनम् ( Study of School Life )
६. स्वास्थ्यपरीक्षणम् (Medical Examination)
७. अन्तिमसाक्षात्कारः (Final Interview)
८. अन्यविशेषज्ञैः सह विचारविनिमयः (Exchange of Opinion with Other Experts)
९. प्रतिवेदनालेखनम् (Report Writing)
१०. अनुवर्तिकार्यम् ( Follow of Work)

एवं छात्रयोग्यानुगुणं मार्गनिर्देशनेन छात्रेषु विद्यमान अशान्तेः निवारणं कर्तुं शक्यते । छात्राः स्व योग्यतानुगुणम् उत्तमशिक्षाक्षेत्रे प्रविश्य समीचीनव्यवसायञ्च प्रप्तुम् शक्नुवन्ति ।

## परिशीलितग्रन्थसूची-

१. उच्चतर शिक्षामनोविज्ञान-सुशीलगुप्ता & आलकगुप्ता-शारदापुस्तकभावन, इलहबाद् ।
२. शिक्षामनोविज्ञान - मङ्गल एस्.के. - पि.एच्.ऐ. लेर्निन्ग् प्रैवेट् लिमिटेड् - नई दिल्ली ।
३. शिक्षायाः मानोवैज्ञानिकाधाराः-डा.पद्ममित्रश्रीनिवासः,जगदीशसंस्कृतपुस्तकालयः - जयपुरम् ।

# मधुसूदनसरस्वत्याः भक्तिसिद्धान्तः

प्रो. आर् प्रतिभा*
के.सं.वि.गुरुवायुर् परिसरः
केरलम्

***लेखसारः*** *– अद्वैतवेदान्तशास्ते पारंगतः मधुसूदनसरस्वतिः भक्ति शास्त्रेऽपि पारं गतो भवति । मधुसूदनसरस्वतिप्रणितानाम् अद्वैतवेदान्तशास्त्रप्रतिपादकांनां अद्वैतसिद्धिः, अद्वैतरत्नरक्षणम् सिद्धान्तबिन्दुः इत्यादि ग्रन्थेषु ब्रह्म ज्ञानमेव मोक्षसाधनमिति समर्थितम् । अद्वैताचार्याणां मध्ये मदुसूदनसरस्वत्या एव न केवलं ज्ञानमेव मोक्षसाधनम् अपि तु भगवद्विषया अद्वितीया भक्तिरपि मोक्षसाधनमिति समर्थितम् । भक्तिज्ञानमार्गयोः तुल्यं प्राधान्यमेव अनेनाचार्येण दत्तम् । इदमेव अद्वैताचार्याणां मध्ये मधुसूदनसरस्वत्याः वैशिष्ट्यम् । अद्वितीया भगवद्भक्तिरपि मोक्षसाधनमिति भगवद्भक्तिरसायने, भागवतपुराण प्रथमश्लोकव्याख्यायां, महिम्नस्तोत्रटीकायां, भगवद्गीता गूढार्थदीपिकायां च मधुसूदनसरस्वत्या समर्थितम् । अद्वैताचार्येषु भक्तिसिद्धान्तस्य पूर्णता मधुसूदनसरस्वत्यामेव द्रुष्टुं शक्यते ।*

*निर्गुणब्रह्मोपासना साधारणानां कृते दुष्करो भवतीत्यनेन भाष्यकारेण शंकरभगवत्पादेन भक्तिरपि परम्परया मोक्षकारणमिति समर्थितम् । अत एव भाष्यकारेण सौन्दर्यलहरी, शिवानन्दनहरी, आनन्तलहरी इत्यादि स्तोत्रकाव्यानां रचना कृता । "मोक्षसाधनसामग्रयां भक्तिरेव गरियसी"[१] "स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते ।"[२] इति भक्तिमार्गस्य मोक्षसाधनत्वं भगवत्पादैः समर्थितम् ।*

***"सरस्वत्याः पारं वेत्ति मधुसूदनसरस्वती मधुसूदनसरस्वत्याः पारं वेत्ति सरस्वती ॥***

*इति मधुसूदनसरस्वत्याः पाण्डित्यातिशयं प्रसिद्धं वर्तते ।*

***"अद्वैते भक्तिशास्त्रे च परं पारंगतम् । गूढार्थदीपिकाकारं वन्दे श्रीमधुसूदनम् ॥***

## उपक्रमः

अद्वैतवेदान्ताचार्येषु भक्तिसिद्धान्तस्यपूर्णता मधुसूदनसरस्वत्यामेव दृश्यते । भागवतपुराणानुसारमेव मधुसूदनसरस्वत्या भक्तिसिद्धान्तः प्रतिपादितः । निरतिशयानन्दावाप्तिः परमपुरुषार्थप्राप्तिश्च न केवलं ज्ञानमार्गादपि तु भक्तिमार्गादपि सिध्यतीति भक्तिरसायनादिषु आचार्येण स्पष्टतया प्रतिपादितम् । भागवतपुराणोक्त उदात्तभक्तिभावनया साकं तादात्म्यं प्राप्य भक्तिरेवमुक्तिरिति अनेन आचार्येण प्रतिपादितम् । [३] किञ्च भगवतो नीलाचलनिवासस्य भजनाञ्जननिर्मलीकृतज्ञानचक्षुः प्रत्यक्षेणैव अज्ञाननिवृत्तिमनुभवतीति । निरतिशयानन्दावाप्तिः परमपुरुषार्थप्राप्तिः कथं सिध्यति इत्युच्यते ।

नवरसमिलितं वा केवलं वा पुमर्थं परममिह मुकुन्दे भक्तियोगं वदन्ति । निरुपम सुखसम्बिद्रूपमस्पृष्टदुःखम् तमहमखिलतुष्ट्यै शास्त्रदृष्ट्या व्यनज्मि ॥ इति भक्तिरसायनस्थ प्रथमश्लोके भगवद्भक्तेः (कृष्णभक्तेः) उदात्तभावः दृश्यते ।

---

***सम्पर्कसूत्रम्*** - 9495779682, Email - rpratibha1964@gmail.com

[१] विवेकचूटामणिः 32

[२] विवेकचूटामणिः 32

[३] वेदान्तकल्पलतिका

तद्यथा -

**वंशीविभूषितकरान्नवनीरदाभात् पीताम्बरादरुणबिम्बफलाधरोष्ठात् ।**
**पूर्णेन्दुसुन्दरमुखात् अरविन्दनेत्रात् कृष्णात् परं किमपि तत्त्वमहं नजाने ॥**[१]

इति ।

कर्मयोगः, अष्टांगयोगः, भक्तियोगः, ज्ञानयोगश्चेति चत्वारः पुमर्थत्वेन प्रसिद्धाः योगा इति भक्तिरसायने उक्तम् । कर्मयोगः निष्कामरूपेण अन्तःकरण शुद्ध्यर्थं अनुष्ठेयः भक्तिज्ञानयोगौ मोक्षप्रापकौ अपि तत्र मार्गौ भिन्नौ । "द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते" इति भक्तिलक्षणम् मधुसूदनसरस्वत्या उक्तम् । भक्तिज्ञानमार्गयोरधिकारि भेदं च प्रतिपादितम् । भक्तिः ब्रह्मविद्यातः विलक्षणा यतोऽहि ब्रह्मविद्या निर्विकल्पकमानसी वृत्तिः, भक्तिस्तु सविकल्पकमानसी वृत्तिः । भक्तिः द्रवीभावपूर्विकाहि मनसो भगवदाकारता सविकल्पकवृत्तिरूपा भक्तिः, द्रवीभावानुपेताऽद्वितीयात्ममात्रगोचरा निर्विकल्पकमनोवृत्तिः ब्रह्मविद्या इति ।

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति" इति भरतमुनिवाक्यमुद्धृत्य भक्तिरसोद्भवं समर्थयति मधुसूदनसरस्वति- अत्र आलम्बनविभावः भगवान, उद्दीपनविभावः तुलसी-चन्दनादिः, अनुभावो नेत्रविक्रियादिः व्यभिचारिभावः निर्वेदा- दयः तैः विभावानुभावव्यभिचारिसंयोगात् भगवदाकारतारूपरसनिष्पत्तिः, तत्र परमानन्दसाक्षात्कारात्मकः स्थायीभाव उदेति । स एव भक्तियोगः इति तं परम निरतिशयं पुरुषार्थं वदन्ति रसज्ञाः इति परमानन्दस्वरूपत्वेनैव मोक्षस्य पुरुषार्थ- त्वम् अद्वैतिनः वदन्ति । तथा आत्यन्तिकदुःखनिवृत्तिः परमानन्दप्राप्तिश्च सिद्ध्यतीति भक्तियोगस्याऽपि परमपुरुषार्थप्राप- कत्वं अस्त्येव । तद्यथा - निरुपमसंविद्रूपमस्पृष्टदुःखम् ।[२] "भगवान् परमानन्दस्वरूपः स्वयमेव हरि । मनोगतस्तदाकारो रसतामेति पुष्कलम्" इति । भगवत्व्यतिरिक्तं सर्वं मायामयं स्वप्नतुल्यं दुःखमयमित्यतः परित्याज्यं भगवान् स्वप्रकाशा- नन्दरूपः अद्वितीयः सत्यः नित्यः विभुश्च वर्तते । भगवद्भिन्नं सर्वं मिथ्या, भगवान् वासुदेवः आत्मत्वादेव प्रियतमः स्थायीभाव इति । स्वात्मत्वेन ईश्वरप्रेम्णा आनन्दावाप्तिः । प्रसिद्धं हि लोके आत्मा प्रियो भवतीति । तस्माऽन्ज्ञानिनः आत्मत्वादेव वासुदेव प्रियो भवतीति ।

मधुसूदनसरस्वत्या भक्तेः, साधनभक्तिः, साध्यभक्तिश्चेति द्वैविध्यमस्तीति भगवद्भक्तिरसायने उक्तम् । सज्जनसंगः, भगवन्नामश्रवणं, कीर्तनं, स्मरणं, पादसेवनं च साधनभक्तिः । साधनभक्त्या उत्पद्यमानं भगवद्रतीभाव एव साध्यभक्तिरिति उच्यते । भक्तेरवस्थाभेद-मधिकृत्य मधुसूदनसरस्वत्या एवमुक्तम् ।

प्रथमं महतां सेवा तद्दयापात्रता ततः । श्रद्धाथ तेषां धर्मेषु ततो हरिगुणश्रुतिः । ततो रत्यंकुरोत्पत्तिः स्वरुपाधिगतिस्ततः । प्रेमप्रवृद्धिः परानन्दे तस्याथ स्फुरणं ततः । भगवद्धर्मनिष्ठातः स्वस्मिन् तत् प्रेम्णोऽथ परमा गुणशालिता ॥[३] भक्तिभूमिका इति भगवत्संगं वा भगवत्भक्तसंगं वा विना भक्तिर्नोदेति । पुरुषप्रयत्नजन्यं सर्वं साध्यभक्तौ अन्यत् सर्व साधनभक्तौ च अन्तर्भवति । साध्यभक्तेः स्वरूपमेव भगवद्रतिः । भक्तिरसश्च स्थायीभावश्च भगवद्रतिरेव । श्रवणं, कीर्तनं, विष्णोः स्मरणं, पादसेवनं, अर्चनं, वन्दनं, दास्यं, सख्यमात्मनिवेदनम् इति भक्तिः नवलक्षणा इति भागवतपुराणोक्तं मधुसूदनसरस्वत्या अपि अंगीकृतम् । मधुसूदनसरस्वत्या भक्ते दशसोपानानि दश भूमिका इति नाम्ना प्रतिपादितानि । तानि एवं प्रथमं सोपानं महतां सेवा- सा द्विविधा - भगवद्भक्तसेवा, साक्षात्

[१] शिवमहिम्नस्तोत्रः
[२] नाट्यशास्त्रम्
[३] भगवत्भक्तिरसायनम्

भगवत्सेवा चेति । द्वितीया भूमिका तद्दयापात्रता अर्थात् महतां दयापात्रता । महापुरुषाणां धर्मेषु श्रद्धा तृतीया भूमिका । हरिगुणश्रवणं चतुर्थी भूमिका । पंचमं सोपानं भगवताकारतारूपः संस्कारविशेषः, तस्यैव रत्थंकुरोत्पत्तिः इति कथ्यते । परमात्मस्वरूपसाक्षात्कारात्मकः षष्ठी भूमिका । भगवति प्रेमप्रकर्षः सप्तमी भूमिका । तादृश परमप्रेमस्वरूपस्य भगवतः साक्षात्कारः भक्तेः अष्टमं सोपानम् । भगवद्धर्मनिष्ठा नवमी भूमिका । स्वस्मिन् तद्गुणशालिता, तदनन्तरं परमात्मना साकं तादात्म्यभावापत्तिः भक्तेः दशमी भूमिका । एषा भगवद्भक्तेः पराकाष्ठा । भक्तेः पराकाष्ठा गोपिकादिषु दृश्यते । भगवद्विषयकधारावाहिक चित्तवृत्तिः अस्यां दशायां संभवति । भक्तेः पराकाष्ठायां भगवद्वियोगः प्राणस्त्यागादपि असह्यो भवति । तदर्पिताखिलाधारता तद्विस्मृति तादृशभक्तः आसीत् ।

मधुसूदनसरस्वत्याः सिद्धान्तानुसारं तत्वज्ञानं भगवद्भक्तेः विरुद्धं न भवति । स्नेहविशेषरूपायां भक्तावद्वैतज्ञानस्य अप्रतिबन्धकत्वात् इति भक्तिचन्द्रिका कारस्य नारायणस्य सिद्धान्तानां अंगीकारः अद्वैतसिद्धिकारेणाऽपि कृता । सत् चित् आनन्दादिकम् आत्मनि आरोपितमिति सच्चिदानन्दब्रह्मणः निर्गुणब्रह्मावाऽप्तिः भक्तिमार्गेणाऽपि संभवतीति मधुसूदनसरस्वतिः ।

मधुसूदनसरस्वतिः ज्ञानात् भक्तेः सर्वथा स्वतन्त्रं तत्सदृशं च महत्वपूर्णं स्थानं प्रदत्तवान् । तद्यथा- ततश्चाद्रुत चित्तस्य निर्वेदपूर्वकं तत्त्वज्ञानं द्रुतचित्तस्य, तु भगवत्कथाश्रवणादि भागवतधर्मः श्रद्धापूर्विका भक्तिरित्यवधित्वेन द्वयमप्युपात्तम इति आर्द्रचित्तानां कृते भक्तियोग ; अनासक्तानां कृते ज्ञानयोग इति मार्गद्वयं प्रदर्शितम् । यद्यपि मार्गविभौ भक्तिज्ञानरूपौ परस्परभिन्नत्वेन प्रतीयेते तथाऽपि लक्ष्यपूरणार्थं एतौ मार्गौ परस्परपूरकौ भवतः । चित्तशुध्यर्थं तथा मनसः एकाग्रता संपादनार्थं च भक्तिः ज्ञानमार्गोऽपि नितान्तं आवश्यकः, भक्तिमार्गे विषयेषु वैराग्य- संपादनार्थं, आत्मानात्मविवेकज्ञानसिध्यर्थं जीवात्मपरमात्मनोरभेदज्ञानं आवश्यकम् । तथा वैराग्यस्य यादृशं स्थानं ज्ञानमार्गे अस्ति तादृशमेव स्थानं भक्तिमार्गेऽपि वर्तते । ज्ञानस्य भक्तेश्च एतादृशसमञ्जससम्मेलनं भागवते दृश्यते । तदेव मधुसूदनसरस्वत्याः भक्तिरसायनेऽपि दृश्यते ।

मधुसूदनसरस्वत्या गीताव्याख्यायां गूढार्थदीपिकायां भक्तिमार्गस्य प्राधान्यं प्रदर्शितम् । शंकराचार्येण गीताभाष्ये ज्ञानमार्गस्य प्राधान्यमभिहितम् । गीताशास्त्रे निष्ठात्रयं प्रोक्तं कर्मनिष्ठा, ज्ञाननिष्ठा, भगवत् भक्तिनिष्ठा चेति । भाष्यकारेण सर्वकर्मसंन्यासप्रतिपादनेन ''मामेकं शरणं व्रजेति ज्ञाननिष्ठायामेव उपसंहृतम् । 'भगवदभिप्रायवर्णने के वयं वराकाः इति मधुसूदनसरस्वत्या अत्रोक्तम् । एवं गीताव्याख्यायां मधुसूदनसरस्वत्या भगवन्तं श्रीकृष्णं प्रति अद्वितीया भक्तिरपि मोक्षसाधनमिति प्रतिपादितम् । भागवतपुराण प्रथमश्लोकव्याख्यायां महिम्नस्तोत्रटीकायां च भक्तिः मोक्षसाधनमिति अनेन आचार्येण समर्थितम् ।

भक्तिसिद्धान्तस्य विशिष्यवैष्णव भक्तिदर्शनस्य मूलस्रोतः चैतन्यमहाप्रभोः भक्तिसिद्धान्त एव । सर्वेऽवि वैष्णवाचार्याः चैतन्यमहाप्रभोः भक्तिसिद्धान्तात् प्रभाविताः । जीवगोस्वामिः रुपगोस्वामि प्रभृतीनां प्रसिद्धानां वैष्णवाचार्याणां सिद्धान्तानां च प्रभवकेन्द्रं चैतन्य महाप्रभोः भक्ति सिद्धान्तः एव । मधुसूदनसरस्वतिरपि चैतन्य महाप्रभोः सिद्धान्तानाश्रित्यैव स्वकीयसिद्धान्तः प्रतिपादितवान् । तुलसीदासस्य भक्तिसिद्धान्तस्याऽपि प्रभावः मधुसूदनसरस्वत्याः भक्तिसिद्धान्ते दृश्यते ।

स्वकीयया उदात्तया विष्णुभक्त्या एव मधुसूदनसरस्वतिः पुष्पदन्ताचार्येण विरचित शिवमहिम्न स्तोत्र काव्यस्य शिवपरकतया विष्णुपरकतया च व्याख्यानं कृतवान् । तथा हरिलीला व्याख्यायां हरि हरयो, शिवविष्ण्वोः अभेदं प्रतिपादितवान् । एवं अद्वैतसिद्यादि ग्रन्थानां कर्तृत्वेन प्रसिद्धः अयमाचार्यः भक्तिसिद्धान्तस्याऽपि प्रतिष्ठापको

 ISSN : 2249-538X

वर्तते । अत्यन्तसुन्दरतया शैल्या भक्तिरपि मोक्षसाधनमिति मधुसूदनसरस्वत्या समर्थितम् । भक्तिरसायनसदृशः भक्तिसिद्धान्तप्रतिपादकः ग्रन्थः विरल एव । एवम् अद्वैताचार्याणां मध्ये मधुसूदनसरस्वतिः भक्तिमार्गस्य ज्ञानमार्गस्य च मोक्षप्राप्तिकारणत्वेन समर्थयन्ति । अयमेव आचार्यस्यास्य सविशेषता ।

इदानीन्तनकाले ज्ञानमार्गापेक्षया भक्तिमार्गः सर्वैरपि अनुवर्तयितुं सुकरो भवति । निर्गुणब्रह्मोपासनापेक्षया सगुण ब्रह्मोपासना साधरणैरपि कर्तुं शक्यते । "मानवसेवा माधवसेवा " "नरसेवा नारायणसेवा" इत्यादि आधुनिकाः आचार्याः विवेकानन्दस्वामिप्रभृतयः अस्यैव भक्तिसिद्धान्तस्य पुनराख्यानं कृतवन्तः ।

वैष्णवभक्तिसिद्धान्तः सर्वेऽपि अनुवर्तयितुं शक्यते । सच्चिदानन्दरूपम तत्पूर्णं विष्णोः परं पदं यत्प्राप्तये समारब्धाः वेदाः काण्डत्रयात्मकाः अद्वैतिभिरपि उपास्यः भगवान् विष्णुः तद्यथा –

**अद्वैतवीथीपथिकैरुपास्यः स्वराज्यसिंहासन लब्धदीक्षाः शठेन केनाऽपि वयं हठेन इति ॥**[1]

**आत्मारामाश्च निर्गन्थाः अप्युरुक्रमे । कुर्वन्त्यहैतुकी भक्ति इत्थं भूतगुणो हरिः ॥**

इति प्रसिद्ध भागवतश्लोकस्य गूढार्थदीपिकायाम् उद्धारणं कृत्वा कृष्णभक्तिरेव मोक्षकारणमिति सम्यक् समर्थितम् ।

"एको देवः सर्वभूतेषु गूढः, सर्वव्यापिः सर्वभून्तरात्मा " इति सर्वभूतेषु अन्तर्यामिरुपेण वर्तमानः गगवान श्रीकृष्णः एव । "बहूनि मे व्यतीतानि जन्मानि तव चार्जुन" इति गीतामन्त्रव्याख्यानावसरे भगवान् श्रीकृष्ण एव साक्षात् परं ब्रह्म इति अनेनाचार्यण समर्थितम् । स्वस्वरूपज्ञानं नाम आत्मज्ञानमिति गधुसूदनसरस्वत्या एवं समर्थितम् ।

**अनेकसाधनाभ्यासनिष्पन्नं हरिणेरितम् । स्वस्वरूपपरिज्ञानं सर्वेषां मुक्तिसाधनम् ॥**[2] **इति ।**

"उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मताम्" इति गीताश्लोकव्याख्याने भगवद्भक्तेः पराकाष्ठा ज्ञानमिति मधुसूदनसरस्वत्या व्याख्यातम् । अतः भगवद्विषया अद्वितीया भक्तिरपि मोक्षसाधनम् । उत्तमभक्तस्य ज्ञानिनश्चाभेदः मधुसूदनसरस्वत्या पुनः पुनः प्रतिपादितः ।

गीता गूढार्थदीपिकायां सप्तदशाऽध्यायस्य अष्टादशाध्यायस्य च परिसमाप्तौ कृष्ण तत्वमेव परमतत्वमिति प्रतिपाद्यमानञ्थ भगवद्भक्तिरसायनस्थ प्रथमश्लोकस्य उद्धरणं कृतम् । इदनिन्तनकाले ज्ञानयोगापेक्षया भक्तियोगः सामान्यजनैः अनुवर्त्तयितुं शक्यते । ज्ञानमार्गः दुःकरो भवति । आत्मनो मोक्षार्थ जगद्धितायाः इति महद्वचनस्य साधूकरणार्थं भक्तियोगे एव अत्यन्तं सुयोग्यो गवति ।

## उपसंहारः

एवं मधुसूदनसरस्वती प्रणीतस्य भक्ति सिद्धान्तस्य कालिकप्रसक्तिः सुतरां नितरामस्ति । अयं सिद्धान्तः न केवलं व्यक्तेः अपि तु समाजस्य राष्ट्रस्य च उन्नयनार्थं सुयोग्यो भवति इति शम् ।

## ग्रन्थसूची

1. अद्वैतसिद्धि
2. गूढार्थदीपिका

[1] श्रीमद्भागवतम् – गूढार्थदीपिकायां श्लोकं 38

[2] 10 : गूढार्थदीपिका 5

# उपनिषच्छब्दार्थसमीक्षा*

स्वामी जपसिद्धानन्दः**
संयोजकः, रामकृष्ण-मिशन्
विवेकानन्द-शैक्षणिक-शोध-संस्था, बेलुडमठम्

***शोध-लक्ष्यम्*** – *उपनिषच्छब्दः तदर्थश्च निबन्धेऽस्मिन् अधिजिगांसितः । उपनिषच्छब्दस्य पाणिनीयदिशा धातुप्रत्ययादिवैविध्यम्, व्युत्पत्तिप्रकाराः, अर्थवैचित्र्यम्, समवाचिनः, निर्वचनम्, तत्तदर्थे प्रयोगोदाहरणम् इत्यादीनाम् अनुसन्धित्सा अत्र प्रवृत्तिनिमित्तम् ।*

***शोध-सारः*** – *उपनिषद् ब्रह्मविद्या, आत्मविद्या वा । आत्म-ब्रह्मशब्दौ समानार्थौ । विशरणगत्यवसादनार्थात् षद्लृ-धातोः क्विप्-प्रत्यये उपनिषद् इति व्युत्पद्यते । त्रिधा सदिः धातुः तदर्थश्च । ये ब्रह्मविद्याम् उपगम्य तन्निष्ठतया ताम् अभ्यस्यन्ति तेषां जन्मादिदुःखम् उन्मूल्य तान् मोक्षं प्रापयति इत्यतः सा विद्या उपनिषद् इत्युच्यते । तन्निर्वचनं तत्तद्-ग्रन्थानुरोधेन अदर्शि । पाणिनीयपरिधौ अस्य शब्दस्य व्युत्पत्तिः, धातुपाठे सदेः असकृत् निवेशः तत्प्रयोजनम्, सदेः धातोः अर्थे आचार्याणां मतभेदः, अमरादिकोशेषु उपनिषच्छब्दस्य नानार्थाः, श्रुति-स्मृति-काव्येषु सीदतेः त्रिष्वर्थेषु प्रयोगनिदर्शनम्, उपनिषच्छब्दस्य नानार्थाः यथा ब्रह्मविद्या, दर्शनम्, ग्रन्थः, सिद्धान्तः, अभिधायकशब्दः, रहस्यम्, योगः, व्रतविशेषः, मन्त्रः, स्वरूपम् इत्यादयः, तेष्वर्थेषु प्रयोगोदाहरणम् इत्यादिभिः परिसमाप्तोऽयं निबन्धः । आनुषङ्गिकतया वेदान्तपदं तदर्थश्च विचारितः । सुरेश्वराचार्यस्य बृहदारण्यक-भाष्य-वार्त्तिकात् संक्षेपशारीरकाच्च विचाराः सारतः समुपन्यासिषत ।*

***शोध-सीमा*** – *ईशादिदशोपनिषदः, तत्र शाङ्करभाष्यम्, तट्टीकाः, प्रकरणग्रन्थादयः च प्राधान्येन विमृष्टाः । उपनिषदां गीतायाः तद्भाष्यस्य च ग्रन्थपाठे वाराणसेयस्य श्रीदक्षिणामूर्ति-मठ-प्रकाशनस्य पुस्तकानि आकरत्वेन समुपाश्रायिषत । शब्दनिष्पत्त्यादौ प्रायेण वैयाकरणसिद्धान्तकौमुदी तट्टीकाश्च अन्वसारिषत, क्वचित् काशिका तट्टीका अपि । ब्रह्मविद्यावाचिनः कर्तृसाधनस्यैव शब्दोत्पत्तिप्रक्रिया विस्तरेण प्रादर्शि, अन्यसाधनस्य च सङ्क्षेपेण । प्रयोगोदाहरणानि शास्त्रान्तरेभ्यः काव्येभ्यश्च उपादायिषत । पाणिनीयकोटौ इयं समीक्षा ।*

***शोध-प्रविधिः*** – *विश्लेषणात्मिका तुलनात्मिका च शोधपद्धतिः अत्र । ग्रन्थेभ्यः विचारान् सङ्कलय्य यथामति समीक्षणं व्यधायि । मध्येनिबन्धम् उदाहृतौ, आश्रितग्रन्थावलौ च एम्.एल्.ए इति पद्धतिः (अष्टमसंस्करणोक्ता) उपाश्रायि । पादटिप्पणौ मन्त्र-श्लोकादीनां मूलस्थानोपन्यासे "प्रथमाध्याये द्वितीयब्राह्मणे" इत्यादौ लेखितव्ये "१ अध्याये, २ ब्राह्मणे" इत्यादि अलेखि अल्पस्थानवत्त्वाद् । आश्रितग्रन्थावलौ ग्रन्थकर्तुः नाममात्रं प्रादर्शि । मुद्रितपुस्तकेषु विदुषाम् उपाधीनां लेखनविधौ ऐकमत्याभावात् ते परित्यक्ताः, तत्तद्विदुषः नाममात्रम् अग्राहि । कालः खिस्ताब्देन निरदेशि[१] । अन्तर्जालीयमूलान्यपि यथायोग्यम् अन्ते न्यवेदिषत ।*

***कूटशब्दाः*** – *उपनिषत्, वेदान्तः, ब्रह्मविद्या, षद्लृ विशरणगत्यवसादनेषु, क्विप्-प्रत्ययः, मुख्यवृत्तिः, गौणवृत्तिः ।*

---

*शीर्षिकायाः अयमाशयः - उपनिषत् शब्द उपनिषच्छब्दः । उपनिषच्छब्दस्य अर्थः उपनिषच्छब्दार्थः । उपनिषच्छब्दार्थे समीक्षा उपनिषच्छब्दार्थ-समीक्षा इति । अत्र यद्यपि शब्दस्य समीक्षा न प्रतीयते वृत्तिगतत्वात् शब्दशब्दस्य, तथाऽपि अवसरप्राप्तः शब्दोऽपि समीक्ष्यते ।

****सम्पर्कसूत्रम्*** - Email- japasiddhananda@gm.rkmvu.ac.in

[१] बाहुल्यानुरोधेन एतद् । अल्पाः किल संस्कृतं पिपठिषवः, तत्र शास्त्रम् अधिजिगांसवो बत अल्पीयांसः, शोधं चिकीर्षवो नु अल्पिष्ठाः इत्यतः द्रुतबोधानुकूलः क्रमः अन्वसारि । भारतीया सरणिः यावन्न बहूनां बुद्धिम् आरोहति तावद् इयं पद्धतिः परदेशीयाऽपि औपयिकी ।

## उपक्रमः

सनातनधर्मस्य मूलम् उपनिषद्। सा वेदान्तपदेनापि उच्यते। अतः अस्मदीयस्य हिन्दुधर्म इत्यपेक्षया प्रशस्यतेतरां वेदान्तधर्माभिधा इत्यभिधायि श्रीमद्विवेकानन्द-स्वामिपादैः[१]। भारते आस्तिकमात्रस्य जीवनं वेदान्ताश्रितम्। अतः जिज्ञासितव्यतया उपतिष्ठते उपनिषत्। भारतीय-ज्ञान-परम्परायां विद्याः प्राधान्येन चतुर्दश, तथाहि चत्वारो वेदाः, षड् वेदाङ्गानि, मीमांसा, न्यायः, धर्मशास्त्रम्, पुराणं चेति[२]। आयुर्वेद-धनुर्वेद-गान्धर्ववेदार्थशास्त्रेषु उपवेदत्वेन उपात्तेषु अष्टादश सम्पद्यन्ते विद्यास्थानानि[३]। अन्याः यावद्विद्याः एष्वेव अन्तर्यान्ति। तत्र आद्यविद्या वेदः, तस्य शिरःस्थानीया उपनिषद्। उपनिषदि प्रधानः प्रमेयपदार्थः परमपुरुषार्थः तत्साधनं च, ततोऽन्यद् गौणम्। उपनिषदाम् परिशीलने प्रथमं प्रत्युपतिष्ठते उपनिषच्छब्दः। तस्य निष्पत्तिः अर्थश्च निबन्धे मीमांस्यते। निबन्धेऽस्मिन् पञ्चसु विभागेषु प्रतिपाद्यविषयः न्यरूपि -

1. उपनिषच्छब्दे समीक्षा
2. उपनिषदर्थे समीक्षा
3. वेदान्तपदे अनुसन्धानम्
4. नानाचार्यैः उपनिषच्छब्दार्थनिरूपणम्
5. अथोत्तरम् अनुसन्धाने अवसरः

## 1. उपनिषच्छब्दे समीक्षा

पाणिनीयतन्त्रे अव्युत्पत्तिपक्षः व्युत्पत्तिपक्षश्चेति शब्देषु पन्थानौ। आद्ये स्वरूपेण शब्दाः सिद्धाः न तु प्रक्रियया, द्वितीये प्रकृति-प्रत्ययादिभिः साध्याः। व्युत्पत्तिपक्षम् आतिष्ठन्ते शाकटायनादयः नैरुक्ताश्च "नामान्याख्यातजानि" इत्यादिवचनात्[४]। पक्षेऽस्मिन् भागशः सहमताः पाणिनीयाः, तन्नये यथायोगम् उभयोरभ्युपगमात्[५]। सदेर्धातोः क्विप्-प्रत्यये उपनिषच्छब्दः व्युत्पद्यते। सदिर्धातुः त्रिधा, क्विप्-प्रत्ययश्च नाना इत्यतः अर्थानुरोधेन व्युत्पत्तिः वेद्या।

## 1.1. सदेः धातोः वैविध्यम्

पाणिनिना आचार्येण सदिर्धातुः त्रिषु गणेषु अपाठि। तदत्र नीचैः वैयाकरणसिद्धान्तकौमुद्यनुसारेण आदौ प्रादर्शि[६]। तदनु ग्रन्थान्तरेषु स्थिताः विशेषांशाश्च यथायथम् उदलेखिषत -

---

[१]तथाहि 'The Jnana Kanda, as embodying the spiritual teachings of the Vedas known as the Upanishads and the Vedanta, has always been cited as the highest authority by all our teachers, philosophers, and writers, whether dualist, or qualified monist, or monist. Whatever be his philosophy or sect, every one in India has to find his authority in the Upanishads. If he cannot, his sect would be heterodox. Therefore, perhaps the one name in modern times which would designate every Hindu throughout the land would be "Vedantist" or "Vaidika", as you may put it; and in that sense I always use the words "Vedantism" and "Vedanta".'(CW. Vol.3, p.229) इति।

[२]याज्ञवल्क्यस्मृतौ "पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥"(१.३) इति (पणशीकरः,वासुदेवशर्मा। पृ.२)।

[३]पुराणादिषु तथा दर्शनात्। तद्यथा विष्णुपुराणे - "आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः। अर्थशास्त्रं चतुर्थन्तु विद्या ह्यष्टादशैव ताः॥" (३.६.२९) इति इमाः पूर्वोक्तैः चतुर्दशभिः सह कीर्तिताः (उप्रेति, थानेशचन्द्रः। भा.१, पृ.३५२)।

[४]तथाहि "तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च। न सर्वाणीति गार्ग्यः। वैयाकरणानां चैके।" इति (शर्मा, मुकुन्दझा। पृ.३२)।

[५]तदपाठि अव्युत्पत्तिपक्षम् उरसिकृत्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (अष्टा.१.२.४५) इति, व्युत्पत्तिपक्षं मनसिकृत्य "कृत्तद्धितसमासाश्च" (अष्टा.१.२.४६) इति च।

[६]तिङन्तप्रकरणे (शर्मा, गिरिधरः। भा.३, भ्वादौ ८५४-संख्यकधातुः पृ.१९८, तुदादौ १४२७-संख्यकधातुः पृ.३६५, चुरादौ १८३२-संख्यकधातुः पृ.४०५)।

1. भ्वादौ 'षद्ऌ विशरणगत्यवसादनेषु' इति अनिट्[१], गतौ सकर्मकः अन्यत्राकर्मकः, षोपदेशः, परस्मैपदी धातुः। सीदति इत्यादीनि रूपाणि। अत्र गणे पाठस्य कर्तरि णप्रत्ययोपलब्धिः, स्वरविशेषश्च फलम्। भ्वाद्यन्तर्गणे ज्वलादौ अस्य धातोः पाठाभ्युपगमाद् "ज्वलितिकसन्तेभ्यो णः" (अष्टा.३.१.१४०) इति कर्तरि णप्रत्ययः सुलभः। तेन सादः इत्यादिसिद्धिः[२], धातुः उदात्तस्वरविशिष्टो भवति इति च विशेषः। तथाहि - शब्विकरणः अनुदात्तः, भ्वादौ सदिः अनुदात्तस्वरः उदात्तेत् च[३]। भ्वादौ पठितस्य सीदतीत्यत्र "अनुदात्तौ सुप्पितौ" (अष्टा.३.१.४) इति शप्तिपोः पित्त्वात् प्रत्ययादेरचः आद्युदात्तापवादभूते अनुदात्तस्वरे धातुरुदात्तः।
2. तुदादौ 'षद्ऌ विशरणगत्यवसादनेषु' इति अनिट्, गतौ सकर्मकः अन्यत्राकर्मकः, षोपदेशः, परस्मैपदी धातुः। सीदति इत्यादीनि रूपाणि। अत्र धातोरर्थनिर्देशे विद्यते मतभेदः पाठभेदो वा आचार्याणाम्, तद्यथा काशिकान्यासकारेण विशरणमिति एकः एव अर्थः प्रादर्शि। तथाहि "षद्ऌ विशरणे तौदादिकः, षद्ऌ विशरणगत्यवसादनेषु भौवादिकः" इति[४]। मैत्रेयरक्षितो दुर्गश्च तथैव मन्वाते इत्यलेखि कृष्णलीलाशुकमुनिना[५]। आत्रेयोऽपि तथा इत्यवादीत् माधवः[६]। क्षीरस्वामि-शाकटायनौ तु अवसादने अर्थे एव इमं धातुं प्रतीतः इति लीलाशुकः। किन्तु क्षीरतरङ्गिण्यां "षद्ऌ विशरणगत्यवसादनेषु" इत्येव समुपलभ्यते[७]।

   अत्र गणे सदेः पाठस्य नुम्विकल्पः स्वरभेदश्च फलम्। भ्वादेः शतरि स्त्रियां सीदन्तीत्यादौ "शप्श्यनोर्नित्यम्" (अष्टा.७.१.८१) इति नुम् नित्यः, तुदादेस्तु "आच्छीनद्योर्नुम्" (अष्टा.७.१.८०) इति विकल्पेन। ततः तुदादेः सीदती सीदन्ती इत्यादि रूपद्वैविध्यम्। मध्योदात्तस्वरश्च प्रयोजनम्, तदित्थम् - तुदादौ विहितः शः उदात्तः। सदेः शविकरणे "आद्युदात्तश्च" (अष्टा.३.१.३) इति उत्सर्गतः प्रत्ययादेः अचः उदात्तत्वे, धातोः मध्योदात्तत्वम् इति विशेषः।
3. चुरादौ 'आङः षद पद्यर्थे' इति अनिट्, सकर्मकः, आधृषीयः, उभयपदी धातुः। णिजभावे अनिडयम्। पद्यर्थः व्याख्यायि कृष्णलीलाशुकमुनिना पुरुषकारे "आङः परः षद धातुः पदेरर्थे गतौ... ।" इति[८]। तत् प्राञ्जलताम् अनैषीत् कृदन्तरूपमालाकृत् "पद्यर्थः = 'पद गतौ' इति धातोरर्थो गतिः। 'गतौ' इति फलितम्।" इति[९]। आसादयति-ते इत्यादीनि अस्य धातोः रूपाणि। आधृषीयाणां विकल्पेन णिज्विधानात् शपि आसीदति इत्यादीनि च।

[१]तथाहि कौमुद्यां "शद्सदिस्विद्यति... ॥" इति (शर्मा, गिरिधरः। भा.३, पृ.७५), बालमनोरमायां "षद्ऌधातुः षोपदेशः अनिड्कश्च" इति (शर्मा, गिरिधरः। भा.३, पृपृ.१९८-१९९)। "शदिं सदिं स्वदिद्यपद्यती" इति अनिट्-कारिकायां पाठाद् अनिडयमिति माधवश्च (शास्त्री, स्वामी द्वारिकादासः। पृ.५६५)।

[२]सादः इत्यस्य 'शरणम्', 'गतिः' इत्यादिरर्थः कोशादिषु प्रसिद्धः।

[३]भ्वादौ "सदादयः त्रयः अनुदात्ता उदात्तेतः" इति वदता माधवेन व्याघ्रभूतिवचः उदाहारि (शास्त्री, स्वामी द्वारिकादासः। पृ.२१७, २१९)। तथा तुदादौ "पृच्छत्यादयोऽनुदात्ता उदात्तेतः" इत्युक्तम् (शास्त्री, स्वामी द्वारिकादासः। पृ.४९०)।

[४]तद् द्रष्टव्यं "पा-घ्रा-ध्मा-स्था-म्ना-दाण्..." (अष्टा.७.३.७८) इत्यादिसूत्रे (त्रिपाठी, जयशङ्करलालः। भा.९, पृ.२४७)।

[५]तथाहि पुरुषकारवार्त्तिककृता अवादि "षद्ऌ विशरणगत्यवसादनेषु। तुदादावप्येवमेव धनपालः। विशरणे इत्येव मैत्रेयरक्षितो दुर्गश्च।... अवसादने इत्येव क्षीरस्वामिशाकटायनौ।" इति (१०८ श्लो.) (मीमांसकः, युधिष्ठिरः। पृ.७६)।

[६]तथाहि "विशरणे इत्यात्रेयमैत्रेयौ दुर्गश्च।" इति तुदादौ अदर्शि (शास्त्री, स्वामी द्वारिकादासः। पृ.५६५)।

[७]तथाहि युधिष्ठिरमीमांसक-सम्पादिते ग्रन्थे तुदातौ (धातुसंख्या १३२) (मीमांसकः, युधिष्ठिरः। पृ.२५३)।

[८]देवनिर्मिते दैवे १०८ श्लो. (मीमांसकः, युधिष्ठिरः। पृ.७६)।

[९]कृदन्तरूपमालायां धातुसंख्या १८१५ (शास्त्री, रामसुब्रह्मण्यः। भा.५, पृ.१३३७)।

 ISSN : 2249-538X

अमी धातुविशेषाः देवेन सारतः दैवे पद्यात्मना इत्थं न्यरूपि "ज्वलादेश्च तुदादेश्च सीदेद् विशरणादिके । पद्यतेरर्थ आसीदेदासादयति चाङि यौ ॥" इति । तत्र पुरुषकारवार्त्तिके श्लोकधातुपाठश्च लीलाशुकेनोदाहारि "विशमृशणुदप्रवेशामर्शक्षेपेषु षद्लृविशरणार्थः" इति[१] ।

## 1.2. विशरण-गत्यवसादन-पदानाम् अर्थे विशेषः

पाणिनिः धातून् विनाऽर्थम् अपीपठत् उत सार्थम् इत्यत्र विवदन्ते विद्वांसः । भीमसेननामा कश्चिद् व्याकरणाचार्यः शिष्यान् उपचिकीर्षन् अर्थेन सार्धं धातून् अध्यजीगपत् इति पारम्परिकोक्तिः । स एव अध्येत्रुपयोगी सार्थः सर्वजनीनः पाठोऽत्र समाद्रियत । तत्र अर्थोक्तिः निदर्शनमात्रम्, धातूनाम् अनेकार्थत्वात् । तथाहि "निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः । अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥" इति अभियुक्तोक्तिः[२] । अतः षद्लृ-धातुः विशरणगत्यवसादनार्थः इत्येतदपि निदर्शनमात्रम् । अन्यार्थेष्वपि सीदतेः दरीदृश्यन्ते शिष्टप्रयोगाः यथा वासः, स्थितिः, प्राप्तिः, शोकः, कष्टम्, दुःखम् इत्यादिषु । काव्यादिषु तत्तदर्थे प्रयोगाः सुलभाः ।

विशरण-गत्यवसादन-पदानां पुनरर्थविशेषः परिलक्ष्यते । विशरणम् अवयवानां विश्लेषः विभागः, गतिः गमनम्, अवसादनं नाशः इति व्याकरणग्रन्थानुसारी अर्थनिर्देशोऽयम्[३] । श्रीशङ्करभगवत्पादैस्तु क्वचिद् विशरणं नाशनम्, गतिः प्रापणम्, अवसादनं शैथिल्यापादनम् इत्यर्थः अकारि । तथाहि व्याख्यायि कठोपनिषत्सम्बन्धभाष्ये "संसारबीजस्य विशरणाद् हिंसनाद् विनाशनाद्" इति, "परं ब्रह्म गमयति" इति, "पौनःपुन्येन प्रवृत्तस्य अवसादयितृत्वेन शैथिल्यापादनेन" इति[४] । तत्र आद्ययोः अन्तर्भावितण्यर्थता स्फुटा एव । न च विशरणशब्दस्य नाशार्थो न युज्यते 'शॄ हिंसायाम्'[५] इत्यतः व्युत्पन्नत्वात्, व्युपसर्गयोगाच्च । इदमत्र अवधेयम् - मुण्डक-तैत्तिरीयक-भाष्ययोः तु विशरणं निशातनम्[६], अवसादनं विनाशनम् इति व्याख्यायि[७] यच्च शाब्दिकनयेन संवदते ।

## 1.3. विशरणादि-पदानां तत्तदर्थे प्रयोगोदाहरणम्

सदेरर्थनिरूपणे प्रसिद्धपाठेषु प्रयुक्तानां विशरणादिपदानां शाब्दिकनये शाङ्करमते च तत्तदर्थे शिष्टप्रयोगाः सुलभाः एव । तथाहि -

विशरणं शैथिल्यम् इत्यत्र महाभारते यथा "विशीर्णगात्रः पृथिवीं परासुः प्रपतिष्यति ।" इति[८] । अत्र विशीर्णगात्रः शिथिलीभूतगात्रः । यथा वा "वस्त्रं विशीर्णशतखण्डमयी च कन्था" इति सुभाषितत्रिशत्यां विशीर्णा विशेषेण

---

[१]तथाहि दैवे १०८ श्लो. पुरुषकारे (मीमांसकः, युधिष्ठिरः । पृ.७६) ।

[२]प्रक्रियाकौमुद्याः प्रकाशव्याख्याकृता कृष्णाचार्येण उपसर्गाणां निरूपणे उदाहारि (मिश्रः, मुरलीधरः । पृ.५९) ।

[३]तथाहि सिद्धान्तकौमुद्याम् "अतो ल्रान्तस्य" (अष्टा.७.२.२) इति सूत्रे बालमनोरमायाम् "जि फलेति । विशरणं शिथिलीभावः ।" इत्यदर्शि, यथा वा "पाघ्राध्मा..." (अष्टा.७.३.७८) इत्यत्र तत्त्वबोधिन्याम् "विशरणम् अवयवानां विश्लेषः । अवसादनं नाशः ।" इति । (शर्मा, गिरिधरः । भा.३, पृ.१५३,१९९) ।

[४]कठोपनिषदः सम्बन्धभाष्यं द्रष्टव्यम् (सुब्रह्मण्यशास्त्री, एस्. । भा.१, पृपृ.५६-५७) ।

[५]अयं च क्र्यादिः सकर्मकः सेट् परस्मैपदी प्वादिः ल्वादिश्च । शृणाति इत्यादीनि अस्य रूपाणि ।

[६]निपूर्वात् शद्लृँ शातने इत्यतः धातोः भ्वादेः परस्मैपदिनः अकर्मकात् अनिटः ज्वलादेः णिचि ल्युटि निशातनम् इति रूपम् । यद्वा तुदादेः समानानुपूर्वीकात् । निशातनं शिथिलीकरणम् इत्यदर्शि आनन्दगिरिटीकायाम् (सुब्रह्मण्यशास्त्री, एस्. । भा.१, पृ.१२९) ।

[७]द्रष्टव्यम् उभयत्र सम्बन्धभाष्यम् (सुब्रह्मण्यशास्त्री, एस्. । भा.१, पृ.१२९) ।

[८]तथाहि उद्योगपर्वणि पूर्वार्धः "गदया निहतो ह्याजौ मया पार्थो वृकोदरः ।" (५.५५.३८) इत्यत्र (भट्टाचार्यः, हरिदासः । भा.१४, पृ.५९८) ।

जीर्णा[1]। गतेः गमनार्थः अतितमां प्रसिद्धः। अवसादनं नाशः यथा रघुवंशे "तच्चोदितश्च तमनुद्धृतशल्यमेव पित्रोः सकाशमवसन्नदृशोर्निनाय।" इत्यत्र अवसन्नदृशोः नष्टचक्षुषोः इत्यर्थः[2]।

शाङ्करोक्ते धात्वर्थविशेषे अणिचि प्रयोगाः दृश्यन्ते। विशरणं नाशः इत्यत्र यथा "अविशीर्णब्रह्मचर्यो यमिच्छेत्तमावसेत्" इति[3]। निरुपसृष्टस्य यथा "अशीर्यो न हि शीर्यते" इत्यत्र अशीर्यः अविनाश्यः[4]। स्वयं च आचार्येण असकृत् प्रयुक्तः "सोऽयं प्राणकरणसङ्घातः देहे विशीर्णे देहान्तरं..." इत्यादौ विशीर्णे नष्टे इत्यर्थः[5]। गतौ प्रयोगः अतिसुलभः। अवसादनं शिथिलीभावः इत्यत्र यथा "यातमवनिमवसन्नभुजान्न गलद्विवेद वलयं विलासिनी॥" इति अवसन्नभुजात् शिथिलहस्ताद् इति यावत्[6]।

## 1.4. उपनिषच्छब्द-व्युत्पत्तौ धात्वादि-निर्णयः

भ्वादेः सदेः निष्पाद्यते उपनिषदिति। सत्यपि सदेः गणत्रये पाठे प्रथमातिक्रमणे मानाभावात् सिद्धान्तकौमुद्यादिप्रामाण्याच्च भौवादिकाद् उपनिषच्छब्दः व्युदपादि। अमरसुधाटीकादिषु च तथा निष्पादितम् अवधेलिमम्। स्वरादौ विशेषे एषितव्ये तुदादिरुपेयः स्यात्।

क्विप्-प्रत्ययः पाणिनीयके दशाधिकैः सूत्रैः बहुभिश्च वार्त्तिकैः व्यधायि। तत्र "सत्सू-द्विष-द्रुह-दुह-युज-विद-भिद-च्छिद-जि-नी-राजामुपसर्गेऽपि क्विप्" (अष्टा.३.२.६१) इत्यनेन कर्तरि क्विपि उपनिषद् इति रूपम्[7]। "क्विप् च" (अष्टा.३.२.७६) इति सामान्यतः विहितस्यैव प्रपञ्चोऽयम् इति काशिका-कौमुद्यादिषु स्पष्टम्। कर्तृभिन्नकारके क्विप् तु "सम्पदादिभ्यः क्विप्" इति वार्त्तिकेन[8]।

अत्र काचिद् विप्रतिपत्तिः दृश्यते। तस्याश्च बीजं पारम्परिकोक्तिः। सत्सूद्विषेत्यादिक्विपा निष्पन्नाः पुलँलिङ्गशब्दाः, सम्पदादिक्विबन्ताः तु स्त्रियाम् इति वैयाकरणसम्प्रदायः[9]। अमरसुधाव्याख्यायाम् अधिकरणार्थे विगृह्य सम्पदादिक्विपा शब्दनिष्पत्ति-प्रदर्शनम् अत्र अवधानम् अर्हति[10]। अमरपदविवरणेऽपि तथा अकारि[11]। सत्सूसूत्रेण सम्पदादिवार्त्तिकेण वा उपनिषच्छब्दसिद्धौ इयं विप्रतिपत्तिः - सत्सूक्विप् कर्तरि स्यात् तदुत्पन्नस्तु न स्त्रियाम् इष्टः, सम्पदादिक्विप् स्त्रियां स्यात् न तु कर्तृकारके इति। अत्र स्यादिदं समाधानम् - साम्प्रदायिकलिङ्गवचनस्य प्रायिकत्वात् सत्सूक्विपा सिद्धः लोकात् स्त्रियां रूढः इति, यद्वा सम्पदादिक्विपा सिद्धः 'कृतो बहुलम्' इति न्यासान्तरेण कर्तरि स्याद् इति दिक्।

---

[1]तथाहि वैराग्यशतके १५ श्लो. (आचार्यः, नारायणः रामः। पृ.१२०)।

[2]रघुवंशे महाकाव्ये ९ सर्गे, ७७ श्लो. (झाः, रामचन्द्रः। पृ.८४)।

[3]इदं च स्मृत्युदाहरणम् इत्युक्तम् आनन्दज्ञानकृतभाष्यटीकायाम् (४ अध्याये ५ ब्राह्मणे १५ मन्त्रे) (सुब्रह्मण्यशास्त्री, एस्.। भा.३, पृ.३८३)।

[4]बृहदारण्यके ३ अध्याये, ९ ब्राह्मणे, २६ मन्त्रः (सुब्रह्मण्यशास्त्री, एस्.। भा.३, पृ.२८३)।

[5]छान्दोग्ये ६ अध्याये, ८ खण्डे, ६ मन्त्रः (सुब्रह्मण्यशास्त्री, एस्.। भा.२, पृ.२६३)।

[6]दृश्यतां शिशुपालवधे महाकाव्ये १५ सर्गे ८५ श्लो., तत्र सर्वङ्कषा-व्याख्या च (शास्त्री, हरगोविन्दः। पृ.७१३)।

[7]द्रष्टव्या सिद्धान्तकौमुदी अत्र सूत्रे (शर्मा, गिरिधरः। भा.४, पृ.६८)।

[8]सिद्धान्तकौमुद्यां द्रष्टव्यम् (शर्मा, गिरिधरः। भा.४, पृ.३३४)।

[9]द्रष्टव्या कृदन्तरूपमाला (धातुसंख्या १८१४) (शास्त्री, रामसुब्रह्मण्यः। भा.५, पृ.१३३६)।

[10]अमरकोशे ३ काण्डे, नानार्थवर्गे (अमर.३.३.९३) (दाधिमथः। पृ.४१३)।

[11]अमरकोशे ३ काण्डे, नानार्थवर्गे (अमर.३.३.९३) (रामनाथन्, ए.ए.। भा.२, पृ.३५४)।


ISSN : 2249-538X

## 1.5. उपनिषच्छब्दस्य कर्त्रर्थे व्युत्पत्तिः

उपनिषादयति इति उपनिषत्। ब्रह्मविद्यार्थकः उपनिषच्छब्दः भ्वादिगणीयात् सदेः विशरणगत्यवसादनार्थात् कर्तरि करणे अधिकरणे वा व्युत्पद्यते। तत्र कर्त्रर्थे प्रक्रिया दिङ्मात्रम् अधः प्रादर्शि। उपोपसर्गस्य सामीप्यम् अर्थः, नि इत्यस्य निष्ठा। धातोः अर्थत्रयम् - विशरणम्, गतिः, अवसादनं चेति। तात्पर्य्येण तदुपासकानां संसारहेतुं नाशयति, ब्रह्म गमयति, जन्मादिदुःखं शिथिलयति इत्यर्थः। तत्रेयं प्रक्रिया-

| | |
|---|---|
| षद्ऌ | इत्यस्य "भूवादयो धातवः" (अष्टा.१.३.१) इत्यनेन धातुसंज्ञायाम्, "उपदेशेऽजनुनासिक इत्" (अष्टा.१.३.२) इति सूत्रेण ऌकारस्य इत्संज्ञायाम्, "तस्य लोपः" (अष्टा.१.३.९) इत्यनेन ऌकारस्य लोपे |
| षद् | इति स्थिते "धात्वादेः षः सः" (अष्टा.६.१.६४) इत्यनेन उपदेशे धातोरादेः षस्य सकारादेशे |
| सद् | इति स्थिते, उप नि इत्यनयोः प्रयोगविवक्षायाम् "उपसर्गाः क्रियायोगे" (अष्टा.१.४.५९) इत्यनेन उपसर्गसंज्ञायाम्, "ते प्राग्धातोः" (अष्टा.१.४.८०) इत्यनेन धातोः पूर्वं तयोः प्रयोगे |
| उप नि सद् | इति स्थिते उपनिषादयति इति प्रयोजकव्यापारे विवक्षिते "हेतुमति च" (अष्टा.३.१.२६) इत्यनेन णिचि |
| उप नि सद् णिच् | इत्यत्र "चुटू" (अष्टा.१.३.७) इत्यनेन प्रत्ययादिटवर्गस्य णकारस्य इत्संज्ञायाम्, "हलन्त्यम्" (अष्टा.१.३.३) इत्यनेन अन्त्यहलः चकारस्य इत्संज्ञायाम्, "तस्य लोपः" (अष्टा.१.३.९) इत्यनेन इत्संज्ञकयोः लोपे |
| उप नि सद् इ | इति स्थिते "सत्सूद्विषद्रुहदुहयुजविदभिदच्छिद-जिनीराजामुपसर्गेऽपि क्विप्" (अष्टा.३.२.६१) इति क्विप्-प्रत्ययो भवति। तस्य च "धातोः" (अष्टा.३.१.९१) इत्यधिकारे पाठात्, "कृदतिङ्" (अष्टा.३.१.९३) इत्यनेन तिङ्भिन्नस्य धात्वधिकारपठितस्य क्विपः कृत्संज्ञायाम्, "कर्तरि कृत्" (अष्टा.३.४.६७) इत्यनेन कृतां कर्तरि विधानात् कर्तरि क्विपि, "आर्धधातुकं शेषः" (अष्टा.३.४.११४) इति सूत्रेण आर्धधातुकसंज्ञायाम् |
| उप नि सद् इ क्विप् | इत्यत्र "णेरनिटि" (अष्टा.६.४.५१) इत्यनेन अनिडादौ आर्धधातुके क्विपि णेः लोपे |
| उप नि सद् क्विप् | इत्यत्र, "लशक्वतद्धिते" (अष्टा.६.१.६४) इत्यनेन प्रत्ययादि-ककारस्य इत्संज्ञायाम्, "हलन्त्यम्" (अष्टा.१.३.३) इति पकारस्य इत्संज्ञायाम्, "उपदेशेऽजनुनासिक इत्" (अष्टा.१.३.२) इत्यनेन अनुनासिकस्य इकारस्य इत्संज्ञायाम्, "तस्य लोपः" (अष्टा.१.३.९) इत्यनेन इत्संज्ञकानां लोपे |
| उप नि सद् व् | इति स्थिते "अपृक्त एकाल् प्रत्ययः" (अष्टा.१.२.४१) इत्यनेन वकारस्य अपृक्तसंज्ञायाम्, "वेरपृक्तस्य" (अष्टा.६.१.६७) इत्यनेन अपृक्तवकारस्य लोपे, सर्वसंयोगे |
| उपनिसद् | इति स्थिते "सदिरप्रतेः" (अष्टा.८.३.६६) इत्यनेन सदेः सस्य षत्वे |
| उपनिषद् | इति जाते क्विपः कृत्त्वात् "कृत्तद्धितसमासाश्च" (अष्टा.१.२.४६) इत्यनेन कृदन्तस्य प्रातिपदिक-संज्ञायाम्, प्रातिपदिकार्थगतैकत्व-विवक्षायां "स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्य-स्ङसोसाङ्ङ्योस्सुप्" (अष्टा.४.१.२) इत्यनेन सु-प्रत्यये |
| उपनिषद् सु | इति स्थिते "उपदेशेऽजनुनासिक इत्" (अष्टा.१.३.२) इत्यनेन अनुनासिकस्य उकारस्य इत्संज्ञायाम्, "तस्य लोपः" (अष्टा.१.३.९) इति इत्संज्ञकस्य उकारस्य लोपे |

उपनिषद् स् इत्यत्र "अपृक्त एकाल् प्रत्ययः" (अष्टा.१.२.४१) इत्यनेन सकारस्य अपृक्तसंज्ञायाम्, "हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्" (अष्टा.६.१.६८) इत्यनेन अपृक्तसकारस्य लोपे

उपनिषद् इति जाते ततः परं वर्णानाम् अभावस्य "विरामोऽवसानम्" (अष्टा.१.४.११०) इत्यनेन अवसानसंज्ञायाम्, "अनचि च" (अष्टा.८.४.४७) इत्यनेन अवसाने परे अचः परस्य यरः दकारस्य द्वित्वे, तदभावपक्षे च

उपनिषद्द्, उपनिषद् इति रूपद्वयम्।

स्त्रियाम् अयं शब्दः, श्रुति-स्मृत्यादिषु तथाप्रयोगदर्शनात्। कोशेषु च यथा "भवेदुपनिषद्धर्मे वेदान्ते विजने स्त्रियाम्" इति मेदिन्याम्, यथा वा "उपनिषच्छब्दः स्त्रीलिङ्गः" इति अमरपदविवरणे[१]। शब्दोऽयम् अभिधयाऽभिधत्ते विद्यां ग्रन्थं तु उपचाराद्। कृदन्तत्वात् अन्तोदात्तोऽयं शब्दः। तदुक्तं "उपनिपूर्वात् सदेः क्विप्। कृत्स्वरेणान्तोदात्तः॥" इति[२]।

## 1.6. उपनिषच्छब्दस्य व्युत्पत्त्यन्तराणि

विवक्षितं वाच्यम् अनु शब्दव्युत्पत्तिः भिद्यते। कोशेषु उपनिषच्छब्दः बहुधा व्युदपादि यथा भावे, कर्तरि, करणे, अधिकरणे च। तत्र कर्तरि अर्थे उपरिष्टाद् दर्शिता प्रक्रिया। अर्थान्तरेषु विशेषांशाः एव निम्नम् अदर्शिषत। समानम् अन्यत् पूर्वेण यथायथम् उन्नेयम्।

- भावार्थे - उपनिषदनम् उपनिषद्[३]। समीपसदनम् इत्यादिः तदर्थः[४]। उपनिपूर्वकाद् विशरणगत्यवसादनार्थात् षद्लृ-धातोः, उपनिषदनम् इति भावार्थे "भावे" (अष्टा.३.३.१८) इत्यधिकारपठितेन "सम्पदादिभ्यः क्विप्" इति वार्त्तिकेन क्विप्-प्रत्यये रूपम्।
- कर्त्रर्थे - उपनिषादयति इति उपनिषद्। हेतुमति णिचि रूपमिदम्। अविद्याबीजं नाशयति, ब्रह्म गमयति, दुःखं शिथिलयति च इत्यर्थयोगेन विद्या उपनिषद् इति व्याख्यायि श्रीशङ्करभगवत्पादैः[५]। व्युत्पत्तिरत्र दर्शितपूर्वा।
- करणार्थे - उपनिषद्यते अनया इति उपनिषद्। तथाहि "उपनिषद्यते प्राप्यते ब्रह्मविद्या अनया इति" इति अदर्शि कोशेषु[६]। यथा वा "उपनिषीदति प्राप्नोति ब्रह्मात्मभावः अनया" इति[७]। संहितादिविषयेषु दर्शनेषु अपि इयमेव निष्पत्तिः, तत्तद्विज्ञानस्य साधनत्वेन उपनिषदः विवक्षितत्वात्। अत्र "अकर्तरि च कारके संज्ञायाम्" (अष्टा.३.३.१९) इति अधिकारपठितेन "सम्पदादिभ्यः क्विप्" इति वार्त्तिकेन करणार्थे क्विप्-प्रत्यये रूपम्।
- अधिकरणार्थे - उपनिषीदति अस्याम् इति उपनिषद्। "उपनिषण्णम् अस्यां परं श्रेयः" इत्यदर्शि शाङ्करभगवत्पादैः[८]। शब्दोऽयं ब्रह्मविद्यायां पठितः यथा "य एवं वेद। इत्युपनिषत्" इत्यादौ। तत्र च शाङ्करभाष्यम् "इतीयम् एवं यथोक्ता अस्यां वल्ल्यां ब्रह्मविद्योपनिषत् , सर्वाभ्यः विद्याभ्यः परमरहस्यं

[१]तथाहि अमरपदविवरणे अप्पयार्येण व्याख्यायि (अमर.३.९३) (रामनाथन्, ए.ए.। भा.२, पृ.३५३)।
[२]तथाहि "अणृगयनादिभ्यः" (अष्टा.४.३.७३) इत्यत्र काशिकाविवरणपञ्जिका (त्रिपाठी, जयशङ्करलालः। भा.४, पृ.१६८)।
[३]द्रष्टव्या अमरसुधाव्याख्या (अमर.३.३.९३) (दाधिमथः। पृ.४१३)।
[४]तथाहि "समीपसदनम् इति त्रिकाण्डशेषः" इत्युदाहारि शब्दकल्पद्रुमे (राधाकान्तदेवः। भा.१, पृ.२५६)।
[५]द्रष्टव्यं कठोपनिषदः सम्बन्धभाष्यम् (सुब्रह्मण्यशास्त्री, एस्.। भा.१, पृपृ.५६-५७)।
[६]शब्दकल्पद्रुमे (राधाकान्तदेवः। भा.१, पृ.२५६)।
[७]वाचस्पत्ये (भट्टाचार्यः, तारानाथः। भा.२, पृ.१२२२)।
[८]द्रष्टव्यं तैत्तिरीयोपनिषदः सम्बन्धभाष्यम् (सुब्रह्मण्यशास्त्री, एस्.। भा.१, पृ.३७१)।


ISSN : 2249-538X

दर्शितमित्यर्थः - परं श्रेयः अस्यां निषण्णमिति ॥" इति[1]। सायणाचार्येण दर्शने अदर्शि तैत्तिरीयके "उप सामीप्ये निषण्णं प्रजापशुब्रह्मवर्चसादिफलम् अस्याम् इत्युपनिषद् उपासना" इति[2]। कोशकारैश्च यथा "उपनिषीदति श्रेयः अस्याम्" इति अमरसुधाकृता व्याख्यायि[3]। क्षीरस्वामी च तथा अदीदृशद् अमरकोशोद्घाटने[4]। अमरपदविवृतौ लिङ्गयसूरिणाऽपि "सर्वमत्र निषीदतीत्युपनिषत्" इत्यवाचि[5]। अत्राऽपि "अकर्तरि च कारके संज्ञायाम्" (अष्टा.३.३.१९) इति अधिकारेण "सम्पदादिभ्यः क्विप्" इति वार्त्तिकेनैव अधिकरणार्थे क्विप्-प्रत्यये रूपम्।

## 2. अथोत्तरम् अनुसन्धाने अवसरः

प्ररोचनधिया दिङ्मात्रम् इह विषयाः समाकलिषत। बिन्दुमात्रत्वेऽपि अपर्याप्ताः इमे, अपरिच्छिन्नशक्तिमत्त्वात् शब्दस्य, तत्प्रयोगोपलब्धिस्थानानां च आनन्त्यात्। व्युत्पित्सुना शास्त्रान्तरेषु काव्येषु उक्तमपि नूनं दृशेलिमम्। वेदान्तेऽपि मतान्तरं प्रतिपिपादयिषुभिः प्रणीताः ग्रन्थाः अवलोक्येरन्। तत्र प्रकारान्तरेण विहितं निर्वचनादि निश्चप्रचं वैदुष्याय कल्पेत। तद्यथा -

1. विशिष्टाद्वैते - "अद्वारक-ब्रह्मप्रतिपादिका (उपनिपूर्वकात् षद्लृधातोः कर्तरि क्विप्।).... 'ब्रह्मणि उपनिषण्णा इति उपनिषत्। उपनिषण्णत्वाद् वा उपनिषत्।' इति हि वाक्यम्। 'गहने हि इयं विद्या सन्निविष्टा' इति तद्विषयं द्रमिडभाष्यम्। 'गहने ब्रह्मणि उपनिषण्णा' इति भाष्यविषया वामनटीका। अद्वारक-भगवत्प्रतिपादकत्वम् उपनिषण्णत्वम् (श्रु.प्र.१.८)। तत्त्वोपदेशप्रधानमन्त्र-ब्राह्मणरूप-वेदभागाः उपनिषदः। ताश्च द्विविधाः। तत्त्वपराः उपदेशपराश्चेति (श्रु.प्र.१.३.२५)। 'ओषधीभ्यो यथामृतम्' इतिवत् शिरःशब्दाभिप्रायव्यक्त्यर्थः उपनिषत् शब्दः। उपनिषीदति अव्यवधानेन नित्यं समन्वेति इति अनन्यपरांशोक्तिः। तथाच वाक्यम् उपनिषण्णत्वाद् वा उपनिषद् इति (त.टी.१६)।" इत्यादि[6]।
2. शुद्धाद्वैते - गोवर्द्धनापरपर्यायस्य श्रीगट्टूलालाजीमहाभागस्य कठोपनिषद्भाष्यम् अवलोक्यम्। उपनिषच्छब्दः ग्रन्थे अपि मुख्यया एव वृत्त्या प्रवर्तते इति तन्मते विशेषः। तदित्थम् उपावर्णि "ननु किमत्रोपनिषच्छब्दप्रवृत्तिनिमित्तम् इति चेद् उच्यते - उपनिपूर्वात् विशरणगत्यवसादनार्थात् सीदतेः क्विपि निष्पन्नोऽयं शब्दः। तत्रोपसन्नानां नितरामभ्यस्यतां मुमुक्षूणां संसारविशरणाद् एता उपनिषद उच्यन्ते। अथवा तान् परमात्मानम् उपनिषीदयति गमयति समीपे वा स्थापयति इत्युपनिषत्। यत्तु विद्याया एवोपनिषत्त्वम्, ग्रन्थे तु तदौपचारिकम् इति परे मन्यन्ते, तदमनोज्ञम्। ग्रन्थे तत्त्वव्यवहारस्य अध्येतृपरम्परातो जागरूकत्वात्। व्यवहारस्याऽपि शक्तिग्राहकत्वात्। यदेव विद्यया करोति श्रद्धयोपनिषदा वेति भेदनिर्देशश्रुत्या ग्रन्थेऽप्यनौपचारिकत्वावगमनाच्च। अत एव अनेकत्र समाप्तौ इत्युपनिषदिति श्रूयते।" इति[7]।

---

[1] तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्याम् (सुब्रह्मण्यशास्त्री, एस्. । भा.१, पृपृ.५७८-५८०)।
[2] संहितोपासनव्याख्याने तैत्तिरीयारण्यके, ७ प्रपाठके, ३ अनुवाके, १ मन्त्रे (फडके, बाबाशास्त्री । भा.२, पृ.४९४।)
[3] अमरसुधाव्याख्या द्रष्टव्या (अमर.३.३.९३) (दाधिमथः । पृ.४१३)।
[4] द्रष्टव्यः ३ काण्डे, ९३ श्लो. (ओका, कृष्णाजी गोविन्दः । पृ.२०१)।
[5] अमरकोशे ३ काण्डे, नानार्थवर्गे, ९३ श्लो. (रामनाथन्, ए.ए. । भा.२, पृ.३५३)।
[6] 125 : विशिष्टाद्वैतदर्शनकोशः द्रष्टव्यः (लक्ष्मीताताचार्यः, एम्.ए. । पृ.२२७)।
[7] 126 : तथाहि मन्त्रभाष्यारम्भे (शास्त्री, नन्दकिशोरः । पृपृ.४-५)।

ISSN : 2249-538X

एवं जैन-बौद्धादि-दर्शनेषु अन्ये अर्थाः प्राप्यन्ते, जैनग्रन्थेषु उपनिषदः 'हेतुः', 'निदानम्' इत्यपि अर्थः । एवमन्येषु शास्त्रेषु आगमेषु च कृतः प्रयत्नः स्वविद्यायां गाम्भीर्यं दार्ढ्यं च वितनोति "प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः" इत्यभियुक्तोक्तेः[1] इति शम् ।

## आश्रित-संस्कृत-ग्रन्थावलिः

आगाशे, काशीनाथशास्त्री । सं. । कृष्णयजुर्वेदीयतैत्तिरीयसंहिता । ४ भागः । आनन्दाश्रम संस्था । पञ्चमवृत्तिः २००९ ।

आचार्यः, नारायणः रामः । परि. । सुभाषितत्रिशती (श्रीभर्तृहरिशतकत्रयम्) (श्रीरामचन्द्रबुधेन्द्रविरचितया सहृदयानन्दिन्याख्यया समेता) । चौखम्भा संस्कृत संस्थान । वाराणसी । चतुर्थं संस्करणम् २००१ ।

उप्रेति, थानेशचन्द्रः । सं. । विष्णुमहापुराणम् (श्रीधरस्वामिकृतात्मप्रकाशाख्य-व्याख्यया टिप्पण्यादिभिश्च संयुतम्) । १,२ भागौ । परिमल पब्लिकेशन्स । दिल्ली । द्वितीयं संस्करणम् २००३ । (अङ्कीयप्रतिकृतिः[2])

ओका, कृष्णाजी गोविन्दः । सं. । नामलिङ्गानुशासनम् (क्षीरस्वामिनः अमरकोशोद्घाटनेन सहितम्) । ला प्रिन्टिङ्ग प्रेस् । पुणे । १९१३ । (छायाप्रतिकृतेः अङ्कीयरूपम्)

कश्यप, केशव किशोर । सं. । हरगोविन्द शास्त्री । व्या. । मनुस्मृतिः । १ भागः । चौखम्बा कृष्णदास अकादमी । वाराणसी । प्रथमं संस्करणम् २००७ ॥

कुप्पुस्वामी, ए. । सं. । सौन्दर्यलहरी (लक्ष्मीधरा-सौभाग्यवर्धनी-अरुणामोदिनी-आनन्दगिरीया-तात्पर्यदीपिनी-पदार्थचन्द्रिका-डिण्डिमभाष्य-गोपालसुन्दरी-आनन्दलहरी-कैवल्यवर्धनी-व्याख्या-सहिता । आंग्लानुवाद-टिप्पणी-प्रयोगयन्त्र-पूजाविधि-संयुता च) । राष्ट्रिय-संस्कृत-संस्थानम् । नवदेहली । द्वितीयं पुनर्मुद्रित-संस्करणम् २००५ ।

कृष्णाचार्य, टि.आर् । सं. । नागराजभट्टः । सं. । बृहद्धातुरूपावलिः । श्रीशङ्कर अद्वैतशोधकेन्द्रम् । शृङ्गेरी । पुनर्मुद्रणम् २०११ ।

गोपालाचार्यः, श्रीनिवासः । शब्दार्थकौस्तुभः (संस्कृत-कन्नड-शब्दकोशः) । १ भागः । बाप्को-प्राकाशनम्, बेङ्गळूरु, तृतीयं मुद्रणम् १९९७ ।

झळकीकरः, भीमाचार्यः । न्यायकोशः । चैखम्बा सुरभारती प्रकाशनम् । वाराणसी । संस्करणम् २०१७ ।

झाः, रामचन्द्रः । रघुवंशमहाकाव्यम् । चौखम्बा कृष्णदास अकादमी, वाराणसी । पुनर्मुद्रित संस्करणम् २०१२ ।

त्रिपाठी, जयशङ्करलालः । सुधाकरः मालवीयः । सं. । काशिका । ४-९ भागौ । तारा-बुक्-एजेन्सी, वाराणसी । ४ भागः - प्रथमं संस्करणम् १९८४ । ९ भागः - पुनर्मुद्रणम् २०१४ (प्रथमं संस्करणम् १९९४) । १० भागः - पुनर्मुद्रणम् २०१५ ।

दाधिमथः, शिवदत्तः । परि. । अमरकोषः । चौखम्बा संस्कृत प्रतिष्ठान । दिल्ली । पुनर्मुद्रितसंस्करणम् २०११ ।

देशपाण्डे, मैत्रेयी । सं. । तैत्तिरीयारण्यकम् (सायणभाष्यसहितम्) । २ भागः । न्यू भारतीय बुक कॉरपोरेशन । दिल्ली । प्रथमं संस्करणम् २०२३ ।

द्राविडः, मणिः । संशो., सं. । श्रीमद्भगवद्गीताभाष्यम् । प्रथमः खण्डः । श्रीदक्षिणामूर्ति मठ प्रकाशन । वाराणसी । प्रथमं संस्करणम् २०१५ ।

द्विवेदी, शिवप्रसादः । व्या. । सं. । ध्वन्यालोकः (श्रीमदभिनवगुप्तपादविरचित-लोचन-सहितः भावप्रकाशिका-हिन्दी-

[1] 127 : तथाहि वाक्यपदीये २ काण्डे, ४८४ श्लो. (शर्मा, रघुनाथः । भा.२, पृ.५७६) ।
[2] 128 : Digital Copy (pdf., etc.)

 ISSN : 2249-538X

टीकोपेतश्च) । चौखम्बा सुरभारती प्रकाशन । वाराणसी । संस्करणम् २०१६ (प्रथमं संस्करणम् २०१३) ।

पणशीकरः, वासुदेवः लक्ष्मणः । श्रीमद्भगवद्गीता (शंकरानन्द-सरस्वतीकृत-गीतातात्पर्यबोधिनन्याख्य-शङ्करानन्दी-व्याख्यासहिता) । चौखम्बा सुरभारती प्रकाशन । वाराणसी । पुनर्मुद्रितं प्रथमसंस्करणम् १९८९ ।

पणशीकरः, वासुदेवशर्मा । टि. । याज्ञवल्क्यस्मृतिः (विज्ञानेश्वरप्रणीत-मिताक्षराख्यव्याख्यासंवलिता) । निर्णय-सागर-मुद्रणालयः । दिल्ली । १९३६ । (अङ्कीयप्रतिकृतिः)

पाण्डुरङ्गी के.टी. । सं. । अनेकार्थसंग्रहो नाम कोशः (आचार्यश्रीहेमचन्द्रेण विरचितः) । विद्याधीश-स्नातकोत्तर-संशोधन-केन्द्रम्, बेङ्गळूरु, २०१३ ।

पाण्डेयः, मुरलीधरः । शाङ्करवेदान्तकोशः । सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः । वाराणसी । प्रथमं संस्करणम् १९९८ ।

फडके, बाबशास्त्री । संशो. । तैत्तिरीयारण्यकम् (श्रीमत्सायणाचार्यविरचितभाष्यसमेतम् । सपरिशिष्टम् ।) । २ भागः । आनन्दाश्रमः । पुणे । द्वितीया अङ्कनावृत्तिः १९२७ । (छायाप्रतिकृतेः अङ्कीयरूपम्)

बालशास्त्री । सं. । पञ्चतन्त्रम् (परीक्षोपयोगिन्या अतिविशदया अभिनवराजलक्ष्मीसमाख्यया संस्कृतटीकया विस्तृतया भाषाटीकया च विराजितम्) । चौखम्बा-सुरभारती-प्रकाशनम् । वाराणसी । संस्करणम् २०१६ ।

भट्टाचार्यः, तारानाथः । संस्क. । वाचस्पत्यम् । २ भागः । राष्ट्रिय-संस्कृत-संस्थानम्, नई दिल्ली, पुनर्मुद्रितं संस्करणम् २००६ ।

मिश्रः, मुरलीधरः । सं. । टि. । प्रक्रियाकौमुदी (श्रीकृष्णविरचितया प्रकाशव्याख्यया, मुरलीधर-मिश्रकृतया रश्मिटिप्पण्या च संवलिता) । १-३ भागाः । सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, द्वितीयं संस्करणम् २००० ।

मीमांसकः, युधिष्ठिरः । सं. । क्षीरतरङ्गिणी (क्षीरस्वामिविरचिता पाणिनीयधातुपाठस्य पश्चिमोत्तरशाखाया व्याख्या) । श्रीरामलाल-कपूर-ट्रस्ट् । अमृतसर् । १९५८ (संवत् २०१४) । (अङ्कीयप्रतिकृतिः)

मीमांसकः, युधिष्ठिरः । सं. । दैवम् (कृष्णलीलाशुकमुनि-विरचित-पुरुषकाराख्यवार्तिकोपेतम्) । भारतीय-प्राच्यविद्या-प्रतिष्ठानम् । अजमेर । १९६२ (संवत् २०१९) । (अङ्कीयप्रतिकृतिः)

मुधोलकरः, श्रीनिवासकट्टी । सं. । रामायणम् (रामप्रणीतरामायणतिलक-शिवसहायप्रणीतरामायणशिरोमणि-गोविन्द-राजप्रणीत-रामायणभूषणेति टीकात्रयेणोपस्कृतम्) । १,५ भागौ । परिमल पब्लिकेशन्स । दिल्ली । १ भागः - संस्करणम् २००० । ५ भागः - तृतीयं संस्करणम् २०१२ ।

राधाकान्तदेवः । शब्द-कल्पद्रुमः । १ भागः । चौखम्बा-संस्कृत-सीरीज-आफिस, वाराणसी, तृतीयं संस्करणम् १९६७ ।

रामनाथन्, ए.ए. । सं. । अमरकोशः (लिङ्गयसूरिणः अमरपदविवृत्या, मल्लिनाथस्य अमरपदपारिजातेन, अप्पयार्यस्य अमरपदविवरणेन च सहितः) । २ भागः । अडियार् ग्रन्थालयः शोधकेन्द्रं च । मद्रपुरम् । १९७८ । (छायाप्रतिकृतेः अङ्कीयरूपम्)

लक्ष्मीताताचार्यः एम्, ए. । प्रधानसम्पादकः । वरदाचार्यः एस्.एम्.एस् । सं. । विशिष्टाद्वैतकोशः । ३ भागः ई-औ । संस्कृत-संशोधन-संसत् । यादवाद्रिः (मेलुकोटे) । प्रथमसंस्करणम् १९८९ ।

विष्णुप्रकाशः । सं. । संक्षेपशारीरकम् (मधुसूदनसरस्वतीकृत-संक्षेपशारीरकटीकया गोविन्दानन्दगिरिकृत-तत्त्वप्रकाशिकाख्य-टिप्पण्या विद्यानन्दगिरिकृत-ललिता-हिन्दीव्याख्यया च संवलितम्) । २ भागः । श्री कैलासविद्या प्रकाशन । ऋषिकेश । २००५ ।

वेङ्कटाचार्यः । सं. । रसार्णवसुधाकरः । अडियार्-ग्रन्थालः शोधकेन्द्रं च । मद्रपुरी । १९७९ । (अङ्कीयप्रतिकृतिः)

शर्मा, गिरिधरः । सं. । परमेश्वरानन्द शर्मा । सं. । वैयाकरणसिद्धान्तकौमुदी (वासुदेवदीक्षितप्रणीतया बालमनोरमा-व्याख्यया, ज्ञानेन्द्रसरस्वतीविरचितया तत्त्वबोधिनीव्याख्यया च सनाथिता) । बालमनोरमा-तत्त्वबोधिनीसहिता । १-४ भागाः । मोतिलाल-बनारसीदास । दिल्ली । १ भागः-पुनर्मुद्रणम् २०१० (प्रथमं संस्करणम् १९६१), २ भागः-पुनर्मुद्रणम् २०१०, ३ भागः-पुनर्मुद्रणम् २००५, ४ भागः-पुनर्मुद्रणम् २०११ ।

शर्मा, मुकुन्दझा । सं., व्या. । निरुक्तम् । चौखम्बा संस्कृत प्रतिष्ठान । दिल्ली । पुनर्मुद्रित संस्करण २०१२ ।

शर्मा, रघुनाथः । सं. । वाक्यपदीयम् (हरिवृषभकृतया स्वोपज्ञवृत्त्या रघुनाथशर्मणा विरचितया अम्बाकर्त्रीव्याख्यया, पुण्यराजकृतया प्रकाशव्याख्यया, हेलाराजकृतया प्रकीर्णप्रकाशव्याख्यया च विभूषितम्) । २,३ भागौ । सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी । तृतीयं संस्करणम् २०१६ ।

शास्त्री, जगदीशः । सं. । ब्रह्मसूत्रशांकरभाष्यम् (गोविन्दानन्दकृतया भाष्यरत्नप्रभया वाचस्पतिमिश्रकृतया भामत्या, आनन्दगिरिप्रणीतेन न्यायनिर्णयेन समुपेतम्) । मोतीलाल-बनारसीदासः, दिल्ली, पुनर्मुद्रणम् २००० (प्रथमसंस्करणम् १९८०) ।

शास्त्री, नन्दकिशोरः । सं. । कठोपनिषद्भाष्यम् (भारतमार्तण्ड-वेदान्तभट्टाचार्य-पञ्चनदी-गोवर्द्धनापरपर्याय श्रीगट्टूलाला-जीमहाशयैः विरचितम्) । श्रीनाथद्वारस्थविद्याविभागद्वारा सुदर्शनग्रन्थालये मुद्रितं नन्दकिशोरशास्त्रिणा प्रकाशितम् । १९२९ (वि.सं.१९८६)

शास्त्री, भीमसेनः । व्या. । लघुसिद्धान्त-कौमुदी (भैमीव्याख्यया सहिता) । ३ भागः । भैमी प्रकाशन । दिल्ली । षष्ठं संस्करणम् २०१५ ।

शास्त्री, रामसुब्रह्मण्यः । कृदन्तरूपमाला । संस्कृत-विद्या-समितिः । मद्रपुरी । ५ भागः । द्वितीयं संस्करणम् २००५ (प्रथमं संस्करणम् १९७१) ।

शास्त्री, स्वामी द्वारिकादासः । सं. । माधवीया धातुवृत्तिः । तारा-बुक्-एजेंसी, वाराणसी, पुनर्मुद्रणम् २०२२ (तृतीयसंस्करणम् २०००) ।

शास्त्री, हरगोविन्दः । अनु. । शिशुपालवधम् । चौखम्भा-विद्या-भवनम्, वाराणसी, पुनर्मुद्रितं संस्करणम् २०१३ ।

शास्त्री, हरगोविन्दः । सं. । वैजयन्तीकोषः (श्रीयादवप्रकाशाचार्यविरचितः) (सलिङ्गनिर्देशः शब्दानुक्रमणिकासहितः) । चौखम्भा-भारती-आकादमी, वाराणसी, पुनर्मुद्रितं संस्करणम् २००८ । (अङ्कीयप्रतिकृतिः)

सुब्रह्मण्यशास्त्री, एस्. । सं. । उपनिषद्भाष्यम् । १-३ भागाः । श्रीदक्षिणामूर्ति-मठ-प्रकाशनम्, वाराणसी । १ भागः - तृतीयं संस्करणम् २०११ । २ भागः - द्वितीयं संस्करणम् २०१२ । ३ भागः - द्वितीयं संस्करणम् २०११ ।

सुब्रह्मण्यशास्त्री,एस्. । संशो. । सं. । बृहदारण्यकोपनिषद्भाष्यवार्त्तिकम् (आनन्दगिर्याचार्य-प्रणीत-शास्त्रप्रकाशिका-टीका-समलङ्कृतम्) । १ खण्डः । महेश-अनुसन्धान-संस्थानम्, वाराणसी । १ खण्डः, प्रथमं मुद्रणम् १९८२ । २ खण्डः, प्रथमं मुद्रणम् १९९० ।

सुब्रह्मण्यशास्त्री. एस्. । सं. । टि. । बृहदारण्यकोपनिषद् (माध्यन्दिनशाखीया, श्रीमद्विद्यारण्याचार्य-कृतदीपिकया सहिता) । महेश-अनुसन्धान-संस्थानम् । वाराणसी । प्रथमं संस्करणम् १९८६ ।

सोनटक्केः, एन्.एस्. इत्यादयः । सं. । ऋग्वेद-संहिता । ४ भागः । वैदिक-संशोधन-मण्डलम्, पुणे, द्वितीयं संस्करणम् १९८३ ।


ISSN : 2249-538X

# अभ्यासाधिकरणनिष्कर्षः

आचार्यः सूर्यनारायणभट्टः*
के.सं.वि., रा.गा.परिसरः
शृङ्गेरी

***लेखसारः*** *– जैमिनिमहर्षिप्रणीतद्वादशलक्षण्यां द्वितीयाध्यायद्वितीयपादद्वितीयाधिकरणे दर्शपूर्णमासप्रकरणस्थानि* ***समिधो यजति, तनूनपातं यजती****त्यादिवेदवाक्यान्यादाय अभ्यासादत्र धात्वर्थभेदेन भावनाभेदो निरूप्यते । विधेरविशेषेण पुनश्श्रवणमभ्यासः । समिधो यजति, तनूनपातं यजतीत्यादौ यद्यजतिपदं पञ्चवारमभ्यस्तं, तत्किमेकां भावनां प्रतिपादयति उत प्रतिपदं भेदेन ? तदर्थं किमेक एव याग उत पञ्च यागाः? इति । यागैकत्वे भावनैकत्वं, तद्भेदे तु भावनाभेदः ।*

*पूर्वाधिकरणे प्रत्ययांशस्यैक्येऽपि प्रकृतिभूतधात्वर्थभेदात् प्रत्ययार्थभवना अपि भिद्यत इत्युक्तम् । इह प्रत्ययार्थो भावना सैव, किन्तु प्रकृतिभूतधात्वर्थस्यापि एकत्वात् पूर्वाधिकरणापेक्षया वैलक्षण्यसिद्धेः कथं भावनाभेदः ? न हि शब्दस्य पुनश्श्रवणमात्रेणार्थो भिद्यते । तदेव हि पदं पुनः पुनः श्रूयते चेत् अभेदेन तस्यैव प्रत्यभिज्ञा भवतीत्यादिभिर्बह्वीभिर्युक्तिभिः धात्वर्थस्यैकत्वात् भावनैक्यमिति पूर्वपक्षमुपस्थाप्य समिधो यजतीत्यादौ एकस्य यजतेः पुनश्श्रुतिर्भेदिकैव । भेदाभावे विधेः पुनश्श्रवणमनर्थकं स्यादिति अभ्यासाद्धात्वर्थभेदः, ततो भावनाभेद इति सिद्धान्तः ।*

***कूटशब्दाः*** *– अभ्यासः, कर्मभेदः, समित्, तनूनपात्, पुनश्श्रुतिः, पदश्रुतिः, याज्यामन्त्राः, अनुमन्त्रणमन्त्राः, उभयाकाङ्क्षा, प्रयाजाः, अनूयाजाः, उपांशुयाजः, अमावास्या, पौर्णमासीप्रभृतयः ।*

## उपक्रमः

भगवता जैमिनिमहर्षिणा प्रणीतायां द्वादशलक्षण्यां द्वितीयाध्यायस्य द्वितीयपादे द्वितीयाधिकरणे **समिधो यजति तनूनपातं यजती**त्यादीनि दर्शपूर्णप्रकरणस्थानि वेदवाक्यान्याश्रित्य **एकस्यैवं पुनश्श्रुतिरविशेषादनर्थकं हि स्यात्**[१] इति सूत्रेण अभ्यासात्कर्मभेदः प्रतिपादितः । प्रथमेऽध्याये विध्यर्थवादमन्त्रस्मृत्याचारनामधेयवाक्यशेषसामर्थ्यरूपाण्यष्टौ धर्मप्रमाणानि निरूपितानि । सम्प्रति तत्प्रमेयभूतं धर्मस्वरूपं द्वितीयेऽध्याये निरूप्यते । यद्यपि धर्मप्रमाणेषूक्तेषु अर्थादेतत्प्रमाणप्रतिपाद्यो धर्म इत्येवं सामान्याकारेण धर्मस्वरूपमवगतं, तथाऽपि कात्स्र्न्येन तत्स्वरूपानवगमात् इदानीं विशेषाकारेण तत्स्वरूपावगतये तद्गतानेकत्वरूपो भेदः प्रतिपाद्यत इति पूर्वोत्तरभावः ।

अत्र हि द्वितीयपादे प्रकरणान्तरात् कर्मभेदमेकं परित्यज्य अन्यैः शब्दान्तरादिभिः प्रमाणैः कर्मभेदः निरूपितः । प्रकरणान्तरातिरिक्तशब्दान्तरादिप्रमाणककर्मभेदनिरूपणं पादार्थः । इह हि कर्मभेदः व्याख्यातः । स च विषयः अत्र प्रतिपाद्यते ।

**सङ्गतिः-** अत्र पादे आदौ शब्दान्तराधिकरणे यजति जुहोति ददातीत्यादौ शब्दान्तरस्थले धात्वर्थभेदस्य स्पष्टत्वेन तद्भेदनिबन्धनभावनाभेदस्य सुखेनोपपादयितुं शक्यत्वात् **"शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात्"**[२] इति सूत्रेण तस्यैव प्राथम्येन कर्मभेदः निरूपितः । अधुना इह धात्वर्थभेदाभावात् न भावनाभेदः, तथापि यथा शब्दान्तरस्य पदश्रुत्या प्रतीयमानार्थावलम्बनेन भेदकत्वं तथैव अभ्यासस्यापि अनेनैव सादृश्येन भेदकत्वोपपादनं

---

***सम्पर्कसूत्रम्** – 9449541822, Email – surya2narayan@gmail.com

[१]जैमिनिसूत्रम्, २.२.२

[२]जैमिनिसूत्रम्, २.२.१

युक्तमिति शब्दान्तरोत्तरभावित्वम् । संख्यादीनां तु विधिपदस्थत्वाभावेन वाक्यगम्यसम्बन्धमपेदस्य भेदकत्वमिति ततोत्तरभावित्वमिति पूर्वोत्तरभावनिर्णयः । अत एव शब्दान्तराधिकरणवदिह धात्वर्थभेदाभावात् न भावनाभेदः इति पूर्वपक्षोत्थानात् प्रत्युदाहरणम् अनन्तरसङ्गतिः ।

अभ्यासस्यापि संख्यासंज्ञादिवत् धात्वर्थभेदमात्रे एव व्यापारः । धातुभेदे तदर्थभेदात् युक्तो भावनाभेदः । प्रकृते तु धातोरपि एकत्वेन अर्थभेदाभावे फलीभूतभावनाभेदे प्रमाणाभावेन भावनाभेदसिध्यर्थतया प्रत्युदाहरणसङ्गतिः स्पष्टेति खण्डदेवाचार्याः ।

**विषयः** – दर्शपूर्णमासप्रकरणे उपदिष्टानि समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीति प्रयाजवाक्यानि । सर्वत्र वक्येषु यजति यजति इति समानरूपेण वर्तते । धातुः प्रत्ययश्च एक एव । पूर्वाधिकरणे तु प्रत्ययस्तु सः एव धात्वर्थस्तु भिनः भिन्नः पूर्वाधिकरणन्यायः अत्र न सम्भवति इति पूर्वपक्षी मनुते । सर्वत्र विद्यमानो यजि धातुः एकमेवार्थं ब्रूते । तस्मात् धात्वर्थभेदो नास्ति । विभिन्नधात्वर्थकत्वं शब्दान्तरत्वम् । तत्तु नात्र विद्यते इति धातोरेकत्वात् अर्थोऽपि एकः इति पूर्वरीत्या भावनाभेदो वक्तुं न शक्यत इति प्रतिपाद्यो विषयः अपूर्व एव ।

**संशयः** – अत्र यजति यजति इति पञ्चकृत्वो यद्यजतिपदमभ्यस्तं तेन किं एको यागो विधीयते उत प्रत्यभ्यासं यागभेदः ? यागैगत्वे भावनाऽपूर्वयोरप्येकत्वम् , तद्भेदे अर्थान्तरपरधातूच्चारणभेदात् शब्दान्तराधिकरणन्यायेनैव भावनाभेदसिद्धिः । अपूर्वाधिकरणोक्तन्यायेन च अपूर्वभेदसिद्धिः । अत्र भाष्ये **समिधो यजति तनूनपातं यजतीति एवं आदिः पञ्चकृत्वोऽभ्यस्तः यजतिशब्दः किमेकमपूर्वं चोदयति, किं प्रत्यभ्यासम् अपूर्वभेद इति**[१] । अत्र अपूर्वभेदाऽभेदचिन्ताकथनं भावनाभेदाऽभेदचिन्तापरम् । अत एव वार्त्तिके **यजतीत्येतत् पञ्चकृत्वोऽभिहितं किमेकस्य कर्मणो वाचकम् अथ अनेकस्य**[२] इत्युक्तम् । एक एव धात्वर्थः एक एव प्रत्ययार्थः इति भावनाभेदो नास्तीति अभेदकोटेः उत्थितिः । परं तु विधिपुनःश्रवणात् एकस्यैव पुनः पुनः विधेयत्वं नार्हति इति विधिश्रुत्या यागे वैजात्यं भाति । इमानि वाक्यानि विधिरूपाणि । तैः विहितविधानायोगात् यागान्तरमेव विधेयमिति भावनाऽभेदकोटेः उत्थितिः । इत्थम् उभयोः कोट्योः बलाबल-अनवधारणात् सन्देहो जागर्ति ।

**पूर्वपक्षः** – न हि अभ्यासः कर्मभेदसाधकः । येन भावनाभेदः अभ्युपेतव्यः । यत्र यजति यजति इति पञ्चकृत्वः यजतिशब्दः उपदिष्टः तत्र यागेषु ईषदपि वैलक्षण्यं नास्ति न प्रतीयते च । तदा प्रत्यभिज्ञादार्ढ्येण भेदकल्पनं नितराम् अप्रामाणिकम् एव । यथा चक्षुष्कामेष्टौ **"एताम् इष्टिं निरवपदग्नये राजस्वते पुरोडाशमष्टाकपालं, सौर्यं चरुं, अग्नये भ्राजस्वते पुरोडाशमष्टाकपालम्**[३] इति । एवं अध्वरकल्पायामपि **सारस्वतं चरुं, बार्हस्पत्यं चरुम्**[४] इति ।" एवं विधिद्वयस्य त्रिः पाठेऽपि दृढतरप्रत्यभिज्ञया यागैकत्वं तथैव अत्रापि एक एव यागः स्वीकार्यः । अत एव अपः प्रणयतीति असकृत् पाठेऽपि न भावनाभेदः । किञ्च एकस्मिनेव घटे घटोऽयं घटोऽयम् इति अभ्यासेऽपि यथा लोके एकत्वमिति सिद्ध्यति न भेदः एवं इहापि । ननु एकस्यैवं पुनःश्रुतिरिति अभ्यासलक्षणस्थएकपदस्य नानार्थकत्वात् भेदप्रमापकत्वम् । नो चेत् एकस्यैव कर्मणः पुनः पुनर्विधानं व्यर्थम् इति चेत् - विधिपुनः श्रवणस्य नात्र विरोधः । विहितस्य पुनर्विधानायोगस्तु उभयमतसम्मतः । परं परस्परं एकैकस्मिन्नपि वाक्ये विधेयान्तरं तु वर्तत एव । समिधो यजति इत्यनेन यागो विहितः ।

[१]शाबरभाष्यम्-२-२-२

[२]तन्त्रवार्त्तिकम् -२-२-२

[३]भाट्टचिन्तामणिः -२-२-२

[४]भाट्टचिन्तामणिः -२-२-२

 ISSN : 2249-538X

तनूनपातं यजति इत्यनेन पुनर्यागविधानं न सम्भवति । किन्तु पूर्वविहितं यागमनूद्य तनूनपाद्देवता विधीयते । एवं इड्देवता इडो यजति इति विधीयते । अतः उपपदार्थे विधिशक्तेः संक्रमः । विहितस्य विधानायोगात् कर्मभेदो नावश्यकः । पूर्वं विहितः यः यागः या च भावना पञ्चस्वपि समानतया वर्तते । यथा दध्ना जुहोति इत्यत्र सत्यपि विधौ कर्मभेदो नाङ्गीक्रियते । अग्निहोत्रं जुहोति इत्यनेन विहितहोमोद्देशेन दधिरूपो गुणो विधीयते तद्वदत्रापि । ननु समिधौ यजति इति वाक्ये या समिद्देवता निर्दिष्टा सा तु उत्पत्तिशिष्टा । तनूनपातं यजति इत्यादिना विधीयमना देवता उत्पन्नशिष्टा भवति । तयोः उत्पत्तिशिष्टायाः प्राबल्यात् तदवरोधे कथं यागमनूद्य उत्तरवाक्यैः देवताविधिरिति चेत् उच्यते – समिधो यजति इत्यनेन न देवताविधिः । समित्पदस्य तत्प्रख्यशास्त्रेण नामत्वाङ्गीकारात् । अवशिष्टैः वाक्यैः देवता विधानं इति न क्षतिः । तर्हि येन तत्प्रख्यशास्त्रेण समिधो यजति इत्यत्र समित्पदं कर्मनामधेयं तेनैव न्यायेन तनूनपातादिष्वपि कर्मनामभेयत्वं अविशिष्टमेवेति प्रथमविहितयागमनूद्य तनूनपातादिवाक्यैः देवताविधित्वम् इति न शक्यते वक्तुम् । पञ्चानामपि वाक्यानां समत्वमिति यागविधानं कुत्रापि नाभ्युपगम्यते । उपांशुयाजमन्तरा यजति इत्यनेन वाक्येन विहितो योऽयं उपांशुयाजः तत्र देवता निर्देशो नास्तीति देवतायाः अपेक्षासद्भावात् पञ्चभिरपि वाक्यैः विकल्पेन देवता विधीयते । अथवा तत्रैव प्रकारान्तरेण विष्णुरुपांशुयष्टव्यः इत्यादिना देवता प्रातिः स्वीक्रियते तदा तु य एवं विद्वान् पौर्णमासीं यजते, य एवं विदान् अमावास्यां यजते इति विद्वद्वाक्यविहितयागानुवादेन पञ्चस्वपि वाक्येषु देवता विधीयते इति समाधानम् । किञ्च तत्रापि मन्त्रवर्णात् देवता प्राप्तिसम्भवात् विधिवैयर्थ्य परिहाराय एतेषां नियमार्थत्वेन विधिफलं सम्भवति । एवञ्च प्रयाजान्यजति इति प्रकृत्या समिधो यजति इत्यादिश्रवणात् प्रयाजशब्दस्य **प्रयाजानूयाजौ यज्ञाङ्गौ**[1] इति पाणिनि व्यवहारात् यदुपभृतिप्रयाजानुयाजेभ्यस्तत् इति एकादशप्रयाजान् यजति इत्यादि बहुतरप्रयोगैः नामधेयत्वेन समिधः इत्यादि बहुवचनस्य कर्मभेदबोधकत्वाभावेन तद्वाक्यविहितं एकमेव कर्म । तदनुवादेन देवताविधानम् । दृष्टार्थत्वाच्च विकल्पः, न च विकल्पेन देवताविधाने एक एव प्रयाजः । किन्तु पञ्च प्रयाजाः इति लिङ्गदर्शनादेव समुच्चयोपपत्तिः । अतः पञ्चानामपि देवतानां विकल्पसंभवः । अनन्यपरविधिपुनः श्रवणाभावात् न हि कर्मभेदः इति प्राप्ते— अभिधीयते- समिधो यजति, तनूनपातं यजति इत्यादि वाक्येषु समिदादिपदानां देवतानियामकत्वं नास्ति । न हि एते विधयो देवता नियमविधयो भवन्ति । याज्यामन्त्राणां देवताप्रापकत्वं उत अनुमन्त्रणमन्त्रणदेवताप्रापकत्वमिति अनिर्णयवशात् पाक्षिक-अयोगव्यावृत्तिः वक्तुं न शक्या । तयोः तुल्यबलत्वाभावात् न अनिर्णयः । याज्यामन्त्राः उभयाकाङ्क्षया यागेन सम्बध्यन्ते । अनुमन्त्रणमन्त्रास्तु अन्यतराकाङ्क्षया सम्बध्यन्ते । याज्यामन्त्रपठनकाले यागः अनिष्पन्नः इति यागमन्त्रयोः परस्परम् आकाङ्क्षा जायते । (तयोः उपकार्य-उपकारककाङ्क्षा) उभयाकाङ्क्षया सम्बध्यमानयोः याज्यामन्त्रयागयोः यस्सम्बन्धः सः प्रबलप्रमाणबोधितो भवतीति याज्यामन्त्रस्यैव देवतासमर्पकत्वम् अङ्गीक्रियते । अनुमन्त्रणमन्त्रपठनकाले यागस्य निष्पन्नत्वात् अन्यतराकाङ्क्षया सम्बन्धः इति प्रबलप्रमाणलभ्ययाज्यामन्त्रैरेव देवताप्राप्तिर्नियतेति पाक्षिप्राप्तिर्नैव भवति । अत एव समिदादिदेवताः नियमविधेः विषया नैव भवन्ति । तर्हि समिधो यजति तनूनपातं यजति इत्यादौ किं वा विधीयते इति जिज्ञासायां समिदादिद्वितीयान्तस्य उपपदार्थस्य सम्भवप्राप्तिकत्वात् (मन्त्रवर्णादेव प्राप्तत्वात्) धावत्वर्थ एव विधिना विधेयः । अतः सर्वत्र पूर्ववाक्येन विहिता भावना उत्तरवाक्येषु विधातुं न शक्यत इति अन्या एव धात्वर्थभावना विधेया भवति । पुनश्च अभ्यासादेव धात्वर्थभावनाभेदसिद्धिः । यदि पूर्वविहितधात्वर्थभावनापेक्षया पश्चात् विधीयमाना भावना भिन्ना भवति तदा तु वैजात्यं सिध्यति । तदवच्छेदकधात्वर्थस्यापि वैजात्यम् अभ्यासात् सिध्यति ।

ननु अभ्यासात् धात्वर्थभावनाभेदसिद्धिः इति यन्निरूपितं तन्मास्तु । संज्ञारूपप्रमाणेनैव भेदसिद्धिर्भवितुमर्हति ।

[1]भाट्टचिन्तामणिः -२-२-२

समिदादिपदानि तत्प्रख्यशास्त्रेण कर्मनामधेयबोधकानि । सर्वेषां यागानां भिन्ना भिन्ना संज्ञा । तया संज्ञयैव वक्ष्यमाणरीत्या कर्मभेदः उपपादयितुं शक्यत इति अभ्यासस्य असङ्कीर्णं स्थानम् इदं न भवति । अतः नात्र अभ्यासात् कर्मभेदः । किन्तु संज्ञयैव इति चेत् उच्यते –

**विधित्सितगुणप्रापि वाक्यमन्यद्यतस्त्विह । तस्मात् तत्प्रापणं व्यर्थम् इति नामत्वमिष्यते** [१] ॥ **इति ।**

विधित्सितगुणप्रापकं शास्त्रं तत्प्रख्यशास्त्रम् । तदस्ति चेत् नायं गुणविधिः इत्येव ज्ञायते । गुणविधिनिराकरणे कृते नामत्वम् अवधार्यते । एवम् प्रकृतेऽपि गुणविधित्वम् आदौ निराकृतम् । ततो विचार्यमाणे यदीदं नामधेयं स्यात् तर्हि एकेनैव नामत्वसिद्धौ पुनः पुञ्च संज्ञाः कुतः इति वैयर्थ्यप्रसङ्गेन गुणानुवादकत्वमेव सिध्येत् । अतः अभ्यासात्कर्मभेदे सिद्धे एकस्य कर्मणः एकं नामधेयमिति संज्ञसिद्धिः । अतः अत्र संज्ञात्वस्य अभ्यासाधीनत्वत् अभ्यास एव भेदकः इति अभ्यासादेव कर्मभेदः अभ्युपगन्तव्यः । अभ्यासात् कर्मभेदे एककैस्य कर्मणः एकैकं नामधेयं सार्थकमिति नामत्वसिद्धिः । **एकस्यैवं पुनश्श्रुतिरविशेषादनर्थकं हि स्यात्** इति । सूत्रार्थस्तु - एकस्य यजि धातोः अविशेषात् गुणविधानतात्पर्यादिविशेषाभावेन या पुनः श्रुतिः सा कर्मभेदिका । अन्यथा तथा पुनःश्रवणम् अनर्थकं हि स्यात् इति शम् ॥

## परिशीलितग्रन्थाः


१) मीमांसाशाबरभाष्यम्

२) मीमांसाकौस्तुभः

३) भाट्टदीपिका (भाट्टचिन्तामणिसहिता)

४) मीमांसोद्धरणकोशः

५) जैमिनीयन्यायमालाविस्तरः

६) तन्त्रवार्तिकम्


[१] तन्त्रवार्त्तिकम्-१-४-४

# त्रिवृत्करणम् उत पञ्चीकरणम् ?

आचार्यः गणेश ईश्वर भट्टः*
के.सं.वि., रा. गा. परिसरः
शृङ्गेरी

**सत्यज्ञानानन्दरूपो नित्यमुक्तो निरञ्जनः ।**
**गुरुः श्रीभारतीतीर्थः भगवान् भुवि राजते ॥**

***लेखसारः*** *– नित्यशुद्धबुद्धमुक्तस्वभावोऽपि स भगवान् अघटितघटनापटीयसीं स्वां मायामुपादाय लीलया अशेषं जगदिदं ससर्ज । तत्रादौ सूक्ष्माणि पञ्चभूतानि सृष्ट्वा ततः तेषां पञ्चीकरणम् अकरोत् इति वेदान्तशास्त्रे प्रथितो विषयः । तथा च छान्दोग्यश्रुतिः* ***"तासां त्रिवृतं त्रिवृतमेकैकां करवाणि"*** *इति । इमां श्रुतिम् उदाहृत्य वेदान्तग्रन्थेषु पञ्चीकरणं निरूप्यते । किन्तु इदमत्र विचारणीयं यत् किं पञ्चीकरणं साक्षात् श्रुत्या उपदिष्टम् ? किं सर्वेषां वेदान्तिनां पञ्चीकरणं सम्मतम् ? किम् अश्रुतत्वात् पञ्चीकरणम् उपेक्षणीयम् इति । तदर्थं पञ्चीकरणं तथा तस्य मूलं च अत्र विचारितम् ।*

***कूटशब्दाः*** *– पञ्चीकरणम्, त्रिवृत्करणम्, आकाशः, प्रत्यक्षत्वम्, गुणः, रूपम्, शङ्कराचार्यः, भाष्यम्, छान्दोग्योपनिषत् ।*

वेदान्तशास्त्रे एवं हि पञ्चीकरणस्य प्रक्रिया प्रसिद्धा -

**तद्भोगाय पुनर्भोग्यभोगायतनजन्मने । पञ्चीकरोति भगवान् प्रत्येकं वियदादिकम् ॥**
**द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः । स्वस्वेतरद्वितीयांशैः योजनात् पञ्च पञ्च त[१] ॥इति ।**

अस्यार्थः - प्राणिनां कर्मफलोपभोगाय खलु सृष्टिः । भोगो हि भोग्यभोगायतनसापेक्षः । केवलं सूक्ष्मशरीरं सूक्ष्मभूतं वा भोगं न जनयति । अतस्तयोः भोग्यभोगायतनयोः सर्जनाय भूतेषु स्थौल्यम् आनिनीषुः परमेश्वरः पञ्चीकरणं व्यधात् । पञ्चीकरणं नाम पञ्चानामपि भूतानां पञ्चभूतात्मकत्वसम्पादनम् । तद्यथा- आदौ प्रत्येकमपि भूतं द्वेधा विभज्य ततः परमेश्वरः तत्र प्रथमभागं पुनः चतुर्धा व्यभजत् । ते च चत्वारः भागाः इतरेषु चतुर्षु भूतेषु संयोजिताः । एवं कृते सति एकैकमपि भूतं स्वांशेन इतरभूतांशचतुष्टयेन चेति पञ्चात्मकताम् आप्नोति ।

त्रिवृत्करणप्रक्रिया त्वेवम्- प्रत्येकं भूतम् आदौ द्वेधा विभज्यते । तत्र प्रथमस्य भागस्य पुनः द्वेधा विभागे सति तद्भागद्वयम् इतरभूतद्वये संयुज्यते । एवं त्रीण्यपि भूतानि त्र्यात्मकत्वम् आप्नुवन्ति । यद्यपि पञ्चीकरणप्रक्रिया शास्त्रे प्रसिद्धा । तथापि भामतीमतानुयायिभिः त्रिवृत्करणम् एव आद्रियते ।

तथा हि ईक्षत्यधिकरणे जगत्कारणस्य छान्दोग्यश्रुत्युक्तस्य सत्पदार्थस्य चेतनत्वसाधनावसरे श्रुत्युक्तम् ईक्षणं हेतुत्वेन प्रदर्शितम् - "**प्रकृतस्य सच्छब्दवाच्यस्य ईक्षणपूर्वकं तेजःप्रभृतेः स्रष्टृत्वं दर्शयति**[२]" इति । किन्तु जगत्सृष्टिकाले आकाशादीनी पञ्चभूतानि सृज्यन्त इत्यतः आकाशसृष्टेः एव प्राथम्यं वस्तुतः वक्तव्यम् । एवं सति कथं भाष्ये तेजःप्रभृतेः इति पदं प्रयुक्तम् इति जिज्ञासा जायते । तत्रेदं समाधानम्- ईक्षत्यधिकरणे छान्दोग्यश्रुत्युक्तम् ईक्षणम् आदाय भाष्यकाराः प्रवृत्ताः । छान्दोग्ये च आकाशस्य वायोः च सृष्टिम् अनुक्त्वा प्रथमं तेजसः एव सृष्टिः प्रदर्शिता । एतावता वाय्वाकाशयोः उत्पत्तिः न श्रुतिभाष्यादिसम्मता इति न मन्तव्यम् । अनादिषड्भिन्नं ब्रह्मातिरिक्तं सर्वं ब्रह्मण उत्पद्यते । अयमर्थः वियत्पादे पूर्वपक्षनिरासपूर्वकं निरूपितः । तथा च सूत्रं "**प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः**[३]" इति । छान्दोग्योपनिषदि

***सम्पर्कसूत्रम्** – 9448906454, Email – dr.ganesh.ishwar@csu.co.in

[१]पञ्चदशी १-२६,२७
[२]ब्रह्मसूत्रशाङ्करभाष्यम् १-१-५
[३]ब्रह्मसूत्रम् २-३-६

एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातम् । सर्वस्यापि ब्रह्मोपादानकत्वेन ब्रह्मणः अव्यतिरेकात् श्रुत्युक्तं सर्वज्ञानं सङ्गच्छते । यदि आकाशः ब्रह्मणः न अजनिष्यत तर्हि श्रौती प्रतिज्ञा विरुध्येत । अतः अस्त्येव आकाशस्य उत्पत्तिः । स्फुटं तैत्तिरीयश्रुतिः आकाशस्य सृष्टिं शास्ति **"आत्मन आकाशः सम्भूतः**[१]" इति । छान्दोग्योपनिषदि तु त्रिवृत्करणस्य प्रतिपिपादयिषितत्वात् तत्र च वाय्वाकाशयोः अपेक्षाभावात् त्रयाणामेव भूतानां सृष्टिः श्राविता । तदर्थविचारपरं भाष्यमपि आकाशसृष्टिप्रतिपादकं वियदधिकरणम् उपेक्ष्य प्रवृत्तम् । अतः छान्दोग्यश्रुत्यर्थविचारावसरे भाष्ये यत्तेजसः सृष्टेः प्राथम्यमुक्तम् तन्न अनुपपन्नमिति । तथा च भामती - **"तेजोबन्नानामेव त्रिवृत्करणस्य विवक्षितत्वात् तेजः प्रथमम् इत्युक्तम्**[२]" इति । तेन अयमपि न्यायः सिद्धो भवति यत् शास्त्रे वक्ष्यमाणः अर्थः प्रकृतसम्बद्धोऽपि प्रकृतानपेक्षितः चेत् तस्य त्यागः न दोषाय इति ।

इमं विषयं स्फुटीकृत्य प्रसङ्गात् अत्र कल्पतरुकाराः त्रिवृत्करणस्यैव युक्ततां मन्यमानाः पञ्चीकरणं निराचक्रुः । तदर्थं तैः इमे श्लोका आरचिताः-

**सम्प्रदायाध्वना पञ्चीकरणं यद्यपि स्थितम् । तथापि युक्तियुक्तत्वाद्वाचस्पतिमतं शुभम् ॥**

**पृथिव्यबनलात्मत्वं गगने पवने च चेत् । रूपवत्त्वमहत्त्वाभ्यां चाक्षुषत्वं प्रसज्यते ॥**

**अर्धभूयस्त्वतः क्षित्याद्यविनाभावकल्पने । व्यवहारपथा प्राप्ता मुधा पञ्चीकृतिर्भवेत् ॥**

**अनपेक्ष्य फलं वेदसिद्धेत्येषेष्यते यदि । त्रिवृत्कृतिः श्रुता पञ्चीकृतिः न क्वचन श्रुता**[३] **॥ इति ।**

अयमर्थः- साम्प्रदायिकाः यद्यपि जगत्सृष्टिवर्णनावसरे भूतानां पञ्चीकरणं प्रतिपादयन्ति । किन्तु भामत्यां यत् त्रिवृत्करणम् उक्तम्, तदेव जिज्ञासुभिः उपादेयम् । युक्त्या विचार्यमाणे त्रिवृत्करणमेव ग्राह्यमिति ज्ञायते । तथा हि पञ्चीकरणे अङ्गीक्रियमाणे, पृथिवी-जल-तेजोभूतांशानां वाय्वाकाशयोः अपि प्रविष्टत्वात्, यथा पृथिव्यादिषु रूपस्य महत्त्वस्य च विद्यमानत्वात् चाक्षुषप्रत्यक्षविषयत्वम् अस्ति, तथैव वाय्वाकाशयोः अपि चाक्षुषत्वं कुतो न स्यात् । तयोः चाक्षुषत्वं तु नास्त्येव । यदि अर्धांशेन तयोः स्वीयाचाक्षुषस्वरूपतया पार्थिवाद्यंशसद्भावेऽपि पार्थिवाद्यंशस्य अभिव्यक्तेः आभावात् वाय्वाकाशयोः अचाक्षुषत्वं समर्थ्यते, तर्हि पञ्चीकरणं व्यर्थम् इति वक्तव्यं स्यात् । यतः पञ्चीकरणे जातेऽपि वाय्वाकाशयोः कोऽपि विशेषः न सञ्जातः । अथापि एवमुच्येत- पञ्चीकरणेन वाय्वाकाशयोः विशेषः सञ्जायत इयि हेतोः तस्य प्रतिपादनं न क्रियते, किन्तु श्रुत्युक्तत्वात् पञ्चीकरणम् अङ्गीकर्तव्यम् इति, तदपि अयुक्तम् । उपनिषदि **"तासां त्रिवृतं त्रिवृतमेकैकां करवाणि**[४]" इति त्रिवृत्करणमेव श्रूयते । कापि पञ्चीकरणस्य अभिधायिनी श्रुतिः न उपलभ्यते । किञ्च लोके पृथिव्यप्तेजसां मेलनं तु अनुभवसिद्धम् । पञ्चानामपि मेलनं न प्रतीयते ।

श्रुत्यर्थनिर्णयाय प्रवृत्तः सूत्रकारोऽपि **"संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्**[५]" इति सूत्रयन् त्रिवृत्करणस्य प्रामाणिकत्वं मन्यते । अन्यथा सः "पञ्चीकुर्वत" इत्यकथयिष्यत् । अतः त्रिवृत्करणपञ्चीकरणयोः मध्ये त्रिवृत्करणम् एव श्रेयः इति भामत्यनुयायिनः मन्यन्ते ।

किन्तु मतमिदम् अन्ये ग्रन्थकाराः निराकुर्वन्ति । तद्यथा सिद्धान्तबिन्दौ अष्टमश्लोकार्थवर्णनावसरे मधुसूदनश्रीचर-

[१]तैत्तिरीयोपनिषत् २-१

[२]ब्रह्मसूत्रभाष्यभामती १-१-५

[३]ब्रह्मसूत्रभाष्यभामतीकल्पतरुः १-१-५

[४]छन्दोग्योपनिषत् ६-३-३

[५]ब्रह्मसूत्रम् २-४-२०


ISSN : 2249-538X

णाः प्राहुः **“अत्र च त्रिवृतं त्रिवृतमेकैकां करवाणि”** इति श्रुतेः, **त्रिवृत्कुर्वत उपदेशात् इति सूत्राच्च त्रयाणामेव मेलनप्रतीतेश्च त्रिवृत्करणमेव केचिन्मन्यन्ते । ये वियदधिकरणन्यायेनैव निराकृताः**[1]” इति । वियदधिकरणे हि आकाशस्यापि उत्पत्तिः साधिता इति पूर्वं दर्शितम् । समानन्यायेन वायोः अपि उत्पत्तिः साधिता । एवं सति पृथिव्यप्तेजसामिव वाय्वाकाशयोः अपि उत्पद्यमानत्वात् सत्यपि पञ्चभूतोत्पत्तौ, पञ्चीकरणं विहाय त्रिवृत्करणमेव श्रुत्यभिप्रेतम् इति कथनम् अयुक्तम् । छान्दोग्योपनिषदि श्रुतं त्रिवृत्करणं पञ्चीकरणस्य उपलक्षणम् । अतः पञ्चभूतोत्पत्तिरिव पञ्चीकरणमपि श्रौतमेव ।

अत्राशङ्का- आकाशस्य उत्पत्तौ स्वीक्रियमाणायाम्, छान्दोग्ये उत्पत्तिप्रकरणे यत् तेजसः प्राथम्यं श्रुतम्, तद्भज्यत इति । उच्यते- पदार्थधर्मापेक्षया धर्मी पदार्थो बलवान् । अत एव **“वेदं कृत्वा वेदिं करोति**[2]” इति श्रुतेः वेदकरणानन्तरं यदि क्षुतम् आयाति तर्हि **“क्षुत आचामेत्**[3]” इति स्मृतेः सद्भावात्, आचमनं कृत्वैव वेदिनिर्माणं कर्तव्यम्, स्मृतेः श्रुत्यपेक्षया दौर्बल्येऽपि स्मृतिम् उपेक्ष्य वेदकरण-वेदिकरणयोः अव्यवधानपालनाय आचमनस्य त्यागे आचमनरूपः धर्मी त्यक्तो भवति, तद्वरं अव्यवधानरूपस्य धर्मस्य त्याग इति निर्णीतं पूर्वतन्त्रे । तथा च प्रकृते उत्पत्तौ तेजसः प्राथम्यधर्मस्य त्यागः न दोषाय । वाय्वाकाशयोः उत्पत्त्यभावे प्रतिज्ञोपरोधादयः दोषाः प्राग् दर्शिताः ।

अपि च श्रुत्या त्रिवृत्करणं दर्शितम् । किन्तु तया त्रिवृतमेव करवाणि न तु पञ्चीकृतम् इति पञ्चीकरणस्य व्यावृत्तिः न कृता । एकेन वाक्येन त्रिवृत्करणस्य उपदेशः पञ्चीकरणस्य निराकरणं चेति द्वयं कर्तुं न शक्यम्, वाक्यभेदापत्तेः । अत एव त्रिवृत्कुर्वतः इति सौत्रपादमात्रेण न्यायसिद्धं पञ्चीकरणं निराकर्तुम् अशक्यम् । तथा चोक्तम् आनन्दगिरिव्याख्याने **“यथा छान्दोग्ये भूतत्रयसृष्टिस्तैत्तिरीयश्रुत्यनुरोधाद्भूतपञ्चकविषयोक्ता तथात्रापि त्रिवृत्करणं, पञ्चीकरणाभिप्रायं द्रष्टव्यं श्रुत्यन्तरे पञ्चानां भूतानां सृष्टेरुक्तत्वात्”** इति ।

मेलनप्रतीतिरपि वाय्वाकाशयोः समाना । यथा पृथिव्यादौ जलादिमलनप्रतीतिः प्रत्यक्षरूपा वर्तते, तथैव वायोरपि शीतस्पर्शविशिष्टजलविशिष्टप्रतीतिः उष्णस्पर्शविशिष्टतेजःप्रतीतिः, गन्धविशिष्टपृथिवीसंयुक्तत्वप्रतीतिः वर्तते । एवमेव आकाशस्यापि तेजःपार्थिवादिविशिष्टतया चाक्षुषप्रतीतिः साक्षिरूपा वा प्रतीतिः अस्ति । न च नीरूपत्वात् आकाशः न प्रत्यक्ष इति वाच्यम्, कालस्येव प्रत्यक्षत्वसम्भवात् । आकाशस्य साक्षिवेद्यत्वपक्षे तु रूपं नैव अपेक्षितम् ।

अत्र भाष्यकाराणां कः अभिप्रायः इति विचार्यमाणे पञ्चीकरणमेव तेषामभिमतम् इति ज्ञायते । तथा हि तेजोबन्नानां तद्विकाराणां च त्रिवृत्कृतानां सर्वेषां ब्रह्मप्रभवत्वेन ब्रह्माभिन्नत्वात् तेषां ब्रह्मज्ञानेन ज्ञानसम्भवेऽपि, त्रिवृत्करणे अप्रविष्टयोः वाय्वाकाशयोः ज्ञानं कथम् इति शङ्कायाम्, प्रथमं भाष्यकारैः रूपवत्सु तेजोबन्नेषु शब्दस्पर्शवतोः वाय्वाकाशयोः अन्तर्भावात् ब्रह्मविकारत्वम् उक्तम् ।ततः द्वितीयं समधानमुक्तम् - **“रूपवतामपि त्रिवृत्करणं प्रदर्शनार्थमेव मन्यते श्रुतिः । यथा तु त्रिवृत्कृते त्रीणि रूपाणीत्येव सत्यम्, तथा पञ्चीकरणेऽपि समानो न्यायः**[4]” इति । अनेन पञ्चभूतसृष्टिरिव पञ्चीकरणमपि भाष्यकाराणां सम्मतमिति ज्ञायते । किञ्च, स्वयं भगवत्पादैः पञ्चीकरणमिति कश्चन ग्रन्थः विरचितः यः सन्न्यासिनाम् अत्यन्तम् उपादेयः । तत्र तु पञ्चीकरणमेव प्रतिपादितम् । यथा - **“पञ्चानां भूतानाम् एकैकं द्विधा विभज्य स्वार्धभागं विहाय अर्धभागं चतुर्धा विभज्य इतरेषु योजिते पञ्चीकरणं मायारूपदर्शनम् अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते । ओं पञ्चीकृतपञ्चमहाभूतानि तत्कार्यं सर्वं विराड् इत्युच्यते**[5]” इति । अत्र प्राचीनैः प्रकारान्तरेण अन्तर्भावम्

[1] सिद्धान्तबिन्दुः -८
[2] आपस्तम्बश्रौतसूत्रम् ७-३-१०
[3] गोभिलगृह्यसूत्रम्-१-२-३२
[4] छन्दोग्योपनिषद्भाष्यम् ६-३-३
[5] पञ्चीकरणम्, पृष्ठम्-२

आश्रित्य यत् समाधानन्तरमुक्तं तदेवं दर्शितं विद्वन्मनोरञ्जिन्याम् - **“आकाशस्य सर्वव्यवहारहेतुतया सर्वाव्यतिरेकाद्, वायोश्च सर्वचेष्टाहेतुत्वेन सर्वाविनाभूतत्वात् तयोः तेजःप्रभृतिषु अन्तर्भावं सिद्धवत्कृत्य त्रिवृत्करणं प्रयोगसौकार्यार्थं श्रुतिः वर्णयाम्बभूव**[१]” इति ।

तथापि पञ्चीकरणेन सर्वेषु भूतेषु सर्वभूतांशानां सत्त्वात् आकाशे रूपस्यापि सद्भावप्रसङ्गात् आकाशः अपि प्रत्यक्षः कुतो न स्यात् इति चेत् उच्यते- पञ्चीकरणेन कस्मिंश्चित् भूते अविद्यमानः गुणः आयाति इति नोच्यते । किन्तु यस्मिन् भूते यः गुणः उपादानकारणवशात् प्रागेव अनभिव्यक्तरूपेण स्थितः स अभिव्यज्यते । आकाशादिक्रमेण भूतेषु उत्पद्यमानेषु सत्सु, शब्दादयः गुणाः उत्तरोत्तरं वर्धन्ते । तदा आकाशे शब्दः,, वायौ शब्दस्पर्शौ, तेजसि शब्दस्पर्शरूपाणि, अप्सु शब्दस्पर्शरूपरसाः तथा पृथिव्यां शब्दस्पर्शरूपरसगन्धाः च भवन्ति । पञ्चीकरणे सति इमे गुणा व्यवहारविषयाः भवन्ति । अतस्तदा पृथिव्यां पञ्चानामपि गुणानां सद्भावात् तत्तदिन्द्रियेण तत्तद्विषयः गृह्यते । वाय्वाकाशयोः तु रूपवद्भुतोपादानकत्वाभावात् न तत्र रूपम् अभिव्यज्यते । न हि आकाशः वायुर्वा तेजोबन्नैः जायन्ते । सर्वोऽप्ययमर्थः भगवत्पादैः विरचिते सर्ववेदान्तसिद्धान्तसारसङ्ग्रहे स्फुटं प्रदर्शितः । तद्यथा-

**संयोज्य स्थूलतां यान्ति व्योमादीनि यथाक्रमम् । अमुष्य पञ्चीकरणस्याप्रामाण्यं न शङ्क्यताम् ॥**
**उपलक्षणमस्यापि तत्त्रिवृत्करणश्रुतिः । पञ्चानामपि भूतानां श्रूयतेऽन्यत्र सम्भवः ॥**
**ततः प्रामाणिकं पञ्चीकरणं मन्यतां बुधैः । प्रत्यक्षादिविरोधः स्यादन्यथा क्रियते यदि ॥**
**आकाशवाय्वोर्धर्मस्तु वह्न्यादावुपलभ्यते । यथा तथाकाशवाय्वोर्नाग्न्यादेर्धर्म ईक्ष्यते ॥**
**अतोऽप्रामाणिकमिति न किञ्चिदपि चिन्त्यताम् । खांशव्याप्तिश्च खव्याप्तिर्विद्यते पावकादिषु ॥**
**तेनोपलभ्यते शब्दः कारणस्यातिरेकतः । तथा नभस्वतो धर्मोऽप्यग्न्यादावुपलभ्यते ॥**
**न तथा विद्यते व्याप्तिर्वह्न्यादेः खनभस्वतोः । सूक्ष्मत्वादंशकव्याप्तेस्तद्धर्मो नोपलभ्यते ॥**
**कारणस्यानुरूपेण कार्यं सर्वत्र दृश्यते । तस्मात्प्रामाण्यमेष्टव्यं बुधैः पञ्चीकृतेरपि**[२] **॥**

अपि च गीतायां तु

**“महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च । इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः**[३] **॥**

इति श्लोकस्य व्याख्यानावसरे भाष्यकारैः इन्द्रियगोचरशब्दस्य स्थूलानि भूतानि इति व्याख्या कृता । एवं सति भूतपञ्चकान्तर्गतयोः वाय्वाकाशयोः स्थूलत्वं वक्तव्यम् । कथं हि तयोः स्थूलत्वं सिद्ध्येत् यदि पञ्चीकरणं न स्यात् । किञ्च, **“पृथिवी च पृथिवीमात्रा चापश्चापोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा च**[४]” इति प्रश्नोपनिषदि श्रूयते । अस्यां श्रुतौ प्रत्येकं भूतस्य रूपद्वयं श्रुतम् ।तच्च रूपद्वयं पञ्चीकृतम् अपञ्चीकृतं चेति अवश्यं वक्तव्यम्, प्रकारान्तरासम्भवात् । एवं सति पृथिव्यादीनाम् इव वाय्वाकाशयोः अपि पञ्चीकृतरूपप्रापकपञ्चीकरणप्रक्रियायां प्रवेशः अस्तीति स्फुटं ज्ञायते ।

एवमपि भामतीमतानुयायिभिः त्रिवृत्करणमेव आद्रियते । तत्र प्राग्दर्शितेषु कल्पतरुश्लोकेषु एका मुख्या युक्तिः वर्तते श्रुत्या साक्षात् पञ्चीकरणं नोक्तमिति । तथा सूत्रभाष्यकारयोः अपि त्रिवृत्करणे आदरः लक्ष्यते । त्रिवृत्कुर्वत

[१]वेदान्तसारः, पृष्ठम्-१०९
[२]सर्ववेदान्तसिद्धान्तसारसङ्ग्रहः, पृष्ठम्-२२
[३]भगवद्गीता-१३-१०
[४]प्रश्नोपनिषत् ३-५


ISSN : 2249-538X

इति छान्दोग्यश्रुत्यनुकरणंत चेदपि अन्यत्रापि पञ्चीकृत इति पदप्रयोगे सम्भवत्यपि त्रिवृत्कत इति पदप्रयोगो दृश्यते । यथा तदन्तरप्रतिपत्त्यधिकरणस्थं सूत्रं **"त्र्यात्मकत्वात्तु भूयस्त्वात्**[१]**"** इति । इदं सूत्रं भाष्यकारैः अनेकधा व्याख्यातम् । तत्रैकं व्याख्यानं **"त्र्यात्मिका ह्यापः त्रिवृत्करणश्रुतेः"** इति । एवं ज्योतिश्चरणाभिधानात्[२] इत्यधिकरणे यदतः परो दिवो ज्योतिर्दीप्यते[३] इत्यस्यां श्रुतौ ज्योतिश्शब्दार्थः कः इति विचारावसरे पूर्वपक्षनिराकरणकाले आदौ भौतिकं ज्योतिः ज्योतिश्शब्दार्थः भवितुं नार्हति इत्युक्तम् । ततः पूर्वपक्षिणा अन्यः पक्ष उत्थापितः अस्तु तर्हि अत्रिवृत्कृतं तेजः इति । त्रिवृत्कृतस्य तेजसः सर्वलोकव्यापित्वेऽपि अत्रिवृत्कृतस्य तेजसः सीमाकरणं युज्यत इति तदाशयः । अत्र श्रौतस्य सौत्रस्य वा पदस्य व्याख्यानस्य अप्रसक्तत्या स्वतन्त्रा अपि भाष्यकाराः पञ्चीकृतपदं विहाय अत्रिवृत्कृतम् इत्येव पदं प्रायुञ्जत ।

अपि च न्यायरक्षामणौ जन्माद्यधिकरणे हिरण्यगर्भ एव जगत्कारणमिति पक्षं प्राप्य ततः ब्रह्मकारणत्ववादिना सिद्धान्तिना तन्निराकृतम् । तत्र अप्पय्यदीक्षितानां वचनमिदम् - **"परमेश्वरः प्रथमं वियदादीनि भूतानि सृष्ट्वा तत्त्रिवृत्करणानन्तरं तैरण्डं निर्माय तन्मध्ये हिरण्यगर्भं निर्ममे**[४]**"** इति । अत्र दीक्षितैः वियतः सृष्टिमुक्त्वाऽपि पञ्चीकरणम् अनुक्त्वा त्रिवृत्करणमेव अभिहितम् । तेन पञ्चीकरणं तेषाम् अनभिमतम् इति ज्ञायते । अपि च अद्वैतसिद्धिकाराः आकाशस्य प्रत्यक्षस्य लिङ्गाद्यबाध्यत्वे बाधकनिरूपणावसरे आकाशस्य रूपवत्त्वप्रसङ्गं वारयन्तः प्राहुः **"न च पञ्चीकरणाद्रूपवदारब्धत्वेन नभसो नीरूपत्वं बाधितमिति वाच्यम्, त्रिवृत्करणपक्षे अस्य दूषणस्यानवकाशात्**[५]**"** इति । त्रिवृत्करणं हि शास्त्रप्रतिपाद्यम्, तत्र आकाशस्य अप्रवेशात् तेजोबन्नानाम् इव तस्य रूपवत्त्वं नापद्यत इति तदर्थः । यद्यपि पञ्चीकरणपक्षेऽपि समाधानं तैरभिहितम्, तथापि पञ्चीकरणपक्षेऽपि इति पश्चात् तत्समाधानमारब्धम् । तेन त्रिवृत्करणवादस्य अनुपेक्षणीयत्वं ज्ञायते ।

एवं समीक्ष्यमाणे, पञ्चीकरणस्य प्रसिद्धत्वेऽपि तत् सर्वसम्मतं तु नास्ति इत्यवगम्यते । किन्तु जगत्सृष्टेः तदन्तर्गतस्य पञ्चीकरणादेः वा पारमार्थिकत्वे अयं मतभेदः दोषाय स्यात् । पञ्चीकरणं भवतु अथवा त्रिवृत्करणम्, पक्षद्वयेऽपि ब्रह्मण एव जगत्कारणत्वात् , तदद्वितीयं ब्रह्मैव सत्यम्, जगन्मिथ्या इति परमसिद्धान्तः समान एवेति शम् ।

## सन्दर्भग्रन्थसूची


१. उपनिषद्भाष्यम्, भागः-२ सं- सुब्रह्मण्यशास्त्री, प्रकाशनम्- दक्षिणामूर्तिमठप्रकाशनम्, वाराणसी
२. ब्रह्मसूत्रशाङ्करभाष्यम्, सं- आचार्य जगदीशशास्त्री, प्रकाशनम्- मोतिलाल बनारसीदास
३. न्यायरक्षामणिः,(अप्पय्यदीक्षितविरचितः) प्रकाशनम्- चौखाम्बासुरभारतीप्रकाशनम्, वाराणसी
४. ब्रह्मसूत्रशाङ्करभाष्यम्, (भामतीकल्पतरुपरिमलोपेतम्) प्रकाशनम्- राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली
५. पञ्चदशी,विद्यरण्यमुनिरचितः, निर्णयसागरमुद्रणालय, मुम्बै
६. सर्ववेदान्तसिद्धान्तसारसङ्ग्रहः (शङ्कराचार्यविरचितः) वाणिविलासम्द्रणाय, श्रीरङ्गम्
७. वेदान्तसारः (सदानन्दविरचितः) चौखाम्बा कृष्णदास अकाडेमि वाराणसी


[१]ब्रह्मसूत्रम् ३-१-३
[२]ब्रह्मसूत्रम् १-१-१५
[३]छन्दोग्योपनिषत् ३-१३-२७
[४]न्यायरक्षामणिः पृष्ठम्-०८
[५]अद्वैतसिद्धिः पृष्ठम्-१५६

# 'निष्ट॒र्क्यं'शब्दसिद्धिनिरूपणम्

आचार्यः ई. आर्. नारायणन्*
के.सं.वि.गुरुवायुर् परिसरः
केरलम्

***लेखसारः*** *– निपातनं हि शब्दानां लक्षणैरनुत्पद्यमानत्वे सति तत्साधनत्वोपायत्वमिति सिद्धं भाष्यसम्मतं सङ्गच्छते। तदाह भगवानादिशेषः, 'यल्लक्षणेनानुपपन्नं तत् सर्वं निपातनात् सिद्धम्' इति। छन्दसि श्रुतानां दर्शपूर्णमासजातकर्मादि-होमक्रियादिषु प्रयुक्तमन्त्राणां तदंशानां वा शब्दानां क्वचित्सिद्धिर्निपातनादेव श्रूयते। महर्षिर्निजसूक्ष्मेक्षिकया विततं लोके च च्छन्दसि शब्दराशिं व्याकृत, तद्व्याकरणं यावचन्द्रार्काववतिष्ठत इति तत्पक्षः। छन्दोविषये त्रयीमन्त्रान् श्रावं श्रावं मुनिः सूत्राणि प्रणिनाय। तत्र स 'निष्ट॒र्क्यं' इत्यादीन् शब्दांस्तैत्तिरीयादिप्रसिद्धान् सूत्रेषु निपातनं प्रायुङ्क्त। तथैव श्रुतिः, 'निष्ट॒र्क्यं चिन्वी॑त प॒शुका॑मः' तैत्ति. सं. ५.४.११। तैत्तिरीयसंहितायां काम्यचितीनामभिधानमत्र निर्दिष्टम्। दर्शपूर्णमासे शिशूनां जातकर्मणि च 'निष्ट॒र्क्यं'प्रयोगः। तच्छब्दनिपातनादिकं तावन्निरूपयामः।*

**॥ मङ्गलाचरणम् ॥**

**हस्ताब्जाधारघोरप्रकटितविपुलप्रोल्लसच्छस्त्रजाल- क्षेपक्षेमत्रिलोकप्रसृमरविनुतानुग्रहोपात्तरूपाम्।**
**शूलाग्रोग्रप्रहारप्रणिहतमहिषप्रोद्वहत्प्रौढिपूर- प्रेङ्खद्वात्सल्यभक्ताशयशयनचणामम्बिकामाश्रयेऽहम्॥१॥**
**विद्यामूर्तितया स्पृणोत्यविरतं भक्तानभीष्टैर्वरै- रान्ध्यं क्लेशमपास्य या भगवती विज्ञानसन्दायिनी।**
**वीणाऽऽलग्नकरां समस्तजगतामुत्साहदात्रीं परां वाचं वाग्भिरुपासितुं प्रथमतो भक्तस्य यत्नो मम॥२॥**
**सच्छाब्दिकं त्रिमुनिमार्गमुपेयिवांसं विप्रोन्नुताखिलसुशिष्यतताढ्यवन्द्यम्।**
**विज्ञानमूर्तिमतुलं गुरुमात्तशास्त्रं गोविन्दपाणिघवरेण्यमनुस्मरामि॥३॥**
**'लक्षणानुपपन्नं यत् सिद्धं सर्वं निपातनात्। लोके च च्छन्दसि प्रोक्तिर्दाक्षीपुत्रस्य पाणिनेः॥' इति।**

अपि चास्मद्गुरवः पण्डित'सप्तकौडि'मुखोपाध्यायपादा आहुः,

**'लोके छन्दसि चाखिले हि विततो यः शब्दराशिर्महां- स्तत्तत्त्वं प्रसमैक्षतातिनिपुणं यस्यैव सूक्ष्मेक्षिका।**
**यावच्चन्द्रदिवाकरौ, विजयते भूमौ यदीया कृति- स्तस्मै पाणिनये ममास्तु सततं भक्तिप्रसूनाञ्जलिः॥ इति।**

इत्थञ्च महर्षिर्निजसूक्ष्मेक्षिकया विततं लोके च च्छन्दसि शब्दराशिं व्याकृत, तद्व्याकरणं यावच्चन्द्रार्काववतिष्ठत इति तत्पक्षः। छन्दोविषये त्रयीमन्त्रान् श्रावं श्रावं मुनिः सूत्राणि प्रणिनाय। तत्र स 'निष्ट॒र्क्यं' इत्यादीन् शब्दांस्तैत्तिरीयादिप्रसिद्धान् सूत्रेषु निपातनं प्रायुङ्क्त। तथैव श्रुतिः, 'निष्ट॒र्क्यं चिन्वी॑त प॒शुका॑मः' तैत्ति. सं. ५.४.११। तैत्तिरीयसंहितायां काम्यचितीनामभिधानमत्र निर्दिष्टम्। दर्शपूर्णमासे शिशूनां जातकर्मणि च 'निष्ट॒र्क्यं'प्रयोगः। तच्छब्दनिपातनादिकं तावन्निरूपयामः॥

## ॥ सूत्रस्वरूपम् ॥

**॥ 'छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेव-**
**यज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि' ३.१.१२३ ॥**

---

*सम्पर्कसूत्रम् - 9167081556, Email - dr.er.narayanan@csu.co.in

## ॥ काशिकावृत्तिः ॥

'निष्टर्क्य'शब्दप्रयोगविषये काशिकाकारस्त्वाह, 'निष्टर्क्यादयः शब्दाः छन्दसि विषये निपात्यन्ते । यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धम् । 'निष्टर्क्य' इति 'कृतीँ छेदने' इत्यस्मान्निस्पूर्वात् क्यपि प्राप्ते ण्यत् । आद्यन्तविपर्ययश्च । निसश्च षत्वं निपात्यते । 'निष्टर्क्यं चिन्वीत पशुकामः' तैत्ति. सं. ५.४.११ ॥ इति । अपि च तत्रैव द्वे कारिके यथा,

**'निष्टर्क्ये व्यत्ययं विद्यान्निसः षत्वं निपातनात् । ण्यदायादेश इत्येतौ उपचाय्ये निपातितौ ॥'**

**'ण्यदेकस्माच्चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः । ण्यदेकस्माद् यशब्दश्च द्वौ क्यपौ ण्यद्विधिश्चतुः ॥'**

इति काशिकावृत्तिः ॥

## ॥ न्यासकारवृत्तिः ॥

'निष्टर्क्य'शब्दप्रयोगविषये न्यासकारस्त्वाह, 'क्यपि प्राप्ते इति । ऋदुपधत्वात् । आद्यन्तविपर्यय इति ककारस्यादेरेदन्तत्वं निपात्यते ॥ ण्यदेकस्मादिति ॥ कर्मणि ल्यब्लोप एषा पञ्चमी । एकं निष्टर्क्यशब्दमुद्दिश्य ण्यद्भवति । एकं शब्दं साधयितुं ण्यद्भवतीति यावत् ॥ इति न्यासः ॥

## ॥ आपस्तम्बश्रौतसूत्रे 'निष्टर्क्ये'शब्दप्रयोगाः ॥

अपि च 'निष्टर्क्य'शब्दप्रयोगविषय आपस्तम्बश्रौतसूत्रे, प्रश्नः१०., कण्डिका ५., सू. ६. यथा, 'उत्तरेण नाभिं निष्टर्क्यं ग्रन्थिं कृत्वा प्रदक्षिणं पर्यूह्य दक्षिणेन नाभिमवस्थाप्योपोत्थाय 'अग्ने गृहपत उप मा ह्वयस्व' इति गार्हपत्यमुपतिष्ठते ।' इति ॥

अपि च तत्रैव, प्रश्नः१०., क. ९., सू. १५. 'उत्तरेण नाभिं निष्टर्क्यं ग्रन्थिं कृत्वा प्रदक्षिणं पर्यूह्य दक्षिणेन नाभिमवस्थापयति ।' इति ॥

अपि च तत्रैव, प्रश्नः१०., कण्डिका २२., सू. १. 'प्रायणीयाया ध्रौवादष्टौ जुह्वां चतुरो वा गृहीत्वा तस्मिन्दर्भेण हिरण्यं निष्टर्क्यं बद्धावदधातीयं ते शुक्र तनूरिति ।' इति च ॥

'निष्टर्क्य'शब्दप्रयोगविषये प्रक्रियासर्वस्वकारस्त्वाह, एषु सप्तदशसु दृष्टं सर्वं निपात्यते । 'कृती छेदने' । ण्यत् । हलोर्व्यत्ययः ष्टुत्वं च । 'निष्टर्क्यं चिन्वीत पशुकामः' तैत्ति. सं. ५.४.११ । इति ॥

## ॥ 'छन्दसि निष्टर्क्ये'त्यादिसूत्रनिरूपणम् ॥

'निष्टर्क्य'शब्दप्रयोगस्य छन्दोविषयत्वान्न केषामप्यत्र काचन विमतिः । एवं सिद्धान्तकौमुद्याम्, तत्त्वबोधिन्याम्, प्रौढमनोरमायाम्, शब्दरत्ने, शब्दकौस्तुभे, लघुशब्देन्दुशेखरे च काशिकाग्रन्थगतिरेव । तत्र तावद्वयमित्थमस्माकं प्रक्रियासर्वस्वव्याख्यायां छान्दसतत्त्वप्रबोधिन्यां व्याचक्ष्महे, 'छन्दसि निष्टर्क्य-' इत्यादि ॥ सप्तदशरूपाणि येषु तत्तल्लिङ्गानि निपातनसिद्धानि, छान्दसत्वाद् यथाश्रुतानि ध्येयानि । एतच्च काशिकादिभ्यः स्पष्टम् ॥ १. निष्टर्क्यः, २. देवहूयः, ३. प्रणीयः ४. उन्नीयः, ५. उच्छिष्यः, ६. मर्यः, ७. स्तर्या इति स्त्रियां निपातनात् सिद्धं श्रुतेः, ८. ध्वर्यः, ९. खन्यः, १०. खान्यः, ११. देवयज्या इति स्त्री, १२. आपृच्छ्यः, १३. प्रतिषीव्यः, १४. ब्रह्मवाद्यम् इति नपुंसकम्, १५. भाव्यम् इति नपुंसकम्, १६. स्ताव्यः पुमान्, १७. उपचाय्यपृडं नपुंसकलिङ्गे प्रयुक्तम् ॥ काम्यचितीनामभिधानम् उदाहरणम् ॥ 'निष्टर्क्यं चिन्वीत पशुकामः' तैत्ति. सं. ५.४.११ ॥ 'गर्भाणां धृत्यै निष्टर्क्यम्बध्नाति' तैत्ति. सं. ५.७.२ ॥ 'दर्भेण हिरण्यं निष्टर्क्यं बध्वा' ॥आप. गृ. सू. १५.४ ॥ 'मधुघृतमित्येतद्वयं विषमपरिमाणं कास्यपात्रे संसृज्य तस्मिन् हिरण्यं दर्भेण, निष्टर्क्यं बध्वाऽदधाति । निष्टर्क्यमिति बन्धनविशेषो लोकप्रसिद्धः । तथा बद्धेन हिरण्येन तद्रसद्वयमादाय तेनैव कुमारं प्राशयेत् ।' ॥आप. गृ. सू. अनुकूलावृत्तिः १५.४ ॥ इत्यादीन्युदाहरणानि श्रोतव्यानि ॥ तत्र

'निष्टर्क्यं बध्वे'ति निष्टर्क्यरूपो बन्धो यस्मिन् कर्मणि तत्तथेति बन्धक्रियाविशेषणम् । 'निष्टर्क्यो' बन्धविशेषः, 'निष्टर्क्यो' बन्धः शिखाबन्धनवत् सरन्ध्रेण ग्रन्थिना दर्भेण हिरण्यं सुवर्णं बध्नाति' इत्यनुकूलावृत्तितात्पर्यदर्शनवृत्तिभ्यामापस्तम्भसूत्रे स्पष्टम् ॥ 'कृतीँ छेदने' ॥ तुदादिः । सेट् । परस्मैपदी । उदात्तः उदात्तेत् । ईकार इदनुसानिकः । इदित्त्वात् 'इदितो नुम् धातोः' ७.१.५८ इति नुम् । 'मिदचोऽन्त्यात्परः' १.१.४७ इति ऋकारात् परो नकारः । कृ न् त् ॥ 'तुदादिभ्यः शः' ३.१.७७ । कृन्तति छिनत्ति । 'एतिस्तुशास्वृदृजुषः क्यप्' ३.१.१०९ इति क्यपि प्राप्ते गुणसिद्ध्यर्थं 'ऋहलोर्ण्यत्' ३.१.१२४ इति क्यपो ण्यत् भवति । णित्त्वादत्र ककारघटितस्य ऋकारस्य गुणः । 'व्यत्ययो बहुलम्' ३.१.८५ इति वर्णव्यत्ययेन क् अर् त् इति स्थिते ककारतकारयोः क्रमव्यत्ययेन त् अर् क् इति जाते निस् तर्क् इति स्थिते 'स्तोः श्चुना श्चुः' ८.४.४० इत्यतः सकारस्य स्थाने 'ष्टुना ष्टुः' ८.४.४१ इति ष्टुः । निष् टर्क् ण्यत् इति जाते, णकारतकारयोर्लोपे 'निष्टर्क्यः' इति रूपं भवति । पुंस्त्वं निपातनात् । शिखाबन्धनवदिति हिरण्यकवचस्य मङ्गलयन्त्रस्वरूपं ज्ञेयमिति सारः । यन्त्रेऽपि सूत्रप्रवेशमोक्षौ शिखाबन्धनवत् सुकराविति तद्विधानरूपा काचिच्चितिरपि मनसि कल्पनीया । तच्चेत्थं पद्याभ्यां संक्षिपामहे ॥

**नित्यं गृहे ह्यभिलषन् पशुसञ्चयं यो निष्टर्क्यरूपचितिमेव चिनोति विप्रः ।**
**चिन्वीत सैव पशुकाम इति प्रकामं निष्टर्क्यमेव विधिवद् विदितः प्रयुङ्क्ते ॥ १ ॥**
**देहे शिशोर्ग्रथित एव नु जातकर्म- संस्कारमङ्गलविधौ विहितश्च सूत्रैः ।**
**निष्टर्क्य इत्ययमिह प्रथित स बन्धो ज्ञेयो हिरण्यकवचस्तु शिखावदेषः ॥ २ ॥ इति ॥**

एवमेव निष्टर्क्यशब्दार्थः सङ्गृहीतः । यद्यप्ययं शब्दः क्वचित् कोशादिष्वश्रुतः सोऽपि विशिष्य तैत्तिरीयसंहितायामपि चापस्तम्भे प्रयोगपुरस्सरं निर्दिष्टश्च ॥

'निष्टर्क्यः'शब्दस्य छन्दसि विषयत्वादेव ककारतकारयोः क्रमव्यत्ययो बहुलं सिद्धः । निसः षत्वं निपातनादिति श्लोकवार्त्तिकप्रामाण्यात् । तत्रापि निपातनं ष्टुत्वशास्त्रपरिगणनादेवेति छन्दसि दृष्टानुविधिं ज्ञापकं भावयामहे । सुवर्णाङ्गुलीयकस्य 'निष्टर्क्यः'सूत्रबन्धनात् कांस्यपात्रस्थजले संप्लाव्य समन्त्रक्रियापुरस्सरं जातशिशूनां जातकर्मणि प्रयोगः प्रसिद्धः, अपि च कुमाराणामन्नप्राशनेऽपि 'निष्टर्क्यः'प्रयोगः पूर्वोक्तः, यथाऽऽचारं च दर्शपूर्णमासयोरिति कर्मकाण्डिनः श्रोत्रियास्तत्र प्रमाणमित्योम् ॥

## ॥ ग्रन्थसमीक्षणम् ॥

॥ १ ॥ काशिकावृत्तिः ॥ निष्टर्क्यादयः शब्दाः छन्दसि विषये निपात्यन्ते । यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धम् । 'निष्टर्क्यं' इति 'कृतीँ छेदने' इत्यस्मान्निस्पूर्वात् क्यपि प्राप्ते ण्यत् । आद्यन्तविपर्ययश्च । निसश्च षत्वं निपात्यते । 'निष्टर्क्यं चिन्वीत पशुकामः' तैत्ति. सं. ५.४.११ ॥

**'निष्टर्क्ये व्यत्ययं विद्यान्निसः षत्वं निपातनात् । ण्यदायादेश इत्येतौ उपचाय्ये निपातितौ ॥'**
**'ण्यदेकस्माच्चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः । ण्यदेकस्माद् यशब्दश्च द्वौ क्यपौ ण्यद्विधिश्चतुः ॥'**

॥ २ ॥ न्यासः ॥ क्यपि प्राप्ते इति । ऋदुपधत्वात् । आद्यन्तविपर्यय इति ककारस्यादेरेदन्तत्वं निपात्यते ॥ ण्यदेकस्मादिति ॥ कर्मणि ल्यब्लोप एषा पञ्चमी । एकं निष्टर्क्यशब्दमुद्दिश्य ण्यद्भवति । एकं शब्दं साधयितुं ण्यद्भवतीति यावत् ॥

॥ ३ ॥ सिद्धान्तकौमुदी ॥ ३४०७ ॥ पृ.५८९ ॥ कृन्ततेर्निस्पूर्वात् क्यपि प्राप्ते ण्यत् । आद्यन्तयोर्विपर्यासो निसः षत्वं च । 'निष्टर्क्यं चिन्वीत पशुकामः' तैत्ति. सं. ५.४.११ ॥

॥ ४ ॥ तत्त्वबोधिनी ॥ सि.कौ.पृ. ५८९ ॥ 'छन्दसि-' ३.१.१२३ ॥ निष्टर्क्यादयः शब्दाः छन्दसि निपात्यन्त इति सूत्रार्थः ॥ 'क्यपि प्राप्ते' इति ॥ 'ऋदुपधाच्च-' ३.१.११० इति सूत्रेण ॥ ('ऋदुपधाच्चाक्लृपिचृतेः' ३.१.११० इति पूर्णं सूत्रम् ॥ सिद्धान्तकौमुदी ॥ २८५९) ॥


ISSN : 2249-538X

॥५॥प्रौढमनोरमा॥ 'छन्दसि निष्ट-' ३.१.१२३॥ क्यपि प्राप्त इति। 'ऋदुपधाच्च-' ३.१.११० इति सूत्रेणेति भावः॥ ब्रह्मणि वदेरिति॥ न च यत्येव दीर्घो निपात्यतामिति वाच्यम्॥ 'यतोऽनावः' ६.१.२१३ इत्याद्युदात्तत्वापत्तेरिति भावः। अत्र श्लोकवार्त्तिकम्॥

**'निष्टर्क्ये व्यत्ययं विद्यान्निसः षत्वं निपातनात्। ण्यदायादेश इत्येतौ उपचाय्ये निपातितौ॥'**

**'ण्यदेकस्माच्चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः। ण्यदेकस्माद् यशब्दश्च द्वौ क्यपौ ण्यद्विधिश्चतुः॥'**

व्यत्ययमिति॥ आद्यन्तविपर्यासमित्यर्थः॥प्रौढमनोरमा॥ पृ. ८४३-८४४॥

॥६॥प्रौढमनोरमाशब्दरत्नम्॥ आद्यन्तविपर्यासमिति। प्रत्ययव्यत्ययमित्यपि बोध्यम्। तदुक्तम्, षत्वं निपातनादिति॥ प्रौढमनोरमा पृ. ८४४॥

॥७॥शब्दकौस्तुभः॥ 'छन्दसि निष्टर्क्य-' ३.१.१२३॥ एतानि सप्तदश छन्दसि निपात्यन्ते। 'कृतीँ छेदने' तु०प०१५५। अस्मात् निस्पूर्वात्क्यपि प्राप्ते ण्यत्, आद्यन्तयोर्विपर्यासः, निसः षत्वं च निपात्यते। 'निष्टर्क्यं चिन्वीत पशुकामः' तैत्ति. सं. ५.४.११॥ शब्दकौस्तुभतृतीयाध्यायप्रथमपादे षष्ठाह्निके धात्वधिकारे कृत्प्रकरणम्॥पृ. ४१४॥

॥८॥लघुशब्देन्दुशेखरः॥पृ.४८७॥ 'छन्दसि निष्ट-' ३.१.१२३॥ 'निष्टर्क्ये व्यत्ययं विद्यान्निसः षत्वं निपातनात्'। इति व्यत्ययोऽत्र प्रत्ययवर्णयोर्दीर्घश्चेति। अत एव तुगभावः शिषेरिति। शासेरित्यन्ये॥

॥९॥प्रक्रियासर्वस्वम्॥एषु सप्तदशसु दृष्टं सर्वं निपात्यते। 'कृती छेदने'। ण्यत्। हलोर्व्यत्ययः ष्टुत्वं च। 'निष्टर्क्यं चिन्वीत पशुकामः' तैत्ति. सं. ५.४.११॥ काम्यचितीनामभिधानम्॥

## ॥छान्दसतत्त्वप्रबोधिनी॥

छन्दसि निष्टर्क्येत्यादि॥ सप्तदशरूपाणि येषु तत्तल्लिङ्गानि निपातनसिद्धानि, छान्दसत्वाद् यथाश्रुतानि ध्येयानि। एतच्च काशिकादिभ्यः स्पष्टम्॥ १. निष्टर्क्यः, २. देवहूयः, ३. प्रणीयः ४. उन्नीयः, ५. उच्छिष्यः, ६. मर्यः, ७. स्तर्या इति स्त्रियां निपातनात् सिद्धं श्रुतेः, ८. ध्वर्यः, ९. खन्यः, १०. खान्यः, ११. देवयज्या इति स्त्री, १२. आपृच्छ्यः, १३. प्रतिषीव्यः, १४. ब्रह्मवाद्यम् इति नपुंसकम्, १५. भाव्यम् इति नपुंसकम्, १६. स्ताव्यः पुमान्, १७. उपचाय्यपृडं नपुंसकलिङ्गे प्रयुक्तम्॥ काम्यचितीनामभिधानम् उदाहरणम्॥ 'निष्टर्क्यं चिन्वीत पशुकामः' तैत्ति. सं. ५.४.११॥ 'गर्भाणां धृत्यै निष्टर्क्यम्बध्नाति' तैत्ति. सं. ५.७.२॥ 'दर्भेण हिरण्यं निष्टर्क्यं बध्वा' ॥आप. गृ. सू. १५.४॥ 'मधुघृतमित्येतद्द्वयं विषमपरिमाणं कास्यपात्रे संसृज्य तस्मिन् हिरण्यं दर्भेण, निष्टर्क्यं बध्वाऽदधाति। निष्टर्क्यमिति बन्धनविशेषो लोकप्रसिद्धः। तथा बद्धेन हिरण्येन तद्रसद्वयमादाय तेनैव कुमारं प्राशयेत्।' ॥आप. गृ. सू. अनुकूलावृत्तिः १५.४॥ इत्यादीन्युदाहरणानि श्रोतव्यानि॥ तत्र 'निष्टर्क्यं बध्वे'ति निष्टर्क्यरूपो बन्धो यस्मिन् कर्मणि तत्तथेति बन्धक्रियाविशेषणम्। 'निष्टर्क्यो' बन्धविशेषः, 'निष्टर्क्यो' बन्धः शिखाबन्धनवत् सरन्ध्रेण ग्रन्थिना दर्भेण हिरण्यं सुवर्णं बध्नाति' इत्यनुकूलावृत्तितात्पर्यदर्शनवृत्तिभ्यामापस्तम्भसूत्रे स्पष्टम्॥ 'कृतीँ छेदने'॥ तुदादिः। सेट्। परस्मैपदी। उदात्तः उदात्तेत्। ईकार इदनुसानिकः। इदित्त्वात् 'इदितो नुम् धातोः' ७.१.५८ इति नुम्। 'मिदचोऽन्त्यात्परः' १.१.४७ इति ऋकारात् परो नकारः। कृ न् त्॥ 'तुदादिभ्यः शः' ३.१.७७। कृन्तति छिनत्ति। 'एतिस्तुशास्वृदृजुषः क्यप्' ३.१.१०९ इति क्यपि प्राप्ते गुणसिद्ध्यर्थं 'ऋहलोर्ण्यत्' ३.१.१२४ इति क्यपो ण्यत् भवति। णित्त्वादत्र ककारघटितस्य ऋकारस्य गुणः। 'व्यत्ययो बहुलम्' ३.१.८५ इति वर्णव्यत्ययेन क् अर् त् इति स्थिते ककारतकारयोः क्रमव्यत्ययः। एवं त् अर् क्। निस् तर्क्। 'स्तोः श्चुना श्चुः' ८.४.४०। 'ष्टुना ष्टुः' ८.४.४१ इति ष्टुः। निस् टर्क् ण्यत्। 'निष्टर्क्यः'। पुंस्त्वं निपातनात्। शिखाबन्धनवदिति हिरण्यकवचस्य मङ्गलयन्त्रस्वरूपं ज्ञेयमिति सारः। यन्त्रेऽपि सूत्रप्रवेशमोक्षौ शिखाबन्धनवत् सुकराविति तद्विधानरूपा काचिच्चितिरपि मनसि कल्पनीया। तच्चेत्थं पद्याभ्यां संक्षिपामहे॥

**नित्यं गृहे ह्यभिलषन् पशुसञ्चयं यो निष्टर्क्यरूपचितिमेव चिनोति विप्रः।**

चिन्वीत सैव पशुकाम इति प्रकामं निष्टर्क्यमेव विधिवद् विदितः प्रयुङ्क्ते ॥ १ ॥

देहे शिशोर्ग्रथित एव नु जातकर्म- संस्कारमङ्गलविधौ विहितश्च सूत्रैः ।

निष्टर्क्यं इत्ययमिह प्रथित स बन्धो ज्ञेयो हिरण्यकवचस्तु शिखावदेषः ॥२ ॥ इति ॥

एवमेव निष्टर्क्यशब्दार्थः सङ्गृहीतः । यद्यप्ययं शब्दः क्वचित् कोशादिष्वश्रुतः सोऽपि विशिष्य तैत्तिरीयसंहितायामपि चापस्तम्भे प्रयोगपुरस्सरं निर्दिष्टश्च ॥

॥ ११ ॥आपस्तम्बश्रौतसूत्रम् ॥ प्रश्नः१० ॥कण्डिका ५ ॥ ॥सू. ६ ॥ उत्तरेण नाभिं निष्टर्क्यं ग्रन्थिं कृत्वा प्रदक्षिणं पर्यूह्य दक्षिणेन नाभिमवस्थाप्योपोत्थायाग्ने गृहपत उप मा ह्वयस्वेति गार्हपत्यम् उपतिष्ठते ॥

॥ १२ ॥आपस्तम्बश्रौतसूत्रम् ॥ ।प्रश्नः१०. क. ९ ॥ ॥सू. १५ ॥ उत्तरेण नाभिं निष्टर्क्यं ग्रन्थिं कृत्वा प्रदक्षिणं पर्यूह्य दक्षिणेन नाभिमवस्थापयति ॥

॥ १३ ॥आपस्तम्बश्रौतसूत्रम् ॥प्रश्नः१० ॥ कण्डिका २२ ॥ ॥सू. १ ॥ प्रायणीयाया ध्रौवादष्टौ जुह्वां चतुरो वा गृहीत्वा तस्मिन्दर्भेण हिरण्यं निष्टर्क्यं बद्ध्वावदधातीयं ते शुक्र तनूरिति ॥

॥ १४ ॥ वदः सुपि क्यप् च ॥ ३.१.१०६ ॥ [क्यप्] ॥ १५ ॥ एतिस्तुशास्वृदृजुषः क्यप् ॥ ३.१.१०९ ॥ [क्यप्]

॥ १६ ॥ ऋदुपधाच्चाक्लृपिचृतेः ॥ ३.१.११० ॥ [क्यप्] ॥ १७ ॥ ऋहलोर्ण्यत् ३.१.१२४ ॥ [ण्यत्]

॥ १८ ॥व्यत्ययो बहुलम् ३.१.८५ ॥ काशिकावृत्तिः ॥ यथायथं विकरणाः शबादयो विहिताः, तेषां छन्दसि विषये बहुलं व्यत्ययो भवति । व्यतिगमनं व्यत्ययः, व्यतिहारः । विषयान्तरे विधानम्, क्वचिद् द्विविकरणता, क्वचित् त्रिविकरणता च । आण्डा शुष्णस्य भेदति । भिनत्ति इति प्राप्ते । ताश्चिन्नौ न मरन्ति । न म्रियन्ते इति प्राप्ते । द्विविकरणता इन्द्रो वस्तेन नेषतु । नयतु इति प्राप्ते । त्रिविकरणता इन्द्रेण युजा तरुषेम वृत्रम् । तीर्यस्म इति प्राप्ते । बहुलग्रहणं सर्वविधिव्यभिचारार्थम् । सुप्तिङुपग्रलिङ्गनराणां कालहलच्स्वरकर्तृयङां च । व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बहुलकेन ॥

## ॥ अवलम्बग्रन्थसूचिका ॥


१. अष्टाध्यायीसूत्रपाठः, सी. शंकररामशास्त्री, रत्ना बसु, शारदा पब्लिशिंग हाउस, दिल्ली, १९९४ ॥

२. आपस्तम्बश्रौतसूत्रम्, चिन्नस्वामी शास्त्री, ओरियणटल् इन्स्टिट्यूट्, बडौदा, १९५५ ॥

३. कृष्णयजुर्वेदीयतैत्तिरीयसंहिता, आर्. एल्. काश्यप, साक्षी, दिल्ली, २००४ ॥ ISBN 978-8179941119

४. प्रक्रियासर्वस्वम्, नारायणभट्टपादप्रणीतम्, के. पी. नारायणपिषारोटी, गुरुवायूर्-देवस्वम्, केरळाः, १९९८ ॥

५. प्रौढमनोरमा, भट्टोजिदीक्षितः, चौ.सं.सी.-२३,चौखम्बा, वाराणसी, १९८३ ॥

६. लघुशब्देन्दुशेखरः, नानाविधग्रन्थनिर्माणधुरीणमहामहोपाध्यायश्रीमन्नागेशभट्टविरचितः, धर्माधिकार्युपाख्यपण्डितश्रीढुण्ढिराजपन्तमहाशयप्रोत्साहितेन काशिकराजकीयप्रदानपाठालये साहित्योपाध्यायपदवीं लब्धवता मानवल्ल्युपाख्यरामशास्त्रिणा लब्धसाहित्योपाध्यायपदवीकेन भारद्वाजनारायणशास्त्रिणा च संशोधितः ॥ श्रीकाश्यां सं० १९४४ कार्त्तिकादि २ भौमे ॥ ख्रीष्टाब्दे १८८७ ॥ मेडिकल्-हाल्-नाम्नि यन्त्रालये धर्माधिकारिवीरेश्वरपन्तार्थं मुद्रितः ॥ Printed by E. J. Lazarus & co., at the Medical Hall Press, Benares, 1887, Page Portion no. 487.

७. वैयाकरणसिद्धान्तकौमुदी, भट्टोजिदीक्षितः, तत्त्वबोधिनी, सुबोधिनी, वी. एल्. एस्, पणशीकर, व्र. प्रा. ग्र.-५, चौ. सं. प्र., दिल्ली, १९९४ ॥

८. शब्दकौस्तुभः, भट्टोजिदीक्षितः, वि. पी. द्विवेदी, जि. एस्. मोकाटे, चौ.सं.सी.-२, चौखम्बा, वाराणसी, १९९१ ॥

९. स्वरमञ्जरी, श्रीनरसिंहसूरी, जी. वि. देवस्थली, भण्डारकर ओरियणटल् रिसर्च इन्स्टिट्यूट्-६, पुणे, १९८५ ॥

१०. स्वरयुक्ता अष्टाध्यायी, पं० माधव गणेश जोशी निपाणीकर, लोकमान्यनगर, पुणे-४११०३०, १९९२ ॥

# ‘पुष्पं जिघ्रति’ इति वाक्यार्थविचारः

आचार्यः नावल्पाक्कम् रामानुज(एन् आर्) श्रीधरन्*
के.सं.वि., गुरुवायूर् परिसरः
केरलम्

***लेखसारः*** *-चाक्षुषप्रत्यक्षत्वावच्छिन्नवाचकदृश्यादिधातुसमभिव्याहृतद्वितीयायाः ‘घटं पश्यति चैत्रः’ इत्यादौ लौकिकविषयित्वमर्थः । घटनिरूपितलौकिकविषयित्वाश्रयचाक्षुषप्रत्यक्षनिरूपिताश्रयतावान् चैत्रः इति बोधः । ‘चैत्रेण दृश्यते घटः’ इत्यत्र आख्यातस्य लौकिकविषयत्वमर्थः । ‘चैत्रवृत्तिचाक्षुषप्रत्यक्षनिरूपितलौकिकविषयताश्रयः घटः’ इति बोधः । लौकिकविषयत्वं नाम संयोगादिरूपलौकिकसन्निकर्षप्रयोज्यं विषयत्वम् इति ज्ञेयम् ।*

अथ चाक्षुषादिवाचकदृश्यादिधातुसमभिव्याहृतद्वितीयादेः लौकिकविषयत्वार्थकत्वे अनुपपत्तिः सम्भवति । तथाहि ‘चैत्रः पुष्पं जिघ्रति’ इति प्रामाणिकः प्रयोगः । अत्र घ्रा धातोः गन्धसाक्षात्कारोऽर्थः । अत्र पूर्वोक्तरीत्या पुष्पपदोत्तरद्वितीयायाः लौकिकविषयत्वार्थकत्वे पुष्पनिष्ठलौकिकविषयतानिरूपितगन्धसाक्षात्काराश्रयः चैत्रः इति बोधः अङ्गीकर्तव्यः । स च बाधितार्थकः । गन्धसाक्षात्कारे गन्धस्य लौकिकविषयता वर्तते । पुष्पस्य अलौकिकविषयता च अस्ति । ज्ञानलक्षणाप्रत्यासत्त्या भानात् । गन्धप्रत्यक्षरूपघ्राणजसाक्षात्कारे पुष्पनिष्ठलौकिकविषयतानिरूपकत्वविरहात् । किञ्च पुष्पस्य चाक्षुषं गन्धस्य घ्राणजं च इत्येकं प्रत्यक्षं न सम्भवति । चाक्षुषत्वघ्राणजत्वयोः साङ्कर्यप्रसङ्गात् । किन्तु पुष्पस्य चाक्षुषप्रत्यक्षात्मकज्ञानलक्षणाप्रत्यासत्तिकाले गन्धस्य घ्राणेन्द्रियसन्निकर्षे सति पुष्पांशे अलौकिकं गन्धांशे लौकिकं च प्रत्यक्षं जायते । अर्थात् त्वक्चक्षुर्मनसामेव द्रव्यग्राहकतया पुष्पस्य घ्राणेन्द्रियागोचरत्वात् इति ।

न च ‘पुष्पं जिघ्रति’ इत्यत्र द्वितीयायाः सामान्यतो विषयित्वमर्थः, न तु लौकिकविषयित्वम् । अतो नानुपपत्तिः । घ्राणजप्रत्यक्षस्यापि पुष्पविषयकत्वात् इति वाच्यम् ।

तथा सति यत्र घ्राणेन्द्रियसन्निकर्षात् गन्धसाक्षात्कारो जायते, तत्र तत्पूर्वं स्मृतस्य आकाशस्य स्मरणात्मकज्ञानलक्षणाप्रत्यासत्त्या भाने सति ‘चैत्रः आकाशं जिघ्रति’ इति प्रयोगापत्तिः । आकाशविषयकघ्राणजप्रत्यक्षाश्रयत्वसत्त्वात् इति चेत् -

न- ‘घ्रा-गन्धोपादाने’ इति धातुपाठः । गन्धोपादानं नाम गन्धविषयकं प्रत्यक्षम् । तच्च घ्राणेन्द्रियजन्यत्वात् लौकिकम् । तथा च घ्राधातोः गन्धविषयकलौकिकप्रत्यक्षमर्थः । घ्राधातु-समभिव्याहृतद्वितीयायाः आधेयत्वमर्थः । तत्र प्रकृत्यर्थस्य अन्वयः । द्वितीयार्थस्य धात्वर्थैकदेशे गन्धेऽन्वयः । तथा च ‘पुष्पं जिघ्रति चैत्रः’ इति वाक्यात् पुष्पनिष्ठो यो गन्धः तद्विषयकलौकिकप्रत्यक्षाश्रयः चैत्रः इति बोधः । न तु पुष्पनिरूपितलौकिकविषयताश्रयप्रत्यक्षाश्रयः चैत्रः इति बोधः । अतो नानुपपत्तिः ।

न च सविषयकार्थकधातुसमभिव्याहृतद्वितीयायाः विषयित्वमर्थः इति पूर्वोक्तनियमभङ्गः इति वाच्यम् । विषयानवच्छिन्नसविषयकार्थबोधकधातुसमभिव्याहृतद्वितीयायाः विषयित्वार्थकत्वमिति नियमः । घ्रा धातोस्तु गन्धरूपविषयावच्छिन्नसविषयकार्थबोधकत्वात् न पूर्वोक्ततादृशनियमभङ्गः । न च घ्राधातुसमभिव्याहृतद्वितीयायाः गन्धान्वय्याधेयत्वार्थकत्वे ‘आमोदमुपजिघ्रति चैत्रः’ इत्यत्र ‘आमोदनिष्ठगन्धविषयकलौकिकप्रत्यक्षाश्रयः चैत्रः’ इति बोधः अङ्गीकर्तव्यः, स च बाधितार्थकः । यतो हि आमोदस्य गन्धरूपतया आमोदवृत्तिगन्धोऽप्रसिद्धः । अर्थात् गुणे गुणानङ्गीकारात् गन्धवृत्तिगन्धोऽप्रसिद्धः इति वाच्यम् । ‘आमोदमुपजिघ्रति चैत्रः’ इत्यत्र घ्राधातोः गन्धरूपविषयानवच्छिन्नं घ्राणजप्रत्यक्षमे-

***सम्पर्कसूत्रम्** – 9495331830, Email – dr.sridharan@csu.co.in

वार्थः । द्वितीयायास्तु लौकिकविषयित्वमर्थः । तथा च 'आमोदनिरूपितलौकिकविषयित्वाश्रयघ्राणजप्रत्यक्षाश्रयः चैत्रः' इति बोधः । अतो नानुपपत्तिरिति भावः ।

अत्रायं सिद्धान्तः - घ्रा धातोः क्वचित् विषयानवच्छिन्नप्रत्यक्षविशेषवाचकत्वे 'घ्रा-गन्धोपादाने' इत्यनुशासनविरोधः स्यात्; अतः घ्रा धातोः विषयावच्छिन्नप्रत्यक्षार्थकत्वं स्वीकार्यम् । तथा च 'पुष्पं जिघ्रति चैत्रः' इत्यादौ घ्रा धातोः गन्धनिरूपितलौकिकविषयिताशालिप्रत्यक्षमर्थः । पुष्पपदोत्तरद्वितीयायाः समवायसं बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्नप्रकारता अर्थः । तादृशप्रकारतायाः धात्वर्थैकदेशलौकिकविषयितायां निरूपितत्वसम्बन्धेनान्वयः । तादृशप्रकारतायां प्रकृत्यर्थस्य पुष्पस्य आधेयत्वसम्बन्धेनान्वयः । तथा च 'पुष्पनिष्ठा या समवायसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्ना प्रकारता तन्निरूपिता या गन्धनिरूपिता लौकिकविषयिता तदाश्रयप्रत्यक्षाश्रयः चैत्रः' इति बोधः । अत्र प्रत्यक्षस्य आकारः – 'समवायेन पुष्पे गन्धः' इति । अत्र पुष्पं प्रकारः गन्धः विशेष्यः । पुष्पनिष्ठा प्रकारता समवायसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्ना । गन्धे पुष्पस्य स्वनिरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वसम्बन्धेन सत्त्वात् । गन्धनिरूपिता या लौकिकविशेष्यितारूपविषयिता सा विशेष्यताद्वारा तादृशप्रकारता निरूपिता भवति । तादृशप्रत्यक्षाश्रयत्वं चैत्रस्य इति भावः ।

यदि अत्र पुष्पपदोत्तरद्वितीयायाः केवलाधेयत्वम् अर्थः स्यात्, घ्राधातोश्च गन्धलौकिकप्रत्यक्षमर्थः स्यात्; तदा 'कालवृत्तिगन्धलौकिकप्रत्यक्षवान् चैत्रः' इति प्रतीतिः स्यात्, तस्याः प्रतीतेः अबाधितविषयकत्वात् तत्प्रतीतिजनकस्य 'कालं जिघ्रति चैत्रः' इति वाक्यस्य प्रामाण्यापत्तिः । कालनिरूपितकालिकसम्बन्धावच्छिन्नाधेयत्वस्य गन्धे सत्त्वात् तद्विषयकप्रत्यक्षाश्रयत्वस्य चैत्रे सत्वात् । प्रत्यक्षस्य आकारस्तु – 'इदानीं पुष्पे गन्धः' इति । आधेयत्वे समवायसम्बन्धावच्छिन्नत्वस्य निवेशे तु कालनिरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वस्य गन्धेऽभावात् 'कालं जिघ्रति चैत्रः' इति प्रयोगस्य न प्रामाण्यापत्तिरिति ज्ञेयम् ।

अपि च द्वितीयायाः केवलाधेयत्वार्थकत्वे घ्राधातोः गन्धविषयकलौकिकप्रत्यक्षार्थकत्वे च 'तदाननं मृत्सुरभिक्षितीश्वरो रहः समाघ्राय न तृप्तिमाययौ' इति प्रयोगस्य 'आघ्रातवान् गन्धवहं सुगन्धम्' इति प्रयोगस्य च अप्रामाण्यापत्तिः । तथाहि - भक्षितमृत्समवेतगन्धस्य आनने, गन्धमात्रस्य च वायौ समवायेन वृत्तित्वविरहात् आननवृत्तिमृत्समवेतगन्धविषयकलौकिकप्रत्यक्षबोधने, तदाननमित्यादिवाक्यस्य वायुवृत्तिगन्धविषयकलौकिकप्रत्यक्षबोधने 'आघ्रातवान् गन्धवहम्' इत्यादिवाक्यस्य च अप्रामाण्यापत्तिः । अतः अत्रापि द्वितीयायाः समवायसम्बन्धावच्छिन्नाधेयत्वसंबन्धावच्छिन्नप्रकारता अर्थः इति स्वीकार्यम् । तथा च 'आननेऽयं गन्धः', 'वायौ गन्धः' इत्यौपाधिकगन्धविषयकभ्रमात्मकप्रत्यक्षस्य जायमानत्वेन आननवाय्वादिनिष्ठा या समवायसंबन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्ना प्रकारता तन्निरूपितत्वं गन्धनिष्ठलौकिकविषयितायामस्त्येवेति तन्निरूपकपूर्वोक्तप्रत्यक्षाश्रयत्वस्य अबाधात् न तादृशप्रयोगयोः अप्रामाण्यापत्तिरिति ।

यद्यपि वाय्वानीतचम्पकावयवसमवेतगन्धस्थले 'वायौ गन्धः' इति प्रत्यक्षं यत्र जायते, तत्र पूर्वोक्तरीत्या 'चम्पकं जिघ्रति' इति प्रयोगस्य 'चम्पकसमवेतगन्धविषयकप्रत्यक्षवान्' इति प्रमात्मकशाब्दबोधोत्पादकत्वेन प्रामाण्यमुपपद्यते । तथापि समवायसम्बन्धावच्छिन्नेत्याद्यर्थस्वीकारपक्षे तु 'वायौ गन्धः' इति प्रत्यक्षनिरूपितायाः समवायसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्नप्रकारतायाः वायौ सत्त्वेऽपि चम्पके असत्त्वात् 'चम्पकवृत्तितथाविधप्रकारतानिरूपितगन्धविषयताशालिप्रत्यक्षवान्' इत्याकारकबोधजनकस्य 'चम्पकं जिघ्रति' इति वाक्यस्य प्रामाण्यं नैव सम्भवति । अर्थात् तत्र 'वायुं जिघ्रति' इत्येव प्रयोगः इति भावः ।

यत्तु- यदि समवायसम्बन्धावच्छिन्नमाधेयत्वं द्वितीयार्थः, तदैव 'तदाननं मृत्सुरभिक्षितीश्वरो रहः समाघ्राय न तृप्ति-


ISSN : 2249-538X

मायर्यौ' इत्यत्रानुपपत्तिर्भवति । मृदि वर्तमानस्य गन्धस्यानने समवायसम्बन्धेनाभावात् आनननिरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वस्य गन्धेऽभावात् तादृशगन्धविषयकप्रत्यक्षाश्रयः इति बोधस्य बाधितार्थविषय-आधेयत्वमात्रं द्वितीयार्थ इति स्वीकारे तु नेयमनुपपत्तिः – मृत्समवेतगन्धस्य स्वाश्रयसंयुक्तत्वसम्बन्धेन आनने सत्त्वात्, आननवृत्तिगन्धविषयकप्रत्यक्षबोधस्य प्रमात्वात् इति । तन्न समीचीनम् – आधेयत्वमात्रस्य द्वितीयार्थत्वे काले कालिकसंबन्धेन गन्धस्य सत्त्वात् 'इदानीं गन्ध' इत्याकारकं यत् कालिकसम्बन्धावच्छिन्नकालनिरूपिताधेयत्वाश्रयगन्धविषयकं प्रत्यक्षं तदाश्रयत्वमादाय 'अयं कालं जिघ्रति' इति पूर्वापादितस्य प्रयोगस्य प्रामाण्यापत्तेः । अतः घ्राधातुसमभिव्याहृतद्वितीयायाः समवायसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्नप्रकारत्वमर्थः एव स्वीकार्यः ।

अथ 'पुष्पमाघ्रायते' इति कर्माख्यातस्थले समवायसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्नप्रकारत्वम् आख्यातार्थः । गन्धनिष्ठलौकिकविषयताशालिप्रत्यक्षं धात्वर्थः । तस्य धात्वर्थस्य निरूपितत्वसम्बन्धेन आख्यातार्थप्रकारत्वे अन्वयः । एवं धात्वर्थप्रत्यक्षविशेषणतापन्नायाः गन्धनिष्ठविषयताया अपि निरूपितत्वसम्बन्धेन आख्यातार्थप्रकारत्वेऽन्वयः । तथा च 'गन्धनिष्ठलौकिकविषयताशालिप्रत्यक्षनिरूपिता गन्धनिष्ठविषयतानिरूपिता च या समवायसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्ना प्रकारता तदाश्रयः पुष्पम् ' इति बोधः ।'चैत्रेण ' इत्यध्याहारे तु तृतीयान्तार्थचैत्रवृत्तित्वं धात्वर्थप्रत्यक्षेऽन्वेति इति ज्ञेयम् । प्रत्यक्षस्य आकारस्तु 'पुष्पे गन्ध' इति ।

ननु अत्र प्रत्यक्षविशेषणतया उपस्थितायाः गन्धनिष्ठलौकिकविषयतायाः आख्यातार्थे प्रकारत्वे अन्वये कृते – 'एकत्र विशेषणतया उपस्थितस्य अन्यत्र विशेषणतया अन्वयः अव्युत्पन्नः इति' व्युत्पत्तिविरोधः सम्भवति इति चेत् -न- तस्याः व्युत्पत्तेः अयमर्थः – एकत्र विशेषणतया उपस्थितस्य अन्यत्र स्वातन्त्र्येण अन्वय एव अव्युत्पन्नः, धर्मिपारतन्त्र्येण अन्वयस्तु व्युत्पन्नः इति । तथा च प्रकृते प्रत्यक्षधर्मि पारतन्त्र्येणैव गन्धविषयतायाः आख्यातार्थे अन्वयेन व्युत्पत्तिविरोधो न सम्भवतीति ।

अथवा कर्माख्यातस्थले घ्राधातोः गन्धः लौकिकविषयता प्रत्यक्षं च विशकलितम् अर्थः । तत्र लौकिकविषयता विशेषणं तत्र गन्धः विशेषणम् । तथा च 'पुष्पमाघ्रायत' इत्यत्र 'प्रत्यक्षनिरूपिता या गन्धनिष्ठलौकिकविषयता तन्निरूपिता या समवायसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्ना प्रकारता तदाश्रयः पुष्पम्' इति बोधः ।

**इति शम्**

# माध्यन्दिनीयस्वरवर्णोच्चारणविमर्शः

डा. नारायणप्रसाद बरालः*
सहप्राध्यापकः, वाल्मीकि विद्यापीठम्
नेपालसंस्कृतविश्वविद्यालयः, काठमाडौँ

***लेखसारः*** *– समस्तज्ञानमूला वेदाः । वेदयति अर्थात् बोधयति स वेदः । किं बोधयति इति जिज्ञासायाम् इष्टप्राप्तिरनिष्टपरिहारश्च । सर्वेषां मनुष्याणां लक्ष्यं इष्टप्राप्तिरनिष्टपरिहारेव भवति । तदर्थमेव प्रवृत्ता वेदाः । वेदाध्ययनं त्रैवर्णिकानां परमावश्यकम् । अध्ययनं मन्त्रतोऽर्थतश्च भवति । अक्षरग्रहणार्थं तु उदात्तादिस्वरवर्णधर्माणां ज्ञानं परमावश्यकम् । उच्चारणविधिपरिज्ञानं विना वेदमन्त्राणामुच्चारणं कर्तं न सम्भवति । चतुर्णां वेदानामुच्चारणशैली, शिक्षणपद्धतिश्च भिन्नाभिन्ना एव विधीयते । न केवलमुच्चारणशैली अपि तु हस्तादिभिः प्रदर्श्यमाना स्वरप्रक्रिया अपि भिन्ना भिन्ना एव सम्भवन्ति । न केवलं भिन्नभिन्नवेदेषु अपि तु प्रत्येकं शाखासु भिन्ना भिन्ना एव उच्चारणपद्धति, हस्तचालनविधिः, शिक्षाग्रन्थाश्च पृथक् पृथक् विद्यन्ते । अतोऽत्र शुक्लयजुर्वेदस्य माध्यन्दिनीयानां स्वरवर्णोच्चारणधर्माणां विवेचनं सप्रमाणं विहितम् । शिक्षाशास्त्रेणैव अयं वर्णः, अयं स्वरः, इयं मात्रा, एतेन प्रकारेणोच्चारणीयमिति परिज्ञानं क्रियते कार्यते च । तस्मात् शुक्लयजुर्वेदस्य माध्यन्दिनीये संहिताध्ययने यो विधिः शिक्षादिग्रन्थेषु अवलम्बितो वर्तते तस्यैवाधारेणात्र शुक्लयजुर्वेदीयानां मध्यन्दिनीयानामेव स्वरवर्णोच्चारणधर्माणां विवेचनं सप्रमाणं विहितं विद्यते ।*

***कूटशब्दाः*** *– उदात्तः, अनुदात्तः, स्वरितः, यमाः, बलम्, साम, सन्ताप, स्वरः, वर्णः, क्षैप्रः, प्रश्लिष्टः,पादवृत्तः, जात्यः, अभिनिहितः, ताथाभाव्यः,तैरोविरामः, तैरोव्यञ्जनः ।*

## विषयपरिचयः

समग्रशास्त्रस्य धर्मस्य च प्रमाणभूता वेदा एव । तेषां समग्रशास्त्राणां उपजीव्यरूपेण ज्ञानस्य च मूलरूपेण वेदा एव सन्तीति न केषामपि प्राच्यविदुषां वैमत्यम् । वेदाध्ययने, वेदपाठकाले च स्वरप्रक्रियायाश्च महत्त्वपूर्णं स्थानमस्ति । शिक्ष्यते स्थानादिकमनया वर्णोच्चारणधर्मादयो हस्तस्वरादयश्च यत्रशिक्ष्यते उपदिश्यते सा शिक्षा "स्वरवर्णाद्युच्चारणप्रकारो यत्र उपदिश्यते या सा शिक्षा" (ऋग्वेदभाष्यभूमिका, पृ.४४) इति । प्रातिशाख्यादयः शिक्षादिग्रन्थाः प्राधान्येन प्रथममुच्चारणं शिक्षयन्ति । चतुर्णां वेदानामुच्चारणशैली, शिक्षणपद्धतिश्च पृथक् पृथगेव विधीयते । न केवलामुच्चारणशैली अपि तु हस्तादिभिः प्रदर्श्यमाना स्वरप्रक्रिया अपि भिन्नाभिन्ना एव सम्भवन्ति । वेदाध्ययने वेदपाठे स्वरस्य महत्त्वपूर्णस्थानं वर्तते । स्वरदोषान्महान् अनर्थ अनिष्टश्च जायत इति शास्त्रं प्रतिबोधयति । तथा चोक्तम्– "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" (पाणिनीयशिक्षा,श्लो.५२) इति । तस्मात् मन्त्राः शुद्धोच्चारणीयाः । शुद्धोच्चारणाय यकारस्य जकारोच्चारणं कुत्र कतर्व्यम्? षकारस्य खकारोच्चारणं कुत्र भवति? अनुस्वारस्य गुं इत्यादेश कस्यामवस्थायां भवति इत्यस्य समग्रपक्षस्य अत्र सूक्ष्मरीत्या ज्ञानमावश्यकम् । प्रतिवेदमुच्चारणशैल्यां किमपि वैशिष्ट्यं पार्थक्यं वा भवत्येव । तस्य कृते विशेषनियमा आवश्यका भवन्ति । अतोऽत्र माध्यन्दिनीयसंहितायाः स्वरवर्णोच्चारणधर्माः प्रतिपादिताः विद्यन्ते ।

---

***सम्पर्कसूत्रम्** Email – narayanbaral1977@gmail.com

## समस्या उद्देश्यञ्च

शुक्लयजुर्वेदीयमाध्यन्दिनीये कथं वर्णा उच्चार्यन्ते तत्र पठितानां स्वराणां विषये शिक्षादिग्रन्थे उच्चारणस्य विषये मतैक्यं विद्यते न वा? उदात्तादिस्वराः कथमुच्चार्यन्ते? हस्तसञ्चालनविधिश्च कः? स्थानविशेषस्य कारणेन उच्चारणेऽपि पार्थक्यं भवति न वेति? इत्यस्य समग्रपक्षस्य वर्णनं विश्लेषणं च विधाय शिक्षादिग्रन्थे पठितानां स्वरसम्बद्धनियामानां विषयाणामनुशीलनमेवास्य प्रमुख्योद्देश्यं वर्तते ।

## विधिः

अस्मिन् लेखे निगमनात्मको विधिर्विश्लेषणात्मको विधिश्च प्रयुक्तो वर्तते । स्वराणां वर्णनं शिक्षादिशास्त्रेषु सूत्रात्मकमपि दृश्यते इत्यतः सूत्रात्मको विधिरपि अत्र अवलम्बितो वर्तते । शिक्षाग्रन्थानामध्ययनक्रमे पुस्तकालयानामुपयोगोऽपि विहितः ।

## शिक्षादिग्रन्थानां परिचयः

समग्रधर्मस्य प्रमाणभूतं वेदशास्त्रम्, तदन्तर्भूतं वैदिकवाङ्मयम् । तस्य च निगूढार्थपरिज्ञानाय वेदाङ्गानामध्ययनं परमावश्यकम् । वेदाङ्गेषु शिक्षा–कल्प–व्याकरण–निरुक्त–छन्दो–ज्योतिषमिति परिगण्यन्ते । उक्तञ्च मुण्डकोपनिषदि– " द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवाऽपरा च । तत्राऽपरा ऋग्वेदो यजुर्वेदःसामवेदोऽथर्ववेदःशिक्षा–कल्प–व्याकरण–निरुक्त–छन्दो–ज्योतिषमिति" (मुण्डकोपनिषद्,१.१.४–५) इति । उपनिषद्यपि शिक्षायाः प्रथमोल्लेखो दृश्यते । षड्सु प्रथमस्थानभूतं शिक्षाशास्त्रं वेदस्य प्रथमाङ्गभूतम् । यतो हि शिक्षाज्ञानं विना वेदस्य शुद्धोच्चारणं कर्तुं न शक्यते । शुद्धोच्चारणं विना अधीतस्य वेदस्य फलं नैव प्राप्यते । अथ च विपरीतं फलं लभ्यते इति शिक्षशास्त्रे उक्तम्–"मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्"(पाणिनीयशिक्षा,श्लो.५२) इति । शिक्षाग्रन्थेषु प्रातिशाख्यानां स्थानमत्युच्चं महनीयञ्चेति ऋषयो जगदुः । प्रातिशाख्येषु ऋग्वेदप्रातिशाख्यम्, वाजसनेयिप्रातिशाख्यम्, तैत्तिरीयप्रतिशाख्यम्,अथर्वप्रातिशाख्यम्, पुष्पसूत्रम्, ऋक्तन्त्रप्रातिशाख्यम्, सामतन्त्रमित्यादयो ग्रन्थाःप्रमुखरूपेण विद्यन्ते । शिक्षाग्रन्थेषु–पाणिनीयशिक्षा, याज्ञवल्क्यशिक्षा, कात्यायनीयशिक्षा, वाशिष्ठीशिक्षा, पाराशरीयशिक्षा, माण्डव्यशिक्षा, अथर्वप्रातिशाख्यमित्यादयःशिक्षाग्रन्थास्तत्तद्वेदस्य शिक्षामूलत्वेन दृश्यन्ते । एवञ्च तैत्तिरीयशाखासम्बद्धानां नवानां शिक्षाणां नामोल्लेखश्च प्राप्यते । ते च भरद्वाज–व्यास–शम्भु–पाणिनि–कोहलि–बौधायन–वशिष्ठ–वाल्मीकि–हरितमिति नवशिक्षा । उक्तञ्च – "भारद्वाज–व्यास–शम्भु–पाणिनि–कौहलीयकम् । बौधायनो वशिष्ठश्च वाल्मीकिर्हरितं नव" इति (चतुर्वेदी,२०६०,भूमिका, पृ.१६) । परमेतेषु सर्वेषु शिक्षाग्रन्थेष्वपि वेदमन्त्राणां कथं विशुद्धोच्चारणं करणीयम् ? शुद्धोच्चारितवर्णा वेदमन्त्रा एव इहलोके परलोके च उभयत्रापि फलभाग् भवतीति शिक्षाग्रन्थानामभिप्रायो विद्यते । सम्यक् प्रकारेण उच्चारितेन वर्णेनैव स्वस्य, परस्य च कल्याणं भवतीत्युक्तञ्च–"एवं वर्णाः प्रयोक्तव्या नाऽव्यक्ता न च पीडिताः । सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते । सुतीर्थादागतं व्यक्तं स्वाम्नातं सुव्यवस्थितम् । सुस्वरेण सुवक्रेण प्रयुक्तं बह्मराजते " (पाणिनीयशिक्षा, श्लो.३१.५१) इति । वस्तुत उदात्तादिस्वरूपाणां स्वरवर्णधर्माणां सम्यक्तया उच्चारणविधिपरिज्ञानं विना वेदमन्त्राणां स्वशाखानुसारमुच्चारणमसम्भवमेव । तस्मात् स्वशाखीयशिक्षाग्रन्थानामध्ययनमपरिहार्यमेव ।

## शिक्षायाः स्वरूपम्

शुक्लयजुर्वेदमाध्यन्दिनशाखायाः स्वरवर्णोच्चारणविशेषोऽत्र विविच्यते । ऋगादिवेदेषु विविधासु शाखासु हस्तप्रदर्शनप्रकाराश्च स्वरप्रदर्शनप्रकाराश्च भिन्ना भिन्नाः प्राप्यन्ते । अत्र शुक्लयजुर्वेदमाध्यन्दिनसंहिताध्यायिनां हस्तस्वरप्रदर्शनप्रकाराः, वर्णोच्चारणप्रकाराश्च प्राथम्येनोच्यन्ते । वेदाध्यापने गुरुमुखेन हस्तस्वरेण च शिष्याः शुद्धमुच्चारन्ति न वा विचार्य गुरुरशुद्धोच्चारिते सति पुनः संस्कारयति । उदात्तवर्णस्य उदात्तोच्चारणमनुदात्तस्य अनुदात्तोच्चारणं तथैव स्वरितस्यापि । स्वरदृष्ट्या एव पृथक् पृथक् उच्चारणस्य परिकल्पना शिक्षादिग्रन्थेषु वर्णिता एव । "सममुच्चारयेद्वर्णान्हस्तेन च मुखेन च । स्वरश्चैव तु हस्तश्च द्वावेतौ युगपत् भवेत् । हस्तभ्रष्टः स्वरभ्रष्टो न वेद फलमश्नुते" (याज्ञवल्क्यशिक्षा, १.२५) । इत्यादिना शिक्षावचनेन वेदाध्ययनविधौ स्वरप्रदर्शनार्थं हस्तचालनविधानं सम्यक् समुपस्थापितम् । शिक्षाग्रन्थानामभिप्रयो विद्यते यद् वेदानां वर्ण–स्वरपदादीनां बाह्यस्वरूपाणां समुचितं ज्ञानमावश्यकं भवति । अशुद्धमुच्चारितेन वर्णेन विपरीतं फलं प्राप्यत इति शिक्षाशास्त्रवचनेनैव स्पष्टीभवति । "जपादौ नाऽधिकारोऽस्ति सम्यक् पाठमजामनतः । प्रातिशाख्यमतो ज्ञेयं सम्यक् पाठस्य सिद्धये" (वाजसनेयिप्रातिशाख्यम्,१.१ ) इति उव्वटभाष्ये । शुद्धमुच्चारणार्थं स्वरप्रदर्शनस्य हस्तचालनविधानमेव विद्यते । शुद्धोच्चारणाय एव वेदाभ्यासस्य पञ्चविधिप्रकारा निगदिताः –वेदस्वीकरणम्, विचारः, अभ्यसनम्, जपः, दानञ्चेति ।

(क) वेदस्वीकरणम्–गुरुमुखोच्चारणपूर्वकमनूच्चारणं वेदस्वीकरणम् । गुरु येन प्रकारेण स्वराणामुच्चारणविधिना वेदमन्त्राणामुच्चारणं करोति कारयति तेनैव विधिना तदनूच्चारणं नाम वेदस्वीकरणम् ।

(ख) विचारः– गुरुमुखादध्ययनानन्तरमधीतवेदमन्त्राणां ह्रस्वदीर्घोदात्तानुदात्तस्वरितादीनां विचारः क्रियते । कोऽयं वर्णः ? उदात्तादिस्वरेषु कुत्र कीदृक् हस्तसञ्चालनं भवति, ह्रस्वदीर्घप्लुत्तोदात्तानुदात्तस्वरितादीनां विचारो विचार इत्युच्यते ।

(ग) अभ्यसनम्– गुरुमुखादधीतानां वेदमन्त्राणां मुहुर्मुहुरुच्चारणपूर्वकं कण्ठस्थीकरणं नाम अभ्यसनमित्युच्यते । गुन्नी, चर्चा, पट्टिका चेतिभेदेन त्रिप्रकारकोऽभ्यासो भवति ।अनेनैव प्रकारेण मुहुर्मुहुरुच्चारणेन मन्त्रब्राह्मणात्मकस्य वेदस्य संरक्षणं अधुनाऽपि सम्यक् क्रियते ।

(घ) जपः– अधीतस्य मन्त्रस्योपांशूच्चारणं जप इत्युच्यते । अयं वेदाभ्यासस्य कण्ठस्थीकरणस्य वेदसंरक्षणस्य चान्यतमप्रकारो विद्यते ।

(ङ) दानम्– गुरुमुखादधीतस्य वेदस्य योग्याधिकारिणे शिष्यायाध्यापनपूर्वकं प्रदानं दानमित्युच्यते । अध्ययनकालतोऽध्यापनकालपर्यन्तं समग्रमपि जीवनं द्विजातीनां वेदाभ्यासाय एव विद्यते न त्वन्यस्य कृते । "वेदाभ्यासो हि विप्रस्य तपःपरमिहोच्यते" (मनुस्मृतिः,२.१६६) । वेदाभ्यासो विप्रादेरिहलोके प्रकृष्टं कर्म इति ह विज्ञायते ।

एवं पञ्चविधस्य वेदाभ्यासस्य वर्णनं ब्रह्मयज्ञत्वमिति प्रतिपादितम् । उक्तञ्च–" वेदस्वीकरणं पूर्वं विचारोभ्यसनं जपः । तद्दानं चैवशिष्येभ्यो वेदाभ्यासो हि पञ्चधा" (दक्षस्मृतिः,२.२६,चतुर्वेदी,२०६०,भूमिका पृ.१६) । एवं प्रकारेण वेदानां संरक्षणार्थमेव पञ्चविधानां प्रकाराणामुपदेशः शिक्षादिभिर्गन्थैः समुपस्थापितः ।

शिक्षायाः स्वरूपस्य विषये महर्षिणा प्रमुखतया षड् वर्ण्यविषयाःप्रोक्ताः– वर्ण–स्वर–मात्रा–बलं–साम–सन्तान इति । इमे शिक्षावाक्यमवलम्ब्य शिक्षादिग्रन्थाःप्रवृत्ताः । मुख्यतया अयं वर्णः स्वरो वा अनया रीत्या उच्चारणीय इति शिक्षादिग्रन्थानामध्ययनेनैव विज्ञायते ।


ISSN : 2249-538X

वर्णाः–अकाराद् हकारपर्यन्तं सर्वेऽपि वर्णपदवाच्याः । यो वर्ण यस्मात् स्थानात् उच्चारणीयः स वर्णस्तेनैव स्थानादुच्चारणीयः । वर्णा विविधस्थानीयास्तेषां सम्यग्ज्ञानमावश्यकम् । कण्ठस्थानीयो वर्णो कण्ठादेव उच्चारणीयो भवति । एवमेव कण्ठतालुमूर्धन्यदन्त्योष्ठप्रभृतिस्थानेभ्य एव ते वर्णविशेषा उच्चरिता भवन्ति । यो वर्ण यस्य स्थानस्य वर्तते स वर्णस्तेनैव स्थानेनोच्चारणीयः ।

स्वरः– उदात्तानुदात्तस्वरितादयस्त्रिविध मुख्यत्वेनोपदिष्टाः । स्वरितस्यापि अष्टौ भेदा माध्यन्दिनीये निरूपिताः । स्वरविपर्ययादपि मन्त्रार्थो वेदपाठश्च सदोषो भवति ।

मात्रा–मात्रास्त्रिविधा ह्रस्वदीर्घप्लुतभेदात् । एतेषामन्तर्भावः स्वरेष्वपि भवत्येव ।

बलम्– बलमिति प्रयत्नः । स द्विविधः–अल्पप्राणमहाप्राणभेदात् ।

साम–वेदपाठदोषरहितं श्रुतिमधुरं सामशब्देनोच्यते ।

सन्तानः– सन्तानः सन्धिः । वेदाध्ययनस्य संहितापाठेषु, विकृतिपाठेषु, पदपाठेषु, सन्धिश्चावश्यको भवति । सन्धिनियमानुसारादेव घनजटादिपाठा उच्चार्यन्ते । अत एव पूर्वोक्तरीत्या वेदानामध्ययनाध्यापनेन शुद्धोच्चारणेन च फलं लभ्यते । शिक्षासूत्रनिर्देशानुसारेण वेदोऽध्येयः । तदैव फलमश्नुते । एतदेव शिक्षाया मुख्यप्रयोजनम् ।

अतस्तद्तद्वेदसम्बद्धानां शिक्षाग्रन्थानां प्रातिशाख्यानामध्ययनं परमावश्यकम् । तस्मादत्र शुक्लयजुर्वेदसम्बद्धानां स्वरविषयाणां वर्णोच्चारणधर्माणामेव विवेचनं विद्यते ।

## माध्यन्दिनीयशाखायाः स्वरवर्णोच्चारणप्रकाराः

शुक्लयजुर्वेदमाध्यन्दिनसम्बद्धानां स्वरविषयकाणां वर्णोच्चारणधर्माणामेव विवेचनं क्रियते । स्वराणामुच्चारणकालः, ह्रस्व-दीर्घप्लुताश्चेति त्रिविधस्वराणामुच्चारणकालोऽपि शिक्षादिग्रन्थानामध्ययनेन स्फुटीभवति । तत्र तावद् ह्रस्वो वर्ण एकमात्रिको भवति । वाजसनेयिप्रातिशाख्ये “अमात्रस्वरो ह्रस्वः, मात्रा च” (वाजसनेयिप्रातिशाख्यम्,१.५५) । “मात्रा ह्रस्वः” (ऋक्प्रातिशाख्यम्,१.२७) । “ऋकारऌकारौ ह्रस्वौ, अकारश्च, तेनसमानकालस्वरः”(तैत्तिरीयप्रातिशाख्यम्,१.३१–३३) इति । अ इ ए उ ऋ ऌ इत्येते वर्णा ह्रस्वा इति वाजसनेय प्रातिशाख्यस्य स्वव्याख्यायां उव्वटाचार्यो वक्ति । एवं प्रकारेण ज्ञायते यत् अकारोच्चारणकाल एकमात्रिको ह्रस्व इति । “द्विमात्रो दीर्घ उच्यते ” (याज्ञवल्क्यशिक्षा, १६) इति याज्ञवल्क्यशिक्षायाम् । “ द्विस्तावान् दीर्घः” (वाजसनेयिप्रातिशाख्यम्,१.५७) । “द्वे दीर्घः” (ऋक्प्रातिशाख्यम्,१.२९) इति । आ ई ऊ ॠ ॡ ए ऐ ओ औ इत्येते द्विमात्रिकवर्णा दीर्घा उच्यन्ते । प्लुतस्तु त्रिकात्रिको ज्ञेयः । “प्लुतास्त्रिः”(वाजसनेयिप्रातिशाख्यम्, १.५८) इति । “तिस्रः प्लुतउच्यते स्वरः” (ऋक्प्रातिशाख्यम्,१.३०) । इति प्रातिशाख्यस्य परिभाषापटले । वाजसनेय-प्रातिशाख्यस्य सूत्रस्य व्याख्यायामुव्वटाचार्य आ३ ई३ ऊ३ ॠ३ ॡ३ ए३ ऐ३ ओ३ औ३इत्येते स्वराःप्लुता इति निर्दिशति । ह्रस्वस्य त्रिगुणकालः प्लुतस्य । प्लुतस्योच्चारणकालस्त्रिमात्राकालिको भवति । ह्रस्वदीर्घप्लुतानां स्वराणामुच्चारणकालव्यवस्था एकद्वित्रिमात्रिककालिकत्वं भवति । एवं प्रकारेण प्रातिशाख्यादिशिक्षाग्रन्थेषु स्वराणामुच्चारणकालः प्रतिपादितः । प्रथमस्तावद् स्वराः विविच्यन्ते ।

## स्वराणां हस्तप्रदर्शनप्रकाराः

स्वर्यते शब्द्यते व्यञ्जनमनेन इति व्युत्पत्या स्वरः शब्दो निष्पद्यते । अर्थात् यस्य साहाय्येन व्यञ्जनस्योच्चारणं कर्तुं सुकरं भवति सः स्वरः । परमत्र हस्तेन प्रदश्र्यमानाःस्वरा एव स्वरशब्देनोच्यन्ते । वैदिकपरम्परायां माध्यन्दिनीयशाखायां हस्तेन प्रदर्शितानामुदात्तादीनां स्वराणां प्रदर्शनप्रकार एवात्र विविच्यते । वेदमन्त्राणां

शुद्धोच्चारणार्थमेव उदात्तादिस्वराणां ज्ञानमावश्यकं भवति । शुद्धोच्चारितेनैव मन्त्रेण फलं लभ्यते । अत एव प्रातिशाख्यकारेण ग्रन्थादौ "स्वरसंस्कारयोश्छन्दसि नियमः" (वाजसनेयिप्रातिशाख्यम्, १.१)इति निर्दिष्टम् । महर्षिणा याज्ञवल्क्येन स्वशिक्षाग्रन्थे स्वरप्रकरणे हस्तचालनविधौ प्रथमं हस्तचालनहस्तसन्निवेशनप्रकारः प्रोक्तः । वेदाध्ययने स्वराणां समुचितविनियोगस्य महती आवश्यकता भवति । भिन्नभिन्नसंहितासु शाखासु च हस्तप्रदर्शनप्रकारा भिन्न–भिन्ना एव प्रोक्ताः । तासु तासु च संहितासु उदात्तानुदात्तस्वरितादयस्त्रिविधाः स्वराःव्यपदेशिताः । स्वराणां विषये याज्ञवल्क्यशिक्षायामुक्तम्–"उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः " (याज्ञवल्क्यशिक्षा,१.१) इति । ऋक्प्रातिशाख्य– स्वरपटले "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः" (ऋक्प्रातिशाख्यम्,३.१) इति त्रयः स्वरा निर्दिष्टा । पाणिनीयशिक्षायाम् "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः" (पाणिनीयशिक्षा, १.१) इति । व्यासशिक्षायाम् , माण्डूकीशिक्षायाञ्च स्वराणां चतुर्धा विभाजनं प्राप्यते, यथा –"उदात्तश्चानुदात्तश्च स्वरितःप्रचितस्तथा । चतुर्विधः स्वरोदृष्टः स्वरचिन्ताविशारदैः" (माण्डूकीशिक्षा, १९) । तथैव व्यासशिक्षायाम् "प्रचयश्चबुधैः प्रोक्त उदात्तश्रुतिरित्यपि । प्रचयश्चतुर्थः स्वरः उदात्तसमानश्रुतिरिति स्वरविचक्षणैः कथितः" (व्यासशिक्षा, सू. २९१) । न केवलं चत्वारः स्वरा अपि तु पञ्चप्रकारकाः स्वरा नारदीयशिक्षायां प्राप्यन्ते, यथा– "उदात्तश्चानुदात्तश्च स्वरितप्रचिते तथा । निघातश्चेति विज्ञेयः स्वरभेदस्तु पञ्चधा" (नारदीयशिक्षाप्र.प्रपा. १९) । प्रचयनिघातश्चेति संयोज्य पञ्चधा स्वरविभाजनं दृश्यते । एषु उदात्तानुदात्तस्वरितास्त्रय एव मुख्यस्वराः । अत्र माध्यन्दिनीयशाखासु प्रयुक्तानां हस्तस्वरप्रदर्शनप्रकाराणां स्वराणामेव विविचनं विद्यते । तत्रापि स्वरितस्यापि अष्टौ भेदा माध्यन्दिनीये प्रतिपादिताः । स्वरगणनायां प्रचयस्यापि निदर्शनं प्राप्यते परं प्रचयस्यापि स्वरत्रये एवान्तर्भावो विद्यते । तस्मात् त्रैस्वर्याणामेवात्र विचारोऽधः प्रस्तुतः ।

## उदात्तः

अक्ष्णोरुपरिस्थिताया भ्रुकुट्या मूर्ध्निप्रदेशे दक्षिणकर्णसमीपे यदा हस्तो जायते तदोदात्तस्वरो भवति । "मूर्ध्न्युदात्तः" (प्रतिज्ञापरिशिष्टम्, १.५) । "उच्चैरुदात्तः" (वाजसनेयिप्रातिशाख्यम्,१.१०८) इति । गात्राणमूर्ध्वगमनेन यः स्वरो निष्पद्यते स उदात्तः । उदात्तस्वरे हस्तस्योर्ध्वगमनं यथा– दे॒वाय॑ ह॒विषा॑ (शुक्लयजुर्वेद, २७.२६) इत्यत्र देकारोत्तरवर्ति वकार उदात्तत्वाद् हस्तस्य ऊर्ध्वगमनं भवति । अनुदात्ते तिरश्चीना (–)) रेखाभवति । अनुदात्ते अधो गतो हस्त उदात्ते उपरि समायाति । उदात्तस्वरस्य स्थानद्वयं वामस्थानीयमूर्ध्वस्थानीयञ्च । "अनुदात्तं हृदि न्यस्योदात्तं वामभ्रुवि विन्यसेत्" (केशवीयशिक्षा, २. ) । अनुदात्तपरे उदात्ते अनुदात्तपरेषु निरन्तरेषूदात्तेषु हस्तस्य स्थितिर्वामभ्रूनिकटे इति केशवकृतशिक्षायां निगदितम् । प्रथम अनुदात्तात् पर उदात्तस्तदनन्तरमपि अनुदात्त आयाति चेद् द्वयोरनुदात्तयोर्मध्यस्थस्योदात्ते हस्तस्य गतिर्वामतो भवति । उदात्ते हस्तस्योर्ध्वगमनमनुदात्ते चाधो गमनं स्वरिते तु मध्ये संस्थाप्यते । उक्तञ्च–"उदात्तं तु भ्रुवःप्रान्ते प्रचयं नासिकाग्रतः । हृत्प्रदेशेऽनुदात्त तु तीर्यग् जात्यादिरीरितः" । (याज्ञवल्क्यशिक्षा,१.५५)उदात्तानुदात्तस्वरितस्यायं सामान्यनियमः । उदात्तस्वरे क्वचित् वामभागे हस्तस्य प्रदर्शनं भवति । उदात्तस्वरात् यदा अनुदात्तस्वरः समायाति तदोदात्तस्वरे हस्तःवामभागे कर्तव्यः । यथा– "उदात्तादनुदात्ते तु वामाया भ्रुवआरभेत्" (याज्ञवल्क्यशिक्षा,१.५७) इति याज्ञवल्क्य शिक्षायाम् । यथा– सुकृद् दे॒वः स॑वि॒ता (शुक्लयजुर्वेद, २७.१३ ) इत्यत्र अनुदात्तात् परेऽनुदात्तः स्यात्तदोदात्ते हस्तस्य गतिर्वामतः, यत्र अनुदात्तात् परे उदात्तस्तदनन्तरं स्वरितः स्यात्तदा हस्तस्योर्ध्वगमनं भवति इति । उदात्ते भ्रूवःप्रान्ते शिरः सम्मिते, वामभ्रूनिकटे वा हस्तं नयेदिति । "उदात्तादनुदात्ते तु वामया भ्रुवआरभेत् । उदात्तस्वरितोदात्ताः क्रमाद्दक्षिणतो न्यसेत्" । (याज्ञवल्क्यशिक्षा,५७–५८) ।

 ISSN : 2249-538X

उदात्तादुच्चस्वरात् अनुदात्ते परतः स्थिते सति उदात्तस्योच्चारणे हस्तसञ्चालनं वामभ्रूनिकटे कर्तव्यम् । उदात्ते वामतो हस्तविन्यासं प्रतिपाद्यानुदात्ते दक्षिणतो हस्तविन्यासं कुर्यादिति ।

## अनुदात्तः

अनुदात्तस्वराणां प्रदर्शनं हृदयादौ हस्तस्य संस्थापनेन क्रियते । उक्तञ्च– "हृद्यनुदात्तः" (प्रतिज्ञापरिशिष्टम्, १.४) । हृत्सम्मिते देशे यदा हस्तो जायते तदा अनुदात्तस्वरो भवति । उक्तञ्च प्रातिशाख्ये – "नीचैरनुदात्तः"(वाजसनेयिप्रातिशाख्यम्, १.१०८) । एषु अक्षरेषु तिरश्चीना (–) रेखाऽङ्किता भवति तान्यक्षराणि अनुदात्तानि विज्ञातव्यानि । अनुदात्तस्वरे हस्तः कथं स्थाप्यते इत्याह– हृद्देशे सम्मिते भागे यदा हस्तचालनं क्रियते, तदाऽनुदात्तस्वरो ज्ञातव्यः । यथा – ऊर्ध्वा अस्य । द्युमत्तमा (शुक्लयजुर्वेद, २७.११) देवाय हविषा (शुक्लयजुर्वेद, २७.२६) इत्यादीनि उदाहरणानि ज्ञेयानि । सुकृद् देवः सविता (शुक्लयजुर्वेद २७.१३ ) । अनुदत्ते परे अनुदात्ते दक्षिणतो हस्तविन्यासः कर्तव्यः । अनुदात्ते अनुदात्तपरकोदात्तपरत्वं स्यात्तदाऽनुदात्ते हस्तस्य न्यासो दक्षिणतो विधेयः । यथा केशवकृतशिक्षायाम् –" अनुदात्तादुदात्तश्चेत् स्वरितोत्तर एव च । हृच्छिरकर्णमूलेषु न्यसेद्धस्तमसंशयम्" (केशवीयशिक्षा, १ ) इति । अनुदात्तस्यापि स्थानद्वयं दक्षिणस्यां अधश्च । यद्यपि शिक्षाग्रन्थेषु पञ्चप्रकारस्यानुदात्तस्य वर्णनं प्राप्यते तथापि मुख्यतया अनुदात्तस्य स्थानद्वयं निर्दिशितम्– दक्षिणस्थानम्, हृत्स्थानञ्चेति । हृत्स्थानमिति वैदिका वेदाध्ययने नीचैरेव हस्तस्य गति कारयन्ति । अनुदात्तात् परे उदात्तस्तदनन्तरं स्वरितः स्यात्तदा अनुदात्ते हस्तस्याधो गमनं भवति । यथा सुकृद् देवः सविता इत्यत्र'सु'इत्यनुदात्ते हस्तो दक्षिणतो वामगतिं याति । पुनश्च स्वरितपरकोदात्तपरकत्वं'दे'इत्यत्र्यनुदात्तेऽधो हस्तस्य न्यासो विधेयः । एवं प्रकारेण अन्यत्रापि अवगन्तव्यम् ।

## स्वरितः

उदात्तानुदात्तोभयधर्मविशिष्टः स्वरः स्वरितः । उदात्तानुदात्तसमाहाररूप एव स्वरित इति प्रातिशाख्ये परिभाषितम्– "उभयवान् स्वरितः" (वाजसनेयिप्रातिशाख्यम्,१.११०) इति । कर्णमूले सम्मिते देशे दक्षिणहस्तं प्रापय्य स्वरितस्योच्चारणं कर्तव्यम् । "श्रुतिमूले स्वरितः"( प्रतिज्ञापरिशिष्टम्,१.६) इति । उदात्तस्योच्चारणे मस्तकस्योपरि स्थापितो हस्तो मस्तकात् त्र्यङ्गुलं पातयित्वा दक्षिणकर्णमूले यदा जायते, तदा सःस्वरः स्वरितो विज्ञातव्यः । स्वरितस्तूदात्तानुदात्तोभयधर्मविशिष्टः स्वरो विद्यते । यत्र अक्षरोपरि ऊर्ध्वश्चिह्नं (॑) रेखाअङ्किता भवति तत्र तानि अक्षराणि स्वरितानि विज्ञातव्यानि । माध्यन्दिनीयमन्त्रसंहितायां अक्षरोपरि लम्बिता रेखा स्वरितस्य चिह्नं भवति । उदाहरणानि यथा– ऊर्ध्वा अस्य द्युमत्तमा (शुक्लयजुर्वेद२७.११) देवाय हविषा (शुक्लयजुर्वेद,२७.२६) । एषु उदाहरणेषु निर्दिष्टेषु मन्त्रेषु यत्र यत्र ऊर्ध्वरेखाङ्किता (अ॑) इत्यक्षरोपरि संस्थापिता रेखा इव चिह्नं भवति तत्रतत्रत्यानि अक्षराणि स्वरितानि । तेषामुच्चारणे हस्तस्वरः कर्णमूलदेशे संस्थापनीयः । उदात्तानुदात्तवर्णनवेलायामपि स्वरितस्य यथासम्भवं वर्णनं यथायथं पूर्वमेव प्रतिपादितमेव । तत एव स्वरितस्य परिज्ञानं तु भवत्येव । स्वरितस्यापि अष्टौ भेदाश्चर्चिताः यथा– जात्यः, अभिनिहितः, क्षैप्रः, प्रश्लिष्टः,तैरोव्यञ्जनः, तैरोविरामः, पादवृत्तः, ताथाभाव्यश्चेति । उक्तञ्च याज्ञवल्क्यशिक्षाम्– "अष्टौ स्वरान् प्रवक्ष्यामि तेषामेव तु लक्षणम् । जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथाऽपरः । तैरोव्यञ्जनसंज्ञश्च तथा तैरोविरामकः । पादवृत्तो भवेत् तद्वत् ताथाभाव्य इति स्वराः" (याज्ञवल्क्यशिक्षा,१.७६–७७) इति । परं कृष्णयजुर्वेदस्य तैत्तिरीयप्रातिशाख्ये स्वरितस्य सप्त भेदाःप्रदर्शिताः सन्ति ।

## जात्यः

शुक्लयजुर्वेदप्रातिशाख्यानुसारेण यदा एकस्मिन्नेव पदे स्वरितात्पूर्वम् अनुदात्तः स्यात् स्वरितश्च यकारेण वकारेण वा युक्तो भवति तदा जात्यनामकःस्वरितो भवति । यथा प्रातिशाख्ये– "एकपदे नीचपूर्वः सयवो जात्यः"(वाजसनेयिप्रातिशाख्यम्, १ ।१११) इति । तथैव याज्ञवल्क्यशिक्षायामपि –"एकपदे नीचपूर्वः सयवो जात्य इष्यते ।अपूर्वोऽपि परस्तद्वद् धान्य सु-प्वा स्वरित्यपि " (याज्ञवल्क्यशिक्षा,१ ।७८) इति । उदाहरणं यथा—धान्यमसि (शुक्लयजुर्वेद,१.२०), आस्येनप्राश्नामि (शुक्लयजुर्वेद,२.११), कन्याऽइव (शुक्लयजुर्वेद,१७.९७), इत्यादीनि । सुप्वाकामधुक्षः (शुक्लयजुर्वेद,१.३), तन्वोयद्विलिष्टम् (शुक्लयजुर्वेद,२.२४), विभ्वं विशेविशे (शुक्लयजुर्वेद,३.१५), असिस्स्वर्ज्योति (शुक्लयजुर्वेद,५.३२) इत्यादीनि यकारवकारयुतानि अनुदात्तपूर्वकाणि उदाहरणानि विज्ञातव्यानि । "तस्योदात्ततरोदात्तादर्धमात्रार्धमेव वा,अनुदात्तः परः शेषः स उदात्तश्रुतिः, स्वरितस्यादितोमात्रार्धमुदात्तम्" (ऋक्प्रातिशाख्यम्,स्व.प.४–६) इति ऋक्प्रातिशाख्ये । यद्यपि ऋक्प्रातिशाख्ये जात्यपदेनास्य स्वरस्य वर्णनं नास्ति तथापि जात्यवदेव उदाहरणादवगम्यते ।

## अभिनिहितः

वाजसनेयप्रातिशाख्यानुसारेण यदा एकारौकाराभ्यामुदात्ताभ्यां परःस्थितोऽनुदात्तअकारो यत्र लुप्यते तदा अभिनिहितः स्वरितो भवति । "एदोद्भ्यामकारो लुगभिनिहितः" (वाजसनेयिप्रातिशाख्यम्,१.११४) इति । तथैव याज्ञवल्क्यशिक्षायाम्– "एओ आभ्यामुदात्ताभ्यामकारो निहतश्चयः । स च यत्र प्रलुप्येत तं चाऽभिनिहितं विदुः" (याज्ञवल्क्यशिक्षा,१.७९) इति । उदाहरणानि यथा –ते + अप्सरमाम्, तेप्सरसाम् (शुक्लयजुर्वेद,२४ ।३७, घर्मः+असि, घर्मोसि (शुक्लयजुर्वेद,९१.२०), कुक्कुटः+ असि, कुक्कुटोसि । वेदः+ असि.वेदोसि (शुक्लयजुर्वेद,९ ।२१), इत्यादीनि उदाहरणनि ।

## क्षैप्रः

यदा अनुदात्तत्व विशिष्टे असवर्णे स्वरे परे भाविसंज्ञस्वरोऽन्तस्थमापद्यते तदा क्षैप्रसंज्ञको भवति । "स्वरे भाव्यन्तस्थाम्" (वाजसनेयिप्रातिशाख्यम्, ४.४७) इति । सूत्रानुसारमुदात्तइकारो यकारो भवति, उदात्तउकारश्च वकारो भवति । एतस्यामवस्थायां क्षैप्रसंज्ञकः स्वरितः स्वरो जायते । तथा चोक्तं याज्ञवल्क्यशिक्षायाम्– "इउवर्णौ यदोदात्तावापद्येते यवौ कचित् । अनुदात्ते परे नित्यं विद्यात् क्षैप्रस्य लक्षणम् " ( याज्ञवल्क्यशिक्षा,१. ८०) । अत्र इकारउकारशब्देन ह्रस्वदीर्घावुभावपि इकारउकारौ बोध्येते । इवर्णस्य यथा त्रि+अम्बकम्= त्र्यम्बकम् ( शुक्लयजुर्वेद,३.७) । वाजी + अर्वन्= वाज्यर्वन् (शुक्लयजुर्वेद,११.४४) उवर्णस्य यथा– द्रु+ अन्नः= द्र्वन्नः ( शुक्लयजुर्वेद,११.७०)उरु+अन्तरिक्ष= उर्वन्तरिक्ष इत्यादीनि उदाहरणनि ।

## प्रश्लिष्टः

उदात्तत्त्वविशिष्टह्रस्व इवर्ण पूर्वः, परत्रस्थितेन अनुदात्तत्वविशिष्टेन ह्रस्वइकारेण सह यदा परस्परः प्रश्लिष्यते तदा प्रश्लिष्टसंज्ञकः स्वरितो भवति । "इवर्ण उभयतो ह्रस्वः प्रश्लिष्टः" (वाजसनेयिप्रातिशाख्यम्, १.११६) । "इवर्णमुभयतो ह्रस्वमुदात्तपूर्वमनुदात्तपरं स्वरितम्" (वाजसनेयिप्रातिशाख्यम्, ४.१३५) । याज्ञवल्क्यशिक्षायाञ्च– इकारो यत्र दृश्येत इकारेणैव संयुतः । उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वरः । (याज्ञवल्क्यशिक्षा, १.८१ ) । यथा– अभि + इन्धताम्= अभीन्धताम् (शुक्लयजुर्वेद,११.६१) स्रुचि + इव स्रुचीव (शुक्लयजुर्वेद,२०.७९) । इकारप्रश्लिष्टो माध्यन्दिनीयेषु प्राप्यते परन्तु तैत्तिरीये तु उदात्तानुदात्तयो उवर्णयोः सन्धौ प्रश्लिष्टस्वरितो भवति ।


ISSN : 2249-538X

## तैरोव्यञ्जनः

उदात्तात्परो यः स्वरो व्यञ्जनयुतः स स्वरस्तैरोव्यञ्जनसंज्ञकः स्वरितो भवति । "स्वरो व्यञ्जनयुतस्तैरोव्यञ्जनः" (वाजसनेयिप्रातिशाख्यम्, १ ।११७) । याज्ञवल्क्यशिक्षायाञ्च– "उदात्तपूर्वः स्वरितो व्यञ्जनेन युतो यदि । एष सर्वो बहुस्वारस्तैरोव्यञ्जन उच्यते" (याज्ञवल्क्यशिक्षा, १.८२) । उदाहरणं यथा– इडे । रन्ते । हव्ये । काम्ये । (शुक्लयजुर्वेद, ८.३७) इति ।

## तैरोविरामः

उदात्तावग्रहात् परः स्थितस्तैरोविरामनामकः स्वरितो भवति । " उदवग्रहस्तैरोविरामः" (वाजसनेयिप्रातिशाख्यम्, १ ।११८) । । वाजसनेयप्रातिशाख्यानुसारेण पदपाठकाले एव अयं स्वरितोपलभ्यते । उक्तञ्च याज्ञवल्क्यशिक्षायाम्– "उदात्तावग्रहात् यस्तु स्वरितः स्यादनन्तरः । तैरोविरामं तं विद्यात् तैरोव्यञ्जनमन्यथा " (याज्ञवल्क्यशिक्षा, १.८३) इति । उदाहरणं यथा– गोपताविति गो–पतौ ( शुक्लयजुर्वेद, १.१) यज्ञपतिमिति यज्ञ–पतिम् ( शुक्लयजुर्वेद, ६.११) । गोपतौ इत्यत्र गकारोत्तर ओकारः उदात्तावग्रहः तस्मात् परतो यः पकारोत्तरवर्ती स्वरितोऽकारः सः स्वरस्तैरोविराम इति । अवग्रहाभावे तु तैरोव्यञ्जन एव अवगन्तव्यम् ।

## पादवृत्तः

वाजसनेयप्रातिशाख्यानुसारेण स्वरितत्वगुणविशिष्टस्वरे अकारादौ सवर्णे परे सति अर्थात् उदात्ताक्षरात् परत्र स्थितः स्वरितस्वरः पादवृत्तनामकः स्वरितो भवति । " विवृत्तिलक्षणः पादवृत्तः" (वाजसनेयिप्रातिशाख्यम्, १ ।११८) । स्वरयोरनन्तरयोरनन्तरं विवृत्तिरुच्यते इति । तथा चोक्तम् याज्ञवल्क्यशिक्षायाम्– "स्वरयोरन्तरे काले विवृत्तिर्दृश्यते यदि । स स्वारः पादवृत्तः स्यात् काऽईमिति निदर्शनम्" (याज्ञवल्क्यशिक्षा,१.८४) इति । स्वरे च स्वरिते चैव विवृत्तिर्यत्र दृश्यते । पादवृत्तो भवेत् स्वारः श्वित्रऽआंदित्य दर्शनम्" (याज्ञवल्क्यशिक्षा,१.८४) । इति पाठान्तरं दृश्यते । स्वरयोर्मध्ये सन्धिरहितो व्यवधानकालो विवृत्तिरित्युच्यते । उदाहरणं यथा– श्वित्रऽ आदित्यानाम् (शुक्लयजुर्वेद, २४.३९) वर्चोदाऽ असि (शुक्लयजुर्वेद,२.२६), पुत्रऽ ईधे (शुक्लयजुर्वेद,११.३३), काऽ ईमरे (शुक्लयजुर्वेद,२३.५), इत्यादीनि ।

## ताथाभाव्यः

उदत्तादिरुदात्तान्तः स्वरो नीचावग्रहःस च स्वरितस्ताथाभाव्य इत्युच्यते । "उदाद्यन्तो न्यवग्रहस्ताथाभाव्यः" (वाजसनेयिप्रातिशाख्यम्,१.१२०) याज्ञवल्क्यशिक्षायामपि " उदात्ताक्षरयोर्मध्ये भवेन् नीचस्त्ववग्रहः । ताथाभाव्यो भवेत् स्वारस् तनू–नप्त्रे निदर्शनम्" (याज्ञवल्क्यशिक्षा, १.८५) इति । पुनश्च तत्रैव याज्ञवल्क्यशिक्षायां तु तथाभाव्यस्वरो माध्यन्दिनविरोधित्वन निर्दिष्टः । यथा– " माध्यन्दिनविरोधी स्यात् ताथाभाव्यस्तु यः स्वरः । स्वरौ चैवाऽत्र दृश्येते भिन्नोदात्तानुदात्तकौ"( याज्ञवल्क्यशिक्षा, १.८६) इति । माध्यन्दिनीयानान्तु ताथाभाव्यनामकः कम्प एव , न तु स्वरितः । यथा– तनू–नप्त्रे (शुक्लयजुर्वेद,५.५) । कम्पनं तु उच्चारणे ध्वनौ आरोहावरोहात्मककम्पनमित्युच्यते । एवं प्रकारेण जात्याऽ–भिनिहितक्षैप्रप्रश्लिष्टतैरोव्यञ्जनतैरोविरामपादवृत्तादीनां स्वरितानां भेदाः प्रातिशाख्यादिग्रन्थेषूपलभ्यन्ते । जात्याऽ–भिनिहित–क्षैप्र–प्रश्लिष्टेषु एषु चतुर्षु स्वरेषु पितृदानवद्धस्तं तिर्यक् कृत्वा स्वराः प्रदर्शनीया इति काण्वः । " चत्वारस्तिर्यक्स्वरिताः " (वाजसनेयिप्रातिशाख्यम्, १.१२२) इति ।

## यकारस्य जकारोच्चारणम्

शुक्लयजुर्वेदमाध्यन्दिनसंहितायां कुत्र कुत्र यकारस्य जकारोच्चारणं भवति इत्यस्य विधिः प्रातिशाख्ये कात्यायनप्रतिज्ञापरिशिष्टे याज्ञवल्क्यशिक्षायाञ्च एतस्य विषये विवेचितं वर्तते । अतोऽत्रापि विविच्यते । "अथाऽन्तस्थानामाद्यस्य पदादिस्थस्याऽन्यहलसंयुक्तस्य संयुक्तस्याऽपि रेफोष्मान्त्याभ्यामृकारेण चाऽविशेषेणाऽदिमध्यावसानेषूच्चारणे जकारोच्चारणम् " (प्रतिज्ञापरिशिष्टम्,२.१) इति । पदादिस्थस्य रेफहकाराभ्यामृकारेण च युक्तस्य पदमध्यस्थस्य पदान्तस्थस्यापि व्यञ्जनैर्युक्तस्यापि यकारस्य जकारोच्चारणं भवति । उक्तञ्च याज्ञवल्क्यशिक्षायाम्– " पदादौ च पदादौ च संयेगावग्रहेषु च । जशब्द इति विज्ञेयो योऽन्य स य इति स्मृतः । हकाररेफसंयुक्त ऋवर्णोदय एव वा । सुस्पष्टं तं विजानीयात् यकारो नान्ययुग्भवेत् " (याज्ञवल्क्यशिक्षा, २.५२,५६) इति ।

पदादौ विद्मानस्यासंयुक्ताक्षरस्य जकारोच्चारणं भवति यथा–यज्ञेन यज्ञमयजन्त (शुक्लयजुर्वेद, ३२.१६) यजमानस्य (शुक्लयजुर्वेद, १.१) यज्ञपितः (शुक्लयजुर्वेद, ३२.१६) । इत्यादिस्थानेषु पदाद्यस्य यकारस्य जकारोच्चारणं भवति । पदादित्वाभावे तु यकारोच्चारणमेव यथा–श्रेष्ठतमाय (शुक्लयजुर्वेद, १.१) प्रचोदयात् (शुक्लयजुर्वेद,३.३५) मृडयातिनः (शुक्लयजुर्वेद, १६.७) इत्यादयः ।

परन्तु अन्यव्यञ्जनयुक्तस्य पदादिस्थस्य पदमध्यस्थस्य पदान्त्यस्य च यकारस्य जकारेच्चारणं न भवति । यथा– रेवान्यो (शुक्लयजुर्वेद,३.२९), देवस्यत्त्वा (शुक्लयजुर्वेद,१.१०), अग्निर्ज्योतिः (शुक्लयजुर्वेद,३.९), व्वाज्यर्व्वन् (शुक्लयजुर्वेद,३.२९) इत्यादिस्थानेषु जकारोच्चारणं न भवति ।

एवञ्च संयुक्तस्यापि रेफहकाराभ्यां युक्तस्य यकारस्य जकारोच्चारणमेव भवति । यथा–सुवीर्य्यस्य (शुक्लयजुर्वेद, ७.१४) परिगृह्य (शुक्लयजुर्वेद, १७.५५), आयुर्य्युधः (शुक्लयजुर्वेद, १६.६०) । इत्यादिस्थानेषु रेफहकारयुक्तेषु स्थानेषु यकारस्य जकारोच्चारणमेव भवति ।

ऋकारेण युक्तस्यापि जकारोच्चारणमेव यथा– सदोस्यृतस्य (शुक्लयजुर्वेद, ५.३३) , प्रदिश्श्यृतस्य, (शुक्लयजुर्वेद २९.३६) इत्यादिस्थानेषु यकारस्य जकारोच्चारणं भवति ।

द्वित्वयकारेण युक्तस्य स्थानेऽपि जकारोच्चारणं भवति । "द्विर्भावेप्येवम्" (प्रतिज्ञापरिशिष्टम्,२.२) इति । यथा– वीर्य्यन्ते (शुक्लयजुर्वेद, २९.१९), पेशोमर्य्या (शुक्लयजुर्वेद, २९.३७), सहरय्या (शुक्लयजुर्वेद, १२.१०), धाय्यारूपम् (शुक्लयजुर्वेद, १९.२४) इत्यादिद्वित्वेषु स्थानेषु यकारेषु जकारोच्चारणं भवति ।

क्वचिदुपसर्गात् परस्य यकारस्य जकारेच्चारणं भवति यथा– संयौमि (शुक्लयजुर्वेद, १.२२),संयज्ञपतिः (शुक्लयजुर्वेद, ६.१०) रूपयज्ञम् (शुक्लयजुर्वेद, ८.३५) इत्यादिस्थानेषु उपसर्गयुक्तेषु स्थानेष्वपि यकारस्य जकारेच्चारणं भवति । परन्तु कुत्रचित् स्थानेषु उपसर्गात् परस्य यकारस्य जकारोच्चारणं न भवति यथा– नियुनज्मि (शुक्लयजुर्वेद, ६.९), उपयन्ति (शुक्लयजुर्वेद, १७.७६), सुयज्ञाः (शुक्लयजुर्वेद, ७.३५), प्रयातु (शुक्लयजुर्वेद, १८.७२) इत्यादिस्थानेषु यकारस्य जकारोच्चारणं न भवति ।

द्विरुक्तस्य पदस्य परस्मिन् पदे विद्यमानस्य यकारस्य जकारोच्चारणं न भवति पदादौ अपि । यथा – यत्र यत्र (शुक्लयजुर्वेद, २९.४३), यजुषे यजुषे (शुक्लयजुर्वेद, १.३०) यतो यतः(शुक्लयजुर्वेद, ३६.२२) । अत्र परस्मिन् पदे यकारोच्चारणं भवति पूर्वस्मिन् पदे तु जकारोच्चारणमेव ।

यकारस्य जकारणं यत्र क्रियते तत्र प्राचीनकालिकेषु कतिपयेषु पत्रात्मिकेषु अन्येषु च पुस्तकेषु यकारस्योदरं रेखया भेदितो (य) दृश्यते । यकारोच्चारणस्थाने तु सामान्यरूपेणैव यइत्यस्य (य) उल्लेखो दृश्यते । एष नियमः

 ISSN : 2249-538X

शतपथब्राह्मणादिष्वपि संहितावदेव ज्ञातव्यो भवति ।

## रेफलकारऋकाराणमुच्चारणम्

व्यञ्जनेन रहितस्य रेफस्य शसषहेषु परेषु ऋकारेण च युक्तस्य रेफस्य एकारसहितोच्चारणं भवति । "अथाऽपरान्तस्थस्याऽयुक्तान्यहलः संयुक्तस्योष्मऋकारैरेकारसहितोच्चारणम्" (प्रतिज्ञापरिशिष्टम्,२.३) । एवञ्च " रलावृऌवर्णाभ्यामूष्मणि स्वरोदये सर्वत्र" ( वाजसनेयिप्रातिशाख्यम्,४.१७) द्वितीयान्तस्थस्य रेफस्य लकारस्य च अन्यहलायुक्तस्य शषसहकारैःऋकारेण च युक्तस्य शषसहेषु स्थितस्य रेफस्य एकारसहितोच्चारणं भवति । उदाहरणं यथा– गार्हपत्यः (शुक्लयजुर्वेद, ३.३९) वर्षवृद्धम् (शुक्लयजुर्वेद, १.१६) सहस्त्रशीर्षा (शुक्लयजुर्वेद, ३२.१) । इत्यत्र गारेहपत्यः,वरेषवृद्धम्, सहस्त्रशीरेषा इत्यादिरूपेण उच्चारणीयम् । लकारस्य यथा– शतवल्शा (शुक्लयजुर्वेद, ५.४३), इत्यत्र शतवलेशा, उपवल्हामसि (शुक्लयजुर्वेद, २३.५१), उपवलेहामसि इत्यादिरूपेणैवोच्चारणीयम् । करिणी, कुर्विणी, हरिणी, हरिता, हंसपदा इत्यादीनां पञ्चविधानां स्वरभक्तीनां वर्णनं याज्ञवल्क्यशिक्षायां विद्यते । यथा – "देवम्बर्हिश्च करणी उपबल्हेति कुर्विणी । हरिणी दर्शतमिति शतबल्शेति हारिता । व्यर्षो व्यर्षीयसीत्याहुस्तथा हंसपदेति च " (याज्ञवल्क्यशिक्षा, २.१५–१६) इति । स्वरोदये किम्? दिवो वर्ष्मन् (शुक्लयजुर्वेद, २८.१), अश्रुभिर्ह्रादुनिः (शुक्लयजुर्वेद, २५.९) इत्यादिस्थलेषु एकाररहितोच्चारणं कर्तव्यम् ।

ऋकारस्य तु अविशेषेणैव सर्वत्रैव एकारसहितोच्चारणं भवति । "ऋकारस्य तु संयुक्ताऽसंयुक्तस्याऽवशेषेण सवर्वत्रैम् (प्रतिज्ञापरिशिष्टम्,२.५) इति । ऋकारस्य आदिमध्याऽवसानेषु एकारसहितोच्चारणं भवति । एकारोच्चारणतोऽल्पमेव उक्तञ्च याज्ञवल्क्यशिक्षायाम् –

"अधर्मात्रास्वरं किञ्चित् पृथङ्गूनविमोच्चरन् । ऋकारे च ऌकारे च हृत्कण्ठमनसापि च" इति । एष नियमः ऋकारे ऌकारे रेफे च विज्ञेयः । एकारोच्चारणं तु न द्विमात्रिकमिति ।

## वकारस्योच्चारणम्

पदादिस्थस्य वकारस्य द्वित्तोच्चारणं भवति । पदमध्यस्य लघूच्चारणम्, पदान्तस्य लघुतरोच्चारणं भवति । " अथाऽन्तस्थस्याऽन्तस्थानां पदादिमध्यान्तस्थस्य त्रिविधं गुरुमध्यमलघुवृत्तिभिरुच्चारणम्" (प्रतिज्ञापरिशिष्टम्,२.६) इति । याज्ञवल्क्येनापि वकारस्य त्रयो भेदा निरूपिताः, यथा– वकारस्त्रिविधःप्रोक्तो गुरुर्लघुर्लघूतरः । आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतरः" (याज्ञवल्क्यशिक्षा,२.५३) । सुस्पृष्टो वकारो गुरुः, ईषत् स्पृष्टो वकारो लघु, ईषत् स्पृष्टतरो लघुतरो वकारो भवति । गुरुर्लघुर्लघूतरा वकारा गुरुमध्यमलघुवृत्तिभिः क्रमश उच्चार्याः । पदाद्यस्य उदाहरणं यथा– वेदोऽ सि (शुक्लयजुर्वेद, २.२१), इत्यत्र व्वेदोऽसि इत्यादिरूपेण लिख्यते । वसुभ्यस्त्त्वा, एतस्योल्लेखनं व्वसुभ्यस्त्त्वा (शुक्लयजुर्वेद,२.१६), वसोः पवित्रम् , इत्यस्य व्वसोः पवित्रम् (शुक्लयजुर्वेद,१.२), एतादृशानां पदादिस्थानां वकाराणां द्वित्तोच्चारणं भवति, द्विर्लेखनं च कुर्वन्ति सम्प्रदायविदः । " वकारस्य द्विर्वकारत्वेन द्वित्ववकारत्वेन वोल्लेखनं कुर्वन्ति । किन्तु तादृशानामुल्लेखो भ्रमजनको वर्तते" ( कौण्डिन्न्यानः, २०७५पृ.१०१) इति । परन्तु कौण्डिन्न्यानाः एतादृशोच्चारणं लेखनञ्च अशुद्धमामनन्ति । कालविलम्बप्रदर्शनार्थं वकारद्वयं लिखन्ति सम्प्रदायविदः (झा, २०१४ इ., पृ.११९) इति याज्ञवल्क्यशिक्षायाः व्याख्यायाम् । पदमध्यस्थस्य वकारस्योदाहरणं यथा–देवस्यत्वा (शुक्लयजुर्वेद १.१०), सवितुः (शुक्लयजुर्वेद, १.१०), सविता (शुक्लयजुर्वेद, १.१), पयस्वती (शुक्लयजुर्वेद, १.२७), इत्यादीनि पदमध्यस्थानि । एतेषां पदमध्यस्थ– वकाराणामुच्चारणं मध्यमप्रयत्नेन कर्तव्यम् । अत्र वकारद्वयं नैव निर्दिष्टम् , तस्मात् लघूच्चारणम् । पदान्तस्तु

सन्धिज एव वकारो बोध्यः । स्वतन्त्ररूपेण पदान्तस्य वकारस्य लेखनं नैव प्राप्यते । उक्तञ्च याज्ञवल्क्यशिक्षायाम्– "सन्धिजौ च पदान्तीयावुपसर्गपरौ लघू । अथ मा–स–नशब्देभ्यो विभाषाऽम्रेडिते यवौ" (याज्ञवल्क्यशिक्षा,२.५४) इति । उदाहरणानि यथा– दधात्वस्मान् (शुक्लयजुर्वेद, २.१०), दधातु+अस्मान्=दधात्वस्मान् । द्रु +अन्नः=द्रन्नः (शुक्लयजुर्वेद, ११.७०), कृशानो +एते= कृशानवेते (शुक्लयजुर्वेद, ४.२७), विष्णो+एते= विष्णवेते (शुक्लयजुर्वेद,५.१६) इत्यादीनि उदाहरणानि । संहितायां यो वकारो लघु पदकाले तु गुरुर्भवति यथा– यावाङ्कशा= या । व्वाम् । कशा (शुक्लयजुर्वेद,७.११), । अनुवीरैः= अनु । व्वीरैः (शुक्लयजुर्वेद,२६.१९), देवोवः= देवः । व्वः । (शुक्लयजुर्वेद, ४.२७) इत्यादीनि विज्ञातव्यानि । शुक्लयजुर्वेदस्य माध्यन्दिनीयशाखायाः शतपथब्राह्मणेऽपि वकारस्योच्चारणं लेखनं संहितावदेव भवति ।

## षकारस्य खकारोच्चारणम्

टवर्गीयवर्णं विहायान्येन व्यञ्जनेन सह संयुक्तस्यापि षवर्णस्य शुक्लयजुर्वेदस्य माध्यन्दिनीयसंहितायां षकारस्य खकारोच्चारणं सर्वत्रैव भवति । परन्तु टवर्गेण युक्तस्य संयुक्तस्य षकारस्य खकारोच्चारणं न कर्तव्यम् । टवर्गीयवर्णं विहायान्यवर्णेषु संयुक्तस्यापि खकारोच्चारणं भवति । " अथ मूर्धन्योष्मणोऽ संयुक्तस्य टुमृते संयुक्तस्य च खकारोच्चारणं" (प्रतिज्ञापरिशिष्टम्,२.७) इति । खकारस्योच्चारणमसंयुक्तस्योदाहरणं यथा– इषेत्वोर्जेत्त्वा (शुक्लयजुर्वेद, १.१), सहस्रशीर्षा (शुक्लयजुर्वेद, ३२.१), यामिषु (शुक्लयजुर्वेद, १६.३),अग्नीषोमाभ्यान्त्वा (शुक्लयजुर्वेद, १.१) इत्यादिषु असंयुक्तेषु विभिन्नस्थानेषु खकारस्योच्चारणं भवति । संयुक्तेऽपि षकारस्य खकारस्योच्चारणं यथा– शमीष्व (शुक्लयजुर्वेद, १.१५), व्रतञ्चरिष्यामि (शुक्लयजुर्वेद, १.५), युष्माः(शुक्लयजुर्वेद १.१३) इत्यादिषु विभिन्नस्थानेषु संयुक्तस्यपि खकारोच्चारणं भवति । परन्तु टवर्गीयव्यञ्जनैर्युक्तस्य संयुक्तस्य (ष्)कारस्य षकारोच्चारणं भवति । उदाहरणं यथा– प्रत्त्युष्टꣳ रक्ष (शुक्लयजुर्वेद, १.७),श्रेष्ठतमाय कर्मणे (शुक्लयजुर्वेद, १.१), पूष्णो हस्ताभ्याम् (शुक्लयजुर्वेद, १.१०), कृष्णोऽस्याखरेष्ठः (शुक्लयजुर्वेद, १.१) । उक्तञ्च केशवीयशिक्षायाम्–"असंयुक्तस्य मूर्धन्योष्मणः खकारस्योच्चारणं मतम् । टुमृते संयुक्तस्यापि कस्य योगे ष एव हि " (केशवीयशिक्षा, १४) इति । केशवीय शिक्षानुसारेण ककारस्य योगेऽपि षकारस्य खकारोच्चारणं न भवति । एतस्य प्रयेगः प्राचीनकाले आसीदित संप्रदायविद्भिरेव ज्ञातुं शक्यते । परन्तु अधुना ककारस्य संयोगे न षकारस्योच्चारणं कुर्वन्ति माध्यन्दिनाः ।

## अनुस्वारस्य गुँ गूँ(ꣳ)इत्युच्चारणम्

शषसहरेफेषु परेषु अनुस्वारस्य स्थाने गुँ (ꣳ) इत्यादेशो भवति । " अथाऽनुस्वारस्य गुँ इत्यादेशः शषसहरेफेषु" (प्रतिज्ञापरिशिष्टम्,३.१) इति । शुक्लयजुर्वेदस्य माध्यन्दिनीयशाखायां शषसहरेफेषु परभूतेषु पदान्तस्य अनुस्वारस्य गुँ (ꣳ)इत्युच्चारणं भवति । गुँ इत्यस्य ह्रस्वदीर्घभेदेन द्विविधोच्चारणं लेखनञ्च क्रियते । ह्रस्व गुँ (ꣳ) इत्यनेन चिह्नेन, दीर्घश्च गूँ (ꣳ) इत्यनेन अङ्क्यते । यद्यपि अनुस्वारस्य त्रयो भेदाः प्रदर्शितास्तथापि तेषां गुँ इत्युच्चारणं तु द्विविधमेव । "तस्य त्रैविध्यमाख्यातं ह्रस्व–दीर्घ–गुरुभेदैर्दीर्घात् परो ह्रस्वो ह्रस्वात् परो दीर्घो गुरौ परे गुरुः" (प्रतिज्ञापरिशिष्टम्,३.२) । अत्रानुस्वरस्य ह्रस्वदीर्घगुरुभेदात् त्रिप्रकारकत्वं प्रदर्शितम् ।


ISSN : 2249-538X

## ह्रस्व (ㆁ) इत्यस्य विधानम्

दीर्घात् परो योऽनुस्वारः सः ह्रस्वः (ㆁ) गुँ इत्यनेन चिह्नेन विज्ञायते । एतस्य उच्चारणं ह्रस्वो भवति । यथा– देवानां सुमतौ इत्यत्र दीर्घात् परोऽनुस्वारो ह्रस्वो भवति देवानाㆁ सुमतौ (शुक्लयजुर्वेद, ८.१५०) इति । ह्रस्व गुँ (ㆁ) इत्यस्य उदाहरणम्– पशूना ㆁहविः(शुक्लयजुर्वेद, १९.९५), यजूㆁ षि (शुक्लयजुर्वेद, १२.४), रक्षा ㆁसि (शुक्लयजुर्वेद, २.२९) इत्यादिषु अनेकेषु स्थानेषु शषसहरेफेषु परेषु दीर्घात् स्वरात् परस्थितोऽनुस्वारस्य ह्रस्व (ㆁ)इत्यादेशो भवति । संयुक्ताक्षरात् परत्रस्यानुस्वारस्य दीर्घात् परो दीर्घः, ह्रस्वात् परे ह्रस्व एव भवति । यथा– सूर्य ㆁस्वाहा (शुक्लयजुर्वेद, ७.४१), व्वर्द्धमानㆁ स्वेदमे (शुक्लयजुर्वेद, ३.२३), सि ㆁह्यसि (शुक्लयजुर्वेद, ७.४१) । एषु स्थानेषु ह्रस्वात् परत्रस्यानुस्वारस्य ह्रस्व एव गुँ इत्युच्चारणं कर्तव्यम् ।

## दीर्घ गूँ (꣡)इत्यस्य विधानम्

शषसहरेफेषु परभूतेषु ह्रस्वात् परस्याऽनुस्वारस्य दीर्घ गूँ (꣡)इत्यादेशो भवति । उदाहरणं यथा– गणपतिं꣡ हवामहे , गणपतिं हवामहे इति स्थितौ पदान्तस्थस्यानुस्वारस्य दीर्घ ꣡ इत्यादेशः सञ्जातस्ततो यथा– गणपति꣡ हवामहे (शुक्लयजुर्वेद, २३.१९) । दीर्घ गूँ इत्यस्य सङ्केतः (꣡)वा (ठँ) एवं प्रकारेण सूचितो भवति, उदाहरणम् यथा – माहि ꣡सीत् (शुक्लयजुर्वेद, १.२२), स ꣡शितम्मे(शुक्लयजुर्वेद, ११.८१), सुलोक꣡ सुकृतम् (शुक्लयजुर्वेद, ११.२२), अग्नि ꣡सधस्थे (शुक्लयजुर्वेद, ११.१८), देवाना ꣡ हृदये (शुक्लयजुर्वेद, १६.४६) इत्यादीनि अन्यान्यपि उदाहरणानि विज्ञातव्यानि । देवाना꣡ हृदये इत्यत्र दीर्घात् परेऽपि दीर्घ एव भवति यतो हि उत्तरत्र ऋवर्णादिसंयोगवर्णत्वात् । संयोगवर्णपरे तु दीर्घात् परे दीर्घः, ह्रस्वात् परे ह्रस्व एव गूँ (꣡)इत्यादेशो भवति यद्यपि संयुक्ताक्षरपरत्वे तु शास्त्रकाराणां मतैक्यं नावलोक्यते । याज्ञवल्क्यस्तु – "अनुस्वारस्योपरिष्टात् संयोगो यत्र दृश्यते । ह्रस्वं तं तु विजानीयात् सㆁस्थामितदर्शनम् " (याज्ञवल्क्यशिक्षा,२.४३) । एवञ्च अपवादरूपेणानुस्वारस्य द्वित्रिमात्रकमिप व्यवस्थापनं दृश्यते यथा– अनुस्वारो द्विमात्रःस्याद्वर्णव्यञ्जनादिगः । ह्रस्वाद्वा यदि वा दीर्घात् देवानाㆁ हृदये यथा (याज्ञवल्क्यशिक्षा,२.४४ ) ह्रस्वात् दीर्घाद्वा परत्र स्थितस्यानुस्वारस्य संयुक्ताक्षरे परे तु ह्रस्व एव इति प्रथम नियमः । कुत्रचित् दीर्घात् परे दीर्घ एव द्वितीयनियमो दृश्यते । तस्मात् माध्यन्दिनीयसंहितायां द्वावेव प्रयोगः प्राप्यते । एवं रीत्या माध्यन्दिनीयाः मन्त्रोच्चारणवेलायां स्वशाखानिर्दिष्टिनियमानां पालनपूर्वकं मन्त्रोच्चारणं प्रकुर्वन्ति ।

## ज्ञवर्णोच्चारणम्

प्रसङ्गात् प्राप्तस्य ज्ञकारस्योच्चारणं देशभेदात् सम्प्रदायविदः कथमुच्चारयन्तीत्यपि विचारणीयम् । यतो हि जञोर्संयोगे 'ज्ञ' इति भवति । एतस्योच्चारणं उत्तरभारतीयाः 'ज् ञ्ये' इति कुर्वन्ति । परं दाक्षिणातीत्या अन्ये च द्न्य इति उच्चारयन्ति । केचन 'ग्ये' इत्यिप उच्चारयन्ति । एतस्योच्चारणं वैदिकपरम्परानुयायिनो दाक्षिणात्याः द्न्य इति उच्चारयन्ति । तस्यैवाधिकः प्रभावो वैदिकसम्प्रदायानामुच्चारणेषु प्राप्यते । ये खलु उत्तरभारतीयाः सर्युपारिनः 'ज् ञ्ये' इत्युच्चारयन्ति वैयाकरणदृष्ध्या सोऽपि समिचीनमेव । एतस्योच्चारणं स्थनभेदतः पृथक् पृथगेव दृश्यते । एतस्योल्लेखो वेदवेदाङ्गोपाङ्गविमर्शनामके पुस्तके कौण्डिन्न्यायनेनापि कृतो दृश्यते (कौण्डिन्न्यायन,२०७९,पृ.३५६) एतस्योच्चारणं कथं सम्पादनीयमिति प्रतिज्ञादिसूत्रे न प्राप्यते । परन्तु सम्प्रदायप्रबोधिनिशिक्षायामेवं प्राप्यते "जञोर्ज्ञ इति वर्णस्य प्रयोगो भिद्यते श्रुतौ । गौडाचार्या जञौ स्पष्टं विश्लिष्य ब्रुवते परम् । महाराष्ट्रा दन्त्यमूलपीडनाद् ग्न्यमिवाक्षरम् । ग्य–

द्न्येत्यादिश्रुतिर्वेदसम्प्रदाये न विद्यते" (सम्प्रदायप्रबोधिनिशिक्षा,१०३–१०४) इति । एवं प्रकारेण ज्ञकारस्योच्चारणस्य परम्परा शास्त्रीयविधिश्च निगदितः ।

## निष्कर्षः

वेदमन्त्राणां विशुद्धोच्चारणाय एव शिक्षादिग्रन्था ऋषिभिः प्रणिताः । उच्चारणविधिपरिज्ञानं विना वेदमन्त्राणामुच्चारणं कर्तुं न शक्यते । चतुर्णां वेदानामुच्चारणशैली, शिक्षणपद्धतिश्च भिन्ना भिन्ना एव विधीयते । न केवलामुच्चारणशैली अपि तु हस्तादिभिः प्रदर्श्यमाना स्वरप्रक्रिया अपि भिन्ना भिन्ना एव सन्ति । अतोऽत्र माध्यन्दिनीयानां स्वरवर्णोच्चारणधर्माणां विवेचनं सप्रमाणं विहितम् । वेदाध्ययने वेदपाठे च स्वरस्य महत्त्वपूर्णस्थानं विद्यते । अत्र स्पष्टत उदात्तानुदात्तस्वरितेषु स्वरेषु हस्तचालनविधिर्निरूपितः । स्वरितस्यापि अष्टौ भेदाश्च चर्चिताः । यकारस्य जकारोच्चारणं कुत्र कर्तव्यम्? षकारस्य खकारोच्चारणं कुत्र भवति ? अनुस्वारस्य गुं इत्यादेशः कुत्र भवति, कस्यामवस्थायाञ्च भवति इत्यस्य समग्रपक्षस्य विषये सूक्ष्मरीत्या अत्र विचारितम् । ह्रस्व (गुँ)ॅइत्यस्य दीर्घ गूँ (ॅ)इत्यस्य च उच्चारणविधानं सम्यक् निरूपितम् । अन्ते समग्रस्य स्वरादिनियमस्य प्रदर्शनं सोदाहरणं चायं लेखः सुव्यवस्थितो विद्यत इति निष्कर्षः ।

अन्ते अस्य लेखस्य समीक्षकेभ्यो हार्दं कृतज्ञतामभिव्यज्य इदानीं विरमामि ।

## सन्दर्भग्रन्थसूची


- ईशादि नौ उपनिषद् (२०७६), ईश, केन, कठ., प्रश्नो, मुण्डको, माण्डूक्यो. ऐतरेयो., तैत्तिरीयो. श्वेताश्वरोपनिषद्), गोरखपुर : गीताप्रेस ।
- कौण्डिन्न्यायनः, आमोदः (२०७९), वेदवेदाङ्गोपाङ्गविमर्श, काठमाडौँ : भुँडीपुराण प्रकाशन ।
- चतुर्वेदी, राममूर्तिः (२०६०), वैदिकशिक्षास्वरूपविमर्शः, वाराणसी : सम्पूर्णानन्द–संस्कृत– विश्वविद्यालयः ।
- पाणिनि (२०५०). पाणिनीयशिक्षा, उज्जैन : श्रीनिवासरथ कालिदासः अकादेमी निदेशकः ।
- प्रतिज्ञापरिशिष्टम् (२०४५), कुबेरनाथ पाठक, (सम्पा.), वाराणसी : सम्पूर्णानन्द–संस्कृत– विश्वविद्यालयः ।
- प्रतिज्ञासूत्रम् (२०७२), आमोदवर्धन कोण्डिन्न्यायन, (सम्पा.व्या.), काठमाडौँ : भुँडीपुराण प्रकासन ।
- मनुः (२००७ इ.).मनुस्मृतिः, शिवराज आचार्य कौण्डिन्न्यायनः, (अनु.), वाराणसी : चौखम्बा विद्याभवनम् ।
- याज्ञवल्क्यः (२०१४ इ.), याज्ञवल्क्यशिक्षा, नरेश झा, (व्या.), वाराणसी : चौखम्बा सुरभारती प्रकाशनम् ।
- व्यासशिक्षा (१९७८इ.). पट्टाभिरामशास्त्री, (सम्पा.), वाराणासी : वेदमीमांसानुसन्धानकेन्द्रम् ।
- शिक्षासंग्रहः (१९८९इ.) , रामप्रसाद त्रिपाठी, (सम्पा.), वाराणसी : सम्पूर्णानन्द–संस्कृत– विश्वविद्यालयः ।
- शुक्लयजुर्वेदसंहिता (१९८८इ.), वेणीरामशर्मा गौड , (सम्पा.), वाराणसी : चौखम्बा ओरियान्टालिया ।
- शौनक, (१९८६ इ), ऋग्वेदप्रातिशाख्यम्, वी.के. वर्मा सम्पा., (द्वि.सं.), दिल्ली : चौखम्बा संस्कृत प्रतिष्ठानम् ।
- शर्मा, श्रीराम (२०४६), ज्योत्स्नावृत्तिः, सम्प्रदायप्रबोधिनिशिक्षा, सहितमम्, वाराणसी : सम्पूर्णानन्द–संस्कृत– विश्वविद्यालयः ।
- सायणः (१९९१), ऋग्वेदभाष्यभूमिका, जगन्नाथ पाठक, (व्या.), वाराणसी : चौखम्बा विद्याभवनम्


 ISSN : 2249-538X

# धर्मलक्षणं तल्लक्ष्यं च

डा. एस्. वेङ्कटेशताताचारयः*
सहाचार्यः(सं), के.सं.वि., रा. गा. परिसरः
श्रृङ्गेरी

पूर्वमीमांसायां धर्मो विचारितः । तथाच तस्या आद्यं सूत्रम् – "अथातो धर्मजिज्ञासा"[1] इति । तस्य च धर्मस्य किं लक्षणं प्रमाणं चेति इदं द्वयं शब्दतः अर्थतश्च उक्तं महर्षिणा जैमिनिना एव – "चोदनालक्षणोऽर्थो धर्मः"[2] इति । एवं सूत्रकारेणैव धर्मलक्षणे कथितेऽपि तद्व्याख्यायां मतभेदात् धर्मलक्षणलक्ष्यविषये मतभेदाच्च धर्मलक्षणे मतभेदो दृश्यते । अतः धर्मस्य निर्दुष्टं लक्षणं किं स्यादिति चिन्त्यते ।

## भाष्यकारमतम्

धर्मलक्षणसूत्रस्थस्य चोदनापदस्य विधिवाक्यमर्थः । तदुक्तं भाष्ये – "चोदनेति क्रियायाः प्रवर्तकं वचनमाहुरि"[3]ति । लक्ष्यते ज्ञायते अनेनेति व्युत्पत्त्या लक्षणपदं प्रमाणपरम् । तथाच विधिप्रमाणकोऽर्थः धर्मः इति सूत्रार्थः पर्यवस्यति । ज्योतिष्टोमादियागस्य "ज्योतिष्टोमेन स्वर्गकामो यजेते"त्यादिविधिप्रमाणकत्वात् तत्र लक्षणसमन्वयः । श्येनादौ अतिव्याप्तिवारणार्थमर्थपदमिति भाष्ये उक्तम् । तथाच भाष्यम् – [4]"उभयमिह चोदनया लक्ष्यतेऽर्थोऽनर्थश्चेति । कोऽर्थः ? यो निःश्रेयसाय ज्योतिष्टोमादिः । कोऽनर्थः ? यः प्रत्यवायाय श्येनो वज्र इषुरित्येवमादिः । तत्रानर्थो धर्म उक्तो मा भूदित्यर्थग्रहणम् । कथं पुनरसावनर्थः ? हिंसा हि सा, सा च प्रतिषिद्धेति । कथं पुनरनर्थः कर्तव्यतयोपदिश्यते ? उच्यते, नैव श्येनादयः कर्तव्या विज्ञायन्ते । यो हि हिंसितुमिच्छेत् तस्यायमभ्युपाय इति हि तेषामुपदेशः । "श्येनेनाभिचरन् यजेत" इति हि समामनन्ति, न 'अभिचरितव्यमि'ति" इति ।

अनेन भाष्येण "यः प्रत्यवायं विना इष्टं साधयति सः सौत्रेण अर्थपदेन ग्राह्यः" इति भाष्यकाराभिप्रायः ज्ञायते । प्रत्यवायप्रयोजके श्येनादौ अतिव्याप्तिवारणाय अर्थपदम् । निषिद्धा हि क्रिया प्रत्यवायसाधनम् । "न हिंस्यात् सर्वा भूतानी"[5]ति हिंसा निषिद्धा । श्येनफलभूतः वैरिमरणानुकूलव्यापारात्मकोऽभिचारश्च हिंसाविशेषः । अतः तस्य निषिद्धत्वात् प्रत्यवायसाधनत्वम् । एवं श्येनयागस्य निषेधाभावेऽपि तत्फलस्य अभिचारस्य निषिद्धत्वेन प्रत्यवायसाधनत्वेन श्येनस्य प्रत्यवायप्रयोजकत्वात् अर्थपदेन तद्व्यावृत्तिः ।

श्लोकवार्तिके पूर्वोद्धृतभाष्यपङ्क्तिषु पूर्वापरविरोधशङ्कामुद्भाव्य कथञ्चित्प्रकारद्वयेन तत्परिहारमुक्त्वा "अतः स्वतो न धर्मत्वं श्येनादेर्नाप्यधर्मता"[6] इति भाष्याभिप्रायः व्याख्यातः ।

## धर्माधर्मशब्दार्थविषये वार्तिकाभिप्रायः

ततः

"यदि येनेष्टसिद्धिः स्यादनिष्टाननुबन्धिनी । तस्य धर्मत्वमुच्येत ततः श्येनादिवर्जनम् ॥
यदा तु चोदनगम्यः कार्याकार्यानपेक्षया । धर्मः प्रीतिनिमित्तं स्यात्तदा श्येनेऽपि धर्मता ॥
यदि त्वप्रीतिहेतुर्यः साक्षाद्व्यवहितोऽपि वा । सोऽधर्मः चोदनार्थः स्यात्तदा श्येनेऽप्यधर्मता ॥"[7] इति

श्लोकैः श्येनः धर्मो न वा, अधर्मो न वेत्यत्र लोकानुसारेण सम्प्रधारणं क्रियतां नात्र कस्मिंश्चित् पक्षे निर्भर इति कुमारिलभट्टैः स्वाभिप्रायः प्रकटितः ।

---

***सम्पर्कसूत्रम्** - 6360220273, Email- dr.srinivasa.venkatesha@csu.co.in

श्येनादेरपि लक्ष्यत्वपक्षे "यदा तु चोदनागम्यः" इत्यादिश्लोकोक्तरीत्या चोदनागम्यम् इष्टसाधनं धर्म इति लक्षण-माश्रयणीयम् । ततश्चास्मिन् पक्षे सूत्रस्थमर्थपदमिष्टसाधनं बोधयतीति व्यक्तं भवति । परन्तु यथाश्रुतसौत्रलक्षणस्वीकारे "ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः"[8] इत्यादिचोदनावगते इष्टसाधनभूते प्रजादिफले अतिव्याप्तिः । अतः चोदनावगतेष्टसाधनताको धर्म इति परिष्कारः कार्यः । प्रजादिफलस्य इष्टसाधनतायाः लोकसिद्धत्वेन न चोदनाबोधितत्वमिति नातिव्याप्तिः । चोदनाशब्दश्च वैदिकचोदनापरः । तेन "गामानये"त्यादिलौकिकप्रवर्तकवाक्यावगतेष्टसाधनताके गवान-यनादौ नातिव्याप्तिः । एवं चोदनाया वैदिकत्वविशेषणे आवश्यके चोदनानिवेशोऽपि नावश्यकः । लाघवात् "वेदबोधि-तेष्टसाधनताको धर्मः" इति लक्षणस्य सुवचत्वात् । इदमेव लक्षणं खण्डदेवाचार्येण भाट्टरहस्ये अभिहितम् । एवं "यदि त्वप्रीतिहेतुर्यः साक्षाद्व्यवहितोऽपि वा । सोऽधर्मः चोदनार्थः स्यात्तदा श्येनेऽप्यधर्मता ॥" इति वार्तिकानुरोधेन "वेदबोधि-तानिष्टसाधनताकोऽधर्मः" इति अधर्मलक्षणं वक्तव्यम् । अस्य ब्रह्महत्यादौ श्येनादौ च समन्वयः स्पष्टः । एतद्वार्तिकश्लोके चोदनाशब्दः विधिनिषेधसाधारणः ।

## धर्माधर्मशब्दार्थविषये खण्डदेवाचार्याभिप्रायः

भाट्टरहस्ये खण्डदेवाचार्येण श्येनादेः धर्मत्वमधर्मत्वं च स्वीकृतम् । "वैरिमरणकामो यजेते"तिवाक्यविहिते यागेऽपि धर्मत्वाधर्मत्वयोः समावेशोऽङ्गीकृतः । अयं हि यागः वैरिमृत्युफलकः न तु तदनुकूलव्यापारफलकः । अतः मरणानुकूलव्यापारनिषेधकेन "न हिंस्यात् सर्वा भूतानी"ति वाक्येन यागफलनिषेधो न संभवति । यागस्यैव मरणानुकूलव्यापारात्मकत्वेन निषेधस्तु वक्तुं न शक्यते । सामान्यनिषेधस्य विशेषविधिविषये अप्रवृत्तेः । अन्यथा अग्नीषोमीयपशुहिंसादेरपि निषिद्धत्वापत्तेः । एवं सति एतस्य यागस्य फलद्वारापि अनर्थत्वाभावेन धर्मत्वमेवास्तीति शिष्टानां तत्र निष्कम्पप्रवृत्त्यापत्तिः । तत्रैवं समाधानं भाट्टरहस्ये प्रतिपादितम् – "न हिंस्यादि"ति निषेधस्य अप्रवृत्तावपि "परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्"[9] इति निन्दोन्नीतनिषेधेन तस्य अनिष्टसाधनत्वस्यापि बोधनेन अधर्मत्वस्यापि सत्त्वेन शिष्टानां न तत्र निष्कम्पप्रवृत्तिरिति । अयं भावः – वैरिमरणकामो यजेत, श्येनेनाभिचरन् यजेतेत्यादिविधयो यथा निरवकाशाः, तथा परस्योत्सादनार्थत्वेन तामसत्वेन निन्दोन्नीतनिषेधोऽपि निरवकाश एव । अत्र च षोडशिग्रहणनिषेधवत् "एतदभावेऽपि क्रतुसाद्गुण्यरूपेष्टसिद्धिरि"त्याद्यर्थान्तरानुमापकतया निवृत्तिप्रयोजकत्वं वक्तुं न शक्यत इति अवश्यमेव अनिष्टसाधनत्वं कल्प्यमिति ।

परन्त्वेवं सति भाट्टदीपिकायां दशमाध्याये सामान्यनिषेधस्य विशेषविधिविषये अप्रवृत्तिरिति प्रतिपादकेऽधिकरणे (10.8.8) यदुक्तं "पापाजनकत्वव्याप्यं धर्मत्वमि"ति, तद्विरुध्यते । तत्रैवं समाधेयमिति प्रतीयते – एतादृशव्याप्तौ "न हि धर्माद्भवेत्किञ्चित् पापं नरकदं क्वचित्"[10], "न हि कल्याणकृत् कश्चिद्दुर्गतिं तात गच्छति"[11] इत्यादिस्मृत्यादिवच-नानि प्रमाणत्वेन उपन्यस्तानि । अत्र धर्मपदार्थे कल्याणपदार्थे वा सङ्कोचे प्रमाणाभावात् हिंसायुक्तपशुयागादिरूपो ध-र्मः, तद्रहितजपादिधर्मश्च नानिष्टसाधनमिति अर्थः स्वीकर्तव्यः । अतः एतादृशबाधकवशात् "न हिंस्यादि"ति निषेधः अग्नीषोमीयादौ न प्रवर्तते । तावता "न हिंस्यादि"ति निषेधस्य न वैयर्थ्यम्, लौकिकपशुहिंसादिनिवर्तकत्वेन चारिता-र्थ्यात् । परन्तु तामसत्वेन निन्दया उन्नीतो निषेधस्तु श्येनवैरिमरणार्थयागादौ न वारयितुं शक्यते । तस्य निषेधस्य धर्मे एव प्रवृत्त्या लौकिकक्रियानिवर्तकत्वेन चारितार्थ्यस्य वक्तुमशक्यत्वात् । यद्यपि "परस्योत्सादनार्थमि"ति वाक्यम् ताम-सतपःप्रतिपादकं, तथापि उपलक्षणविधया परोत्सादनार्थस्य यज्ञस्यापि तामसत्वं बोधयति । अतः गत्यन्तराभावात् "न हि धर्माद्भवेत्किञ्चित्पापमि"त्यादि वाक्येषु धर्मपदार्थे तामसातिरिक्तत्वेन सङ्कोचः कर्तव्यः । अतः "इत्याद्यसङ्कुचद्वृत्तिश्रु-

 ISSN : 2249-538X

तिस्मृतिपुराणेतिहासवशात् पापाजनकत्वव्याप्यं धर्मत्वम्" इति भाट्टदीपिकापङ्क्तौ असङ्कुचत्पदं धर्मपदवृत्तेः निरवकाशनिषेध(तामसत्वकथनोन्नीतनिषेध)प्रवृत्तिप्रयुक्तसङ्कोचातिरिक्तसङ्कोचाभावपरम् । इत्थं च प्रमाणानुरोधेन पापाजनकत्वव्याप्यम् अतामसधर्मत्वम् इति व्याप्तिः पर्यवस्यति । अतः भाट्टरहस्योक्तं श्येनादौ धर्मत्वाधर्मत्वसाङ्कर्यं सङ्गच्छते ।वस्तुतः "षड्वभिचरन्न पतेत्"[12] इति गौतमेन "अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते ह्याततायिनः ॥"[13] इति मनूक्तानां षण्णाम् आततायिनां वधार्थम् अभिचारस्य अभ्यनुज्ञातत्वात् तत्र निषेधस्य अप्रवृत्तेः नैव आततायिवधार्थाभिचारस्य अधर्मत्वम् । अतः आतताय्यतिरिक्तवधार्थे अभिचारे एव पूर्वोक्तधर्मत्वाधर्मत्वसाङ्कर्यं बोध्यम् ।

नन्वेवं वेदबोधितेष्टसाधनताकत्वस्य धर्मलक्षणत्वे "तरति शोकमात्मविदि"[14]ति वेदवाक्येन आत्मज्ञानस्य शोकतरणरूपमोक्षार्थत्वबोधनात् आत्मज्ञानस्य धर्मत्वापत्तिः । नचेष्टापत्तिरिति वाच्यम्, तथा सति उत्तरमीमांसाया अपि धर्म एव विषय इति तस्य पृथक्शास्त्रत्वानुपपत्तेः । वेदातिरिक्तप्रमाणाबोध्यवेदबोधितेष्टसाधनताकत्वमिति परिष्कारे तु यद्यपि आत्मज्ञाने नातिव्याप्तिः । तथाहि – मोक्षस्तावत् ब्रह्मविषयकसविलासाज्ञाननिवृत्तिरूपः । संसारदशायां ब्रह्मणः अज्ञानं भवति । अतः तद्विलास(तत्कार्य)रूपं घटपटादिज्ञानं जायते । यथा रज्जोरज्ञाने सर्पज्ञानं जायते । रज्जुज्ञाने च तदज्ञानं, तत्र सर्पज्ञानं च निवर्तते । एवं शुक्तिरजतादिस्थलेऽपि । एवम् अन्वयव्यतिरेकाभ्यां तज्ज्ञानं तदज्ञानस्य तदधिष्ठानकभ्रमरूपतद्विलासस्य च निवर्तकमिति सिद्धम् । एवं च आत्मज्ञानस्य आत्माज्ञानात्माधिष्ठानकघटपटादिभ्रमरूपसंसारनिवर्तकत्वं लोकतोऽपि (अन्वयव्यतिरेकाभ्याम्) सिद्धमिति तत्र वेदातिरिक्तप्रमाणबोध्यत्वेन तदबोध्यत्वाभावेन न तत्र धर्मलक्षणातिव्याप्तिः । तथापि अष्टकाश्राद्धादौ स्मृत्यनुमितवेदबोध्यत्वेऽपि स्मृतिबोध्यत्वस्यापि सत्त्वेन वेदातिरिक्तप्रमाणाबोध्यत्वाभावात् अव्याप्तिरिति चेन्न । वेदातिरिक्तप्रमाणेन स्वातन्त्र्येणाबोध्यत्वे सति वेदबोधितं यदिष्टसाधनत्वं तद्वत्त्वमिति धर्मलक्षणे परिष्कृते अव्याप्त्यभावात् । स्मृत्या अष्टकादौ न स्वातन्त्र्येण इष्टसाधनत्वं बोध्यते, किन्तु मूलभूतश्रुतिकल्पनाद्वारैवेति तत्र वेदातिरिक्तप्रमाणेन स्वातन्त्र्येण अबोध्यत्वमिति दलस्यापि सत्त्वात् ।

पूर्वोक्तं च मोक्षस्वरूपं जगन्मिथ्यात्ववादिनाम् अद्वैतवेदान्तिनां मते । यदा तु नैयायिकाद्युक्तरीत्या एकविंशतिदुःखध्वंसादिरूपो मोक्षः स्वीक्रियते, तदा तस्य आत्मज्ञानजन्यत्वस्य प्रमाणान्तरागम्यत्वेन पूर्वोक्तधर्मलक्षणस्य अतिव्याप्तिः स्यादेव । तद्वारणाय वेदबोधितेष्टसाधनताकत्वमित्यस्य स्थाने वैदिकविधिबोधितेष्टसाधनताकत्वमिति लक्षणं वक्तव्यम् । प्रवर्तनाविषयत्वेन लिङ्गेन यागादेरिष्टसाधनत्वमनुमीयत इति भाट्टरहस्यादौ उपपादितम् । अतः यागादेः विधिबोधितेष्टसाधनताकत्वं संभवति । आत्मज्ञानस्य तु तन्न संभवति । तस्य विधेयत्वाभावात् । प्रवर्तनाप्रयोज्यप्रवृत्तिविषयो हि विधेयः । ज्ञानस्य च प्रमाणवस्तु(विषय)परतन्त्रत्वेन प्रवर्तनाप्रयोज्यप्रवृत्तिविषयत्वाभावात् न विधेयत्वम् । विधिस्तावत् विधेयस्य इष्टसाधनत्वं गमयति । ज्ञानस्य तु पूर्वोक्तरीत्या अविधेयत्वेन न तस्य विधिना इष्टसाधनत्वं बोधयितुं शक्यते । अतो न तत्रातिव्याप्तिः । वस्तुतस्तु "अयं तु परमो धर्मो यद्योगेनात्मदर्शनमि"[15]ति महर्षिणा याज्ञवल्क्येन आत्मज्ञानस्य परमधर्मत्वस्य उक्तेः तस्यापि धर्मत्वमिष्टमेवेति न तत्रातिव्याप्तिवारणार्थं प्रयत्नः कार्यः । अतः वेदबोधितेष्टसाधनताकत्वमित्येव लक्षणं सम्यक् ।

न च याज्ञवल्क्यवचने दर्शनशब्दो ध्यानपरः । ध्यानं स्मृतिसंततिविशेषः । अतः न तद्वचनबलात् उत्तरमीमांसायां मोक्षसाधनत्वेन प्रतिपादितस्य आत्मसाक्षात्कारस्य धर्मत्वमङ्गीकार्यमिति वाच्यम् । दर्शनशब्दस्य साक्षात्कारवाचकस्य ध्याने लक्षणायां प्रमाणाभावात् । ननु दर्शनशब्दः न साक्षात्कारसामान्यवाचकः किन्तु चाक्षुषप्रत्यक्षस्यैव वाचकः । आत्मनि च चाक्षुषप्रत्यक्षासंभवेन दर्शनशब्दस्य लक्षणयैव अपरोक्षज्ञानसामान्यपरत्वं वाच्यमिति भवन्मतेऽपि दर्शनशब्दे लक्षणाङ्गीकारः तुल्य एवेति चेत् सत्यम् । तथापि स्मृतिरूपे ध्याने चित्तवृत्तिनिरोधरूपमुख्ययोगजन्यत्वासंभवेन

योगशब्दस्यापि लाक्षणिकोऽर्थः स्वीकार्यः स्यात् । नहि चित्तवृत्तिनिरोधे संस्काररूपचित्तवृत्ति(व्यापार)जन्यं ध्यानं संभवति । अतः योगशब्दस्य लक्षणया आत्मतद्गुणातिरिक्तविषयकचित्तवृत्तिनिरोधरूपोऽर्थः वक्तव्यः । एतादृशलक्षणायां प्रमाणाभावेन दर्शनशब्दस्य साक्षात्कारपरत्वाङ्गीकार एव युक्तः ।

न चैवं सति आत्मज्ञानस्यापि धर्मत्वे पूर्वोत्तरमीमांसयोः विषयभेदो न स्यादिति वाच्यम् । उपासनादिवत् आत्मज्ञानस्य धर्मत्वेऽपि आत्मनः (ब्रह्मणः) धर्मत्वाभावेन तत्प्रतिपादकस्य उत्तरमीमांसाशास्त्रस्य पूर्वमीमांसातः विषयभेदोपपत्तेः ।

ननु "यतो वा इमानि भूतानि जायन्ते"[16] इति वेदान्तवाक्येन ब्रह्मणः जगत्कारणत्वोक्त्या पुत्रपश्वादीष्टसाधनत्वं लभ्यत इति तस्यापि वेदबोधितेष्टसाधनताकत्वेन धर्मलक्षणस्य ब्रह्मण्यतिव्याप्तिरिति चेन्न । [17]वेदबोधितश्रेयस्त्वव्याप्य-धर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वस्य लक्षणत्वस्वीकारेण अतिव्याप्तिपरिहारात् । ब्रह्मणो हि कार्यमात्रकारण-त्वं वेदबोधितम् । तच्च कार्यत्वावच्छिन्नकार्यतानिरूपितकारणतारूपं साधारणकारणत्वम् । लक्षणे तु कार्यत्वातिरिक्तश्रेय-स्त्वव्याप्य(पुत्रत्वादिरूप)धर्मावच्छिन्नकार्यतानिरूपितकारणतारूपा असाधारणकारणता एव प्रवेशिता । सा च ब्रह्मणि नास्तीति नातिव्याप्तिः ।

अथवा कार्यतावच्छेदकनिवेशमकृत्वा पुरुषकृतिव्याप्यत्वमिति विशेषणदलं निवेश्यते । तथा च पुरुषकृतिव्याप्य-त्वे सति वेदवोधितेष्टसाधनताकत्वं धर्मलक्षणमिति लभ्यते । कृतिव्याप्यत्वं नाम कृतिविषयत्वम् । ब्रह्मणः सिद्धवस्तुत्वेन क्रियात्वाभावात् न पुरुषकृतिव्याप्यत्वमिति न तत्रातिव्याप्तिः । नचैवं [18]"दध्नेन्द्रियकामस्य जुहुयादि"त्यादिवाक्यैः इन्द्रि-यादीष्टसाधनत्वेन विहितत्वात् धर्मत्वेन अभिमतानां दध्यादिगुणानां क्रियात्वाभावेन पुरुषकृतिव्याप्यत्वाभावात् धर्मत्वं न स्यात् । एवमात्मज्ञानेऽपि अव्याप्तिरिति वाच्यम् । केवलदध्यादिगुणस्य पुरुषकृतिविषयत्वाभावेऽपि आश्रयीभूतक्रियावि-शिष्टस्य तस्य कृतिविषयत्वं भवत्येव । अत्र आश्रयः होमः, तद्विशिष्टो गुणः दधि, वैशिष्ट्यं करणत्वरूपम् । होमकरणीभूतं दधि कृतिव्याप्यमिति भावः । दध्नः पूर्वतः सत्त्वेऽपि दधिकरणकहोमानुकूलकृत्या हि दधि होमकरणीभूतं क्रियत इति आ-श्रयविशिष्टस्य दध्नः कृतिव्याप्यत्वोपपत्तिः । एवम् आत्मज्ञानानुकूलमनःप्रणिधानादेः कृतिव्याप्यत्वादेव आत्मज्ञानेऽपि मनःप्रणिधानादिरूपव्यापारविशिष्टे (जन्ये) कृतिव्याप्यत्वोपपत्तेः धर्मलक्षणसमन्वयः । एवं स्वरूपतः कृतिविषयत्वाभा-वेऽपि कृतिव्याप्यक्रियाविशिष्टत्वेन परंपरया कृतिविषयत्वादेव "आत्मा वा अरे द्रष्टव्य"[19] इति दर्शनविधायकतव्यप्रत्ययो-पपत्तिः । अङ्गीकृतं हि परम्परया कृतिव्याप्यस्यापि विधानं शास्त्रे । यथा भक्षपेटिकायां "हिन्व मे गात्रा हरिवो गणान्मे मा वितीतृषः । शिवो मे सप्तर्षीनुपतिष्ठस्व मा मेऽवाङ्नाभिमतिगाः"[20] इति मन्त्रस्य सम्यग्जरणरूपार्थप्रकाशनसामर्थ्यरूपलि-ङ्गेन कल्पितया "अनेन मन्त्रेण सम्यग्जरणं कुर्यात्" इति मन्त्रविशिष्टसम्यग्जरणविधायिकया श्रुत्या आसनविशेषविशिष्ट-सम्यग्जरणविधानम् । एवंरीत्या आत्मज्ञानादौ परम्परया कृतिव्याप्यत्वमादाय लक्षणोपपादनं क्लिष्टमिति यदि विभाव्यते, तर्हि ब्रह्मणि अतिव्याप्तिवारणाय पूर्वोक्तासाधारणकारणताप्रवेश एव लक्षणे अस्तु ।

इदं लक्षणमेव धर्मशब्दप्रवृत्तिनिमित्तम् । तस्य च यागादाविव तज्जन्यापूर्वेऽपि समानतया सत्त्वात् उभयोरपि धर्मशब्दवाच्यत्वमिति भाट्टरहस्ये उक्तम् । मम तु प्रतीयते – लौकिका धर्मशब्दात् यदाकारेण यागाद्यर्थं प्रतियन्ति, स एवाकारः प्रवृत्तिनिमित्तत्वेन स्वीकर्तुमुचितः । न हि लौकिकानां धर्मशब्दाद् यागादिबोधः वेदबोधितपूर्वोक्तकारणताविशेषप्रकारकः, किन्तु लौकिकप्रमाणानवगम्येष्टसाधनताप्रकारकः । अत एव चैत्यवन्दनादौ बौद्धादीनां धर्मशब्दप्रयोगो मुख्य एवेति उपपद्यते । अन्यथा वेदघटितपूर्वोक्तलक्षणरूपप्रवृत्तिनिमित्तस्वीकारे तत्र लक्षणा गौणी वा आपद्येत । यद्यपि अस्मत्सिद्धान्तरीत्या तत्र इष्टसाधनत्वे प्रमाणाभावेन इष्टसाधनत्वाभावात् भ्रान्त्यैव प्रयोगः,

 ISSN : 2249-538X

तथापि न लाक्षणिकः । न हि दुष्टेऽपि जने उपकारकत्वभ्रमेण साधुशब्दप्रयोगः लाक्षणिकः किन्तु मुख्य एव । अपूर्वे तु पूर्वोक्तेष्टसाधनतासत्त्वेऽपि लौकिकानां धर्मिज्ञानाभावात् न तत्र ते धर्मशब्दं प्रयुञ्जते । शास्त्रज्ञानां धर्मिज्ञानसंभवात् तत्र प्रवृत्तिनिमित्तसत्त्वाच्च मुख्यवृत्त्या धर्मशब्दप्रयोगः उपपद्यते इति ।

## निष्कर्षः

तथा च अयं निष्कर्षः फलति – वेदबोधितश्रेयस्त्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वं धर्मस्य लक्षणम् । एवं वेदबोधितानिष्टत्वतद्व्याप्यधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वम् अधर्मस्य लक्षणम् । ज्योतिष्टोमादिः धर्मः, कलञ्जभक्षणादिः अधर्मः । आततायिवधार्थश्येनादिः धर्मः, तदतिरिक्तवधार्थश्येनादिः धर्माधर्मोभयरूपः इति ।

## उद्धरणसूची/टिप्पणी

1. जैमिनिसूत्रम् (1.1.1)
2. जैमिनिसूत्रम् (1.1.2)
3. शाबरभाष्यम् (1.1.2)
4. शाबरभाष्यम् (1.1.2)
5. भाट्टरहस्ये धर्मलक्षणविचारे उद्धृतम्
6. मीमांसाश्लोकवार्तिकम् चोदनासूत्रम् 266
7. मीमांसाश्लोकवार्तिकम् चोदनासूत्रम् 270-272
8. मैत्रायणी संहिता (2.1.1)
9. भगवद्गीता (17.19)
10. देवीभागवतम् (6.16.36)
11. भगवद्गीता (6.40)
12. गौतमधर्मसूत्रम् (21.11)
13. मनुस्मृतिः (8.352)
14. छान्दोग्योपनिषत् (7.1.3)
15. याज्ञवल्क्यस्मृतिः (1.8)
16. तैत्तिरीयोपनिषत् भृगुवल्ली प्रथमोऽनुवाकः

17. यद्यपि भाट्टरहस्ये ब्रह्मणः वेदबोधितश्रेयस्त्वावच्छिन्नसाधनत्वाभावेन धर्मत्वाभावात् धर्ममीमांसातः ब्रह्ममीमांसाया भेदोपपत्तिरित्युक्तम्, अनेन च वेदबोधितश्रेयस्त्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वम् इति धर्मलक्षणं ग्रन्थकृदभिप्रेतमिति प्रतीयते । परन्तु ऐन्द्राग्नादियागेषु इदं लक्षणमव्याप्तम् । तस्य "ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम" इति वाक्येन प्रजारूपश्रेयोविशेषं प्रत्येव कारणता बोध्यते, न तु श्रेयस्त्वावच्छिन्नं प्रति । अतः उक्तभाट्टरहस्यपङ्क्तौ श्रेयस्त्वपदस्य श्रेयस्त्वव्याप्यपरत्वं बोध्यम् ।
18. तैत्तिरीयब्राह्मणम् (2.1.5)
19. बृहदारण्यकोपनिषत् (2.4.5)
20. तैत्तिरीयसंहिता (3.2.5)

# आध्यात्मिकशिक्षाग्रन्थेषु प्रतिपादितमनोदुःखपरिहारोपायानाम् अध्ययनम्

डा. दयानिधि शर्मा*
सहायकाचार्यः, के.सं.वि., रा.गा.परिसरः
शृङ्गेरी

***लेखसारः*** *– अनिश्चिते संसारे अद्यत्वे बहवः जनाः विविधसमस्याग्रस्ताः दृश्यन्ते । केचन परपीडिताः केचन आत्मपीडिताश्च वर्तन्ते । जीवने अपूर्णाः अभिलाषाः मानसिकम् अनारोग्यं भावात्मकम् असन्तुलनं प्रति च नयन्ति । सर्वं शीघ्रं प्राप्तुं जनानां छात्राणां च महती त्वरा सम्प्रति सर्वत्र अवलोक्यते । मानवसमाजे सम्बन्धानां निर्वहणे अस्मिन् आधुनिकयुगे नित्यं वर्धमानाः क्लेशाः सर्पवत् विषप्रहारं कुर्वन्तः सन्ति । तत्रापि अधीरं मनस्तु एकक्षणाभ्यन्तरे स्वर्गसुखं करतले कर्तुं विलपति । कार्यक्षेत्रेषु अध्ययनक्षेत्रेषु च प्रतिस्पर्धाभिः मनस्तापः वर्धते । एतस्यां परिस्थितौ यथा शीतांशुः सन्तापं शमयति तथा आध्यात्मिकशिक्षायाः ग्रन्थाः ध्यानेन, समाधिना, मुक्त्या, प्रार्थनया भक्त्या, अनासक्त्या च महान्ति कष्टानि अपहर्तुं मार्गं सङ्केतयन्ति ।*

***कूटशब्दाः*** *– आध्यात्मिकता, तन्यताप्रबन्धनं, भावात्मकं सन्तुलनम्, आधुनिकी जीवनशैली, भक्तिः ।*

## शोधपत्रस्य आधारः समस्याकथनं (Statement of Problem) वा

अस्मिन् शोधलेखे आध्यात्मिकशिक्षाग्रन्थेषु प्रतिपादितमनोदुःखपरिहारोपायानाम् अध्ययनं कृतमस्ति । अध्ययने मनस्तापः कथं भवति? तस्य कारणानि कानि? दुःखं कथमुत्पद्यते? दुःखं शमयितुं तात्कालिकाः उपायाः के वर्तन्ते? तस्य परिहारः कः? एते अंशाः आधाररूपेण स्वीकृताः सन्ति । एतेषां परिहारोपायानां स्रोतांसि कस्मिन् आध्यात्मिकग्रन्थे, कुत्र च प्राप्यन्ते? इति वर्णितमस्ति ।

## शोधस्य उद्देश्यानि (Objectives)

शोधस्य उद्देश्यानि विषयानुसारम् अधोलिखितानि सन्ति :

1. आध्यात्मिकग्रन्थेषु वर्णितानां मनोदुःखपरिहारोपायानां विश्लेषणम् ।
2. आध्यात्मिकग्रन्थेषु वर्णितानां मनोदुःखपरिहारोपायानां प्रभावशीलतायाः मूल्याङ्कनम् ।
3. आध्यात्मिकग्रन्थेषु वर्णितमनोदुःखोपायैः सह आधुनिकमनोवैज्ञानिकसिद्धान्तानां तुलनात्मकमध्ययनम् ।
4. मनोदुःखपरिहाराय आध्यात्मिकग्रन्थेषु वर्णितान् उपायान् व्यावहारिकरूपं प्रदातुं महत्त्वपूर्णाः संस्तुतयः परामर्शाश्च ।

## प्राक्कल्पना (Hypothesis)

शोधस्य अध्ययनं तु गुणात्मकं वर्तते । अत एव प्राथमिकद्वितीयकस्रोतांसि अध्ययनरूपेण स्वीकृतानि । अत्र गुणात्मकशोधदृष्ट्या प्राक्कल्पना नैव लिखिता ।

## सीमाङ्कनम् (Limitation )

शोधपत्रस्य सीमाङ्कनं कर्तुम् अधोलिखिताः आध्यात्मिकग्रन्थाः स्वीकृताः वर्तन्ते :

***सम्पर्कसूत्रम्** - 9001473681, Email- dr.dayanidhi.sharma@csu.co.in

1. श्रीमद्भागवतमहापुराणम्
2. श्रीमद्भगवद्गीता
3. उपनिषदः

अस्मिन् शोधपत्रे केवलं भारतीयाः आध्यात्मिकग्रन्थाः स्वीकृताः सन्ति । कुत्रचित् भारतीयपाश्चात्यविचारकाणां चिन्तनम् अपि उदाहरणैः विमृष्टमस्ति ।

## शोधविधयः (Research Methods)

शोधपत्रं लेखितुं केचन विधयः स्वीकृताः सन्ति । ते विधयः निम्नलिखिताः सन्ति :

1. वस्तुविश्लेषणविधिः (Content Analysis Method)
2. तुलनात्मकविधिः (Comparative Method)

## शोधपत्रस्य क्षेत्रम् (Field of study)

अस्मिन् शोधकार्ये आध्यात्मिकग्रन्थेषु प्रतिपादितमनोदुःखपरिहारस्य उपायानाम् अध्ययनं कृतं वर्तते ।

## सम्बद्धसाहित्यस्य अध्ययनम् (Review of Related Literature)

आध्यामिकशिक्षाग्रन्थानां दुःखपरिहारार्थं शोधलेखाः बहवः लिखितास्सन्ति । लघुशोधप्रबन्धाः शोधग्रन्थाश्च प्रकाशिताः वर्तन्ते । तेषु केषाञ्चन शोधकार्याणाम् उल्लेखः सम्प्रति अत्र क्रियते; प्रो. राकेशराय-अनिमेषदास महादयौ (2024) भारतीयज्ञानप्रणाल्याः माध्यमेन सकारात्मकमनोविज्ञानस्यावबोधः (श्रीमद्भगवद्गीतायाः अन्तर्दृष्टिः) इति विषयमधिकृत्य शोधपत्रमेकं लिखितवन्तौ । शोधस्य परिणामत्वेन इदं ज्ञातं यत् मनः कथं सकारात्मकं प्रभावं प्राप्य दुःखात् बहिः मानवं नयति । अस्मिन् शोधकर्मणि गीतायाः बहूनि उदाहरणानि प्रदत्तानि । अर्जुनस्य विषादं दूरीकर्तुं कथं मनसः शक्तिः सकारात्मकदृष्ट्या कार्यं करोति इत्यपि उत्तमरूपेण प्रतिपादितमस्ति ।

आध्यात्मिकम् अभ्यासमेव विचिन्त्य सोरापेज़र (2024) महोदयया 'Spiritual practices and mental wellbeing : A quantitative Study among University Students' इत्यस्मिन् विषये शोधकार्यं कृतम् । शोधकार्यस्य परिणामत्वेन व्यवहारे अयं पक्षः समुद्घाटितः यत् आध्यात्मिकाः अभ्यासाः छात्राणां मानसिकं स्तरम् उन्नतं कुर्वन्ति । अनेन तेषां जीवने विश्रान्तिः समायाति । ते नमनीयतापूर्वकं कार्याणि साधयन्ति ।

पार्कक्रिस्टल (2024) महोदयेन 'Spirituality and mental health' इति विषये शोधपत्रमेकं लिखितम् । शोधस्य परिणामे एतत् ज्ञातम् यत् आध्यामिकता मानसिकं स्वास्थ्यं सुखप्रदं करोति इति आशयः । तत्र धार्मिकाः केचन प्रमुखाः आशयाः अपि कारणीभूताः वर्तन्ते, तैः आध्यात्मिकतायां वृद्धिर्भवति ।

रजनी जी. के. एस् शिवकुमार (2022) महोदयाभ्यां 'A Study of Bhagavad Gita's Approach to Stress Management' इति विषये शोधपत्रं प्रस्तुतम् । शोधपत्रे आध्यात्मिकदृष्ट्या भगवद्गीता कथं तन्यतां परिहरति इति विषये स्पष्टीकृतम् । अभिलाषाणां काचित् सीमा भवेत् । अनेन दुःखेषु नियन्त्रणं कर्तुं शक्यते इति परिणामे प्रोक्तम् ।

फ्लार्टी सी. (2020) महोदयः 'The faculty workload crisis Inside higher education' : इति विषये सङ्कायसदस्यानां कार्याधिक्येन पीडायाः कारणानि वक्ति । सकारात्मकसन्तुलनेन एतत् सोढुं शक्यते इति

परिणामत्वेन समाधानमनुभूयते ।

उपर्युक्तानि शोधस्य अध्ययनानि मनसः संरक्षणार्थम् आध्यात्मिकतायाः सम्यक् आश्रयः स्वीकरणीयः इति वदन्ति । कानिचन आध्यात्मिकतायाः भावं स्वीकृत्य जीवने सकारात्मकदृष्ट्या अपि परिवर्तनं कर्तुं सङ्केतयन्ति ।

## आध्यात्मिकग्रन्थेषु मनोदुःखपरिहारोपायानां विश्लेषणम्

साम्प्रतिकं जगत् नित्यं परिवर्तनशीलं वर्तते । एतत् परिवर्तनं जीवनस्य बहुषु क्षेत्रेषु दृश्यते । तत्र शिक्षाक्षेत्रमुद्दिश्य एव अस्माकं चिन्तनं सर्वदा प्रवर्तते । शिक्षायाः क्षेत्रे अधुना परिदृश्यं भिन्नमस्ति । छात्राणां जनानां वा अद्यतनीयः श्रमः भविष्यं सङ्केतयति । अत एव उच्यते 'For the people and learners nonacademic and academic success shapes the future' कदाचित् परीक्षासु छात्राणाम् उत्तमश्रेण्याः अभावे पीडा भवति । कदाचित् श्रमिकाणां धनार्जने असाफल्यं मनसि महत् दुःखं जनयति । स्पर्धानां युगे इयं महती समस्या वर्तते । अस्मिन् विषये National Crime Records Bureau (NCRB) सूचयति :

- प्रत्येकं होरामध्ये कश्चन एकः छात्रः आत्मघातं (आत्महत्यां, आत्मवधम् , जीवोत्सर्गं, काम्यमरणं वा (मोनियर् विलियम शब्दकोशः पृ. 785) करोति ।
- प्रत्येकं दिवसे भारतराष्ट्रे 28 जनाः आत्महत्यां कुर्वन्ति ।
- 2020 तमे वर्षे 12,500 जनैः आत्महत्या कृता ।
- विश्वस्वास्थ्यसङ्गठनानुसारं (WHO) भारतराष्ट्रे 6.5% जनाः मानसिकरोगैः पीडिताः वर्तन्ते ।

एतादृशम् अध्ययनम् अस्मान् समस्यानां परिहारार्थम् अध्ययनं कर्तुं च प्रेरयति । श्रीमद्भागवतमहापुराणे गोकर्णोपाख्याने स्वयमेव गोकर्णः स्वपितरम् आत्मदेवशर्माख्यं दुःखशमनस्य उपायं सूचयति ;

**न चेन्द्रस्य सुखं किंचिन्न सुखं चक्रवर्तिनः । सुखमस्ति विरक्तस्य मुनेरेकान्तजीविनः ॥**

(श्रीमद्भागवतमहापुराणम्, , माहात्म्यभागः, अध्यायः 4, श्लो. 75, पृ.26)

प्रपञ्चं विलोक्य मनः धावति । तत्फलेन विरक्तभावः प्रामुख्येन स्वीकरणीयः । मनसः ममत्वभावं सर्वथा विहाय वैराग्ये रागः स्यात् । भगवति भक्तिः भवेत् । इदं जगत् क्षणभङ्गनिष्ठं वर्तते । केवलं भक्तिनिष्ठो भूत्वा एव परमं सुखं प्राप्तुं शक्यते । कारणमिदमस्ति यत् भक्त्या मनः निर्मलतां याति । निर्मलं मनः सर्वदा कालुष्यं परित्यज्य सुखमेव अनुभवति । यथोक्तम् :

**देहेऽस्थिमांसरुधेऽभिमतिं त्यज त्वं जायासुतादिषु सदा ममतां विमुञ्च ।**
**पश्यानिशं जगदिदं क्षणभङ्गनिष्ठं वैराग्यरागरसिको भवभक्तिनिष्ठः ॥**

(श्रीमद्भागवतमहापुराणम्, , माहात्म्यभागः, अध्यायः 4, श्लो 79, पृ. 27)

परदोषाणां गुणानां च चिन्तनं कृत्वा अपि मनः पीडाम् अनुभवति । कामतृष्णायाः प्रभाववशात् इतोऽपि तत् कष्टमाप्नोति । ततः सर्वं विहाय तत् भगवत्सेवां प्रति योजनीयम् । अस्मिन् विषये उच्यते :

**धर्मं भजस्व सततं त्यज लोकधर्मान् सेवस्व साधुपुरुषाञ्जहि कामतृष्णाम् ।**
**अन्यस्य दोषगुणचिन्तनाशु मुक्त्वा सेवाकथारसमहो नितरां पिब त्वम् ॥**

(श्रीमद्भागवतमहापुराणम्, , माहात्म्यभागः, अध्यायः 4, श्लो० 80, पृ.27)


ISSN : 2249-538X

मनसः उद्वेगशीलता तु कष्टं जनयति । संसारसम्भवैः नानाकार्यैः इदं मनः व्याकुलं भवति । अहङ्कारवशात् दर्पवशात् एतत् आत्मनियन्त्रणमपि विस्मर्य बहुकलुषितं कारयति । इदं मनः सर्वदा भगवतः गुणान् एव स्मरेत् । तदेव तस्य महत्सुखं वर्तते । चित्रकेतुः भगवतः पार्षदः भूत्वा एकवारं मातुः जगदम्बायाः शापवशात् आसुरीं योनिं प्राप्य वृत्रासुरः सञ्जातः । तदानीं सः जीवनस्य रहस्यं विज्ञाय एवं वक्ति :

**अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः ।**
**मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक्कर्म करोतुकायः ॥**

(श्रीमद्भागवतमहापुराणम्, , 6 स्कन्धः, अध्यायः11, पृ.625)

दार्शनिकदृष्ट्या मनः मायायाः पुत्रः वर्तते । एतत् मनस्तु अविद्यया कल्पितं भवति । इदमेव संसारचक्रं विद्यते । भागवते प्रह्लादः भणति :

**माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः ।**
**छन्दोमयं यदजयार्पितषोडशारं संसारचक्रमज कोऽतितरेत त्वदन्यः ॥**

(श्रीमद्भागवतमहापुराणम्, , 7 सकन्धः, अध्यायः 9, श्लो. 21, पृ. 718)

भगवतः गुणश्रवणेन मनसः मालिन्यं नश्यति । पूतेनभावेन तत् मनः निष्कामतां याति । तदनुसारेण भक्तेः प्रभावपूर्वकं तस्य उत्तमा गतिर्भवति । दूषितं चिन्तनं दृश्यं वा सम्प्रति शिक्षाजगत् प्रभावयति । शिक्षार्थिनः अन्यमनस्काः भूत्वा अकरणीयमपि कुर्वन्तः सन्ति । अत एव भगवतः गुणानामाश्रयः मनसा स्वीकरणीयः । भागवते प्रोक्तमस्ति ;

**मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये । मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥**

(श्रीमद्भागवतमहापुराणम्, , 3 स्कन्धः, अध्यायः 29 , श्लो. 11, पृ. 301)

जीवेषु प्राणिषु मानवेषु वा समदृष्टिः समभावश्च अवश्यमेव महत्त्वपूर्णः कश्चन पवित्रं कर्म यत् मनसः कार्यमस्ति । प्राणिनां सेवया मनः शुद्धभावमाप्नोति । तादृशीं शुद्धिं प्राप्य तत् मनः सर्वदा हरिं भजेत् । तदेव तस्य दुःखशमनस्योपक्रमः । कुबेरः भक्तं ध्रुवं बोधयन् वदति :

**तद्गच्छ ध्रुव भद्रं ते भगवन्तमधोक्षजम् । सर्वभूतात्मभावेन सर्वभूतात्मविग्रहगम् ॥**
**भजस्व भजनीयाङ्घ्रिमभवाय भवच्छिदम् । युक्तं विरहितं शक्त्या गुणमय्याऽऽत्ममायया ॥**

(श्रीमद्भागवतमहापुराणम्, 4 स्कन्धः, अध्यायः 12, श्लो. 5-6, पृ. 376)

श्रीमद्भगवद्गीतायामपि तादृशाः मनसः दुःखशमनाय उपायाः निरूपिताः सन्ति । भगवता कृष्णेन कठिनपरिस्थितौ मनसः दौर्बल्यकाले च अर्जुनः प्रेरितः । स्वजनान् हन्तुं सः भीतः सन् अस्त्रं त्यक्त्वा चिन्तामग्नः सञ्जातः । तदानीं तस्मै तत्त्वबोधं भगवता श्रीकृष्णेन कारितम् । अष्टनकर (2016) वर्येण श्रीमद्भगवद्गीतासम्बधशोधकार्ये मनसः प्रबन्धनं प्रोक्तम् । भगवता गीतायाः उपदेशमाध्यमेन अर्जुनस्य भावात्मकं सन्तुलनं (Emotional Balance) कृतम् । अर्जुनः तैः स्वकर्मकर्तुम् उत्तमरीत्या प्रेरितः । भगवता निगदितं यत् विषयेषु प्रीतिः अनिष्टकरी भवति । तत्रैव यदि कामस्य प्रतिघातं कुर्मश्चेत् क्रोधस्य उत्पत्तिः अभिजायते । प्रोक्तमस्ति :

**ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते । सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥**

(श्रीमद्भगवद्गीता, 2 अध्यायः, श्लोकः 62, पृ.68)

क्रोधवशात् सम्मोहः, अर्थात् कार्याकार्यविषये अविवेकः भवति । क्रुद्धो भूत्वा सः गुरूनपि आक्रोशति । तादृशः

क्रोधः छात्रैः सामाजिकैश्च अवश्यमेव त्यक्तव्यः । बेकन(Francis Bacon) महोदयः वदति "A man that Studieth revenge keeps his own wounds green" प्रतिशोधस्य चिन्तनं कदापि नैव करणीयम् । प्रतिशोधवशात् व्रणाः पुनः तत्पराः भवन्ति ते वारं वारं पीडयन्ति । क्रोधस्य परिणामः सर्वदा विचारणीयः । जीवनहाने: मुख्यः मार्गस्तु क्रोध: एव विद्यते । अयं क्रोधः कुटुम्बान् नाशयति । मित्रसमूहम् उपेक्षितं करोति । मनसः शान्तिं पीडयति । कन्फ्यूशियसवर्यः क्रोधस्य परिणामविषये एवं भणति :

'When anger rises, think of the Consequences. (Confucius)'

यतोहि क्रोधस्तु शनैः शनैः बुद्धिनाशं प्रति अपि नयति । बुद्धिनाशात् सर्वनाशः सञ्जायते । यथोक्तं भगवता :

**क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः । स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥**

(श्रीमद्भगवद्गीता, 2 अध्यायः, श्लोकः 63, पृ. 69)

इदं मनः सर्वदा इन्द्रियैः सह आसक्तं भवति । अस्य चाञ्चल्यं चापल्यं वा बहुप्रबलं वर्तते । चाञ्चल्यं शमयितुं मनः वशीकर्तुं च महत्कष्टं भवति । मनसः स्वभावः गीतायां निरूपितमस्ति :

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् । तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥**

(श्रीमद्भगवद्गीता, अध्यायः 6, श्लो. 34, पृ. 189)

मनसः निग्रहकरणं दुष्करं वर्तते । मनसः मनोदुःखपरिहारस्य उपायः (Grief solution) तु अवश्यमेव चिन्तनीयः । एतस्य समाधानरूपेण भगवता अर्जुनः उपदिष्टः । अस्मिन् एव क्रमे भगवता श्रीकृष्णेन उक्तं यत् 'अभ्यासेन' अर्थात् चित्तभूमौ कस्याञ्चित् समानप्रत्ययावृत्तिः, 'वैराग्येण' इत्युक्ते दृष्टादृष्टेष्टभोगेषु दोषदर्शनाभ्यासाद् वैतृष्ण्यं तेन अयम् अनिच्छारूपवैराग्यभावः मनसः वशीकरणे नियन्त्रणे या साहाय्यं विदधाति । यथा निगदितम् :

**असंशयं महाबाहो मनो दुर्निग्रहं चलम् । अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥**

(श्रीमद्भगवद्गीता, अध्यायः 6, श्लो. 35, पृ. 190)

पतञ्जलिनाऽपि स्पष्टीकृतम्

**अभ्यासवैराग्याभ्यां तन्निरोधः ।**

(योगसूत्रम्, अध्यायः 1, सूत्र 12)

श्रीमद्भगवद्गीतायाः अद्भुते संवादे जीवनस्य आध्यात्मिकं तत्त्वं (Spritual fact) भौतिकं तत्त्वं (Material fact) च तत्त्वद्वयं विशिष्टरूपेण बोधितमस्ति ।

भौतिकतायाः निरूपणं गीतायां भगवता कृतमस्ति । यथा -

1. तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्वराज्यं समृद्धम् (श्रीमद्भगवद्गीता, 11 अध्यायः, श्लोकः 33, पृ. 272) इति पद्ये सम्यक् रूपेण विश्लेषितमस्ति । तथैव आध्यात्मिकतायाः वर्णनं बहुषु स्थानेषु जातमस्ति :
2. एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ॥ (श्रीमद्भगवद्गीता, 2 अध्यायः, श्लोकः 72 , पृ. 75)
3. अशोच्यानन्वशोचस्त्वं..........नानुशोचन्ति पण्डिताः ॥ (श्रीमद्भगवद्गीता, 2 अध्यायः, श्लोकः 11, पृ. 32)

अत्र 'पण्डिताः' इत्युक्ते 'स्कोलर्' इति तात्पर्यं नास्ति । ग्रन्थानाम् अध्येतारः न सन्ति । पण्डिताः अर्थात् आत्मविषया बुद्धिः येषां ते हि पण्डिताः । अत्र भगवता साक्षात् मनोदुःखस्य परिहारः कृतः । Don't Grief

 ISSN : 2249-538X

इति ध्वनिः अत्र स्पष्टरूपेण श्रूयते । मनुः अपि वदति यत् **'सर्वं परवशं दुःखं, सर्वम् आत्मवशं सुखमिति'** (मनुस्मृतिः, 4 अध्यायः, श्लोकः 16) इति मत्वा जीवने चिन्तनं करणीयम् । यदि निष्कामकर्म (Action with Detachment/Desireless/Selfless Action) वर्तते तर्हि कष्टशमनमपि भविष्यति, तेन सह फलेषु अपि प्रीतिः नंक्ष्यति । यथोक्तम् :

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतु भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥**

(श्रीमद्भगवद्गीता, 2 अध्यायः, श्लोकः 47, पृ. 60)

अत एव हृदयस्य दौर्बल्यं (Weakness of Heart) परित्यज्य स्वकर्म करणीयम् । भीतिं सङ्कोचं वा विहाय यत् करणीयमस्ति तत् करोतु इति भगवता उत्तमपरामर्शदातारूपेण (Counsellor) उक्तमस्ति :

1. **क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥** (श्रीमद्भगवद्गीता, 2 अध्यायः, श्लोकः 3, पृ. 24)
   भगवन्नाम्नि यस्य भक्तिः वर्तते । 'भक्तिः' नाम प्रीतिरेव । भक्तिः परमप्रेमरूपा भवति । भक्त्या अन्तःकरणशुद्धिः सञ्जायते । यथा प्रोक्तम् :
2. **सा त्वस्मिन् परमप्रेमरूपा ।** (नारदीयभक्तिसूत्रम्, 2 सूत्रम्, पृ. 3)

**तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च । मय्यर्पितमनोबुद्धिर्मामवैष्यस्य संशयः ॥**

(श्रीमद्भगवद्गीता, 8 अध्यायः, श्लोकः7, पृ. 214)

भक्त्या भगवतः, कथया रूपलीलायाः श्रवणेन वा सर्वदा तस्य स्मरणं करणीयमिति । श्रवणं वन्दनं, पादसेवनमित्यादिभिरुपायैः स एव प्रभुः आश्रयणीयः । सः दुःखहर्ता वर्तते । नात्र संशयः । उपनिषदीयग्रन्थेष्वपि बहुषु स्थानेषु दुःखपरिहारोपायाः प्रोक्ताः सन्ति । छान्दोग्योपनिषदि भणितमस्ति यत् - यस्य आत्मविषया बुद्धिः अस्ति सः शोकं तरति इति ।

3. **तरति शोकम् आत्मवित् ।** (छान्दोग्योपनिषत्, 7 अध्यायः, 1 खण्डः, 3 मन्त्रः, पृ. 673)
   यस्य अशरीरभावः वर्तते । तस्य शरीरस्य सम्बन्धेन प्रियाप्रियभावोऽपि नैव भवति । यथा निगदितमस्ति :
4. **सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ।** (छान्दोग्योपनिषद्, अ.8, खं.12, मं.1)
   मोहवशात् प्रायशः सर्वत्र मनोदुःखम् अनुभूयते । सर्वभूतेषु यः एकत्वं पश्यति तस्य मोहः अपि नास्ति, शोकोऽपि नैव भवति :

**यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥** (ईशावास्यम्, मं. 7, पृ. 32)

वैराग्यभावः मनुष्यं शान्तिं प्रति नयति । इयं शान्तिः स्वानन्दानुभवात् एव प्राप्तुं शक्यते । आध्यात्मोपनिषत् अस्मिन् विषये सूचयति ;

**वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम् । स्वानन्दानुभवाच्छान्तिरेषैवोपरतेः फलम् ॥**

(आत्मोपनिषत्, मं. 28 , पृ. 2605)

तुलनात्मकदृष्ट्या पाश्चात्यानामपि अस्मिन् विषये अध्ययनम् उपयुक्तमस्ति । डेनियलगोलमेन (Deniel Goleman, 1946) महोदयानां भावात्मकबुद्धिः (Emotional Intelligence : EI) बाह्यजगतः प्रभावान् न्यूनीकर्तुं प्रेरयति । यतोहि 'Outer world is Controlling our Inner world' : जगतः प्रभावः मनसि न भवेत् इति धिया आत्मबलम् आवश्यकम् । सर्वदा सकारात्मकरूपेण एव जीवनस्य विषये चिन्तनीयम् । ये आत्मसुखं वाञ्छन्ति ते मानवीयमनोभावेषु नियन्त्रणं कुर्युः । आधुनिकमनोविज्ञाने कश्चन नूतनः संप्रत्ययः विकसितः यः सर्वान् आत्मसन्तुलनं कर्तुं दिशति यतोहि बहुत्र दुश्चिन्तायाः(Anxiety) अन्तर्द्वन्द्वानां (Conflicts) मानसिकक्लान्तेः (Burnout) प्रेरणायाः अभावस्य च (Lack of Inspiration) वृद्धिः सर्वत्र दृश्यते । अमेरिका देशीयः मनोवैज्ञानिकः मार्टिनसेलिगमैन (Martien Seligman) महोदयः सुखवर्धनार्थं 'प्रामाणिकी प्रसन्नता' (Authentic Happiness) इत्यस्य निरूपणं कृतवान् । सर्वेषां हितचिन्तनमपि तेषां (पाश्चात्यानां) आध्यात्मिकबोधं किञ्चित् स्पष्टयति, तथापि तेषां नैतिकतासम्बद्धाः विचाराः श्लाघनीयाः सन्ति ।

## परामर्शाः निष्कर्षश्च (Suggestions and Conclusion)

आध्यात्मिकशिक्षायाः ग्रन्थाः प्रभावशीलाः वर्तन्ते । एतेषाम् अध्ययनेन सम्पूर्णविश्वस्य हितिचन्तनं कर्तुं शक्यते । तन्यतापरिहारे प्रबन्धने वा सर्वान् मानवान् एतेषां शिक्षा प्रेरयति । एतेषु निबद्धाः नैतिककथाः मनसः कृते सौख्यं प्रयच्छन्ति । एतेषां ग्रन्थानां बहूनि जीवनमूल्यानि व्यक्तित्वनिर्माणं कुर्वन्ति । भौतिकजगति जायमाना त्वरा पथविहीनान् सर्वान् विदधाति । तत्फलेन धैर्यं, कारुण्यं, सद्भावः, अनासक्तिः जीवनबोधादयश्च गुणाः जीवनस्य स्तरोन्नयनार्थम् उपयुक्ताः भवन्ति । परामर्शरूपेण वक्तुं शक्यते यत् आध्यात्मिकग्रन्थानाम् अध्ययनं मानसिककष्टानां निवारणे उपयोगि वर्तते । आध्यात्मिधार्मिकक्षेत्रेषु ये सम्बद्धाः विद्यन्ते तेषां सकारात्मकं चिन्तनं बहु उन्नतं भवति । आध्यात्मिकग्रन्थाः चिकित्सारूपेण वर्तन्ते ये चिन्ता, दुःखं, शोकभयादीनां परिहारे मार्गं दर्शयन्ति । ईश्वरभक्त्या कश्चन रोगशमनस्य उपायः विद्यते । अतः छात्राणां सामाजिकजनानां च मनोदुःखपरिहारार्थम् आध्यात्मिकग्रन्थानाम् अध्ययनं गृहेषु शिक्षासंस्थानेषु च अवश्यमेव करणीयम् । राष्ट्रस्य नागरिकाणां मानसिकं स्वास्थ्यं सदा रक्षणीयं चेत् आध्यात्मिकग्रन्थानां मूलं दर्शनम् अङ्गीकरणीयमिति ।

## सन्दर्भाः (References)

1. अष्टनकर, ओ. एम. (2016) : माइंड मैनेजमेंट : इनसाइट फ्रॉम भगवद्गीता . इंटरनेशनल एडवांस्ड रिसर्च कंप्यूटर साइंस एण्ड मैनेजमेंट साइंस, 4 (3), 1-41.
2. ईशावास्योपनिषद् (सं. 2078) : ईशादि नौ उपनिषद् गोरखपुर : गीताप्रेस, पृ. 32.
3. उपनिषत्सङ्ग्रहः (2003) : अष्टाधिकशतोपनिषदां सङ्ग्रहः वाराणसी : रत्ना पब्लिकेशन्स, पृ. 2605.
4. क्रिस्टल, पार्क. (2024) : स्प्रिच्युअली एण्ड मेंटल हेल्थ, https://login.ebsco.com/
5. छान्दोग्योपनिषद् (सं. 2074) : सानुवाद शंकर भाष्य सहित, छा. उ. गोरखपुर : गीताप्रेस, पृ. 673.
6. छान्दोग्योपनिषद् (सं. 2074) : सानुवाद शंकर भाष्य सहित, छा. उ. गोरखपुर : गीताप्रेस, पृ. 865.

# याज्ञवल्क्यस्मृतिमिताक्षरादिशा व्यवहाराङ्गोत्तरपादस्वरूप-तत्प्रभेद-तत्कार्याणां विमर्शः

डा. आर् नवीन*

सहाचार्यः, श्री.चं.स.विश्वमहाविद्यालयः

काञ्चिपुरम्

***लेखसारः*** *– इह खलु परमकारुणिकः भगवान् याज्ञवल्क्यः अस्माकं मानवजीवनहिताय स्मृतिं प्रणिनाय । तत्र हि स्मृतौ आचार-व्यवहार-प्रायचित्तभेदेन अध्यायत्रैविध्यं राजते । तत्र व्यवहाराध्याये राज्ञा व्यवहारः द्रष्टव्य इति वर्णितम् । यतो हि अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः । तच्च दुष्टनिग्रहमन्तरेण न संभवति । दुष्टपरिज्ञानं च न व्यवहारदर्शनमन्तरेण संभवति । तद्व्यवहारदर्शनम् अहरहः कर्तव्यमित्युक्तम् । व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहमिति । स च व्यवहारः कीदृशः कतिविधः कथं च इति इतिकर्तव्यताकलापो न अभिहितः,अतः तदभिधानाय व्यवहाराध्याय आरभ्यते ।*

इह खलु परमकारुणिकः भगवान् याज्ञवल्क्यः अस्माकं मानवजीवनहिताय स्मृतिं प्रणिनाय । तत्र हि स्मृतौ आचार-व्यवहार-प्रायचित्तभेदेन अध्यायत्रैविध्यं राजते । तत्र व्यवहाराध्याये राज्ञा व्यवहारः द्रष्टव्य इति वर्णितम् । यतो हि अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः । तच्च दुष्टनिग्रहमन्तरेण न संभवति । दुष्टपरिज्ञानं च न व्यवहारदर्शनमन्तरेण संभवति । तद्व्यवहारदर्शनम् अहरहः कर्तव्यमित्युक्तम् । व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहमिति । स च व्यवहारः कीदृशः कतिविधः कथं च इति इतिकर्तव्यताकलापो न अभिहितः,अतः तदभिधानाय व्यवहाराध्याय आरभ्यते व्यवहारान् नृपः पश्येदित्यादिना । अन्यविरोधेन स्वात्मसंबन्धितया कथनं व्यवहारः । यथा कश्चिदिदं क्षेत्रादि मदीयमिति कथयति । अन्योऽपि तद्विरोधेन मदीयमिति । तस्यानेकविधत्वं वर्तते । यथा मनुना उक्तम्-

**तेषामाद्यमृणादानं निक्षपोऽस्वामिविक्रयः । संभूय च समुत्थानं दत्तस्यानपकर्म च ॥**
**वेतनस्यैव चाऽऽदानं संविदश्च व्यतिक्रमः । क्रयविक्रयानुशयो विवादः स्वामिपालयोः ॥**
**सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके । स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च ॥**
**स्त्रीपुंधर्मविभागश्च द्यूतमाह्वानमेव च । पदान्यष्टादशैतानि व्यवहारस्थिताविह ॥ इति ।**

तत्रैव याज्ञवल्क्यस्मृतौ चतुष्पाद्व्यवहारोऽयं विवादेषूपदिश्यते "इत्यत्र भाषा-उत्तर-क्रियापरपर्यायमाण-निणेयात्मकाः चत्वारो व्यवहारपादा वक्ष्यन्ते । याज्ञवल्क्यस्मृतिमिताक्षरादिशा व्यवहाराङ्गोत्तरपादस्वरूप-तत्प्रभेद-तत्कार्याणां प्रतिपादनमत्र क्रियते ।

**श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसन्निधौ । ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम् ॥७ ॥**

श्रुतार्थः श्रुतः भाषा अर्थः येन प्रत्यर्थिना असौ इति । तस्य श्रुतार्थस्य । उत्तरं पूर्वपक्षादुत्तरत्र भवतीति उत्तरम् । पूर्वावेदकस्य अर्थिनः संनिधौ समीपे । उत्तरं च अर्थिनः पक्षस्य निराकरणम् । लेख्यं लेखनीयम् । एवमुत्तरे पत्रे निवेशिते साध्यसिद्धेः साधनप्रयोज्यत्वात् साधननिर्देशं कः कुर्यादित्यपेक्षित आह-ततोऽर्थीति । तत उत्तरानन्तरम् । अर्थी साध्यवान् सद्य एव अनन्तरमेव लेखयेत् । प्रतिज्ञातार्थः प्रतिज्ञातः साध्यः स च असावर्थश्चेति प्रतिज्ञातार्थः । तस्य प्रतिज्ञातार्थस्य । साधनं साध्यतेऽनेनेति । साधनं प्रमाणम् । उत्तरप्राप्त्यनन्तरं यस्य साध्यमस्ति स अर्थी प्रतिज्ञातार्थस्य

---

***सम्पर्कसूत्रम्*** - 7204877429, Email - naveen.naiyayika@gmail.com

साधनं साक्ष्यादिरूपं लेखयेदिति यावत् । ७ ।

उत्तरलक्षणञ्च पक्षनिराकरणसमर्थं वचनम् । यथा- रूपकशतं मह्यं धारयतीत्युक्ते तन्निरकरणप्रतिपादकः नेत्याकारकः शब्द उत्तरमिति उच्यते ।

उत्तरम् चतुर्विधम् ।

- संप्रतिपत्तिः
- मिथ्या
- प्रत्यवस्कन्दनम्
- पूर्वन्यायः

तदुक्तम् कात्यायनस्मृतौ -

**सत्त्यं मिथ्योत्तरं चैव प्रत्यवस्कन्दनं तथा । पूर्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधमिति ।**

## संप्रतिपत्तिः -

संप्रतिपत्तिः नाम सत्यापरपर्यायवचनं ओम् इति उत्तरम् । न च पक्षनिराकरणसमर्थवचनस्योत्तरत्वे सम्प्रतिपत्तेः कथमुत्तरत्वमिति वाच्यम् ।

तत्र सत्योत्तरं यथा- रूपकशतं मह्यं धारयतीत्युक्ते सत्यं धारयामीति ।

मिथ्योत्तरम् चतुर्विधं - यथा रूपकशतं मह्यं धारयतीत्युक्ते

- मिथ्या एतत् ।
- एतन्नाभिजानामि ।
- तदा तत्र न संनिधिः ।
- अजातश्चास्मि तत्काल इति ।

## प्रत्यवस्कन्दनम् -

प्रत्यवस्कन्दनम् नाम रूपकशतं मह्यं धारयतीत्युक्ते सत्यं गृहीतं, प्रतिदत्तं प्रतिग्रहेण लब्धमिति वा ।

## प्राङ्न्यायोत्तरम् -

प्राङ्न्यायोत्तरं तु रूपकशतं मह्यं धारयतीत्यभियोगे यत्राभियुक्त एवं ब्रूयादस्मिन्नर्थे अनेनाहमभियुक्तस्तत्र चायं व्यवहारमार्गेण पराजित इति ।

## उत्तरत्वव्याप्यानि -

1 पक्षस्य व्यापकं निराकरणसमर्थम् ।
2 सारं - न्याय्यं न्यायादनपेतम् ।
3 असंदिग्धं - सन्देहरहितम् ।
4 अनाकुलं - पूर्वापराविरुद्धम् ।

5 अव्याख्यागम्यं - अप्रसिद्धपदप्रयोगेण दुःश्लिष्टविभक्तिसमासाध्याहाराभिधानेन वा

अन्यदेशभाषाभिधानेन वा यत् व्याख्येयार्थ न भवेत् । तदुक्तम् कात्यायनस्मृतौ -

**पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् ।**
**अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुः । इति**

## क्रियानिरूपणम् -

क्रिया नाम स्वस्वोद्दिष्टार्थसाधकप्रमाणप्रदर्शनात्मिका भवति ।


ISSN : 2249-538X

- रूपकशतं मह्यं धारयतीत्युक्ते सत्यापरपर्यायवचने ओम् इति सम्प्रतिपत्त्युत्तरे प्राप्ते कस्यापि क्रिया न भवति ।
- रूपकशतं मह्यं धारयतीत्युक्ते मिथ्या एतत् । एतन्नाभिजानामि । तदा तत्र न संनिधिः । अजातश्चास्मि तत्काल इति । एवंविधमिथ्योत्तराणां प्राप्तौ पूर्ववादिना एव क्रिया सम्पादनीया ।
- रूपकशतं मह्यं धारयतीत्युक्ते सत्यं गृहीतं प्रतिदत्तश्चेति, प्रतिग्रहेण लब्धमिति वा । प्रत्यवस्कन्दनोत्तरे प्राप्ते उत्तरवादिना एव क्रिया सम्पादनीया । प्रत्यवस्कन्दनोत्तरे कारणोत्तरे तु साक्षिलेख्यादिभिः निरूपणीयम् ।
- रूपकशतं मह्यं धारयतीत्यभियोगे यत्राभियुक्त एवं ब्रूयादस्मिन्नर्थे अनेनाहमभियुक्तस्तत्र चायं व्यवहारमार्गेण पराजित इत्येवं प्राङ्न्यायोत्तरेप्राप्ते उत्तरवादिना एव क्रिया सम्पादनीया । अत्र प्राङ्न्याये जयपत्रेण वा प्राङन्यायदर्शिभिर्वा निरूपणीयम् ।

## उत्तराभासाः

उत्तरलक्षणरहितानामुत्तरवदवभासमानाः उत्तराभासाः निरूप्यन्ते ।

- संदिग्धं - सुवर्णशतमनेन गृहीतमित्युक्ते, सत्यं गृहीतं सुवर्णशतं माषशतं वेति ।
- प्रकृतादन्यत्- यथा सुवर्णशताभियोगे पणशतं धारयामीति ।
- अत्यल्पं - सुवर्णर्शताभियोगे पञ्च धारयामीति ;
- अतिभूरि- सुवर्णशताभियोगे द्विशतं धारयामीति ।
- पक्षैकदेशव्यापि - हिरण्यवस्त्राद्याभियोगे हिरण्यं गृहीतं नान्यादति ।
- व्यस्तपदं- ऋणादानाभियोगे पदान्तरेणोत्तरं, यथा- सुवर्णशताभियोगे अनेनाहं ताडित इति ।
- अव्यापि - देशस्थानादिविशेषणाव्यापि यथा मध्यदेशे वाराणस्यां पूर्वस्यां दिशि क्षेत्रमनेनापहृतमिति पूर्वपक्षे लिखिते क्षेत्रमपहृतमिति ।
- निगूढार्थम्- यथा सुवर्णशताभियोगे किमहमेवास्मै धारयामीति,अत्र ध्वनिना प्राडिवाकः सभ्यो वा अर्थी वा अन्यस्मै धारयतीति सूचयतीति निगूढार्थम् ।
- आकुलं- पूर्वापरविरुद्धम्, यथा- सुवर्णशताभियोगे कृते, सत्यं गृहीतं न धारयामीति ।
- व्याख्यागम्यं- दुःश्लिष्टविभक्तिसमासाध्याहाराभिधानेन व्याख्यागम्यम् अदेशभाषाभिधानेन वा, यथा- सुवर्णशतविषये पितृऋणाभियोगे, ' गृहीतशतवचनात् सुवर्णानां पितुर्न जानामि इति, अंत्र गृहीतशतस्य पितुर्वचनात् सुवर्णानां शतं गृहीतमिति न जानामीति ।
- असारं -न्यायविरुद्धम्, यथा-सुवर्णशतमनेन वृद्धया गृहीतं वृद्धिरेव दत्ता न मूलमित्यभियोगे

'सत्यं वृद्धिर्दत्ता न मूलं गृहीतम्' इति । तदुक्तम् कात्यायनस्मृतौ-

**संदिग्धमन्यत्प्रकृतादत्यल्पमतिभूरि च । पक्षैकदेशव्याप्यन्यत्तथा नैवोत्तरं भवेत् ॥**

**यद्व्यस्तपदमव्यापि निगूढार्थं तथाकुलम् । व्याख्यागम्यमसारं च नोत्तरं स्वार्थसिद्धये ॥" इति ।**

## अनुशीलितग्रन्थाः (Bibliography)


1. याग्यवल्क्यस्मृतिः, (मिताक्षरा सहिता), चौखंबा संस्कृत संस्थानम्, वाराणासी
2. धर्मशास्त्रसङ्ग्रहः, (भाषा टीका सहितम्, खेमराज श्रीकृष्णदास, वाराणासी

# चिन्तनविचारः

डा. नारायणवैद्यः*
सहायकाचार्यः, के.सं.वि., रा.गा.परिसरः
शृङ्गेरी

***लेखसारः*** *– अस्मिन् शोधपत्रे किं नाम चिन्तनम् ? चिन्तनस्य प्रकाराः चिन्तनप्रतिरोधकाः चिन्तस्य विकसोपायाः च इत्यादिविचाराः निरूपिताः । अपिच चिन्तनं सर्वजीवसाधारणधर्मः अस्ति । अतः चिन्तनम् अवश्यं कर्तव्यम् । अन्यथा जीवनं निरर्थकं भवति । विशिष्य शिक्षाक्षेत्रे चिन्तनस्य मुख्या भूमिका अस्ति । उत्कृष्टं चिन्तनं उत्तमं भवति । अत्यधिकं चिन्तनं न कर्तव्यम् । अनावश्यकम् अत्यधिकं वा चिन्तनं हानिकारकं भवति ।*

***कूटशब्दाः*** *– चिन्तनम्, प्रत्यक्षीकरणम् / ग्रहणम्/धारणा, अवधानम्, स्मरणम्, समीक्षात्मकं चिन्तनम्, रचनात्मकचिन्तनम्,तार्किकचिन्तनम्, , विश्लेषणात्मकचिन्तनम्*

## किं नाम चिन्तनम् ?

- समस्यायाः आविर्भावात् पूर्वं समस्यानां परिहारोपायस्य मार्गान्वेषणं चिन्तनम् ।
- समस्यात्मकपिरिस्थितिमारभ्य तस्य समाधानप्राप्तौ अवसानं भवति यत् तत् चिन्तनम् ।
- नैरन्तर्येण किमपि लक्ष्यम् उद्देश्यं वा अधिकृत्य क्रियमाणः विचारः चिन्तनम् ।
- चिन्तनार्थं स्मरणमावश्यकम् ।
- चिन्तनं मानसिकक्रियायाः ज्ञानात्मकः पक्षः वर्तते ।[१]
- चिन्तनं नूतनाज्ञानप्राप्तौ कारणं भवति ।
- समस्यायाः परिहारोपायमार्गः अस्ति चिन्तनम् ।
- संज्ञानात्मकप्रक्रिया भवति चिन्तनम् ।

1. प्रत्यक्षीकरणम् / ग्रहणम्/धारणा 2. अवधानम् 3. स्मरणम् 4. भाषा

एवं चिन्तनस्य लक्षणेन चिन्तनं मानसः व्यापारः प्रक्रिया वा अस्ति इति वक्तुं शक्यते । अस्यां प्रक्रियायां सूचनानां, विचाराणां, अवधारणानां च निश्चयः शक्यते । तदनु समस्यानां समाधानं निर्णयं च कर्तुं शक्यते । चिन्तनस्य चत्वारः प्रकाराः प्रधानाः सन्ति । यथा –

## समीक्षात्मकं चिन्तनम्

समीक्षात्मकचिन्तनं कश्चन चिन्तनस्य मार्गः अस्ति । अस्माकं विचाराणां विश्लेषणं, मूल्याङ्कनं, च कर्तुं शक्यते समीक्षात्मकचिन्तनेन । समीक्षात्मकचिन्तनं जनान् बहिर्मुखरूपेण चिन्तयितुं रचनात्मकसमाधानं च कल्पयितुं प्रोत्साहयति । अपिच समीक्षात्मकचिन्तनकौशलम् अन्येषां दृष्टिकोणं च अवगन्तुम् इदं चिन्तनं कर्तव्यम् । अस्मिन् चिन्तनप्रकारे यदा कदापि अस्माभिः किमपि महत्त्वपूर्णं निर्णयं कर्तव्यं भवति तदा निर्णेतुं अस्माकं ज्ञानं, अनुभवः, सामान्यज्ञानं च उपयुज्यते ।

***सम्पर्कसूत्रम्** - 9449278130, Email- dr.narayana.vaidya@csu.co.in

[१] Thinking is a mental activity in its cognitive aspect - This statement is given by Ross..

उदाहरणार्थं समूहचर्चायाः विषयः भवति **"ज्ञानार्जनार्थं छात्रेभ्यः दूरदर्शनम् उपयुक्तं संसाधनं वा ? व्यर्थं वा ?"** इति । प्रथमं निर्णयः कर्तव्यः भवति यत् दूरदर्शनस्य व्याप्तिः, उपयोगः, महत्त्वम् इत्यादिविचाराः अवलोकनीयाः भवन्ति । शिक्षाक्षेत्रे दूरदर्शनस्य उपयुक्तता, हानिः चापि अत्र परामर्शनीयः अंशः भवति । इत्थं समाधानार्थं समीक्षात्मकचिन्तनम् उपयुक्तं वर्तते इत्यत्र नास्ति संशयः ।

## रचनात्मकं चिन्तनम्

रचनात्मकचिन्तने विचाराणाम् अवधारणानांच निर्माणं भवति । क्वचित् निश्चितविचाराणां विकासः अपि भवति । तर्केण पूर्वापरविवेकबुद्ध्या परिस्थितेः अवगमनं जायते । अत्र कार्यकारणभावज्ञानम् अपि भवति । कदाचित् अधिगमस्थानान्तरणस्य सन्दर्भे रचनात्मकचिन्तनम् अभिव्यक्तं भवति । नूतनाविष्कारार्थम् आवश्यकं भवति रचनात्मकचिन्तनम् । एतादृशं चिन्तनं कुर्वन्ति वैज्ञानिकाः अनुसन्धातारः च ।

## तार्किकं चिन्तनम्

सूचनानां विश्लेषणार्थं प्रमाणसाधनस्य निष्कर्षाणां प्राप्त्यर्थं तार्किकं चिन्तनं प्रधानं स्थानं भजते । तार्किकचिन्तने प्रमाणस्य आवश्यकता अपि वर्तते । अतः तर्कस्य प्रमाणस्य च उपयोगेन निष्कर्षं प्राप्तुं व्यवस्थितरूपेण, वस्तुनिष्ठरूपेण, च चिन्तयितुं या क्षमता भवति सा क्षमता एव तार्किकचिन्तनम् अस्ति । अत्र विश्लेषणं तर्कणं समस्यासमाधानं निर्णयस्वीकारः च अन्तर्भवति । प्रायः क्रीडादिषु नायकानां कृते तार्किकचिन्तनस्य आवश्यकता भवति । वादनिमित्तमपि इदं चिन्तनमावश्यकम् । समान्यतया लोके तार्किकचिन्तनस्य महत्त्वं कल्पयामः । यथा – यदि वातावरणं विमलं वर्तते तर्हि द्विचक्रिकया प्रयाणं शक्यम् इति ।

## विश्लेषणात्मकं चिन्तनम्

जटिलसूचनाः लघुभागेषु विभज्य तान् अवगन्तुं विश्लेषणात्मकचिन्तनम् एव अपेक्षते । एवमेव कार्यकारणयोः सम्बन्धस्यावगमनार्थं विश्लेषणात्मकं चिन्तनं सहायकं भवति । इदं चिन्तनं समस्यायाः विश्लेषणार्थं समाधानार्थं च कश्चन विधिः अस्ति । सामान्यतया विश्लेषणात्मकचिन्तकः जिज्ञासया प्रेरितः व्यक्तिः भवति । अयं विषयस्य आपाततः अध्ययनं कृत्वा ज्ञातुं प्रभवति । विश्लेषणात्मकचिन्तकाः समस्यां दृष्ट्वा भीताः न भवन्ति । ते समस्यायाः समाधानोपायान् अन्विषन्ति । पराजितस्य पुनः विजयार्थं विष्लेषणात्मकचिन्तनम् आवश्यकम् । विश्लेषणात्मकचिन्तने तथ्यानां दत्तांशस्य च उपयोगः निर्णयार्थं क्रियते । यथा - भविष्यस्य राजस्वस्य पूर्वानुमानं कर्तुं विक्रयदत्तांशस्य विश्लेषणम् । अस्मिन् प्रतिमानानाम् अभिज्ञानं, पूर्वाग्रहाणां परिचयः, विभिन्नसूचनाखण्डानां सम्बन्धानाम् अवगमनं च अन्तर्भवति ।

इत्थं मुख्यतया चत्वारः प्रकाराः चिन्तनस्य वर्तन्ते । एतदतिरिच्य विविधप्रकारकचिन्तनं, एकप्रकारकचिन्तनं, समस्यासमाधानात्मकचिन्तनम् इत्यादिप्रकारान् अपि वक्तुं शक्नुमः । शिवानन्दस्वामिवर्याः चिन्तनस्य सद्विचाराः दुष्टविचाराः[१] चेति प्रकारद्वयं प्रतिपादितवन्तः ।

तत्र सद्विचारः प्रथमं चिन्तनकर्तुः मानसिकशरीरस्य उन्नतिं कृत्वा सुचिन्तकं लाभान्वितं करोति । द्वितीयं यस्य विषये मनोरञ्जनं भवति तस्य लाभः जायते । अन्तिमे सामान्यमानसिकवातावरणं परिवर्त्य सर्वेषां मानवजातेः लाभं करोति ।

दुष्टविचारः प्रथमं मानसिकशरीरस्य क्षतिं कृत्वा चिन्तकस्य हानिं करोति, द्वितीयं तस्य व्यक्तित्वस्य हानिं करोति । अन्तिमे सर्वेषां मानवजातेः समग्रं मानसिकवातावरणं विकृतं कृत्वा हानिं करोति ।

[१] GOOD THOUGHTS AND EVIL THOUGHTS

## चिन्तने अवरोधाः

चिन्तने पूर्वाग्रहाः, संवेगाः, सूचनायाः न्यूनता, विक्षेपादयः अवरोधाः अपि सन्ति ।
1. पूर्वाग्रहाः - पूर्वकल्पिताः धारणाः चिन्तनं प्रभावयन्ति । 2. संवेगाः - प्रबलाः संवेगाः निर्णयस्य प्रतिकूलाः भवन्ति ।
3. सूचनायाः अभावः - अपर्याप्तदत्तांशः ज्ञानं वा । 4. विक्षेपाः - अवधानस्य अवरोधात्मकानि कारकाणि आन्तरिकानि उत बाह्यानि ।

## कथं चिन्तनस्य विकासः करणीयः ?

उत्तमचिन्तनस्य विकासाय समीक्षात्मकचिन्तनस्य महत्त्वं दात्तव्यम् । अस्मिन् सूचनानां विश्लेषणं, तर्काणां मूल्याङ्कनम्, सुतर्कयुक्तनिष्कर्षाणां निर्माणं च भवति । एतत् कल्पनासु प्रश्नकरणं, विविधदृष्टिकोणानाम् अन्वेषणम्, सक्रियरूपेण श्रवणम् इत्यादिप्रविधीनां माध्यमेन प्राप्तुं शक्यते । एतदतिरिच्य चिन्तनस्य विकासाय अधोनिर्दिष्टाः अंशाः सहायकाः भवन्ति ।

1. चिन्तनस्य अभ्यासः
2. रचनात्मकचिन्तनम्
3. विचाराणां परिवर्तनम्
4. विविधदृष्टिकोणेन परिस्थितेः निरीक्षणम्
5. त्रुटीनां निरीक्षणम्
6. चिन्तनं मूल्याङ्कनं च
7. मानसिकस्थितेः परिवर्तनम्
8. असफलतायाः स्वीकारः
9. पन्थाह्वानानि न समस्यायाः उत्पादकानि सन्ति अपितु अवसराः इति चिन्तनम् ।
10. कस्यापि प्रश्नस्य अवगमनं तस्य समाधानान्वेषणम् एव चिन्तनस्य अधिगमस्य च प्रक्रिया अस्ति ।[१]

## उपसंहारः

चिन्तनं सर्वजीवसाधारणधर्मः । अतः चिन्तनम् आवश्यकम् । अन्यथा जीवनं निरर्थकं भवति । विशिष्य शिक्षाक्षेत्रे चिन्तनस्य मुख्या भूमिका अस्ति । उत्कृष्टं चिन्तनम् उत्तमं भवति । अत्यधिकं चिन्तनं न कर्तव्यम् । अनावश्यकम् अत्यधिकं वा चिन्तनं हानिकारकं भवति ।

## सन्दर्भग्रन्थाः


1. Mind its mysteries and control - Sri Swami Sivananda, The Divine Life Society, Shivanandanagar
2. THINK STRAIGHT - Darius Foroux (chrome-extension://efaidnbmnnnibpcajpcgl\protect\discretionary{\char\hyphenchar\font}{}{}clefindmkaj/https://crpf.gov.in/writereaddata/images/pdf/Think_Straight.pdf)
3. समग्रशैक्षणिकमनोविज्ञानम् – प्रो.एच् एम् चन्द्राचार् अश्विनिरकाशनम्, राणेबेन्नूरु
4. शिक्षा मनोविज्ञान – एस के मंगल, PHI Learning private Limited, New Delhi
5. अधिगम कर्ता का विकास एवं शिक्षण अधिगम प्रक्रिया – डा.जे एस वालिया, अहं पाल पब्लिशर्स, जालन्धर
6. शिक्षा मनोविज्ञान – पी डी पाठक, विनोद पुस्तक मन्दिर आगरा


[१] The recognitions of a question quest for in answer - this is the process of thinking and also process of learning – mursell. शिक्षा मनोविज्ञान – पी डी पाठक, विनोद पुस्तक मन्दिर आगरा, छटा सम्स्करण – 1975 Page No. 270


ISSN : 2249-538X

# सनातनी शैक्षिकानुशासनव्यवस्था

डा. डि. वेणुगोपालरावः*
सहायकाचार्यः, के.सं.वि., गुरुवायूर् परिसरः
केरलम्

***लेखसारः*** *– शिक्षा काचित् सनैव भवति । तथापि तस्याः शिक्षायाः रूपं, स्वभावश्चापि तथैवेति कथने ऊहातीतविचाराः उत्तररूपेण समायान्ति । समस्तानि शैक्षिकतत्त्वानि अपि प्रत्येकं काले तथैव मानवं चिन्तायामुपस्थापयन्ति । शैक्षिकतत्त्वानां समेषां लक्ष्यसाधने, सफलीकरणे च शैक्षिकानुशासनव्यवस्था कशेरुकेवाधारभूता भवति । आधुनिकाः शिक्षाविदः आधिकारिक-मनुशासनं, दमनात्मकानुशासनं, मुक्तानुशासनं, प्रजातान्त्रिकानुशासनं, सामाजिकानुशासनं, शैक्षिकानुशासनम् इत्येवं रूपेण अनुशासनप्रकारान् बहुधा व्याख्यान्ति । तथापि शिक्षाक्षेत्रेषु मानवसंसाधनानां समेषाम् अनुशासनव्यवस्थां तु अगम्यगोचरा, दुस्स्वभावयुक्ता च दरीदृश्यते । अनुशासनं विना शिक्षासंस्थासु मानवसम्बन्धास्सर्वे लुप्तप्राया एव सन्ति । समाजे अस्मिन् न केवलं शिक्षाक्षेत्राणि, अपि च सामाजिकक्षेत्राणि सर्वाणि अपि अनुशासनराहित्यात् प्रभाविताः विद्यन्ते । इदमनुशासनं प्रशिक्षणेन, सदुपदेशेन वा मानवव्यवहारे न समुत्पद्यते । आधुनिकविचारान् तथा पाश्चात्यसिद्धान्तान् चातिरिच्य भारतीयज्ञानपरम्परायाः आधारभूतान् ग्रन्थान् सर्वान् सम्यगवलोकयामश्चेत् अनुशासनस्य सनातनतत्त्वानि संस्कृतसाहित्ये एव प्राप्यन्ते । प्रत्येककस्मिन् सामाजिकक्षेत्रे तत्सम्बद्धानुशासनाय इमानि तत्त्वानि सनातनानि, आधारतत्त्वानि भवन्तीति निश्चप्रचमेव ।*

## अनुशासनम्

**अनुशासनमिति** अनु इत्युपसर्गः तथा शासनमिति शब्दश्च वर्तेते । **अनु** इत्युपसर्गपूर्वक शास् अनुशिष्टौ इति धातोः निष्पन्नपदमिदं भवति । शास्यते अनेन इति शासनम् । अनेन जनाः शिक्ष्यन्त इति दण्डनार्थे तथा आज्ञार्थे च अर्थः वर्तते । परन्तु अनुशासनमिति पदं तु प्रत्येकं मानवस्य व्यवहारौन्नत्याय निर्दिष्टमेकं विशिष्टं पदं भवति । देवाज्ञा, गुरुवाक्यपरिपालनं, पितृवाक्यपरिपालनं, मातृसेवा, भ्रातृत्वभावः, वृद्धोपसेवनम्, अतिथिसत्कारः च इत्येतानि सनातनानि भारतीयभावनानि सर्वाणि अनुशासनस्य जीवप्रदानि भवन्ति । वेदोक्तं, शास्त्रोक्तमिति पदानि प्रयुज्य तत्र तत्र नियमाः आचाराश्च अनुशासनार्थे प्रतिबोधिताः विद्यन्ते । कथ्यते हि तत्र भगवद्गीतायाम् – (भ.गी.16.23-24)

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः । न स सिद्धिमवाप्नोति न सुखं परां गतिम् ॥ तस्माच्छास्त्रं प्रमाणं ते
कार्याकार्यव्यवस्थितौ । ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥

इत्थं शास्त्रविधानोक्तमिति पदेनापि यद्भणितं शास्त्रेषु तत्सर्वमपि अनुशासनस्य मुख्यतत्त्वमेव भवति । स्वानुशासनम् , आत्मसंयमनम्, आत्मनिर्भरता इत्येतानि पदानि अपि अनुशासनस्य सार्थकपदानि भवन्ति । इत्थं संस्कृतवाङ्मये बहुधा प्रयुक्तानि अनुशासनतत्त्वानि भारतीयानुशासनव्यवस्थां सर्वस्मात् पृथगीकरोति ।

## शिक्षासंस्थासु अनुशासनव्यवस्था

आधुनिककाले विद्यालयाः स्वीयपालनासूत्राण्याधारीकृत्य प्रचाल्यमानः कश्चन समुदाय इति गण्यते । विचारे अस्मिन् ज्ञातव्यः कश्चन विशेषांशः वर्तते यत् – माता इति नाम्ना अभिधीयमाना मिर्रा आल्फान्सा महोदयायाः No Big

---

***सम्पर्कसूत्रम्** - 9605729697, Email- csudvr81@gmail.com

creation is possible without discipline इति उक्तिर्विद्यते । तथापि प्रजातन्त्रकाले अस्मिन् स्वीयानुशासनाय प्राधान्यतां प्रयच्छन्ति । छात्राः स्वयमेव अनुशासनस्य नियमान् निर्णयान् रूपीकर्तुमर्हन्तीति स्वेच्छा प्रदीयते । अनुशासनस्योल्लङ्घने कथमाचरणीयं, कथं नाचरणीयमिति तथा कथं दण्डयेदिति छात्राः स्वयमेव निर्णयाधिकारिणः भवितुमर्हन्ति । वस्तुतः छात्राः सर्वे विद्यालयपरिवारे सर्वे वयं सदस्याः, उत्तरदायिनः, कर्तव्यपरायणाः भूत्वा अनुशासननियमाः अस्मत्सम्बद्धाः, अस्मदीयाः इति यदि चिन्तयेयुः जानीयुश्च, तर्हि तदैव विद्यालयाः प्रशान्तरूपेण शिक्षासंस्थाः भवितुमर्हन्ति । अन्यथा विद्यालयाः नाम्नापि विद्यालयाः इति कथने आधुनिककाले अनर्हाः भवन्ति । इत्थमधुना शिक्षासंस्थासु अनुशासनम् इति तत्त्वं स्वेच्छतया, सकारात्मकतया, सरलतया तथा सहजतया च सुसाध्यमभवत् । तत्र तु अनुशासनस्य विविधप्रकाराश्च विद्यन्ते । ते यथा –

1. दमनात्मकानुशासनम्
2. आधिकारिकानुशासनम्
3. मुक्तानुशासनम्
4. प्रजातान्त्रिकानुशासनम्
5. आदर्शानुशासनम्
6. आत्मानुशासनम्
7. आत्मनियन्त्रितानुशासनम्
8. निवारणात्मकानुशासनम्
9. सहायकानुसशासनम्
10. सकारात्मकानुशासनम्
11. मृदुलानुशासनम्
12. पुनःस्थापकानुशासनम्
13. सीमाधारितानुशासनम्
14. रचनात्मकानुशासनम्

इत्थं शिक्षाविदः अनुशासनस्य विचारान् दार्शनिकरीत्या, मनोवैज्ञानिकरीत्या, सामाजिकरीत्या, प्रजातन्त्ररीत्या चेति बहुधा प्रत्यपादयन् । आधुनिकाः अनुशासनप्रकाराः सर्वे सुखप्रदाश्चेदपि छात्रेषु शाश्वतमूल्यानां सम्पादने तु शिक्षासंस्थासु नाममात्रा इव वर्तन्ते । निर्दिष्टेषु अनुशासनप्रकारेषु छात्रकेन्द्रितदिशा मनोविज्ञानशास्त्रानुगुणं वैज्ञानिकता प्रतिपादिता चेदपि तदनुवर्तने अनुक्षणं नियमाः, मार्गदर्शनं, समयसारिणी, नियन्त्रणम्, आदेशाः, निरीक्षणं, मूल्याङ्कनं तथा रचनात्मकदण्डप्रदानमिति नैकानि कार्याणि सम्मिलितानि सन्ति । साम्प्रतिकशिक्षासंस्थासु छात्राणाम् अनुशासनमिति शैक्षिकतत्त्वं समेभ्यः शैक्षिकतत्त्वेभ्यः शिक्षकाणां कृते क्लिष्टात्मककार्यरूपेण वरीवर्ति । तेन शिक्षणं, प्रशिक्षणम्, अधिगमः, व्यवहारपरिवर्तनं, शीलनिर्माणं, सर्वाङ्गीणविकासः इत्यादीनां शैक्षिकलक्ष्याणां साधने शिक्षकाः, शिक्षाधिकारिणः तथा अभिभावकाः सर्वे अशक्ताः सञ्जायन्ते । शिक्षा व्यक्तेः जन्मारभ्य मरणपर्यन्तं तं प्रभावयति । शिक्षा तावदनुशासनेनैव सुसाध्येति साहित्यगतनैकानि उदाहरणानि प्रमाणत्वेन लभ्यन्ते । न केवलं साहित्यमपि तु आधुनिकानां समाजोद्धारकाणां जीवनचरितान्यपि तत्र प्रमाणान्येव ।

## सनातनः अनुशासनप्रकारः

शासनमिति पदमेव आधुनिकसाहित्यस्य वर्तते । वैदिकसाहित्ये सनातनसाहित्ये वा इदं पदम् आचारः, धर्मः, संस्कारः, रीतिः, व्यवहारः, मूल्यजीवनं, परम्परा, सम्प्रदायः, उत्तरदायित्वं, शीलता, चरित्रम्, गुणवत्ता, संयमनं, कर्तव्यपरायणता, परस्परसम्मानम् इत्यादि सामाजिकविषयान्तर्गतत्वेन उपबृंहितमासीत् । तस्मात् अधुना इदं पदं तत्साधनत्वेन तद्भिन्नपदरूपेणैव गण्यमानं दृश्यते । अत्रायं नियमः, इयमाज्ञा, अयमादेशः, अयमेव निर्देशः, देश-काल-परिस्थित्यनुगुणमत्रैवमेव व्यवहरेत इत्येवंरूपेण मानवैः स्वकार्यसाधनाय विविधगुणैरापादितं पदं भवति । सनातनकाले पारम्परिककाले वा सर्वे अपि धर्मनिष्ठतया स्वाचरणेनैव अनुशासनपराः आसन् । कथ्यते हि गीतायाम्

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् । आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥[१]

[१]भ.6अ. 5श्लो.


ISSN : 2249-538X

इति भगवतः वागेव प्रमाणं वर्तते यत् - स्वयम्मानवः स्वस्य रचनां कुर्यादित्यत्र । तथैव हि कथ्यते जगद्गुरुणा श्रीशङ्कराचार्येण विवेकचूडामणौ यथा -

उद्धरेदात्मनात्मानं मग्नं संसारवारिधौ । योगारूढत्वमासाद्य सम्यग्दर्शननिष्ठया ॥[१]

अर्थात् उत्तमविचक्षणेन आधात्मिकभक्त्या च सुःखदुःखादिविषयेषु लीनो भूत्वा धर्मबद्धतया स्वयं जीवेत । मानवः सदा स्वशक्त्या, स्वबुध्या एव उत्तरोत्तरं कर्मठः स्यात् । मानवः स्वयमेव मित्रं तथा आत्मनः स्वयमेव शत्रुः इति भवति । यदि मानवः स्वस्यात्मनः अर्थात् मनसिकस्थितिं स्वायत्तीकरोति, तर्हि तस्य सर्वत्र उत्तमस्थितिरेव भवति । मनसः विचारान् विचक्षणबुध्या चिन्तयामश्चेत् दुःखसागरे मानवः लीनो भवति । तथा पराधीनस्सन् सदा परैरादिष्टः भवति । कार्यकरणावसरे स्वयं मानवः योगारूढस्सन् स्वतार्किकबुध्या कार्यमाचरति चेत् निश्चितरूपेण जीवनं सार्थकं करोति एव ।

## सनातनानुशासनप्रक्रमे शमादिषद्कसम्पत्तिः

वैदिकसाहित्ये लौकिकसाहित्ये वा आत्मानुशासनाय बहुधोपायाः प्रदत्ताः वर्तन्ते । सामदानभेददण्डोपायाः इति नाम्ना साररूपेण उक्तं चेदपि दण्डस्योपयोगस्तु भारतीय-सनातनानुशासनप्रक्रमेषु अन्तिमः, आधुनिकानुशासनप्रक्रमेषु आद्यश्चावलोक्यते । दण्डः नाम नियमः, नियन्त्रणं तथा आदेश इति वा स्वीकर्तुं शक्यते । क्रमे अस्मिन् विवेकचूडामणौ निर्दिष्टः शमादिषद्कसम्पत्तिक्रमः अपि कश्चन समातनानुशासनप्रक्रम एव । सच्चिदानन्दः जगद्गुरुः श्रीशङ्कराचार्यः अस्य प्रणेता वर्तते । मुख्यतया गुरिशिष्यविचारान् विवेचयन्तः जगद्गुरवः गुरुशिष्ययोर्मिथः अपेक्षिताचारव्यवहारविषये ग्रन्थे अस्मिन् पवित्रभावनयैव अनुशासनस्य शाश्वततत्त्वानि आत्मानुशासनम्, आध्यात्मिकानुशासनं तथा स्वानुशासनमिति नाम्नापि समूचुः ।

## अनुशासने साधनचतुष्टयं तथा शमादिषद्कसम्पत्तिः

विवेकचूडामणौ प्रधानतया गुरुशिष्ययोः मिथस्सम्बन्धविषये संवादरूपेण विचाराः विवृतास्सन्ति । कथ्यते हि –

विवेकिनो विरक्तस्य शमादिगुणशालिनः । मुमुक्षोरेव हि ब्रह्मजिज्ञासायोग्यता मता ॥
साधनान्यत्र चत्वारि कथितानि मनीषिभिः । येषु सत्स्वेषु सन्निष्ठा यदभावे न सिध्यते ॥[२]

चत्वारीमानि साधनानि मानवाधीने भवन्ति चेत् आध्यात्मिकज्ञानसम्पादने मानवः सफलः भवति । आध्यात्मिकानुशासनं नाम श्रद्धा-निष्ठा-यम-नियम-समन्वितं भवति । तदभावे मानवकर्म सर्वमपि विफलं भवति । मानवस्य जीवनप्रक्रमेषु विविधकार्याणां साधने पूर्वकृतकार्यस्यानुभवः कारणभूतः इति कथ्यते । स अनुभव एव अनुशासनमिति अवधेयः । सफलता विफलता इति एतत्तत्त्वद्वयमपि अनुशासनाधारितमेव । मानवजीवने अनुमानोहापो-हातीतान्यपि लक्ष्याणि साधनीयानि चेदिदमनुशासनमेव निमित्तकारकं भवति । आदौ नित्यानित्यवस्तुविवेकः परिगण्यते ।

इहामुत्रफलभोगविरागस्तदनन्तरम् । शामादिषद्कसम्पत्तिर्मुमुक्षुत्वमिति स्फटम् ॥ इति ।

इत्थमत्र चत्वारि साधनानि कथ्यन्ते यथा – नित्यानित्यवस्तुविवेकः, इहामुत्रफल-भोगविरागः, शमादिषद्कसम्पत्तिः, मुमुक्षुता इति साधनचतुष्टयविचारस्य सारतत्त्वमेव अनुशासनमिति कथने नातिशयोक्तिः । तत्राधुनिकाः आनन्दप्राप्तये आजीवनं समस्तविषयेषु इच्छां प्रदर्शयन्तः समग्रं नाशयन्ति । तात्कालिकसुखानि परित्यज्य शाश्वतविषयेषु एव रताः

[१]वि.चू.श्लो.9
[२]वि.चू.18

ISSN : 2249-538X

भवन्ति चेत् साधनचतुष्टये आग्रगामिनः भवन्ति ।

1. **शमः -** साधनचतुष्टये तृतीयं शमादिषड्कम् अनुशासनदिशा विचार्यते । आद्यस्तु शमः -

विरज्य विषयव्राताद्दोषदृष्ट्या मुहुर्मुहुः । स्वलक्ष्ये नियतावस्था मनसः शम उच्यते ॥[1]

शमस्तु शमः शान्तिः इत्यमरः । शमु- उपशमने इति धातुः । कामक्रोधादीनामभाव एव शमः इति कथ्यते । सुस्पष्टं कथ्यते हि तत्र मनसः स्वलक्ष्ये नियतावस्था एव शमः इति । आद्यन्तवत्त्वबहुवित्तव्ययायाससाध्यत्वपरिणितिविरसत्वादिदोषान् पुनःपुनः विषयेषु पश्यतः पुरुषस्य तस्य नियतमिति विषयदोषदर्शनं वैराग्यहेतुरिति कथ्यते । भगवद्गीतायां च उक्तं वर्तते यत् – (भ.गी.3.40.41.42)

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते । एतैर्विमोहत्येष ज्ञानमावृत्य तिष्ठति ॥
तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ । पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥
इन्द्रियाणि पाराण्याहुरिन्द्रियेभ्यः परं मनः । मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥
एवं बुद्धेःपरं बुद्ध्वा संस्तभ्यात्मानमात्मना । जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥

इत्थं इन्द्रियाणि इन्द्रियार्थेभ्यः संयमेत । इन्द्रियाणां तथा इन्द्रियार्थाणां च दोषान्विज्ञाय तेभ्यः सततं दूरे भवेत् । तेभ्यः मुक्तः एव मानवः शमसम्पादने योग्यः भवति । शिशोः जन्म आरभ्येयं स्थितिः प्राचीनकाले ज्ञानपरम्परायां भवति स्म । विविधविषयेषु नियतावस्था पारिवारिकजनैः पाल्यते स्म । परन्तु अधुना तु शिशोः जन्म आरभ्य तत्प्रयासाभावादपि मातापितरौ तथा परिवारीयाश्च स्वीयेच्छाः पूरयितुं शिशोः नाम्नि सर्वं साधयन्तः वर्तन्ते । क्रमे अस्मिन् शिशुः कालक्रमेण इन्द्रियार्थवशो भूत्वा सर्वकार्येषु अशान्तः जायते । इत्थं पालितः शिशुः कालान्तरे समाजेन बहुधा प्रभावितो भूत्वा शैक्षिकसंस्थासु अनुशासनहीनः पठनाद्विमुखो दृश्यते ।

मानवमनः चञ्चलमिति, सदा सर्वस्मात् समाकर्षितं च भवतीति सर्वविदितमेव । मनः अवाञ्छितधोरण्या एव सर्वत्र प्रविशति । अन्तर्निहितधारणया अनया मनः सर्वान् सर्वत्र नयति । तादृशस्य मनसः नियन्त्रणमेव अत्र प्रथमं सोपानं भवति । शिश्ववस्थायामेव बालकेषु इदं भवितुमर्हति । तथापि समानतकाले तदृशी एव शिक्षाव्यवस्था कल्पिता या बालकाय भाविजीवने सोपकृता स्यात् । भारतीयज्ञानपरम्परा इति भण्यमानः आधुनिकभारत-शिक्षालोकः पुनः तादृशगुरुकुलपद्धत्यै अग्रेसरः भवेत् । तात्कालिकानि आनन्ददायिकानि इमानि आधुनिकवासवसनाशनादीनि भोगानि जीवनसाफल्याय नेति आचरणेन सह बोधयामश्चेदेव बालाः कालान्तरे स्वानुशासिताः भवितुमर्हन्ति । अयं विचारः अनुशासनस्य प्राथमिकविचारः भवति । अत एव बाह्यवस्तूनि सदा दुःखकारकाणीति, ततः नित्यानित्यवस्तुविवेकता अनिवार्यतया सर्वेषु भवेदिति उक्तं वर्तते । तस्माद् मनसः स्थिरता एव शमः इति कथ्यते । यदि स्वयं बालकः इत्थमारम्भकालात् शिक्षितो भवति, तर्हि सः स्वानुशासितः सनातनमेव कार्यमाचरणे शक्तिमान् भवति ।

2. **दमः -** शमादिषड्कसम्पत्तौ दमः द्वितीयः, उपरतिः तृतीयः भवति । ज्ञानेन्द्रियाणां तथा कर्मेन्द्रियाणामपि

[1]वि.चू.22

इन्द्रियार्थेभ्यः दूरे संस्थापनमेव दमः इति कथ्यते । कथ्यते हि यथा –

विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके । उभयेषामिन्द्रियाणां स दमः परिकीर्तितः ॥[१]

ज्ञानेन्द्रियाणि तथा कर्मेन्द्रियाणि च मानवस्य व्यवहारे नियन्त्रणे च प्रमुखानि भवन्ति । तेषामिन्द्रियाणां नियन्त्रणं तत्तत्स्थाने सदा स्यात् । इन्दियाणां नियतं नियन्त्रणमेव स्वानुशासनमिति कथ्यते । स्वीयनियन्त्रणं मानवं बहुधा बाह्यवस्त्वाकर्षणात् दूरे स्थापयति । मानवस्य स्वीयनियन्त्रणं मनसः प्रभावादतिरिच्य विविधकार्येषु प्रभावयुक्तं भवति । अयं भावः एव दमः इति कथ्यते । साम नाम मनस्सम्बद्धमेव स्वीयनियन्त्रणमिति, दमः नाम सम्पूर्णेन्द्रियव्यवस्थायाः सम्बद्धं स्वीयनियन्त्रणमिति श्रीशङ्कराचार्यः । अर्थात् उभयधा विद्यमानानामिद्रियाणां तत्तत्केन्द्रे नियन्त्रणमेव दम इति कथयन्ति । इन्द्रियाणि विषयेभ्यः परावर्त्य संस्थापनमेव दमः इति परिलक्ष्यते । कथ्यते हि भगवद्गीतायाम् –

इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ।[२]

3. **उपरतिः** –

दमरूपबहिरिन्द्रियनिग्रहसाध्या उपरतिः इति कथ्यते । बाह्यानालम्बनं वृत्तेरेषोपरतिरुत्तमा ॥[३]

तथैवोपरतिः नाम काचित् मानसिकान्तर्गतस्थितिः भवति । कथ्यते हि – **तटाकोदकस्य तटाकच्छिद्रद्वारा गत्य यथा क्षेत्राद्यात्मना परिणामः तथैव अन्तस्थस्य मनसः क्षेत्रादिच्छिद्रद्वारा बहिरागत्य शब्दादिविषयाकारेण परिणामरूपा वृत्तिः एव उपरितिः** । निगृहीतेषु च बहिरिन्द्रियेषु अन्तस्थं मनः न बाह्याकारेण परिणमते । अत्र बाह्यवस्तूनि मानवस्योपरि प्रभावं जनयितुमशक्तानि भवन्ति । सामान्यतया इन्द्रियाणि मानवं इन्द्रियार्थसमस्यात्मकेन्द्रजाले सथापयन्ति । तदनुसृत्य मनः संयमनरहितं चञ्चलञ्च भूत्वा मानवं विपदि नयति । इन्द्रियार्थेभ्यः प्रभावितः मानव एव अत्रोदाहरणम् । तदितरः देवः स्थितधीः, मुनिः, ऋषिः संयमी, स्वात्मानुशासनः कदापि इन्द्रियार्थप्रभावितः न भवति । अतः यथा बाह्यविषयेभ्यः अनुशासितः, तथैवान्तरिकविषयेभ्यश्च मानवः स्वानुशासितो भवेदिति कथ्यते ।

4. **तितिक्षा** – यदा मनः बाह्यं नावलम्बते तदा शीतोष्णादिद्वन्द्वस्य अप्रतीयमानत्वात् कर्मकालादिवशात् तत्प्रसक्तावपि तत्सहनरूपा तितिक्षा सिध्यतीति कथ्यते । यथा –

सहनं सर्वदुःखानामप्रतीकारपूर्वकम् । चिन्ताविलापरहितं सा तितिक्षा निगद्यते ।[४]

शैत्येन उष्णेन च मानवस्य व्यवहारे प्रभावः लोकसिद्ध एव । कम्बलेन व्यजनेन च तद्दुःखप्रतीकारः अपि लोकसिद्ध एव । यदि कदाचित् तद्वस्त्वभावे किं करणीयमिति तु मानवस्य सदा विचारः, चिन्ता प्रलापश्च भवति । सन्दर्भे अस्मिन् चिन्ताविलापरहितं यत्सहनं भवति तदेव तितिक्षा इति कथ्यते । इयं तितिक्षा प्राचीनकाले प्रत्येकं छात्रस्य व्यवहारे भवति स्म । गुरोः कथनादेव कठोराणि कार्याणि सहनभावनया साधयन्ति स्म छात्राः । अधुना छात्रेषु, शिक्षकेषु अभिभावकेषु अथवा शिक्षासम्बद्धजनेषु केषुचिदपीयं भावना न दृश्यते । लालनताडनापेक्षया

[१]वि.चू.23
[२]भ.गी.2.58
[३]वि.चू.24
[४]वि.चू.25

तितिक्षाभावसम्पादनपूर्वकं शैक्षिकवातावरणं शिक्षाक्षेत्रेषु स्यात् । तत्रादौ शिक्षकाः कृतप्रयत्नाः भवेयुः ।

छात्राः शिक्षकाः वा समस्याभिः पीडिताः वयमिति चिन्तनापेक्षया ताभ्यः विमुक्तिमार्गं चिन्तयेयुः । सकारात्मकक्षमा एवात्र तितिक्षा इति कथ्यते । मानवस्य स्वास्थ्यजीवनाय यथा सामञ्जस्यं तथैव तितिक्षापि अपेक्षिता भवति । सुखदुःखादिविचारेषु समभावनैव ततिक्षा भवति । तितिक्षायाः सम्पादने मानवः द्विगुणातीतशक्तिमान् स्यात् । मनसः न्यूनता कदापि नानुभोक्तव्या । सहनभावनाभावात् मानवस्यास्तित्वमेव प्रश्नार्थके भवतीति दार्शनिकाः । अधुना शिक्षासंस्थासु भावनेयं सर्वेषु लुप्ता वर्तते । मानापमानादयः मानवजीवने सर्वसाधारणतया भवन्ति । तन्नियन्त्रणापेक्षया उन्नतस्थितौ विचार्य जीवनाय अपेक्षितस्थिरतितिक्षाभावं वर्धयेत् । आनन्देन सर्वविधकार्यसाधनं तितिक्षया भवति ।

5. **श्रद्धा** – वस्तूपलब्ध्यसाधारणकारणं श्रद्धां निरूपयति यथा –

शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यावधारणा । सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते ।[१]

सतां वाक्ये विश्वासाभावे लोके यः कोपि पुरुषः तदनुसारेण न प्रवर्तते । अत्रातीन्द्रिये शास्त्रार्थे किं वा वक्तव्यम् । कथ्यते हि – गीतायाम् भ.गी.9.3

अश्रद्दधानाः पुरुषाः धर्मस्यास्य परन्तप । अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥[२]

दृढविश्वासेन अमितावधारणया वा यया वस्तूपलभ्यते सा एव श्रद्धा इति कथ्यते । अर्थात् गुरुभिः ग्रन्थैश्च यदुपदिश्यते तत्सर्वं सत्यमिति दृढविश्वासेन स्वीकरणमेव श्रद्धा इति कथ्यते । निश्चलविश्वासी समेषां गुरुजनानां वाक्यानि दृढबुद्ध्या समाचरन्ति । सर्वाणि शास्त्राणि सत्यार्थबोधनायैव सद्भिः ग्रथितानि सन्ति । तानेव गुरवः बोधयन्तीति विश्वासः सम्पादनीयः । परन्तु अधुना शिक्षाक्षेत्रे विश्वासाभावः सर्वत्र सर्वेषु विषयेषु दृश्यते । पाश्चात्यसंस्कृतेः प्रभावः अत्र हेतुः वर्तते । मूल्यरहितसुखप्राप्तिरपि श्रद्धाभावे कारणं भवति । शिक्षाक्षेत्रे छात्रेषु शिक्षकेषु च परस्परसद्भावानाभावात् श्रद्धाभावारहिताः अनुशासनहीनाः जायन्ते ।

सत्यग्रहणमेव श्रद्धा इति कथ्यते । पूर्वजैः, गुरुभिः, अभिभावकैः च यत्कथ्यते तत्सत्यमिति भावना छात्रेषु अनुशासनसम्पादने प्रधानभूता भवति । तद्वदाचार्याः स्वाचरणेन छात्रेषु श्रद्धां वर्धयेयुः । तदनु छात्राः स्वानुशासितास्सन्तः लक्ष्यगामिनः भवितुमर्हन्ति । अहं विश्वसिमि इति केवलं कथनं व्यर्थकमेव भवति । सानुकूलवैखर्या शतं प्रतिशतमाचरणे सशक्ताः भवेयुः । एतादृशमनुशासनमेव गुरुपरम्परायाः आधारभूतशिला आसीत् । सैव परम्परा श्रद्धा वा छात्रेषु अनुशासनाय सम्पादनीया भवति ।

6. **समाधानम्** – शमादिषड्कसम्पत्तौ इदमन्तिमं भवति । तथापि इदमेव श्रद्धावन्तं मानवं प्रतिपदयति । कथयति-

सम्यगास्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा । तत्समाधानमित्युक्तं न तु चित्तस्य लालनम् ॥[३]

समीचीनतया लक्ष्ये एव बुद्धेः संस्थापनमेव समाधानमिति कथ्यते । सर्वेषु विषयेषु चित्तस्य लालनं न स्यात् । स्वलक्ष्ये नियतावस्था एव समाधानमिति कथ्यते । शमः इति अनुशासनस्य साधनमिति कथ्यते चेत्, समाधानं

[१]वि.चू.26
[२]गीतायाम् भ.गी.9.3
[३]वि.चू.27


ISSN : 2249-538X

तस्यैव फलमिति वक्तुं शक्यते । लोके शिशवः विशेषतो रुदन्ति चेत् तदिष्टं दत्वा समाधत्ते जनाः इति विदित एवांशः । लालनं पालनमाद्यावस्थायां भवितुमर्हति, न तु फलीभूतसाधनावस्थायाम् । अनुशासनसम्पादने अपि आद्यावस्थायां लालनं पालनं किञ्चिदेव हितकरं भवति । स्तरानुगुणं तु उन्नतस्तरेषु छात्रस्याहितायैव भळति । अतः अनुशासनपरकगुणसम्पादने समाधानपराः भवेयुः छात्राः । तत्समाधानमण्डितस्यैव छात्रस्य मुमुक्षुत्वनाम्ना अनुशासनं सम्भवति ।

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः । न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥

इति सुभाषितकारस्यापि उक्तिरपि समाधानस्य तत्त्वानि ज्ञापयति । लक्ष्यं यावत् प्रयासः करणीयः । केवलं मनसा चिन्तयन्तः कार्यनिष्ठतां त्यजामश्चेत् कार्यसिद्धिः न भवति । तथैव शमादिषड्कसम्पत्त्यनुगुणं मुमुक्षुः लक्ष्यप्राप्तिपर्यन्तं यथा यतेत तथैव अनुशासनक्षमतायै समाधानपर्यन्तं प्रयततैव । अनुशासनेन अधिगततत्त्वानि जीवनव्यवहारे वर्तेरन् । तदा एव अनुशासनं अर्थयुतं भवति ।

## उपसंहारः-

सम्प्रति शिक्षासंस्थासु अनुशासनविचाराः पत्रपरिमिताः वर्तन्ते । आचरणे तु ते विचाराः आरम्भदिवसपरिमिताः एव भवन्ति । छात्राः सदा अनित्यविषयेषु तत्पराः दृश्यन्ते । बाह्यमान्तरिकं वा अनुशासनं तेषु न दृशयन्ते । कक्षान्तं, विद्यालयसयमं तथा शिक्षान्तं वा अनुशासनपराः छात्राः भवेयुः । कामात्, लोभात्, क्रोधात्, बलात्, अधिकारात् दमनात् वा सम्प्राप्तानुशासनं क्षणिकमेव भवति । शिक्षासंस्थास्वधुना विद्यमानम् अनुशासनमङ्कप्राप्तये, न तु मानवनिर्माणाय इति यथार्थमेव । सामान्यजनापेक्षया विद्यालयीयच्छात्राः, शिक्षिताः जनाः एव अधिकाधिकतया असाङ्घिककार्येषु परपीडनादिषु कार्येषु निमग्नाः सन्तीति अनुसन्धानकार्याणि । प्रयोजनरहिताय तात्कालिकानुशासनाय प्रयत्नापेक्षया शाश्वतानुशासनाय विद्यालयाः यतेरन् । सनातनी परम्परागता अनुशासनव्यवस्थेयं नवशिक्षानीतेः लक्ष्यप्राप्तये, समग्रच्छात्रनिर्माणे च सशक्ता भवतीति शम् ।

## सन्दर्भग्रन्थसूची–


1. विवेकचूडामणिः, श्रीमच्छङ्कभघवत्पादाः, श्रीश्रीजगद्गुरुशङ्कराचार्यमहासंस्थानम्, दक्षिणाम्नायश्रीशारदापीठम्, श्रृङ्गेरी, 2022.
2. विवेकचूडामणिः, परमहंसश्रीमच्छङ्कराचार्यः (अरविन्दानन्दयतिप्रणीत अद्वैतामृत-बोधिनीव्याख्योपेतः), विद्या-भवनप्राच्यविद्याग्रन्थमाला, चौखम्बा विद्याभवन, वाराणसी, 1998.
3. The Message of Vivekachudamani (An Exposition of Vivekachudamani in the light of modern thought&modern needs), Swami Ranganathanada, Advaita Ashrama, Kolkatta, 2021.
4. Foundations of Education, Dr. A. S. Ramakrishna, New era Publications, Guntur, 2020.

# तन्यता

डा. अरविन्दकुमारसोमदत्तः*
सहायकाचार्यः, के.सं.वि., रा. गा. परिसरः
श्रृङ्गेरी

***लेखसारः*** *– अस्मिन् काले प्राणिनां जीवने तन्यता साधारणरूपेण प्रविशति। तन्यता एका शारीरिकी मानसिकी कम्पमानशैली च वर्तते। तन्यता इति पदं latin भाषातः उत्पन्नम् अस्ति। अस्य पदस्यार्थः stress इति। तन्यतायाः प्रकारद्वयं वर्तते। एका शारीरीकी तन्यता अपरा मानसिकी तन्यता च। शारीरिकी तन्यता वेदनारूपेण, स्नायुचलनरूपेण च ज्ञायते। मानसिकतन्यता मानसिक-अस्थिरता, निराशारूपेण च ज्ञायते। एषा तन्यता कार्यस्य अधिकभारः, धनसमस्या इत्यादि बहूनिकारणेन सम्भवति। तन्यतायाः दूरीकरणार्थं विविधोपायान् वयं चिन्तयाम आचरामः चेत् तन्यतां दूरीकृत्वा मानसिकप्रशान्तं प्राप्नुमः।*

***कूटशब्दाः*** *– शारीरिकतन्यतायाः लक्षणानि, मानसिकतन्यतायाः लक्षणानि, तन्यतायाः कारणानि, तन्यतायाः प्रकाराः, तन्यतायाः शरीरे प्रभावः, तन्यतायाः मनसि प्रभावः, तन्यतां दूरीकर्तुम् उपायाः।*

तन्यता मानवानां एकः अनुभवः अस्ति। तन्यता इत्युक्ते stress इति वक्तुमर्हन्ति। stress इति पदं latin भाषातः निष्पन्नं जातम्। French भाषायां Distresse तः stresse इति आग्लभाषायां अनूदितम्। अस्य पदस्यार्थः tight and narrow इति। वैज्ञानिकपरिभाषायां तन्यता एका शारीरिकप्रक्रिया, यया किमपि वाञ्चितं चेत् शारीरिकप्रतिक्रियायां भिन्नता दृश्यते। तन्यताम् अनुभवति चेत् शरीरे विद्यमान-अङ्गानि कम्पमानाः जायन्ते। अद्यतनकाले मानवजीवने मानवानाम् एका समस्या तन्यता। एषा तन्यता सर्वेषां वयसि विद्यमानानां जनानां, विभिन्नस्तर बालकानां युवानां शरीरे प्रविशति तथा शारीरिकरूपेण मानसिकरूपेण सर्वे क्षीणाः भवन्ति। तन्यता मानवेषु सर्वदा भवति उदाहरणरूपेण परीक्षा अस्तीति कारणतः जनः तन्यताम् अनुभवति, उद्योगनिमित्तं चिन्ताविषये, पारिवारिकसमस्याः सन्तीति कारणेन, आर्थिकसमस्यायाः कारणेन, पति-पत्नी इति बन्धुत्वकारणेन, सामाजिकसमस्या इत्यादिकारणेन तन्यताम् अनुभवितुं जनः शक्नोति। अद्यतनकाले social media and Internet अत्यधिकोपयोगेन तन्यतां वर्धयन्ति। जनाः सर्वदा अन्यैस्सह तुलनां कृत्वा असन्तोषं, तन्यतां च प्राप्नुवन्ति।

तन्यता द्विधा - १) शारीरिकतन्यता २) मानसिकतन्यता

## शारीरिकतन्यतायाः लक्षणानि

१) **शिरोवेदना** – सामान्येन तन्यतायाः शिरोवेदना (Headache) इत्युक्ते शिरःप्रदेशे उत्पन्न वेदना। एषा स्वल्पातिरेकात् गभीरं रूपं धारयितुं शक्नोति। एषा शारीरिकस्य श्रमः, निद्राभावः, असन्तुलित आहारः, ग्रीवायाः जडत्वम्, धूमपानम् एवं मद्यपानं च इत्यादि प्रभावेन जायते। शिरोवेदनेन ललाटे, मस्तिष्कस्य पश्चमभागस्य च तीव्रता भवति। येन कारणेन एकाग्रतायाः अवरोधः जायते। कार्यं कर्तुं शरीरं न सहते।

२) **शारीरस्य कम्पनम्** – तन्यताधारेण शरीरे विद्यमान स्नायुचलनम्, वेदना, स्पर्शम् इत्यादि।

३) **अधिकतयाश्वास-प्रश्वासः** - सामान्यतः अपेक्षया तीव्रगत्या वा गहनरूपेण श्वसनम्। एषा अवस्था शरीरस्य वातायनतन्त्रे असन्तुलनं कल्पयति। इयम् अवस्था शारीरिकतन्याताधारेण सम्भवति।

***सम्पर्कसूत्रम्** - 9059661960, Email- aravind69696@gmail.com

## मानसिकतन्यतायाः लक्षणानि

१) **कोपप्रदर्शनम्** – कोपः मनसः एकः प्राकृतिकस्वभावः । यः विविधकारणै उद्भवति । येन प्रतिलघुविषयेषु कोपं प्रदर्शयति ।

२) **मानसिक अस्थिरता** – सर्वदा चिन्तामग्नो भूत्वा मानसिक प्रशान्ततां दूरीकरोति । मानसिकस्थिरत्वविषये अस्थिरतां प्राप्य अरिषड्वर्गस्य द्वारम् उद्घाटयति ।

३) **निराशा** – निराशा दुःखजनक-अवस्था अस्ति । या प्रत्याशायाः अभावः ।मनुष्यः जीवनस्य विभिन्नासु अवस्थासु निराशाम् अनुभवति ।

४) **एकाकी इति भावना** – एकाकित्वं मनसि जायमान एकः भावः । सः भावः मानवस्य आत्मानं एकाकित्वम् आपादयति । एषः भावः कासुचित् परिस्थितिषु स्वाभाविकः भवति । दीर्घकालिकं भूत्वा मानसिकस्वास्थस्य बाधाजनकः अस्ति । सम्बन्धानाम् अभावेन एकाकित्वं प्राप्नोति ।

## तन्यतायाः कारणाणि

१) **कार्यस्य अधिकभारः** - जनचतुष्टयस्य कार्यस्य एकः एव करोतीति कारणतः तन्यताम् अनुभवति । कार्यस्य भारः आधिकतया भवतीति मानसिकक्लेशम् अनुभवति यथा – software जनः ।

२) **धनसमस्या** – धनस्य विषये चिन्तनं कृत्वा तन्यतां प्राप्नोति । यः व्यापारं करोति सः मानसिकदृढतां सम्पादयेत् नोचेत् तन्यातायाः तीव्रस्थायीं प्राप्य शरीरस्य मानसिकरूपेण दुर्बलतां प्राप्नोति ।

३) **बन्धुत्वस्य समस्या** – परिवारैस्सह मित्रैस्सह संधर्षः भवति चेत् तन्यता उत्पद्यते । जीवने विवाहसम्बन्ध उत्कृष्टः भवति । भार्याभर्तयो सम्बन्ध विच्छिन्नः स्यात् तर्हि तन्यतां अनुभूय उन्मत्तो भवति ।

४) **स्वास्थ्यसम्बन्धित चिन्ता** – शरीरस्य रोगाः मानसिकरोगाः वा विषयेषु चिन्तनं कृत्वा दुर्बलः भवति । अतः स्वास्थ्यविषये अधिकचिन्तनं न भवेत् स्वास्थ्यस्य कृते उपचारः कुर्यात् ।

## तन्यतायाः प्रकाराः

१) **तीव्रतन्यताः** - तीव्रतन्यता अल्पकालमेव भवति । वारं वारं मनसि प्रविशति । यथा - मञ्चमुपरिगमनात् पूर्वं मानसि विद्यमान कम्पयेव । शिरोवेदना, शारीरिककम्पः इत्यदि भवितुमर्हन्ति ।

२) **पूर्वतन्यता** – पूर्वतन्यता अधिककालपर्यन्तं तिष्ठति एवं निरन्तरं भवति । मनसि उत्तमसंस्काराः न भवन्ति चेत् कुसंस्कारप्रभावेन पूर्वतन्यतां प्राप्य निरन्तरं वेदनाम् अनुभवति मानसिकस्तरः न सम्पादयति च । कुसंस्कारं मनसः योगद्वार निर्मूलयित्वा तन्यतां दूरीकर्तुं शक्यते ।

३) **एपिसोडक् तन्यता** – एपिसोडिक् तन्यता वारं वारं समये मनसि प्रविशति । तदा शारीरिकरोगाः शरीरे प्रविशन्ति । यथा- विषज्वरः प्रतिदिनं एकस्मिन् समये एव प्रविशति तदा बहु अस्वस्थः भवति । एषः रोगः दीर्घकालमपि भवति ।

ISSN : 2249-538X

## तन्यतायाः शरीरे प्रभावः

१) **हृदयप्रणाली** – हृदये अधिकरक्तप्रसारेन उत रक्तप्रसाराभावेन हृदयसम्बन्धित रोगाः समायान्ति। एषः रोगः तन्यता कारणेन शरीरे प्रविशति। यथा – Heart attack, इत्यस्मिन् विषये Operation of heart, stunts of heart इत्यादि रोगस्य चिकित्सां कुर्यात्।

२) **प्रतिरक्षाप्रणाली** – रोगः सामायाति चेत् शरीरे विद्यमान कणाः रोगं प्रति विरुद्धतया या युद्धं करोति सा प्रतिरक्षाप्रणाली इति। तन्यता कारणेन प्रतिरक्षाप्रणाली क्षीणा भवति अतः रोगः इतोऽपि व्यापकेन शरीरस्य बाधां जनयति।

३) **पाचनक्रिया** – तन्यतया सर्वदा उदरे वेधना भवति। पाचनक्रिया शुद्धिः न भवति तर्हि उदरसम्बन्धित-रोगाः समायान्ति।

## तन्यतायाः मनसि प्रभावः

१) **स्मृतेः हानिः** - मनसि तन्यता प्रविशति चेत् स्मृतेः हानिः जायते। अधिकतन्यतया शनैः स्मरणशक्तेः लोपो भवति।

२) **एकाग्रतायाः न्यूनता** – तन्यतया मानसिकरूपेण चाञ्चल्यम् अप्नोति तदा एकाग्रतायाः लोपो भवति। स्थिरबुद्धिः नश्यति च।

३) **निर्णयं कर्तुं सामर्थ्याभावः** - मानसे कम्पमान तन्यतया जायते चेत् तदा निर्णयं स्वीकर्तुम् अपि न शक्यते। मानसिकरूपेण दुर्बलः वर्तते।

४) **प्रतिक्रियाचिन्तनम्** - प्रतिक्रियाचिन्तनमपि तन्यतया जायते। प्रतिक्रिया चिन्तनेन मनसि विद्यमान स्तरः परिवर्तितः जायते। तदा विभिन्नचिन्तनं कृत्वा भीतिं प्राप्य कार्यस्य विमुखः जायते।

## तन्यतां दूरीकर्तुम् उपायाः

**१) योगः** – योगेन मनसिविद्यमान कुसंस्कारं दूरीकृत्य तन्यतां नानुभवति। मानसिक प्रशान्ततां प्राप्नोति। एकाग्रतां सम्पाद्य कार्योन्मुखः वर्तते। उत्साहवर्धनं करोति। प्रतिकूलचिन्तनात् दूरीकरोति।

योगसाधकत्वानि –

उत्साहात्साहसाद्धैर्यतत्त्वज्ञानाच्चनिश्चयात्। जनसङ्गपरित्यागात् षड्भिर्योग प्रसिद्धति ॥[1]

एतैः तत्त्वैः तन्यता दूरीभवति।

योगबाधकतत्त्वानि – अधिकभोजनम्, अधिकपरिश्रमः,अधिकभाषणम्, नियमपरिपालने कष्टम्, अधिकजनैस्सह सम्पर्कः, मनसि चाञ्चल्यम् च एतानि तत्त्वानि तन्यतां जनयन्ति।

**२) व्यायामः** - व्यायामेन शरीरे रक्तप्रसारस्य संयमनं कृत्वा तन्यतां दूरीकरोति। व्यायामेन शरीरः श्रान्तः भवति तदा कुचिन्तनस्य अवरोधः जायते। उत्तमचिन्तनं कृत्वा तन्यतां न्यूनीकर्तुं शक्यते।

[1] हठयोगप्रदीपिका


ISSN : 2249-538X

**३) प्राणायामः** - शरीररस्य प्रशमननिमित्तं तन्यतां न्यूनीकर्तुं च प्राणायाम अत्यन्तोपकरोति। शारीरिक,मनोनिग्रहार्थं प्राणायामं कुर्यात्। तदा मनः सौम्यत्वं प्राप्नोति।

मनप्रसादसौम्यत्वं मौनमात्मविनिग्रहः। भावसंशुध्दिरित्येतत्तपोमानसमुच्यते ॥[1]

## प्राणायामस्य महत्त्वम्

१) प्राणायामेन पापस्य अज्ञानस्य च नाशो जायते।
२) प्राणायामेन मनः स्थिरः जायते।
३) प्राणायामेन प्रत्याहार-धारणा-ध्यानादीनां स्थरतया सम्पोषणेन समाधिपर्यन्तमायाति।
४) प्राणायामेन शरीरस्य सम्पूर्णविकासो जायते।
५) प्राणायामेन अस्माकं मानसिकविकासो वर्धते।
६) प्राणायामेन शरीरस्य रोगः समाप्यते।
७) प्राणायामेन सकारात्मचिन्तनं (Positive Thinking) भवति।
८) प्राणायामेन मानव आदर्शो भवितुमर्हति।
९) प्राणायामेन बुभुक्षा वर्धते।

उत्तमाहारः - उत्तमाहारात् तन्यता नभवति अतः भगवद्गीतायाम् आहारस्य विषये भगवान् उक्तवान्।

आयुसत्वबलारोगसुखप्रीतिविवर्धनाः।रस्याः स्निग्धा स्थिरा हृद्या आहाराः सात्विकप्रियाः ॥[2]

सात्विकाहारस्य आयुः बलं, रोगस्यमुक्तिः सुखम्, स्थिरत्वम्, प्रीतिं च वर्धते।
संगीतश्रवणम् – वाद्यश्रवणेन, गीतश्रवणेन मनः तन्यतायाः दूरीभवति। शनैः शनैः तन्यतां दूरीकृत्वा मानसिकाह्लादं प्राप्नोति।
क्रीडाः - शारीरिकक्रीडाः (kabaddi, volliboll, footboll, swimming, kho kho, shatle) इत्यादि क्रीडन्ति चेत् तन्यता दूरीभवति।
मञ्चस्य उपरि गमनम् – सर्वदा मञ्चे नृत्यम्, नाटकम्, भाषणं कुर्वन्ति चेत् तन्यता मनसः दूरीभवति।
सकारात्मकचिन्तनम् – सर्वदा अनुकूलचिन्तनेन तन्यता दूरीभवति। अङ्गीकरणेन मानसिकचाञ्चल्यं न भवति।
एते उपायाः तन्यतां दूरीकरणार्थम् उपयोगाय भवन्ति।

## परिशिष्टग्रन्थाः

१. श्रीमद्भगवद्गीता - तिरुमल तिरुपति देवस्थानम्
२. हठयोगप्रदीपिका – श्रीवेंकटेश्वर मुद्रणयन्त्रालय
३. शिक्षायाः मनोविज्ञानिकाधारः जगदीशसंस्कृतपुस्तकालयः जयपुरम्
४. आधुनिकं मनोविज्ञानम् – मृगाक्षी प्रकाशनम् लखनऊ
५. अधिगम एवं शिक्षण – शिप्र पब्लिकेषन् दिल्ली
६. स्वास्थ्य एवं शारीरिकशिक्षा – राखी प्रकाशन् आगरा

[1]श्रीमद्भगवद्गीतायां अध्यायः 17 श्लोकः 18
[2]भगवद्गीतायां सप्तदशाध्याये ८ स्लोकः

# महाभारते ज्योतिषम्

डा. रतनकुमारपाण्डेयः*
सहायकाचार्यः, के.सं.वि.वि.श्रीरणवीरपरिसरः
जम्मूः

***लेखसारः*** *– गगनमण्डले स्थितानां ग्रहनक्षत्रादिपिण्डानां गति-स्थिति-प्रभावादिनिरूपणं यत्र भवति तन्नामज्योतिषमिति । तेषु ज्योतिर्मयपिण्डेषु यानि सदैकरूपगतीनि तानि नक्षत्रपदेन ज्ञायन्ते,प्रत्येकदिनं भिन्नभिन्नगतिवशेन भ्रमन्ति ये ते ग्रहाः प्रोक्ता इति( गच्छन्तीति ग्रहा इति आचार्यपाराशरवचनात्) । 1 अस्य शास्त्रस्य प्रणयनं धात्रा वेदविहितकर्मणां सम्पादनस्य कृते कृतमिति । अस्य वेदस्य मुख्यप्रयोजनं यज्ञसम्पादनमिति । यज्ञकर्मप्रवृत्ताः यज्ञाः ये प्रोक्तास्ते तु कालाश्रिताः सिद्धयन्ति । कालविशेषे कृताः यागादयः साफल्यं प्राप्नुवन्ति । वेदस्य षडंङ्गानि शब्दशास्त्र-ज्योतिष-कल्प-निरूक्त-शिक्षा-छन्दांसि एतानि कथितानि सन्ति । ज्योतिषशास्त्रस्य त्रयः स्कन्धाः प्रकल्पिताःसन्ति । अत्र सिद्धान्तसंहिताहोराभेदेन ज्योतिषं त्रिस्कन्धमित्युच्यते । महाभारते ऋत्वायनमासतिथिनामुल्लेखोऽनेकेषु स्थलेषु विद्यते । (ऋतवः शिशिरादयः) अर्थादत्र ऋतुणां गणना शिशिरात् कर्तव्येति । तत्र सर्वप्रथमं युगस्य चर्चा कृता । युगेऽस्मिन् पञ्चसंवत्सराः प्रकल्पिताः सन्ति । पञ्चसंवत्सरात्मकं युगप्रमाणं प्रोक्तमाचार्यलगधेन । तत्र युधिष्ठिरादयःपञ्चपाण्डवाःये सन्ति तेषां जन्म प्रत्येकसम्वत्सरस्यान्तराले अभवत् । महाभारतस्य उद्योगपर्वणि सर्वप्रथमं मुहूर्त्तेषु जयनामकमुहूर्त्तस्योल्लेखो दृश्यते । अथर्वज्योतिषे दिवसस्यैकादशमुहूर्त्तः विजयनाम्ना अभिधीयते ।*

***कूटशब्दाः*** *– षडशीतिमुखम्, चन्द्रसूर्योपरागः,पर्वसन्धिः,अन्वधावन्मृगं,हिमागमः,सप्तग्रहाः,वक्रानुवक्रम् ।*

सामान्यतया गगनमण्डले स्थितानां ग्रहनक्षत्रादिपिण्डानां गति-स्थिति-प्रभावादिनिरूपणं यत्र भवति तन्नामज्योतिषमिति । तेषु ज्योतिर्मयपिण्डेषु यानि सदैकरूपगतीनि तानि नक्षत्रपदेन ज्ञायन्ते,प्रत्येकदिनं भिन्नभिन्नगतिवशेन भ्रमन्ति ये ते ग्रहाः प्रोक्ता इति( गच्छन्तीति ग्रहा इति आचार्यपाराशरवचनात्) । 1 अस्य शास्त्रस्य प्रणयनं धात्रा वेदविहितकर्मणां सम्पादनस्य कृते कृतमिति । अस्य संसारस्य सर्वेऽपि विषयाःवेदे विद्यमानाःसन्ति । यज्ञः वेदेन क्रियते अर्थात् यज्ञसम्पादनं वेदं विना न भवितुमर्हति । अस्य वेदस्य मुख्यप्रयोजनं यज्ञसम्पादनमिति । यज्ञकर्मप्रवृत्ताः यज्ञाः ये प्रोक्तास्ते तु कालाश्रिताः सिद्धयन्ति । कालविशेषे कृताः यागादयः साफल्यं प्राप्नुवन्ति । वेदस्य षडंङ्गानि शब्दशास्त्र-ज्योतिष-कल्प-निरूक्त-शिक्षा-छन्दांसि एतानि कथितानि सन्ति । श्रुतेः षड्ङ्गेषु ज्योतिषशास्त्रस्य अन्यतमं स्थानमिति प्रोक्तम् । ज्योतिषशास्त्रमिदं शुभाशुभकालबोधकत्वात् वेदस्य नेत्रत्वेन स्मर्यते । आचार्यभास्करेणोक्तं सिद्धान्तशिरोमणौ-

वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण । शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।
वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यत ।[१]

ज्योतिषशास्त्रस्य त्रयः स्कन्धाः प्रकल्पिताःसन्ति । अत्र सिद्धान्तसंहिताहोराभेदेन ज्योतिषं त्रिस्कन्धमित्युच्यते । 3 केचन् दैवज्ञाः ज्योतिषशास्त्रस्य पंचस्कन्धमामनन्ति कुत्रचित् । त्रिस्कन्धमतिरिच्य केरलिःशकुनश्चेति द्वौ स्कन्धौ वर्तेते,एतौ स्कन्धौ संयोज्य ज्योतिषशास्त्रस्येदं पञ्चस्कन्धमप्युच्यते । यथोक्तम् -

***सम्पर्कसूत्रम्** - 9596877677, Email - ratanpanday123@gmail.com

[१]सि.शि.कालमानाध्यायःश्लो.9-10

पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिता । केरलिः शकुनश्चेति ज्योतिषशास्त्रमुदीरितम्[१] ॥ इति ।

सिद्धान्तस्यापरपर्यायं गणितमिति । गणितं द्विविधं व्यक्तमव्यक्तञ्चेति । अत्राचार्येण सिद्धान्तस्य लक्षणं एवं प्रकारेण प्रतिपादितं वर्तते, तत्र त्रुटिकालादारभ्य प्रलयकालपर्यन्तं कालज्ञानम्, नवविधकालमानानि यानि सन्ति तेषां नवविधकालमानानां निरूपणम्, खेचराणां मध्यमस्फुटगतिस्थित्यादीनां निरूपणम्, व्यक्ताव्यक्तगणितानयनम्,तत्समवेतानां प्रश्नानां सोत्तराणां संकलनम्,नक्षत्रग्रहस्थित्यादीनां कथनं यन्त्रादीनां विवेचनञ्चैतेषां सर्वेषां विषयाणां यत्र समाहारो परिदृश्यते सः सिद्धान्तः खल्वेति । अहोरात्रशब्दस्य आद्यन्तवर्णलोपात् होराशब्दस्य निष्पत्तिर्भवति । कालबोधकशास्त्रस्य यस्मिन् भागे जातकजन्मकालिकस्थग्रहनक्षत्रादीनामन्योन्यं सम्बन्धत्वात् शुभाशुभयोगानां फलानां विवेचनं भवति सा होरा । होराशास्त्रविषये आचार्यमुरलीधरचतुर्वेदेन स्वीयग्रन्थे लिखितं यज्जन्मनानाविधफलादेशफलकं वेदचक्षूरूपं द्विजामध्ययनीयं शास्त्रं होरापदवाच्यमिति । 5संहितास्कन्धः ज्योतिषशास्त्रस्य तृतीयस्कन्धः । आचार्यवराहमिहिरेणोक्तं वृहत्संहितायां(तत्कात्स्न्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता) इत्यादिना ज्योतिषशास्त्रस्य समग्ररूपेणोपनयःयस्मिन् भागे भवति सा संहितेति । यः दैवज्ञः गणितसंहिताहोरास्कन्धान् जानाति सः त्रिस्कन्धज्ञ इति । अत्र संहितापारगःत्रिस्कन्धज्ञःभवतीति । यथोक्तम्

गणितं जातकं शाखां यो वेत्ति द्विजपुङ्गवः । त्रिस्कन्धज्ञो विनिर्दिष्टः संहितापारगश्च सः ।[२] ॥ इति ।

स्कन्धेऽस्मिन् सूर्यादिग्रहाणां चाराः,ग्रहाणां युतिः,सांवत्सरसूत्रं,उल्कापातः,वृक्षायुर्वेदः,शकुनविचारः,तिथ्यादिफलं जलशोधनविधिश्चैतेषां विषयाणां निरूपणं कृतमिति । मुहूर्त्तादयः विषयाःये तेषां विषयाणामन्तर्भावःकृतोऽस्ति संहितास्कन्धे । रामायणमहाभारतादिष्वपि ज्योतिषसम्बद्धप्रसङ्गाः बहवःपरिदृश्यन्ते । अत्र मुहूर्त्तादिकमधिकृत्य प्रासङ्गिकं वर्णनं प्राप्यते, परन्तु महाभारतं तु भारतीयपरम्परायाः विश्वकोष एव मन्यते अतः ज्योतिषमपि बहुषु स्थानेषु प्रस्तुतमिति । सम्पूर्णभारतवर्षे महाभारतस्य त्रीणि स्वरूपाणि प्राप्यन्ते । सर्वप्रथमादौ जयो नामेतिहासः,द्वितीयं भारतं नामाख्यानं तृतीयञ्च महाभारतमिति । महाभारतेऽस्मिन्लक्षश्लोकाःसन्ति । महाभारतकाले ज्योतिषस्यात्यन्तं समृद्धस्वरूपम् आसीदिति तत्रोक्तकालविषयकवर्णनेनावगम्यते । तत्र सर्वप्रथमं युगस्य चर्चा कृतेति,युगेऽस्मिन् पञ्चसंवत्सराः प्रकल्पिताः सन्ति । पञ्चसंवत्सरात्मकं युगप्रमाणं प्रोक्तमाचार्यलगधेन । तत्र युधिष्ठिरादयःपञ्चपाण्डवाःये सन्ति तेषां जन्म प्रत्येकसम्वत्सरस्यान्तराले अभवत् । यथोक्तं आदिपर्वणि-

अनुसंवत्सरं जाता अपि ते कुरुसत्तमाः । पाण्डुपुत्रा व्यराजन्त पञ्चसम्वत्सरा इव ।[३] ॥ इति ।

पाण्डवानां वनगमनस्य कियन्ति दिनानि व्यतीतानि,एतेषां विषये गोग्रहणकाले आचार्यभीष्मः दुर्योधनेनवदति यत् पञ्चवर्षेऽस्मिन् द्वौ अधिमासौ गतौ वर्तेते । यथा -

तेषां कालातिरेकेण ज्योतिषाञ्च व्यतिक्रमात् । पञ्चमे पञ्चमे वर्षे द्वौ मासानुपजायतः ।[४] इति ।

महाभारते ऋत्वायनमासतिथिनामुल्लेखोऽनेकेषु स्थलेषु विद्यते । (ऋतवः शिशिरादयः) अर्थादत्र ऋतुणांगणना शिशिरात् कर्तव्येति । कुत्रचिद्स्थाने वसन्तादि-ऋतुणां चर्चा दृश्यते । वर्षारम्भः यद्यत्र उत्तरायणारम्भेमन्यते तदा

[१]भा.ज्यो.शा.ई.पृ.सं.6
[२]ज्योतिषमञ्जूषा,पृ.सं.16
[३]आदिपर्वणि,अध्यायः124
[४]विराटपर्वणि,अध्यायः52

तु हेमन्तादयः शिशिरादयो वा भविष्यन्ति । तत्र तेषां ऋतुणामारम्भः मधुमासाद् वैशाखमासाच्चप्रचलित आसीत् । एवमनुशासनपर्वणः 106 अध्यायेषु 109 अध्यायेषु चोभयत्र स्थाने सर्वेषां मासानां नामोल्लेखोऽस्ति । एतेषां मासानां समारम्भः मार्गशीर्षतो भवति । अत्र वनपर्वणि शुक्लादि-कृष्णादिमासस्योल्लेखःकृतः । एकस्मिन् मासे उभौ शुक्लकृष्णपक्षौ भवतः । यथा -

कृष्णशुक्लावुभौ पक्षौ गयायां यो वसेन्नरः ।[१]

दिवसस्य विभागानां विषयेऽपि चर्चा दृश्यते शान्तिपर्वणि,तेषु विभागेषु काष्ठा,कला,मुहूर्त्ताः,लवाश्चैते अंगीकृता इति । यथा - काष्ठा कला मुहूर्त्ताश्च दिवा रात्रिस्तथा लवाः ।[२]

महाभारतस्य शान्तिपर्वणः 16अध्याये सम्वत्सरऋतुमासपक्षलवक्षणादिसम्बन्धिचर्चा विद्यते । यथा -

सम्वत्सरान् ऋतुन् मासान् पक्षानथ लवान् क्षणान् ।[३]

अस्मिन् प्रसंगे क्षणस्यापि नामोल्लेखोऽस्ति । अत्र क्षणो नाम मुहूर्त्त इति,एकस्मिन् दिवसे पञ्चदशमुहूर्त्ताः रात्रावपि पञ्चदशमुहूर्त्ताः,एतान् सर्वानाहत्य अहोरात्रे त्रिंशन्मुहूर्त्ताः स्मृताः वर्तन्ते । एतेषां मुहूर्त्तानां गणना बहुत्र स्थाने मिलति । महाभारतस्य उद्योगपर्वणि सर्वप्रथमं मुहूर्त्तेषु जयनामकमुहूर्त्तस्योल्लेखो दृश्यते । अथर्वज्योतिषे दिवसस्यैकादशमुहूर्त्तः विजयनाम्ना अभिधीयते । आदिपर्वण एकस्मिन् प्रसंगे अभिजिदष्टममुहूर्त्तस्य चर्चा दृश्यते । अत्र अभिजिदेव अष्टममुहूर्त्तः दिवसस्य पञ्चदशमुहूर्त्तेषु । यथा-

स भवान् पुष्ययोगेन मुहूर्त्तेन जयेन च ।[४]

ऐन्द्रे चन्द्रसमायुक्ते मुहूर्त्तेभिजितेष्टमे । दिवा मध्यगते सूर्ये तिथौ पूर्णेतिपूजिते ।[५] । इति ।

अयम् अभिजिन्मुहूर्त्तः ज्योतिषग्रन्थेषु प्रसिद्धो वर्तते । सप्तवासराणां नाम तु महाभारते कत्रचिदपि न मिलति,परन्तु वारशब्दस्य प्रयोग एकस्मिन् स्थाने संजातः । अस्य चर्चा एकस्यां कथायामायाति आदिपर्वण इति । महाभारतस्यानेकेषु स्थानेषु नक्षत्राणां गणना विद्यते । अनुशासनपर्वणि उभयत्र स्थाने सप्तविंशतिनक्षत्राणां नामानि प्राप्तानि भवन्ति । एतेषां नक्षत्राणामत्रारम्भःकृत्तिकातः दृश्यते । वैदिककथायाः एकस्मिन् प्रसंगे प्रोक्तं यत् रुद्रः तारारूपमृगस्य पृष्ठे धावति,अस्योल्लेखो बहुषु स्थलेषु वर्तते । यथा-

अन्वधावन्मृगं रामो रुद्रस्तारामृगं यथा ।[६]

वेदाङ्गज्योतिषे सप्तविंशतिनक्षत्राणां प्रारम्भःधनिष्ठातःकृतो वर्तते अर्थात् ग्रहाणां स्थितिस्फुटीकरणार्थमत्रआरम्भ-स्थानं धनिष्ठानक्षत्रं निगदितमिति । तत् पूर्वमेव लिखितं यत् प्रथमं नक्षत्रं कृत्तिका आसीत् । नक्षत्रगणनाक्रमविषये महाभारतस्य वनपर्वणि एका विचित्रा कथा वर्तते । यथा-

अभिजित् स्पर्धमाना तु रोहिण्या कन्यसी स्वसा । इच्छन्ती ज्येष्ठतां देवी तपस्तप्तुं वनं गता ।
तत्र मूढोऽस्मि भद्रं ते नक्षत्रं गगनात् च्युतम् । कालं त्विमं परं स्कन्द ब्रह्मणा सह चिन्तय ।
धनिष्ठादिस्तदा कालो ब्रह्मणा परिकल्पितः । रोहिणी ह्यभवत् पूर्वमेवं संख्या समाभवत् ।

---

[१]वनपर्वणि,अध्यायः84
[२]शान्तिपर्वणि,अध्यायः7
[३]शान्तिपर्वणि,अध्यायः16
[४]उद्योगपर्वणि,अध्यायः6
[५]आदिपर्वणि,अध्यायः123
[६]वनपर्वणि,अध्यायः278


ISSN : 2249-538X

एवमुक्ते तु शक्रेण कृत्तिकास्त्रिदिवं गताः । नक्षत्रं सप्तशीर्षाभं भाति तद्वह्निदैवतम्[१] ॥ इति ।

अत्र धनिष्ठादिकालस्य परिकल्पना ब्रह्मणा कृतेति । सर्वादौ अभिजितमादाय सप्तविंशतिनक्षत्राणि आसन्यतो हि नक्षत्रसंख्यापूरणाय कृत्तिका अङ्गीकृता । पूर्वं हि रोहिणीक्रमेण नक्षत्रगणना आसीदिति । अनुशासनपर्वणि सप्तविंशतिनक्षत्राणां समारम्भः कृत्तिकातो भवति । सप्तविंशतिनक्षत्राणां अतिरिच्यताराणामपि चर्चा दृश्यते । उद्योगपर्वणि अरुन्धतिसहितसप्तर्षिताराणामुल्लेखः मिलति । अगस्त्यतारायाः गणना भवत्येतासु तारासु । यथा-

अत्र ते ऋषयः सप्त देवी चारुन्धति तथा ।[२]

महाभारतेऽस्मिन् योगकरणादीनां मेषादिद्वादशराशिनाञ्च चर्चा कुत्रापि न मिलति । तत्र सूर्यस्थितेःविशेषवर्णनं न प्राप्तमिति,तथापि तत्रानुमानं क्रियते यद्वेदाङ्गज्योतिषमिव तस्मिन् काले सौरमासस्य प्रचारोऽवश्यं आसीदिति । महाभारतस्य वनपर्वणि पुण्यकालःप्राप्तश्चेत्तदा तेषु पुण्यकालेषु दानं देयं तथा अष्टसंक्रान्तिनां वर्णनमपि प्राप्नोति । अत्र सूर्यः यदा एकराशितःपरराशिं गतस्तदा संक्रान्तिः,द्वादशसंक्रान्तिनां भोगकालःसौरवर्षमिति । महाभारतस्य वनपर्वण एकस्मिन् प्रसङ्गे अयनविषुवदिनषडशीतिमुखादीनां चर्चा दृश्यते । यथा -

अयने विषुवे चैव षडशीतिमुखेषु च । चन्द्रसूर्योपरागे च दत्तमक्षयमुच्यते ॥ इति ।

अत्र अयनं द्विविधं सौम्यायनं याम्यायनञ्चेति,उभौ कर्कमकरसंज्ञकौ तथा च विषुवद्वये मेषतुलादिकौ भवतः । क्रान्तिवृत्तस्य चत्वारो विभागाःषडशीतिमुखाःकथिताःसन्त्यत्रेति । महाभारतकाले सूर्यस्यैव सम्बन्धवशात् क्रान्तिवृत्तस्य द्वादशभागानां परिकल्पना समुद्भूता आसीदिति । महाभारते ग्रहणविषयकचर्चाऽपि विद्यते । सूर्याचन्द्रमसोः ग्रहणस्योल्लेखः सामान्यतःबहुषु स्थलेषु लभ्यते । अत्र विशेषरूपेण प्रोक्तं यत् यदा सूर्यग्रहणं भवेत्तदा तस्मिन् काले श्राद्धकर्म च भूम्यादि-दानस्य फलस्य वर्णनं बहुत्र स्थले कृतमिति । महाभारतस्य सभापर्वणि एक उल्लेखो लभ्यते यत् पाण्डवानां वनवासगमनं यदा आसीत्तदा तस्मिन् काले सूर्यग्रहणमिति । यथा-

राहुग्रसदादित्यमपर्वणि विशांपते ।[३]

महाभारतस्य युद्धस्य पूर्वं कार्तिकमासस्य शुक्लपूर्णिमायां चन्द्रग्रहणं तथा च अग्रिममार्गकृष्णामायां सूर्यग्रहणमर्थादेकस्मिन् मासे ग्रहणद्वयं घटितमासीत् । एतादृशी स्थिति यदा स्यात्तदा ज्योतिषशास्त्रस्य संहितानुसारेणोत्पात एव प्रोक्तोऽस्ति । एतस्मिन् विषये आचार्यभटोत्पलेनबृहत्संहितायाःराहुचाराध्यायस्य टीकायां महाभारतोक्तग्रहणानां विचारः प्रस्तुतोऽस्ति । अत्र त्रयोदशदिवसानां पक्षसम्बन्धिचर्चा विद्यते । यथोक्तं भीष्मपर्वणि-

चतुर्दशीं पञ्चदशीं भूतपूर्वां तु षोडशीम् । इमां तु नाभिजानेहममावास्यां त्रयोदशीम् ।
चन्द्रसूर्यावुभौ ग्रस्तौ एकमासीं त्रयोदशीम् ।[४] । इति ।

महाभारते सप्तग्रहाणां चर्चा परिदृश्यते,एतेषां सप्तग्रहाणां नामानि एवं प्रकारेण वनपर्वणि प्रोक्तानि सन्तीति । ततःपरं भीष्मपर्वणि पञ्चताराग्रहाणां नामोल्लेखो प्राप्यते । यथा -

सोमो वृहस्पतिः शुक्रो बुधोऽङ्गारक एव च । इन्द्रो विवस्वान् दीप्तांशुः शुचिः शौरिःशनैश्चरः ।[५]

---

[१]वनपर्वणि,अध्यायः230
[२]उद्योगपर्वणि,अध्यायः111
[३]सभापर्वणि,अध्यायः79
[४]भीष्मपर्वणि,अध्यायः3
[५]वनपर्वणि-अध्यायः-3

ते तु क्रुद्धा महेष्वासा द्रौपदेयाःप्रहारिणः । राक्षसं दुद्रुवुः संख्ये ग्रहाः पञ्च रविं यथा ।[1]

महाभारते ग्रहाणां वक्रत्वयुद्धसमागमादीनां वर्णनमपि बहुषु स्थलेषु प्राप्यते । यथा -

प्रत्यागत्य पुर्निजष्णुरिजघ्ने संसप्तकान् बहुन् । वक्रातिक्रगमनादंगारक इव ग्रहः ।[2]

ततः समभवद्युद्धं शुक्रांगिरसवर्चसोः(द्रौण्यर्जुमयोः) । नक्षत्रमभितो व्योम्नि शुक्रांगिरसयोरिव ।[3]

युद्धकालीन-ग्रहाणां स्थितिविषयेऽपि अत्र चर्चा दृश्यते । तस्मिन् काले कर्णकथनानुसारेण बहूनि दुश्चिह्नानि दृश्यानि आकाशे सन्ति । अतः लोकसंहारस्य सम्भावना दृश्यते । एतस्मिन् विषये महर्षिव्यासः युद्धात् पर्वं धृतराष्टेन वदति । यथोक्तं भीष्मपर्वणि -

श्वेतो ग्रहस्तथा चित्रां समतिक्रम्य तिष्ठति । धूमकेतुर्महाघोरः पुष्यं चाक्रम्य तिष्ठति ।

मघास्वंगारको वक्रः श्रवणे च वृहस्पतिः । भगं नाक्षत्रमाक्रम्य सूर्यपुत्रेण पीड्यते ।[4] ॥ इति ।

महाभारतस्य आदिपर्वणः किञ्चिद् वचनेन सिद्धयति यत् द्वापरकलियुगयोःसन्धिकाल एव पाण्डवानां कालोऽस्ति । यथा -

अन्तरे चैव सम्प्राप्ते कलिद्वापरयोरभूत् । स्यमन्तपञ्चके युद्धं कुरुपाण्डवसेनयोः ।[5] ॥ इति ।

आर्यभटेन 421 तमे शकाब्दे आर्यभटीयग्रन्थस्य रचना कृतेति,तस्मिन् ग्रन्थे समुद्धृतं यत् द्वापरान्ते महाभारतकालीनयुद्धः संजातश्चानेन ग्रन्थेन अयमेव सिद्धयति यत् शकारम्भस्य 3179 वर्षात् पूर्वं कलियुगस्यारम्भःजातो वर्तते । अत्र शंकरबालकृष्णदीक्षितेन पर्यालोचितः पाण्डकालस्य सोऽपि वराहमिहिरस्य –

आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ । षड्किकपञ्चद्वि 2526 युतः शककालस्तस्य राज्ञश्च ।[6] ॥ इति ।

यदा भूमौ युधिष्ठिरस्य राज्य आसीत्तदा सप्तषयःमघानक्षत्रे आसनिति । श्रीमद्भागवतेऽपि राजापरीक्षितस्य चर्चा परिदृश्यते । आचार्यवराहमिहिरमतानुसारं शकस्य 2526 वर्षात् पूर्वमर्थात् कलियुगारम्भस्य 653 वर्षानन्तरं पाण्डवानामुदयो जात इति । यदा युधिष्ठिरो नवतिवर्षवयस्क आसीत्तदा महाभारतयुद्धं प्रवृतमिति । युधिष्ठिरस्य पौत्रपरीक्षितस्य जन्मनः 1015वर्षानन्तरं नन्दस्य राज्याभिषेको जातः । 21 महाभारतस्यानुशीलनेन स्पष्टमिदं प्रतीयते यत्तदानीं तदीयं ज्योतिश्शास्त्रं विकसितं समृद्धमासीत् । तत्र सौरमासवर्षयोर्ज्ञानं, तिथिज्ञानं पक्षज्ञानञ्च सम्यकतया आसीत् परन्तु राशिवारविषयेऽल्पीयांश एव मानवाः जानन्ति स्म । ग्रहणनिर्धारणफलविषये च परम्परा सुदृढा परिलक्ष्यते । सारांशतः वक्तुं शक्यते यत्तत्कालिकं महाभारतकाले ज्योतिषमुत्तरोत्तरं वृद्धिपथि आसीदिति ।

## अनुशीलितग्रन्थाः (Bibliography)


1. बृहत्पराशरहोराशास्त्रम्
2. सिद्धान्तषिरोमणिः
3. भारतीयज्यौतिश्शास्त्रस्य इतिहासः
4. ज्योतिषमञ्जूषा,पृ.सं.16
5. महाभारतम्
6. बृहत्संहिता


[1] भीष्मपर्वणि-अध्यायः-100

[2] कर्णपर्वणि,अध्यायः20

[3] कर्णपर्वणि,अध्यायः-18

[4] भीष्मपर्वणि, अध्यायः 3

[5] आदिपर्वणि,अध्यायः2

[6] बृहत्संहिता,सप्तर्षिचारः


ISSN : 2249-538X

# भारतीयपरम्परायां तन्त्रशास्त्रस्य योगदानम्

डा. ओ. वि. शिबु गुरुपादम्*
सहायकाचार्यः(अ.), कें.सं.वि., गुरुवायूर्-परिसरः
केरलम्

***लेखसारः*** *– अनादिकालतः भारतवर्षस्य पुण्यभूमिरिति ख्यातिः वर्तते । कन्यकुमारीतः काश्मीरपर्यन्तं विपुलस्यास्य भूविभागस्यायं राष्ट्रसङ्कल्पः पुराणप्रसिद्धः ।*

***"गायन्ति देवाः किल गीतकानि, धन्यास्तु ते भारतभूमिभागे ।***
***स्वर्गापवर्गास्पदमार्गभूते, भवन्ति भूयः पुरुषाः सुरत्वात् ॥"***[१]

*भूविभागोऽयं भूलोकस्य मध्यवर्तिनः जम्बुद्वीपस्य नवखण्डेषु दक्षिणभागे वर्तते ।*

***"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् । वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ॥"***[२]

*अखिललोकानाम् अभयस्थानरूपेण अभिलषितस्थानरूपेण सहस्राब्देभ्यः पूर्वं भारतभूमिरङ्गीकृता । वेदेष्वपि एवं प्रकीर्तिता – "यस्यां समुद्र उत् सिन्धुरापोयस्यामन्नंकृष्टयः सम्बभूव"*[३] *एवं वेदेतिहासपुराणेषु भारतस्य महिमाः सूचिताः सन्ति । हुयाङ् साङ्, फाहियान्, मार्कोपोलो, डा. जोण् वुड्रोफ् प्रभृतयःजिज्ञासवः येनकेनापि प्रकारेण भारतमागत्य स्वजीवितं सार्थकं कर्तुं वैदिककाले, ऐतिहासिककाले एव न इदानीमपि एषः सम्प्रदायोऽनुवर्तते । जनकयाज्ञवल्क्यवाल्मीकिव्यासादीनां स्थानानि, बौद्धजैनादि सङ्केताः, नलन्दातक्षशिलादयः विद्याकेन्द्राणि च गणनीयानि । शङ्करमाध्वरामानुजाः रामकृष्णविवेकानन्दाः श्रीनारायणगुरुप्रभृताश्च अस्य देशस्य गुरुप्रमुखाः लोकसङ्ग्रहार्थं स्वीकृतं दौत्यम् अद्यापि अनवरतम् अनस्यूतं शिष्यप्रशिष्यपरम्परया कुर्वन्तः सन्ति । एतत् वीक्षणेनैव मनुः - "एतत् देश प्रसूतस्य सकाशादग्र जन्मनः, स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः" इति सूचितवान् । एवं लोकस्य त्रैकालिकगुरुस्थानमेव भारतस्येति सिद्धम् ।*

***कूटशब्दाः*** *– तन्त्रशास्त्रम्, साधना, मन्त्रम्, विज्ञानम्*

## उपक्रमः

विज्ञानस्रोतांसि शास्त्राणि अनेकानि अत्र प्रकाशितानि सन्ति । सर्वेष्वपि शास्त्रेषु प्रवृत्ति-निवृत्ति मार्गाश्च प्रतिपाद्यते । "प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥" एवं शास्त्राणां मूलं श्रुतिरेव भवति । श्रुति नाम न केवलं वेदाः । कुल्लूकभट्टाभिप्रायेण "वैदिकी तान्त्रिकी चैव द्विविधा कीर्तिता श्रुतिः" (श्रीविद्यासपर्यापद्धतिः आमुखं) धर्मविज्ञानस्य एकं तलं वैदिकम् अपरं तान्त्रिकम् । ऋग्यजुसामाथर्वणरूपेण वेदाः विभक्ताः । प्रतिवेदं संहिताब्राह्मणारण्यकोपनिषद्रूपश्चतुष्टयं विद्यते । एवं चत्वार उपवेदाः, षट् वेदाङ्गानि, षट् आस्तिकदर्शनानि, त्रीणि नास्तिकदर्शनानि, इतिहासपुराणानि, च वैदिकशाखा एव । श्रुतेः अपरा शाखा भवति तान्त्रिकपद्धतिः । तन्त्रं वेदस्य उपासनाकाण्डस्य परिणतरूपमिति पण्डितमतम् । "तन्यते विस्तार्यते ज्ञानम् अनेन" इति तन्त्रशब्दस्य व्युत्पत्तिः ।

**"सर्वेऽर्था येन तन्यन्ते त्रायन्ते च भयाज्जनाः । इति तन्त्रस्य तन्त्रत्वं तन्त्रज्ञैः परिचक्षते ॥" (विष्णु संहिता)**

---

***सम्पर्कसूत्रम्** – 9447829893, Email – ovshibugurupadam@gmail.com

[१]विष्णुपुराणम्- 2/3/24)

[२]विष्णुपुराणम्- 2/1/3

[३]अथर्ववेदः 12/3

इति विष्णुसंहिताप्रामाण्यात् तन्त्रशास्त्रं चतुर्विधपुरुषार्थप्रापकमेवेति सिद्ध्यति। ऊर्जतन्त्रं, रसतन्त्रं, अगदतन्त्रं, इत्यादि सर्वविज्ञानानामपि स्वाभिमानं विशदीकर्तुं शास्त्रमिदं परिणता दृश्यते। स्वरूपात् स्वभावेच्चेदानीं तन्त्रं उपासनाप्रधानं शास्त्रमेव।

**"कृते श्रुत्युक्ताचारः त्रेतायां स्मृतिसंभवः। द्वापरे तु पुराणोक्तः कलावागमसम्मतः॥" (कुलार्णवतन्त्रम्)**

इति कुलार्णतन्त्रवचनात् सत्ययुगे ध्यानमार्गः तपोमार्गश्च अङ्गीकृतः। किन्तु कालपरिवर्तने मनुषस्य आत्म प्रभावः यदा मन्दीभूतः तदा अन्य यज्ञमार्गः आगतः। स तु वेदघोषणेन साकं घृतादीनाम् अर्पणेन प्रपञ्चशक्तीनां इन्द्राग्निपूषामित्रादीनां तोषणरूपः आसीत्। अश्वमेधः, वाजपेयः अतिरात्रम् इत्यादयः बहवः यज्ञाः उपदिष्टाः। "स्वर्गकामो यजेत" इति श्रुतिवचनमपि एतस्य अङ्गीकारे प्रबलतमम्। किन्तु पुनरपि कालपरिवर्तने यज्ञमार्गस्य सार्वजनीनत्वम् अपगतम्। एवं सहस्राब्दानाम् अनन्तरं आगमसम्प्रदायोऽयं सर्वसम्मतं बभूव। आगमसम्प्रदायः एव तन्त्र इत्युच्यते।

**"आगतं पञ्चवक्त्रात्तु गतञ्च गिरिजानने। मतञ्च वासुदेवस्य तस्मादागममुच्यते"**

**सृष्टिश्च प्रलयश्चैव देवतानां तथार्च्चनं। साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च॥**

**षट्कर्म्मसाधनं चैव ध्यानयोगश्चतुर्विधः। सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदुर्बुधाः" (शाक्तानन्दतरङ्गिणी)**

इति आगमानां निर्वचनम्।

## लक्ष्यबोधकं प्रापकं च

अभ्युदयनिःश्रेयसौ च मानवजीवनस्य लक्ष्यरूपेणाङ्गीकृतौ। एकः ऐहिकश्रेयोरूपः अन्यः पारत्रिकपरमानन्दरूपश्च। अमरसिंहः एवं निर्दिशति –

**"यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः। सेव्यतामक्षयो धीरास्स श्रिय्यै चामृताय च॥" (अमरकोशः 1/1)**

ऋषयः एतदर्थमेव साधनामार्गः निर्दिष्टवन्तः। ते च "ऊर्ध्वरेता तपस्त्यागी नियताशि च संयमी शापानुग्रहयोः शक्तः सत्यसन्धोर्भवेदृषिः" तादृशानां ऋषीणां तीव्रतपोनिष्ठायाः फलरूपेणैव लब्धं वेद विज्ञानम्। तन्त्रोपि ऋषिभिरुपदिष्टः भवति। आर्षविचारस्य विकसितरूपाण्यैव दर्शनानि। "दृश्यते स्वर्गापवर्गयोः मानम् अस्मिन्" इति दर्शनस्य व्युत्पत्तिः। आस्तिक नास्तिक भेदेन दर्शनानि द्विधा विभज्यते। एतेषां सारमपि द्विधा। एकत्र प्रापञ्चिकं सर्वं त्यक्त्वा मोक्षमेव परिलक्ष्यते। अन्यत्र भोगलालसं च। उभयोः भुक्तिमुक्त्योः समन्वयात्मकम् दर्शनमेकमेव तन्त्रं नाम। वामकेश्वरतन्त्रे एवमुक्तं-

**"यत्रास्ति भोगो न च तत्र मोक्षः। यत्रास्ति मोक्षो न च तत्र भोगः।**

श्रीसुन्दरीसेवनतत्पराणां भोगश्च मोक्षश्च करस्थ एव॥" एतदेव तन्त्रशास्त्रस्य वैशिष्ट्यम्।

## प्रपञ्चघटना

रघुवंशमहाकाव्यप्रारम्भे महाकवि कालिदासः –

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥ (रघुवंश 1/1)**

इति इष्टदेवतावन्दनं करोति। तान्त्रिकस्य अस्य कवेः वचनाद् जगतः - दृश्यप्रपञ्चस्य अधारभूतौ पार्वती - आदिशक्तिः परमेश्वरः इति च सुव्यक्तं भवति। तौ च वागर्थाविव अभेदत्वेन वर्तमानौ भवतः। उपनिषत्स्वपि "सो अकामयत बहुस्यां प्रजायेय" इति वचनमस्ति। तादृशचेतनायाः वा इच्छाशक्तेः च स्पन्दनसहितब्रह्मतत्वमेव शब्दब्रह्मेति पूर्विकैः


ISSN : 2249-538X

व्यवह्रियते। प्रणवात्मकः आदिमस्फोटः अहङ्काररूपेण महत्तत्त्वरूपेण क्रमशः पञ्चभूतात्मकतया तन्मिश्रीभावेन च दृश्यप्रपञ्च रूपं प्राप्नोति। परमेश्वरस्य क्रियात्मकरूपमेव पराशक्तिः। प्रलये शक्तेः निचेष्टावस्थायां शिवः निष्क्रियः। एवं शिवशक्त्यभेदः।

**"मम रूपासि देवि न भोदोस्ति त्वया मम" (महानिर्वाणतन्त्रम्** 1/1/13)

इति विलास एव प्रपञ्चमिति तान्त्रिकाणां पक्षः। "अथ चितिः स्वतन्त्रा विश्वसिद्धिहेतुः" (अगस्त्यशक्तिसूत्रम्) सृष्टप्रपञ्चस्य ओतप्रोतरूपेण शक्तेः स्थितिः। आदौ पञ्चविंशतितत्वरूपेण ततः विश्वव्यापकरूपेण च शक्तेः व्याप्तिः। पञ्चविंशति तत्वानि तु- पञ्चतन्मात्राणि, पञ्चभूतानि, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनः, माया, शुद्धविद्या, महेश्वरः, सदाशिवः च। शैवागमानुसारेण मनस्तत्वादारभ्य पृथिवीतत्वपर्यन्तं षड्विंशत् तत्वानि सन्ति। एतदेव शङ्करभगवद्पादैः सौन्दर्यलहर्यां –

**मनस्त्वं व्योमस्त्वं मरुदसि मरुत्सारथिरसि। त्वमापस्त्वं भूमिस्त्वमपि परिणतायां न हि परम्॥**
**त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा। चिदानन्दाकारं शिवयुवतिभावेन बिभृषे॥ (सौन्दर्यलहरी** 35)

इति कीर्तितम्। शिवपदात् भौतिकतलपर्यन्तं समायातसर्गवैभवस्यास्य नाम ब्रह्माण्डमित्युच्यते। सृष्टप्रपञ्चस्य जीव ईश्वरः। " ईशावास्यमिदं सर्वं यत्किञ्चित् जगत्यां जगत् " (ईशावास्योपनिषत् 1) इति श्रुतिः। प्रपञ्चस्य सर्वेष्वंशेषु जीवस्य स्फुरणमस्ति। ब्रह्माण्डस्य अखिलांशेषु शिवशक्त्यात्मकता अस्त्येव। "शिवशक्त्यात्मकं विद्धि ज्जगदेतच्चराचरम्" इति वचनमपि एतत्सूचकमेव। ब्रह्माण्डस्य अंशः एव पिण्डाण्डः इत्युच्यते सैव मनुष्यदेहः। यथा ब्रह्माण्डे तथा पिण्डाण्डे चैतन्यमस्ति चेदपि तत् पूर्णतां न प्राप्तम्। एवं देहे प्राप्तस्य ईश्वरांशस्य परिपूर्णशिवत्वप्राप्तिः मानविकजीवनलक्ष्यम्। एतदेव पुरुषार्थरूपेण शास्त्रेषु वर्णितः। तत्प्राप्तये उपासनामार्गः उच्यते तन्त्रशास्त्रम्। कुण्डलिनी शक्तेः प्रबोधनार्थमेव उपासना क्रियते। कुण्डलिनी मूलाधारचक्रे सार्दत्रिवलयीभूता सर्पाकारेण निद्रावस्थायां एव विराचते। शास्त्रानुसृतमन्त्रसाधनया मूलाधारस्वाधिष्ठान मणिपूरकानाहतविशुध्याज्ञादि षड्चक्राणाम् उद्बोधनं, विकासः तद्वारा कुण्डलिन्याः उपरिनयनं च शक्यमिति तान्त्रिकसिद्धान्तः। मूलाधारस्थितकुण्डलिन्याः उत्थापनं मन्त्रसाधनया तद्वारा षड्चक्रभेदनं च कृत्वा सहस्रारे विराजमानपरमशिवसंयोगेन अमरत्वप्राप्तिरेव तन्त्रशास्त्रप्रसिद्धा मुक्तिः। शक्त्याः आरोहणसन्दर्भे विविधाः दिव्यानुभूतयश्च साधकस्य सिद्धाः भवन्ति। मन्त्र-हठ-लय-राजयोगादयः वा ईषद्भेदसहिताः तान्त्रिकसाधनाश्चास्मिन् आत्यन्तिकलक्ष्ये एकीभूताः भवन्ति।

**"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥" (मुण्डकोपनिषद्**
3/2/2/8)

उपनिषद्मन्त्रेऽपि एतदेव सूचयति। षडाधारेषु द्वयोः एकैकरूपेण मूलाधार स्वाधिष्ठानयोः सद्ग्रन्थिः, मणिपूरकानाहतयोः विष्णुग्रन्थिः, विशुध्याज्ञयोः ब्रह्मग्रन्थिः एतेषां त्रयोः भेदनं कृत्वा एव कुण्डलिन्याः सहस्रारप्राप्तिः अमृतवर्षणं च।

**"मूलाधारैक निलया, ब्रह्मग्रन्थि विभेदिनी। मणिपूरान्त रुदिता, विष्णुग्रन्थि विभेदिनी॥**
**आज्ञा चक्रान्तरालस्था, रुद्रग्रन्थिविभेदिनी "** (ल.स.38)

इति ललितासहस्रनामस्तोत्रेपि सूचयति। शङ्करभगवद्पादाः अपि कुण्डलिन्याः आरोहणानुभूतिः सौन्दर्यलहर्यां वर्णयति।

**"महीं मूलाधारे कमपि मणिपूरे हुतवहं स्थितं स्वधिष्टाने हृदि मरुत-माकाश-मुपरि। मनोऽपि भ्रूमध्ये सकलमपि भित्वा कुलपथं सहस्रारे पद्मे सहरहसि पत्या विहरसे॥ (सौन्दर्यलहरि 9)**

## तान्त्रिकसाधना

तन्त्रसाधनायां गुरूपदेशस्य महत्तरं प्राधान्यमस्ति। भारतीय संस्कृतेः मेरुदण्डः इव गुरु सङ्कल्पः।

**"रविसन्निधिमात्रेण सूर्यकान्तः प्रकाशयेत्। गुरुसन्निधिमात्रेण शिष्यज्ञानं प्रकाशयेत्॥" (नीतिसारः)**

इति महतामभिप्रायः। गुरोरारम्भः जगदाधारभूतात् परमशिवादेव -

**"सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम्। अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥" (गुरुपरम्परास्तोत्रम्)**

गुरुकृपया सर्वाणि श्रेयांसि उपर्युपरि भविष्यन्ति। दोषाणामपि दूरीकरणं गुरुकृपयैव भविष्यति। "शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन॥" इति गुरुगीतावचनं प्रसिद्धम्। गुरुस्वीकरणानन्तरं तान्त्रिकसम्प्रदायमनुसृत्य मन्त्रदीक्षा कार्यः। गुरुणा शिष्ये क्रियमाणमन्त्रचैतन्यसंक्रमणं दिव्यभावज्वालनं च दीक्षेति सामान्यतया वक्ष्यते।

**"दिव्यज्ञानं यतो दद्यात् कुर्यात् पापस्य संक्षयं। तस्मात् दीक्षेति सम्प्रोक्ता देशिकैः तन्त्रवेदिभिः॥" ( शारदातिलकम् 4/2)**

परशुरामकल्पसूत्रे दीक्षा शाक्ती, शाम्भवी, मान्त्री इति त्रिधा कथिता। एका शक्तिप्रबोधनरूपा, द्वितीया चरणविन्यासरूपा, तृतीया कलशाभिषेकरूपा च। सम्प्रदायोऽयं परमशिवादारब्धः इदानीमपि परम्परागतरीत्या भारतवर्षे स्थायीरूपेण वर्तते। दीक्षितः शिष्यः गुरूपदेशेन मन्त्रपुरश्चरणं कृत्वा मन्त्रसिद्धिं प्राप्नोति। शैव-वैष्णव-शाक्तभेदेन उपासनावैविध्यं शास्त्रेस्मिन् प्रतिपाद्यते। "साधनं मूलमन्त्रस्य पुरश्चरणमुच्यते"। जपहोमतर्पणमार्जनादयः पुरश्चरणस्य अङ्गाः। मन्त्रसिद्धिं प्राप्तस्य साधकस्य परोपकारप्रयोगाः एकं षट् कर्मनिर्वहणं अन्यत् देवालयार्चना च। शान्ति- वश्य-स्तंभन-उच्चाटन-विद्वेषण-मारणानि षट्कर्माणि। इदानीं सर्वव्याप्तमन्त्रप्रयोगः - मन्त्रोपासना मन्दिरोपासना एव। मन्दिरेषु क्रियमाणानि एव तन्त्रमिति सामान्यजनानां विचारः। तावत् मन्दिरेषु तन्त्रप्रभावः फलितः। मन्दिरं नाम मनुष्यदेहप्रतीकमेव। प्रतीकानां निगूढबन्धरूपशास्त्ररहस्यमेव अत्रापि अनुवर्तते। "देहो देवालयप्रोक्तो जीवो देव सदाशिवः" (कुलार्णवतन्त्रम्) इति कुलार्णववचनमपि देवालयस्य महत्वकल्पनायां प्रमाणभूतम्।

## उपसंहारः

मन्त्रसाधनया आर्जितचैतन्यं लोकहिताय एकस्मिन् विग्रहे सन्निवेशनमेव प्रतिष्ठा। अनन्तरं आचार्यतपसाम्नायजपेन नि-यमेनोत्सवेनान्नदानेन मन्दिरं वृद्धिं प्राप्नोति। साधारणभक्ताः श्रद्धाभक्तिपुरस्सरं वन्दनप्रदक्षिणनमस्कारस्तोत्रपठनप्रसाद-स्वीकरणं च कृत्वा ईश्वरानुग्रहं सम्प्राप्य ऐहिकामुष्मिकैश्वर्यं प्राप्नुपवन्ति. एवं वास्तुशास्त्र-ज्योतिशास्त्र- आयुर्वेदादि विवध-भारतीयशास्त्रेष्वपि तन्त्रशास्त्रस्य प्रभावः दरीदृश्यते.


ISSN : 2249-538X

# व्याकरणशास्त्राध्ययनस्य साम्प्रतिकसमाजे आवश्यकता

डा. ग्रन्थि वि लक्ष्मीकीर्तिसुधा*
सहायकाचार्यः(अ.), कें.सं.वि., गुरुवायूर्-परिसरः
केरलम्

***लेखसारः** -शोधसारः – कालेऽस्मिन् लोके यो यः अपशब्दान् प्रयुङ्क्ते तं पुरुषं नेच्छन्ति, परिहसन्ति चेति निर्विवादम् । दुष्प्रयोगमुखेन म्लेच्छनदोषभाक्त्वं मा भूदित्येवं हेतोः व्याकरणमध्येतव्यम् । किञ्च कश्चिद् सम्यक् श्लोकपाठं करोति, बाल्यावस्थायां पाठमात्रेण सन्तुष्यन्तोऽपि जनाः वयसि प्राप्ते अर्थस्यापि जिज्ञासां कुर्वन्ति । यदि च्छात्रेण तच्छान्तिः न कृता स्यात्, तर्हि तं न्यूनमयोग्यञ्च मन्यन्ते । अतः दर्वीवत् शुष्ककाष्ठवत् मा भूदवस्था पठितुरिति व्याकरणाध्ययनस्य मुख्यं प्रयोजनम् ।*

***कूटशब्दाः** -शास्त्रम्, व्याकरणम्, कोशः, समाजः, श्लोकः, भर्तृहरिः, संस्कृतिः, महाभाष्यम् इत्यादयः*

## उपोद्घातः

पशूनां समूहः समज इति, मनुष्यसमूह एव समाज इति हि शक्तिग्राहकात् कोशादेः[१] अवगन्तुं शक्यम् । प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत इतीदं वचः जगत्प्रसिद्धम् । निरर्थकं कर्म जन्मसहस्रेणापि कर्तुं न चेष्टते मनुष्यः । तत्तदुपयोगं मनसिकृत्य मनुष्यैः साधनादितपश्चर्यया ऋषित्वं समवाप्य शास्त्राणि निरमासिषत ।

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ**[२] इति हि देवकीपुत्रभणितिः । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाऽध्येतारश्च मङ्गलयुक्ता यथा स्युः[३] इत्येवं ब्रुवता महाभाष्यकारेणापि शास्त्रस्योपयोगः समुपवर्णितः । इमान्येव शास्त्राणि विद्याः इत्याख्ययापि कथ्यन्ते । आसां विद्यानां महत्त्वं भर्तृहरिप्रभृतिभिः महापुरुषैः महता कण्ठेन उदघोषि । दृष्टान्तभूतेषु सत्स्वपि बहुषु श्लोकेषु प्रसिद्धमेकमत्र उदाहर्तुमीहे - केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्वलाः न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥[४]

इति । संस्कृता वागेव मनुष्यं समलङ्करोति, योऽयमलङ्कारः चिरन्तनः । न कदापि क्षीयत इति ।एवं नीतिशास्त्रस्य महिमा जगत्प्रसिद्ध एव । यदि नीतेः काव्यादेश्च पाठः अवगमः युवकेषु स्यात् तर्हि विचक्षणाप्रभावेण दौष्ट्याद्दूरं प्रवर्तन्त इत्यत्र सन्ति नाना उदाहरणानि । अत एव विद्यायाः अर्थाः इत्थं नीतिशास्त्रकृता सुस्पष्टमुट्टङ्किताः - मातेव रक्षति, पितेव साध्वसाधुबोधिका सती कर्मसु नियुङ्क्ते, कान्तेव खेदमपनीय अभिरमयति, कीर्तिं दिक्षु प्रसारयति, लक्ष्मीं तनोतीति । एवमुक्त्वा विद्यां कल्पलताकल्पामभिवर्णयामास भर्तृहरिः । वागियं संस्कृतैव मनुष्यं समलङ्करोतीति निर्णये कृते तच्च संस्कृतत्वं वाचः भूषणमित्येवमवगते तस्य आभूषणस्य सम्यगवबोधनाय प्रवृत्तस्य शब्दशास्त्रस्य महिमा, तत्प्रयोजनञ्च अवश्यमेव किञ्चिदालोचनीयं भवतीत्यतः सम्प्रति व्याकरणशास्त्रस्य समाजे आवश्यकता का इत्ययमंशः समालोचयितव्यः अस्माभिः ।

***सम्पर्कसूत्रम्** - Phone No- 7012004475, Email- Sudhakeerthi01@gmail.com,

[१] पशूनां समजोऽन्येषां समाजो इति अमरकोशपङ्क्तिः । 2.5.42.1.1 (सिंहादिवर्गः)

[२] भगवद्गीता 16.24

[३] महाभाष्ये भूवादयो धातवः इति सूत्रे

[४] भर्तृहरिनीतिशतके श्लो.सं.19

## शोधविषयः

व्याकरणस्य तदङ्गभूतं वर्णोच्चारणशिक्षाशास्त्रं समालोचयामः – तच्छास्त्रस्य प्रयोजनम् इत्थमुद्दिष्टम् – **वाच उच्चारणे विधिम् पुनर्व्यक्तीकरिष्यामि**[१] इति ।

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥

मारुतस्तु उरसि चरन् मन्द्रं जनयति स्वरम् । सोदीर्णः मूर्ध्न्यभिहतः वक्त्रमापाद्य मारुतः ।[२] वर्णान् जनयते.........

इति । वर्णोत्पत्तौ अयं विलक्षणः कश्चित् क्रमः शिक्षाकारस्य । तस्य वैज्ञानिकी बुद्धिः सर्वान् लोकान् विस्मापितवती । तद्विभागः इत्थं विहितः – स्वरतः – उदात्तानुदात्तस्वरिताः, कालतः – ह्रस्वदीर्घप्लुताः, स्थानानि – अष्टौ, प्रयत्नाः – आभ्यन्तर-बाह्यभेदेन भिन्नाविति प्रसिद्धौ इति पञ्चधा ।

वर्णोच्चारणे श्रद्धा कीदृशी भवेदिति सोदाहरणं निरूपितवान् –

व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् । भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥[३]

इति । अर्थस्तु स्पष्ट एव । आदिकाव्यमीषदवलोकयामः । तत्र हि हनुमतः वाचां श्रवणेन सन्तुष्टः श्रीरामः, तदुपपत्तीः प्रशंसामुखेन इत्थमतर्कयत् । तानि श्रीरामचन्द्रवचनानि अत्रोद्ध्रियन्ते –

तमभ्यभाष सौमित्रे सुग्रीवसचिवं कपिम् । वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमरिन्दमम् ॥
नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् । बहुव्याहरतानेन न किञ्चिदपशब्दितम् ॥
नानृग्वेदविनीतस्य नायजुर्वेदधारिणः । नासामवेदविदुषः शक्यमेवं प्रभाषितुम् ॥
न मुखे नेत्रयोर्वापि ललाटे च भ्रुवोस्तथा । अन्येष्वपि च गात्रेषु दोषः संविदितः क्वचित् ॥
अविस्तरमसन्दिग्धमविलम्बितमव्यथम् । उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमस्वरे ॥
संस्कारक्रमसम्पन्नामद्रुतामविलम्बिताम् । उच्चारयति कल्याणीं वाचं हृदयहारिणीम् ॥
अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया । कस्य नाराध्यते चित्तमुद्यतासेररेरपि ॥[४]

इति । एवम्भूतः दूतः यदि राज्ञः निकटे न स्यात्, तर्हि कार्याणां सद्गतिः कथङ्कारं भवेदित्येवं पुरुषोत्तममुखेन आदिकविः वाक्शुद्धौ अवश्योपायेषु प्राथम्येन व्याकरणशास्त्रमुदाहृतवानिति महदेव अस्य प्रयोजनं त्रैकालिकं समाजे ।

सर्वार्थानां व्याकरणात् वैयाकरण इति कथ्यते इति अभियुक्तकथनं वर्तते । अथ शब्दानुशासनम् इति भगवतः पतञ्जलेः **महाभाष्यस्य** आरम्भः । तत्रेत्थं व्याख्यातं **कैयटेन – भाष्यकारो विवरणकारत्वात् व्याकरणस्य साक्षात्प्रयोजनमाह** इति । असाधुभ्यः साधून् शब्दान् अनुशास्ति इत्यतः व्याकरणस्येदमन्वर्थं नाम शब्दानुशासनमिति । एवं साधुशब्दानामनुशासने के उपायाः, कानि च प्रयोजनानीति च महता ग्रन्थेन समुपादिशद्भाष्यकारः । लौकिकवैदिकशब्दयोः अनुशासनं क्रियत इति निर्णाय शब्दशब्दवाच्यः कः इति निर्धार्य च अनुशासनस्य प्रयोजनानि निरूपयितुमारभे । महाभाष्यस्य संवादरूपत्वात्तदत्र प्रदर्श्यते – कानि पुनः शब्दानुशासनस्य प्रयोजनानि इति । रक्षोहागमलघ्वसन्देहाः प्रयोजनम् इति समादधत् भाष्यकारः । रक्षा-ऊहः-लघुः-आगमः-असन्देह इति इमानि साक्षात्प्रयोजनानि मुख्यानि प्रयोजनानीति वा कथ्यन्ते । एवं त्रयोदशानुषङ्गिकप्रयोजनानि च ।

---

[१] पाणिनीयशिक्षायां प्रथमखण्डे श्लो.सं. 2

[२] पाणिनीयशिक्षायां द्वितीयखण्डे श्लो.सं. 6,7

[३] पाणिनीयशिक्षायां प्रथमखण्डे श्लो.सं. 25

[४] श्रीमद्वाल्मीकिरामायणे किष्किन्धाकाण्डे तृतीयसर्गस्थश्लोकाः

 ISSN : 2249-538X

## वेदानां रक्षा

रक्षार्थं वेदानामध्येयं व्याकरणम्- लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यतीति । । आचार्योपदेशाद् भ्रमनिवृत्तिः जायत इति तु सत्यम्, किन्तु केचन छात्राः लौकिकशब्दज्ञानवन्तः सन्तः वैदिकान् शब्दान् अन्यथोच्चारितान् श्रुत्वा आचार्यस्य पाठे कश्चन भ्रंशः स्यादित्येवं भ्रमं प्राप्नुयुः, तन्निवारणार्थं व्याकरणमध्येतव्यम् । तेन लोप-आगम-वर्णविकारादयो विषयाः स्फुटमवगम्यन्त इति न भ्राम्यन्तीति प्रयोजनम् । व्याकरणाध्ययनेन कृतात्मसंस्कारः वेदानां सम्यक् परिपालने समर्थ इति तात्पर्यम् ।

कानिचन उदाहरणानि - यथा लोके कर्णशब्दस्य तृतीयाबहुवचने कर्णैः इति प्रयुज्यते वेदे तु कर्णेभिः इति । एवं उद्ग्राहः – उद्ग्राभः, अदुहत – अदुह्र, दत्त्वा – दत्त्वाय, देवाः – देवांसः इत्येवमादयः ।

**ऊहः** – वैदिकाः मन्त्राः लिङ्गविभक्त्यादीन् सर्वानाश्रित्य सर्वदेवतासम्बोधकाः न पठिताः । तत्तद्देवताकमन्त्राणां लिङ्गविभक्तिपरिवर्तनपूर्वकं मन्त्रपठनसामर्थ्यं लब्धुं व्याकरणमध्येतव्यम् । उदा – यागाः प्रकृति-विकृतिभेदेन द्विधा । समग्राङ्गोपदेशयुतान् प्रकृतियाग इति, यत्र सकलाङ्गोपदेशः नास्ति सः विकृतियाग इति च व्यवहरन्ति वैदिकाः । अग्नये त्वा जुष्टं निर्वपामि इत्ययं मन्त्रः अग्निदेवताकः । सूर्योद्देश्यके चरुनिर्वापे यागे तु तदर्थं मन्त्रः पुनः न पठितः । तत्कल्पनैव ऊहपदार्थः । प्रकृतिवद्विकृतिः कर्तव्या इत्ययमतिदेशः कल्पनेऽस्मिन् प्रमाणम् । तदूहे विभक्तिज्ञानं कारणम् । अन्यथा अपशब्दोच्चारयितृत्वं स्यात् ।

**आगमः** – ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति । प्रधानं च षड्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान्भवति । ।

**लघुः** – लघुना उपायेन शब्दानां ज्ञानं व्याकरणाध्ययनेनैव भवति । यदि शब्दज्ञानं न स्यात् तर्हि च्छात्राः तान्नोपसर्पन्तीत्यतः अवश्यं शब्दशास्त्रमधीत्य शब्दज्ञानं प्राप्नुयादिति ।

**असन्देहः** – स्थूलपृषती इत्यादौ कर्मधारयः, बहुव्रीहिरित्युभयमपि सम्भवति । तद्यथा – स्थूला च सा पृषती च इत्येवं कर्मधारये विग्रहः । स्थूलाः पृषन्त्यः यस्यां सा इति विग्रहः बहुव्रीहौ इति । स्थूलपृषतीमाग्निवारुणीम् अनड्वाहीमालभेत इत्यस्मिन् मन्त्रे कः अर्थः ग्राह्य इत्येवं सन्देहः न भवति व्याकरणाध्ययनात् । पूर्वपदान्तोदात्तस्वरं[१] श्रुत्वा निर्णयः क्रियते बहुव्रीहिरेवेति ।

**तेऽसुराः, दुष्टः** शब्दः इत्यादिना आनुषङ्गिकप्रयोजनवर्णनेन व्याकरणशास्त्राध्यनेन अभ्युदयप्राप्त्यवकाशः जयप्राप्तिश्च प्रयोजनम् इति, तदध्ययनाभावप्रयुक्तेन उच्चारणेन पराभवः, हिंसा इत्येवमाद्यनिष्टसम्भव इति च निरूपितम् ।

**चत्वारि** इत्यनेन प्रयोजनव्याख्यानेन मोक्षप्राप्तिः प्रयोजनमिति वर्णयामास भाष्यकारः । वागुपासनया भगवत्सायुज्यं लभ्यत इति सम्यङ्निरूपितम् ।

दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम् । तद्धि प्रतिष्ठिततमं भवति । द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम् इति । नामकरणविधिः याज्ञिकैः पठ्यते - न चान्तरेण व्याकरणं तत्तत्स्थानविषयकं ज्ञानं कृतस्तद्धिता वा इति ज्ञानं वा शक्यं प्राप्तुम् इति दशम्यां पुत्रस्य इति प्रयोजनव्याख्यात्रा भाष्यकारेणोपदिष्टम् । एवमस्य शास्त्रस्य वेदाङ्गत्वात् वैदिकानि प्रयोजनानि चिन्तितानि ।

अधुना लोके समाजे कः उपयोग इति विचारयामः । लोकेऽपि यो यः अपशब्दान् प्रयुङ्क्ते तं पुरुषं नेच्छन्ति लोकाः, परिहसन्ति चेति निर्विवादम् । दुष्टप्रयोगमुखेन म्लेच्छनदोषभाक्त्वं मा भूदित्येवं हेतोः व्याकरणमध्येतव्यम् । किञ्च कश्चिद् सम्यक् श्लोकपाठं करोति, बाल्यावस्थायां पाठमात्रेण सन्तुष्यन्तोऽपि जनाः वयसि प्राप्ते अर्थस्यापि जिज्ञासां कुर्वन्ति । यदि च्छात्रेण तच्छान्तिः न कृता स्यात्, तर्हि तं न्यूनमयोग्यञ्च मन्यन्ते । अतः दर्वीवत् शुष्ककाष्ठवत् मा भूदवस्था पठितुरिति व्याकरणाध्ययनप्रयोजनमुक्तम् । अत्र सन्दर्भे भाष्यकारैः एकः श्लोकः उदाहृतः –

---

[१] बहुव्रीहौ प्रकृत्या पूर्वपदम् इ.सू.

यदधीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥[१] इति ।

शुष्कमप्येधः अग्निसंपर्काभावात् यथा न ज्वलनयोग्यः, तथा व्याकरणशास्त्रासम्पर्केण अर्थज्ञानाभावात् पाठमात्रेण अभ्युदयं न लभते मनुष्य इति तात्पर्यम् ।

**यस्तु प्रयुङ्क्ते** इत्येतत्प्रयोजनव्याख्यानवेलायां सम्यग्वाक्प्रयोगेण लक्ष्मीवान् मनुष्यो भवतीति प्रयोजनं धारयामास भाष्यकारः ।

उतत्वः इत्याख्यस्य प्रयोजनस्य व्याख्यावेलायां वाचः उपासनया लभ्यं फलं रम्येन दृष्टान्तेन प्रादर्शयद्भाष्यकारः – यथा सुवासाः जाया पत्युः सविधे स्वां तनुं समर्पयति, तथा उपासिता वाक् उपासितारं मनुष्यम् आत्मानं समर्पयति इति ।

एतावत्प्रयोजनवदपीदं शास्त्रं कानुद्दिश्योपदिष्टमिति सुष्ठु पुराकल्पोपन्यासमुखेन प्रादर्शयत् भाष्यकारः । तथाहि – किं पुनरिदं शास्त्रं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यातुमारब्धम्, ओमित्युक्त्वा वृत्तान्तशः शमित्येवमादीन् शब्दान्पठन्ति ये वेदपाठकाः तानुद्दिश्य इति विकल्प्य पुराकल्पमुदाजहार भगवान् । पुराकल्पे एतदासीत्- संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयन्ते । तेभ्यस्तत्तत्स्थानकरणानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते । तदद्यत्वे न तथा । वेदमधीत्य त्वरिता वक्तारो भवन्ति- वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः । अनर्थकं व्याकरणम् इति । तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद्भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे- इमानि प्रयोजनान्यध्येयं व्याकरणम्- इति । एवं महता प्रबन्धेन व्याकरणाध्ययनप्रयोजनानि निरूपितवान् भाष्यकारः ।

वात्सल्येन व्याकरणाध्येतृनुद्दिश्य अभ्युदयनिःश्रेयससिद्धिमित्थं धारयामास भगवान् भाष्यकारः – सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते इति ।

श्रीमता भर्तृहरिणोपदिष्टं व्याकरणस्य शास्त्रौघस्य महत्त्वमित्थम् –

कायवाग्बुद्धिविषया ये मलाः समवस्थिताः । चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः ॥[२]

अत्र बुद्धिः अन्तःकरणम् । लक्षणशास्त्रम् – व्याकरणशास्त्रम् । कायमलेन बुद्धेः कालुष्यं भवतीति अनुभवसिद्धमेव । एवं वाङ्मलेनापि बुद्धेः कालुष्यं जायते, परिहासादिवशात्, अपेक्षितार्थप्राप्त्यभावकारणाद्वा । अत एवोच्यते दण्डिना आचार्येण – श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम् इति । यत्नः क इत्याकाङ्क्षायामुच्यते – व्याकरणाध्ययनपूर्वक एवेति । एवं शब्दशास्त्रोपासनायाः फलमस्त्येव महदिति सङ्क्षेपः ।

**निष्कर्षः** – अतः सर्वैः व्याकरणशास्त्रं पठनीयमिति अभिप्रायः । तदा वाक्शुद्धिः, तेन ब्रह्मसायुज्यमपि प्राप्यते ।

## उपयुक्तग्रन्थसूची

1. व्याकरणमहाभाष्यम् – महर्षिपतञ्जलिना विरचितम्, प्रदीपोद्योतसहितम्, चौखम्बा संस्कृतसीरीज्, बनारस् १, 1985
2. वैयाकरणसिद्धान्तकौमुदी – श्रीभट्टोजीदीक्षितेन विरचिता, बालमनोरमा-तत्त्वबोधिनीसहिता, चौखम्बा संस्कृतसीरीज्, 1954
3. वाक्यपदीयम् – भर्तृहरिविरचितं काण्डत्रयसंवलितम्, मूलमात्रम्, सारस्वतम् पब्लिकेशन्, नई दिल्ली, 2021
4. पाणिनीयशिक्षा – पाणिनिमुनिविरचितम्, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, 1989
5. श्रीमद्भगवद्गीता – गीताप्रेस्, गोरखपूर्, 1973
6. भर्तृहरिनीतिशतकम् – भर्तृहरिविरचितम्, हरिदाससंस्कृतग्रन्थमालायाम्, चौखम्बा संस्कृतसीरीज्, बनारस् १, 1974
7. श्रीमद्वाल्मीकिरामायणम् – श्रीमद्वाल्मीकिप्रणीतम्, चौखम्बा संस्कृतसीरीज्, बनारस् १, 1981
8. अमरकोशः – श्रीमदमरसिंहविरचितः, सुधा(रामाश्रमी)व्याख्ययासहितः, चौखम्बा संस्कृतप्रतिष्ठानम्, नई दिल्ली, 2021

[१]महाभाष्ये पस्पशाह्निके यदधीतम् इति आनुषङ्गिकप्रयोजनसन्दर्भे

[२]वाक्यपदीये ब्रह्मकाण्डे कारिका 146

 ISSN : 2249-538X

# शब्दार्थसम्बन्धः

डा. के. नारायणन्*
सहाचार्यः, सनातनधर्ममहाविद्यालयः,
केरलजनपदम्

शब्दार्थयोः त्रिविधः सम्बन्धः लोके प्रसिद्धः; शक्तिः लक्षणा व्यञ्जना चेति । तत्र शक्तिलक्षणयोः स्वरूपं नैयायिकाभिमतं व्यञ्जनायाश्च आलङ्कारिकाभिमतं स्वरूपं लोके प्रचलितं दृश्यते । अर्थे पदसङ्केतः शक्तिः । स च, इदं पदम् इममर्थं बोधयतु इति पदविशेष्यकेश्वरेच्छारूपो वा, अस्मात् पदाद् अयमर्थो बोद्धव्यः इति पदार्थविशेष्यकेच्छा- रूपो वा । आधुनिके नाम्नि शक्तिरस्त्येव, एकादशेऽहनि पिता पुत्रस्य नाम कुर्यादितीश्वरेच्छायाः सत्त्वात् । शक्तिग्रहश्च -

'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥'[१] इति ॥

व्याकरणादिभिर्भवति । तथाहि 'लः कर्मणि च भावे चाकर्मकेभ्यः' (3.4.69) इति सूत्रेण हरिं सेवते, हरिःसेव्यते, चैत्रेण सुप्यते इत्यत्र यथाक्रमं कर्तरि, कर्मणि भावे च लकारस्य तद्वारा तिङ्प्रत्ययस्य च शक्तिर्गृह्यते । गौरिव गवयः इत्युपमानेन सादृश्यज्ञानात्मकेन गवयपदस्य गोसदृशपशुविशेषे शक्तिग्रहः । ' भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा 'इति कोशात् अधिगतार्थपदैः अनधिगतार्थानां पदानां शक्तिर्गृह्यते । अयं गौः इत्याप्तवाक्येन सास्नालाङ्गुलादिमति पशौ गोपदस्य शक्तिग्रहः । गामानय, गां नय, अश्वमानय, अश्वं बधानेति युवानं प्रति वृद्धस्य वाक्यं शृण्वन्, तद्वाक्यश्रवणेन यूना क्रियमाणां प्रवृत्तिं च पश्यन् बालः प्रथमं तत्तद्वाक्यस्य तत्तत्प्रवृत्तेश्च सम्बन्धं गृहीत्वा, ततः आवापोद्वापाभ्यां तत्तत्पदस्य तत्तदर्थविशेषे शक्तिं गृह्णाति । वाक्यशेषस्य शक्तिनिर्णये एव उपयोगः । यवपदस्य कैश्चिद् दीर्घशूकविशिष्टे धान्ये, कैश्चित् कङ्गौ च प्रयोगात् 'यवैर्जुहोति' इत्यत्र को ग्राह्यः इति सन्देहे 'यत्रान्या ओषधयो म्लायन्ते, अथैते मोदमाना इवोत्तिष्ठन्ति' इति वाक्यशेषेण दीर्घशूके शक्तिर्निर्णीयते । तत्समानार्थकपदान्तरेण तदर्थकथनं विवृतिः । यथा पचतीत्यस्य पाकानुकूला कृतिः इति विवरणात् कृतौ आख्यातस्य शक्तिग्रहः न्यायमते । इह सहकारतरौ पिको मधुरं रौति इत्यत्र प्रसिद्धसहकारपदसान्निध्येन पिकस्य कोकिले शक्तिर्गृह्यते । इयं च शक्तिः पदे एव, न समासे नापि वाक्ये इति नैयायिकाः ।

मीमांसकास्तु ईश्वरेच्छा न शक्तिः ईश्वराभावात् । तस्मात् तादृशसङ्केत एव शक्तिरिति वाच्यम् । पदपदार्थयोः सम्बन्धः शक्तिः । सङ्केतस्य सप्रतियोगिकत्वाभावात् सम्बन्धत्वं न युज्यते । तस्मात् पदपदार्थयोः वाच्यवाचकभावनियामकः सम्बन्धः शक्तिः । शक्तिश्चाति- रिक्तः पदार्थः इति वदन्ति । इह शक्तं पदम्, शक्यः अर्थः, तयोः सम्बन्धः शक्तिः । अभिधानपदेनापि शक्तिरेवोच्यते ।

इयं शक्तिर्जातावेवेति मीमांसकाः । जातिविशिष्टव्यक्तौ शक्तिरिति नैयायिकाः । वैयाकरणानां नात्र नैर्भर्यम् । जातिं पदार्थं मत्वा जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् (1.2.58) इति सूत्रमारब्धम् । व्यक्तिं पदार्थं मत्वा सरूपाणामेकशेष एकविभक्तौ (1.2.64) इति सूत्रमारब्धम् ।

नियोगेन विकल्पेन द्वे वा सह समुच्चिते । इतरेतर सम्बन्धः समुदायो वा विशिष्टा वैकयेतरा ॥[२]

समाहारसन्द इत्याकृत्यधिकरणे अष्टौ पक्षा उक्ताः ।

---

***सम्पर्कसूत्रम्** - 9495505354, Email- kornar2000@gmail.com
[१]न्यायसिद्धान्तमुक्तावलिः शब्द निरूपणम्
[२]श्लोकवार्तिकम् - कुमारिलभट्टः

लक्षणा यत्र शक्यार्थस्य बाधात् तात्पर्यानुपपत्तेश्च तत्सम्बद्धमर्थान्तरं बोधयति तत्र लक्षणा । यथा गङ्गायां घोषः इत्यत्र । घोषः आभीरपल्ली । अत्र प्रथमं गङ्गापदेन शक्त्या जलप्रवाहस्योपस्थितिः । ततः तत्र घोषस्यासम्भवाद् इदं गङ्गापदं घोषानधिकरण- प्रवाहार्थकम् इति ज्ञाने सति, इदं पदं तीरतात्पर्यार्थकं, तीरस्य घोषान्वययोग्यत्वात् इत्यनुमानेन तात्पर्यविशेषावगमे, तीरे घोषः इति बोधो जायते । अयं च शाब्दबोधः तीरस्मृतिं विना अनुपपन्नः । तीरस्मृतिश्च तीरे गङ्गापदस्य सम्बन्धं विना अनुपपन्ना इति गङ्गापदे लक्षणारूपः सम्बन्धः कल्प्यते । शक्यसम्बन्धो लक्षणा । तस्य सम्बन्धस्य शब्दे आरोपात् तस्य शब्दवृत्तित्वम् । गङ्गापदात् तीरबोधोऽपि शक्त्या एवास्तु इति तु न वाच्यम् । गङ्गापदस्य तीरे शक्तिग्राहककोशाद्यभावात् । न हि गङ्गापदं तीरवाचकम् इति वा तीरं गङ्गापदवाच्यम् इति वा लोके व्यवहारोऽस्ति । सा च लक्षणा गौणी शुद्धा चेति प्रथमं द्विविधा । यत्र शक्यलक्ष्ययोः सादृश्यात्मकः सम्बन्धः तत्र गौणी । यथा सिंहो माणवकः, मुखं चन्द्रः इति । शुद्धा च द्विविधा । उपादानलक्षणा, लक्षणलक्षणा चेति । आद्या अजहत्स्वार्थेति, द्वितीया जहत्स्वार्थेति चोच्यते । कुन्ताः प्रविशन्तीति प्रथमो- दाहरणम् । इह कुन्तधारिभिः सह कुन्तानामपि प्रवेशाद् अजहत्स्वार्था । गङ्गायां घोषः इति द्वितीयोदाहरणम् । अत्र तीरे लक्ष्यार्थे शक्यार्थस्य प्रवाहस्य न प्रवेशः । इयं च लक्षणा पदे एव । न पदसमुदाये नापि वाक्ये । गभीरायां नद्यां घोषः इत्यत्र नदीपदस्यैव गभीरनदीतीरे लक्षणा । गभीरपदं तात्पर्यग्राहकम् । यत्र च समासे शक्तिर्न स्वीक्रियते तत्रापि राजपुरुषः इत्यादौ पूर्वपदस्य राजसम्बन्धिनि लक्षणा । ततः अभेदान्वयः । चित्रगुः इति बहुव्रीहौ उत्तरपदस्य गोशब्दस्य चित्रगवां स्वामिनि लक्षणा । चित्रपदं तात्पर्यग्राहकम् इति नैयायिकमतम् । मीमांसकास्तु पदसमुदाये वाक्ये च लक्षणां स्वीकुर्वन्ति ।

आलङ्कारिकास्तावत् पदपदार्थयोः व्यङ्ग्यव्यञ्जकभावरूपं तृतीयं व्यञ्जनात्मकं सम्बन्धं स्वीकुर्वन्ति । तथाहि स्वायत्ते शब्दप्रयोगे गङ्गातीरे घोषः इत्यनुक्त्वा गङ्गायां घोषः इत्यभिधानं किञ्चित् प्रयोजनं प्रतिपादयितुमेव । तच्च प्रयोजनं गङ्गागतशैत्यपावनत्यादि- बोधनमेव । तत्र च गङ्गापदस्य न शक्तिः सङ्केताभावात् । नापिलक्षणा मुख्यार्थ- बाधाभावात् । तस्मात् तत्प्रतीत्यर्थम् अवश्यं व्यञ्जना स्वीकर्तव्या ।

किञ्च मुख्यार्थबाधाभावेऽपि-

भ्रमधार्मिकविस्रब्धं स शुनकोऽद्य मारितस्तेन । गोदावरीतीरनिकुञ्जवासिना दृप्तसिंहेन ॥[१]

इत्यादौ अर्थान्तरप्रतीतिः अनुभवसिद्धा । अपि च रसभावादिः न कदापि वाच्यः लक्ष्यो वा । न हि शृङ्गारपदाभ्यासेन कदापि शृङ्गाररसः प्रतीयते । तस्मात् व्यञ्जनावृत्तिरवश्यम् अभ्युपेया । तदुक्तम् -

वक्तृबोद्धव्यकाकूनां वाच्यस्यान्यस्य सन्निधेः । प्रस्तावकालदेवैशिष्ट्यात् प्रतिभाजुषाम् ।
योऽर्थस्यान्यधीहेतुर्व्यापारो व्यक्तिरेव सा ॥[२]

नैयायिकास्तु व्यञ्जनां वृत्तिं न स्वीकुर्वन्ति । व्यञ्जनालभ्यमर्थमनुमानेन साधयन्ति ।

अथ वैयाकरणानां मतमुच्यते । तत्र च नव्यप्राचीनयोः मतभेदो वर्तते ।

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा । अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥[३] सम्बन्धिशब्दे सम्बन्धो
योग्यतां प्रति योग्यता । समयाद्योगतासंविन्मातापुत्रादि योगवत् ॥[४]

[१]काव्यप्रकाशः द्वितीयोल्लासः

[२]काव्यप्रकाशः तृतीयोल्लासः २१ / २२ कारिका

[३]वाक्यपदीयम् - ब्रह्मकाण्डः

[४]वाक्यपदीयम् - ब्रह्मकाण्डः


ISSN : 2249-538X

चक्षुरादीनाम् इन्द्रियाणां स्वविषयघटादिप्रत्यक्षज्ञानकारणता यथा अनादिर्वर्तते तथा शब्दानामपि अर्थैः सह अर्थविषयकज्ञान कारणतारूपः सम्बन्धः अस्ति । सा कारणतारूपा योग्यतैव शक्तिः । सम्बन्धिशब्दे इयमस्य माता इत्यत्र जन्यजनकभावः सम्बन्धः विषयः । इदमस्य योग्यम् इति योग्यतां प्रति तत्कारणतारूपा योग्यता विषयः । सा योग्यता च व्यवहारात् ज्ञायते, मातापुत्रादिसम्बन्धवत् । पित्रादिसङ्केतज्ञानादेव अर्थबोधकारणताशक्तिः गृह्यते इत्यतः तज्ज्ञानात् पूर्वं न पदात् पदार्थबोधो भवति । ननु बोधजनकतायाःशक्तित्वेऽपि सङ्केतज्ञानस्य आवश्यकत्वात् सङ्केत एव शक्तिरस्तु, स च आधुनिके देवदत्तादौ पित्रादेः सङ्केतः, गवादौ तु ईश्वरस्य सङ्केतः इति चेन्न । तथाहि सङ्केतः स्वरूपेण सन् हेतुर्वा ज्ञातो वा । ज्ञातोऽपि सामान्येन ज्ञातो वा विशेषेण ज्ञातो वा । न स्वरूपेण हेतुः अगृहीतसङ्केतादपि बोधप्रसङ्गात् । नापि सामान्येन ज्ञातः हेतुः, प्रमेयत्वादिना तज्ज्ञानेऽपि बोधप्रसङ्गात् । नापि विशेषत्वेन ज्ञातः, गवादिपदेष्वपि ईश्वरादेः सङ्केतत्वेन तज्ज्ञानशून्यानां लौकिकमीमांसकादीनां तत्तदर्थबोधकत्वग्रहवतामेव बोधोदयेन व्यभिचारात् । न च लाक्षणिकार्थेऽपि शब्दस्य अनादिबोधजनकतायाः सत्त्वात् तत्रापि शक्त्यैव सिद्धे लक्षणोच्छेदापत्तिः स्यादिति वाच्यम् इष्टापत्तेः । अन्यथा लक्षणास्वीकारे शाब्दबोधं प्रति शक्तिजन्योपस्थितेः लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यम् । तथा च कार्यकारणभावद्वयस्य कल्पने गौरवं स्यात् । वैयाकरणानां तु सर्वत्र शक्तिजन्योपस्थितेरेव कारणत्वमिति लाघवम् । इयं च शक्तिः समासे वाक्येऽपि वर्तते इति भूषणसारे प्रपञ्चितम् ।

नागेशस्तु मञ्जूषायाम् ईश्वरेच्छा न शक्तिः । तथाहि प्रयोजकवृद्धस्य वाक्यं शृण्वन् प्रयोज्यवृद्धव्यवहारं पश्यंश्च बालः प्रयोज्यस्य कार्येषु प्रवृत्तिं दृष्ट्वा तस्य ज्ञानम् अनुमिनोति । तस्य च ज्ञानस्य शब्दमेव कारणं गृहीत्वा असम्बद्धस्य कारणत्वानुपपत्त्या वाक्यवाक्यार्थयोः सम्बन्धं कल्पयति । तस्य च गृहीतजनकत्वघटितस्य स्वयम् अनुपपद्यमानत्वेन ग्रहीतुमशक्यत्वात् नेश्वरेच्छा शक्तिः । उक्तहेतोरेव अनादिबोधकतैव शक्तिरिति प्राचीनवैयाकरणोक्तम् अप्यपास्तम् । किञ्चैवं धूमात् वह्निज्ञानं जायताम् इति ईश्वरेच्छाया एव हेतुसाध्ययोः सम्बन्धे व्याप्त्युच्छेदापत्तिः । किञ्च इच्छायाः बोध- कारणतायाः वा द्विनिष्ठत्वाभावात् सम्बन्धत्वं न युज्यते । तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया । तद्ग्राहकं च इतरेतराध्यासमूलकं तादात्म्यम् । तच्च सङ्केतः । तस्यापि पदनिष्ठशक्त्युपकारकत्वात् शक्तिरिति व्यवहारः । तादात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् । अभेदस्याध्यस्तत्वान्न तयोर्विरोधः । तस्य च सम्बन्धत्वाभावात् शक्तित्वं न संभवतीति वाच्यवाचकभावरूपं सम्बन्धं शक्तिः इति नागेशः स्वीकरोति ।

आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्यव्यक्तिबोधे व्यक्ति- विशेषबोधे च लक्षणेति व्यवहारः । छत्रिणो यान्तीत्यादौ साहचर्याद् अच्छत्रिषु छत्रित्वारोपः । काकेभ्यो दधि रक्ष्यताम् इत्यादिः दध्युपघातकमात्रे काकत्वारोपः । ' रवि- किरणानुगृहीतानि कमलानि । कमलानि 'इत्यत्र सौरभविशिष्टव्यक्तिविशेषे कमलत्वारोपः । भाष्ये च चतुर्भिः प्रकारैरेतस्मिन् स इत्येतद् भवति, तात्स्थ्यात्, ताद्धर्म्याद्, तत्सामीप्यात्, तत्साहँचर्यात् । मञ्चा हसन्ति, सिंहो माणवकः, गङ्गायां घोषः, यष्टीः प्रवेशय इत्युक्तम् । बालेषु मञ्चत्वारोपात् मञ्चपदप्रवृत्तिः हसन्तीति पदान्तरप्रयोगाद् विज्ञायते इति कैयटेन आरोपणं स्पष्टमुक्तम् । इत्यादिभिः युक्तिभिः लक्ष्यत्वेनाभिमतस्य अमुख्यार्थस्यापि शक्त्यैव बोधं समर्थयते ।

ध्वनिस्फोटयोः व्यङ्ग्यव्यञ्जकभावम्, निपातानां द्योतकत्वं च स्वीकुर्वतां वैयाकरणानां व्यञ्जनास्वीकारः आवश्यकः इति स्थापयति । मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणप्रसिद्धाप्रसिद्धविषयको वक्त्रादिवैशि-ष्ट्यज्ञानप्रतिभाद्युद्बुद्धसंस्कारविशेषो व्यञ्जनेति व्यञ्जनां लक्षयति च ।

इयं शक्तिः साधुषु संस्कृतपदेष्वेवेति नैयायिकाः मीमांसकाश्च । तथाहि एकैकस्य संस्कृतशब्दस्य अनेके अपभ्रंशाः । तेषां सर्वेषां वाचकत्वकल्पने गौरवम् । तदुक्तं जैमिनिना अन्याय्यश्चानेकशब्दत्वम् इति । न चैवं घटसमानार्थकानां कलशादीनामपि वाचकत्वं न स्याद् अनेकवाचकत्वकल्पने गौरवादिति वाच्यम् । तेषां सर्वत्रैकत्वात् विनिगमनाविरहेण तेष्वपि शक्तिस्वीकारात् । गवादिषु तु गोशब्दस्य संस्कृतस्य सर्वत्रैकत्वं गाव्यादीनाम् अपभ्रंशानां तु देशभेदेन नानात्वमिति विनिगमकस्य सत्त्वात् संस्कृते एव शक्तिः । अपभ्रंशेभ्यस्तु व्युत्पन्नस्य साधुशब्दस्मृतिद्वारा शाब्दबोधः, अव्युत्पन्नस्य तु भ्रमात् शाब्दबोधः । तथा हि व्युत्पन्नस्य गाव्यादिशब्दश्रवणे साधोर्गोशब्दस्य स्मृतिर्भवति । तस्मात् साधुशब्दाद् अर्थं बुद्ध्वा तत्तत्कार्यं करोति । तस्य साधुशब्दस्मरणम् अजानन् अव्युत्पन्नः अपभ्रंशेभ्यः गाव्यादिशब्देभ्य एव तस्यार्थबोधो जात इति विचिन्त्य तेषां तत्तदर्थे शक्तिं कल्पयति । अन्यांश्च तथैव व्युत्पादयति । एवं सर्वेषां साधुत्वभ्रमो जायते । तदुक्तं हरिणा -

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः । नोथः तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥

न शिष्टैरनुमन्यन्ते पर्याया इव साधवः । न यतः स्मृतिशास्त्रेण तस्मात् साक्षादवाचकाः ॥

अम्बाम्बेति यथा बालः शिक्षमाणः प्रभाषते । अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः ॥

एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते । तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥ इति ॥

वैयाकरणास्तु साधुष्वसाधुषु च शक्तिं स्वीकुर्वन्ति । तत्र च भाष्यकृतः पस्पशाह्निके 'समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते शब्देनैवाथर्थोऽभिधेयो नापशब्देनेति' इति वाक्यमेव प्रमाणम् । न च, तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः, तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै इति निषेधाद् अपभ्रंशप्रयोगेणाधर्मः स्यादिति वाच्यम् । याज्ञे कर्मण्येव तस्य निषेधात् । अत एव नाटकेषु गाथासप्तशत्यादिषु च प्राकृतभाषाप्रयोगो दृश्यते । न च अपभ्रंशात् साधुस्मरणेन बोधः इति वाच्यम् । साधुशब्दमजानतः तदसम्भवात् । तस्य साधुशब्दाद् बोधाभावाच्च । न च शक्तिभ्रमाद् बोधः, बोधकत्वस्याबाधेन भ्रमत्वासम्भवात् । न चैवमपभ्रंशानामपि वाचकत्वे तेषामपि साधुत्वं स्यादिति वाच्यम् । साधुत्वबोधकत्वयोरैक्याभावात् । तदुक्तम्-

भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम् । साधुत्वं तदभावेऽपि बोधो नेह निवार्यते ॥ इति,

अनपभ्रष्टतानादिर्यद्वाभ्युदययोग्यता । व्याक्रियाव्यञ्जना या वा जातिः कापीह साधुता ॥ [1] इति च ॥

यादृशविशेषणान्वितयादृशविशेष्यबोधे यादृशानुपूर्व्या मुनित्रयाभिमतत्वं तत्र तस्याः साधुत्वं नान्यत्र । तेन अस्वशब्दः निर्धने साधुः, तुरगेऽसाधुः । साधुत्वाभावेऽपि अपभ्रंशात् अर्थबोधो न निवार्यते । उक्तं हि

पारम्पर्यादपभ्रंशा विगुणेष्वभिधातुषु । प्रसिद्धिमागता येषु तेषां साधुरवाचकः ॥

दैवीवाग्व्यवकीर्णेयमशक्तैरभिधातृभिः । अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्ययः ॥ [2] इति ।

तथा च संस्कृतेऽपभ्रंशे च शक्तिरस्त्येव । लोके तावत् साधूनां शब्दानामभ्युदयहेतुत्वं वर्तते । अपशब्दानां प्रत्यवायजनकत्व ना अत एव यर्वाणस्तर्वाणः इति प्रयोगस्य न प्रत्यवायहेतुत्वम् । तैरसुरैः पुनः हेलयो हेलय इति याज्ञे कर्मण्यपभाषितम् । अतस्ते पराभूताः इति विवेकः ।

[1] वाक्यपदीयम् - ब्रह्मकाण्डः

[2] वाक्यपदीयम् - ब्रह्मकाण्डः


ISSN : 2249-538X

# योगशास्त्रे वर्णितानां भुवनानां तन्निवासिनाञ्च परिचयः

डा. विश्वनाथ हेगडे*
सहायकाचार्यः, के.सं.वि.,रा.गा.परिसरः
श्रृङ्गेरी

***लेखसारः*** *– दर्शनेषु पुराणादिषु च अस्य ब्रह्माण्डस्य विषये बहुधा विवरणम् उपलभ्यते । प्रायः सर्वत्र दर्शनेषु चतुर्दशभुवनानाम् उल्लेखो दृश्यते । योगदर्शने तावत् पातञ्जलयोगसूत्रस्य विभूतिपादे संयमसिद्धीनां विवरणसन्दर्भे भुवनानां विस्तरशः विवरणं कृतं वर्तते । पातञ्जलयोगसूत्रे भुवनज्ञानरूपसिद्धेः विवरणसन्दर्भे समग्रस्य ब्रह्माण्डस्य परिचयः व्यासभाष्ये कारितः । तत्र विष्णुपुराणाद्यपेक्षया किञ्चित् वैलक्षण्यं वर्तते । अत्र प्रतिपादितानां भुवनानां विवरणेन भौगोलिकदृष्ट्या भुवनानां परिचयः अपि भविष्यति । किञ्च एतेषु लोकेषु ये निवसन्ति तेषां स्वरूपमपि अस्मिन् लेखे वयं ज्ञातुं प्रभवामः । चित्तवृत्तीनां निरोधस्य विषये वर्णयितुं तात्पर्यवदपि योगदर्शनं प्रासङ्गिकरूपेण ब्रह्माण्डस्य विवरणं करोति । अनेन सहस्राधिकवर्षेभ्यः प्रागेव समग्रस्य ब्रह्माण्डस्य विवरणम् अस्माकं पूर्वजैः कथं कृतमिति ज्ञायते । तत्र विवृतानां भुवनानां तन्निवासिनां च परिचयः अस्मिन् लेखे कारितः । किञ्च योगशास्त्रे निरूपितस्य ब्रह्माण्डस्य विवरणस्य शास्त्रान्तरेण साकं तुलनात्मकम् अध्ययनमपि अस्मिन् शोधलेखे कृतम् । एतेन भारतीयसन्दर्भे ब्रह्माण्डस्य विषये अस्माकं मुनीनां का दृष्टिरासीदिति ज्ञातुं शक्यते । आधुनिकविज्ञानदृष्ट्या जगत्स्वरूपविषयकं तुलनात्मकम् अध्ययनमपि कर्तुं शक्यते ।*

***कूटशब्दाः*** *– भुवनानि, सिद्धिः, संयमः, सूर्यद्वारम्, सुषुम्ना, नरकलोकाः, पाताललोकाः, ब्रह्मलोकः*

## भूमिका -

भारतीयदर्शनेषु जगतः स्वरूपस्य विषये बहुधा विचारः कृतो दृश्यते । न्याय-वैशेषिक-साङ्ख्य-योग-मीमांसा-वेदान्तेषु जगतः सृष्ट्यादिविषये, ब्रह्माण्डे विद्यमानानां लोकानां विषये, तत्र निवासिनां जीवानां विषये च तत्र तत्र प्रतिपादितं वर्तते । पुराणादिषु ब्रह्माण्डस्य विषये विस्तरशः विवरणं वर्तते । किन्तु दर्शनेषु तावत् तत्तद्दर्शनस्य प्रमेयसाधनाय ब्रह्माण्डस्य, तत्र विद्यमानानां लोकानां विषये च प्रतिपादिनं कर्तव्यं भवति । तस्मात् तत्तद्दर्शनस्य प्रमेयेण साकं ब्रह्माण्डे विद्यमानानां लोकानां विषयोऽपि दार्शनिकैः प्रतिपादितो वर्तते । वेदान्तदर्शने तावत् जगतः सृष्टिविषयकश्रुतिनिरूपणसमये ब्रह्माण्डान्तर्गतानां चतुर्दशभुवनानाम् उल्लेखः सर्वत्र वेदान्तग्रन्थेषु कृतः । न्यायदर्शने तावत् संक्षेपेण तर्कसङ्ग्रहादिग्रन्थेषु "आदित्यलोके", "वरुणलोके", इत्येवं प्रकारेण लोकानां उल्लेखः भिन्नतया एव दृश्यते । प्रकृतशोधलेखे योगशास्त्रे ब्रह्माण्डान्तर्गतलोकानां, तन्निवासिनां विषये च कथं वर्णनं दृश्यते इति विचारः विस्तरशः चिकीर्षितः ।

योगदर्शने 'पातञ्जलयोगसूत्रम्' इति ग्रन्थः प्रमाणभूतः ग्रन्थो वर्तते यदाधारीकृत्य समग्रं योगदर्शनं प्रवृद्धम् । पादचतुष्टयोपेते पातञ्जलयोगसूत्रे समाधिपादः, साधनपादः, विभूतिपादः, कैवल्यपादश्चेति चत्वारः पादाः पातञ्जलयोगसूत्रे वर्तन्ते । तत्र तृतीये विभूतिपादे योगाङ्गानाम् अनुष्ठानेन जायमानानां सिद्धीनां विषये विस्तरशः वर्णितं दृश्यते । योगाङ्गानाम् अनुष्ठानस्य महिमानं वर्णयत्ययं पादः । अस्मिन् पादे धारणाध्यानसमाधीनाम् एकस्मिन् विषये अनुष्ठानेन याः सिद्धयः उपजायन्ते तासां सिद्धीनां प्रत्येकं वर्णनं कृतमस्ति ।

पातञ्जलयोगसूत्रमधिकृत्य व्यासभाष्यं प्रवर्तते । व्यासभाष्यस्य विवरणात्मिका वाचस्पतिकृता टीका योगशास्त्रस्य

---

***सम्पर्कसूत्रम्** - 9481075146,Email- sunkasalvishwa@gmail.com

ग्रन्थपरम्परायां महत्त्वं बिभर्ति । एवं च पातञ्जलयोगसूत्रमाश्रित्य भोजवृत्तिः, भावगणेशवृत्तिः, नागोजीभट्टवृत्तिः, मणिप्रभा, चन्द्रिका, योगसुधाकरः इत्यादयः व्याख्यानग्रन्थाः अपि वर्तन्ते । किञ्च सदाशिवब्रह्मेन्द्राणां व्याख्यानपि योगसूत्रस्य अर्थावगमने अत्यन्तम् उपकरोति ।

विभूतिपादे पञ्चविंशतितमसूत्रपर्यन्तम् अष्टविधसिद्धीनां विवरणं कृत्वा षड्विंशतितमे सूत्रे भुवनविषयकज्ञानरूपा सिद्धिः वर्णिता वर्तते । तथा च भुवनज्ञानरूपसिद्धेः प्रतिपादकं सूत्रं भवति "भुवनज्ञानं सूर्ये संयमात्"[१] इति । इतः प्राक् धारणाध्यानसमाधीनां संयमेन जायमानानाम् अष्टविधसिद्धीनां विवरणं कृत्वा अधुना भुवनज्ञानसिद्धेः साधनत्वेन सूर्यसंयमः उच्यते । संयमो नाम धारणाध्यानसमाधीनां समूहः । भिन्नभिन्नविषयेषु संयमः क्रियते चेत् विभिन्नसिद्धयः प्रादुर्भवन्ति । तत्र सूर्यसंयमेन भुवनज्ञानरूपसिद्धिः उत्पद्यते इति अस्य सूत्रस्य तात्पर्यार्थः ।

सूर्यसंयमः इत्यत्र विद्यमानः सूर्यशब्दः कमर्थम् अभिव्यनक्ति? इति चेत् अत्र सूर्यशब्दः लोके प्रसिद्धं सूर्यमेव अभिव्यनक्तीति केचन अभिप्रयन्ति । तत्रापि भोजराजः प्रत्यक्षेण दृश्यमानसूर्ये एव संयमः कर्तव्यः इति सिद्धान्तितवान् । तथा च भोजवृत्तौ इत्थम् उक्तम् – "सूर्ये प्रकाशमये यः संयमं करोति तस्य सप्तसु भूर्भुवस्सुवप्रभृतिषु लोकेषु यानि भुवनानि तत्तत्सन्निवेशभाञ्जि पुराणि तेषु यथावत् अस्य ज्ञानमुत्पद्यते"[२] इति । भावगणेशवृत्तौ तावत् "सूर्यमण्डले संयमात् तद्गताशेषविशेषसाक्षात्कारे सत्यशेषविशेषितः चतुर्दशभुवनज्ञानम्" इत्युक्तम् । तथा च सूर्यमण्डले संयमः कर्तव्यः इत्याशयः । नागोजिभट्टकृतवृत्तावपि "सूर्यमण्डले संयमात् तद्गताशेषविशेषसाक्षात्कारे अशेषविशेषतः चतुर्दशविशेषभुवनज्ञानं भवति इत्यर्थः"[३] इत्युक्तम् । मणिप्रभाटीकायां तावत् "दिवि देदीप्यमानमार्तण्डमण्डले सुषुम्नादिद्वास्के सहस्ररश्मिमालिनीसंयमात् दृश्याभिन्नं चित्तं चतुर्दशभुवनानि साक्षात्करोति इत्यर्थः"[४] इत्युक्तम् । तथा च अस्यां व्याख्यायां बाह्यसूर्यमण्डले किञ्च आध्यात्मिके सुषुम्नानाड्यां च संयमः कर्तव्यः इति द्वेधा व्याख्यानं दृश्यते । योगसुधाकरग्रन्थे तावत् "सुषुम्नादिसहस्रमयूखमालिनि दिवि द्योतमाने मार्तण्डमण्डले संयमात् दृश्याभिन्नं चित्तं चतुर्दशभुवनानि साक्षात्करोति इत्यर्थः"[५] इत्युक्तम् । अत्र 'सुषुम्नानाड्यां विद्यमाने मार्तण्डमण्डले' इति व्याख्यानं कृतम् ।

व्यासभाष्ये तावत् सूर्यशब्दस्य 'सूर्यद्वारे' इत्युक्तम् । सूर्यद्वारं नाम सुषुम्ना इत्यर्थः । तथा च सुषुम्नायां संयमः कर्तव्यः इति व्यासभाष्यस्य तात्पर्यम् । सुषुम्ना नाम सुषुम्नानाडी एव । "एतद्योगिनां साक्षात्करणीयां सूर्यद्वारे संयमं कृत्वा ततो अन्यत्रापि"[६] इति व्यासभाष्यस्य वाक्यम् । ततो अन्यत्रापि इत्युक्तत्वात् सुषुम्नानाडीं विहाय योगगुरुणा प्रोक्तेषु अन्यत्र स्थानेष्वपि अपि संयमः कर्तव्यः इति ज्ञायते । तदानीं प्रत्यक्षसूर्ये अपि कर्तव्यः यः संयमः सोऽपि तत्र अन्तर्गतो भवति । श्रीसदाशिवब्रह्मेन्द्रैः "सुषुम्नादिसहस्रमयूखमालिनि दिवि द्योतमाने मार्तण्डमण्डले संयमात्" इत्युक्तम् । सुषुम्ना नाम केवलं साधकस्य शरीरे एव विद्यमाना नाडी इति नार्थः । तत्तु सूर्येऽपि किरणरूपेण भवति । सूर्ये विद्यमानस्य सुषुम्नाकिरणस्य शरीरे विद्यमानायाः सुषुम्नानाड्याश्च साक्षात् सम्बन्धो वर्तते । सुषुम्नादिसहस्रकिरणैः विशिष्टः सन् आकाशे देदीप्यमाने सूर्ये संयमकरणेन भुवनज्ञानं भवति इति अस्य तात्पर्यम् ।

[१] पातञ्जलयोगसूत्रम् ३.२६
[२] भोजवृत्तिः ३.२६
[३] नागोजिभट्टवृत्तिः ३.२६
[४] मणिप्रभा ३.२६
[५] योगसुधाकरः ३.२६
[६] 6: पातञ्जलयोगसूत्रम्, व्यासभाष्यम्


ISSN : 2249-538X

पूर्वोक्तसूर्यसंयमेन भुवनानां ज्ञानं भवति । सैव अस्य सूर्यसंयमस्य सिद्धिः । भूमण्डले चतुर्दशभुवनानि वर्तन्ते । एतेषां सर्वेषामपि साक्षात्कार एव योगशास्त्रे 'मधुमतीसिद्धिः' इत्यपि नामान्तरेण व्यवहृतः ।

## सूर्यसंयमात् साक्षात्क्रियमाणानां भुवनानां विवरणम् -

सूर्यसंयमात् भुवनानां साक्षात्कारः भवति इत्युक्तम् । तत्र कानि तानि भुवनानि इति व्यासभाष्ये विस्तृततया वर्णितम् । तथा च यावत्पर्यन्तं भुवनानां साक्षात्कारो न भवति तावत्पर्यन्तं सूर्यसंयमः कर्तव्यः इत्यप्युक्तं भवति । संक्षेपेण भूः, भुवः, सुवः, महः, जनः, तपः, सत्यम् इति उपरि विद्यमानाः सप्तलोकाः । महातलं, रसातलम्, अतलं, सुतलं, वितलं, तलातलं, पातालं चेति सप्त अधो लोकाः अस्मात् सूर्यसंयमात् साक्षात्कृताः भवन्ति ।

तत्र भूलोको नाम "अवीचि" इत्याख्यात् नरकलोकात् आरभ्य मेरुपृष्ठपर्यन्तं विस्तृतो लोकः । मेरुपृष्ठात् ध्रुवनक्षत्रपर्यन्तं विस्तृतो लोकः अन्तरिक्षलोकः अथवा भुवर्लोकः इत्युच्यते । ततोऽप्यग्रे विद्यमानानां लोकानां सुवर्लोकत्वेन व्यवहारः । एते सुवर्लोकाः इन्द्रस्य प्रशासने वर्तन्ते । तत्र जनः, तपः, सत्यलोकः इति प्रसिद्धानां लोकानां ब्रह्मलोकः इति नामान्तरम् ।

एते चतुर्दशलोकाः विस्तरेण व्यासभाष्ये वर्णिताः । तथा च "अवीचि" इत्यादि अष्टाविंशतिनरकलोकाः पुराणेषु प्रसिद्धाः । महाकालम्, अम्बरीषं, रौरवं, महारौरवं, कालसूत्रम्, अन्धतामिस्रम् अवीचिः इत्येवं सप्तनरकलोकानाम् उल्लेखः अस्मिन् ग्रन्थे वर्तते । एते षट् नरकलोकाः पृथिवीजलतेजोवाय्वाकाशतमांसि आधृत्य वर्तन्ते । अर्थात् एतानि पृथिव्यादीनि षड्विधनरकलोकानाम् आश्रयाणि सन्ति । जीवाः स्वकर्मानुसारम् अत्यन्तं कष्टमयं जीवनम् एतेषु लोकेषु यापयन्ति । भूलोकात् अधः पूर्वोक्तमहातलादयः सप्त पाताललोकाः वर्तन्ते । ततः आरभ्य गणयामश्चेत् भूलोकः अष्टमो भवति ।

भूलोके सप्तमहाद्वीपाः वर्तन्ते । अत एव भूलोकः 'सप्तद्वीपा वसुमती' इति शास्त्रे व्यवहृतो वर्तते । एतादृशभूलोकस्य नाभिप्रदेशे सुमेरुपर्वतो विराजते । सुमेरुपर्वतः "सुवर्णमयः", "पर्वतराजः" इत्यपि कथ्यते । अस्य पर्वतराजस्य रजतवैढूर्यस्फटिकसुवर्णमयानि शृङ्गाणि वर्तन्ते । एतदनुसारं सर्वेषां शृङ्गाणां वर्णाः अपि कथिताः सन्ति । एतादृशस्य सुमेरुपर्वतस्य दक्षिणपार्श्वे जम्बूद्वीपो वर्तते । अस्मिन् जम्बूद्वीपे भारतवर्षं वर्तते ।

जम्बूद्वीपस्य परितः भूभागस्यापेक्षया द्विगुणितः लवणसमुद्रो वर्तते । सुमेरुपर्वतः एकलक्षयोजनपरिमितः इति अत्र वर्णितम् । समुद्रे शाक-कुश-क्रौञ्च-शाल्मला-गोमेध-पुष्करेत्याख्याः द्वीपाः वर्तन्ते । किञ्च सप्तसमुद्राः अस्मिन् भूमण्डले सन्ति । इक्षुरसः(इक्षुरसतुल्यं जलम् अस्मिन् वर्तते इत्यर्थः), सुरा(सुरासदृशं जलं), सर्पिः(घृतसदृशं जलं), दधि(दधिसदृशं जलं), मण्ड(अन्नरससदृशं जलं), क्षीर(दुग्धसदृशं जलं), स्वादु(मधुरजलम्) इत्याख्याः सप्तसमुद्राः वर्तन्ते । एतादृशस्य भूलोकस्योपरि अधस्ताच्च नैके लोकाः सन्ति । एतत्सर्वं मिलित्वा ब्रह्माण्डशब्देन कथ्यते ।

## पाताललोकानां विवरणम् -

पाताललोकस्य विवरणं कुर्वता व्यासभाष्यकारेण तन्निवासिनः ये जीवाः तेषां विषये वर्णयति । पाताललोकस्य समुद्रे पर्वते च असुराः, गन्धर्वाः, किन्नराः, किंपुरुषाः, यक्षाः, राक्षसाः, भूतप्रेतपिशाचापस्मारकाः, अप्सरसः, कूष्माण्डाः, ब्रह्मराक्षसाः, विनायकाः इति एते समूहाः निवसन्ति । द्वीपेषु पुण्यात्मनः देवाः वासं कुर्वन्ति । सुमेरुपर्वतः देवतानाम् उद्यानमस्ति । तत्र मिश्रवनं, नन्दनवनं, चैत्ररथवनं, सुमानसवनमिति उद्यानवनानि सन्ति । तथैव सुधर्मा इति देवतानां सभा, सुदर्शनमिति पुरस्य नाम, वैजयन्तः इति प्रासादस्य नाम ।

## उपरितनलोकानां तन्निवासिनाञ्च विवरणम् -

इत्थं भूलोकपातालल्लोकयोः वर्णनं कृत्वा भूलोकापेक्षया उपरिविद्यमानां लोकानां तन्निवासिनाञ्च वर्णनम् अग्रे करिष्यते । भुवर्लोके ग्रहनक्षत्रादयः सन्ति । एते सर्वेऽपि वायोः नियममाश्रित्य सञ्चारं कुर्वन्ति । सुवर्लोके षड्विधदेवसमूहाः वर्तन्ते । त्रिदशाः, अग्निष्वात्ताः, याम्याः, तुषिताः, अपरिनिर्मितवशवर्तिनः, परिनिर्मितवशवर्तिनः चेति । एते सर्वेऽपि सङ्कल्पसिद्धाः, अणिमाद्यैश्वर्यमन्तः, एकसहस्रमहायुगपर्यन्तं जीवितुं शक्ताः, अयोनिजाश्च वर्तन्ते । महर्लोके पञ्च प्रकाराः देवसमूहाः वर्तन्ते । कुमुदाः, रुभवः, प्रतर्दनाः, अञ्जनाभाः, प्रचिताभाः चेति । एते सर्वेऽपि पञ्चमहाभूतानि स्ववशे स्थापयन्ति । एतेषां ध्यानमेव आहारो वर्तते । तथैव एकसहस्रकल्पपर्यन्तम् एते जीवन्ति ।

अग्रिमलोकत्रयं ब्रह्मलोकः इत्येव प्रसिद्धम् । तत्र प्रथमो लोकः जनलोकः । अत्र चतुर्विधाः देवसमूहाः निवसन्ति । ब्रह्मपुरोहिताः, ब्रह्मकायिकाः, ब्रह्ममहाकायिकाः, अमराश्चेति । एते सर्वेऽपि पञ्चमहाभूतानि, इन्द्रियाणि च स्ववशे स्थापयन्ति । तथैव पूर्वोक्तदेवगणापेक्षया द्विगुणितमायुः एतेषां वर्तते । ब्रह्मलोकेषु द्वितीयः लोकः भवति तपोलोकः । तत्र त्रिविधदेवसमूहाः सन्ति । आभास्वराः, महाभास्वराः, सत्यमहाभास्वराश्चेति । एते सर्वेऽपि पञ्चमहाभूतानि, इन्द्रियाणि, पञ्चतन्मात्राणि च स्ववशे स्थापयन्ति । एतेषां ध्यानमेव आहारः । किञ्च एते ऊर्ध्वरेतस्काः ।

अन्तिमो लोकः ब्रह्मलोकः । अस्य सत्यलोकः इत्यपि नामान्तरं वर्तते । अत्र चतुर्विधदेवसमूहाः निवसन्ति । अच्युताः, शुद्धनिवासाः, सत्याभाः, संज्ञासंज्ञिनश्चेति । एते सर्वे आधारं विनैव स्वप्रतिष्ठाः सन्ति । मूलप्रकृतिमेव स्ववशे स्थापयित्वा स्वेच्छानुगुणं सत्त्वरजस्तमोगुणान् प्रवर्तयन्ति । तथैव लोकस्य प्रलयपर्यन्तम् एते जीवन्ति । एतेषु अच्युताः सवितर्कसविकल्पकसमाधौ निरताः । शुद्धनिवासाः सविचारसमाधिनिष्ठाः । सत्याभाः सानन्दसमाधौ निरताः । संज्ञासंज्ञिनश्च अस्मितेत्याख्ये सविकल्पकसमाधौ निरताः । निर्विकल्पकसमाधिनिष्ठाः ब्रह्मलोके नायान्ति । यतः ते कैवल्यं प्राप्नुवन्ति । एवं विस्तृतस्य ब्रह्माण्डस्य साक्षात्कारं सूर्यसंयमात् योगिनः प्राप्नुवन्ति ।

## विष्णुपुराणादिभ्यः अस्य भेदः -

सूर्यस्य संयमात् जायमानभुवनज्ञानाख्यसिद्धेः विवरणसन्दर्भे व्यासभाष्यं समग्रब्रह्माण्डस्य तन्निवासिनाञ्च तेषां परिचयं करोति । इदञ्च पुराणेषु दर्शनान्तरेषु च विवृतस्य ब्रह्माण्डस्य विवरणापेक्षया किञ्चित् भिन्नं वर्तते । तथा च विष्णुपुराणे एवमेव अवीच्यादिनरकलोकानां वर्णनमस्ति । तन्निवासिनां जीवानां कष्टपरम्परा अपि विष्णुपुराणे वर्णिता । एतेषां नरकलोकानां प्रतिष्ठात्वेन योगशास्त्रे वर्णिताः पृथिव्यादयः अत्रापि समानाः । किन्तु जम्बूद्वीपस्य मध्यभागे सुमेरुपर्वतः वर्तते इति विष्णुपुराणे वर्णितम् । व्यासभाष्ये तु सुमेरुपर्वतस्य दक्षिणपार्श्वे जम्बूद्वीपो वर्तते इति उल्लिखितम् । इत्थं कश्चन भेदः व्यासभाष्योक्तब्रह्माण्डस्य विवरणे दरीदृश्यते । तथा च विष्णुपुराणे प्रोक्तम् -

जम्बूद्वीपः समस्तानाम् एतेषां मध्यसंस्थितः ।
तस्यापि मेरुर्मैत्रेय ! मध्ये कनकपर्वतः ॥ इति ।[१]

## उपसंहारः

वेदान्तदर्शने तावत् चतुर्दशलोकाः स्वीक्रियन्ते । किन्तु तत्र निवासिनां जीवानां परिचयः तथा नोपलभ्यते । क्रममुक्त्यवसरे तावत् उपासकानां कर्मिणां च ऊर्ध्वगतिः श्राव्यते । तत्र अन्ते श्रूयमाणस्य सत्यलोकस्य विवरणसन्दर्भे हिरण्यगर्भलोकं

[१] वि.पु.२.७

 ISSN : 2249-538X

ये प्राप्ताः ते तत्र गत्वा श्रवणमननादिकं कृत्वा हिरण्यगर्भेण साकं मोक्षं प्राप्नुवन्ति इति विवृतमस्ति । इत्थं शास्त्रान्तरे पुराणादिषु च ब्रह्माण्डस्य विषये यद्विवरणं दृश्यते तत्र कश्चन भेदः व्यासभाष्ये वर्णितस्य ब्रह्माण्डस्य दृश्यते ।

## अनुशीलितग्रन्थाः (Bibliography)


1. योगदर्शन, हिन्दी-व्याख्यासहित, गीताप्रेस, गोरखपुर ।
2. पातञ्जलयोगदर्शनम्, व्यासभाष्य-संवलितम् तच्च योगसिद्धि-हिन्दीव्याख्योपेतम्, डॉ. सुरेशचन्द्र श्रीवास्तवः, चौखम्बा सुरभारती प्रकाशन, वाराणसी ।
3. पातञ्जलयोगदर्शनम्, व्यासभाष्यानुवादेन सह 'प्रभा' हिन्दीव्याख्योपेतम्, परमहंस स्वामी अनन्त भारती (व्याख्याकारः), चौखम्भा ओरियन्टालिया,दिल्ली ।
4. पातञ्जल-योगदर्शन, हिन्दी टीका सहित, स्वामी विष्णुतीर्थ जी महाराज, श्री साधन ग्रन्थमाला प्रकाशन समिति, नारायण कुटी, सन्न्यास आश्रम, देवास (म. प्र.)
5. पातञ्जल योगदर्शन, व्यासभाष्य, उसका हिन्दी अनुवाद तथा सुविशद व्याख्या, श्रीमत स्वामी हरिहरानन्द आरण्य ।
6. पातञ्जल-योगदर्शन (हिन्दी), (व्यासभाष्य सहित की सटिप्पण हिन्दी व्याख्या), डॉ. रमाशङ्कर त्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी ।
7. The Yoga of Patanjali, M. R. Yardi, Bhandarkar Oriental Research Institute, Poona.
8. Yoga and Patanjali (A Brief Survey), Swami Harshananda, Ramakrishna Math.
9. श्रीविष्णुपुराण, हिन्दी-व्याख्यासहित, गीताप्रेस, गोरखपुर ।
10. श्रीविष्णुमहापुराणम्, पौराणिक तथा वैदिक अध्ययन अनुसन्धान संस्थान, नैमिषारण्य, सीतापुर, Edition 1991
11. विष्णुमहापुराणम्, edited by PT. Thaneshchandra Upreti, परिमल पब्लिकेशन् डेल्हि
12. वेदान्तपरिभाषा (धर्मराजाध्वरीन्द्रविरचिता), क्षेमराजश्रीकृष्णदासः श्रेष्ठी (प्रकाशकः), श्री वेङ्कटेश्वर मुद्रालयः, मुम्बै ।
13. वेदान्तपरिभाषा (सामणिप्रभा– शिखामणिसहिता), प्रो. पारसनाथद्विवेदी (सम्पादकः), सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, वारणासी ।
14. वेदान्तपरिभाषा ( सविवरण'प्रकाश' हिन्दीव्याख्योपेता), डॉ. श्रीगजानन शास्त्री मुसगांवकर, चौखम्बा विद्याभवन, वाराणसी ।
15. वेदान्तपरिभाषा, खेमराज श्रीकृष्णदास प्रकाशन, मुम्बै ।
16. वेदान्तपरिभाषा, मणिप्रभाख्यटीकासंवलितया शिखामणिटीकाविभूषिता च, उदासीनस्वामिश्रीमदमरदासः (मणिप्रभाटीकाकारः), रामकृष्णाध्वरिः (शिखामणिटीकाकारः), राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ।

# स्वभावोक्त्यलङ्कारखण्डनम्

डा. कोम्पेल्लि विनयकुमारः*
सहायकाचार्यः, के.सं.वि., रा.गा.परिसरः
श्रृङ्गेरी

***लेखसारः** -प्राचीनैः आलङ्कारिकैः अङ्गीकृतं स्वभावोक्त्यलङ्कारं कुन्तकाचार्यः स्ववक्रोक्तिजीविते अलङ्कारशास्त्रग्रन्थे खण्डयामास । तत्र हेतून् इत्थं कथयामास यत् – 1. स्वभावोक्तिः अलङ्कारो नास्ति अलङ्कार्या एव । यतो हि काव्ये कस्यापि स्वभावस्यैव वर्णनं क्रियते । तस्य स्वभावस्य अलङ्कारत्वस्वीकारे सति अलङ्कार्यं किं स्यात् । अर्थात् वर्ण्यमानस्य पदार्थस्य धर्मरूपः स्वभाव एव अलङ्कार्यो भवति, पदार्थस्य स्वभाववर्णनमेव स्वभावोक्तिरिति उक्तत्वात् ।*

*2. शरीरमेव अलङ्कारभूतं चेत् अन्यत् किम् अलङ्कुर्यात् । यतः शरीरम्, शरीरस्य भुजमेव नारोहति खलु ! स्वारोहणादिक्रियायाः स्वस्योपरि प्रवर्तनं विरुद्धमेव । स्वभावकथनरूपः स्वभावोक्त्यलङ्कारः स्वभावात्मकं वस्तु एव अलङ्करिष्यति इति कथनम् अनुचितं लोकानुभवविरुद्धत्वात् । 3. स्वभावोक्तेः अलङ्कारत्वे सति अन्येषाम् अलङ्काराणां विषयापहार एव स्यात् । यतो हि स्वभावकथनं विना किमपि वर्णनीयं वस्तु एव नास्ति । तत्र यदि उपमादयः केचन अन्ये अलङ्काराः स्युः, तदा तेषां अलङ्काराणां स्पष्टावभासे संसृष्ट्यलङ्कारो भवेत्, उत अस्पष्टावभासे सङ्करालङ्कारो वा भवेत्, तदा इतरेषाम् अलङ्काराणाम् अवकाश एव न स्यात् । अतः स्वभावोक्तिरलङ्कारो न स्वीकार्यः इति ।*

***कूटशब्दाः** -शोधसारः, अलङ्कारमहत्त्वम्, स्वभावोक्त्यलङ्कारलक्षणम्, वक्रोक्तेरेव अलङ्कारता, स्वभावोक्त्यलङ्कारखण्डनम्, स्वाभावोक्तेः अलङ्कारत्वे अलङ्कार्यत्वस्य अभावः, स्वभावोक्तेः अलङ्कारत्वे अलङ्कारान्तरविषयाभावः, निष्कर्षः*

## अलङ्कारमहत्त्वम्

**"काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयः अवयवसंस्थानविशेषवत्, अलङ्काराः कटककुण्डलादिवत्"**[१] इति विश्वनाथाचार्यः साहित्यदर्पणे स्पष्टीचकार ।

यद्यपि काव्यात्मरूपेण अलङ्कारस्य नास्ति महत्त्वम्, तथापि शब्दार्थशरीरस्य बाह्यसौन्दर्यवर्धनेन समं रसादीनपि पोषयति । मम्मटाचार्यः अलङ्कारस्वरूपम् इत्थं जगाद यत् -

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् । हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः**[२] इति ॥

अर्थात् यथा कण्ठाद्यवयवोत्कर्षद्वारेण शरीरिणः उपकारकाः हारादयः अलङ्काराः, तथैव अनुप्रासोपमादयः अलङ्काराः शब्दार्थशरीरस्य उत्कर्षधायकाः वर्तन्ते इति ।

अलङ्कारस्य तादृशं महत्त्वं वर्तते, यथा शरीरे वस्त्रादीनाम् आभरणानामिव । यथा सकलगुणसमन्वितोऽपि मानवः निर्वसनो न शोभते, अलङ्काररहिता रामा यथा न शोभते, तथैव अलङ्कारविहीनं काव्यमपि । जयदेवः चन्द्रालोके अलङ्कारम् अनिवार्यधर्मत्वेन ऊरीकरोति । यथा - **"न कान्तमपि निर्भूषं विभाति वनिताननम्"**[३] इति ।

अपि च जयदेवः संसूचयति यत् - अलङ्काररहितस्य काव्यस्य कल्पना हास्यास्पदा भवति, यथा उष्णत्वगुणरहितस्य

---

***सम्पर्कसूत्रम्** - 9482608866, Email- dr.kompelli@csu.co.in

[१]सा.द. प्र.प.

[२]का.प्र. 8-67

[३]च.लो.1-8

अग्नेरिव इति । उच्यते यथा -

**अङ्गीरकरोति यः काव्यं शब्दार्थावनलङ्कृती । असौ न मन्यते कस्मात् अनुष्णमनलं कृती**[१] इति ॥

अग्निपुराणकर्ता व्यासमहर्षिः ध्वनिम् अलङ्कारेषु अन्तर्भाव्य, अर्थालङ्कारान् विना काव्यं विधवा इव सौभाग्यहीनं वर्तते इति कथयामास । यथा –

**अलङ्करणमर्थानामर्थालङ्कार इष्यते । तं विना शब्दसौन्दर्यमपि नास्ति मनोहरम् ॥ अर्थालङ्काररहिता विधवेव सरस्वती**[२] इति ॥

आचार्यः दण्डी काव्यादर्शे काव्यशोभाकरान् सर्वान् धर्मान् अलङ्कारान्तर्गतान् निधत्ते । यथा -

**काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते**[३] ॥ इति ॥

वामनाचार्यः - **"सौन्दर्यमलङ्कारः"**[४] इति अभिदधत् काव्यशास्त्रगतं सर्वमपि सौन्दर्यम् अलङ्कारशब्देन परिगृह्णाति । एवं विश्वनाथप्रभृतयः सर्वेऽपि आलङ्कारिकाः अलङ्काराणां महत्त्वं स्वस्वग्रन्थेषु प्रतिपादयामासुः । एवं भरतमुनेः चतुर्भ्यः अलङ्कारेभ्यः पण्डितराजजगन्नाथपर्यन्तं शताधिकानाम् अलङ्काराणां क्रमिको विकासः सञ्जातः । तेषु स्वभावोक्त्यलङ्कारः अन्यतमः ।

## स्वभावोक्त्यलङ्कारलक्षणम् –

**स्वभावोक्तिस्स्वभावस्य जात्यादिस्थस्य वर्णनम्**[५] ॥ इति ॥

अर्थात् मृगादिजातिषु गुणक्रियादेः स्वभावस्य वर्णनं स्वभावोक्तिनामालङ्कारः । जात्याद्यनुरूपप्राकृतिकस्वभाववर्णनम् इति स्वभावोक्त्यलङ्कारः । उदाहरणं यथा -

**कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्षितम्**[६] ॥ इति ॥

अर्थात् अतीव चञ्चलनयनाः निश्चलकर्णाः सन्तः हरिणाः अपश्यन् इत्यत्र हरिणानां तज्जातिस्वभाववर्णनात् अयं स्वभोवोक्त्यलङ्कारः इति सर्वे आलङ्कारिकाः मन्यन्ते ।

## वक्रोक्तेरेव अलङ्कारता

कुन्तकाचार्यस्य मतानुसारेण काव्ये शब्दार्थौ उभौ अलङ्कार्यौ भवतः । तस्मात् शब्दार्थावुभावपि अलङ्करणीयौ स्तः, वक्रोक्तिरलङ्कारः । इयं वक्रोक्तिः शब्दार्थौ उभौ अलङ्करोति । अस्याः वक्रोक्तेः स्वरूपं यथा –

**उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः । वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते**[७] ॥ इति ॥

अलङ्कार्ययोः शब्दार्थयोः अलङ्करणरूपा एकैव अलङ्कृतिरस्ति वक्रोक्तिः । सा च प्रसिद्धाभिधानव्यतिरेकिणी वैदग्ध्यभङ्गीभणितिरूपा इति ।

[१] च.लो.1-8
[२] अ.पु.344.1.2.
[३] का.द. 2-3
[४] का.सू.स. 1-2
[५] च.लो.पं.म.93 अलङ्कारः
[६] च.लो.पं.म.93 अलङ्कारस्य उदाहरणम्
[७] व.जी.1-10

ISSN : 2249-538X 

## स्वभावोक्त्यलङ्कारखण्डनम्

प्राचीनैः आलङ्कारिकैः बहवोऽलङ्काराः उल्लिखिताः । तेषु स्वभावोक्तिरपि अलङ्कारत्वेन सुप्रसिद्धा एव वर्तते, प्रारम्भत एव तस्या अङ्गीकृतत्वात् । उच्यते यथा –

**स्वभावोक्तिरलङ्कार इति केचित् प्रचक्षते । अर्थस्य तदवस्थत्वं स्वभावोऽभिहितो यथा**[१] ॥ इति ॥

वस्तुनिष्ठस्य कस्यचित् धर्मविशेषस्य विच्छित्तिविशेषेण कथनेन अलङ्कार्ययोः शब्दार्थयोः उपकारकत्वात् अलङ्कारत्वम् अक्षतमेव, किमर्थं पुनः एकैव अलङ्कृतिः वक्रोक्तिरिति जिज्ञासायां कुन्तकाचार्यः उत्तरति यत् - स्वभावोक्तिः अलङ्कारो नास्ति अलङ्कार्या एव । यतो हि काव्ये कस्यापि स्वभावस्यैव वर्णनं क्रियते । तस्य स्वभावस्य अलङ्कारत्वस्वीकारे सति अलङ्कार्यं किं स्यात् । यतो हि वर्ण्यमानस्य पदार्थस्य धर्मरूपः स्वभाव एव अलङ्कार्यो भवति, पदार्थस्य स्वभाववर्णनमेव स्वभावोक्तिरिति उक्तत्वात् ।

चिरन्तनैः आलङ्कारिकैः स्वभावोक्त्यलङ्कारः यः आम्नातः, तं स्वभावोक्त्यलङ्कारम् असहमानः निराकर्तुमाह कुन्तकाचार्यः कथयामास यत् -

**अलङ्कारकृतां येषां स्वभावोक्तिरलङ्कृतिः । अलङ्कार्यतया तेषां किमन्यदवतिष्ठते**[२] ॥ इति ॥

येषाम् आलङ्कारिकाणां मते स्वभावोक्तिनामा अलङ्कारः अस्ति, तेषां मते अलङ्कार्यतया अन्यत् अलङ्करणीयं किं वस्तु अवशिष्यते, नाम अलङ्काररूपेण पुनः किम् अवशिष्टम्, किमपि न । भामहवदेव कुन्तकाचार्योऽपि स्वभावोक्तेः अलङ्कारत्वं नाङ्गीकरोति ।

भामहाचार्यः इत्थं बभाण यत् –

**गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः । इत्येवमादि किं काव्यं वार्तामेनां प्रचक्षते**[३] ॥ इति ॥

अर्थात् वक्रोक्त्यभावे काव्ये काव्यत्वं न प्रवर्तते, वार्तामात्रमेव तत् भवति इति ।

## स्वाभावोक्तेः अलङ्कारत्वे अलङ्कार्यत्वस्य अभावः

किञ्च सालङ्कारं विभागरहितं वाक्यमेव काव्यम् इति कुन्तकाचार्येण पूर्वमुक्तम् ॥ यथा - **"यद्वाक्यस्यैव अविभागस्य सालङ्कारस्य काव्यत्वम्"**[४] इति ।

**अलङ्कृतिरलङ्कार्यम् अपोद्धृत्य विवेच्यते । तदुपायतया तत्त्वं सालङ्कारस्य काव्यता**[५] ॥ इति ॥

अलङ्कार्यौ शब्दार्थौ, अलङ्कारश्च, एतत् त्रितयं सम्मिलितं समष्टिरूपमेव काव्यम् । तथापि काव्यस्वरूपं स्पष्टतया ज्ञातुं तेषां पृथक् पृथक् विषयदर्शनम् सर्वस्यापि शास्त्रस्य परिपाटी । काव्यस्य अलङ्कारयोजनम् इति वास्तवं न, सालङ्कारौ शब्दार्थौ एव काव्यम् । अतः अलङ्कार्यालङ्कारविभागः नास्ति इति पूर्वं कुन्तकाचार्येणैव कथितं खलु ! अधुना स्वभावोक्तिरेव अलङ्कारश्चेत् अलङ्कार्यं किमिति किमर्थं कुन्तकाचार्यः कथयति इति पूर्वपक्षाशयः ।

---

[१] भा.का.2-3
[२] व.जी.प्र.उ.का.सं.11
[३] भा.का. 2-87
[४] व.जी.प्र.उ.पृ.सं.53
[५] व.जी.प्र.उ.का.सं.06


ISSN : 2249-538X

**“सत्यम्, किन्तु तत्र असत्यभूतोऽपि अपोद्धारबुद्धिविहितः विभागः कर्तुं शक्यते वर्णपदन्यायेन वाक्यपदन्यायेन च”**[१] इति समाधत्ते ।

अर्थात् पदे वर्णविभागः, वाक्ये पदविभागः क्रियते चेत् अपोद्धारबुद्ध्या भेदविवक्षया असत्यः विभागः कर्तुं शक्यते खलु ! अतः स्वभावोक्तिः अलङ्कारः इति कथनम् अयुक्तम् ।

नाम शाब्दिकैः परमार्थतया पदस्फोटे वर्णभेदः, वाक्यस्फोटे च पदभेदो न क्रियते, किन्तु लोके भेदः क्रियते । तथैव अत्रापि वर्णपदन्यायेन वाक्यपदन्यायेन वा असत्यभूतोऽपि अलङ्कार्यालङ्कारविभागः अपोद्धारबुद्ध्या (पृथक् पृथक् करणबुद्ध्या) क्रियते इति ।

एतदेव वाक्यपदीयकारेण भर्तृहरिणा उक्तमेव –

**न वर्णव्यतिरेकेण पदमन्यच्च विद्यते । वाक्यं वर्णपदाभ्यां च व्यतिरिक्तं न किञ्चन**[२] ॥

**पदे न वर्णाः विद्यन्ते वर्णेष्ववयवा न च । वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन**[३] ॥ इति ॥

एतदेव अपोद्धारबुद्ध्या काल्पनिकतया अलङ्कार्य-अलङ्कारयोः विभागविषये कथयति । क्वचित् सत्यमपि वस्तु लोकानां शिक्षणाय असत्यतया स्थाप्यते इत्यस्ति सिद्धान्तो विदुषाम् । तथा चोक्तम् –

**उपायाः शिक्षमाणानां बालानामुपलालनाः । असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते**[४] ॥ इति ॥

वस्तु स्वभावव्यतिरेकेण कथमपि वक्तुं न शक्यते । यतो हि स्वभावराहित्ये यत् किमपि वस्तु वर्णनयोग्यं न भवति । निरुपाख्यतया इति प्रतिपादयितुमिमां कारिकामवतारयति –

**स्वभावव्यतिरेकेण वक्तुमेव न युज्यते । वस्तु तद्रहितं यस्मान्निरुपाख्यं प्रसज्यते**[५] ॥ इति ॥

अर्थात् स्वभावेन विना काव्यवस्तु स्वभावातिरिक्तं वक्तुमेव न शक्यते । यतः स्वभाववर्जितं वस्तु अभिधानशून्यं सञ्जायते । (स्वभावरहितं वस्तु शब्देन वक्तुम् अशक्यम् ।)

एतदेव युक्त्यन्तरेण द्दर्बद्धसुबद्धन्ययेन द्रढयति ।

**शरीरं चेदलङ्कारः किमलङ्कुरुतेऽरपरम् । आत्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति**[६] ॥ इति ॥

शरीरमेव अलङ्कारभूतं चेत् अन्यत् किम् अलङ्कुर्यात् । यतः शरीरम्, शरीरस्य भुजमेव नारोहति खलु ! स्वारोहणादिक्रियायाः स्वस्योपरि प्रवर्तनं विरुद्धमेव । (अत्र आत्मशब्दस्य शरीरम् इत्यर्थः ।) स्वभावकथनरूपः स्वभावोक्त्यलङ्कारः स्वभावात्मकं वस्तु एव अलङ्करिष्यति इति कथनम् अनुचितं लोकानुभवविरुद्धत्वात् । न हि कश्चित् मनुष्यः आत्मना आत्मन्येव आरुह्य क्वचित् व्रजतीति ।

## स्वभावोक्तेः अलङ्कारत्वे अलङ्कारान्तरविषयाभावः

कुन्तकाचार्यः कथयति यदि **‘तुष्यतु दुर्जनन्यायेन’** स्वभावोक्तेः अलङ्कारत्वम् अङ्गीक्रियते, तदपि दोषः स्यात् । यतो हि यत्र काव्ये उपमाद्यलङ्काराणाम् उपस्थितिः भविष्यति, तत्र स्वभावस्य कथनात् स्वभावोक्त्यलङ्कारोऽपि भविष्यत्येव । एवं

[१] व.जी.प्र.उ.पृ.सं.54
[२] वा.प.1-72
[३] वा.प.1-73
[४] वा.प.
[५] व.जी.प्र.उ.का.सं.12
[६] व.जी.प्र.उ.का.सं.13

सर्वत्रैव स्वभावोक्तेः उपमादीनाम् अलङ्काराणां भेदावबोधो द्वाभ्यामेव प्रकाराभ्यां भवति – 1 प्रकटरूपेण 2 अप्रकटरूपेण च इति । उच्यते यथा –

**भूषणत्वे स्वभावस्य विहिते भूषणान्तरे । भेदावबोधः प्रकटस्तयोरप्रकटोऽथवा**[१] ॥ इति ॥

स्वभावोक्तेः अलङ्कारत्वे, उपमाद्यन्यालङ्कारत्वे कृते सति भेदावबोधः स्पष्टः अथवा अस्पष्टः स्यात् ।

स्पष्टतया ज्ञायते चेत् सर्वत्र संसृष्ट्यलङ्कारः वर्तेत, अस्पष्टतया ज्ञायते चेत् सङ्करालङ्कार एव भवेत् । तदा इतरालङ्काराणाम् अवकाशः एव न स्यात् ।

अर्थात् उपमादयः अलङ्काराः क्वचित् स्फुटरूपेण भिन्नाः भवन्ति, क्वचित् अस्फुटरूपेण इति । यत्र स्फुटभेदः भवति, तत्र संसृष्ट्यलङ्कारः, संसृष्ट्यलङ्कारे तिलतण्डुलन्यायः प्रवर्तते । उच्यते लक्षणं यथा –

**तिलतण्डुलसम्श्लेषन्यायाद्यत्र परस्परम् । संश्लिष्येयुरलङ्काराः सा संसृष्टिर्निगद्यते**[२] ॥ इति ॥

यत्र अस्पष्टः भवति, तत्र सङ्करालङ्कारः भवति, सङ्करालङ्कारे नीरक्षीरन्यायः प्रवर्तते । उच्यते लक्षणं यथा –

**क्षीरनीरन्यायाद्यत्र सम्बन्धस्स्यात् परस्परम् । अलङ्कृतीनामेतासां सङ्करस्स उदाहृतः**[३] ॥ इति ॥

एवं सर्वत्रैव अन्येषाम् अलङ्काराणां लोपो भविष्यति । उच्यते यथा –

**स्पष्टे सर्वत्र संसृष्टिरस्पष्टे सङ्करस्ततः । अलङ्कारान्तराणां च विषयो नावशिष्यते**[४] ॥ इति ॥

यदि अलङ्कारान्तराणां तत्र विषयता न स्यात्, तदा का हानिरिति प्रश्ने उत्तरति – ततस्तेषां लक्षणकरणवैयर्थ्यप्रसङ्गः स्यादिति । यदि वा तावेव संसृष्टिसङ्करालङ्कारौ तेषाम् अलङ्कारान्तराणां विषयत्वेन कल्प्येते तदा का हानिरिति नैव वक्तुं शक्यम् । यतो हि चिरन्तनैः आलङ्कारिकैः संसृष्टि-सङ्करयोरर्थस्य अन्य-अलङ्कारविषयत्वेन अङ्गीकृतत्वात् तद्दृष्ट्या एव तेषां पृथक् पृथक् उपमा-रूपकोत्प्रेक्षादिस्वतन्त्रलक्षणस्वीकृतत्वात् ।

## निष्कर्षः

अतः केनापि प्रकारेण वा स्वभावोक्त्यलङ्कारः अङ्गीकर्तुमेव न शक्यते । यतो हि स्वभाववर्जितम् असत्कल्पं वस्तु शशविषाणप्रायं सत् शब्दज्ञानागोचरतां प्रतिपद्यते । अतः स्वभावयुक्तमेव सर्वथा अभिधेयपदवीम् अवतरतीति । तस्मात् प्राचीनालङ्कारिकैः कथितस्य स्वभावोक्त्यलङ्कारस्य स्वीकरणेन किमपि औचित्यं प्रयोजनं वा नास्ति ।

## सहायकग्रन्थसूची


1. साहित्यदर्पणः
2. काव्यप्रकाशः
3. चन्द्रलोकः
4. अग्निपुराणम्
5. काव्यादर्शः
6. काव्यालङ्कारसूत्रसङ्ग्रहः
7. वक्रोक्तिजीवितम्
8. भामहकाव्यालङ्कारः
9. वाक्यपदीयम्
10. प्रतापरुद्रीयम्


[१] व.जी.प्र.उ.का.सं.14
[२] प्र.रु.9-1
[३] प्र.रु.9-5
[४] व.जी.प्र.उ.का.सं.15

# वेदेषु जीवनदर्शनम्

डा. दुर्गाशरणरथः*
सहायकाचार्यः, के.सं.वि., रा. गा. परिसरः
शृङ्गेरी

***लेखसारः*** *– भारतीयसंस्कृतेराधारभूताः भवन्ति वेदाः ।* ***पितृदेवमनुष्याणां वेदश्चक्षुः सनातन****मिति स्मृतिवचनैः ज्ञायते यत्* ***सामाजिकनैतिकाध्यात्मिकशैक्षिकचारित्रिकसांस्कृतिकराजनैतिकवैश्विकतत्त्वानि*** *वेदादेव समुद्भूतानि । अतः वेदः समुद्घोषयति यत् -* ***सा प्रथमा संस्कृतिर्विश्ववारा । इति*** *(काण्व- 7.6.3)*

*वस्तुतः मनुष्यजीवनस्य वास्तविकं लक्ष्यं भवति आत्मकल्याणं तथा मोक्षप्राप्तिः । अतः जीवस्य वास्तविकं कल्याणं जन्ममरणबन्धनात् मुक्तः ईश्वरप्राप्तिः वा भवति । तदर्थं जीवनस्य प्रत्येकं क्षणं तथा आचारव्यवहारोऽपि ईश्वरार्पणबुध्या भवेत् । प्रसङ्गेऽस्मिन्नुच्यते गीतायाम् -*

***यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्वमदर्पणम् ॥*** *(भगी -9.27 ) उपनिषदानुसारेण मनुष्यास्तावत् वेदोक्तकर्माणि समाचर्य जीवनं यापयेयुः । अत उच्यते –*

***कुर्वन्नेवेह कर्माणि जिजीविषेछतं समाः ।*** *इति (ईशा.उप -2)*

*मातृपितृभ्रातृभगिनीपतिपत्न्यादिसमुदायः कुटुम्बमुच्यते । अतः कुटुम्बैः साकं तस्य व्यवहारः कथं भवेत् ? समाजे मानवः परस्परं कथं व्यवहरेत् ? 'पुत्रः सदा पितुः इच्छानुसारं कार्यं कर्तव्यम् । कदापि पितुः इच्छाविरुद्धं कार्यं न कर्तव्यम् । मातापित्रोः प्रति सदा प्रेम सद्भावना च धारयेत् इत्यर्थः ।*

***स्वस्ति मात्र उत पित्रे नो अस्तु ।*** *(अथर्व - 1.31.4)*

*एवं प्रकारेण उपलक्षणसिद्धान्तानुसारेण कन्या अपि मातापित्रोः उपदेशं पालयेत् । यतोहि सा दुहिता वर्त्तते । भार्या अपि भर्तुः कृते मधुरं तथा प्रियवचनं च वक्तव्यम् । अर्थात् कदापि द्वेषेण दुर्व्यवहारेण वा पूर्णं कठोरं क्रोधजनकं वचनं न वदेत् । सर्वदा अन्यैः साकं मधुरया वाचा व्यवहरेत् ।*

***जिह्वा मे भद्रं वाङ् महो मनो मन्युः स्वराड् भामः ।*** *(काण्व-21. 7.5)*

*सर्वप्रथमं अस्माकं सर्वेषां मनुष्याणां कृते कीदृशः धार्मिक उच्च आदर्शः च भवेत् ? एतस्य विषये वेदे कथं मानवानां कल्याणार्थमुपदेशाः वर्त्तन्ते एवं च वेदे कथं जीवनदर्शनं वर्त्तते तस्मिन् विषये अत्र विचार्यते ।*

***कूटशब्दाः*** *– प्रमुखशब्दाः – मोक्षप्राप्तिः, कुटुम्बैः,जर्जरितः, द्विक्षन्, सव्रता, जिजीविषेत्, सौमनस्यम्, कालुष्यम् ।*

## प्रस्तावना

वैदिकसनातनसंस्कृतेः मन्दाकिनी धारा विरञ्च्यादिभिरनुवन्दितात्रिवशिष्ठविश्वामित्रादिभिर्महर्षिभिः परिसेवितः पराशर-भृगु-नारद-मनु- याज्ञवल्क्यादिस्मृतिकारैरनुमोदित आगम-पुराण-मीमांसादिशास्त्रैः निगदित अनादिकालान्निरवछिन्नरूपेण प्रवाहिता सति स्वेदजोद्भिजाण्डज जरायुजादिप्राणिभ्यः स्थावरजङ्गमं यावत् सर्वान् प्लावयति शोधयति च । येन आब्रह्मकीटपर्यन्तं सर्वे संशोधिताः पूताः पवित्रिताश्च भवन्ति ।

वस्तुतः समाजे मानवः परस्परं कथं व्यवहरेत् ? तेन सह सर्वप्रथमं अस्माकं सर्वेषां मनुष्याणां कृते कीदृशः धार्मिकः उच्चः आदर्शः च भवेत् ? 'पुत्रः सदा पितुः इच्छानुसारं कार्यं कर्तव्यम् । कदापि पितुः इच्छाविरुद्धं कार्यं न कर्तव्यम् ।

***सम्पर्कसूत्रम्** – 8686919208, Email – durgasaranrath@gmail.com

मातापित्रोः प्रति सदा प्रेम सद्भावना च धारयेत् इत्यर्थः ।

**स्वस्ति मात्र उत पित्रे नो अस्तु ।** (अथर्व - 1.31.4)

एवं पतिः अपि स्वपत्न्याः कृते शुभं वचनं वक्तव्यं न दुष्टं वचनम् । भ्राता उत्तराधिकारस्य आधारेण भ्रातुः प्रति किमपि वैरं न सहेत्, किन्तु रामभारत इव परस्परं प्रेम्णा स्वस्य स्वार्थस्य त्यागं कर्तुं सज्जः भवेत् । प्रसङ्गेऽस्मिन्नुच्यते अथर्ववेदे -

**सहृदयं सांमनस्यमविद्वेषं कृणोमि वः । अन्यो अन्यमभिहर्यत वत्सं जातमिवाघ्न्या ॥** (अथर्व.3.30.1)

जन्मतः मृत्युपर्यन्तं च प्रातः जागरणात् रात्रौ निद्रापर्यन्तं पूर्णकर्तव्यनिर्देशाः वेदेषु उपलभ्यन्ते । अतः अत्र अनुकरणीयवैदिकजीवनशैल्याः केचन प्रेरणादायकाः अंशाः सन्ति । यस्य अनुपालनं परमसमृद्धिप्राप्त्यर्थं सहायकं भविष्यति ।

**अन्यो अन्यमभि हर्यत, वत्सं जातमिवान्या ।** अ० ३.३०.१ **सहृदयं सांमनस्यम् अविद्वेषं कृणोमि वः ।** अ० ३.३०.१

## मनुष्याणां पारिवारिक आदर्शः

मातृपितृभ्रातृभगिनीपतिपत्न्यादिसमुदायः कुटुम्बमुच्यते । अतः कुटुम्बैः साकं तस्य व्यवहारः कथं भवेत् ? तस्मिन् विषये भगवान् वेदः उपदेशं करोति -

**स्वस्ति मात्र उत पित्रे नो अस्तु ।** (अथर्व- 1.31.4)

अस्य तात्पर्यम् अस्ति यत् वयं सर्वे मानवाः मातापित्रोः कृते आत्मसम्मानं सद्व्यवहारं च कुर्मः । ते अस्माकं देवतुल्याः भवन्ति । उपनिषत्सु मातृ देवो भव, पितृदेवो भव इत्याद्युक्तत्वात् । पुनश्च ते गृहे दृश्यमानदेवरूपे सदा सन्तुष्टाः सुखिनः च तिष्ठन्तु । अर्थात् वयं वृद्धानां पितृतुल्यानां कदापि उपेक्षां न कुर्मः । अपितु तेषां सम्यक् दिव्यपरिचर्यां कुर्वन्तः एव तिष्ठामः । श्रीराम इव तस्य महत् आज्ञापालनं अस्माकं कर्तव्यम् । प्रमादात् अनियमात् वा कदाचिदपि दुःखदं अप्रियं अशिष्टव्यवहारं वा न कर्तव्यम् । एतादृशाः शुभभावनाः एतैः भगवतः वेदस्य बुद्धिमान् वचनैः सर्वदा मनसि स्थापनीयाः -

**यदा पिपेश मातरं पुत्रः प्रमुदितो धयन् । एतत्तदग्ने अनृणो भवाम्यहतौ पितरौ मया ॥** (माध्यन्दिनी -19.11)

यदा अहं लघुः सर्वथा असहायः शिशुः आसम् तदा अहं मम प्रेम्णः मातुः मधुर-अङ्के शयनं कृत्वा तस्याः अमृतसदृशं स्तनं सुखेन पिबन् तां पादप्रहारेन पीडयन् आसम् । अधुना तस्याः परिचर्यायाः पालनस्य च कारणेन अहं वर्धितः अस्मि तथा च मम पूज्यः पिता माता च वृद्धाः दुर्बलाः च अभवन् । अतः मम आदरणीयाः मातापितरौ मया कदापि कथञ्चित् व्याकुलाः (दुःखिताः) यथा न भवेयुः ।

पुनश्च मनसि इयं भावना स्यात्, यत् – **पितरौ मम सेवया आतिथ्येन च सर्वदा तृप्ताः तिष्ठन्तु ।** भगिनी अपि स्वभगिनीं प्रति किमपि वैरं नाचरेत् । अपितु सर्वदा प्रेम सद्भावं च धारयेत् । एवं कुलस्य सर्वे सदस्याः, श्वश्रूः, स्नुषः, भगिन्यः इत्यादयः अपि सुमनाः सन्तः परस्परं सद्भावं धारयित्वा केवलं सुखदायिनीं सद्वचनं वदेयुः । अतः परम धन्यः भगवान् वेदः सर्वेभ्यः कुलस्य सदस्येभ्यः एतत् उपदेशं ददाति यत् –

**अनुव्रतः पितुः पुत्रो, मात्रा भवतु संमनाः । जाया पत्ये मधुमतीं, वाचं वदतु शान्तिवाम् ॥**

**मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा । सम्यञ्च सव्रता भूत्वा, वाचं वदत भद्रया ॥** (अथर्व -3.30,2-3)

'पुत्रः सदा पितुः इच्छानुसारं कार्यं कर्तव्यं न च कदापि पितुः इच्छाविरुद्धं कार्यं न कर्तव्यम् ।' मातृप्रति


ISSN : 2249-538X

अपि सद्‌चित्तः एव तिष्ठेत्, न कुचित्तः । पितृमातृयोः प्रति सदा प्रेम सद्भावना च धारयेत् इत्यर्थः । एवं प्रकारेण उपलक्षणसिद्धान्तानुसारेण कन्या अपि मातापितृनुरूपं कार्यं कुर्यात्, भार्या अपि भर्तुः कृते मधुरं प्रियं प्रियं च वचनं वक्तव्यं अर्थात् कदापि द्वेषेण दुर्भावेन वा पूर्णं कठोरं क्रोधजनकं वचनं न वदेत् । एवं पतिः अपि स्वपत्न्याः कृते शुभं वचनं वक्तव्यं न दुष्टं वचनम् ।

**सहृदयं सांमनस्यम् अविद्वेषं कृणोमि वः । अन्यो अन्यमभि हर्यत, वत्सं जातमिवान्या ।** (अथर्व- 3.30.1)

भ्राता उत्तराधिकारस्य आधारेण भ्रातुः प्रति किमपि वैरं न सहेत्, किन्तु रामभारत इव परस्परं प्रेम्णा स्वस्य स्वार्थस्य त्यागं कर्तुं सज्जः भवेत् । भगिनी च अपि स्वभगिनीं प्रति किमपि वैरं न सहेत, अपितु सर्वदा प्रेम सद्भावं च धारयेत् । नाम भ्रातृषु अपि परस्परं स्नेहव्यवहारः भवेत् । यथा ज्येष्ठस्य कनिष्ठानां प्रति द्वेषभावं न भवेत् तथा व्यवहरेत् ।

**अज्येष्ठासो अकनिष्ठास एते, सं भ्रातरो वावृधुः सौभगाय ।** (ऋग्- 5-60-5)

न्यायेन भ्राता भगिनी च अपि परस्परं न द्वेष्टुम् अर्हति । एवं कुलस्य सर्वे सदस्याः, श्वश्रूः, स्नुषः, भगिन्यः इत्यादयः अपि सुमनोः सन्तः परस्परं सद्भावं धारयित्वा केवलं सुखदायिनीं सद्वचनं वदन्तु । अत एव वेद भगवान् पुनः विशेषतया उदाहरणं ददाति -

**सहृदयं सांमनस्यमविद्वेषं कृणोमि वः ।** (अथर्व- 3.30.1)

सर्वेषां युवानां वृद्धानां च हृदयं परस्परं प्रेम-सौहार्दपूर्णं भवेत् । सदृशभावयुक्तं हृदयं दयालुः उच्यते । यथा अस्माकं हृदयं कदापि स्वस्य हानिं न करोति, अपितु सर्वदा स्वस्य हिताय एव आचरति । तथैव अन्येषां कृतेऽपि अस्माकं हृदये समभावना भवेत् । तेन शोकमोहादीनां नाशः भवति ।

**यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानत: । तत्र को मोह: क: शोक एकत्वमनुपश्यत: ॥** (ईशा.उप-1.7)

एवं प्रकारेण समाजे सर्वेषां मनांसि परस्पर सामञ्जस्यं सौमनस्यं कालुष्यरहितं भूत्वा सदैव सत्संस्कारैः, सुविचारैः, सुसंकल्पैः, शुद्धभावैश्च युताः भवन्तु । वैरस्य निराकरणं कुर्वन् एतादृशं सामञ्जस्यं सर्वदा धारयन्तु । दयालुतायाः, सामञ्जस्यस्य च माध्यमेन प्रेम, सामञ्जस्यं, सरलता, शिष्टता, विनयः, विवेकः इत्यादयः गुणाः प्रकटिताः भवन्ति । तेन एकतायाः भावना स्फुरति । विजृम्भते हि श्रुतौ -

**यत्र विश्वं भवत्येकनीडम् ।** (काण्व-35.3.5)

ये दुर्भावं विना प्रदर्शिताः सन्ति यथा गौः नवजातवत्सस्य प्रति महती स्नेहं धारयति तथा भवद्भिः सर्वैः परस्परं शुद्धप्रेमः भवितव्यः ।

**अन्यो अन्यमभि हर्यत, वत्सं जातमिवान्या ।** (अथर्व – 3.30.1)

प्रामाणिकः, विनयशीलः, सरलः च स्वभावः स्थापनीयः । तेन अस्माकं अन्तर्हृदि समानतायाः भावः आयाति । यत्तु समाजे व्यवहाराय नितान्तमपेक्षते । प्रसङ्गेऽस्मिन् उच्यते ऋग्वेदीय सञ्ज्ञानसूक्ते –

**सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् । देवा भागं यथा पूर्वे सञ्जानानामुपासते ।**
**समानो मंत्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।** (ऋग्- 10.191.1-4)

एवं प्रकारेण भगवान् वेदः अस्मान् मनुष्याणां गृहेषु पूर्वोक्तगुणान् विकसयित्वा स्वर्गानन्दं भोक्तुं एतादृशं उपदेशं दत्त्वा कुलस्य आदर्शं दर्शयति । सद्बुद्धेः प्रार्थना मनुष्येषु वर्तमानः आत्मनः परेषां च सद्भावना धर्मः मानवता इति उच्यते ; तस्य अन्यत् नाम सद्बुद्धिः । एषा एव सद्बुद्धिः मनुष्यं सच्चिदानन्दं मानवं करोति ।

ISSN : 2249-538X 

अतः अस्माकं चित्तशुद्धिः नितान्तमपेक्षते । शुक्लयजुर्वेदे शिवसङ्कल्पसूक्ते मन्त्रषट्केषु श्रुयते यत् –

**तन्मे मनः शिवसङ्कल्पमस्तु ।** (काण्व -33.1.1)

दुर्बुद्धियुक्तः मानवः न केवलं मानवः एव तिष्ठति अपितु पूर्णासुरः भूत्वा नाना उपद्रवाणां प्रभावतः अज्ञानान्धकारे मोहगर्ते पतित्वा दुःखितः तिष्ठति । इयं सुमतिप्रार्थना प्राचीनतमवैदिककालात् एव क्रियते । अतः अस्माकं धन्यतमेषु वेदेषु सद्बुद्धिप्राप्त्यर्थं प्रार्थना अपि एवं कृता अस्ति-

**महस्ते विष्णो सुमतिं भजामहे** (ऋग् – 1.156.3), **उर्वी गभीरा सुमतिष्टे अस्तु ।** (ऋग्-1.24.9)

**देवनां भद्रा सुमतिर्ऋजूयतां देवनां रातिरभि नो नि वर्त्तताम् ।** (माध्यन्दिनी -25.15)

## मनुष्याणां सामाजिकादर्शः

वयं सर्वे मानवाः सर्वदा केवलं सत्यमेव अनुसरामः (उपभोक्तुं) भवामः । सत्यपरिपालनाय भगवति श्रुतिः अस्मान् चोदयति । यागे यजमानः एवं स्तौति -

**इदमहमनृतात् सत्यमुपैमि ।** (काण्व -1.3.1)

शान्तं, सुखदं च प्रेम्णा, दयालुतां च रूपेण अमृतसदृशदृष्टेः पवित्रवृष्ट्या सम्पूर्णं जगत् सर्वदा परिवेष्टयामः । जीवनप्रेमी सौन्दर्यवत् जगतः कल्याणस्य कामना सर्वदा हृदये स्थापयामः । विचारेषु, वाक्, कर्मसु च समतां धारयितुं प्रयत्नं कुर्मः । सर्वेषां हिताय सत्कर्मणि मनः-वाक्-शरीर-प्रवृत्तिः उपयुज्यताम् । विपत्तौ चिन्ताम्, धनकाले च विकारं न आश्रितव्यम् । परेषां सुखदुःखम् अपि स्वसुखदुःखवत् काम्यम् - अर्थात् यथा वयं स्वस्य कृते केवलं सुखं इच्छामः, दुःखं न इच्छामः । तथैव परेषां सुखमपि कामयेम न तु दुःखम् । एतादृशं समतां प्राप्तुं अस्माभिः आग्रही स्वभावः ग्रहीतव्यः । सर्वेषां दाम्पत्यजीवने सर्वदा सुखं भवतु ।

**श्रदस्मै नरो वचसे दधातन यदाशीर्दा दम्पति वाममश्नुतः । पुमान् पुत्रो जायते विन्दते वस्वधा विश्वाहारप एधते गृहे ॥**

(काण्व -8.2.1)

कदापि कटु वचनं न वक्तव्यम् । अन्यायेन अन्यस्य धनं मा हरामः । कामभावनया परस्त्रीन् मा पश्यतु । ब्रह्ममुहूर्ते जागरणम्, संध्यावन्दनम्, देवपूजा, मन्त्रजपादिनित्यकर्म, आहारः, व्यायामः, स्वाध्यायः, सत्संगः, दानं च नित्यं करणीयम् । सज्जनतायाः माध्यमेन सम्माननीयं यशः अर्जयतु । ब्रह्मचर्य, निर्भय, शौर्य, अहिंसा इत्यादयः देवताः, नित्यशुद्ध-बुद्ध-मुक्त-पूर्ण-अद्वैत-अनन्त-आनन्द-रूपेण आत्मानं निरन्तरं अन्वेषयामः । अस्मान् सन्मार्गे प्रवर्त्तयितुं वेदः उपदिशति –

**असतो मा सद्गमय । तमसो मा ज्योतिर्गमय । मृत्योर्मा अमृतं गमय ।** (बृह.उप – 1.3.28)

पुनश्च इदमप्युक्तम् - वयं सर्वे मानवाः मित्रदृष्ट्या परस्परं पश्यामः, एषा अस्माकं सामूहिकप्रतिज्ञा भवेत् । मैत्री भावनायाः कृते शुक्लयजुर्वेदसंहितायां प्रार्थना दृश्यते यत् –

**दृते दृंह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।**

**मित्रस्याहं चक्षुषा सर्वाणी भूतानि समीक्षे । मित्रस्य चक्षुषा समीक्षामहे ।** (काण्व -36.18)

अथर्वसंहितायां अपि एतादृशी प्रार्थना कृता अस्ति –

**सर्वा आशा मम मित्रं भवन्तु ।** (अथर्व-19.15.6)

 ISSN : 2249-538X

**असपत्नाः प्रदिशो मे भवन्तु न वै त्वा द्विष्मो अभयं नो अस्तु ।** (अथर्व-19.14.1)

**मा नो द्विक्षत कश्चन ।** (अथर्व-12.1.18)

अर्थात् सर्वदिक्षु स्थिताः मानवाः सर्वे मम मित्राणि शुभकामनाश्च तिष्ठेयुः अहमपि तेषां शुभमित्रः एव तिष्ठेत् । सर्वप्रदेशेषु स्थिताः जनाः मयि क्रोधवैरस्य बीजविहीनाः भवेयुः । भवतः वा अन्यस्य वा प्रति वयं किमपि वैरभावं न धारयामः, अपितु परस्परं प्रेम सद्भावनामेव धारयामः अतः परस्परं निर्भयः एव तिष्ठामः

अस्माकं प्रति कस्यापि मानवस्य द्वेषः न भवेत्, अपितु अस्माकं प्रति केवलं प्रेम सद्भावना च भवेत् । एवं प्रकारेण परस्परं मैत्रीं निर्वाहयित्वा एव मानवः सच्चिदानन्दः मानवः भूत्वा सर्वत्र सुखदं, स्वर्गीयं दृश्यं निर्मातुम् अर्हति । अतः जीवने अथवा समाजे अस्माकं व्यवहारः एवं भवेत् ।

## मानवजीवने चारित्रिकशिक्षा

**शीलं परमभूषणम्** इति डिण्डिमः सर्वत्र निनादते । अतः **न कलञ्जं भक्षयेत् , न सुरां पिवेत्, न मांसमश्नियात्,नानृतं वदे**दित्याद्युक्तिभिः वेदः अस्मान् सच्चरित्रवान् कर्त्तुं सततं प्रयतते । तथैव **सत्यं वद धर्मं चर स्वाध्यायान्माप्रमदितव्यमि**त्यादि वचोभिः धर्माचरणाय प्रचोदयति । अस्माकं व्यवहारः पूर्णतः शुद्धं भवेत्, भद्रं भवेत्, कल्याणं च भवेत् । अतः श्रुतिः अस्मान्नुपदिशति यत् -

**भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।** (काण्व – 27.11.8)

यावत् पर्यन्तं मनुष्यः दुराचारादि-पापान्मुक्तः न भवति तावत् पर्यन्तं तस्य मानवस्य विकासः न भवति । अत एव अस्माकं धन्यतमेषु वेदेषु एतेषां मलानां निष्कासनार्थं अस्माकं रक्षणार्थं च सर्वशक्तिमान् ईश्वरं प्रति पुनः पुनः प्रार्थनाः कृताः सन्ति –

**श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो ।**
**पर्षिणः पारमंहसः स्वस्ति विश्वा अभीती रपसो युयोधि ॥** (ऋग्- 2.33.3)

अर्थात् हे दुःखद्रावकभगवन् रुद्र अनन्त ऐश्वर्येषु त्वमेव श्रेष्ठः । हे वज्रवाहो ! नानाशक्त्या वर्धितानां देवानां मध्ये त्वमेव महता वर्धितः महादेवः । हे भगवन् वयं सर्वान् मनुष्यान् पशुत्वं पिशाचत्वं च जनयन्त्याः पापस्य दुष्टचरितात् सहजतया मुक्तं कुरु । तस्य पापस्य दुर्सङ्गतिः, दुर्भावना इत्यादिभ्यः सर्वेभ्यः कारणेभ्यः अपि अस्मान् विच्छेदयतु । तथा हि उच्यते -

**यदाशसा निःशसाभिशसोपारिम जाग्रतो यत् स्वपन्तः ।**
**अग्निर्विश्वान्यप दुष्कृतान्यजुष्टन्यारे अस्मद् दधातु ॥** (ऋग्- 10.164.3)

जाग्रत्सुप्ते वा यत्किमपि दुष्टं पापं कृतं वा अकृतं वा, अर्थात् ज्ञात्वा वा न अज्ञात्वा वा मिथ्या आशायाः कामदुराचारस्य वा दुष्टसंस्कारस्य दुस्सङ्गतेः वा, तानि सर्वाणि पापानि भगवान् अग्निः शिष्टैः जनैः दुष्कृतान् सर्वेभ्यः मनुष्येभ्यः विच्छिद्य तान् नाशयतु । **उत देव अवहितं देवा उन्नयथा पुनः । उतागश्चक्रुषं देवा देवा जीवयथा पुनः ।** (ऋक्- 10.137.1, अथर्व- 4.13.1) 'हे देवाः ! भवन्तः सर्वे सावधानाः भूत्वा मां सद्गुणशीलस्य मार्गं अनुसरणं कर्तुं प्रेरयन्तु । तथा च हे देवाः ! इन्द्रियसुखेभ्यः मां वियोगं कुरु । अत एव भगवान् वेदः कृषिविषये मनुष्येभ्यः उपदेशं ददाति -

**अक्षैर्मा दीव्यः कृषिमित् कृषस्व वित्ते रामस्व बहु मन्यमानः ।**

**तत्र गाव : कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः ।** (ऋग् -10.34.13)

मन्त्रेऽस्मिन् द्युतक्रीडायाः निन्दा श्रुयते । भो मानवाः जीवनयापनार्थं भवन्तः कृषिं कुर्वन्तु अर्थात् परिश्रमी भवन्तु । नैतिकसाधनेन अर्जितधनस्य आदरं कृत्वा भवन्तः तत् भोक्तुं अर्हन्ति अर्थात् सन्तुष्टाः सुखिनः च तिष्ठन्तु । केवलं कृषिक्षेत्रे, सः उत्तमः वृत्तिः, गोः इत्यादयः पशवः सुरक्षिताः एव तिष्ठन्ति तथा च तस्मिन् एव भार्यादयः परिवारजनाः अपि सुखिनः तिष्ठन्ति । अत्रापि चरित्र शिक्षणं वयं प्राप्नुमः । एवं प्रकारेण अन्ये बहवः वैदिकमन्त्राः अपि कृषिकार्यार्थम् एतादृशं उपदेशं ददति -

**सुसस्याः कृषीस्कृधि ।** (माध्यन्दिनी -4.10) **कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा ।** (माध्यन्दिनी -9.22)

**नो राजा नि कृषिं तनोतु ।** (अथर्व- 3.12.4) **ते मनुष्याः कृषिं सस्यं च उपजीवन्ति ।** (अथर्व- 8.10.12)

**सा नो भूमिर्वर्धयद् वर्धमाना ।** (अथर्व 12.1.13)

वेदः अस्मान्नुपदिशति यत् तण्डुलगोधूमादीनि सुधान्यानि मानवाः संवर्धयेयुः । अहं त्वां विभुः मानवं कृषिकार्याय, आजीविकाय, धनाय, कुटुम्बपालनाय च नियुञ्जामि । अस्माकं राजानः अथवा नेतारः कृषेः¬ सम्यक् विकासं विस्तारं च निरन्तरं कुर्वन्तु । ते सर्वे मानवाः स्वजीविकायाः कृषिधान्यमाश्रिताः । सुन्दरकृषिभिः पोषिता शोभिता च पृथिवीमाता अस्मान् सर्वतः समृद्धान् सुखिनः च कुरु ।

## वेदेषु राष्ट्रीयभावना

राष्ट्रीयभावना वेदे वहवो दृश्यन्ते । मानवस्य प्रथमं कर्त्तव्यं भवति राष्ट्रसंरक्षणम् । अतः उच्यते 'मातृभूमिं सेवस्व । **उप सर्प मातरं भूमिम्** (ऋग् -10.18.10) **नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्या ।** (माध्यन्दिनी-9.22) अत्र 'पृथिवी' इत्यस्य अर्थः मातृभूमिः इत्युच्यते । **वयं राष्ट्रे जागृयाम पुरोहिताः ।** (माध्यन्दिनी-9.23) 'पृथिवीमाता अर्थात् मातृभूमिः मम पुत्राय क्षीरादिकं पोषकद्रव्याणि प्रदातुम् । ' **माता भूमि : पुत्रो अहं पृथिव्या :** (अथर्व- 12.1.12) 'भूमिः (स्वभूमिः) मम माता अहं तस्याः पुत्रः अस्मि । ' **भूमे मातर्नि धेहि मा भद्रया सुप्रतिष्ठितम् । (अथर्व-12.1.63) 'हे मातृभूमि ! त्वं मां सुस्थितौ धारयसि । '**

**सहृदयं सामनस्यमविद्वेषं कृणोमि वः । अन्योऽन्यमभि हर्यत वत्सं जातमिवाघ्न्या ॥** (अथर्व- 3.30.1)

'परस्परं हृदयं उद्घाट्य एकमनः सक्रियः तिष्ठतु । ' यथा गौः सिंहिका भूत्वा विक्षिप्तः सन् नवजातं वत्सम् आक्रमितुं त्वरयति, तथैव भवन्तः सर्वे क्लेशसमये दयालुजनानां रक्षणार्थं सज्जाः भवेयुः । अतः वयं स्वमातृभूमिरक्षणार्थं आत्मत्यागार्थं सदा सन्नद्धं भवेम ।

**उपस्थास्ते अनमीवा अयक्ष्मा अस्मभ्यं सन्तु पृथिवि प्रसूताः ।**

**दीर्घं न आयु : प्रतिबुध्यमाना वयं तुभ्यं बलिहृतः स्याम ।** (अथर्व-12.1.62)

'हे मातृभूमि ! भवतः सेवां कुर्वन्तः वयं स्वस्थाः, योग्याः च भवामः । भवतः सर्वाणि भोगानि प्राप्नुमः, बुद्धिमान् भूत्वा दीर्घायुः भवतु, भवतः रक्षणार्थं वयं सर्वदा आत्मत्यागं कर्तुं सज्जाः भवामः । ' एवं वेदः ज्ञानसागरः विश्वसाहित्यस्य च अमूल्यनिधिः भारतीय आर्यसंस्कृतेः मूलभूतः आधारः च अस्ति । तेषु राष्ट्रवादस्य उदात्तभावना महती वर्तते । अतः वयं सर्वे नागरिकाः वेदशिक्षां सम्पूर्णतया स्वीकुर्वन्तु येन वयं राष्ट्ररक्षणे समर्थाः भवेम ।


ISSN : 2249-538X

## उपसंहारः

एवं प्रकारेण वेदग्रन्थेषु मनुष्याणां उच्चादर्शानां बहुशः वर्णनं कृतम् अस्ति । अन्ते ऋग्वेदसंहितातः निम्नलिखितप्रार्थना-मन्त्रद्वयम् उद्धृत्य अस्य लेखस्य समापनं कुर्मः । मानवजीवनं आदर्शं (चरित्रयुक्तं) कर्तुं ईश्वरस्य प्रार्थना मुख्यं साधनं मन्यते । यः मनुष्यः स्वस्य अन्तःकरणं परमात्मनि दृढां श्रद्धां धारयति सः तस्मै समर्पितः तिष्ठति । अस्माकं ये विघ्नाः सन्ति ते निवारिताः भवन्तु । यानि कल्याणपरकाणि सुखानि सन्ति तानि अस्मासु प्रचरन्तु । वेदे एवं प्रार्थना वर्त्तन्ते -

**विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्न आ सुव ॥** (काण्व -34.1.3)

**विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।**
**देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥** (ऋग् -5.51.13)

देवरूपाः सर्वे देवाः अस्मिन् समये अस्माकं सर्वेषां मनुष्याणां हिताय अनुकूलाः भवन्तु । ' वैश्वानर वसुश्च अग्निदेवः अपि अस्माकं कल्याणाय प्रयतन्ते । ऋभु अर्थात् स्वर्ग धाम ईश्वर नः पातु । अस्माकं कल्याणाय भगवान् रुद्रः अपि अस्मान् सर्वान् मनुष्यान् पशुत्व-आसुर-पापेभ्यः पातु । अस्माकं कल्याणं प्राप्तुं

**शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः ।**
**शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शम्भुः ॥** (ऋक्- 7.35.10)

'सवितदेवः अस्मान् भयदुःखेभ्यः रक्षतु । अस्मान् शान्तिं सुखं च ददातु । सूर्यप्रकाशस्य पुरतः स्वमधुरं शान्तं प्रकाशं प्रसारयन्तः अन्धकारं परिहरन्तः उषा देवीः अस्माकं सर्वेषां हिताय यतन्ते । पर्जन्यः (मेघः) अस्माकं सर्वेषां प्रजानां सुखं करोतु । अस्माकं सर्वेषां सुखाय, शान्ति-कल्याणाय च ईश्वरः प्रसन्नः भवतु ।

## परिशीलितग्रन्थसूची


- ऋक्संहिता सायणभाष्यम् – चौखम्बाविद्याभवनम्,वाराणासी,1983
- तौत्तिरीयसंहिता सायणभाष्यम् – वौदिकसंशोधनमण्डल,पुणे,1892
- तैत्तिरीयारण्यक सायणभाष्यम्– आनन्दाश्रमः,संस्कृतग्रन्थावली,2008
- काण्वसंहिता सायणभाष्यम् - वैदिकसंशोधनमण्डल,पूणे, 1988
- माध्यन्दिनीसंहता महीधरभाष्यम् –चौखम्बा संस्कृतसीरीज आफिस,वाराणसी,1972
- अथर्ववेदसंहिता विद्यारण्यभाष्यम् - चौखम्बाविद्याभवनम्,वाराणासी,2007
- निरुक्तम् - मुकुन्दझा शर्मा,चौखम्बाविद्याभवनम्,वाराणासी,2012
- वेदभाष्यभुमिकासंग्रहः,वलदेवउपाध्यायः, चौखम्वाविद्याभवनम्, वाराणसी, 1985
- वैदिक साहित्य का इतिहास – चौखम्वा विद्याभवनम्,वाराणसी, 20002
- मनुस्मृति – चौखम्बाविद्याभवनम्,वाराणसी,1990
- याज्ञवल्क्यस्मृति – चौखम्बाविद्याभवनम्, वाराणसी, 2003
- बृहदारण्यकोपनिषद् – गीताप्रेस, गोरखपुर, उत्तरप्रदेश, 1971
- वेदकथाङ्क - गीताप्रेस, गोरखपुर, उत्तरप्रदेश, 2002

# सामान्यादिपदार्थानां बुद्धिसापेक्षताविचारः

डा. नारायण बि. राय्करः*
सहायकाचार्यः, के.सं.वि., रा. गा. परिसरः
शृङ्गेरी

***लेखसारः*** *– वैशेषिकदर्शने द्रव्यं, गुणः, कर्म, सामान्यं, विशेषः, समवायः, अभावश्चेति सप्तपदार्थाः निरूपिताः । ते सर्वेऽपि पदार्थाः स्वविलक्षणस्वभाववशात् परस्परं भिन्नाः सन्तोऽपि तेषु केषाञ्चन पदार्थानां साधर्म्यमपि विद्यते । इत्थं तेषां साधर्म्यवैधर्म्यनिरूपणावसरे "सामान्यादीनां त्रयाणां स्वात्मसत्वं बुद्धिलक्षणत्वमकार्यत्वमकारणत्वमसामान्यविशेषवत्वं नित्यत्वमर्थशब्दानभिधेयत्वं चेति भाष्योक्तसाधर्म्यप्रसङ्गे सामान्यादीनां त्रयाणां बुद्ध्यपेक्षत्वं कथमुपपद्यते इति विचारमवलम्ब्य विविधव्याख्यासु प्रतिपादितान् अभिप्रायान् सङ्गृह्य विवेचनपूर्वकं शोधप्रबन्धोऽत्र उपस्थाप्यते ।*

भोक्तुर्भोगोपजीवकतया संसृज्यमानस्य जगतोऽनेकविधस्वभाववैभवोपेतत्वात् नानाविभवात्मकस्यानादिकालतोऽनुभूयमानस्य सुखदुःखादिवैचित्र्येण चित्रितस्य स्वरूपमैदमित्थ्येनाद्यापि परिच्छेत्तुमशक्यम् । तथाऽपि तत्परिच्छेदो नोपेक्षितुमुचित इति मुनयः स्वतपःप्रभावेणाकलितसमस्तजगत्स्वरूपाः तत्स्वरूपं यथातथं सौकर्येणावगन्तुकामानामनुग्रहाय तेनैवाज्ञानतिमिरसङ्कुलसमाकुलानां जगन्नैजस्वरूपज्ञानमिहिरकिरणप्रज्वालनेनोद्धाराय च दर्शनशास्त्राणि व्यरचयन् । तथाभूतविविधदर्शनरचनासरणौ वेदप्रामाण्यसंरक्षकतया सर्वशास्त्रार्थपर्यालोचनानुकूलतया च विपश्चिद्भिरादृतमतत्त्वेऽनादरमावहतां कुतार्किकाणां कुतर्कजालापनये बद्धोत्सवं वैशेषिकदर्शनमतीवोपकरोति तत्त्वज्ञानावाप्त्युन्मुखजिज्ञासूनामिति सर्वानुभवारूढमेव तथ्यम् । तस्मिन् इतरेतरप्रभेदेन पर्यालोचिते द्रव्यगुणकर्मसामान्यविशेषसमवायाभावात्मकपदार्थसप्तके द्रव्यादीनां साधर्म्यवैधर्म्यनिरूपणानन्तरमुपक्रान्ते सामान्यविशेषादीनां साधर्म्यवैधर्म्यप्रकरणे सामान्यविशेषसमवायानां बुद्ध्यपेक्षत्वविषये विविधव्याख्यासु विपश्चिद्भिर्विमृष्टदिशा सूत्रोक्तमाशयं यथामति समुपस्थाप्यतेऽत्र लेखे ।

तत्र द्रव्यं गुणकर्माश्रयतया स्वेतरेभ्यो भिन्नम् । गुणास्तु स्वाश्रयद्रव्याभिव्यञ्जकतया स्वाश्रयाभिव्यङ्ग्यतया क्वचित्स्वाश्रयेतरद्रव्यव्यावर्तकतया च स्वेतरेभ्यो भिन्नाः । कर्म परिस्पन्दस्वाभाव्यात् स्वेतरेभ्यो भिन्नम् । सामान्यं विशेषः समवायश्च बुद्धिसापेक्षतया स्वेतरेभ्यो भिन्नाः । अभावस्तावन्नञ्पदजन्यप्रतीतिविषयतया, विलक्षणप्रतियोगिकतया वा स्वेतरेभ्यो भिन्नः ।

एवं परस्परमितरेतरवैलक्षण्येन विभक्तेषु पदार्थेषु सामान्यादीनां त्रयाणां बुद्ध्यपेक्षत्वं साधर्म्यमिति सूत्रकाराणां तदनुसारिभाष्यकाराणामाशयः । तदुक्तं सूत्रे सामान्यं विशेष इति बुद्ध्यपेक्षम् इति । अत्र इतिशब्दः प्रकारवचनः । तेन समवायोऽपि गृह्यते । तदुक्तं प्रशस्तपादभाष्ये "सामान्यादीनां त्रयाणां स्वात्मसत्वं बुद्धिलक्षणत्वमकार्यत्वमकारणत्वमसामान्यविशेषवत्वं नित्यत्वमर्थशब्दानभिधेयत्वं चे"ति । तस्मात् सामान्यविशेषसमवायत्रयं बुद्ध्यपेक्षमित्यर्थः इति । बुद्धिः अपेक्षा अपेक्षिका यस्य तद् बुध्यपेक्षम्, बुद्धेरपेक्षा यत्र तदिति वा । अनया व्युत्पत्त्या बुद्धिसहकारेणैव सामान्यादित्रयं स्वसत्तामाविष्कुर्वन्तीति लभ्यते ।

किन्तु उपस्कारकारप्रभृतयस्तु सामान्यविशेषयोरेव बुद्ध्यपेक्षत्वमाहुः । तथा चायं ग्रन्थः "सामान्यस्य तद्विशेषस्य च लक्षणं बुद्धिरेव । अनुवृत्तबुद्धिः सामान्यस्य , व्यावृत्तबुद्धिर्विशेषस्य । इतिना द्वयमवच्छिद्य परामृश्यते" इति । अत्र बुद्धिरनुवृत्तबुद्धिः, व्यावृत्तबुद्धिः, इहेदमिति बुद्धिश्च । तया बुद्ध्या यत् स्वोत्पत्तयेऽपेक्ष्यते तत्तेषां बुद्ध्यपेक्षमिति पर्यवसितार्थः । तथा चानुवृत्तबुद्धिनियामकत्वं सामान्यस्य, व्यावृत्तबुद्धिनियामकत्वं विशेषस्य, इहेदमिति विशिष्टबुद्धिविशेषनियामकत्वं च समवायस्येति व्यवस्थितम् ।

नन्वस्तु सामान्यस्य अनुवृत्तबुद्धिनियामकत्वमथापि गोत्वादिरूपसामान्यस्य व्यावृत्तबुद्धिहेतुतया तस्यापि विशेषत्वसंभवात् यदेव सामान्यम्, स एव विशेष इत्युभयोरैक्याद् धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानाम् इत्याद्युद्देशसूत्रे सामान्यविशेषयोः पृथङ्निर्देशो व्यर्थ इति चेन्नैवं शङ्क्यम् । कश्चिद्धर्मः सामान्यमात्रम्, कश्चिद्धर्मः सामान्यं विशेषश्च, कश्चिद्धर्मो

***सम्पर्कसूत्रम्*** - 9481109570, Email- narayan.raikar@csu.co.in

विशेषमात्रमित्यतो यदेव सामान्यं, तस्य विशेषरूपत्वमिति नियमासम्भवेन न तयोरैक्यम् । तदेवोक्तं सूत्रे भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव(वै० सू० ४) इति । प्रथमैवकारेण व्यावृत्तिप्रतीतेर्व्यवच्छेदः, द्वितीयैवकारेण विशेषरूपताव्यवच्छेदः । तथा च भावः सत्ता । सा च अनुवृत्तिबुद्धेरेव हेतुरित्यतः सामान्यं न विशेष इत्यर्थः । इदमपि सत् इदमपि सदित्यनुगताकारा बुद्धिः सर्वत्र जायमानत्वात् तस्य व्यावृत्तिबुद्धिहेतुत्वमनुपपन्नम् ।

न च सत्ताया अपि संयोगादिसम्बन्धान्तरेण द्रव्याद्यवृत्तितया तदवृत्तित्वधीविषयत्वमस्तीति तस्यापि व्यावृत्तिधीजनकत्वमक्षतमेवेति वाच्यम्, किञ्चिन्निरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वाभावस्यैवेह व्यावृत्तिपदार्थत्वात् । तद्वत्त्वस्य सत्ताया असम्भवेनैव न तस्य व्यावृत्तिधीजनकत्वम् । ननु तथापि सामान्यादावुक्तसम्बन्धेनावृत्तित्वस्य सत्तायां सुवचत्वात् व्यावृत्तिबुद्धिहेतुत्वमपरिहार्यमेवेति चेत्, नैवमुचितं भणितुम् । सामान्यादौ समवायसम्बन्धेन वृत्तित्वस्याप्रसिध्या तत्सम्बन्धावच्छिन्नवृत्तित्वाभावरूपा सामान्यादिव्यावृत्तिरपि सत्तायामशक्यवचनेति तस्या सामान्यरूपत्वमात्रमङ्गीकार्यम् ।

न च सामान्यं सत्, विशेषः सन्नित्यादिप्रतीत्या तत्रापि तत्सिद्धिरिति□वाच्यम्, विशेषसमवाययोरतीन्द्रियतया तत्र तादृशानुभवाभावात् । सामान्यस्य सर्वदा किञ्चिद्व्यक्तिप्रकारतयैव भासमानतया विशेष्यतया भानस्य क्वाऽप्यदर्शनेन तत्र "इदं सत्" इति प्रत्ययोपदर्शनायोगात् । गौः सन्नित्येव हि लोकानुभवः, न तु गोत्वं सदिति । अत एव सामान्ये सत्तायाः सामानाधिकरण्यसम्बन्धेनैव वैशिष्ट्यं न तु साक्षादिति । किञ्च यदि सामान्ये सत्ता स्यात्, स्वात्मन्यपि स्यात्, सत्ता सतीत्यपि प्रतीतिसम्भवात् । तेनात्माश्रयः । स्वस्य स्वनिष्ठत्वायोगात् । तत्रान्यथा निर्वाहे च स निर्वाहः सामान्यान्तरेऽपि तुल्य इति । यत्र बाधकं नास्ति, तत्रैव द्रव्यादौ सत्तासिद्धिः । अन्यथा सामान्ये सत्ताजातेः द्रव्यादिसाधारण्यात् स्वीकारे सर्वसामान्यमात्रवृत्तिसामान्यत्वरूपजात्यन्तरस्यापि स्वीकारापत्तिः । अतो अनवस्थालक्षणजातिबाधकसद्भावान्न सामान्यादिषु सत्तेत्युद्देशसूत्रे सामान्येति पृथङ्निर्देशो युज्यते ।

नन्वस्तु सामान्यस्यातिरिक्तता, अथापि सत्ताव्यतिरिक्तानां सर्वेषामुद्देशसूत्रे विशेषपदेन ग्रहणादनुवृत्तिनियामकत्वरूपं लक्षणं तेष्वतिव्याप्तमेवेति चेत्तदपि न । द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि, तेषां यथायथं द्रव्यादिष्वनुवृत्तिहेतुत्वात् । तथैव व्यावृत्तिहेतुतयाऽमीषां विशेषरूपत्वमप्यस्ति । तावता न ते मुख्यविशेषा इति । तदुक्तं भाष्ये, "प्राधान्येन सामान्यानि, स्वाश्रयविशेषकत्वात् भक्त्या विशेषाख्यानी"ति । अतः सामान्यपदेन सर्वसंग्रहान्न लक्षणमलक्ष्यवृत्ति । तदभिप्रायेणैवाभिहितं सूत्रकारैः "द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्च(वै० सू० 1.2.5)"

नन्वेवं सति घटत्वपटत्वादिपर्यन्तानां सर्वेषां सामान्यरूपतया गतार्तत्वात् विशेषपदग्राह्यमेव किमस्तीति व्यर्थमुद्देशसूत्रे विशेषपदग्रहणमिति चेत्तदप्यसमञ्जसप्रलाप एवेति मन्तव्यम् । यतो यथा द्रव्यगुणकर्मवृत्तितया सामान्यविशेषोभयात्मकादतिरिक्ता भावपदाभिधेया सत्ता सामान्यमात्रं, अतस्तथैव नित्यद्रव्यवृत्तितया सामान्यविशेषोभयात्मकादतिरिक्तः केवलव्यावर्तकपदाभिधेयः धर्मः विशेषमात्रमिति । तदुक्तं सूत्रकारैः - "अन्यत्रान्त्येभ्यो विशेषेभ्यः(वै० सू० 1.2.6)" इति । अन्ते अवसाने वर्तन्त इति अन्त्याः । अवसानश्च व्यावर्तकसीमा । तत्र वर्तन्ते ये विशेषाः, तेभ्योऽतिरिक्ताः विशेषाः सामान्यानि भवन्तीत्यर्थः । अन्तशब्देनोत्पादविनाशावसानगतानि नित्यद्रव्याण्युच्यन्ते । तदुक्तं भाष्ये "विनाशारम्भरहितेषु नित्यद्रव्येषु"इति । तथा च तत्रत्यानां तेषां प्रतिव्यक्तिभिन्नतयाऽनुवृत्तिहेतुत्वप्रसक्तिरेव नास्तीति उद्देशसूत्रे विशेषपदम् तादृशव्यावर्तकपरमिति विभाव्यम् ।

अत्र बौद्धानामयमाशयः–ननु सामान्यस्य विधिरूपत्वमनुपपन्नमेव । 'गौरयं' 'गौरयम्' इत्यनुगतप्रतीतेः अतद्व्यावृत्तेरेव विषयत्वात् । अतद्व्यावृत्तिश्च तद्भिन्नभिन्नत्वमेव । तच्च तदितरप्रतियोगिकान्योन्याभावरूपादतिरिक्तं नेत्यतः द्रव्यादिवत् तस्य भावत्वमसिद्धम् । जातिवादिभिर्नैयायिकैरपि गोत्वादिविशिष्टप्रत्ययस्य ईदृशान्योन्याभावविषयत्वमेवाभ्युपगन्तव्यम् । तथा सति कथं तस्य भावरूपत्वमास्थीयते ? न च अतद्व्यावृत्तिवैशिष्ट्यमेव तत्र तदीयं सामान्यम्, तस्य च भावरूपत्वादिति वाच्यम् । न हि वैशिष्ट्यमतद्व्यावृत्तेरन्यत्, अतोऽनायत्या गवादिपदप्रवृत्तिनिमित्तमप्यगोव्यावृत्त्यादिरेवाभ्युपेयेति ।

किं च गोत्वं कुत्र विद्यते ? न तावद्गवि, गोत्ववृत्तेः प्राक् तस्याभावात् । नापि गोभिन्ने, गोरन्यत्र गोत्वप्रतीतिव्यवहारयोरस-

म्भवात् । एवञ्च यत्र गोपिण्ड उत्पद्यते, तत्र कस्मादागत्य गोत्वमवतिष्ठते ? न च तत्तावत्तत्रैवावर्ततेति युक्तम्, तदीयदेशस्यापि गोत्वव्यवहारापत्तेः । नापि तदीयव्यक्त्युत्पत्तिकाले तदप्युत्पन्नमिति युज्यते, तस्य नित्यत्वाभ्युपगमात् । नाप्यन्यतस्तदागतं, निष्क्रियत्वाभ्युपगमात् ।

न च एकस्यैव नित्यस्य नानाव्यक्तिवृत्तित्वाभ्युपगमात् उत्पन्नायां गोव्यक्तौ तस्याभिव्यक्तिः सम्भवतीति वाच्यम् । तद्वृत्तित्वं कार्त्स्न्येनाङ्गीक्रियते उतैकदेशेन ? तत्राद्ये एकस्यैव गोत्वजातेः कार्त्स्न्येन एकस्यां व्यक्तौ वृत्तित्वास्वीकारात् । कथञ्चित्तदभ्युपगमे गोव्यक्त्यन्तरे गोत्वप्रतीत्यनुपपत्तिः । नाप्येकदेशेन तद्वृत्तित्वं, अखण्डपदार्थरूपाया जातेरेकदेशाभ्युपगमासम्भवात् । अतस्तस्या अभावरूपत्वमेवोचितम् । तदुक्तम्–

'न याति न च तत्रासीन्न चोत्पन्नं न चांशवत् । जहाति पूर्वं नाधारमहो व्यसनसन्ततिः ॥ इति ।

किन्तु सर्वमिदमसम्बद्धप्रलापकलापमात्रम् । यतः सामान्यं स्वाभाविकोऽनागन्तुको बहूनां धर्मः । स च नित्यो व्यापकः । अस्य व्यापकत्वमपि स्वरूपतः सर्वदेशसम्बद्धत्वम् । अतो न देशानां गवादिव्यवहारापत्तिः, समवायेन गोत्वादिसम्बद्धत्वस्यैव तद्व्यवहारस्याभ्युपगमात् । यथा काले रूपादिमत्त्वेऽपि कालो रूपवान् इति प्रतीतिव्यवहारौ न दृश्येते, तथैवात्रापि । तथा च यत्र पिण्ड उत्पद्यते, स्वरूपसम्बन्धेन तत्रस्थमेव गोत्वं तस्मिन् पिण्डे समवैति । जातः संबद्धश्चेत्येकः काल इत्यभ्युपगमात् । एतेन कीदृश्याश्रये वर्तते इत्यस्य यत्र प्रतीयते इति, कुत्र प्रतीयते इत्यस्य यत्र वर्तते इति, गोत्ववृत्तेः प्राक् स पिण्डः कीदृगासीदित्यत्र नासीदित्येवं क्रमेणोत्तरदानेन समाधानम् । इत्थं "न याति न च तत्रासीत्" इत्यादिकं परिदेवनमात्रम् ।

किञ्चातद्व्यावृत्तिरेव गोत्वमित्यपि न प्रलपितुं युक्तम्, 'गौरय'मिति विधिमुखः प्रत्यय एव तत्र बाधकः । तदुक्तम् 'विधिजः प्रत्ययोऽन्योऽयं व्यतिरेकासमर्थकः' इति ।

एवं कार्त्स्न्यैकदेशविकल्पेन एकोऽखण्डजातिरूपपदार्थः एकस्यां व्यक्तौ स्थातुं न शक्नोतीत्यपि न मनोरमम् । एतादृशविकल्पस्तदैव युज्यते यदैकस्मिन् कृत्स्नता एकदेशत्वं वोपपद्यते । तदेवात्र नोपपन्नम् । यतोऽनेकेषामेव कृत्स्नता न त्वेकस्याखण्डवस्तुनः । तेनेदृशविकल्पकल्पनकल्पितदूषणमप्यनादेयमेव ।

अत्र केचित्-संस्थानमात्रव्यङ्ग्यं सामान्यमित्याहुः । तद्यद्यनुगतप्रतीतिसाक्षिकं तदा गुणकर्मणोरपि तादृशप्रतीतेरानुभाविकतया किमपराद्धं तद्गतैः सामान्यैः ? भवति हि रूपरसादावनुगतधीः सा च जातिव्यवस्थापिकैव, बाधकाभावात् ।

अत्र विमृश्यते–सामान्यादित्रयाणां बुद्ध्यपेक्षत्वं नाम किम्? बुद्धिस्वरूपत्वं वा, आहोस्विद्बुद्धिसहकृतत्वं वा; तत्राद्ये बुद्धिविशेषरूपस्यैव सामान्यत्वसम्भवात् तस्य पदार्थान्तरत्वमसिद्धम् । विलक्षणविषयपरिच्छेदकतया तादृशबुद्धेः पदार्थान्तरत्वाभ्युपगमे न क्षतिरिति चेत्, तथा सति अनयैव रीत्या ज्ञानानां विलक्षणपरिच्छेदकत्वेन बहवो पदार्थाः सिध्येरन् । तथा सति पदार्थविभागव्याघातप्रसङ्गो दुर्वार एव । ननु सम्बन्धिभिन्नत्वेन सम्बन्धिद्वयवृत्तित्वाविशेषेऽपि संयोगादीनां नातिरिक्तपदार्थत्वं किन्तु समवायस्यैव, प्रकृतेऽपि अनुवृत्तबुद्धेरेव सामान्यरूपातिरिक्तपदार्थान्तरत्वं नान्यासामिति तदपि न रुचिरम् । समवायस्यापि भाष्ये बुद्धिलक्षणत्वाभ्युपगमात् विवादाध्यासितस्य सामान्यस्य तदुपपादनमन्तरेणास्य दृष्टान्तत्वेन स्वीकारायोगात् ।

बुद्धिसहकृतत्वस्य बुद्ध्यपेक्षत्वमिति स्वीकारपक्षे त्विदं पृच्छामः क्वायं बुद्धेः सहकारः इति । तत्रोच्यते – देशकालादिभिन्नेषु वस्तुषु 'गौरयं' 'गौरयम्' इति समानाकारकव्यवहारे तेषु जायमाना समानाकारकप्रतीतिः कारणम्, अर्थबोधोदीच्यत्वेन तदनुसारिशब्दप्रयोगस्यानुभवात् । ननु कथमस्या प्रतीतेः समानाकारकतेति चेत्, तदैव तादृशप्रतीतिहेतुतया विषयनिष्ठो कश्चिदनुगतो धर्मो वर्तते इत्यनुमीयते । तदेव सामान्यं जातिरिति व्यपदेशमाधत्ते । इत्थं समानाकारकप्रतीतिः तद्गतसामान्यस्य साधकमित्यतः तामन्तरेण सामान्यस्याप्रत्ययात् तदपेक्षत्वं सामान्यस्योक्तम् । अत एवोक्तं - बुद्धिरपेक्षा लिङ्गं लक्षणं वा यस्य तद्बुद्ध्यपेक्षम् इति । तदेव भाष्यकारेणेवमुपपादितम् – "प्रतिपिण्डं सामान्यापेक्षं प्रबन्धेन ज्ञानोत्पत्तावभ्यासप्रत्ययजनिताच्च संस्कारादतीतज्ञानप्रबन्धप्रत्यवेक्षणाद् यदनुगतमस्ति तत् सामान्यमिति" अस्यायमर्थः - यदा प्रतिपिण्डं सातत्येन

 ISSN : 2249-538X

ज्ञानानामुत्पत्तिः जायते, तदा पूर्वपूर्वानुभवजनितसंस्कारसहितोत्तरोत्तरप्रत्ययोत्पत्तिरूपेण अभ्यासेन जनितात् संस्कारात्, "एतत् सदृशो मया प्रागुपलब्ध" इत्येवं अतीतज्ञानानां स्मरणं भवति । तस्मात् समनुगतं किञ्चिदस्तीति ज्ञायते, तत् सामान्यमिति व्यपदिश्यते । न च सादृश्यान्नातिरिक्तं तदिति वाच्यम्, तत्सदृशोऽयमिति प्रत्यभिज्ञानाच्च यत्, तत्सादृश्यं भिन्नेषु 'घटोऽयं' 'घटोऽयम्' इत्याकारकाभिन्नप्रत्ययजनकं यत् तत्सामान्यमिति वैलक्षण्यद्योतकव्यवस्थाया दर्शनात् । अत्रायमनुमानप्रयोगः – "द्रव्यगुणकर्मसु सत्सदिति प्रत्ययः विशेष्यव्यतिरिक्तानुगतनिमित्तनिबन्धनः, भिन्नेष्वनुगतप्रत्ययात्, कम्बलादिषु नीलद्रव्यसम्बन्धात् नीलं नीलमिति ज्ञानवत्" ।

एवम् अस्मदादीनां तुल्याकृतिगुणेषु सजातीयेषु 'अयं गौः, नाश्वः' इति या व्यावृत्तबुद्धिर्जायते, सा जातिनिमित्ता । एवं सजातीयेष्वपि गवादिषु 'अयं शुक्लो न कपिलः' इति या व्यावृत्तबुद्धिर्जायते, सा गुणनिमित्ता । तेष्वपि 'शीघ्रगति'रिति या बुद्धिः, सा क्रियाविशेषनिमित्ता । एवं 'पीन' इति या बुद्धिः, सा अवयवोपचयनिमित्ता । एवं 'ककुद्मान्' इति या बुद्धिः, सा अवयवविशेषनिमित्ता । एवं 'महाघण्ट' इति या बुद्धिः, सा संयोगनिमित्ता ।

एवमेवास्मद्विशिष्टानां योगिनां नित्येषु तुल्याकृतिगुणक्रियेषु परमाणुषु मुक्तात्ममनस्सु च 'विलक्षणोऽयं' 'विलक्षणोऽय'मिति व्यावृत्तबुद्धिर्जायते, सा चान्यनिमित्तादसम्भवाद् विशेषसम्बन्धादेव भवतीति विशेषस्यापि बुद्ध्यपेक्षत्वम् । तथा चानुमानम् - "तुल्याकृतिगुणक्रियाधाराः परमाणवः, विशेषसम्बन्धिनः, व्यावृत्तज्ञानविषयत्वात्, गवादिवत्" इति । इत्थं व्यावृत्तबुद्धिलिङ्गेन विशेषस्यापि सत्ता निर्णीयते ।

एवमिहेदमिति बुद्धिर्यतो निमित्ताद् भवति, स समवायाख्यः सम्बन्धः । तदुक्तं मुनिभिः – 'इहेदमिति यतः कार्यकारणयोः स समवायः(वै. सू. 7 । 2 । 26)' इह इत्यधिकरणम्, इदमित्याधेयम्, तयोः सम्बन्धं विना 'इहेदम्' इति बुद्धिर्न भवतीति भावः ।

ननु इहेदमिति बुद्धेर्न समवायविषयत्वं, तस्याः आधारविषयत्वात् । तदुक्तम् -

इहेति चानया बुद्ध्या समवायो न गृह्यते । आधारग्राहिणी चैषा समवायाप्रतिष्ठिता ॥

यद्यस्या प्रतीतेः सम्बन्धनिमित्तत्वं वक्तुमिश्यते ? तदा स सम्बन्धः तादात्म्यलक्षण एव भविष्यति, न तु समवायः । तदतिरिक्तः सम्बन्धो वाच्यश्चेत् स अनिष्पन्नयोरुत निष्पन्नयोः ? न तत्राद्यः, सम्बन्ध्यभावे सम्बन्धस्यादर्शनात् । द्वितीये तु स सम्बन्धः युतसिद्धयोरेव स्यात् नायुतसिद्धयोः । एवमनयोरेव सम्बन्धिनोः सम्बन्धः, न पदार्थान्तराणामिति नियमे हेतुर्नास्ति । किञ्च गृहीतं विशेषणं विषेष्यज्ञानोत्पत्तौ हेतुः, व्याप्यत्वेन गृहीतं लिङ्गञ्च लिङ्गिज्ञानोत्पत्तौ हेतुः तथा समवाये तादृशहेतोरभावात् समवायो नास्त्येवेति चेत्

अत्रोच्यते–यद्यपि इह तन्तुषु पट इति ज्ञानमाधेयानुरक्ताधारं विषयीकुर्वत् समवायं न भासयतीति न स सम्बन्धः प्रत्यक्षः, तथापि निर्विकल्पके तु अवयवावयविनोः संश्लेषज्ञाने समवायः प्रत्यक्ष एव, केवलमिहेति बुद्धेरन्यत्र सम्बन्धनिमित्तत्वेनोपलब्धेरिहापि तदुपलम्भात् तन्निमित्तत्वेन कश्चित् सम्बन्धो वाच्यः । तेनान्यसम्बन्धस्य बाधादिहबुद्ध्यनुमेयतया समवायः सिद्ध एव । तेनेहेदमिति बुद्धिरेवास्य गमकमित्युपसंह्रियतेऽत्र ।

## आकरग्रन्थः

प्रशस्तपादभाष्यम्, वैशेषिकसूत्रोपस्कारः, व्योमवती(प्रशस्तपादभाष्यस्य टीका), वैशेषिकदर्शनम्(रसायनव्याख्यानम्)

# वैदिकसाहित्यस्य कानिचित् जनहितकारिणि सूक्तानि

डॉ. शर्वाणी चट्टोपाध्यायः*
सहकारि अध्यापिका, महेशतलामहाविद्यालयः
कोलकाता

***लेखसारः*** *–भारतवर्षस्य सुप्राचीनाः ग्रन्थाः एव वेदाः । वेदाः चतुर्विधाः- ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदश्च । वैदिकसाहित्येषु विविधानि सूक्तानि उपलभ्यन्ते ।तत्र बहुषु सूक्तेषु देवानामुद्दिश्य प्रार्थना दृश्यते । वेदेषु कानिचित् सूक्तानि विशेषरूपेण जनहितकारिणि इत्यभिधीयन्ते । ऋग्बेदे तथा अथर्ववेदे अपि एतादृशानि सूक्तानि दृश्यन्ते । उदाहरणरूपेण ऋग्बेदस्य धनान्नदानसूक्तम् (दानस्तुतिः), ऋग्वेदस्य ओषधिसूक्तम्, अथर्ववेदस्य रोगनिवारणसूक्तम्, अथर्ववेदस्य गृहमहिमासूक्तम् विशेषरूपेण उल्लेखनीयम् । ऋग्वेदस्य दशममण्डलान्तर्गते धनान्नदानसूक्ते उत्तमकार्यस्य दानस्य प्रशंसा उपलभ्यते । अपि च अत्र कृपणतायाः निन्दा दृश्यते ।ओषधिसूक्ते ओषधेः शक्तिः आलोचिता । रोगिणां निरामये सूक्तस्यास्य महत् उपयोगः दृश्यते । दीर्घायुष्यसूक्ते ऋषिणा सर्वेषां प्राणीनां दीर्घजीवनार्थं प्रार्थना कृता । गृहमहिमासूक्ते ऋषिणा गृहनिवासिनां कृते धनानि सुखानि च प्रार्थयन्ते । कृषिसूक्ते कृषिकार्यस्य गुरूत्वम् वर्णितम् । एषां सूक्तानाम् उपयोगित्वम् आधुनिकयुगे अपि अनस्वीकार्यम् ।*

***कूटशब्दाः*** *–वेदाः, जनहितकारिणी सूक्तानि, ऋषीणां प्रार्थना, सर्वयुगेषु ग्रहणीयत्वम्*

वेदः भारतवर्षस्य सुप्राचीनग्रन्थरूपेण परिगण्यते । वेदः चतुर्विधः- ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदश्च । सुप्राचीनकाले विरचितेषु वैदिकसाहित्येषु विविधविषयमवलम्ब्य विरचितानि सूक्तानि उपलभ्यन्ते । तत्र बहुषु सूक्तेषु देवानामुद्दिश्य प्रार्थना दृश्यते । अपि च कानिचित् सूक्तानि विशेषरूपेण जनहितकारिणि इत्यभिधीयन्ते । ऋग्बेदे तथा अथर्ववेदे अपि एतादृशानि सूक्तानि दृश्यन्ते । उदाहरणरूपेण ऋग्बेदस्य धनान्नदानसूक्तम् (दानस्तुतिः), ऋग्वेदस्य ओषधिसूक्तम्, अथर्ववेदस्य रोगनिवारणसूक्तम्, अथर्ववेदस्य गृहमहिमासूक्तम् विशेषरूपेण उल्लेखनीयम् ।

ऋग्वेदस्य दशममण्डलान्तर्गते धनान्नदानसूक्ते उत्तमकार्यस्य दानस्य प्रशंसा उपलभ्यते । अपि च अत्र कृपणतायाः निन्दा दृश्यते ।ओषधिसूक्ते ओषधेः शक्तिः आलोचिता । रोगिणां निरामये सूक्तस्यास्य महत् उपयोगः दृश्यते । दीर्घायुष्यसूक्ते ऋषिणा सर्वेषां प्राणीनां दीर्घजीवनस्य प्रार्थना कृता । गृहमहिमासूक्ते ऋषिणा गृहनिवासिनां कृते धनानि सुखानि च प्रार्थयन्ते । कृषिसूक्ते कृषिकार्यस्य गुरूत्वम् वर्णितम् । एषां सूक्तानाम् उपयोगित्वम् आधुनिकयुगे अपि अनस्वीकार्यम् ।

धनान्नदानसूक्ते दानस्य प्रशंसा तथा सम्मानना अपि अस्ति । यास्केन निरुक्तस्य सप्तमे अध्याये (७/१-२) मन्त्रस्य सूचिनिर्माणकाले सूक्तोऽयम् उद्धृतः । सूक्तेऽस्मिन् नवमन्त्राः सन्ति । अस्य ऋषि एव भिक्षुः अङ्गिरसः । सूक्तस्यास्य शिरोनामः 'धनस्य दानम्' तथा 'अन्नम्' इति शब्दद्वयेन निर्मितः । धनान्नदानसूक्ते मनुष्याणां केचित् चारित्रगुणाः यथा उदारत्वम् महानुभवत्वम् च प्रशंसिताः । परन्तु अत्र कृपणानां लोभिनां स्वार्थपरानाञ्च निन्दा विहिता । सूक्तस्यास्य प्रथमे मन्त्रे (ऋ. वे. १०/११७/१) क्षुधार्थेभ्यः अन्नदानकार्यसम्पादनार्थं दातृनां महत्वम् कीर्तितम् । सूक्तेऽस्मिन् एका महती उक्तिः दृश्यते यत् दातृनां धनानि कदापि न क्षीयन्ते यतः ईश्वरः सदा तेभ्यः धनानि प्रयच्छति । कृपनाः क्षुधार्थेभ्यः अन्नप्रदाने न आग्रही भवन्ति । अतः तेषां जीवने सुखमपि न आयाति-

**न वा उ देवाः क्षुधमिद्वधं ददुरुताशितमुप गच्छन्ति मृत्यवः । उतो रयिः पृणतो नोप दस्यत्युतापृणन् मर्डितारं न विन्दते ।**

***सम्पर्कसूत्रम्** - 9874116668, Email - bsrbcht@gmail.com

सूक्तस्यास्य एकस्मिन् मन्त्रे (१०/११७/४) बान्धवाः एव अङ्गप्रत्यङ्गतुल्यम् इति उद्घोषितम्। मन्त्रेऽस्मिन् अभिहितं यत् यदि कोऽपि जनः क्षुधार्थेभ्यः बान्धवेभ्यः आहारप्रदाने असम्मतः भवति तर्हि तस्य बान्धव इत्यभिधा न युक्तियुक्ता। अतः तस्य प्रत्याख्यानमेव उचितम्-

**न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः। अपास्मात् प्रेयान्न तदोको अस्ति पृणन्तमन्यमरणं चिदिच्छेत्॥**

सूक्तस्यास्य अपरे मन्त्रे (१०/११७/६) इत्युक्तम् यत् कश्चित् जनः यदि उदारचेतः न भवेत् तर्हि तस्य ध्वंसः अनिवार्यः। अपि च जनः यदि स्वीयकार्येन बान्धवानां प्रीतिविधाने समर्थः न स्यात् तर्हि तस्य पापः भवति-

**मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत् स तस्य। नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी॥**

सूक्तस्यास्य अन्तिमे मन्त्रे (१०/११७/९) उक्तं यत् कस्यचित् मनुष्यस्य द्वौ हस्तौ समरूपेण कर्म कर्तुं नार्हति। अपि च यमजसन्तानद्वयं सर्वदा समगुणसम्पन्नं न भवति। अनेन प्रकारेण सर्वेषां मनुष्यानां दानशीलत्वं एकरूपं न भवति-

**समौ चिद्धस्तौ न समं विविष्टः संमातरा चिन्न समं दुहाते। यमयोश्चिन्न समा वीर्याणि ज्ञाती चित् संतौ न समं पृणीतः॥**

ऋग्वेदस्य दशमे मण्डले ओषधिसूक्तम् उपलभ्यते। सूक्तस्यास्य ऋषिः अथर्वन भिषग् देवता च ओषधिः। सूक्तेऽस्मिन् ओषधेः शक्तिः वर्णिता। प्राचीनकाले वर्तमानकाले च रोगपीडितानां निरामये सूक्तस्यास्य उपयोगित्वम् कार्यकारित्वम् च अनस्वीकार्यम्। अत्र उल्लिखितं यत् ओषधिः भगवत्पूर्वः सृष्टः-

**या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।** (१०/१७/१)

अस्मिन् सूक्ते ओषधिः माता इव रक्षयित्रीरूपेण उपस्थापिता-

**शतं वो अम्ब धामानि सहस्रमुत वो रुहः। अधा शतक्रत्वो यूयमिमं मे अगदं कृत॥** (१०/१७/२)

सूक्तस्यास्य एकस्मिन् मन्त्रे उल्लिखिता यत् अश्वत्थवृक्षोपरि ओषधेः विश्रामस्थानं निर्दिष्टम्। अपि च पर्णवृक्षोपरि तस्य निवासस्थानं विरचितम्। अत्र इदमपि उक्तं यत् व्यधिग्रस्तपुरुषाणां निरामयत्वविधाने पुरस्काररूपेण ओषधीनां गोपप्राप्तिः भवेत्-

**अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्-किलासथ यत् सनवथ पुरुषम्।** (ऋ. वे. १०/१७/५)

सूक्तस्यास्य अपरे मन्त्रे 'भिषक्' इत्यस्य संज्ञा निर्धारिता। अत्रोल्लिखितं यत् यस्य सर्वेषाम् ओषधीनां ज्ञानं यथार्थरूपेण अस्ति स एव भिषक् इत्यभिधीयते। अतः भिषक् ओषधिप्रयोगेन पीडितानां रोगमुक्तिः विधायते-

**यत्रौषधीः समग्मत राजानः समिताविव। विप्रः स उच्यते भिषग् रक्षोहामीवचातनः।** (ऋ. वे. १०/१७/६)

सूक्तस्यास्य नवमे मन्त्रे उक्तं यत् ओषधिः व्यधीनां सर्वकारणानां विनाशं करोति। अतः ओषधिः स्वयं 'निष्कृति' इत्यभिधीयते। तस्य मातुः नाम एव इष्कृतिः-

**इष्कृतिर्नाम वो माताऽथो यूयं स्थ निष्कृतीः। सीराः पतत्रिणीः स्थन यदामयति निष्कृथ।** (ऋ. वे. १०/१७/९)

अस्मिन् सूक्ते ओषधेः प्रशंसार्थम् उक्तं यत् ओषधिप्रयोगात् व्यधिपीडितपुरुषाणाम् अङ्गप्रत्यङ्गेषु पीडानां व्याप्तिः लाघवं भवति-

**साकं यक्ष्म प्र पत चाषेण किकिदीविना। साकं वातस्य ध्राज्या साकं नश्य निहाकया।** (१०/१७/१३)

अस्मिन् सूक्ते न केवलं मनुष्यानाम् अपि च सर्वेषां द्विपच्चतुष्पदानां प्राणीनां निरोगत्वं प्रार्थितम्-

**मा वो रिषत् खनिता यस्मै चाहं खनामि वः। द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम्॥** (१०/१७/२०)

अतः ऋषेः प्रार्थनानुसारेण इदमेव निश्चितं यत् जनकल्याणकारी भावना एव अत्र सर्वप्रकारेण प्रकटिता। ऋषेः एवं कल्याणकारी भावना न केवलं मनुष्याणां कृते अपि च सर्वेषां प्राणीनां कृते विहिता।

अथर्ववेदस्य चतुर्थे काण्डे रोगनिवारणसूक्तम् उपलभ्यते। अस्य सूक्तस्य देवताद्वयमेव चन्द्रमा विश्वदेवा च। ऋषिः एव शंतातिः। सूक्तेऽस्मिन् उल्लिखितं यत् अस्य सूक्तस्य मन्त्राणां पठनेन रोगपीडितानां निरामयः सम्भवः।

अथर्ववेदस्य पैप्पलादशाखायाम् दीर्घायुष्यसूक्तम् उपलभ्यते। अत्र ऋषिणा सर्वेषां प्राणीनां दीर्घायुप्राप्तेः प्रार्थना कृता। सर्वेषां जीवानां दीर्घायुप्राप्त्यर्थं सूक्तस्यास्य पाठः अतीव उपयोगी भवति। सूक्तस्यास्य ऋषिणा पिप्पल्लादेन ब्रह्मा आदित्यः वायुः सोमः पृथ्वी इति देवदेवीभ्यः तथा ऋषि-गन्धर्व-अप्सराभ्यः दीर्घायुः तथा सम्पदः प्राप्तिविषये प्रार्थना दृश्यते। अत्रोल्लेख्यते सूक्तस्यास्य प्रथमः मन्त्रः-

**सं मा सिञ्चन्तु मरुतः सं पूषा सं बृहस्पतिः। सं मायमग्निः सिञ्चन्तु प्रजया च धनेन च। दीर्घमायुः कृणोतु मे॥**

केषाञ्चित् मतानुसारेण सुप्राचीनभारतवर्षे जनाः अर्थसमृद्धिविषये सचेतनाः न आसन्। परन्तु वैदिकसाहित्यस्य पठनानन्तरम् इदम् अवश्यमेव वक्तुं शक्यते यत् तत्कालीनयुगे अपि अर्थ अन्यविषयमिव प्रयोजनीयरूपेण परिगणितम् अभवत्। वैदिकसाहित्ये समाजस्य समृद्धिविधाने उन्नतिकल्पे च प्रार्थना उपलभ्यते। तत्कालीनभारतवर्षे कृषि-पशुपालन-वाणिज्यानां तथा अपरानां विविधानां अर्थोत्पादनकारिविषयानाम् उन्नतिकल्पे यथायथरूपेण प्रचेष्टा दृश्यते।

अथर्ववेदस्य तृतीयकाण्डे उपलब्धे कृषिसूक्ते कृषिकार्यस्य गुरूत्वम् विशेषरूपेण वर्णितम्। सूक्तस्यास्य ऋषिः विश्वामित्रः देवता एव सीता। अत्र ऋषिणा कृषिकार्यमेव मनुष्यानां कृते सौभाग्यवर्धकरूपेण कल्याणकारिरूपेण च निर्धारितम्। मनुष्यानां जीवनरक्षाहेतुः अन्नोत्पादनम् कृषिकार्येन भवति। कृषिकार्यार्थम् ऋतूनाम् अनुकूलता यथायथरूपेण कृषिक्षेत्रस्य निर्मानं तथा कठोरं श्रमम् आवश्यकम्। अत्र हलप्रयोगेन भूमिषु कृषिकार्यस्य समये उत्तमरूपेण वर्षायाः प्रार्थना दृश्यते इन्द्रसकाशे। अपि च अत्र सूर्यसकाशे धान्यरक्षणार्थम् प्रार्थना अस्ति। एतादृशा सुचारुरूपेण कर्षिता भूमि एव प्रतिवर्षम् उत्तमधान्यानि प्रदायते-

**इन्द्रः सीतां नि गृह्णातु तां पूषाभि रक्षतु। सा नः पयस्वती दुहामुत्तरामुत्तरां समाम्॥** (अ. वे. ३/१७/४)

अथर्ववेदस्य पैप्पलादशाखायाः गृहमहिमासूक्ते ऋषिणा गृहवासिनां कृते सम्पदः तथा सुखस्य च प्रार्थना क्रियते। अस्मिन् सूक्ते विहिता प्रार्थना सर्वयुगेषु विशेषरूपेण प्रयोजनीया। सौन्दर्य-सुख-आहारपरिपूर्णानि गृहानि एव अस्माकं सर्वेषां काङ्क्षितानि। अस्य सूक्तस्य द्वितीये मन्त्रे एवंविधा प्रार्थना दृश्यते-

**इमे गृहा मयोभुव ऊर्जस्वन्तः पयस्वन्तः। पूर्णा वामस्य तिष्ठन्तस्ते नो जानन्तु जानतः॥**

सूक्तस्यास्य तृतीये मन्त्रे गृहवासिनां पारस्परिकसम्बन्धविषये तथा गृहानां सौन्दर्यविषये प्रार्थना अस्ति। ऋषेः वर्णनानुसारेण गृहानि एव गो-छाग-भेडादिप्रयोजनीयप्राणिनैः परिपूर्णानि भवेयुः-

**सूनृतावन्तः सुभगा इरावन्तो हसामुदाः। अक्षुध्या अतृष्यासो गृहा मास्मद् बिभीतन॥**

अस्य अन्तिमे मन्त्रे उक्तं यत् धनवन्तः वान्धवाः गृहेऽस्मिन् आगच्छन्ति। अपि च गृहवासिभिः सह सानन्देन आहारं करोति च। एतद्वर्णनमेव गृहाणां समृद्धिसूचकम्। अत्र ऋषिणा सर्वेषां प्राणीनां सुस्थजीवनार्थं प्रार्थना कृता-

**उपहूता भूरिधनाः सखायः स्वादुसन्मुदः। अरिष्टाः सर्वपूरुषा गृहा नः सन्तु सर्वदा॥**

वैदिकयुगे वेदेषु जनकल्याणकारिणि भावना सविशेषं प्राधान्यम् अलभत्। एतद्कारणम् विविधेषु सूक्तेषु प्राणीनां कृते मङ्गलचिन्ता प्रार्थना च दृश्यते।

प्राणीनां रोगनिरामयत्वम् कृषिक्षेत्रे शस्योत्पादनम् गृहे सानन्देन कालयापनम् विविधेषु सूक्तेषु ऋषीणाम् एतादृशी विविधा प्रार्थना प्रभूतरूपेण उपलभ्यते। एवंविधा प्रार्थना सर्वेषु युगेषु अतीव ग्रहणीयरूपेण परिगण्यते।

## ग्रन्थपञ्जी


1. Vaidikasuktasaṃgraha (with translation), Gita Press, Gorakhpur, Saṃ 2071
2. Vedic Selections (Part-1), Sanskrit Book Depot, Kolkata, July 2008 (Reprint)
3. Vedic Selections (Part-2), Sanskrit Book Depot, Kolkata, August 2007 (Reprint)
4. https://rigvedaanalysis.wordpress.com
5. https://stotranidhi.com

# बाध्यबाधकभावः

डा. श्यामसुन्दरः ए*
सहायकाचार्यः(सं), के.सं.वि., रा. गा. परिसरः
शृङ्गेरी

***लेखसारः*** *– दोषवशात् तद्वत्ताभ्रमोत्पत्त्यनन्तरं विशेषदर्शनादिना तदभाववत्ताप्रमानिश्चये सति तत्र पूर्वोत्पन्नं भ्रमज्ञानं बाध्यते, उत्तरकालिकश्च निश्चयो बाधको भवतीति पूर्वोत्तरकालिकयोस्तयोः सर्वानुभवसिद्धो बाध्यबाधकभावः । स च प्रतिबध्य-प्रतिबन्धकभावापेक्षया विलक्षणः । उत्पन्नयोरेव द्वयोर्ज्ञानयोःबाध्यबाधकभावः ।प्रतिबध्य-प्रतिबन्धकभावस्तु उत्पन्नेन तदभाववत्तानिश्चयेन उत्पत्त्युन्मखस्य तद्वत्ताज्ञानस्य प्रतिबन्धः(अनुत्पादः) जायते । दोषाधीनस्य शुक्तौ 'इदं रजतम्' इत्यादिज्ञानस्य तज्ज्ञानबाध्यत्वं च तज्ज्ञानज्ञाप्यभ्रमत्त्वाश्रयत्वम् । 'नेदं रजतम्' इत्यादिप्रमात्मकज्ञानस्य तद्बाधकत्वञ्च तत्र भ्रमत्वज्ञापकज्ञानजनकत्वम् ।*

***कूटशब्दाः*** *– दोषः, सन्निकर्षः, बाध्यत्वं, बाधकत्वं, मिथ्यात्वं, प्रमात्वं विरोधित्वं, प्रतिबध्यं, प्रतिबन्धकत्वम् ।*

## शोधप्रबन्धः-

पुरोवर्तिनि शुक्तिकादौ चाकचक्यादिदोषवशाद् 'इदं रजतम्' इति ज्ञानोत्पत्त्यनन्तरं सन्निकर्षादिना 'नेदं रजतम्' किन्तु शुक्तिः इति निश्चिते पूर्वोत्पन्नं 'इदं रजतम्' इति रजतत्त्वज्ञानं बाध्यते, उत्तरकालिकं 'नेदं रजतम्' इति ज्ञानं बाधकमिति पूर्वोत्तरकालिकयोस्तयोः रजतत्वतदभावावगाहिज्ञानयोः बाध्यबाधकभावश्च सर्वानुभवसिध्द एव ।

नन्वत्र प्रमात्मकज्ञानस्येव इव भ्रमस्य विशिष्टज्ञानस्वरूपत्वाङ्गीकारे बाधकत्वप्रयोजकस्य तदभावप्रकारकत्वरूपस्य विरोधिविषयकत्वस्य 'नेदं रजतम्' इति ज्ञाने इव 'इदं रजतम्' इति पूर्वोत्पन्नज्ञानेऽप्यक्षततया तस्यापि बाधकत्वप्रसङ्ग इति बाध्यबाधकभावव्यवस्थायाः उच्छेदप्रसङ्गः । यद्यपि यत्र रजते 'नेदं रजतम्' इति भ्रमानन्तरं विशेषदर्शनादिवशात् 'इदं रजतम्' इति प्रमात्मकज्ञानमुत्पन्नं तत्र 'इदं रजतम्' इति ज्ञानस्य बाधकत्वमिष्यत एवेति रजतत्वतदभावावगाहिनोः द्वयोरपि ज्ञानयोः बाधकत्वं तत्र तत्र स्थले आवश्यकमेव, तथापि एकत्र स्थले रजतत्वतदभावज्ञानयोः द्वयोरपि बाधकत्वस्यानिष्टत्वात्, तदापत्तिः । यस्य रजतत्वप्रकारकज्ञानस्य रजतत्वाभावप्रकारकज्ञाननिरूपितबाध्यत्वं तस्य ज्ञानस्य रजतत्वाभावज्ञाननिरूपितबाधकत्वं नेष्यत एवत्यभिप्रायः । तदाशङ्क्य समाहितं तत्त्वचिन्तामणौ – यत्तु ज्ञानमिथ्यात्वे बाध्यबाधकव्यवस्था न स्यादविशेषादिति । तन्न । अनन्यथासिद्धाया धियो बाधकत्वात् इत्यादिना ।

इदमत्रसमाधानग्रन्थस्याभिप्रायः - ज्ञानस्य बाधकत्वे विरोधिविषयकत्वं न प्रयोजकं, येन पूर्वोक्तदोषः स्यात् । किन्तु विशेषदर्शन-लौकिकसन्निकर्षादिरूपोत्तेजकाधीनत्वरूपम् अनन्यथासिद्धत्वमेव । यत्र पाळपळ्यादिदोषवशात् पुरोवर्तिन्यां शुक्तौ रजतत्वज्ञानोत्पत्त्यनन्तरं, तत्रैव धर्मिणि शुक्तिकादौ 'रजतत्वाभावव्याप्यवदिदम्' इति विशेषदर्शनेन 'नेदं रजतं, किन्तु शुक्तिरेव' इति निश्चय जायते । स च निश्चयः पूर्वोत्पन्नं रजतत्वज्ञानं बाधते, विशेषदर्शनाधीनत्वात् । रजतत्वज्ञानं च विशेषदर्शनाद्यनधीनत्वात् न बाधकम् । एवं यत्र दूरस्थे धर्मिणि 'परुषत्वव्याप्यकरपादादिमानयम्' इति भ्रमात्मकविशेषदर्शनेन 'अयं पुरुषः' इति भ्रमो जातः । ततश्च लौकिकसन्निकर्षवशात् तत्रैव धर्मिणि 'अयं न पुरुषः, किन्तु स्थाणुः' इति निर्णयो जायते, तत्र उत्तरकालिकं लौकिकसन्निकर्षजं 'नायं पुरुषः' इति पुरुषत्वाभावज्ञानं, पूर्वकालिकं 'पुरुषोऽयम्' इति पुरुषत्वज्ञानं बाधते । लौकिकसन्निकर्षस्य विशेषदर्शनापेक्षया प्राबल्यात्,

***सम्पर्कसूत्रम्** - 9449542389, Email- shyamsringeri@gmail.com

विशेषदर्शनाधीनमपि दोषजन्यं पुरुषत्वज्ञानं, लौकिकसन्निकर्षाधीनेन पुरुषत्वाभावज्ञानेन बाध्यते । अत्र ज्ञानस्य विधेयांशे लौकिकसन्निकर्षजन्यत्वं विवक्षितम् । अन्याथा पूर्वोत्पन्नस्य दोषाधीनस्य 'इदं रजतम्' इति शुक्तिविशेष्यकभ्रमस्यापि धर्म्यंशे लौकिकसन्निकर्षजन्यत्वेन बाधकत्वापत्तेः ।

एवं यत्र च दुष्टादुष्टेन्द्रियजन्यं परस्परनिरपेक्षम् एकत्र धर्मिणि विरुद्धधर्मप्रकारकं 'इदं रजतं' 'नेदं रजतम्, इति च ज्ञानद्वयं क्रमेण उत्पद्यते तत्र पूर्वोत्पन्नं ज्ञानं बाध्यम्, उत्तरकालिकञ्च तद्बाधकम् । तत्र पूर्वज्ञानम् असञ्जातविरोधित्वात् विशेषदर्शनादिकं विना उत्पत्तुमर्हति । तच्च असञ्जातविरोधित्वात् न बाधते । अनुत्पन्नस्य बाधनाऽसम्भवात् । उत्तरकालिकं तु ज्ञानम् सञ्जातविरोधित्वेन स्वकारणवशादुत्पद्यमानं पूर्वज्ञानमप्रबाध्य नैव उत्पत्तुमर्हतीति बाधकं सदेव उत्पद्यते । तस्य अबाधकत्वे उत्पत्तिरेव न स्यात्, विरोधिनः पूर्वज्ञानस्य सत्त्वात् । तदुक्तं चिन्तामणौ - पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयते । अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्[1] इति ।

यत्र तु ज्ञानयोः परस्परं सापेक्षता तत्र न बाध्यबाधकभावः सम्भवति । यथा – सन्निकर्षवशात् पूर्वमुत्पन्नम् 'अग्निरुष्णः' इति प्रत्यक्षम्, उष्णत्वाभावव्याप्यवानग्निः निश्चयजन्याम् ''अग्निरनुष्णः' इत्यनुमितिं प्रति बाधकं न भवति । प्रत्यक्षस्य अनुमित्युपजीव्यत्वात् । अनुमितिरपि पूर्वस्य औष्ण्यप्रत्यक्षस्य बाधिका न भवति । तत्रानुमितेरेव पूर्वमजातत्वात् । अनुमितेः प्रत्यक्षोपजीवकतया, उपजीव्यं पूर्वप्रत्यक्षं विरुध्य उपजीवकस्य अनुमित्यादेः उत्पत्त्यसम्भवात् । न ह्यनुत्पन्नायाः अनुमितेः प्रत्यक्षं बाधकं भवितुमर्हति ।

न च परस्परं विरोधिविषयकयोः ज्ञानयोः कार्यकारणभावलक्षणोपजीव्योपजीवकभावासम्भावात् 'अग्निरुष्ण:' इति प्रत्यक्षम् 'अग्निरनुष्णः' इत्यनुमितेः कथं उपजीव्यं भवितुमर्हति ? इति वाच्यम् । यतो हि 'अग्निरनुष्णः' इत्यनुमित्युत्पत्तौ अनुष्णत्वव्याप्तिनिश्चय अपेक्ष्यते । व्याप्तिनिश्चयोत्पत्तौ च घटादौ अनुष्णत्वद्रव्यत्वाद्योः सहचारज्ञानम् । तत्र 'घटः उष्णस्पर्शाभाववान्' इत्याद्यभावप्रत्यक्षात्मकज्ञाने प्रतियोगिज्ञानविधया उष्णस्पर्शस्य ज्ञानमपेक्ष्यते । स च अग्नौ उपलभ्यते इति क्रमेण अग्नौ अनुष्णत्वस्य अनुमितिः अग्नौ उष्णत्वस्य प्रत्यक्षमुपजीवति । एवञ्च परस्परम् उपजीव्योपजीवकभावापन्नयोर्ज्ञानयोः विरोधिविषयकत्वेऽपि सापेक्षतया न बाध्यबाधकभावः। परस्परनिरपेक्षतया उत्पन्नयोस्तु विरोधिविषयकयोः भ्रमप्रमयोः बाध्यबाधकभावो वर्तत एव । तत्र भ्रमस्य बाध्यत्वं, प्रमायाः बाधकत्वमिति ।तदेतत्सङ्गृहीतं मणौ – यत्र पूर्वापेक्षमत्तरं ज्ञानमुत्पत्तुम् उन्मखं तत्रोपजीव्यपूर्वविरोधेनोत्तरं नोत्पद्यते, अतोऽजातं सत्पूर्वं कथं बाधताम् । यथा प्रत्यक्षादिविरुद्धानुमितिः इति

अत्र हि रजतत्वाभावादिप्रमया रजतत्वादिभ्रमस्य बाधो नाम कः ? इति जिज्ञासायां पूर्वपक्षनिरासपूर्वकं समाधत्ते मणिकारः- ननु भ्रमस्य किं बाध्यते । न स्वरूपं तस्य सत्वात् ।नापि रजतत्वादिप्रकारकत्वं, शुक्त्यादिविशेष्यकत्वं वा तयोरपनेतुमशक्यत्वात् । ज्ञातं हि तत् रजतत्वेन शुक्तिं विषयीकृत्य । नापि व्यवहारः, प्रवृत्यादेर्वृत्तत्वात् । नाप्यनागतव्यवहारजनकत्वं, तस्य कारणाभादेवासम्भवात् । उच्यते – बाधकेन भ्रमस्य भ्रमत्वबुद्धिरेव बाधः इति । तस्यायमभिप्रायः - रजतत्वाभावादिप्रमया रजतत्वादिभ्रमस्य बाधस्तावत् न भ्रमस्वरूपस्य निवृत्तिः । यदा च 'इदं रजतम्' इत्यादिभ्रमो जायते तदा तत्स्वरूपस्य ज्ञानत्वात्मकस्य भ्रमत्वात्मकस्य वा नित्यत्वेन ज्ञानान्तरेण नाशयितुं न शक्यते इति स्वरूपनिवृत्तिर्न सम्भवाति ।

एवं भ्रमनिष्ठस्य रजतत्वादिप्रकारकत्वस्य शुक्त्यादिविशेष्यकत्वस्य वा निवृत्तिः बाधपदार्थः । यतो हि 'इदं रजतम्' इति ज्ञानस्योत्पत्तौ ततः रजतत्वप्रकारकत्वस्य शुक्तिविशेष्यकत्वस्य वा निवृत्तेः अशक्यत्वेन पुनरसम्भवस्तदवस्थ एव ।

[1] अन्यथाख्यातिवादः,दीपिकाव्योपेतः,पृ.सं.९१

 ISSN : 2249-538X

न हि तत्र भ्रमगतायाः प्रवृत्त्यादिजनकतायाः नाशो बाधः । यतः शुक्तौ ' इदं रजतम्' इति भ्रमानन्तरं तत्र रजतार्थिपुरुषस्य प्रवृत्त्यादेरुत्पन्नतया तत्र प्रवृत्त्यादिजनकतायाः दुर्वारत्त्वात् ।

अनागतप्रवृत्त्यादिजनकत्वस्य नाशो बाधः इत्यपि न । रजतत्वभ्रमस्य भाविप्रवृत्तौ कारणत्वविरहेण तत्र तन्नाशो न सम्भवत्येव । ध्वंसं प्रतियोगिनः कारणत्वादिति चेत् ।

अत्रोच्यते भ्रमास्य भ्रमत्वबुद्धिरेव बाधः । विशेषदर्शनवशात् पुरोवर्तिनि शुक्त्यादौ ' इदं न रजतं किन्तु शुक्तिः' इति निश्चये सति पूर्वोत्पन्नस्य 'इदं रजतम्' इति ज्ञानस्य भ्रमत्वं निर्णीयते । तद्यथा- 'इदं रजतम्' इति ज्ञानं रजतत्वाभाववन्निष्ठविशेष्यतानिरूपितरजतत्वनिष्ठप्रकारताकं रजतत्वनिष्ठप्रकारतानिरूपितपुरोवर्तिनिष्ठविशेष्यताकत्वे सति रजतत्वाभाववत्पुरोवर्तिविशेष्यकत्वात् इत्यनुमानप्रयोगः । तत्र 'इदं रजतम्' इति ज्ञानरूपे पक्षे रजतत्वनिष्ठप्रकारतानिरूपितपुरोवर्तिनिष्ठविशेष्यताकत्वम् अनुव्यवसायात् अवगतम् । पुरोवर्तिनः रजतत्वाभाववत्त्वं

तु 'नेदं रजतम्' इति बाधनिश्चयगोचरः । इत्थं रजतत्वनिष्ठप्रकारतानिरूपितपुरोवर्तिनिष्ठविशेष्यताकत्वे सति रजतत्वाभाववत्पुरोवर्तिविशेष्यकत्वरूपस्य हेतोः पक्षे 'इदं रजतम्' इति ज्ञाने अवगमात् रजतत्वाभाववन्निष्ठविशेष्यतानिरूपितरजतत्वनिष्ठप्रकारताकत्वरूपभ्रमत्वव्याप्यनिरुक्तहेतुमत्ताज्ञानेन इदं रजतम् इति ज्ञानं भ्रम' इत्यनुमितिः जायते । तथा च शुक्तौ 'इदं रजतम्' इत्यादिज्ञानस्य तद्ज्ञानबाध्यत्वं च तज्ज्ञानज्ञाप्यभ्रमत्त्वाश्रयत्वम् । 'नेदं रजतम्' इत्यादिज्ञानस्य तद्बाधकत्वञ्च तत्र भ्रमत्वज्ञापकज्ञानजनकत्वमिति शम् ।

## सन्दर्भग्रन्थसूची-

१. गङ्गेशोपाध्यायविरचितः मथुरानाथतर्कवागीशविरचितरहस्यव्याख्योपेतः, चौखम्बासंस्कृतभवनम्
२. अन्यथाख्यातिवादः, प्रो.नवीनहोळ्ळविरचितः दीपिकाव्याख्यासहितः, श्रीशङ्कर अद्वैतशोधकेन्द्रम्, २०१३

# उत्पातसमीक्षा

डा. रमानन्द भट्टः एन्.*
सहायकाचार्यः(सं.), के.सं.वि., रा.गा.परिसरः
शृङ्गेरी

***लेखसारः*** *–त्रिस्कन्धात्मकं ज्योतिश्शास्त्रं त्रिभिः स्कन्धैः विस्तृतं वर्तते । अत्र संहितास्कन्धः* ***तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता*** *इति वराहोक्तवत् नानाविधान् विषयान् प्रतिपादयति । अस्मिन् स्कन्धे निरूपितविषयेभ्यः परं कश्चिदन्यः विषयः जगति अवशिष्टः एव नास्तीति वक्तुं शक्यते ।*

***कूटशब्दाः*** *– भूकम्पः, संहिता, वराहमिहिरः, उत्पातः, कमलाकरः, पापम्, अद्भुतम्*

तत्र तावदादौ उत्पातशब्दार्थः ज्ञेयः । उत्पतति, अकस्मात् आगच्छति इति उत्पातः[१] । तदुक्तम् – वाचस्पत्ये – **अकस्मादागते प्राणिनां शुभाशुभसूचके दैवनिमित्ते** । भूकम्पादौ इत्यर्थः । कल्पद्रुमे अपि इदमुक्तम् । अजन्यम्[२], उपसर्गः चेति तत्पर्यायः । उत्पातानि निमित्तानि भवन्ति । किन्तु सर्वाणि अपि निमित्तानि उत्पातानि न भवन्ति । यतः तानि अन्यत्रापि भवितुमर्हन्ति । अतः सर्वाणि निमित्तानि नोत्पातानि, किन्तु निमित्तानि अन्यस्मिन् अपि काले उत्पातरूपाणि भवन्ति[३] । शकुनं तु निमित्तमेव ।

किन्तु ज्यौतिषे उच्यते – "**यः प्रकृतिविपर्यासः सर्वः संक्षेपतः स उत्पातः**[४]" । वराहस्तु आह – "**प्रकृतेरन्यत्वम्**[५] उत्पातः[६]" । किन्तु इदमेव अद्भुतम् इत्यपि उच्यते । अद्भुतं नाम प्रकृतिविरुद्धम् । श्रीमद्बल्लालसेनदेवप्रणीते अद्भुतसागरे –

**अभूतपूर्वं यत् पूर्वं यत् पूर्वं जायतेऽथवा । तदद्भुतमिति प्रोक्तं नैमित्तं स्यान्निमित्तजम्**[७] ॥ इति ॥

बार्हस्पत्येऽपि – **अभूतपूर्वं यल्लोकस्य पूर्वं (प्रथमं) भवति, पूर्वं च यदन्यथा भवति तदद्भुतम् । तच्च द्विविधम् – नैमित्तम् अनैमित्तं च । केतूदयादिना निमित्तेन यदद्भुतं जायते तन्नैमित्तम् । तच्छुभाशुभसूचकम् । इतरद् अनैमित्तम् । तच्च द्विविधम् – शुभसूचकम् अशुभसूचकञ्च । यदशुभसूचकं स उत्पातः**[८]" ।

इदं किमर्थं जायते इत्यस्य कारणमाह –

**अपचारेण नराणामुपसर्गः पापसञ्चयाद् भवति**[९] ।

नराणाम् अपचारेण पापसञ्चयः भवति । तस्मात् पापात् उपसर्गाः जायन्ते ।

**मनुजानामपचारादपरक्ता देवताः सृजन्त्येतान्**[१०] ।

---

***सम्पर्कसूत्रम्** - 9686548489, Email- rnbhat1987@gmail.com

[१]यद्यपि घञन्तं पदम् । पुल्लिङ्गे एव स्यात् । किन्तु ज्यौतिषे नपुंसि अपि प्रयोगः दृश्यते ।

[२]लौकिकैः हेतुभिः न जन्यते ।

[३]"न कथञ्चिदपि निमित्तैर्ग्रहणं विज्ञायते निमित्तानि । अन्यस्मिन्नपि काले सम्भवन्ति उत्पातरूपाणि" ॥ - बृहत्संहिता – ५.१६ ।

[४]समाससंहितावाक्यम् – बृहत्संहितायाम् ४५.०१ भट्टोत्पलविवरणे ।

[५]"प्रकृतेरन्यथात्वम्" इति मुहूर्तचिन्तामणेः पीयूषधारायां गोविन्दः – ०१.३२ ।

[६]बृहत्संहिता - ४५.०१ ।

[७]अद्भुतसागरः – उपोद्घाते ।

[८]अद्भुतसागरः – उपोद्घाते "अभूतपूर्वम् ...." इत्यस्य भागस्य हिन्दीटीकायाम् ।

[९]बृहत्संहिता - ४५.०२ ।

[१०]बृहत्संहिता - ४५.०३ ।

इति संहितायाम्,

**प्रकृतिविरुद्धं प्राक्प्रबोधाय देवताः सृजन्ति**[१] ।

इति अद्भुतसागरे,
मत्स्यपुराणे च –

**पुरुषापचारान्नियतपरज्यन्ति देवाः । ततोऽपरागाद्देवानामुपसर्गः प्रवर्तते**[२] ॥

**अतिलोभादसत्याद्वा नास्तिक्याद्प्यधर्मतः । नरापचारान्नियतमुपसर्गः प्रवर्तते**[३] ॥

एते उत्पाताः त्रिधा भवन्ति । "**तेषां द्यौरन्तरिक्षं भूरेताश्चाश्रयः**" इति अद्भुतसागरे उपोद्घाते पराशरवचनम् । समाससंहितायामपि उक्तम् – "**क्षितिगगनदिव्यजातः**[४]" । दिव्यान्तरिक्षभौमाः उत्पाताः सम्भवन्ति । दिव्याः दिवि आकाशे भवाः, आन्तरिक्षाः अन्तरिक्षे भवाः, भूमौ भवाः भौमाः चेति[५] ।

किन्तु इदम् अनेन क्रमेण वाच्यम् - क्षितिगगनदिव्यजातः इति, यतः, एतेष्वपि "**यथोत्तरं गुरुतरो भवति**[६]" इत्युक्त्या क्षिति-गगन-दिव्यजातेषु उत्पातेषु भौमापेक्षया अन्तरिक्षजः, तदपेक्षया दिव्यः प्रबलः भवति । एतेषां तु योनिः उत्पत्तिस्थानं पञ्चभूतानि इति पराशरः ।

तर्हि इमे उत्पाताः कथं ज्ञेयाः । तत्रास्ति कश्चन क्रमः । तदुक्तं तत्रभवता वराहेण – "**शुभाशुभानि निमित्तानि सामान्यानि च जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणम् अनन्यकर्माभियुक्तेन दैवज्ञेन चिन्तयितव्यानि । न चैकाकिना शक्यन्तेऽहर्निशमवधारयितुं निमित्तानि । तस्मात् सुभृतेनैव दैवज्ञेनान्येऽपि तद्विदश्चत्वारः कर्तव्याः । तत्रैकेनैन्द्री चाग्नेयी च दिगवलोकयितव्या । याम्या नैर्ऋती चान्येनैव, वारुणी वायव्या च, चोत्तरा चैशानी चेति । यस्मादुल्कापातादीनि शीघ्रमपगच्छन्तीति । तस्याश्चाकारवर्णस्नेहप्रमाणादि-ग्रहर्क्षोपघातादिभिः फलानि भवन्ति**"[७] ।

एवं पूर्वं प्रतिपादतं त्रिविधाः उत्पाताः इति । तेषां किञ्चित् परिचयः विधीयते ।

## दिव्योत्पाताः

**ग्रहर्क्षविकृतं दिव्यम् । स्वर्भानुकेतुनक्षत्रग्रहतारार्कचन्द्रजम् । दिवि चोत्पद्यते यच्च तद्दिव्यमिति कीर्तितम्**[८] ॥

ग्रहेषु नक्षत्रेषु यः विकारः दृश्यते तदुत्पातशब्देन उच्यते ।

## आन्तरिक्षाः उत्पाताः

**उल्कापातो दिशां दाहः परिवेषस्तथैव च । गन्धर्वनगरं चैव वृष्टेश्च विकृतिस्तु या ॥**

**वाय्वभ्रसन्ध्यादिग्दाहपरिवेषस्तमांसि च । खपुरं चेन्द्रचापं च तद्विद्यादन्तरिक्षजम्**[९] ॥

---

[१]अद्भुतसागरः – उपोद्घाते ।
[२]अद्भुतसागरः – उपोद्घाते मत्स्यपुराणम् ।
[३]गर्गवाक्यम् – बृहत्संहितायाम् ४५.०२ भट्टोत्पलविवरणे ।
[४]अद्भुतसागरः – उपोद्घाते ।
[५]बृहत्संहिता – ४५.०२ – भट्टोत्पलविवृतिः ।
[६]समाससंहितावाक्यम् – बृहत्संहितायाम् ४५.०१ भट्टोत्पलविवरणे ।
[७]बृहत्संहिता – सांवत्सरसूत्राध्याये संहितापदार्थाः इत्यस्मिन् प्रकरणे ।
[८]अद्भुतसागरः – उपोद्घाते ।
[९]अद्भुतसागरः – उपोद्घाते ।

## भौमाः उत्पाताः

**चरस्थिरभवो भौमो भूकम्पश्चापि भूमिजः । जलाशयानां वैकृत्यं भौमं तदपि कीर्तितम्[१] ॥**

## उत्पातानां फलम्

**भौमं चाल्पफलं ज्ञेयं चिरेण च विपच्यते । नाभसं मध्यफलदं मध्यकालफलप्रदम् ।**
**दिव्यं तीव्रफलदं ज्ञेयं शीघ्रकारि तथैव च[२] ॥**

## उत्पातानां शान्तिः

तदाह कश्यपः -

**भौमं शान्तिहतं नाशमुपगच्छति मार्दवम् । नाभसं न शमं याति दिव्यमुत्पातदर्शनम्[३] ॥**

वराहोऽपि शान्तिविचारमाह –

**भौमं चरस्थिरभवं तच्छान्तिभिराहतं शममुपैति । नाभसमुपैति मृदुतां क्षरति न दिव्यं वदन्त्येके[४] ॥**
**दिव्यमपि शममुपैति प्रभूतकनकान्नगोमहीदानैः । रुद्रायतने भूमौ गोदोहात् कोटिहोमाच्च[५] ॥**

भौमोत्पाताः शान्त्या शममुपगच्छन्ति । नाभसाः मृदुत्वं भजन्ते । दिव्याः न शमनमुपयान्तीति एके वदन्ति । किन्तु वराहः कथयति – दिव्या अपि प्रभूतकनकादिदानेन, शिवायतने गोदोहनात्, कोटिहोमाच्च शमनं गच्छति । अथवा अमृताख्यां महाशान्तिं कुर्यात् । तदुक्तम् –

**प्रयतस्तेषु सर्वेषु दिव्येष्वद्भुतकेषु च । महाशान्तिं बुधः कुर्यादमृतां विश्वभेषजम्[६] ॥**
**नास्ति लोके स उत्पातो यो ह्यनेन न शाम्यति । माङ्गल्यं चापरं नास्ति यदस्मादतिरिच्यते[७] ॥**

## दैवोत्पातानां पाकस्थानानि

दैवमुत्पातं नृपतेः अष्टभिः प्रकारैः फलं ददाति । तदुक्तं वराहेण –

**आत्म-सुत-कोश-वाहन-पुर-दार-पुरोहितेषु लोके च । पाकमुपयाति दैवं परिकल्पितमष्टधा नृपतेः[८] ॥**

फलम् आत्मनि स्वयं राजनि, सुते राजपुत्रे, कोषे भण्डागारे, वाहनेषु अश्वादिषु, पुरे नगरे, दारेषु भार्यासु, पुरोहिते आचार्ये, लोके जनपदे च फलं ददाति ।

---

[१]अद्भुतसागरः – उपोद्घाते ।
[२]अद्भुतसागरः – उपोद्घाते ।
[३]अद्भुतसागरः – उपोद्घाते ।
[४]बृहत्संहिता - ४५.०५ ।
[५]बृहत्संहिता - ४५.०६ ।
[६]अद्भुतसागरः – उपोद्घाते ।
[७]अद्भुतसागरः – उपोद्घाते वराहवचनम् ।
[८]बृहत्संहिता – ४५.०७ ।


ISSN : 2249-538X

अन्यत्र उत्पातभेदेन पाकस्थानान्युक्तानि –

**दिव्या जगतो, देवस्य नाभसाः, पार्थिवस्य भूप्रभवाः**[१] ।

दिव्योत्पाताः जगतः, नाभसाः देवगणस्य, भूजाताः पार्थिवस्य च अनिष्टं प्रयच्छन्ति ।

एवं "**त एव त्रिविधा लोके उत्पाता देवनिर्मिताः । विचरन्ति विनाशाय रूपैः सम्बोधयन्ति च ॥**" इति लोकानां विनाशाय उत्पाताः सम्भवन्ति ।

त्रिभिः प्रकारैः उक्तेषु उत्पातेषु दृष्टान्तरूपेण केषाञ्चन उत्पातानां विवरणमत्र प्रदीयते ।

## दिव्यः उत्पातः

### अपर्व ग्रहणम्

ग्रहणं पर्वणि सम्भवति । गणितेन ग्रहणं विज्ञायते । किन्तु श्रूयते वृद्धगर्गस्य वचनम् "**अपर्वणि भयं यस्माद् ग्रहणं शशसूर्ययोः**[२]" इति । इदं ग्रहणं निमित्तम् । अर्थात् उत्पातः ।

तत्फलमप्यभिहितं तेनैव –

**दृश्येते च त्रयोदश्यां चन्द्रार्कौ ग्रहणं गतौ । छत्राण्यनेकानि तदा मृज्यन्ते भूमिपक्षये ॥**

**सपुत्रदारा नश्यति सङ्ग्रामे लोमहर्षणे । अनेन वनितायाः स वैदव्यान्तकरोऽधिकम्**[३] ॥ इति ॥

वराहेणाप्युक्तम् –

**सतमस्कं विना पर्व त्वष्टा नामार्कमण्डलं कुरुते । स निहन्ति सप्तभूपान् जनांश्च शत्राग्निदुर्भिक्षैः**[४] ॥

त्वष्टा नाम ग्रहः पर्व विना अन्यत्र अर्कमण्डलं सतमस्कं कुरुते इत्युक्तम् ।

विष्णुधर्मोत्तरे[५] –

**अपर्वणि शशाङ्कार्कौ त्वष्टा नाम महाग्रहः । आवृणोति तमः श्यामः सर्वलोकविपत्तये ॥**

महाभारते रामायणे च एतादृश-उत्पाताः दृष्टाः । तत्र श्रीमद्रामायणे अरण्यकाण्डे खरादिवधनिमित्तत्वेन –

**सकबन्धः सपरिघः स्वर्भानुश्च दिवाकरः । जग्राह कालपर्यन्तम् अपर्वणि महाग्रहः ॥**

भारते भीष्मपर्वणि कुरुपाण्डवसैन्यवधनिमित्तम् –

**चतुर्दशीं पञ्चदशीं भूतपूर्वां च षोडशीम् । चन्द्रसूर्यावुभौ ग्रस्तावेकपक्षे त्रयोदशीम् ।**
**अपर्वणि ग्रहेणोभौ प्रजासंक्षिपयिष्यतः ॥**

सभापर्वणि पाण्डवानां वनप्रवेशे कुरुक्षयनिमित्तम् –

**राहुरग्रसदादित्यमपर्वणि विशाम्पते ॥**

[१] अद्भुतसागरः – उपोद्घाते ।
[२] अद्भुतसागरः – राहोरद्भुतावर्ते ।
[३] अद्भुतसागरः – राहोरद्भुतावर्ते ।
[४] बृहत्संहिता ३.६ ।
[५] सर्वमपि पुराणेतिहासवचनम् अद्भुतसागरादेव स्वीकृतम् ।

## भौमः उत्पातः

**भूकम्पः**

तत्रादौ भूकम्पस्य कारणमुक्तं विष्णुपुराणे –

**यदा विजृम्भतेऽनन्तो मुदा घूर्णितलोचनः । तदा चलति भूरैषा साद्रिद्वीपाब्धिकानना[१] ॥**

भूधरः अनन्तः यदा सन्तोषेण विजृम्भते तदा एषा भूमिः साब्धिद्वीपा चलतीति पौराणिकं मतम् । भूकम्पस्य कारणविषये काश्यपादीनां मतमाह वराहः -

**क्षितिकम्पमाहुरन्ये बृहदन्तर्जलनिवासिसत्त्वकृतम् । भूभारखिन्नदिग्गजविश्रामसमुद्भवञ्चान्ये ॥**

**अनिलोऽनिलेन निहतः क्षितौ पतन् सस्वनं करोत्यन्ये । केचित्त्वदृष्टकारितमिदमन्ये प्राहुराचार्याः[२] ॥**

केचन मुनयः कश्यपादयः भुवः कम्पस्य कारणं बृहदन्तर्जलनिवासिसत्त्वकृतम् इति वदन्ति । अन्तर्जले निवसद्भिः झष-मकर-कूर्म-शिंशुमारप्रभृतिभिः सत्त्वैः इत्यर्थः । चान्ये गर्गादयः भूभारेण खिन्नैः दिग्गजैः कृतेन विश्रामेण जातत्त्वं कथयन्ति । वसिष्ठादयस्तु वायुः वायुना अन्येन नभस्स्थलस्थितेन निहतः क्षितौ पतति, तदा भूकम्पः जायते इत्याहुः । अन्ये केचन वृद्धगर्गादयः भूकम्पस्य अदृष्टकारितत्वम् अङ्गीकुर्वन्ति । अदृष्टशब्देनात्र धर्माधर्मौ विविच्येते । वृद्धेन धर्मेण शुभसूचनाय, अधर्मेण वृद्धेन अशुभसूचनाय च भूकम्पो जायते इति तेषामभिप्रायः ।

अत्र सिद्धान्ततत्त्वविवेके भूकम्पस्य कारणमाह कमलाकरभट्टः –

**पाषाणैः कठिना भूमिर्यत्र तत्र कुतो बलात् । बाष्पनिःसरणात् कम्पः शब्दोऽपि सततं भुवि ॥**

**अत एवान्यभूमौ तु विनाऽऽयासात् कुतः किल । बाष्पनिःसरणे तत्र कदाचिद्रिष्टदोऽपि सः ॥**

**भूमिकम्पः पर्वतादौ सर्वदैवेति निर्णयः[३] ॥**

अस्यार्थः - यत्र प्रदेशे भूमिः पाषाणैः प्रस्तरैः कठिना कठोराऽस्ति तत्र कुतः भूमध्यात्, बलात् प्रयासबाहुल्यवेगात्, बाष्पनिःसरणात् भूगोलान्तर्गत-विषमपदार्थसंयोगजनितोष्मानिलनिर्गमनात्, भूमेः कम्पः, तथा शब्दः च भुवि सततं भवति । अत एव अन्यभूमौ मृदुमृत्तिकात्मकप्रदेशे, आयासाद्विना, सहजेनैव कुतः भूबिम्बान्तर्गतप्रदेशात्, बाष्पनिःसरणे कदाचिद्रिष्टदोऽपि भूकम्पो भवति । पर्वतादौ कठिनतरप्रदेशे सर्वदा बहुधा भूकम्पो भवतीति निर्णयो विज्ञेयः ।

तत्र भूकम्पस्य फलमाह वृद्धगर्गः –

**प्रजा धर्मरता यत्र तत्र कम्पः शुभो भवेत् । जनानां श्रेयसे नित्यं विसृजन्ति सुरोत्तमाः ।**

**विपरीतस्थिता यत्र जनास्तत्राशुभं वदेत् । विसृजन्ति प्रजानां तु दुःखशोकाभिवृद्धये[४] ॥**

शुभसूचकभूकम्पलक्षणम् – **स्निग्धस्वनाः प्रदक्षिणानुयायिनोऽम्बुधरधाराभिषिक्ताः पर्वसु च सर्व एव प्रशस्यन्ते ।**

भूकम्पस्य शुभाशुभसूचकत्वं हरिवंशे कंसवधनिमित्तत्वेन –

**चलत्यपर्वणि मही गिरीणां शिखराणि च ।**

---

[१]अद्भुतसागरः – भूमिकम्पाद्भुतावर्तः – ०१ ।

[२]बृहत्संहिता – ३२.०१-०२ ।

[३]सिद्धान्ततत्त्वविवेकः – मध्यमाधिकारे भौगोलिकम् – २०६-२०८ ।

[४]अद्भुतसागरः – भूमिकम्पाद्भुतावर्तः ।


ISSN : 2249-538X

मार्कण्डेयपुराणे अपि –

**चचाल वसुधा चेलुः सकलाश्च महीधराः ।**

द्रोणपर्वणि द्रोणवधनिमित्तम् –

**चचाल चापि पृथिवी सशैलवनकानना ।**

गदापर्वणि दुर्योधननिमित्तम् –

**चचाल च महाकम्पं पृथिवी सवनद्रुमाः ।**

## आन्तरिक्षः उत्पातः

**इन्द्रधनुः**

**इन्द्रधनुषः उत्पत्तिः**

**सूर्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे । वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः[१] ॥**

सूर्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे आकाशे धनुःसंस्थानाः ये दृश्यन्ते तदिन्द्रधनुः । तत्र काश्यपवचनं यथा –

**अनन्तकुलजाता ये पन्नगाः कामरूपिणः । तेषां निश्वाससम्भूतं शक्रचापं प्रचक्षते[२] ।**

शुभसूचकेन्द्रधनुर्लक्षणम् –

**स्निग्धवर्णं घनश्यामं सर्वत्र दिशि दृश्यते । बहूदकं सुभिक्षं च शिवं शस्यप्रदं भवेत्[३] ॥**

**अच्छिन्नमवनिगाढं द्युतिमत् स्निग्धं घनं विविधवर्णम् । द्विरुदितमनुलोमं च प्रशस्तमम्भः प्रयच्छति च[४] ॥**

**विदिगुद्भूतं दिक्स्वामिनाशनं[५] व्यभ्रजं मरककारि । पाटलपीतकनीलैः शस्त्राग्निक्षुत्कृता दोषाः[६] ॥**

## अद्भुतानां निर्णये फलनिर्णये वा दोषविचारः

राह्वद्भुतावर्ते निमित्तैः ग्रहणविज्ञानं पराशरवृद्धगर्गवचनैः निर्दिष्टम् । तत्र ग्रहणनिमित्तानि उक्तानि – **“आदित्यस्य वेपनंपरिवेषणं दीनमन्द-रश्मिताकृष्णकल्माषभावाः”, “सोमस्योदये शृङ्गयोः खण्डच्छिन्नव्यापिद्वैधीभावाः” “शुक्लपक्षाष्टमीपञ्चदशस्योरन्तरा ग्रहणनिमित्तानीन्दुभान्वोः प्रबलीभवन्ति” “ग्रहणनिमित्तानि उल्कापात-सन्ध्यादिग्दाह-भूमिकम्प-अशनिवज्रनिर्घात-स्तनयित्नुपांशुवृष्टि-विषमवातशीतोष्णविकृतानि । वज्रकनकरजतमणीनां प्रभाभङ्गोऽभ्रलेखासन्दर्शनमर्कमण्डलोत्थितायाः कृष्णराज्याः सोमानुप्रवेशः शश्वच्च शिवाश्वगणरुतविकृतं नीचैरभ्रविसर्पणं रश्मिजालव्याकुलत्वं नभोऽम्भसामशीतत्वम् । क्षीरिणां क्षयोऽकस्मान्माल्यम्लानिः पञ्चताराग्रहोदयो रोहिणीपीडनं चन्द्रग्रहणेऽर्कविकृतिरर्कग्रहणे चन्द्रमसो बलवन्मध्यतनुनिमित्तहेतुकारणानि सर्वार्धकिञ्चिद्ग्रहणीयान्यानुपूर्व्या यतो निमित्तोत्पातस्ततो ग्रहणं यत एषाम-**

[१]अद्भुतसागरः – इन्द्रधनुरद्भुतावर्तः ।
[२]अद्भुतसागरः – इन्द्रधनुरद्भुतावर्तः ।
[३]अद्भुतसागरः – इन्द्रधनुरद्भुतावर्तः ।
[४]बृहत्संहिता – ३५.०३ ।
[५]दिक्स्वामिनः – राजा कुमारो नेता च दूतः श्रेष्ठी चरो द्विजः । गजाध्यक्षश्च पूर्वाद्याः क्षत्रियाद्याश्चतुर्दिशम् ॥ - बृहत्संहिता – ३५.०४ व्याख्यायां भट्टोत्पलः ।
[६]बृहत्संहिता – ३५.०४ ।

**पसरणं ततो मोक्षः" चेति ।**

किन्तु निमित्तैः ग्रहणं न विज्ञायते । तदुक्तं वराहेण – **"न कथञ्चिदपि निमित्तैर्ग्रहणं विज्ञायते निमित्तानि । अन्यस्मिन्नपि काले सम्भवन्ति उत्पातरूपाणि[१]"** ॥ अतः निमित्तानि ग्रहणकाले एव न सम्भवन्ति । अन्यस्मिन्नपि काले सम्भवन्ति । अतस्तानि निमित्तानि ग्रहणकारणानीति न गण्यन्ते । किन्तु तानि निमित्तानि उत्पातानि भवितुमर्हन्ति । अतः ग्रहणं निमित्तेन न ज्ञायते, किन्तु क्वचित् ग्रहणमेव उत्पातरूपेण निमित्तं भवितुमर्हति, यदि अपर्वणि सम्भवति ।

अपर्वणि ग्रहणं सम्भवति इत्युक्तम्, तत्तु उत्पातत्वेन । तत्र त्रयोदश्यादितिथिषु ग्रहणं सम्भवति इत्युक्तम् । इदं तु वेलाहीनं ग्रहणं भवितुं नार्हति । यतः आह भट्टोत्पलः **"गणितागतप्रग्रहणात् ..."** । किन्तु पर्वणि गणितागतं ग्रहणं यत् तच्च अतिवेलम्, वेलाहीनं च भवितुमर्हति इत्यत्र गर्ग-काश्यपादिवचनं प्रमाणम् । **"वेलाहीने पर्वणि गर्भविपत्तिश्च शस्त्रकोपश्च । अतिवेले कुसुमफलक्षयो भयं सस्यनाशश्च[२]"** । इदम् उत्पातत्वेन गृह्यते । एवं गणितागतात् ग्रहणकालात् पूर्वमेव यदि ग्रहणं दृश्यते तद्वेलाहीनम्, पश्चाच्चेत् अतिवेलम् । किन्तु गणितं यदि शुद्धं गणितागतग्रहणकालः अन्यथा भवितुं नार्हति । तदुक्तं वराहेण – **"स्फुटगणितविदः कालः कथञ्चिदपि नान्यथा भवति[३]"** इति । अतः एतादृशं ग्रहणं कदापि भवितुं नार्हति ।

रवेः अयनपरिवर्तनकालेऽपि क्वचिदुत्पातः उक्तः । मकरादितः उत्तरायणम्, कर्कादितः दक्षिणायनं चेति प्रसिद्धिः । तत्र व्यत्यये उत्पातः इति ज्ञातव्यम् । अर्थात् उत्पातवशात् व्यत्यस्ता गतिः अवलोक्यते इति । रवेः मकरादितः उत्तरगमनं यदि नावलोक्यते अन्यस्मात् स्थानात् अवलोक्यते, एवमेव दक्षिणायनं कर्कादेः इतरत्र दृश्यते चेत् उत्पातादेव तथा भवितुमर्हतीति काश्यपः कथयति ।

तत्र कश्यपवचनं यथा –

**सार्पार्धाद्दक्षिणं भानोः श्रविष्ठाद्यं तथोत्तरम् । कदाचिदासीदयनमुत्पातान्नैव शास्त्रतः ।**

तत्र फलमप्युक्तं तत्रभवता वराहेण -

**अप्राप्य मकरमर्को विनिवृत्तो हन्ति सापरां याम्याम् । कर्कटमसम्प्राप्तो विनिवत्तश्चोत्तरां सैन्द्रीम्[४]** ॥
**उत्तरमयनमतीत्य व्यावृत्तः क्षेमसस्यवृद्धिकरः । प्रकृतिस्थश्चाप्येवं विकृतगतिर्भयकृदुष्णांशुः ।**

मकरम् अप्राप्य रविः यदि उत्तरां गच्छति तदा पश्चिमया सह दक्षिणां दिशं हन्ति, अर्थात् तत्स्थान् हन्ति । तथैव कर्कटमप्राप्य दक्षिणां गच्छति यदि तर्हि ऐन्द्र्या सह उत्तरां हन्ति । किन्तु एवं भवितुं नार्हति । उत्तरमयनमतीत्य नाम मकरं प्राप्य व्यावृत्तः चेत् क्षेमादिफलम् । एवमेव दक्षिणायनेऽपि । अत्र रवेः ईदृशी गतिः उत्पातत्वेन गृहीता । किन्तु अयम् अयनगतिविषयः । तदुक्तं वराहेण –

**साम्प्रतमयनं सवितुः कर्कटाद्यं मृगादितश्चान्यत् । उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः[५]** ॥

स्फुटगणितेन यस्मिन् दिने अयननिवृत्तिः, तस्मिन्नेव दिने छायाग्रप्रवेशनिर्गमचिह्नाभ्यां प्रत्यक्षं मण्डले यदि अयननिवृत्तिः अवलोक्यते तर्हि इयं प्रकृतिः । तदा मकरादिः नो चेदपि तदैव अयनगतिः ज्ञेया, इदम् उत्पातसम्भूतं नेति मन्तव्यम् ।

---

[१]बृहत्संहिता – ०५.१७ ।
[२]बृहत्संहिता – ५.२४ ।
[३]बृहत्संहिता – ५.२५ ।
[४]बृहत्संहिता – ३.०४ ।
[५]बृहत्संहिता – ३.०२ ।

 ISSN : 2249-538X

उक्ताभावो विकृतिः । प्रत्यक्षविरुद्धतया यदि गतेः व्यत्ययो दृश्यते तर्हि सा गतिः विकृतिः अर्थात् उत्पातसम्भतेति मन्तव्यम् ।

अतः कश्यपवचने आश्लेषार्धाद् इत्यादिकं विकृतित्वेन यदुक्तं तद्विषयेऽप्युक्तं मिहिरेण – नूनं कदाचिदासीद् येनोक्तं पूर्वशास्त्रेषु इति । अतः प्रत्यक्षसिद्धं प्रकृतिः इति वराहोक्तिः युक्ता एव । तत्पोषयन् आह बल्ललसेनदेवः –

**इदानीं तद्विसंवादादायनं दक्षिणं रवेः । भवेत् पुनर्वसोरादौ विश्वादावुत्तरायणम् ॥**

पुनर्वसोः आदिः मिथुने भवति । वैश्वनक्षत्रम् उत्तराषाढा, तदादिः धनुषि भवति । एताभ्यामेव उक्तस्थानाभ्याम् अयनप्रवृत्तिः स्यात् ।

अप्राप्य मकरमर्कः विनिवृत्तः इति वराहेण स्वकालस्य अयनांशशून्यत्वात् तथा उक्तम् । तत्र प्रत्यक्षसिद्धम् अयनगतिस्थानं मकरादिरेव । किन्तु स्वकाले इदं परिवर्त्याह बल्लालसेनदेवः –

**अप्राप्य विश्वमर्को विनिवृत्तो हन्ति सापरां याम्याम् । आदित्यमसम्प्राप्तो विनिवृत्तश्चोत्तरां सैन्द्रीम्**[१] ॥

अनेन इदं स्पष्टं यत् प्रत्यक्षसिद्धा अयनगतिः प्रकृतिः ज्ञेया, तदन्यथा विकृतिः ज्ञेया । न तु प्रकृतिरेव विकृतित्वेन अवलोक्या इति । **ग्रहणे च दशविधग्रासाः**[२]**, दशविधमोक्षाः**[३] **च उक्ताः** ।

सव्य-अपसव्य-लेह-ग्रसन-निरोध-अवमर्दन-आरोहाः, आघ्रातम्, मध्यतमः, तमोऽन्त्यः इति दश ग्रासाः, दक्षिण-वामभेदेन द्विः द्विः हनुभेदः, कुक्षिभेदः, पायुभेदः, सञ्छर्दनम्, जरणम्, मध्यविदारणम्, अन्त्यविदारणं चेति दश मोक्षाः उक्ताः । अत्र उक्ताः ग्रासमोक्षप्रभेदाः बहुधा न सम्भवन्ति । एते तु उत्पातेनैव सम्भवन्ति इति ज्ञातव्यम् ।

## कालभेदेन उत्पातैः शुभं फलम्

तदुक्तं मिहिरेण –

**ऋतुस्वभावा ह्येते दृष्टाः स्वर्तौ शुभप्रदाः । ऋतोरन्यत्र चोत्पाताः दृष्टास्ते चातिदारुणाः**[४] ॥

तत्र शिशिरे आह –

**हिमपातानिलोत्पाता विरूपाद्भुतदर्शनम् । कृष्णाञ्जनाभमाकाशं तारोल्कापातपिञ्जरम् ॥**
**चित्रगर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिषु । पत्राङ्कुरलतानां च विकाराः शिशिरे शुभाः**[५] ॥

एवम् उत्पाताः क्वचित् लोकविनाशाय, क्वचित् शुभाय, क्वचित् प्राक्प्रबोधाय च देवनिर्मिताः जायन्ते । तेषां फलकथने नियममाह वराहः -

**अथ नृपतिसमीपे दैववित् पृष्टमात्रः फलमुदयनिमित्तैः तर्कयेच्छात्रबुध्या ।**
**सदसि सदिति वाच्यं यद्यपि स्यादनिष्टं स्फुटमपि कथनीयं मन्त्रिणे भूभुजे वा**[६] ॥

[१]अद्भुदसागरः – सुर्याद्भुतावर्ते ।
[२]बृहत्संहिता – ५.४३ ।
[३]बृहत्संहिता – ५.८१ ।
[४]बृहत्संहिता – ४५.९५ ।
[५]बृहत्संहिता – ४५.९३-९४ ।
[६]वराहस्य वचनम् ।

उत्पातानां ज्ञानस्य महत्त्वमाह मिहिरः –

**उत्पातान् गणितविवर्जितोऽपि बुद्धा विख्यातो भवति नरेन्द्रवल्लभश्च ।**
**एतत्तन्मुनिवचनं रहस्यमुक्तं यज्ज्ञात्वा भवति नरस्त्रिकालदर्शी[1] ॥**

## दैवज्ञप्रशंसा

**न तथेच्छति भूपतेः पिता जननी वा स्वजनोऽथवा सुहृत् । स्वयशोऽभिविवृद्धये यथा हितमाप्तः सबलस्य दैववित्[2] ॥**
**अप्यर्णवस्य पुरुषः प्रतरन् कदाचिदासादयेदनिलवेगवशेन पारम् ।**
**न ह्यस्य कालपुरुषाख्यमहार्नवस्य गच्छेत्कदाचिदनृषिर्मनसापि पारम्[3] ॥**

ज्यौतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकं स्वयमेव विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये इति आचार्यवचनं स्मरन् विरमामि विस्तरात् ॥

## Conclusion

उत्पाताः भगवता निर्मिताः । एतेषामवलोकने फलकथने च सूक्ष्मा मतिः स्यात् । अत्र विकल्पेष्वपि स्वयं विकल्पनं न कार्यम् । वर्तमाने अस्य विचारस्य गभीराध्ययनं भवति चेत् परम्परायाः रक्षणं स्यात्, ज्ञानस्यापि परिरक्षणं स्यात् ।

## Bibliography

1. बृहत्संहिता – आचार्यवराहमिहिरकृता, भट्टोत्पलविवृतिसहिता, डा. कृष्णचन्द्रद्विवेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी – १९९७ ।
2. अद्भुतसागरः – श्रीमद्बल्लालदेवसेनरचितः, डा. शिवाकान्तझा, चौखाम्बासुरभारतीप्रकाशन, वाराणसी – २०१८ ।
3. सिद्धान्ततत्त्वविवेकः – श्रीगङ्गाधरशर्मप्रणीतवासनासहितः, डा. कृष्णचन्द्रद्विवेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी – १९९८ ।

[1] बृहत्संहिता – ४५.९८ ।
[2] बृहत्संहिता – २.२२ ।
[3] बृहत्संहिता – २.०४ ।


ISSN : 2249-538X

# श्रौतस्मार्तकर्मप्रयोगे अनुषङ्गाधिकरणन्यायसञ्चारः

श्री आदर्श विनायक भट्टः*
सहायकाचार्यः(सं), के.सं.वि., रा. गा. परिसरः
श्रृङ्गेरी

***लेखसारः*** *– पूर्वमीमांसाशास्त्रस्य परमं प्रयोजनमेव धर्मानुष्ठानोपयागी चिन्तनम् । शास्त्रे तावत् प्रत्येकस्मिन्नप्यधिकरणे एकैको विषयः, संशयपूर्वपक्षादिरूपेण विचिन्त्य सिद्धान्तपक्षस्थापनेन निर्णीतो भवति । तथा निरूप्यमाणे उपयुज्यमानविधानेन, निरूपितेन सिद्धान्तवाक्यार्थज्ञानेन वा काचन युक्तिः निष्पद्यते । सैव न्यायपदेन अभिधीयते । तादृशन्यायानां संग्रहेण शास्त्रोक्तातिरिक्तस्थले, धर्मानुष्ठानपद्धतौ च विप्रतिपत्तिनिवारणं सम्भवति । अतः अस्मिन् प्रबन्धे मीमांसाशास्त्रे द्वितीयाध्यायस्य प्रथमपादस्य सप्तदशाधिकरणे (अनुषङ्गाधिकरणम्) न्यायस्य निष्पत्तिः, तस्य शास्त्रोक्तभिन्ने चण्डिकाहोमाख्ये स्मार्तप्रयोगे सञ्चारः, स्पष्टप्रतिपत्त्यर्थं च शास्त्रोक्तातिरिक्ते श्येनचयनाङ्गत्वेन चरमायामिष्टकायाम् विहिते श्रौतकर्मानुष्ठाने सञ्चारश्च निगद्यते ।*

***कूटशब्दाः*** *– जैमिनिसूत्रार्थः, अनुषङ्गः, श्येनचयनम्, चण्डिकाहोमः, उपसद्धोमः, रुद्रहोमः, मीमांसान्यायः, न्यायसञ्चारः, मन्त्रप्रयोगः, श्रौतकर्म, स्मार्तकर्म ।*

## अनुषङ्गाधिकरणन्यायः

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे । यन्नत्वा कृतकृत्यास्स्युः तन्नमामि गजाननम् ॥

वेदवाक्यानां तात्पर्यनिर्णयार्थं प्रवृत्तमिदं पूर्वमीमांसा शास्त्रम् । मीमांसाशास्त्रेणानेन युक्तिपुरस्सरम् अनुष्ठानोपयोगिविमर्शः क्रियते । तस्मादेव बहुविधन्यायसमुदायदर्शनात् “न्यायसाहस्री” इत्यपरं नामापि दृश्यते । तादृशन्यायानां ज्ञानं मीमांसाशास्त्राध्येतृणां, याज्ञिकानां, धर्मजिज्ञासूनां च महदुपकारकं भवति । तस्मात् पूर्वमीमांसाशास्त्रे प्रपञ्चितानां न्यायानां श्रौतकर्मप्रयोगेषु स्मार्तकर्मप्रयोगेषु च कथं समन्वयः ? इति बोधसिद्ध्यर्थं कश्चनप्रयासो विधेयः ।

भगवता जैमनिमहर्षिणा प्रणीतायां द्वादशलक्षण्यां द्वितीयाध्यायस्य प्रथमपादस्य सप्तदशाधिकरणम् - अनुषङ्गाधिकरणम् । तत्र चतुश्चत्वारिंशत्तमं सूत्रम् ‘अनुषङ्गो वाक्य[१]समाप्तिः सर्वेषु तुल्ययोगित्वात्’[२] इति । अनुषङ्गः, वाक्यसमाप्तिः, सर्वेषु, तुल्ययोगित्वात् इति चतुष्पदात्मकं सूत्रम् । अनुषज्यते इत्यनुषङ्गः । वाक्यसमाप्तिः नाम उत्तरयोः वाक्ययोरपि वाक्यशेषस्य समर्पकः इत्यर्थः । वाक्यस्य समापनं तेन क्रियत इति तात्पर्यम् । सर्वेषु इत्युक्ते तत्तत्प्रकरणे उक्तेषु मन्त्रेषु यत्र शेशाकांक्षा वर्तते तत्र इत्यर्थः । तुल्ययोगित्वात् इत्युक्ते सन्निधानरूपसम्बन्धस्य समानत्वादिति ।

उत्तरयोः वाक्ययोरपि वाक्यशेषाकांक्षायां सन्निधिरूपसम्बन्धसाम्यात् तद्वाक्यसमर्पक एव अनुषङ्गः इति सूत्रस्य तात्पर्यार्थः ।

अधिकरणस्यास्य विषयवाक्यं -‘या ते अग्नेऽयाशया रजाशया हराशया तनूर्वर्षिष्ठागह्वरेष्ठोऽग्रं वचो अपावधीन्त्वेषं वचो अपावधी ँ स्वहा’[३] इति । अत्र अयाशया, रजाशया, हराशया चेति मन्त्रत्रयमाम्नायते । तच्छेषस्तु सकृदेवाम्नायते । प्रयोगसन्दर्भश्च- ज्योतिष्टोमाङ्गभूतम् उपसद्धोमप्रकरणम् । तत्र श्रुता एते मन्त्राः । अत्र च विशयः - ज्योतिष्टोमाङ्गभूते

***सम्पर्कसूत्रम्** - 97408953338, Email- bhatadarsh355@gmail.com

[१] परिसमाप्तिः (पाठभेदोऽपि वर्तते )

[२] जैमिनिसूत्रम् २.अध्याये १पादे .४४ तमं सूत्रम्

[३] तैत्तिरीयसंहिता- १काण्डे २प्रश्ने ८अनुवाकम्

उपसद्धोमे शेषत्वेन आम्नाताः मन्त्रा इति ज्ञानानन्तरम्, एकत्रैव शेषस्समाम्नात इतरयोः मन्त्रयोस्त्वनाम्नात इति मन्त्रद्वयस्य शेषस्य साकांक्षावत्वात् अपरिपूर्णवाक्यस्य परिपूरणार्थं शेषाध्याहारे कर्तव्ये लौकिकश्शेषोऽध्याहर्तव्यो वा वैदिक एव तत्रैवाम्नातः इति ।

तत्रायं पूर्वपक्षः ;- गत्यन्तराभावे यद्यपि आम्नातस्य वाक्यशेषस्यैव अन्यत्र अन्वयः उच्यते, तथापि एकत्रैव निबद्धस्य वाक्यस्य अन्यत्र नियोजनमनुचितं भवतीत्यतः, यस्मिन्वाक्ये आकांक्षा वर्तते तस्मिन् वाक्ये लौकिक एव वाक्यशेषः अध्याहर्तव्यः । तदा श्रुतस्यापि अन्वयस्य नैव हानिः, या ते अग्ने रजाशया, हराशया इति अश्रुतशेषमन्त्रान्तरयोरपि लौकिकवाक्याध्याहारेण आकांक्षापूर्तिः इति प्रयोजनद्वयसिद्धिः । अतः लौकिकवाक्याध्याहारेणैव वाक्यसमाप्तिः न तु तत्रत्यवाक्यस्यैव पुनरावृत्तिः इति पूर्वपक्षः ।

सिद्धान्तः - यदि लौकिकवाक्यस्यैव अध्याहारः तर्हि वाक्यान्तरस्य कल्पनं कर्तव्यम् । तदपेक्षया श्रुतस्यैव वाक्यस्य अध्याहारे एव लाघवमस्ति । तस्यैव क्लृप्तत्वात् । क्लृप्तकल्प्ययोर्मध्ये क्लृप्तस्यैव प्राबल्यमिति नियमस्वीकारात् च ।

तर्हि एकत्रैव निबद्धस्य शेषस्य अन्यत्रापि कथं नेतुं शक्यते इति चेत्, यद्यपि शेषस्याम्नानं सकृदेव, तथापि सर्वार्थत्वेनैव आम्नानमिति आकांक्षासन्निधिलिङ्गादिप्रमाणवशेन अवगन्तुं शक्यते । तस्मात् एकमन्त्रसन्निधौ श्रूयमाणस्यापि शेषभूतस्य वाक्यस्य तत्रैव श्रूयमाणयोः मन्त्रान्तरयोः शेषापेक्षायाम् अध्याहारे क्रियमाणे अथवा अनुषज्यमाने न कोऽपि दोषः प्रसज्यते इति सिद्धान्तः ।

अतः यत्र यत्र अनेकेषां मन्त्राणां समूहे एकस्यैव मन्त्रस्य शेषस्समाम्नायते इतरेषां तु शेषापेक्षा वर्तते तत्र सर्वत्र श्रुतस्यैव शेषवाक्यस्यस्य अनुषङ्गः कर्तव्यः न तु लौकिकवाक्याध्याहारः इत्येवं रूपेण विशिष्टस्य न्यायस्य निष्पत्तिः भवति ।

एवं मीमांसाशास्त्रोक्तन्यायस्य निष्पादनानन्तरं तस्य प्रयोजनार्थं न्यायस्य स्पष्टप्रतिपत्त्यर्थं च तत्सञ्चारः क्रियते । यद्यपि श्रौतप्रयोगविषये न्यायनिष्पत्तिसन्दर्भे एव या ते अग्नेऽयाशया रजाशया हराशया इत्यस्मिन्मन्त्रे तनूर्वर्शिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीम् स्वाहा इति शेषवाक्यस्य अनुषङ्गः मीमांसाग्रन्थेषु अनेकत्र उपलभ्यते । अतः तद्भिन्ने अन्यत्र अनुपलभ्यमाने क्वचित्सन्दिग्धे उदाहरणान्तरे अनुषङ्गाधिकरणन्यायस्य सञ्चारः प्रयोगनिर्णयार्थं क्रियते । एवमेव स्मार्तकर्मप्रयोगेष्वपि मीमांसान्यायानां प्रभावः अन्यत्र ग्रन्थेषु बाहुल्येन नैव दृश्यत इति तदपि अत्र विषदीक्रियते ।

## श्रौतकर्मप्रयोगनिर्णये अनुषङ्गाधिकरणन्यायसञ्चारविमर्शः -

काम्यकर्मणि रुद्रदेवताकतिलद्रव्यकहोमः प्रसिद्ध एव । अयञ्च होमः साक्षात् श्रुत्यैव विहित इति श्रौतप्रयोगनिर्णयोदाहरणत्वेन अत्र स्वीकृतः । तत्र - श्येनचयनाङ्गत्वेन चरमायामिष्टकायाम् होमो विधीयते । 'एषा वै शतरुद्रीयञ्जुहोति'[१], 'एष ते रुद्रभागस्तञ्जुषस्व'[२] इति वाक्यविहितरुद्रहोमे रुद्रदेवतोद्देशेन द्रव्यप्रक्षेपार्थं मन्त्रविभागः बहुधाकृतः । तत्र एकोनसप्तत्युत्तरशतधाविभाग पक्षे (१६९) सप्तपञ्चाशदुत्तरशततममन्त्रात् (१५७) केचन मन्त्राः श्रूयन्ते । ते च -

"सहस्राणि सहस्रशो ये रुद्रा अधिभूम्याम् ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥

[१]तैत्तिरीय ब्राह्मणम् १-५-११

[२]तैत्तिरीय.संहिता १काण्डे ८ प्रश्ने ७ अनुवाकः


ISSN : 2249-538X

अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि ।
नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः"[1] ॥ इति ।

अत्र शेषवाक्यं तावत् 'तेषां सहस्रयोजनेऽवधन्वानि तन्मसि' इति वाक्यम् । तत्तु प्रथममन्त्रसन्निधौ श्रूयते । तदनन्तरं "अस्मिन्महत्यर्णवे" इत्यादयो मन्त्राः शेषरहिताः शेषापेक्षिणश्च श्रूयन्ते । तन्मन्त्राणां तु शेषापेक्षा निवृत्त्यर्थं शेषवाक्याध्याहारस्य अपेक्षा वर्तते । तस्मात् अत्रापि लौकिकशेषवाक्याध्याहारेण तदाकांक्षापूर्तिः कर्तव्या उत वैदिकेन तत्रैव प्रथममन्त्रसन्निधौ श्रूयमाणेन वाक्याध्याहारेण इति संशये पूर्वोक्तानुषङ्गन्यायेन सर्वार्थत्वेन विहितत्वात् तत्रैव प्रथममन्त्रसन्निधौ श्रूयमाणेन "तेषाꣳ सहस्रयोजने" इति शेषवाक्येनैव तदाकांक्षापूर्तिः कार्या । तथा च तस्यैव वाक्यस्य अनुषङ्गो भवति । तदा होमे मन्त्रस्वरूपम् एवं भवति,

"सहस्राणि सहस्रशो ये रुद्रा अधिभूम्याम् ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥
अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥

इत्येवं रूपेण प्रतिमन्त्रं शेषावृत्तिर्भवति । तथा च सर्वेऽपि मन्त्राः सशेषाः नैराकांक्ष्याः प्रयोगसमवेतार्थस्मारकत्वेन प्रयोजनवन्तश्च भविष्यन्ति । तस्मात् एवमेव अनुषङ्गं कृत्वैव मन्त्राः प्रयोक्तव्याः इति अनेन सञ्चारात्मकाध्ययनेन श्रौतप्रयोगनिर्णये मीमांसान्यायप्रमाणदर्शनेन दृढीक्रियते ।

## स्मार्तकर्मप्रयोगनिर्णये अनुषङ्गाधिकरणन्यायसञ्चारविमर्शः -

अत्र यद्यपि मार्कण्डेयपुराणे विहितोऽयं होमः तथापि स्मृत्यधिकरणोक्तरीत्या पुराणस्यापि स्मृतावेव अन्तर्भावात् स्मार्तत्वेनैव ग्रहणात् उदाह्रियते ।

"प्रतिश्लोकं च जुहुयात् पायसं तिलसर्पिषा ॥
जुहुयात्स्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः ।
नमो नमः पदैर्देवीं पूजयेत् सुसमाहितः ॥ "[2]

इत्यादिवाक्येन सप्तशतसंख्याकदेवीमाहात्म्यमन्त्रैः पायसद्रव्यकहोमो विहितः । तत्र श्रीमार्कण्डेयपुराणोक्तचण्डिकाहोमे कर्मणि अनुषङ्गाधिकरणन्यायः सञ्चार्यते । तत्र पञ्चमाध्याये स्तोत्रमन्त्राः एवं श्रूयन्ते,

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ [3]इति ॥

[1]तैत्तिरीय.संहिता ४ काण्डे ५प्रश्ने ११ अनुवाकः
[2]श्रीमार्कण्डेय पुराणे , सूर्यसावर्णिके मन्वन्तरे रहस्ये २ अध्याये-३५तमः श्लोकः
[3]मार्कण्डेय पुराणम् ५अध्याये-१४श्लोकः

अत्र तु नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः इति मन्त्रत्रयं श्रूयते । शेषस्तु या देवी सर्वभूतेषु इति वाक्यम् । अत्रापि पूर्ववत् मन्त्रत्रयं वर्तते शेषस्तु एक एव इति स्थितिः । एवञ्च उत्तरयोः मन्त्रयोः शेषाकाङ्क्षा स्पष्टमवगम्यते । तद्यथा आकांक्षासन्निधिलिङ्गप्रमाणाभ्याम् अवगम्यते, तथैव अर्थापत्तिप्रमाणेनाप्यवगम्यते । सप्तशतमन्त्रसंख्याकहोमे सप्तशतत्वं मन्त्रत्रयाङ्गीकारे एव सम्पद्यते । तस्मादेव त्रयो मन्त्राः वर्तन्ते इत्यपि ज्ञायते । तत्र शेषस्तु सकृदेवाम्नात इति इतरयोः मन्त्रयोः शेषापेक्षायाम् वाक्याध्याहारेणैव आकांक्षापूर्तिः कर्तव्या । तदा अनुषङ्गाधिकरणन्यायेनैव आकांक्षाशान्तिः । अस्य अयमर्थः, शेषीभूतस्य सर्वार्थत्वेन विहितस्य "या देवी सर्वभूतेषु" इत्यस्यैव अनुषङ्गः कर्तव्यः इति । तदा होमे मन्त्रस्वरूपम् एवं भवति,

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमो नमस्स्वाहा ॥ इति ।

अत्र तावत् नमस्तस्यै इति मन्त्रत्रयसद्भावात् त्रिरावृत्तिरपि एवमेव कार्या । तथा च अत्र एको विशेषोऽपि प्रतिपाद्यते, पूर्वं न्यायनिष्पत्तिप्रतिपादनावसरे उदाहृते "रजाशया, हराशया" इत्यत्र यथा 'या ते अग्ने' इत्यंशस्यापि अश्रुतत्वात् तस्यापि अनुषङ्गः कर्तव्यो भवति तथैव अत्रापि "नमस्तस्यै नमस्तस्यै" इत्येव श्रवणात् "नमो नमः" इत्यंशस्यापि अनुषङ्गः कर्तव्यः । इदं च अनुषङ्गाधिकरणन्यायसञ्चारे उदाहरणम् स्पष्टप्रतिपत्तये संगृहीतम् ।

## न्यायसञ्चारस्य प्रयोजनम् (Endnotes) -

अत्र अनुषङ्गाधिकरणन्यायज्ञानाभावे तु, केवलं नमस्तस्यै स्वाहा इति वा, सकृदेवाहुतिः, शेषं विहाय मन्त्रमात्रस्य प्रयोगः इत्यादि वैषम्यप्रयोगापत्तिः स्यात् । वाक्यशेषापेक्षायां लौकिकवाक्याध्याहारस्स्यात् । एतन्मीमांसान्यायज्ञाने तु, श्रूयमाणस्य मन्त्रस्य शेषाकांक्षा वर्तते इति ज्ञात्वा तत्रैव श्रुतस्य शेषवाक्यस्यैव अध्याहारेण शेषवन्मन्त्रप्रयोगः एव आश्रीयते, सर्वदा सुष्ठुप्रयोग एव क्रियते । सुष्ठुप्रयोगमात्रेणैव स्मृत्युक्तफलावाप्तिरिति न्यायज्ञानस्य तत्सञ्चारस्य च प्रयोजनं स्पष्टम् । अतः साधुप्रयोगसिद्ध्यर्थं मीमांसान्यायज्ञानं, तत्सञ्चारविमर्शश्च आवश्यकः । एवमेव अनेकत्र अनेनैव न्यायेन प्रयोगनिर्णयो द्रष्टव्यः ।

## अनुशीलितग्रन्थाः (Bibliography)


- अध्वरमीमांसाकुतूहलवृत्तिः
- भाट्टदीपिका
- श्रीदुर्गासप्तशती
- बोधायनीयब्रह्मकर्मसमुच्चयः
- कृष्णयजुर्वेदीयतैत्तिरीयसंहिता
- कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणम्



ISSN : 2249-538X

# नान्तेभ्यः स्त्रियां प्रत्ययाः
# (सङ्गणकविधिभाषोपयोगी)

डा. शिवकुमारी काटूरि*
सहायकाचार्यः(सं.), के.सं.वि., रा.गा.परिसरः
शृङ्गेरी

***लेखसारः*** *– स्त्रियाम् इत्यर्थाधिकारे प्रातिपदिकेभ्यः टाप्, टाप्, डाप्, ङीप्, ङीष्, ङीन्, ति, ऊङ्, ष्फ इति प्रत्ययाः विहिताः । तत्र नकारान्तेभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप् इति उत्सर्गप्रत्ययः, तस्य निषेधः मनः, अनो बहुव्रीहेः इति सूत्राभ्यां कृतः । डाबुभाभ्यामन्यतरस्याम् इति विकल्पेन डाप्, ङीप्-निषेधश्च उक्तः । अन उपधालोपिनोन्यतरस्याम् इति विकल्पेन ङीप् उक्तः । एतानि सर्वाणि सूत्राणि सङ्कलय्य नकारान्तेभ्यः प्रत्ययविधानाय पाणिनिना आश्रितान् विभागान् प्रदर्श्य कीदृशात् नान्तात् कः प्रत्ययः इति विचारः अत्र प्रस्तुतः । एतं विभागमाश्रित्य सङ्गणकविधिभाषा (Computer Programming) लेखितुं शक्या ।*

***कूटशब्दाः*** *– नान्ताः, अन्नन्ताः, वन्नन्ताः, मन्नन्ताः, अन्नन्तोपधालोपिबहुव्रीहिः, शेषः, षड्संज्ञकः, ङीप्, डाप्, ङीप्-निषेधः, अन्यतरस्याम्, बहुव्रीहिः ।*

**उपक्रमः** – स्त्रियाम् इत्यर्थाधिकारे प्रातिपदिकेभ्यः टाप्, टाप्, डाप्, ङीप्, ङीष्, ङीन्, ति, ऊङ्, ष्फ इति प्रत्ययाः विहिताः । तत्र नान्तेभ्यः ङीप्, डाप् ङीप्-निषेधश्च दृश्यते, एवं सति शर्मन् इति प्रातिपदिकात् स्त्रियां ङीपि शर्मणी इति ईकारान्तः उत डापि शर्मा इति आकारान्तः उत ङीप्-निषेधे शर्मन् इति नकारान्त एव, अमीषु त्रिषु कतमस्साधुः अथवा कतमौ साधू इति शङ्का समुदेति । बहुधीवन्, बहुपर्वन् आभ्यां स्त्रियां प्रत्ययः समान एव उत भिन्नः, भिन्नश्चेत् तत्र हेतुः कः इति ईदृशाः विचार्याः ।

नान्तेभ्यः स्त्रियाम् उत्सर्गतया विहितः प्रत्ययः ङीप् ।[1] दण्डिन् – दण्डिनी । तत्र सर्वेभ्यः नान्तेभ्यः ङीप् न भवति । पाणिनिः वन्-मन्-अन्नन्तादीन् आश्रित्य नान्तेभ्यः प्रत्ययान् विदधाति । तेष्वपि पुनः उपविभागाः अन्नन्तबहुव्रीहिः, वन्नन्तबहुव्रीहिः इत्यादि । सः विभागः अधः तालिकायां विस्तरेण प्रदर्श्यते ।

**नान्तानां विभागः –**




---

***सम्पर्कसूत्रम्** – 8688988515, Email – shivakumari.katuri@gmail.com

[1] ऋन्नेभ्यो ङीप्

नान्तानां विभागः मूलतया इत्थं शक्यते कर्तुम् - अन्नन्ताः, नान्तः षट्संज्ञकः, एतेभ्यः अवशिष्टः इति । अन्नन्तानां पुनः वन्नन्तः, मन्नन्तः, अन्नन्तोपधालोपबहुव्रीहिः, एतेभ्यः अवशिष्टः इति ।
वन्नन्तस्य अन्तर्विभागाः – 1. हशन्तात् धातोः विहितः वन्, 2. उपधालोपी वन्नन्तबहुव्रीहिः, 3. शेषः इति ।

**वन्नन्तः** – वनो र च, वनो न हश इति वक्तव्यम्, बहुव्रीहौ वा इत्येतैः वन्नन्तात् प्रत्ययविधाननिषेधाभ्यां वन्नन्तः इति पृथक् प्रदर्शितः, वन्नन्तस्यापि अन्नन्तत्वात् अन्नन्तात् उक्तानि कार्याणि अत्रापि भवन्ति, अत एव अयं अन्नन्तेषु कश्चन भेदः इति दर्शितः ।

- हशन्तात् धातोः विहितः यः तदन्तात् तदन्तान्तात् च स्त्रियां ङीप् रेफादेशश्च न ।[१] वन्नन्तम् :– अवावन् – अवावा । वन्नन्तान्तम् :– राजयुध्वन् – राजयुध्वा ।
- अनुपधालोपिवन्नन्तबहुव्रीहिः – **न संयोगाद्वमन्तात्** इति अनः अल्लोपनिषेधात् बहुपर्वन् इत्यादयः वन्नन्ताः अनुपधालोपिनः । वन्नन्तानुपधालोपिबहुव्रीहेः डाप् विकल्पेन भवति[२] । बहुपर्वन् – बहुपर्वा, बहुपर्वे, बहुपर्वाः । ङीप् न भवति ।[३] बहुपर्वन् – बहुपर्वा, बहुपर्वानौ, बहुपर्वानः ।
- उपधालोपिवन्नन्तबहुव्रीहिः – बहुव्रीहिसमासे वन्नन्तात् स्त्रियां ङीप्-रेफौ विकल्पेन भवतः ।[४] अयं च उपधालोपी एव स्यात् । वस्तुतः **बहुव्रीहौ वा** इति वार्तिकं प्रत्याख्यातं भाष्ये, **डाबुभ्यामन्यतरस्याम्** इति सूत्रे अन्यतरस्यां ग्रहणेन इष्टसिद्धेः । बहुधीवन् – बहुधीवरी । उपधालोपिनः एव इदम् ।
- शेषः – पूर्वोक्तेभ्यः अवशिष्टः वन्नन्तः, वन्नन्तान्तोपि अत्र ग्रहीतव्यः । वन्नन्तात् वन्नन्तान्ताच्च स्त्रियां ङीप् नस्य रेफोपि भवति ।[५] वन् इत्यनेन क्वनिप्, वनिप्, ङ्वनिप् प्रत्ययाः गृह्यन्ते । सुत्वन् इति वन्नन्तात् ङीप् नस्य रेफः – सुत्वरी । अतिसुत्वन् इति वन्नन्तात् ङीप् नस्य रेफः – अतिसुत्वरी ।

**मन्नन्तः – मनः, डाबुभ्यामन्यतरस्याम्** इति सूत्राभ्यां प्रत्ययनिषेधविधानाभ्यां मन्नन्त इत विभागः, मन्नन्तस्यापि अन्नन्तत्वात् अन्नन्तात् उक्तानि कार्याणि अत्रापि भवन्ति, तस्मात् अन्नन्तेषु भेदत्वेन दर्शितः ।

- अनुपधालोपिमन्नन्तबहुव्रीहिः – **न संयोगाद्वमन्तात्** इति अनः अल्लोपनिषेधात् सुचर्मन् इत्यादयः अनुपधालोपिनः मन्नन्ताः । अनुपधालोपिमन्नन्तबहुव्रीहेः स्त्रियां डाप् विकल्पेन भवति[६], ङीप्-निषेधश्च[७] ।
- उपधालोपिमन्नन्तबहुव्रीहिः – बहुव्रीहौ उपधालोपिनः अन्नन्तात् विकल्पेन ङीप् विधीयते[८], मन्नन्तस्यापि

[१] वनो न हश इति वक्तव्यम्
[२] डाबुभाभ्यामन्यतरस्याम्
[३] अनो बहुव्रीहेः
[४] बहुव्रीहौ वा
[५] वनो र च
[६] डाबुभाभ्यामन्यतरस्याम्
[७] अनो बहुव्रीहेः
[८] अन उपधालोपिनोन्यतरस्याम्


ISSN : 2249-538X

अन्नन्तत्वात् उपधालोपिनः मन्नन्तात् बहुव्रीहेः स्त्रियां विकल्पेन ङीप्। ङीपः अभावे विकल्पेन डाप्[१], ङीप्-निषेधश्च[२]। सुसीमन् – सुसीम्नी, सुसीमा (डाप्), सुसीमा (नान्तः)।

- संख्यादिर्दामन्नन्तः बहुव्रीहिः – सङ्ख्यादेः बहुव्रीहेः दामान्तात् स्त्रियां ङीप् विधीयते[३]। द्विदामन् – द्विदाम्नी। **अन उपधालोपिनोन्यतरस्याम्**इति विकल्पेन ङीपि प्राप्ते, **डाबुभ्यामन्यतरस्याम्** इति विकल्पेन डापि प्राप्ते, **मनः** इति ङीपः निषेधे च प्राप्ते अत्र नित्यं ङीप् विधीयते।
- शेषः – समासेषु बहुव्रीहिभिन्नः मन्नन्तः, केवलः मन्नन्तश्च शेषे अन्तर्भवति, तादृशात् स्त्रियाम् ऋन्नेभ्यो ङीप् इति सूत्रेण प्राप्तः ङीप् निषिध्यते **मनः**[४] इति सूत्रेण, ततः डाप् विकल्पेन विधीयते **डाबुभ्यामन्यतरस्याम्**[५] इति सूत्रेण। एवञ्च मन्नन्तात् स्त्रियां विकल्पेन डापि सीमा इति आबन्तः, ङीपः निषेधात् नान्तश्च। अतिमहिमन् – अतिमहिमा (डाप्), अतिमहिमा (नान्तः)।

**अन्नन्तोपधालोपिबहुव्रीहिः** – मन्नन्तवन्नन्तातिरिक्ताः ये अन्नन्ताः उपधालोपिनः ते अस्मिन् विरिक्ताः ये अन्नन्ताः उपधालोपिनः ते अत्र अन्तर्भवन्ति। उपधालोपिनः अन्नन्तात् बहुव्रीहेः स्त्रियां ङीप् विकल्पेन भवति।[६] बहुराजन् – बहुराज्ञी। ङीपः विकल्पेन विधानात् तदभावे **डाबुभाभ्यामन्यतरस्याम्** इति विकल्पेन डाप् – बहुराजा। डाबभावे **अनो बहुव्रीहेः** इति ङीपः निषेधः – बहुराजा (नान्तः)।

**शेषः** – अन्नन्तेषु वन्नन्तान्, मन्नन्तान्, अन्नन्तोपधालोपिबहुव्रीहेः अवशिष्टाः ये सन्ति तेभ्यः स्त्रियां ङीप् नित्यं भवति **ऋन्नेभ्यो ङीप्** इति सूत्रेण। अतिराजन् – अतिराज्ञी।

**नान्तः षट्संज्ञकः** – षान्तसंङ्ख्यावाचकस्य नान्तसङ्ख्यावाचकस्य च षट् इति संज्ञा भवति।[७] नान्तेभ्यः ऋन्नेभ्यो ङीप् इति सूत्रेण ङीप् विहितः, षट्संज्ञकेभ्यः स्त्रियां यत् प्राप्तं तन्निषिध्यते।[८] यथा – पञ्चन्, सप्तन्।

**शेषः** – नान्तेषु अन्नन्तान्, षट्संज्ञकान् च विहाय अवशिष्टाः ये सन्ति ते अत्र शेषाः। तेभ्यः स्त्रियाम् उत्सर्गः ङीप्रत्ययः भवति **ऋन्नेभ्यो ङीप्** इति सूत्रेण विहितः।

## उपसंहारः –

- **नान्तः**
    - o **अन्नन्तः**
        1. ***वन्नन्तः***
            a. **हशन्ताद्धातोः विहितः वन्** – वनो न हश इति वक्तव्यम् इति **ङीप्-रेफयोः निषेधः**।

---

[१]डाबुभ्यामन्यतरस्याम्
[२]अनो बहुव्रीहेः
[३]दामहायनान्ताच्च
[४]पा.सू.सं 4-1-11
[५]पा.सू.सं 4-1-13
[६]अन उपधालोपिनोन्यतरस्याम्
[७]ष्णान्ता षट्
[८]न षट्स्वस्रादिभ्यः

b. **अनुपधालोपिवन्नन्तबहुव्रीहिः** – डाबुभ्यामन्यतरस्याम् इति **विकल्पेन डाप्,** अनो बहुव्रीहेः इति **ङीप्-निषेधश्च** ।

c. **उपधालोपिवन्नन्तबहुव्रीहिः** – बहुव्रीहौ वा इति वार्तिकेन वा डाबुभ्यामन्यतरस्यामिति सूत्रे अन्यतरस्यां ग्रहणेन वा **ङीप्-रेफौ वा** भवतः ।

d. शेषः – अवशिष्टेभ्यः वनो र च इति **ङीप्-रेफौ** भवतः ।

2. ***मन्नन्तः***

a. **अनुपधालोपिमन्नन्तबहुव्रीहिः** – डाबुभ्यामन्यतरस्याम् इति **विकल्पेन डाप्,** अनो बहुव्रीहेः इति **ङीप्-निषेधः** ।

b. **उपधालोपिमन्नन्तबहुव्रीहिः** – अन उपधालोपिनोन्यतरस्याम् इति **वा ङीप्,** डाबुभाभ्यामन्य-तरस्याम् इति **वा डाप्, ङीप्-निषेधश्च**।

c. **संख्यादिर्दामन्नन्तः बहुव्रीहिः** – दामहायनान्ताच्च इति स्त्रियां **ङीप्** भवति ।

d. **शेषः** – अवशिष्टेभ्यः डाबुभ्यामन्यतरस्याम् इति **वा डाप्,** मनः इति **ङीप्-निषेधश्च** ।

3. ***अन्नन्तोपधालोपिबहुव्रीहिः*** – अन उपधालोपिनोन्यतरस्याम् इति **वा ङीप्,** डाबुभ्यामन्यतरस्याम् इति **वा डाप्,** अनो बहुव्रीहेः इति **ङीप्निषेधश्च**।

4. ***शेषः*** – अवशिष्टेभ्यः ऋन्नेभ्यो ङीप् इति **ङीप्**।

- **नान्तः षड्संज्ञकः** – न षट्स्वस्रादिभ्यः इति स्त्रियां प्राप्तस्य प्रत्ययस्य निषेधः ।
- **शेषः** – ऋन्नेभ्यो ङीप् इति **ङीप्**।

## उपयुक्तानि श्रोतांसि –

1. https://ashtadhyayi.com/


ISSN : 2249-538X

# भारतीय-योग-परम्परायाः सन्दर्भे राजयोगेन सह हठयोगस्य सम्बन्धस्यानुशीलनम्

डॉ. रविकुमारः शास्त्री*
सहायकाचार्यः(सं), के.सं.वि., रा. गा. परिसरः
शृङ्गेरी

***लेखसारः*** *– योगविषये उच्यते यत्* ***भवतापतप्तानां योगो हि परमौषधम्***[१] *। अर्थात् संसारस्य मृगमरीचिकायां व्याकुलितान्तःकरणवतां जनानां कृते योग एव परमौ स्य कार्यं करोति । किं नु लक्षणं योगस्य तद्विषये महर्षिपतञ्जलिः वदति यत्* ***योगश्चित्तवृत्तिनिरोधः***[२] *। अधुना किं नु नाम चित्तवृत्तिनिरोधः तद्विषये उच्यते यत् यदा चित्तः बाह्याभ्यन्तरविषयाणां परित्यागपूर्वकं स्वकीये स्वरूपे अवस्थानं करोति तदा सः व्यापारः चित्तवृत्तिनिरोध उच्यते । चित्तवृत्ति निरोध एव योगरूपेणाभिहितः महर्षिपतञ्जलिना । चित्तस्य एकाग्रतया अन्तःकरण-शरीरेभ्यो पृथक्-आत्मनः साक्षात्कारकरण एव योगत्वेन परिभाषितं विद्वद्भिः । सा एव योगविद्येति कथ्यते या पुरुषस्य अन्तःकरणमेतावत् योग्यतां प्रददाति यस्मात् स उच्चस्फुरणानां कृते अनुकूलो भूत्वा संसारेऽस्मिन् अस्माकं चतुर्दिक्षु सञ्जायमानानाम् असीम-सञ्ज्ञान- कार्याणाम् अनन्यसहायतया ज्ञातुं, ग्रहीतुं, समाङ्गीकर्तुं च शक्नुयात्*[३] *। अनेनेदं ज्ञायते यत् चित्तवृत्ति-निरोधपूर्वकतया आत्मनः साक्षात्कारकरण एव योगः ; यस्मात् जन उच्चस्फुरणग्रहणवान् भूत्वा चतुर्दिक्षु सञ्जायमानानाम् असीमसञ्ज्ञानकार्याणां ज्ञानं लब्धुं, ग्रहीतुं तथा तान् स्वात्मनि समाङ्गीकर्तुं शक्नोति ।*

***कूटशब्दाः*** *– योगः, मन्त्रयोगः, लययोग, हठयोग, राजयोग, पुराण, तन्त्र, मन्त्रः, प्रकृति-पुरुष, समाधिः, पञ्चकोषः, प्राणशक्ति, कुण्डलिनीशक्ति, सप्तचक्र, नादयोग, मूलाधारः, सहस्रारः, मुक्तिः ।*

## योगशब्दस्य निष्पत्तिः

संस्कृत व्याकरणस्य 'युज्'धातोः 'घञ्'प्रत्यययोगेन 'योग'शब्दः निष्पन्नो भवति । पाणिनीयधातुपाठे समाधि संयोग-संयमन-अर्थबोधकाः त्रिप्रकारकाः 'युज्'धातवः सन्तीति । कर्मज्ञानाभिधाभ्यां द्विधा विभक्ता योगपरम्परा अनेकनामभिः जगति प्रचलिता विद्यते । परन्तु तेषु योगेषु मन्त्रयोग-लययोग- हठयोग-राजयोग- इत्येतेषां योगचतुष्टयानां[४] योगसाधनाक्षेत्रे विशेषमहत्त्वं विद्यते । अतः तेषां प्रकारचतुष्टयानां वर्णनमत्र प्रदीयते ।

## योगचतुष्टयम्

**मन्त्रयोगः** - योगचतुष्टयेषु मन्त्रयोगः प्रथमः । मातृकादियुक्तमन्त्रान् द्वादशवर्षपर्यन्तं कृतेन जपेन अणिमादिसिद्धयः प्राप्तुं शक्नुवन्ति साधकाः[५] । स एव जपः मन्त्रयोगेत्युच्यते । मन्त्रयोगलक्षणविषये प्राप्यते यत् श्वास-प्रश्वासरूपेण अन्तर्बहि-गमनागमनकारकः सर्वैः जीवैः जप्यमानः 'हंसः' 'हंसः' इति मन्त्रोऽयम् गुरुवाक्यात् सुषुम्णायां प्रविश्य विपरीतो भूत्वा 'सोऽहम्' 'सोऽहम्' इत्यनेन रूपेण प्रोक्तो भवति सो जप एव मन्त्रयोग इति कथ्यते[६] । महर्षिपतञ्जलिनापि मन्त्रयोगविषये

---

***सम्पर्कसूत्रम्** - 7666666110, Email- ravishastri7@gmail.com

[१]कल्याण योगतत्त्वाङ्क- भवतापेन तप्तानां योगो हि परमौषधम्, पृष्ठ – 276
[२]योगदर्शन – 1/2
[३]कल्याण योगाङ्क- महर्षिपतञ्जलि और योग, पृष्ठ – 565
[४]शिवसंहिता - 5 /14
[५]योगसाधना योगचिकित्सा रहस्य - पृष्ठ – 2
[६]कल्याण योगाङ्क- योगतत्त्वमीमांसा, पृष्ठ – 190

वर्णितमस्ति यत् **'तस्य वाचकः प्रणवः' 'तज्जपस्तदर्थभावनम्'**[१] इति । मन्त्रयोगः ध्यानयोगोऽपि वक्तुं शक्यते[२] । मन्त्रयोगस्य सिद्धान्तः एषोऽस्ति यत् नामरूपात्मकेऽस्मिन् लोके नामरूपाभ्यामेव अविद्यायां पतित्वा जीवः बद्धो भवति तयोरेवावलम्बनेन सः मुक्तोऽपि भवति[३] । प्रथमं नामरूपयो आश्रयं गृहीत्वा नामरूपाभ्यां भावे भावग्राहिपरमात्मनि च चित्तवृत्तेः लयो भूते सत्येव मुक्तिर्मिलति[४] ।

मन्त्रयोगस्य महिमारूपेण प्राप्यते यत् योगोऽयं मोक्षदायकः पापप्रणाशकश्च । द्वादशवर्षपर्यन्तं जपकारकेन जनेन अणिमादिगुणान्वितं ज्ञानं क्रमेण समवाप्यते[५] । भगवता मनुना अपि अतन्द्रितरूपेण प्रतिदिनं वर्षद्वयपर्यन्तं जपकारको जनः वायुसदृशगतिमन्तो भूत्वा परब्रह्माणं लब्धुं शक्नोतीत्युक्तमस्ति[६] । योगसाधन रहस्य पातञ्जलयोगदर्शने, महर्षिभरद्वाजकृत-कर्ममीमांसादर्शने, मन्त्रयोगसंहितायां, हठयोग-संहितायां, लययोगसंहितायां, राजयोगसंहितायां, पुराणेषु तन्त्रेषु च विस्तृततया वर्णितमस्ति । मन्त्रयोगस्य आचार्येषु नारद-पुलस्त्य-गर्ग- वाल्मीकि-भृगु-बृहस्पति-इत्यादयः प्रमुखा आचार्याः जाताः[७] ।

शब्दात्मकमन्त्राणां चेतनत्वात् तेषां साहाय्येन जीवः क्रमश उपरिगच्छन् शब्दातीतपरमानन्द-धामनि प्राप्नोति । वैखरीशब्दात् क्रमशो मध्यमावस्थां भित्त्वा पश्यन्ती- अवस्थायां प्रवेशकरणमेव मन्त्रयोगस्य प्रधानोद्देश्यः[८] । मन्त्रयोगग्रन्थेषु मन्त्रयोगस्य षोडशाङ्गानां वर्णनमस्ति । तानि यथा भक्ति-शुद्धि-आसन-पञ्चाङ्गसेवन-आचार-धारणा-दिव्यदेशसेवन-प्राणक्रिया-मुद्रा-तर्पण-हवन-बलि-याग-जप-ध्यान-समाधि - इत्यादीनि । परन्तु कुत्रचित् प्राणायामं विहाय मन्त्रयोगस्य सप्ताङ्गानि एव सन्ति इत्युक्तमस्ति[९] । अनेकेषु शास्त्रेषु एतेषां षोडशाङ्गानां विस्तृतवर्णनं समवाप्यते[१०] ।

मन्त्रयोगार्थं मन्त्राणामावश्यकता भवति । संस्कृतवाङ्मये असंख्यमन्त्राणामवस्थितिरवलोक्यते । मन्त्रसंख्याविषये अनेन प्रकारेण उक्तमस्ति यत् **'सप्तकोटिमहामन्त्राः शिववक्त्राद्विनिर्गताः**[११] । महादेवमुखात् विनिर्गतानां मन्त्राणां संख्या एव सप्तकोट्यः सन्ति । अन्येषां देवानामपि मुखात् विनिर्गताः मन्त्राः सन्ति अनेन मन्त्रसाहित्यस्य विशालतानुमीयते ।

मन्त्रभेददृष्ट्या ते मन्त्राः वैदिक- आगमिक-शैव-शाक्त-वैष्णव-वर्ण-अभिचारादि अनेकेषु भागेषु विभक्ताः सन्ति[१२] । उद्देश्यदृष्ट्यापि मन्त्राः मारण-वशीकरण-स्तम्भन- उच्चाटन आकर्षण-विद्वेषण[१३]-मोहन-वशीकरण-आवाहनादि अनेकप्रकारकाः सन्ति[१४] । शास्त्रेषु मन्त्रजपस्य अनेकप्रकाराः वर्णिताः विद्यन्ते । तेषु प्रमुखाः यथा – नित्यजप – नैमित्तिकजप – काम्यजप – निषिद्धजप – प्रायश्चित्तजप – अचलजप -चलजप-वाचिकजप - उपांशुजप – भ्रमरजप – मानसजप – अखण्डजप – अ-जपाजप – प्रदक्षिणाजप[१५] - इत्यादयः । श्रीमद्भगवद्गीतानुसारेण देहधारिजीवानां सत्त्व-रज-तम-इत्यादिगुणानुसारेण तेषां

---

[१]पातञ्जल योगदर्शन - स्वामी रामदेव – 1/27-28 , कल्याण योगाङ्क - योगतत्त्वमीमांसा, पृष्ठ – 190
[२]कल्याण योगाङ्क - श्रीकुण्डलिनीशक्तियोग, पृष्ठ – 446
[३]कल्याण योगतत्त्वाङ्क - योग के मुख्य सिद्धान्त, पृष्ठ – 131
[४]कल्याण योगतत्त्वाङ्क - योगचतुष्टय- मन्त्रयोग, हठयोग, लययोग, राजयोग, पृष्ठ – 135
[५]कल्याण योगाङ्क - योगतत्त्वमीमांसा, पृष्ठ – 190
[६]मनुस्मृति - 2 / 82 , कल्याण योगाङ्क - योगतत्त्वमीमांसा, पृष्ठ – 190
[७]कल्याण योगतत्त्वाङ्क - योगचतुष्टय-मन्त्रयोग, हठयोग, लययोग, राजयोग, पृष्ठ – 135
[८]कल्याण योगाङ्क - योग का परिचय, पृष्ठ –85
[९]कल्याण योगाङ्क - श्रीकुण्डलिनीशक्तियोग, पृष्ठ – 443
[१०]कल्याण योगतत्त्वाङ्क - योगचतुष्टय-मन्त्रयोग, लययोग, राजयोग, हठयोग, पृष्ठ – 135
[११]कल्याण योगतत्त्वाङ्क - मन्त्रयोगसाधना, पृष्ठ – 155
[१२]श्रीमद्भागवतमहापुराण में योगतत्त्वनिरूपण पृष्ठ – 136
[१३]श्रीमद्भागवतमहापुराण में योगतत्त्वनिरूपण - पृष्ठ – 132
[१४]संस्कृत हिन्दी कोश - पृष्ठ – 774
[१५]श्रीमद्भागवतमहापुराण में योगतत्त्वनिरूपण पृष्ठ – 141 – 143


ISSN : 2249-538X

जपस्यापि भेदत्रयं स्वीक्रियते - सात्त्विकजप-राजसिकजप-तामसिकजपश्चेत्येते[१] । शारदातिलकेऽपि[२] कर्मानुसारेण मन्त्रजपस्य षड्प्रकाराः निर्देशिताः । ते यथा शान्तिकर्म -वश्यकर्म-स्तम्भनकर्म-विद्वेषकर्म-उच्चाटनकर्म-मारणकर्म इत्येते । मन्त्रयोगस्य ध्यानं स्थूलध्यानमित्युच्यते । ध्यानमिदं पञ्चसगुणोपासनानुसारेण अवतारोपासनानुसारेण अनेकप्रकाराणि भवन्ति[३] । मन्त्रयोगस्य समाधिः महाभावसमाधिरित्युच्यते[४] । योगेऽस्मिन् भक्तियोगोऽपि समाविष्टो भवति[५] । उपर्युक्तपर्यालोचनयेदं ज्ञायते यत् भारतीयपरम्परायां मन्त्रयोगस्यैका सुसमृद्धपरम्परा विद्यते यस्य क्षुद्रदिग्दर्शनमेवात्र विहितमस्ति प्रकारान्तरत्वात् ।

**लययोगः** - योगचतुष्टयेषु लययोगस्य स्थानमन्यतमम् । अङ्गिरा-याज्ञवल्क्य-कपिल- पतञ्जलि-वसिष्ठ-कश्यप-वेदव्यासादिभिः महर्षिभिः परममङ्गलकारिब्रह्मपदप्राप्तेर्कारणस्वरूपः लययोगो जगति प्रकटीकृतः[६] । अतः ऋषि-देवता- पितृ-ग्रह-नक्षत्रादीनां सर्वेषामेव स्थानं समानरूपेण ब्रह्माण्डे पिण्डे चास्ति । पिण्डज्ञानेन ब्रह्माण्डज्ञानं भवति । श्रीगुरूपदेशेन शक्तिसहितपिण्डस्य ज्ञानलाभादनन्तरं सुकौशलपूर्णक्रियया प्रकृतिं पुरुषे लयकरणात् सः योगः लययोगेत्युच्यते[७] । पञ्चकोषावरणं शिथिलीभूते सति पिण्डः स्वेच्छानुसारेण यस्मिन्नपि लोके स्व-सम्बन्धं स्थापयितुं शक्नोति । मनुष्यपिण्डस्य आधारपद्मे प्रसुप्तरूपेण स्थितं कुलकुण्डलिनीनामकं ब्रह्मशक्तिं मनुष्यशरीरस्य सप्तमचक्रे मस्तके स्थिते सहस्रदले येन योगेन नीत्वा ब्रह्मरूपिणा सदाशिवेन सह मेलनं क्रियते । सदाशिवे शक्तेः लयं कृत्वा मुक्तिप्राप्तेः साधनं नाम लययोगः[८] । लययोगविषये प्राप्यते यत् चेतसः लय एव लययोगनाम्ना ज्ञायते । साधारणतया उक्ते सति प्राणशक्ति-कुण्डलिनीशक्ति- मन-मनोवृत्त्यादीनां यस्मिन् यस्मिन् योगे लयः क्रियते स एव योगः लययोगेति उच्यते[९] । लययोगो नादयोगनाम्नापि ज्ञायते[१०] । यस्यापर नाम अस्ति कुण्डलिनीयोगः[११] । लययोगे साधकः सदैव आनन्दमयावस्थायां तिष्ठति । विद्युत्प्रवाहरूपिणी- सर्वसौन्दर्यशालिनी-सर्वरूपा-सर्वसुखदायिनी कुण्डलिनीशक्तेः सान्निध्यात् साधकः सङ्गिनीस्त्रिया अपि सान्निध्यस्य प्रयोजनीयतां नानुभवति[१२] ।

आदिनाथेन भगवता सदाशिवेन लययोगसाधनस्य सपादकोटिप्रकाराः कथिताः[१३] । शास्त्रेषु लययोगस्य नवाङ्गानि वर्णितानि सन्ति । तानि यथा - यम-नियम-स्थूलक्रिया-सूक्ष्मक्रिया-प्रत्याहार-धारणा-ध्यान-लयक्रिया-समाधिरित्येतानि[१४] । परन्तु केषाञ्चनमते तु लययोगस्य अष्टाङ्गानि एव सन्ति[१५] । योगेऽस्मिन् हठयोगवत् योगनाडीनां वर्णनं सम्प्राप्यते[१६] । लययोगस्य विन्दुमयप्रकृतिपुरुषात्मकं ध्यानं बिन्दुध्यानमित्युच्यते तथा लययोगस्य समाधिः महालयसमाधिरित्यनया

---

[१]श्रीमद्भगवद्गीता – 17/2
[२]सर्वदर्शन. पृष्ठ – 708
[३]कल्याण योगाङ्क -. योग, पृष्ठ – 181
[४]कल्याण योगतत्त्वाङ्क - योग के मुख्य सिद्धान्त, पृष्ठ – 131
[५]कल्याण योगाङ्क - श्रीकुण्डलिनीशक्तियोग, पृ. ४४३. पृष्ठ – 443
[६]कल्याण योगतत्त्वाङ्क - योगचतुष्टय-मन्त्रयोग, लययोग, हठयोग, राजयोग, पृष्ठ – 137
[७]कल्याण योगतत्त्वाङ्क - योगचतुष्टय-मन्त्रयोग, लययोग, हठयोग, राजयोग, पृष्ठ – 137
[८]कल्याण योगतत्त्वाङ्क - योग के मुख्यसिद्धान्त, पृष्ठ – 132
[९]कल्याण योगाङ्क - श्रीकुण्डलिनीशक्तियोग, पृष्ठ – 137
[१०]कल्याण योगाङ्क - भारत के योगसम्प्रदाय, पृष्ठ – 270
[११]कल्याण योगाङ्क - भारत के योगसम्प्रदाय, पृष्ठ – 271
[१२]कल्याण योगाङ्क - श्रीकुण्डलिनीशक्तियोग, पृष्ठ – 444
[१३]हठयोगप्रदीपिका – 4/66.
[१४]कल्याण योगतत्त्वाङ्क - योगचतुष्टय-मन्त्रयोग, हठयोग, लययोग, राजयोग पृष्ठ – 137 , कल्याण योगाङ्क - वेदों में योग, पृष्ठ – 47
[१५]कल्याण योगाङ्क - योग. पृष्ठ – 182
[१६]कल्याण योगाङ्क - श्रीकुण्डलिनीशक्तियोग, पृष्ठ – 439

अभिधया अभिधीयते[१] ।

लययोगीनः समस्तकामना-वासना- आसक्ति-संकल्प-विकल्पादीनां बन्धनेभ्यो मुक्तीभूय चित्तं वृत्तिरहितं कृत्वा शान्तावस्थाप्राप्तेः चेष्टां कुर्वन्ति । ते शुद्ध-शान्त- अन्तरात्मनि नित्यसिद्ध-स्वयंप्रकाश- आत्मतत्त्वस्य स्फुरणं स्वयमेव भवतीति विश्वसन्ति[२] ।

मानवशरीरे इडा-पिङ्गला- सुषुम्णा-संज्ञकाः नाड्यः मूलकन्दात् प्रारभ्य ब्रह्मरन्ध्रपर्यन्तं गताः । मूलकन्दादारभ्य ब्रह्मरन्ध्रपर्यन्तं विस्तृतायाः सुषुम्णानाड्याः मूलाधार- स्वाधिष्ठान-मणिपूर- अनाहत- विशुद्ध-आज्ञासंज्ञकषड्चक्राणि सन्ति । योग-क्रियया मूलाधारस्थिता निद्रिता कुलकुण्डलिनीं जागरय्य एतैः षड्चक्रः सुषुम्णापथि प्रवाह्य ब्रह्मरन्ध्रोपरि सहस्रदलकमलस्थित-परमशिवे लयकरणमेव लययोगस्य उद्देश्यम्[३] । अनेन रूपेण कुलकुण्डलिन्याः परमशिवे लयकरणात् योगी मुक्तो भवति[४] ।

स्वास्थ्यदृष्ट्यापि कुण्डलिनीशक्तियोगस्य महत्त्वमपरिसीमः । अनेन साधकः सम्पूर्णतया स्वस्थ-सुदृढश्च भूत्वा शतायुः भवति[५] ।

**हठयोगः** - शास्त्रेषु वर्णितमस्ति यत् हठयोगस्य उपदेशः सर्वप्राथम्येन आदिनाथशंकरेण प्रदत्तः[६] । महर्षिमार्कण्डेय-भरद्वाज-मरीचि-जैमिनि-पराशर-भृगु- विश्वामित्र- इत्यादीनां कृपया कल्पेऽस्मिन् हठयोगस्य विस्तारो जातः[७] । मध्ययुगे नाथसम्प्रदायस्य प्रादुर्भावात् गुरुमत्स्येन्द्रनाथेन योगज्ञानस्य ग्रहणाय प्रचाराय च गोरखनाथ उचितपात्रत्वेन गृहीतः[८] । तेनैव गोरखनाथेन परिमार्जित-विशुद्ध-सात्त्विक-हठयोगमार्गस्य समग्रेऽस्मिन् भारतवर्षे प्रचारः कृतः[९] । हठयोगस्य सप्ताङगानि सन्ति । तानि यथा षट्कर्म-आसन मुद्रा- प्रत्याहार- प्राणायाम-ध्यान-समाधि-इत्येते । एतेषामङ्गानां फलमप्युक्तमस्ति यत् षट्कर्मणा शरीरशोधनम्, आसनेन दृढता, मुद्रया स्थिरता, प्रत्याहारेण धीरता, प्राणायामेन लाघवम्, ध्यानेन आत्मनः प्रत्यक्षीकरणम्, समाधिना अलिप्तता मुक्तिलाभश्च भवति[१०] । यद्यपि उपर्युक्तानि सप्ताङ्गानि एव हठयोगस्य अन्तर्गतानि परन्तु आसन-प्राणायाम- मुद्रा-नादानुसन्धानेत्यादीनेव हठयोगस्य प्रधानप्रतिपाद्यविषयत्वेन वर्णयन्ति साधकाः[११] । हठयोगः शारीरिकक्षमतायाः वृद्धिं करोति[१२] । एषः शारीरिक उन्नत्या सह प्रयोजनीयशारीरिक-मानसिकयोः स्वास्थ्ययोः संरक्षणं करोति[१३] । हठयोगाभ्यासेन शारीरिकरोगाणां समूलोन्मूलनं भवति तथा सम्यक्तया स्वास्थ्यलाभो भवति[१४] । अत्र षट्कर्मसु धौति वस्ति-नेति-नीति- त्राटक कपालभाति-इत्येतेषामन्तर्भावः[१५] । आसनेषु भगवता महादेवेन यद्यपि चतुरशीतिलक्षसंख्यकानामासनानामुल्लेखः कृतोऽस्ति परन्तु तेषु आसनेषु चतुरशीति- आसनानि मुख्यरूपेण गृह्यन्ते । तेष्वपि त्रयस्त्रिँशदासनानि मङ्गलदायकानि । तेष्वपि सिद्ध-पद्म-सिंह-भवेत्येतेषामासनचतुष्टयानां मुख्यता विद्यते । एतेषु चतुर्ष्वपि

[१]कल्याण योगतत्त्वाङ्क - योगचतुष्टय-मन्त्रयोग, हठयोग, लययोग, राजयोग, पृष्ठ –138 , कल्याण योगाङ्क - योग. पृष्ठ –182
[२]कल्याण योगाङ्क - योग, पृष्ठ – 74
[३]कल्याण योगाङ्क - वेदों में योग, पृष्ठ – 120
[४]कल्याण योगाङ्क वेदों में योग, पृष्ठ – 121
[५]कल्याण योगाङ्क - श्रीकुण्डलिनीशक्तियोग, पृष्ठ – 446
[६]हठयोगप्रदीपिका 1/1
[७]कल्याण योगतत्त्वाङ्क - योगचतुष्टय-मन्त्रयोग, हठयोग, लययोग, राजयोग, पृष्ठ –131
[८]कल्याण योगतत्त्वाङ्क - नाथसम्प्रदाय में योगसाधना, पृष्ठ – 79
[९]कल्याण योगतत्त्वाङ्क - -भारत के योगसम्प्रदाय, पृष्ठ – 270
[१०]हठयोगप्रदीपिका 1/10 , कल्याण योगतत्त्वाङ्क - योगचतुष्टय- मन्त्रयोग, हठयोग, लययोग, राजयोग, पृष्ठ – 137
[११]कल्याण योगाङ्क - योग का विषय-परिचय, पृष्ठ – 95
[१२]Yoga for Healing - पृष्ठ – 5
[१३]Yoga for Healing - पृष्ठ – 6
[१४]कल्याण योगाङ्क - श्रीमद्भगवद्गीता और योगतत्त्वसमन्वयमीमांसा, पृष्ठ – 29
[१५]हठयोगप्रदीपिका 2/22, घेरण्ड संहिता – 1/12


ISSN : 2249-538X

सिद्धासनमुत्तमम्[१] ।

हठयोगे पञ्चविंशतिमुदाणामुल्लेखो विद्यते[२] । एतेषु महामुद्रा-मबन्ध-महावेध-खेचरी-उड्डीयानबन्ध मूलबन्ध- जालन्धर-बन्ध विपरीतकरणी वज्रोली-शक्तिचालिनी-इत्येतेषां दशमुद्राणां प्रमुखता प्रतिपाद्यते हठयोगप्रदीपिकायाम्[३] । हठयोगे सहित सूर्यभेदी-उन्नायी-शीतली- भस्त्रिका भ्रामरी-मूर्च्छा केवली इत्येतेषामष्टानां विषये उल्लेखितमस्ति[४] ।हठयोगस्य समाधिः महा-बोधसमाधिरित्युच्यते[५] ।

हठयोगः न केवलं मानसिकाध्यात्मिकदृष्ट्या लाभजनक अपितु स्वास्थ्यऽपि उपकारकः । यतो हि देहशुद्धिरेव हठयोगस्य अव्यवहितोद्देश्यमस्ति[६] अत एतासां हठयौगिकक्रियाणामभ्यासात् स्थूलतानाशो भवति[७] । हठयोगे विशेषत आसन बन्ध-मुद्रा-प्राणायाम-इत्येतेषु एव अधिकतया महत्त्वं प्रदत्तमस्ति यासां स्वास्थ्यविषये महत्त्वपूर्णमवदानं भवितुमर्हति । हठाचार्याणां मतमिदमस्ति यत् सर्वेषां साधनानां कृते षट्कर्मणामावश्यकता न भवति । वात-पित्त-कफादिषु एकस्य द्वययोः वा दोषयो आधिक्ये एक षट्कर्माणि आवश्यकानि । यतो हि प्राणायामेनैव देहमलनिवृत्तिः भूते सति षट्कर्मणां न कापि आवश्यकता विद्यते[८] ।

हठयोगाभ्यासाय उपयुक्तस्थानस्य आवश्यकता भवति । तद्विषये प्राप्यते यत् सुराज्ये धार्मिके दुर्भिक्षरहिते उपद्रवरहिते देशे हठयोगाभ्यासः कर्त्तव्यः । तदुपरि चतुर्दिक्षु समीपे शिला-अग्नि-जलञ्च न भवेत् । एतादृशे स्थाने मठिकां निर्माय हठयोगाभ्यासः कर्त्तव्यः[९] । हठयोगिभिः अत्याहार-आयासात्मककर्म-अतिभाषण-नियमग्रहण-जनसंसर्ग- चाञ्चल्यादीनां परित्यागः कर्त्तव्यः[१०] ।

**राजयोगः** – योगचतुष्टयेषु राजयोग अन्यतमः । उपर्युक्तानां योगत्रयाणां चरमसीमास्ति राजयोगः[११] । सर्वेषां योगसाधनानां 'राजा' भूतत्वादेव एष योगः राजयोग इत्युच्यते । योगानां राजा राजयोगः[१२] । स्मृतिशास्त्रेषु अपि उक्तमस्ति - 'राजत्वात् सर्वयोगानां राजयोगः इति स्मृतः' इति । जनानां मनसि भ्रान्तिरस्ति यत् राजयोगः राज्ञां योंगोऽस्ति इति । परन्तु यथार्थतः तन्न । साधनायामस्यां शरीरं घोरकष्टं यन्त्रणां वा दातुं निषेधोऽस्ति । यम-नियमादीनामभ्यासपूर्वकं चित्तं निर्मलीकृत्य ज्योतिर्मयात्मानं साक्षात्कारीकरणमेव राजयोगः । "राजृ-दीप्तौ" धातोः निष्पन्नोऽयं शब्दः । 'राज' इत्यस्यार्थोऽस्ति दीप्तिमान् ज्योतिर्मयो वा तथा 'योग' इत्यस्यार्थोऽस्ति समाधिरनुभूतिर्वा[१३] । सृष्टिस्थितिविनाशानां हेतुरस्ति मनः । तस्य सहायेन यस्य साधनं क्रियते स एव राजयोग इत्युच्यते । वृत्तिविजयपूर्वकतया स्व-स्वरूपयोः प्रकाशनमेव राजयोगः[१४] । योगशिखोपनिषटि शिव-शक्त्योर्मिलनं राजयोग इत्युच्यते[१५] । पातञ्जलयोगसूत्रमेव राजयोगस्य आधारभूतो

---

[१] हठयोगप्रदीपिका 1/34
[२] घेरण्ड संहिता – 3/1-3
[३] हठयोगप्रदीपिका – 3/6-7
[४] घेरण्ड संहिता – 5/46
[५] कल्याण योगतत्त्वाङ्क - योगचतुष्टय-मन्त्रयोग, हठयोग, लययोग, राजयोग, पृष्ठ – 132
[६] कल्याण योगाङ्क - योग का विषयपरिचय, पृष्ठ – 94
[७] कल्याण योगाङ्क - योग का विषयपरिचय, पृष्ठ – 95
[८] कल्याण योगाङ्क - योग का विषयपरिचय, पृष्ठ – 95
[९] हठयोगप्रदीपिका 1/12
[१०] हठयोगप्रदीपिका 1/16
[११] कल्याण योगतत्त्वाङ्क - योग के मुख्यसिद्धान्त, पृ. पृष्ठ – 132
[१२] श्रीमद्भागवतमहापुराण में योगतत्त्वनिरूपण - पृष्ठ – 148
[१३] योगसाधना योगचिकित्सा रहस्य - पृष्ठ – 2
[१४] कल्याण योगतत्त्वाङ्क - योगचतुष्टय-मन्त्रयोग, हठयोग, लययोग, राजयोग, पृष्ठ –138
[१५] श्रीमद्भागवतमहापुराण में योगतत्त्वनिरूपण - पृष्ठ – 150

ग्रन्थोऽस्ति[१] । बाह्यविषयेभ्यो मनस अपसारणक्रियाया अभ्यासः कर्त्तव्यः । प्रवृत्तिभावनायाः पृथक्भूय निवृत्तिभावनां सुदृढीकरणस्य अभ्यासोऽयं यदा दृढो भवति तदा मनोनिरोधो जायते । एतदर्थं शास्त्रश्रवणमननादीनामावश्यकता भवति । अधिकतया कृताभ्यां शास्त्रश्रवणमननाभ्यां शीघ्रतया वस्तूनां वास्तविकस्वरूपस्य ज्ञानं भवति यस्मात् अतीव शीघ्रतया दृढतया च उक्तप्रक्रियया मनोनिरोधो जायते । स एव राजयोगनाम्ना ज्ञायते[२] ।अन्यभाषया उक्ते सति अनेन रूपेण वक्तुं शक्यते यत् आत्मसंयमार्थं यादृशस्य मानसिकाभ्यासस्य आवश्यकता अस्ति, आत्मानं परमात्मना सह मेलनार्थं यादृशस्य साधनस्य आश्रयो गृह्यते, परमात्ममिलनार्थम् आध्यात्मिकपूर्णतार्थं वा या प्रक्रिया उपयुज्यते सा एव राजयोग इत्युच्यते[३] ।

आत्मनिष्ठा-ब्रह्मनिष्ठा-राजविद्याराजगुह्य-महायोग-अस्पर्शयोग-सांख्ययोग- अध्यात्मयोग-ज्ञानयोग-राजाधिराजयोग-इत्यादिभिः नामभिरपि राजयोगो ज्ञायते[४] । राजयोगे मनःशक्तेः निग्रहे महत्त्वं प्रदीयते । मनसः एकाग्रता एव राजयोगस्य विलक्षणता अस्ति[५] । राजयोगसाधनाया अष्टाङ्गानि सन्ति । तानि यथा - यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिरित्येतानि । यानि सन्ति पतञ्जलिनिर्देशित-अष्टाङ्गयोगस्य आधारशिला । तेजविन्दूपनिषदि राजयोगस्य पञ्चदशाङ्गानां वर्णनं विद्यते । तानि यथा - यम-नियम-त्याग-मौन-देश-काल- आसन- मूलबन्ध - देहसाम्य-दृस्थिति - प्राणायाम- प्रत्याहार-धारणा-ध्यान-समाधिरित्येतानि[६] । परन्तु कुत्रचिच्च राजयोगस्य षोडशाङ्गानां वर्णनं विद्यते[७] । राजयोगसाधनया या शक्तिरुपलभ्यते सा अन्यासां सर्वासां शक्तीनां नियन्त्रणकारिका अस्ति । मन- उपरि विजयं प्राप्तवता जनेन प्रकृतेः समग्रव्यापारेषु शासनं कर्त्तुं शक्यते[८] ।

श्रीजाबालोपनिषद्-योगतत्त्वोपनिषद्-योगशिखोपनिषद्-इत्यादिषु अपि राजयोगस्य वर्णनमवलोक्यते । श्रीमद्भगवद्गीतायामपि[९] राजविद्याराजगुह्य-इत्यादिभिः नामभिः राजयोगः निर्देशित अस्ति । अनेन चतुर्षु योगप्रकारेषु राजयोगस्य श्रेष्ठता संसिध्यति । राजयोगी देहतत्त्व-मनस्तत्त्व-आत्मतत्त्वादीन् सम्यक्तया विज्ञाय अन्तरिन्द्रिय-बहिरिन्द्रिय- देहोपरि अधिकारं सम्प्राप्य एतान् यन्त्रान् स्वे स्वे कर्मणि तथा भगवदिच्छापूरणे नियुज्य मुक्तनृपवत् अवस्थितो भवति[१०] । आधुनिकेऽस्मिन् विश्वे प्रजापिता ब्रह्मकुमारी ईश्वरीयविश्वविद्यालयेन प्रवर्त्तिता राजयोगपद्धतिः तथा महर्षिमहेशयोगि-प्रवर्त्तिता भावातीतध्यानपद्धतिः बहुलप्रचारतां लभते । तदुपरि योगक्षेत्रे स्वास्थ्यदृष्ट्या योगदर्शनस्य महत्त्वं प्रतिपाद्य तद् महत्त्वं बहुलतया प्रचारितं दिव्ययोगमन्दिरस्य संस्थापकेन स्वामिरामदेवेन । एषा विद्या पाइथागोरस प्लेटो-स्पिनोजा- कांट-शोपेनहार-प्लेटिनास-प्रोक्यूलियस्-एमर्सन-इत्यादिभिः विद्वद्भिः भूयसी प्रशंसिता । न केवलमेतदेव अपितु मिश्रवासी- इसेनसम्प्रदायानुयायि- नास्टिक (Gnostic) सम्प्रदायानुयायि-मनिचान (Manichan) सम्प्रदायानुयायिमध्ययुगीययूरोपीयरहस्यवादि इत्यादिभिरपि राजयोगस्य प्रशंसा कृता[११] ।

---

[१]कल्याण योगाङ्क - कुण्डलिनी शक्तियोग, पृष्ठ – 437
[२]कल्याण योगतत्त्वाङ्क - राजयोग, पृष्ठ – 84
[३]कल्याण योगाङ्क - योग क्या है, पृष्ठ – 111
[४]कल्याण योगाङ्क - योगतत्त्वमीमांसा, पृष्ठ – 191
[५]श्रीमद्भागवतमहापुराण में योगतत्त्वनिरूपण - पृष्ठ – 150
[६]श्रीमद्भागवतमहापुराण में योगतत्त्वनिरूपण - पृष्ठ – 151 – 152
[७]कल्याण योगतत्त्वाङ्क - योगचतुष्टय-मन्त्रयोग, हठयोग, लययोग, राजयोग, पृष्ठ – 139
[८]कल्याण योगाङ्क - योग क्या है, पृष्ठ –112
[९]श्रीमद्भगवद्गीता – 9/2
[१०]कल्याण योगाङ्क - योग, पृष्ठ – 74
[११]कल्याण योगाङ्क - योग क्या है, पृष्ठ – 111


ISSN : 2249-538X

## राजयोगेन सह हठयोगस्य सम्बन्धनिर्णयः

राजयोगेन सह हठयोगस्य निविडसम्बन्धोऽस्ति । हठयोगस्य पूर्णपरिणतिरस्ति राजयोगः । तस्मादेव आचार्यवराः हठयोगं राजयोगस्य सोपानत्वेन स्वीकुर्वन्ति[१] । राजयोगस्य प्राप्त्यर्थमेव हठयोगस्याविर्भावः[२] । यतो हि ये खलु राजयोगस्याभ्यासार्थम् अज्ञाः[३] सन्ति तैः खलु प्रथमतया योग्यतासम्पादनार्थं हठयोगस्य अभ्यासः करणीयः । तदनन्तरमेव राजयोगस्य कृते ते खलु योग्याः भविष्यन्ति ।

आत्मसंयमार्थं यादृशस्य मानसिकाभ्यासस्य आवश्यकता भवति, आत्मानं परमात्मना सह मेलनार्थं यस्य साधनस्य आश्रयो गृह्यते तस्य राजयोग इति संज्ञा । मानवजीवनस्य चरमलक्ष्यमुक्तेः प्राप्त्यर्थं हठयोगेन पूर्णस्वस्थतां दीर्घजीवनं च सम्प्राप्य तथा राजयोगेन मन एकाग्रतया संरक्ष्य सहायः प्राप्यते ।

हठयोगानुसारेण हठयोगोऽस्ति राजयोगस्य सोपानम् अतः हठयोगं विना राजयोगस्य प्राप्तिः न भवति तथैव राजयोगं विना हठयोगोऽपि व्यर्थोऽस्ति । अतः द्वयोरेव योगप्रकारयोः युग्मरूपेण अभ्यासः करणीयः[४] । परन्तु राजयोगानुसारेण राजयोगप्राप्त्यर्थं हठयोगस्य आवश्यकता नास्ति वरञ्च हठयोगः राजयोगस्य किञ्चित् बाधाकारकोऽस्ति[५] ।

हठयोगस्य अङ्गभूतेन कुम्भकप्राणायामेन प्राणवायो अवरोधानन्तरं चित्तं निराश्रयं कुर्यात् । अनेन रूपेण कृतेन अभ्यासेन राजयोगपदप्राप्तिः भवति[६] । हठयोगस्यानुसारेण स्थूलशरीर-सूक्ष्मशरीरयोर्मध्ये निविडसम्बन्धोऽस्ति यस्मात् एकस्य अन्योपरि प्रभावः पूर्णतया पतति ।

अतः स्थूलशरीरेण सूक्ष्मशरीरं स्वाधिकारे आनयनानन्तरं मोक्षलाभो भवतीति हठयोगमतम् परन्तु शुद्धान्तःकरणात् प्राप्ततत्त्वज्ञानात् मुक्तिलाभो भवतीति राजयोगमतम् । अतः मुक्तिलाभार्थं शुद्धान्तःकरणस्य आवश्यकता भवतीति द्वाभ्यामेव योगमार्गाभ्यां स्वीकृतम् । हठयोगे साधनार्थं स्थूलशरीरस्य आवश्यकता अङ्गीकृता परन्तु राजयोगे सा नाङ्गीकृता ।

हठयोगस्य क्रियादीनां पालनं यदि सम्यक्तया न भवति तर्हि अनेकेषां दुःसाध्यरोगाणामुद्भवो भवितुमर्हति[७] यस्मात् मृत्युरने सम्भवति । यतो हि हठयोगक्रियाः भगवदुपदिष्टसिद्धान्तानुसारेण राजसिक-तामसिक-आसुरीस्वभाववत्यो भवन्ति अत ऐहिककष्टलाभोपरि आमुष्मिकहानेरपि सम्भावना भवति[८] । परन्तु राजयोगक्रियासु तादृशी अवस्था नायाति । स्वल्पमपि धर्मस्य आचरणेन महतः भयात् त्रायते"[९] ।

हठयोगसाधनायां स्थूलशरीरेण सह सम्बन्धभूतत्वात् स्थूलशरीरे स्थितस्यात्माभिमानस्य ह्रासो न भवति, प्रत्युत वर्द्धते एव, यः खलु अध्यात्मवर्त्मनि प्रतिबन्धकोऽस्ति । परन्तु राजयोगसाधनायां स्थूलशरीरं मायामयं विचिन्त्य स्थूलशरीरं प्रति न किमपि अवधानं दीयते तथा मनोमयकोशेनैव अभ्यासः क्रियते यस्मात् मोक्षलाभाय सौविध्यं भवति[१०] । राजयोगस्य क्रिया अधिकांशतः स्थूलशरीरमधिकृत्य भूतत्वात् मृत्योरनन्तर तेषां प्रभावः न भवति परन्तु राजयोगस्य क्रियाणां अन्तःकरणेन सह सम्वन्धभूतत्वात् तेषामविनाशीत्वात् राजयोगस्य क्रियाणां मृत्योरनन्तरमपि प्रभावः स्थास्यति[११] ।

---

[१]हठयोगप्रदीपिका 11 कल्याण योगाङ्क - पृष्ठ – 94
[२]हठयोगप्रदीपिका 1/2
[३]हठयोगप्रदीपिका 1/3
[४]हठयोगप्रदीपिका 2/76
[५]कल्याण योगाङ्क - हठयोग और प्राचीन राजविद्या अथवा राजयोग, पृष्ठ – 457
[६]हठयोगप्रदीपिका 2/77
[७]कल्याण योगाङ्क - -आत्मज्ञान प्राप्त करनेका सरल उपाय-योग, पृष्ठ – 202
[८]कल्याण योगाङ्क - श्रीमद् भगवद् गीता और योगतत्त्वसमन्वयमीमांसा, पृष्ठ – 22
[९]श्रीमद्भगवद्गीता – 2/40
[१०]कल्याण योगाङ्क - हठयोग और प्राचीन राजविद्या अथवा राजयोग, पृष्ठ – 457
[११]कल्याण योगाङ्क - हठयोग और प्राचीन राजविद्या अथवा राजयोग, पृष्ठ – 458

योगसाधनायां यदा योगी योगमार्गे अग्रेसरति हठयोगातिक्रमणानन्तरं राजयोगमभ्यस्यति परन्तु राजयोगस्य पूर्णतालाभात्पूर्वं हठयोगस्यापि आसनादीनि न त्यक्तव्यानि"[१] । अनेन राजयोगसाधना-कालेऽपि हठयोगस्य प्रासङ्गिकता निर्देशिता ।

हठयोगप्रयोगैः तु व्याधीनां नाशो भवति यस्मात् सुस्वास्थ्यस्य प्राप्तिस्तु भवत्येव परन्तु शरीरस्य अनित्यत्वात् तेषां फलमपि शरीरनाशेन सह नाशो भवति परन्तु राजयोगक्रियासु तादृशी अवस्था नायाति[२] । हठयोगिनः नेति-धौति-वस्ति-कपालभाति- आसन-मुद्रा- त्राटक- प्राणायामादिशारीरिक- क्रियाणाम् अभ्यसने एव विशेषावधानं दत्त्वा स्वदेहं स्वस्थ-बलिष्ठ-कार्यशीलं च विधातुं चेष्टयन्ति । परन्तु राजयोगिनस्तु देहतत्त्व-मनस्तत्त्व-आत्मतत्त्वादीन् सम्यक्तया विज्ञाय अन्तरिन्द्रिय-बहिरिन्द्रिय-देहोपरि च अधिकारं सम्प्राप्य एतान् भगवदिच्छाप्रपूरणाय नियोज्य मुक्तराजावत् विचरन्ति[३] ।

हठयोगः योगस्य अङ्गरूपेण स्वीक्रियते साक्षात् योगरूपेण न । अर्थात् हठयोगः अप्रधानयोगसाधनमस्ति[४] । परन्तु राजयोगः प्रधानयोगसाधनमस्ति । हठयोगानुसारेण स्थूलशरीरस्य सूक्ष्मशरीरेण सह ओतः प्रोतः सम्बन्धोऽस्ति । अतः स्थूलशरीरं स्वाधिकारे आनयनानन्तरं सूक्ष्मशरीरं स्वाधिकारे आनीय योगप्राप्तिः कर्त्तव्या । परन्तु राजयोगसाधनायां स्थूलशरीरं प्रति न किमपि महत्त्वं दीयते । तेषामनुसारेण सूक्ष्मशरीरम् अर्थात् मन एव मनुष्याणां बन्धमोक्षयोः कारणत्वेन अस्ति अतः शुद्धमनसः सहायतया तत्त्वज्ञानमधिगत्य मुक्तिलाभः कर्त्तव्यः[५] । प्राणनिरोधेन मननिरोधः कर्त्तव्य इति हठयोगस्य मतम् परन्तु मनोनिरोधेन प्राणनिरोधः कर्त्तव्य इति राजयोगस्य मतम्[६] ।

मनस्-इन्द्रियाणां च संयमनं विहाय केवलं स्थूलशारीरिकाभ्यासेन कृतेन कुण्डलिनी जागरण-पङ्कवेधनादिकर्मणा न कोऽपि लाभः सम्भवति प्रत्युत हानिरेव सञ्जायते । यतो हि असंयमितेन्द्रियाणां साधकानां मनस्-इन्द्रियाणाम् असंयमत्वात् दोषाणां वृद्धिरेव जायते या खलु वृद्धिः हानेः कारणं भवितुमर्हति । यदि साधकः सम्भावितेभ्यः तेभ्यः दोषेभ्यः स्वं रक्षितुं समर्थो भवति तथापि तस्य चक्राणि तेज- शक्तिभ्यां रहितानि भवन्ति तेषां प्रस्फुटनाय कृतेन अननुकूलयौगिकप्रयासेन[७] । राजयोगक्रियासु तन्न भवति ।

हठयोगाभ्यासेन अनेकासाम् अलौकिकसिद्धीनां प्राप्तिर्भवति परन्तु योगमार्गे विघ्नकारक-सिद्धिभिः यौगिकसाधनायां न कोऽपि लाभः सञ्जायते यस्मात् राजयोगिनां मनसि एताः सिद्धीः प्रति न कापि उत्कण्ठा भवति[८] । हठयोगस्य साधनायाः प्रारम्भः शरीरप्राणाभ्यां भवति परन्तु राजयोगस्य साधनायाः प्रारम्भो मनसो भवति[९] ।

खेचरीमुद्रायाः वर्णनं हठ-राज-द्वयोरेव योगप्रकारयोः विद्यते परन्तु हठयोगस्य खेचरीमुद्रया सह राजयोगस्य खेचरीमुद्रायाः पार्थक्यमवलोक्यते । आकाशं प्रति दृष्टिनिक्षेप एव राजयोगस्य खेचरीमुद्रायाः स्वरूपम्[१०] । परन्तु हठयोगस्य खेचरीमुद्रायां तु जिह्वां विपरीततया कपालकुहरे प्रवेश्य दृष्टिः भ्रुवोर्मध्ये संस्थाप्यते[११] ।

[१] हठयोगप्रदीपिका 1/67
[२] कल्याण योगाङ्क - श्रीमद्भगवद्गीता और योगतत्त्वसमन्वयमीमांसा, पृष्ठ – 29
[३] कल्याण योगाङ्क - -योग, पृष्ठ – 74
[४] कल्याण योगाङ्क - -योगः कर्मसु कोशलम्, पृष्ठ – 82
[५] कल्याण योगाङ्क - -योग, पृष्ठ – 181-182
[६] कल्याण योगाङ्क - -योगतत्त्वमीमांसा, पृष्ठ – 191
[७] कल्याण योगाङ्क - -हठयोग और प्राचीन राजविद्या अथवा राजयोग, पृष्ठ – 458
[८] कल्याण योगाङ्क - -योग और उसके फल, पृष्ठ – 474
[९] कल्याण योगाङ्क - -योग और उसके फल, पृष्ठ – 474
[१०] कल्याण योगाङ्क - श्रीकुण्डलिनीशक्तियोग, पृष्ठ – 445
[११] घेरण्ड संहिता – 3/27, हठयोगप्रदीपिका – 3/32


ISSN : 2249-538X

राजयोगे अष्टाङ्गयोगस्य वर्णनं विद्यते परन्तु हठयोगे तु यम-नियमादीन् विहाय षडङ्गानामेव वर्णनमवलोक्यते[1] । केषाञ्चन मतेन तु राजयोगस्य षोडशाङ्गानि[2] सन्ति हठयोगस्य च सप्ताङ्गनि[3] ।

हठयौगिकक्रियायां धौति वस्ति-नेति- कपालभाति त्राटक- इत्येतेषां षट्कर्मणां प्रयोगः क्रियते[4] परन्तु राजयोगक्रियायां सः प्रयोगो नावलोक्यते ।

## उपसंहारः

उपर्युक्त पर्यालोचनयेदं स्पष्टं भवति यत् राजयोगेन सह हठयोगस्य अङ्गाङ्गीसम्बन्धो विद्यते । एकं विहाय न अन्येन एव सफलता अधिगम्यते । योगमार्गे अधिरोहणशीलानां जनानां कृते स्वास्थ्यं कामयमानानां जनानां कृते च उभयोरेव योगप्रकारयोः प्रयोजनीयता विद्यते । हठयोगेन शरीरिकशुद्धतां स्वस्थतां च विधाय राजयोगेन मानसिक-आध्यात्मिकशुद्धता स्वस्थता च विधीयते यस्मात् भौतिकतया आध्यात्मिकतया च दूषितेऽपि साम्प्रतिके विश्वे शारीरिक-मानसिक-आध्यात्मिकं च स्वास्थ्यं सम्प्राप्तुं शक्यते । इति शम् ।

## सन्दर्भग्रन्थाः


- 2004 – योगदर्शनम् – व्याख्याकारः – स्वामी-सत्यपति-परिवाजकः , आर्यवनम् रोजडः, गुजरातः ।
- 1991 – योगतत्त्वांकः (कल्याण-पत्रिका) गीता-प्रेस-गोरखपुरम् ।
- 1992 – योगांकः (कल्याण-पत्रिका) गीता-प्रेस-गोरखपुरम् ।
- 2004 – घेरण्ड-संहिता टीकाकारः, निरंजनानन्दः सरस्वती, योग-पब्लिकेशन्स-ट्रस्ट, मुंगेरः, बिहारः ।
- 2015 – शिवसंहिता , टीकाकारः, निरंजनानन्दः सरस्वती, योग-पब्लिकेशन्स-ट्रस्ट, मुंगेरः, बिहारः ।
- 2013 – हठयोग-प्रदीपिका, व्याख्याकारः- परमहंस-स्वामी-आनंदभारती, चौखंभा ओरिएंटालिया,दिल्ली ।
- 2006 - विशुद्ध मनुस्मृति - डॉ.सुरेंद्र कुमार,आर्ष साहित्य प्रचार ट्रस्ट , दिल्ली – 6
- 2010 - श्रीमद्भागवतगीता - संपादक - गीता-प्रेस-गोरखपुरम् ।
- 2014 - श्रीमद्भागवत् महापुराणम्, - संपादक - गीता-प्रेस-गोरखपुरम् ।
- 1985 - सर्वदर्शनसंग्रहः - भाष्यकारः - प्रो. उमाशंकरः शर्मा, चौखंबा विद्याभवनम् वाराणसी ।
- 1975 - संस्कृत-हिंदी-कोशः वामन-शिवराम-आप्टे, मोतीलाल-बनारसीदास-वाराणसी ।
- 2002 - योग-साधना-चिकित्सा-रहस्यम्, स्वामी रामदेव, दिव्य प्रकाशनम् हरिद्वारम् ।


[1] शिवस्वरोदयः - भूमिका, पृष्ठ – 9, पृष्ठ – 445

[2] कल्याण योगतत्त्वाङ्क - योगचतुष्टय-मन्त्रयोग, हठयोग, लययोग, राजयोग, पृष्ठ – 139

[3] कल्याण योगतत्त्वाङ्क - योगचतुष्टय-मन्त्रयोग, हठयोग, लययोग, राजयोग, पृष्ठ – 137

[4] कल्याण योगतत्त्वाङ्क - योगचतुष्टय-मन्त्रयोग, हठयोग, लययोग, राजयोग, पृष्ठ – 137 - हठयोग के षट्कर्म, पृष्ठ – 348

# नियमपरिसंख्याविध्योः अपूर्वविधितः भेदविचारः

डा.गोविन्दगोपालकृष्णहेगडे*
सहायकाचार्यः(अ.), के.सं.वि., रा.गा.परिसरः
शृङ्गेरी

**उद्घाट्ययोगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचिगृह्यमाणः ।**
**यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥**[१]

***लेखसारः*** *– पूर्वमीमांसायां यथा अनुष्ठानोपयोगी स्यात् तथा धर्मो विचारितः । धर्मे च अष्टौ प्रमाणानि । विध्यर्थवादमन्त्रस्मृत्याचारनामधेयवाक्यशेषसामर्थ्याख्यानि इति । तत्र च मन्त्रप्रामाण्यप्रकारः द्वादशाध्यायात्मकपूर्वमीमांसायां प्रथमाध्याये द्वितीयपादे चतुर्थाधिकरणे निरूपितः । प्रयोगसमवेतार्थस्मारकाः मन्त्राः । तत्तत्क्रियायां मन्त्राणां लिङ्गेनैवविनियोगसिद्धौ पुनः विनियोगः किमर्थः इति चेत् गुणपरिसंख्याद्यर्थः इति । यथा लिङ्गादेव अग्निचयनाङ्गभूताश्वरशनग्रहणे प्राप्स्यमानस्य मन्त्रस्य "इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते" इत्यनेन पुनः विनियोगस्य प्रयोजनजिज्ञासायां गर्दभरशनारूपशेषिपरिसंख्याफलम् । तत्र च का नाम परिसंख्या इति जिज्ञासायां तत्प्रसङ्गात् आचार्यैः कुमारिलभट्टपादैः अनेन श्लोकेन अपूर्वविध्यादीनां लक्षणमुखेन विभागः कृतः -*

***विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।***
***तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥ इति ।***

***कूटशब्दाः*** *– विधिः,अपूर्वविधिः,नियमः,परिसंख्या,रशना इत्यादि ।*

## प्रधानलेखः-

प्रमाणान्तरेणाप्राप्तस्य अर्थस्य प्रापकः विधिः अपूर्वविधिः इति । यथा व्रीहीन् प्रोक्षति इति । इदं च विधिवाक्यं दर्शपूर्णमासप्रकरणे श्रुतम् । एतद्विध्यभावे दार्शपूर्णमासिकेषु व्रीहिषु प्रोक्षणं कथमपि न प्राप्नोति । अतः व्रीहीन् प्रोक्षति इत्यस्य प्रमाणान्तरेणाप्राप्तार्थप्रापकत्वात् अपूर्वविधित्वम् इति । पक्षे अप्राप्तस्य प्रापकः विधिः नियमविधिः । यथा व्रीहीनवहन्ति इति । अनेन व्रीह्युद्देशेन अवहननं विहितम् । दर्शपूर्णमासयोः षड्प्रधानयागाः सन्ति । तत्र आग्नेययागः अन्यतमः । आग्नेययागे अष्टाकपालपुरोडाशः द्रव्यम् । पुरोडाशार्थं व्रीहयः उपात्ताः । पुरोडाशार्थमुपात्तेषु व्रीहिषु तुषविमोके लोकसिद्धकारणत्वाक्षिप्ततया अवघातः प्राप्नोत्येव , किन्तु लोकसिद्धकारणत्वाविशेषात् कदाचित् नखविदलनमपि प्राप्नोति । तथा च अवहननस्य आक्षेपतः प्राप्तिः पाक्षिक्येव । तत्र चान्यत्र च प्राप्तौ इतरव्यावृत्तिबोधकः विधिः परिसंख्याविधिः इति । यथा इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते इति । अयं मन्त्रः अग्निचयनप्रकरणे श्रुतः । एतद्विध्यभावे अगृभ्णन्रशनामृतस्य इति लिङ्गात् अश्वरशनाग्रहणे मन्त्रः प्राप्नोति । एवं लिङ्गाविशेषात् गर्दभरशनाग्रहणेऽपि मन्त्रः प्राप्नोति । अश्वरशनाग्रहणे गर्दभरशनाग्रहणे च मन्त्रस्य युगपत् प्राप्तौ इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते इत्यनेन मन्त्रस्य अश्वरशनाग्रहणे विनियोगे कृते गर्दभरशनाग्रहणे मन्त्रविनियोगस्य व्यावृत्तिः भवति ।

यद्यपि नियमविध्युदाहरणे व्रीहीनवहन्ति इत्यत्र पाक्षिकीप्राप्तिः, परिसंख्याविध्युदाहाराणे इमामगृभ्णन्रशनामृतस्ये-

*सम्पर्कसूत्रम् - 8277226830, Email- dr.govinda.hegde@csu.co.in
[१] विधिरसायनस्य मङ्गलश्लोकः ।

त्यश्वाभिधानीमादत्ते इत्यत्र नियता प्राप्तिः च वस्तुतः नास्त्येव । तुषविमोकेन कार्येणाक्षिप्ततया अवघातस्य पाक्षिकी प्राप्तिः वक्तव्या । व्रीहीनवहन्ति इति प्रत्यक्षशास्त्रं आक्षेपात् प्रागेव झटिति प्रवर्तते । प्रत्यक्षशास्त्रसिद्धेनैकेनोपायेन नैराकाङ्क्षात् अनियतोपायाक्षेप एव न प्रवर्तते । एवं इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते इति प्रत्यक्षशास्त्रेण अश्वरशनाग्रहणे विनियुक्तस्य मन्त्रस्य रशनाद्वयसाधारण्येन लैङ्गिकविनियोगकल्पनं न भवति । तथा च नियमपरिसंख्याविध्योरपि अपूर्वविधिवत् अत्यन्ताप्राप्तार्थविषयकत्वमेव इत्यतः नियमपरिसंख्याविध्योः अपूर्वविधितः भेदः नास्तीति चेत्

तथापि व्रीहीनवहन्तीत्यादिनियमशास्त्रस्याप्रवृत्तौ अर्थाक्षेपेण नखविदलनस्यापि कदाचित्प्राप्त्या अवघातस्यापि पाक्षिक्येव प्राप्तिः स्यात् । नियमशास्त्रस्यप्रवृत्तौ तु आक्षेपावतारप्रतिबन्धद्वारा अवघातस्य नियतता, एवं इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते इति परिसंख्याशास्त्रस्याप्रवृत्तौ मन्त्रस्य लिङ्गाविशेषेण गर्दभरशनाग्रहणे अपि विनियोगः स्यात् । परिसंख्याशास्त्रस्य प्रवृत्तौ मन्त्रलिङ्गावतारप्रतिबन्धद्वारा मन्त्रस्य गर्दभरशनातो निवृत्तिः लभ्यते । तथा च नियमपरिसंख्ययोः प्रवृत्तौ अपूर्वविध्यविशेषेऽपि आक्षेपमन्त्रलिङ्गावतारप्रतिबन्धद्वारा अवघातस्य नियमेन , गर्दभरशनायां मन्त्रवर्जनेन च फलवत्वात् फलतः नियमपरिसंख्याव्यपदेशः । अतः नियमपरिसंख्ययोः अपूर्वविधितः भेदः वर्तते ।

ननु इतरव्यावृत्तेः एवकारेण फलविवरणस्य चैक्येन नियमपरिसंख्ययोः साङ्कर्यं खलु इति चेत् - तथा हि - व्रीहीनवहन्तीत्यादिनियमे नखविदलनादिनिवृत्तिःइमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते इति परिसंख्यायां मन्त्रस्य गर्दभरशनातो निवृत्तिः इत्येवं इतरनिवृत्तिः नियमपरिसंख्यायामुभयत्रापि अविशिष्टः, एवं व्रीहीनवहन्तीति नियमविधेः अवघातेनैव तुषविमोकः कार्यः , परिसंख्याविधेः च अश्वरशनायामेव मन्त्रविनियोगः कर्तव्यः इत्येवम् उभयत्रापि फलविवरणमप्यविशिष्टम् । तथा च नियमपरिसंख्योः साङ्कर्यमिति चेन्न - व्रीहीनवहन्तीति अवघातशास्त्रेण अवघातनियमस्याकरणे (आक्षेपतः अवघाताप्राप्यव्रीह्यंशेषु अवघातप्रापणरूपस्याकरणे) उपायान्तरसाधारण्येन आक्षेपेण आपाततः उपायान्तरस्य निराकर्तुमशक्यतया उपायान्तरस्य निवृत्तिः न सम्भवति नियमस्य प्रथमोपस्थितत्वात् । अपि च अवहननियमस्य विधेयगतत्वेन प्रत्यासन्नत्वात् च नियमविधौ नियम एवं फलम् । नखविदलनादिनिवृत्तिस्तु चरमोपस्थितत्वात् अविधेयगतत्वेन विप्रकृष्टत्वाच्च अनुनिष्पादिनी तत् न मुख्यं फलम् । परिसंख्योदाहरणे अश्वरशनाग्रहणस्य गर्दभरशनाग्रहणस्य च मन्त्रसामर्थ्यात् नित्यप्राप्तिसम्भवेन स्वरूपप्राप्तेः नियमस्य फलत्वायोगात् इतरनिवृत्तिरेव फलम् । तथा च नियमपरिसंख्ययोः फलभेदे स्थिते एवकारेण उभयत्र फलविवरणन्तु नियमस्थले अयोगव्यवच्छेदार्थं परिसंख्यास्थाले अन्ययोगव्यवच्छेदार्थम् इति । तस्मात् नियमपरिसंख्याविध्योः अपूर्वविधितः भेदः वर्तते इति ।

## अनुशीलितग्रन्थसूची-

१. विधिरसायनम् ।

२. भाट्टदीपिका ।

३. जैमिनीयन्यायमाला ।

# विभक्त्यर्थसङ्ख्यान्वयप्रकारचिन्तनम्

डा. राघवेन्द्रः पी. आरोल्ली*
सहायकाचार्यः(अ.), के.सं.वि., रा.गा.परिसरः
श्रृङ्गेरी

***लेखसारः*** *– विभक्त्यर्थसङ्ख्यायाः प्रकृत्यर्थे पर्याप्तिसम्बन्धेन उद्देश्यतावच्छेदकव्याप्यपर्याप्तिसम्बन्धेन वा अन्वयः । समयवायादिना अन्वयाभ्युपगमे आकाशौ इत्यादिप्रयोगस्य प्रामाणिकत्वापत्तिः । पर्याप्तौ तादृशव्याप्यत्ववैशिष्ट्यं च वैज्ञानिकम्, तेन आकाशौ इत्यादिना भ्रमात्मकबोध उपपद्यते ।आकाशो न द्वौ इत्यादिवाक्यात् आकाशत्वावच्छेदेन द्वित्वावच्छिन्नप्रतियोगिताकभेदबोधाङ्गीकारः । घटपटौ न द्वौ इत्यादिस्थलेषु द्विवचनोपस्थापितद्वित्वस्यैवोद्देश्यतावच्छेदकत्वात् तदवच्छेदेन च द्वित्वावच्छिन्नप्रतियोगिताकभेदस्य घटपटद्वये अभावात् न तस्य प्रामाणिकत्वम् । तथा च पर्याप्तिस्मम्बन्धेनैव प्रत्ययार्थसङ्ख्यायाः प्रकृत्यर्थे अन्वयः इति सिद्धम् ।*

***कूटशब्दाः*** *– प्रकृत्यर्थः, विभक्त्यर्थः, सङ्ख्या, अन्वयः, पर्याप्तिः, घटपटौ न द्वौ, आकाशो न द्वौ*

अथ मानवानां विकासाय विचारसंवर्धनाय च प्राचीनाः ऋषयः दर्शनज्यौतिषायुर्वेदप्रभृतीः भारतीयविद्याः प्रणयामासुः । तेषु भाषासम्बद्धाः विचाराः अपि अन्यतमाः वर्तन्ते । पदानां संस्कारार्थं प्रवृत्ता व्याकरणविद्या साध्वसाधुपदविभागं बोधयति । तथैव पदार्थविवेकमपि सम्पादयति । शाब्दबोधविचाराः अपि तत्र तत्र कृताः बह्वीषु विद्यासु उपलभ्यन्ते । न्यायविद्यायां तावत् व्युत्पत्तिवादादयः ग्रन्थाः शाब्दबोधविमर्शायैव विनिर्मिताः दरीदृश्यन्ते ।

‘तत्र प्रथमार्थः प्रकृत्यर्थे विशेषणविधयान्वयिनी सङ्ख्यैव’[1] इत्यादिना ग्रन्थेन सङ्ख्यैव प्रथमाविभक्तेरर्थः इत्युक्त्वा सा च एकत्वादिसङ्ख्या प्रकृत्यर्थे पर्याप्तिसम्बन्धेन अन्वेति इति विषयमुपस्थापयन्ति गदाधरभट्टाचार्याः । तथा हि - एकत्वादिसङ्ख्यानां समवायादिसम्बन्धेन प्रकृत्यर्थेन सह अन्वयस्वीकारे आकाशमात्रबोधनपरात् आकाशपदात् द्विवचनप्रत्ययापत्तिः । यतः कस्यचित् पुरुषस्य अपेक्षाबुद्धिवशात् उत्पन्नस्य घटाकाशगतद्वित्वस्य समवायेन आकाशेऽपि सत्त्वात् द्विवचनोपस्थापितद्वित्वस्य आकाशे समवायेन अन्यवस्य च अबाधितत्वात् । अतः पर्याप्तिसम्बन्धेन अन्वयः अभ्युपगन्तव्यः इति । पर्याप्तिसम्बनधेन तु द्वित्वं घट-आकाशैतदुभयस्मिन् भवति, न तु केवले आकाशे नापि केवले घटे इति न तादृशप्रयोगापत्तिरिति ।

ननु एवमपि आपत्तिस्तदवस्थ एव । तथा हि घटे आकाशे एतदुभयस्मिन् द्वित्वपर्याप्तिरस्ति चेत् प्रत्येकं घटे अकाशे च द्वित्वपर्याप्तेरभावो न वक्तुं शक्यः, ‘प्रत्येकम् उभयानतिरेकाद्’[2] इति चेत् उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेरेव तत्र सम्बन्धत्वमभ्युपगम्यते । प्रकृते अकाशमात्रबोधनपरादाकाशशब्दाच्च न द्विवचनप्रत्ययापत्तिः, यतः तत्र उद्देश्यतावच्छेदकाकाशत्वाभाववति घटे द्वित्वपर्याप्तेः सत्त्वेन आकाशत्वव्याप्यपर्याप्तिसम्बन्धेन द्वित्वस्य प्रकृत्यर्थे अकाशेऽभावाद्, तेन सम्बन्धेन अन्वयस्य च बाधितत्त्वात् नापत्तिरिति । पर्याप्तौ उद्देश्यतावच्छेदकव्याप्यत्ववैशिष्ट्यं च वैज्ञानिकं[3] ग्राह्यम्, न तु वास्तवम् । अन्यथा यत्र आकाशमात्रबोधकात् द्विवचनान्तादाकाशपदात् योग्यताभ्रमात् भ्रमात्मकः शाब्दबोधो जायते तत्र निरुक्तविशिष्टपर्याप्तिसम्बन्धस्य अप्रसिद्ध्या[4] शाब्दबोधानुपपत्तिः स्यात् । आकाशत्वव्याप्यत्वविशिष्टपर्याप्तेः अप्रसिद्धत्वात् । पर्याप्तौ वैज्ञानिकं आकाशत्वव्याप्यत्ववैशिष्ट्यं तु प्रसिद्ध्यति । सामान्यतया तदभाववति तत्प्रकारकज्ञानस्य भ्रमत्वोपगमेऽपि क्वचित् संसर्गतावच्छेदकविशेषणाभाववति तद्विविष्टसंसर्गकज्ञानस्यापि भ्रमत्वं स्वीक्रियते । प्रकृते च आकाशत्वव्याप्यत्वस्य शब्दादौ प्रसिद्धस्य द्वित्वपर्याप्तौ विशेषणतया भानात् योग्यताभ्रमात् भ्रमात्मकशाब्दबोधोपपत्तिरिति ।

***सम्पर्कसूत्रम्*** - 9964582616, Email- dr.p.raghavendra@csu.co.in

[1] व्युत्पत्तिवादः

[2] व्युत्पत्तिवादः

[3] एकज्ञानविषयत्वविशिष्टमित्यर्थः ।

[4] आकाशगतद्वित्वपर्यप्तौ घटादिगतद्वित्वपर्याप्तौ वा आकाशत्वव्याप्यत्वस्य अभावात्, आकाशत्वव्याप्यत्वविशिष्टद्वित्वपर्याप्तिरपसिद्धैव ।

न च सम्पन्नो व्रीहिरित्यादाविव अत्रापि प्रत्ययार्थसङ्ख्यादेः प्रकृत्यर्थतावच्छेदके एव व्यापकतासम्बन्धेन अन्वयः कुतो नाभ्युपगम्यते । प्रकृत्यर्थताच्छेदके आकाशत्वे द्वित्वव्यापकत्वस्य अभावात् व्यापकतासम्बन्धेन द्वित्वस्यान्वयो बाधित इति न आकाशमात्रबोधनपरात् आकाशपदात् द्विवचनप्रत्ययापत्तिरिति वाच्यम् । घटौ इत्यादौ प्रकृत्यर्थताच्छेदकस्य घटत्वस्य स्वरूपतः उपस्थितत्वात् तत्र च पदार्थान्तरस्य अन्वयो न सम्भवेत्, अन्वयिताच्छेदकरूपेणोपस्थापिते एवान्वय इति नियमात् । न च स्वव्यापकोद्देश्यताच्छेदकवत्त्वसम्बन्धेन प्रकृत्यर्थे एव द्वित्वादेः अन्वयं ब्रूमः इत्यपि न सङ्गच्छते । यतः आकाशमात्रबोधकात् आकाशपदात् द्विवचनप्रत्यये सति योग्यताभ्रमात् शाब्दबोधोपपादनार्थं उद्देश्यताच्छेदके स्वव्यापकत्वांशे एव भ्रमत्वस्य उपगन्तव्यतया उद्देश्यताच्छेदकव्याप्यत्वविशिष्टपर्याप्तेः परित्यागे बीजाभावात् ।

अथ उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिरित्यत्र पर्याप्तौ विशेषणीभूता व्याप्तिः तद्वदन्यावृत्तित्वरूपा न वक्तुं शक्यते । तदा यत्र केवलान्वयिनः प्रमेयत्वादेः प्रकृत्यर्थतावच्छेदकता तत्र शाब्दबोधानुपपत्तिः । तथा हि प्रमेयौ इत्यत्र प्रमेयत्वं प्रकृत्यर्थतावच्छेदकम् । तच्च केवलान्वयि । अतः प्रमेयत्ववद्भेदस्याप्रसिद्ध्या तद्घटितव्याप्त्यप्रसिद्धिरित्यतः व्याप्तिघटितसम्बन्धेन द्वित्वस्य प्रकृत्यर्थे प्रमेये अन्वयबोधो न स्यात् । अतः व्यापकसामानाधिकरण्यरूपा व्याप्तिरेवात्र प्रवेशनीया । तदा द्वित्वपर्याप्तिव्यापकप्रमेयत्वसामानाधिकरण्यस्य द्वित्वपर्याप्तौ प्रसिद्धतया तेन सम्बन्धेनान्वयबोधो नानुपपन्नः । तथा च व्यापकसामानाधिकरण्यरूपव्याप्तिघटितसम्बन्धापेक्षया स्वव्यापकोद्देश्यतावच्छेदकवत्वसम्बन्धस्य लघुभूतत्वात् तेनैव प्रत्ययार्थसङ्ख्यायाः अन्वयाभ्युपगमो युक्त इति चेत् तदा आकाशो न द्वौ इत्यादिवाक्यजन्यबोधदशायां आकाशौ इत्यस्मात् वाक्यात् शाब्दबोधापत्तिः । तथा हि - आकाशो न द्वौ इत्यनेन वाक्येन आकाशे द्वित्वावच्छिन्नप्रतियोगिताकभेदः प्रतीयते । तत्र च द्वित्वस्य प्रतियोगिताच्छेदकता च स्वव्यापकाकाशत्वादिमत्वसम्बन्धावच्छिन्ना न भवति । तेन सम्बन्धेन द्वित्ववतः आकाशानुयोगिकभेदप्रतियोगिनः अप्रसिद्धत्वात् । अतः पर्याप्तिसम्बन्धावच्छिन्नावच्छेदकताकद्वित्वाच्छिन्नप्रतियोगिताकभेदः तेन वाक्येन बोध्यते इति स्वीकरणीयम् । तथा च एतादृशबोधदशायां पर्याप्तिसम्बन्धेन द्वित्वविशिष्टबोध एव प्रतिबध्यते, न तु तदितरसम्बन्धेनेति द्वित्वव्यापकाकाशत्ववत्वादिसम्बन्धेन द्वित्वप्रकारकबोधस्य आकाशौ इत्यादिवाक्यजन्यस्यापत्तिः सम्भवति ।

ननु आकाशो न द्वौ इत्यत्र केवलपर्याप्तिसम्बन्धेन द्वित्ववतः आकाशे भेदः न वक्तुं शक्यते, आकाशेऽपि घटाकाशोभयगतद्वित्वस्य पर्याप्तिसम्बन्धेन सत्त्वात् । आकाशत्वादिव्याप्यपर्याप्तिसम्बन्धेन द्वित्ववतः प्रतियोगिनः अप्रसिद्ध्या भेदः नैव वक्तुं शक्यते । तथा च आकाशो न द्वावित्यादिवाक्यात् शाब्दबोध एव न स्यादिति चेन्न । आकाशो न द्वौ इत्यादौ आकाशत्वावच्छेदेन द्वित्वावच्छिन्नप्रतियोगिताकभेदः प्रतीयते । आकाशादौ पर्याप्तिसम्बन्धेन प्रत्येकं द्वित्वस्य सत्त्वेऽपि द्वित्वपर्याप्तेरवच्छेदकं आकाशमात्रवृत्ति आकाशत्वादिकं न भवति । अपि तु उभयादिवृत्तिधर्म एव अवच्छेदको भवति । तथा च आकाशे आकाशत्वावच्छेदेन द्वित्वपर्याप्तेरभावात् पर्याप्तिसम्बन्धावच्छिन्नावच्छेदकताकद्वित्वावच्छिन्नप्रतियोगिताकभेदस्तु तेन वाक्येन बोध्यत इति ।

न चैवं सति घटपटौ न द्वौ इति प्रतीत्यापत्तिः । द्वित्वपर्याप्त्यवच्छेदकत्वस्य प्रत्येकं घटत्वे पटत्वे चासत्त्वात् पर्याप्तिसम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकद्वित्ववद्भेदस्य घटे पटे चाबाधितत्वादिति वाच्यम् । तत्र च द्विवचनोपस्थापितद्वित्वस्यैवोद्देश्यतावच्छेदकत्वात् तदवच्छेदेन च द्वित्वावच्छिन्नप्रतियोगिताकभेदस्य घटपटद्वये अभावात् । नञा बोध्यमानः व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावः उद्देश्यतावच्छेदकावच्छेदेनैव बोध्यते इति व्युत्पत्तेः । अतः घटत्वाद्यधिकरणे घटादौ घटत्वाद्यवच्छेदेन द्वित्वपर्याप्तेरसत्त्वेऽपि न तादृशबोधापत्तिरिति ।

न चैवमपि घटपदोत्तरैकवचनप्रत्ययार्थस्यैकत्वास्याविवक्षायां घटो न द्वौ इति प्रयोगापत्तिः । तथा हि - घटत्वं द्वित्वपर्याप्तेरनवच्छेकम् । न द्वौ इत्यनेन पर्याप्तिसम्बन्धावच्छिन्नावच्छेदकताकद्वित्वावच्छिन्नप्रतियोगिताकभेदः बोध्यते । स च घटत्वावच्छेदेन घटे अबाधितः इति वाच्यम् । घटत्वस्य द्वित्वपर्याप्त्यवच्छेदकत्वाभावेऽपि तस्य द्वित्वावच्छिन्नभेदानुयोगितावच्छेदकत्वाभावात् न तादृशप्रयोगापत्तिः । घटो न ज्ञानवान् इत्यादौ घटत्वादेः भेदप्रतियोगितावच्छेदकज्ञानाद्यनवच्छेदकत्वं

भेदानुयोगितावच्छेदकत्वं चास्ति चेदपि भेदप्रतियोगितावच्छेदकतानवच्छेदकं भेदानुयोगितावच्छेदकं भवत्येवेति न नियमः । तथा च निरुक्तस्थले घटत्वस्य भेदानुयोगितावच्छेदकत्वाभावात् तदवच्छेदेन द्वित्ववद्भेदस्य बोधनासम्भवात् न तत्र तादृशप्रयोगापत्तिरिति ।

अस्तु घटत्वादीनां द्वित्वपर्याप्त्यभाववति केवलघटादौ सत्त्वादतिप्रसक्तत्वेऽपि द्वित्वपर्याप्त्यवच्छेदकत्वं स्वीकुर्मः । यतः घटौ इति प्रतीत्या घटे द्वित्वप्रकारकभानस्यानुभवसिद्धत्वात् तत्र च द्वित्वपर्याप्तेरवच्छेदकत्वस्य घटादाववश्यमभ्युपेयत्वादिति । तथा च पूर्वोक्तनियमस्वीकारेऽपि द्वित्वपर्याप्त्यवच्छेदकत्वात् घटत्वादेः न भेदानुयोगितावच्छेदकत्वामिति नैकत्वाविवक्षायां घटो न द्वौ इत्यादिप्रयोगापत्तिः । वस्तुतस्तु घटत्वादिकं तु द्वित्वपर्याप्तिरूपव्यक्तिविशेषस्य अतिप्रसक्तत्वादवच्छेदकं न भवति चेदपि द्वित्वपर्याप्तिसामान्यस्यावच्छेदकं तु भवत्येव अनतिप्रसक्तत्वात् । घटादौ च यत्किञ्चिद्व्यक्तिसमवेतापेक्षाबुद्धिजन्यद्वित्वादिकमस्त्येवेत्यतः घटत्वादेः द्वित्वपर्याप्तित्वावच्छिन्नावच्छेदकत्वमिति न पूर्वोक्तापत्तिरिति ।

एतावता पर्याप्तिसम्बन्धेनैव प्रत्ययार्थसङ्ख्यायाः प्रकृत्यर्थे अन्वयः इति सिद्धः । नन्वेवमपि पर्याप्त्याख्यविलक्षणसम्बन्धस्य प्रसिद्धौ इदं सर्वमुपपद्यते, परन्तु स सम्बन्ध एवाप्रसिद्धः । तत्कथं तेन सम्बन्धेन प्रत्ययार्थसङ्ख्यायाः अन्वयसम्भव इति । आकाशो न द्वौ इत्यादिस्थले तु समवायेन द्वित्ववद्भेद एव प्रतीयते । नच आकाशे द्वित्वसमवायस्य सत्त्वात् कथं समवायेन द्वित्ववद्भेदो बाधितः प्रतीयते इति वाच्यम् । तत्र च अतिप्रसक्तत्वात् आकाशत्वादिकं न द्वित्वस्य अवच्छेदकमिति स्वीक्रियते इत्यतः द्वित्वाद्यनवच्छेदकाकाशावच्छेदेन समवायसम्बन्धावच्छिन्नावच्छेदकताकद्वित्वावच्छिन्नप्रतियोगिताकभेदः अबाधित एव प्रतीयते इति चेन्न । आकाशौ इत्यादिवाक्यजन्यशाब्दबोधस्य अप्रमात्वानुपपत्त्या पर्याप्त्याख्यविलक्षणसम्बन्धः सिद्ध्यति[१] । अन्यथा समवायेन द्वित्ववति आकाशे समवायेन द्वित्वं प्रकारतया भासते इति आकाशौ इति वाक्यजन्यबोधस्य प्रमात्वापत्तिः । तस्मात् अन्यस सम्बन्धस्य प्रकारतावच्छेदकत्वासम्भवात् पर्याप्त्याख्यः विलक्षणः सम्बन्धः तत्र प्रकारतावच्छेदकतया स्वीक्रियते । न च पर्याप्त्यपेक्षया उद्देश्यतावच्छेदकत्वव्याप्यसमवायस्य सम्बन्धत्वोपगमे आकाशौ इत्यादिवाक्यानाम् अप्रामाण्यं सिद्ध्यति । आकाशे समवायेन द्वित्वस्य सत्त्वेऽपि आकाशत्वव्याप्यत्वविशिष्टसमवायेन द्वित्वं बाधितमेव । आकाशत्वाभाववत्यपि घटादौ द्वित्वसमवायस्य सत्त्वादिति वाच्यम् । तथा सति घटौ इत्यादिवाक्यानामपि अप्रामाण्यप्रसङ्गः । समवायस्य ऐक्यात् द्वित्वसमवायस्य पटादावपि सत्त्वात् तत्र च घटत्वाभावात् घटत्वव्याप्यत्वविशिष्टः द्वित्वसमवायो न भवतीत्यतः बाधितार्थबोधकत्वादप्रामाण्यप्रसङ्ग इति । यदि तत्र घटत्वव्याप्यद्वित्वप्रतियोगिकसमवायसम्बन्धेन द्वित्वस्य घटादावन्वयो न बाधितः, यत्र घटद्वये कयाचिदपेक्षाबुद्ध्या उत्पन्नस्य द्वित्वस्य पटादावभावात् घटत्वव्याप्यत्वं सूपपद्यते इति उच्यते तदा तादृशउद्देश्यतावच्छेदकव्याप्यत्वविशिष्टद्वित्वसम्बन्धेनैव प्रत्ययार्थस्यान्वयो वक्तुं शक्यः, तथा सति आकाशादौ आकाशत्वव्याप्यत्वविशिष्टस्य द्वित्वस्याभावात् न तेन सम्बन्धेन आकाशौ इत्यादिवाक्यात् द्वित्वान्वयबोधः सम्भवति । घटादौ तु सम्भवतीति ।

## आकरग्रन्थाः -

- व्युत्पत्तिवादः - गदाधरभट्टाचार्याः
- गूढार्थतत्त्वालोकः - बच्चा झा
- आदर्शव्याख्यासहितः व्युतपत्तिवादः - सुदर्शनाचार्यः
- विद्वन्मनोरमा - एन्. एस्. रामानुजताताचार्यः

[१] आकाशौ इत्यादिवाक्यजन्यशाब्दबोधः समवायातिरिक्तसम्बन्धेन द्वित्वप्रकारकः समवायेन द्वित्वविशिष्टाकाशाविषयकत्वे सति अप्रमात्वात् ।


ISSN : 2249-538X

# शास्त्रपरम्परायां शास्त्रशिक्षणस्य सम्प्रत्ययानां नवचिन्तनम्

डा. रामजियावन प्रजापतिः*
सहायकाचार्यः(अ.), के.सं.वि., रा.गा.परिसरः
शृङ्गेरी

***लेखसारः*** *– शास्त्रपरम्परायां शास्त्रशिक्षणे नवचिन्तनप्रकरणे आधुनिकतायाः वैचारिकायामे वयं परतन्त्राः न भवेम । अस्माभिः शास्त्रपरम्परायां प्राचीनशास्त्रीययचिन्तकैः साकम् आधुनिकचिन्तकैः प्रदत्त शिक्षणसिद्धान्तानाम् अनुप्रयोगः करणीयः । प्राचीनभारतीयमनोवैज्ञानिकशिक्षणपद्धत्या सह आधुनिक-इलेक्ट्रानिक्ससंसाधनानां समन्वितानुप्रयोगः आवश्यकः वर्तते । 'शास्त्रपरम्परायां शास्त्रीयमनोवैज्ञानिकसम्प्रत्ययानाम् अनुप्रयोगैः सह आधुनिकशिक्षायाः प्रमुखायामानां समन्वितानुप्रयोगः एव शिक्षायां शास्त्रपरम्परया नवचिन्तनम् अथवा नवाचारः भवितुमर्हति ।*

***कूटशब्दाः*** *– आधुनिकं, पारम्परिकम्, आत्मचिन्तनं, वैचारिकं, व्यावहारिकं, शैक्षिकं, सामाजिकम्, आध्यात्मिकम्, मूल्यानां संरक्षणं, संवर्धनं, साहित्यशास्त्रं, सत्गुणः, रजोगुणः, तमोगुणः, कामः, क्रोधः, मनसः नियंत्रणम्, अभ्यासेन वैराग्येण च, शिक्षामनोविज्ञानं चिन्तनम् ।*

## उपोद्घातः

शास्त्रपरम्परायाम् आमुष्याः संस्कृतभाषायाः वाङ्मये चतुर्दशविद्याः, इतिहासद्वयं, साहित्यशास्त्रम् आधुनिकसंस्कृतकृतयश्च समाह्रियन्ते । तत्र अधोदर्शितश्लोकेन चतुर्दशविद्यास्तावत् ज्ञायन्ते ।

**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । धर्मशास्त्रं पुराणं च विद्याश्चेमाश्चतुर्दश ॥**
**आयुर्वेदो धनुर्वेदो गांधर्वश्चेति ते त्रयः । धर्मशास्त्रं पुराणं विद्याश्चेमाश्चतुर्दश ॥**
**अर्थशास्त्रं चतुर्थं तु विद्याह्यष्टादशैव हि । ज्ञेयाब्रह्मर्षयः पूर्वं तेभ्यो देवर्षयः पुनः[१] ॥**

एतद्भाषावाङ्मयमूलस्तम्भा अपौरुषेयाः ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदश्च इति चत्वारः सन्ति । षड्वेदाङ्गानि विलसितानि सन्ति । तानि च-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥ शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते[२] ॥**

तथैव षड्दर्शनानि न्याय-योग-साङ्ख्य-वैशेषिक-पूर्वमीमांसोत्तरमीमांसाश्च प्रतिभान्ति । तथा 108 उपनिषत्सु 10 उपनिषदः प्रधानाः वर्तन्ते । यथा-

**ईश-केन-कठ-प्रश्न-मुण्ड-माण्डुक्यतित्तीरिः । ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं तथा ॥**

तथैव अष्टादशपुराणानि विलसन्ति । यथा-

**मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् । अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ॥**

एवमेव शास्त्रशिक्षणे षोडशस्मृतयः, इतिहासद्वयं रामायणमहाभारते च, साहित्यशास्त्रान्तर्भूतानां कालिदासादीनां कृतयः, मम्मटादीनाम् आलङ्कारिकग्रन्थाश्च अन्तर्भवन्ति । शिष्यते अनेन इति शास्त्रम् । यत् लौकिक-पारलौकिकज्ञानस्य

---

***सम्पर्कसूत्रम्** – 8551084832, Email – ramjiyavanprajapati786@gmail.com
[१].ब्रह्माण्डपुराणम्- पूर्वभागः- अध्यायः-35 श्लोकः- 87-88-89
[२]पाणिनीयशिक्षा, श्लोक-41-42,

निधिः वर्तते । अतः कामधेनुः दुग्धा, अमृतं संस्कृतं ज्ञानविज्ञानपोषकञ्च इति वर्तते शास्त्रशिक्षणम् । संस्कृतजगति शास्त्रं तु निष्कलङ्कितं, निर्विकारं, निर्द्वन्दं, शाश्वतात्मा इव राजते । अत्र इयम् अतिशयोक्तिः न भविष्यति यत्- शास्त्रज्ञानं विना मानवजीवनं मूल्यहीनं भवति ,तथैव जीवनगतिः अवरूद्धा भवति । शास्त्रज्ञानं विना मानवः पुरुषार्थरहितः रसविहीनः अनाचारे संलग्नः भवति । एवमेव शिक्षणे शास्त्रीयसम्प्रत्ययानां समावेशः अनिवार्यतया करणीयः । शास्त्रपरम्परायां जगति अस्मिन् मानवः एव सर्वेभ्यः जीवेभ्यः विवेकशीलः प्राणिः विद्यते । स एव आत्मचिन्तने समर्थः भवति । एवमेव आत्मचिन्तनेन वैचारिक-व्यावहारिक-शैक्षिक-सामाजिक-सांस्कृतिक-राष्ट्रिय-आध्यात्मिक-लौकिकस्तरेषु विद्यमानमूल्यानां संरक्षणं संवर्धनं कर्तुं समर्थः भवति । मानवीयमूल्यानां संवर्धने अथवा न्यूनीकरणे अपि स एव मुख्यकर्ता भवति । विविधस्तरेषु लौकिक-पारलौकिकस्तरे मानवीयमूल्यानां विकासस्य दर्पणः अपि मानवः एव भवति । जन्म-मृत्योः जीवनपथि यत्र-यत्र क्लेशाः जायन्ते तत्र पारस्परिकविचाराणां समन्वयस्थापनं कर्तव्यम् । यदि पारस्परिकसमन्वयस्थापने असफलता भवति तर्हि जीवने नैतिकमूल्यानां न्यूनता भवति । तथैव जगति अशान्तेः कलहस्य च वातावरणानि जायन्ते । मानवजीवने अशान्तेः कलहस्य च प्रमुखकारकाणां वर्णनं भगवता श्रीकृष्णेन मार्मिकतया कृतमस्ति । यथा-

**कामः एषः क्रोधः एषः रजोगुणसमुद्भवः । महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥**[१]

अर्थात् जगति अस्मिन् प्रामुखतया त्रयः गुणाः विद्यन्ते । ते यथा सत्वगुणः, रजोगुणः, तमोगुणश्च भवति । तत्र एषः कामः, क्रोधश्च रजोगुणात् एव उत्पद्यते । ते च जगति मानवानां महान् रिपुः प्रतीयन्ते । एते एव च कामः क्रोधश्च महाकामी, महाभोक्ता, महापाप्मा इव आचरन्ति । एते हि मानवीयमूल्यानां विघटनाय प्रमुखकारकाः भवन्ति । अनेनैव वैश्विकमूल्यानाम् अधोगतिः भवति । अतएव जगति कामः क्रोधश्च मानवानां महान् रिपुः वर्तते । ये जनाः एतान् कामान् क्रोधान् च मृत्योः प्राक् एव सोढुं शक्नुवन्ति, ते एव जनाः सुखुनिः नराः भवन्ति । यथा-

**शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् । कामक्रोद्भवं वेगं, सः युक्तः स सुखी नरः ॥**[२]

तथैव संसारेऽस्मिन् ज्ञानसदृशं किमपि पवित्रं न विद्यते । मानवः मनसा-वाचा-कर्मणा च पवित्रः ज्ञानेन एव भवितुमर्हति । यथा-

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते । तत्स्वयं योगसंसिद्धिः कालेनात्मनि विन्दति ॥**[३]

"**मनः एव मनुष्याणां कारणं बन्धमोक्षयोः**" इति शास्त्रपरम्परायां शास्त्रशिक्षणे नवचिन्तनेन सह तादात्मीकरणम् एव भवति । अतः मन इन्द्रिययोः नियंत्रणं परमावश्यकं भवति । मनः एव सर्वेषां कार्याणाम् आधारः भवति । यदा मनः स्थरं भवति तदा सर्वाणि कार्याणि सौकर्येण भवन्ति, परन्तु अस्थिरमनसा तु किञ्चिदपि न सम्भवति । परन्तु मन-इन्द्रियोः नियंत्रणम् अति दुष्करं कार्यं भवति । इन्द्रियाणामपि नियन्त्रणं तथैव सुदुष्करः भवति यथा वायोः नियन्त्रणं भवति । अतः इन्द्रियाणां नियन्त्रणं कठिनतरं भवति । यथा-

**चञ्चलं हि मनः कृष्ण ! प्रमाथि बलवद् दृढम् । तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥**
**असंशयं महाबाहो ! मनो दुर्निग्रहं चलम् । अभ्यासेन तु कौन्तेय,वैराग्येण च गृह्यते ॥**[४]

[१]श्रीमद्भग्वद्गीता
[२]श्रीमद्भग्वद्गीता
[३]श्रीमद्भग्वद्गीता, अध्याय-4.श्लोक38
[४]श्रीमद्भगवदगीतायाम्


ISSN : 2249-538X

अतः मनसः नियन्त्रणम् अभ्यासेन वैराग्येण च भवितुमर्हति । इन्द्रियाणां नियन्त्रणं केवलं कथनेन प्रवचनेन वा न भवति । जनानां मनसः स्तिथिः यथा भवति तथैव तेषां चिन्तनं भवति । शास्त्रशिक्षणाधिगमः केवलं कथनेन भाषणेन च न सम्भवति अपि तु तत्र शास्त्राभ्यासः परमावश्यकः भवति । शास्त्रीयचिन्तकैः प्रदत्तसिद्धान्तानां नियमानाञ्च अनुप्रयोगः विश्लेषणं च कृत्वा शास्त्रशिक्षणस्य साफल्यता अनुभूयते । शास्त्रशिक्षणे शिक्षा तु एतादृशी कामदुग्धेनुः अस्ति यया सवेषु क्षेत्रेषु कामरूपीक्षुधायाः पूर्तिः संभवति । शिक्षायां भाषायाः स्थानम् अत्यन्तं महत्त्वपूर्णं भवति । एवमेव भाषा शास्त्रशिक्षणस्य परमं साधनं भवति । अतः भाषाशिक्षणं शैक्षिकजगति प्राथम्येन परमावश्यकं भवति । भाषाशिक्षणे मनोवैज्ञानिक सम्प्रत्ययानां महत्त्वम् अतीव वैज्ञानिकं भवति । अतः अस्मिन् अनुक्रमे सम्प्रति अनुसन्धानजगति भाषाशिक्षणविकासे विशिष्टप्रयासो जातः । परन्तु प्रयासोऽयम् अग्रे अपि अधिकावश्यकः वर्तते । यत्र तत्परता-परमश्रद्धा-इन्द्रियाणाम् उपरि नियन्त्रणेत्यादीनां संप्रत्ययः परमावश्यकः भवति । यथा श्रीमद्भगवद्गीतायां वर्णितमस्ति-

**श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः । ज्ञानं लब्ध्वा शान्तिमचिरेणाधिगच्छति ॥**[१]

**शास्त्रशिक्षणे समस्याः** - शास्त्रशिक्षणक्षेत्रे श्रवण-भाषण-पठन-लेखनसम्बद्धप्रमुखसमस्याः दृश्यन्ते । एतत्समस्या-पनोदनाय मनोवैज्ञानिकविधिना शास्त्रशिक्षणम् अतीव प्रभावकारी भवितुमर्हति । क्षेत्रेऽस्मिन् विद्वद्भिः नैकः मनोवैज्ञा-निकभाषाशिक्षणसिद्धान्तानां प्रविधीनाञ्च अनुप्रयोगः कृतः । शैक्षिकजगति विद्वांसः उन्नतभाषाशिक्षणप्रदानाय सततप्र-यासरताः सन्ति । पुनरपि शिक्षायाः प्रभावकारिमनोवैज्ञानिकसंप्रत्ययाः के सन्ति ? तेषाम् आवश्यकता , क्षेत्राणि संब-न्धोद्देश्यानि च कानि सन्ति ? विषयवस्तूनि साधनानि च कानि सन्ति ? एत्येतेषां समग्रायामानाम् उपरि पुनः विचारणा करणीया ।

शास्त्रशिक्षणे शिक्षामनोविज्ञानं तत् विज्ञानम् अस्ति यत्- शैक्षिकव्यवहारसम्बद्धसमस्यानाम् अध्ययनं, विवेचनं, विश्लेषणं समाधानञ्च करोति । शिक्षामनोविज्ञानं शिक्षया सह छात्राणां सर्वाङ्गीणविकसने महत् साहाय्यम् आचरति । स्किनर महोदयेन उक्तञ्च- **''शिक्षामनोविज्ञानं शैक्षिकपरिस्थितिषु मानवीयव्यवहाराणाम् अध्ययनं करोति ।''**

**'शिक्षामनोविज्ञानं व्यक्तेः जन्मतः वृद्धावस्थापर्यन्तम् अधिगमानुभवानां वर्णनं विवेचनं च करोति ।''**[२]

उपर्युक्ततथ्यानाम् अवलोकनेन इदं स्पष्टं भवति यत् -

1 - शिक्षामनोविज्ञानस्य केन्द्रं मानवव्यवहारः भवति ।

2 - शिक्षामनोविज्ञानस्य अनुसन्धानेन निरीक्षणेन च प्राप्ततथ्यानां संग्रहः भवति ।

3 - शिक्षामनोविज्ञाने शिक्षासम्बद्धसमस्यानां समाधानस्य पद्धतिः वर्तते ।

शास्त्रशिक्षणे शिक्षामनोविज्ञानस्य आवश्यकता-

1. बालकानां स्वभावस्य व्यवहारस्य अभिज्ञानाय शिक्षामनोविज्ञानस्य आवश्यकता भवति ।
2. बालकान् स्ववातावरणैः सह सामञ्जस्यस्थापनाय उन्मुखीकरणाय च शिक्षामनोविज्ञानस्य आवश्यकता भवति ।
3. भाषाशिक्षायाः उद्देश्यानां पूर्तये भाषाशिक्षायाः परिचयप्रदानकरणाय शिक्षामनोविज्ञानस्य आवश्यकता भवति ।

---

[१] श्रीमद्भगवद्गीता, अध्याय-4.श्लोक39

[२] क्रो. एण्ड क्रो.

4. शिक्षणाधिगमे शास्त्रशिक्षणस्य विशिष्टसिद्धान्तानां प्रविधीनाञ्च ज्ञानप्रदानाय शिक्षामनोविज्ञानस्य आवश्यकता भवति ।
5. बालकानां सांवेगिकनियन्त्रणाय, चरित्रनिर्माणाय शीलगुणमापनाय च सहायताप्रदानकरणाय शिक्षामनोविज्ञानस्य आवश्यकता भवति ।

अतः शास्त्रशिक्षणे ब्रूनर-जीनपियाजेट-पावलव-थारण्डैकेत्यादिमहोदयैः विविधसिद्धान्तानां नियमानाञ्च प्रतिपादनं कृतमस्ति । परन्तु भारतीयशास्त्रेषु अपि शिक्षणसिद्धान्तस्य बहवः अमूल्यसिद्धान्ताः वर्तन्ते । अतः शास्त्रीयसम्प्रत्ययानां सिद्धान्तानामुपरि अपि एकदा दृष्टिपातः करणीयः । यथा भाषाशिक्षणे उत्कृष्टशास्त्रीयसिद्धान्तानां मनोवैज्ञानिकसंप्रत्ययानां च संक्षिप्तविवरणम् अधोलिखितानुक्रमे द्रष्टुं शक्यते-

1. शास्त्रशिक्षणे वंशानुक्रमानुसारं मनोवैज्ञानिकशास्त्रशिक्षणसंप्रत्ययः- भाषाशिक्षणसिद्धान्ते वंशानुक्रमस्य संप्रत्ययः वर्णितः अस्ति । अस्मिन् सिद्धान्ते येषां बालकानाम् आनुवांशिकप्रकृतिः यथा भवति तथा एव तेषाम् अधिगमस्वभावः अपि भवति । सर्वे जनाः स्ववंशानुगुणम् एव आचरणानाम् अनुशरणं कुर्वन्ति । तथैव ते अपरेण सह व्यवहारं धर्मं च आचरन्ति । मानवाः कस्मिंश्चित विषये विशिष्टं ज्ञानं वंशानुगुणम् एव लभ्यन्ते । अतः भाषाशिक्षणे वंशक्रमानुसारम् एव मनोवैज्ञानिकाधिगमसंप्रत्तयानां अनुप्रयोगः करणीयः । यथोक्तञ्च-

   **प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीसमाः । श्रुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥**
   **अथवा योगीनामेव कुले भवति धीमताम् । एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥**[१]

2. शास्त्रशिक्षणे व्यक्तिगतभिन्नतायाः मनोवैज्ञानिकसंप्रत्ययः- भाषाशिक्षणे शास्त्रीयमनोवैज्ञानिकसंप्रत्ययानां महत्त्वम् अधिकम् वर्तते । शिक्षायाः 'वैयक्तिकभिन्नतायाः' मनोवैज्ञानिकसंप्रत्ययस्य वर्णनम् करुणरसाचार्येण 'महाकविभवभूतिना' उत्तररामचरिते अतीव मार्मिकतया कृतमस्ति । यथा-

   **वितरति गुरूः प्राज्ञे विद्यां यथैव जड़े, न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।**
   **भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा, प्रभवति शुचिर्विंबग्राहे मणिर्न मृदादयः ॥**[२]

3. शास्त्रशिक्षणे अधिगमप्रक्रियायाः मनोवैज्ञानिकसंप्रत्ययः- अधिगमप्रक्रियायाः मनोवैज्ञानिकशिक्षणसंप्रत्यये आत्मानुभवः आवश्यकः भवति । शिक्षणाधिगमस्य अभ्यासः यदि आत्मानुभवेन क्रियते तर्हि शिक्षणाधिगमः अत्यन्तप्रभावपूर्णः भवितुमर्हति । अस्मिन् क्रमे श्रद्धा-विश्वासः, विनयशीलता-जिज्ञासा-सेवाभावः अन्तर्कारकाणि भवन्ति ।
4. शास्त्रशिक्षणे मानसिकस्वास्थस्य मनोवैज्ञानिकसंप्रत्ययः

   युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु । युक्तस्वप्नवबोधस्य योगो भवति दुःखहा ॥[३]

5. शास्त्रशिक्षणे विविधायामानोपरि अपि अवधानं दातव्यम्-

   1. विद्यालयेषु मनोवैज्ञानिकभाषाशिक्षणसम्प्रत्ययानाम् अनुप्रयोगः वैश्विकपरिप्रेक्षेषु करणीयः ।

[१]श्रीमद्भग्वद्गीता, अध्याय-6.श्लोक 41
[२]भवभूतिकृतम्, उत्तररामचरितम्
[३]श्रीमद्भग्वद्गीता, अध्याय-6.श्लोक 17


ISSN : 2249-538X

2. शास्त्रशिक्षणे साहित्यिक-कला-वैयाकरण-वाणिज्यक्षेत्रेषु च मनोवैज्ञानिकरीत्या शिक्षणसम्प्रत्ययानामुपरि विशिष्टं बलं दातव्यम् ।
3. शिक्षणप्रशिक्षणसंस्थासु मनोवैज्ञानिकभाषाशिक्षणप्रयोगशालायाः प्रतिस्थापनम् अनुप्रयोगश्च कर्तव्यम् ।
4. शास्त्रीयमनोवैज्ञानिकभाषाशिक्षणे आधुनिकमनोवैज्ञानिकसंप्रत्ययानामुपरि चिन्तनं कर्तव्यम् ।
5. भाषाशिक्षणे सम्प्रति अथवा भविष्ये का समस्या भवितुमर्हति अथवा भविष्यति इति समग्रायामानामुपरि पुनर्विचारः कर्तव्यः ।
6. भाषाशिक्षणे शात्रीयमनोवैज्ञानिकसम्प्रत्ययानाम् अनुप्रयोगः अधिकाधिकः कर्तव्यः ।
7. स्वस्थनागरिकनिर्माणाय स्वस्थमनोवैज्ञानिकप्रतियोगीशिक्षणसंस्कृतीनां विकासः करणीयः ।
6. शास्त्रपरम्परायां शास्त्रशिक्षणस्य निर्पेक्षदृष्टिः- सम्प्रति शास्त्रपरम्परायां शिक्षणस्य निर्पेक्षदृष्टिकोणस्य आवश्यकता वर्तते । अस्मिन् अनुक्रमे शास्त्रीयशिक्षणस्य तार्किक-वैचारिक-प्रायोगिकसम्प्रत्ययानाम् अनुप्रयोगः आवश्यकः वर्तते । यतो हि शास्त्रशिक्षणे विविधशैक्षिकमनोवैज्ञानिकायामानामोपरि अवधानस्य चिन्तनस्य च महती आवश्यकता वर्तते । अत्र धनात्मक तथा ऋणात्मकञ्च द्वयोः पक्षयोः उपरि अवधानं दातव्यम् । यथा- शास्त्रेषु वर्णितमस्ति यत्- यथा केवलम् एकस्मिन् पक्षे चिन्तनेन कश्चन कार्यः सफलः न भवितुमर्हति तथैव शास्त्रचिन्तने अपि भवति । आध्यात्मिकक्षेत्रे अपि उक्तमस्ति यत्- यथा अनित्यं विना नित्यस्य प्राप्तिः न संभवति तथैव नित्यं विना अपि अनित्यस्य प्राप्तिः न संभवति । अतः शास्त्रशिक्षणे अपि आधुनिक-पारम्परिकद्वयोः पक्षयोः समन्वयः आवश्यकः भवति । श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन उक्तमस्ति-

**'यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् । एवं पुरूष कारेण विना दैवं न सिद्धयति'** ॥

## निष्कर्षः

शास्त्रपरम्परायां शास्त्रशिक्षणे नवचिन्तनप्रकरणे आधुनिकतायाः वैचारिकायामे अस्मान् परतन्त्रः न भवेम । । अस्माभिः शास्त्रपरम्परायां प्राचीनशास्त्रियचिन्तकैःसाकं आधुनिकचिन्तकैः प्रदत्त शिक्षणसिद्धान्तानाम् अनुप्रयोगः करणीयः । प्राचीनभारतीयमनोवैज्ञानिकशिक्षणपद्धत्या सह आधुनिक-इलेक्ट्रानिक्ससंसाधनानां समन्वितानुप्रयोगः आवश्यकः वर्तते । 'शास्त्रपरम्परायां शास्त्रीयमनोवैज्ञानिकसम्प्रत्ययानाम् अनुप्रयोगैः सह आधुनिकशिक्षायाः प्रमुखायामानां समन्वितानुप्रयोगः एव शिक्षायाम् शास्त्रपरम्परया नवचिन्तनम् अथवा नवाचारः भवितुमर्हति । मनुस्मृतेः अपि सत्यमेव उक्तम्-

**एतद्देशप्रसूतस्य सकाशासदग्रजन्मनः । स्वं स्वं चरित्रं शिक्षेरन् पृथ्व्यां सर्वमानवाः** ॥[१]

अर्थात् देशेऽस्मिन् जायमानाः अग्रजाः अथवा पृथिव्याः सर्वे मानवाः स्वं-स्वचरित्रेण शिक्षाग्रहणं करिष्यन्ति । यतो हि देशेऽस्मिन् लक्ष्यनिर्देशकाः वेदोपनिषद्पुराणरामायणमहाभारतादीनाञ्च विचारभावुपदेशानां दिव्यदृष्टिः दूरदर्शितापूर्णा वर्तते । अनेनैव मानवीयमूल्यानां संरक्षण, संपोषणं संवर्धनञ्च सम्भवति । अतएव शास्त्रियसामाजिकनैतिकमूल्यानां

[१] (मनुस्मृतिः)

आदर्शप्रतिमानानि भारतीयकाव्येषु एव विद्यन्ते । यथा रामायणे उक्तमस्ति-

मरणान्तानि वैराणि निवृत्तं नः प्रयोजनम् । क्रियतामस्य संस्कारो ममाप्येष यथा इव ॥[१]

## अनुशीलित ग्रन्थसूची


.1 श्रीमद्भग्वद्गीता गीताप्रेस्, गोरखपुरम् ।

2. महाभारतम्, गीताप्रेस्, गोरखपुरम् ।
3. मनुस्मृतिः, गीताप्रेस्, गोरखपुरम् ।
4. वाल्मीकिरामायणम्, गीताप्रेस्, गोरखपुरम् ।
5. उत्तररामचिरतम्, भवभूतिः ।
6. पाणिनीयशिक्षा, (संवत्-2050), श्लोक-41-42, भाष्यकृत् अवस्थी, वचुलालो ज्ञानोपाह्वः, भाष्य-भाषान्तरकारः, शर्मा, बालकृष्णः, श्रीनिवासरथः प्रकाशकः, उज्जयिनी, म.प्र. ।
7. ब्रह्माण्डपुराणम्, गीताप्रेस्, गोरखपुरम् ।
8. रस्तोगी, डा. उर्मिला, मनुस्मृतिः (2004), जे.पी. पब्लिशिंग् हाउस, दिल्ली ।
9. Andrew Fraser, ”Creativity and Innovation in Education : Moving Beyond Best Practice” Australian Council of Educational Leadership conference presentation, Sydney, Australia, 2007.

10 . 2. Hedley Beare, “How We Envisage Schooling in the 21st Century : Applying the New ‘Imaginary,’” Specialist Schools and Academies Trust, 2006.

11. Hedley Beare, “How We Envisage Schooling in the 21st Century : Applying the New ‘Imaginary,’” Specialist Schools and Academies Trust, 2006, pp. 12-16.
12. National College of School Leadership, Networked Learning, www.ncsl.org.uk/networked-index.htm.
13. Specialist Schools and Academies Trust, www.specialistschools.org.uk/default.aspa.
14. Specialist Schools and Academies Trust/International Networking for Educational Transformation Australia, “Raising Achievement, Transforming Learning,” www.sstinet.com.au.
15. Andrew Fraser, “Teacher-led Innovation and Development to Improve Professional Practice, Churchill Fellowship Report, 2006, p. 33.


[१] (वाल्मीकिरामायणम्)

 ISSN : 2249-538X

# कालप्रभेदाः

श्री ब्रजेशपाठकः*
सहायकाचार्यः(अ.), के.सं.वि., रा. गा. परिसरः
श्रृङ्गेरी

॥ तस्मै नमः परमवेगवतेऽक्षराय व्यालोत्कटाय गगनध्वजप्राणधाम्ने ।
सृष्टिस्थितिप्रलयहेतुधराय तुभ्यं घोराय कालपुरुषाय महेश्वराय ॥[१]

कालविषये यदा अस्माभिः चिन्तनं क्रियते तत्र नवविधकालमानानि लभ्यन्ते । आशङ्क्यमुदेति यत्, कालमानानि नवैव किमर्थम् ? पञ्चविधं किमर्थं न ? षड्विधं किमर्थं न ? एवं विचारे सति, एकतः नवपर्यन्तं यदा अङ्कस्य गणना क्रियते, तत्र नव पूर्णांकः भवति । तेन नवविधकालमानमिति यदा उच्यते तदा तस्य पूर्णता भवति । 'कल'संख्याने इति धातुना 'काल' इति शब्दः निष्पद्यते । यथा हारीतसंहितायाम् –

कालः कलयते लोकं कालः कलयते जगत् । कालः कलयते विश्वं तेन कालो विधीयते ॥ [२]

पुनश्च उच्यते –

कालः पचति भूतानि कालः संहरते प्रजाः । कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥ [३]

कालोऽपि द्विविधोच्यते –

- लोकानामन्तकृतकालः,
- कलनात्मकः कालः

यथोक्तं सूर्यसिद्धान्ते –

लोकानामन्तकृत् कालः कालोऽन्यः कलनात्मकः । स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त उच्यते ॥ [४]

नवविधकालमानं यदस्ति, तद् कलनात्मकः कालोऽस्ति अतः कलनात्मककालेषु परिगण्यते । लोकानामन्तकृतकालः यदस्ति तस्य गणना अस्माकं सामर्थ्याद्बहिरस्ति, अतः तस्य गणना अस्माभिः न क्रियते । अस्माकं पूर्वाचार्याणां मतमपि एवमेवास्ति यदन्तकृत्कालस्य गणनाया आवश्यकता नास्ति ।

इदानीं किमर्थं कालस्य चिंतनम् एवं जिज्ञासायां –

वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वाविहिताश्च यज्ञाः । तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ॥ [५]

पुनश्च नारदसंहितायाम् -

विनैतदखिलं श्रौतस्मार्तकर्म न सिद्ध्यति । तस्माज्जगद्धितायेदं ब्रह्मणा रचितं पुरा ॥ [६]

एतद् विना स्मार्तकर्म अथवा श्रौतकर्म न सिद्ध्यति, अतः कालस्य महात्म्यमस्ति, अत्र पुनः जिज्ञासा उदेति यत् कलनात्मकस्य कालस्य कति भेदास्सन्तीति । तदा उत्तरं दीयते यत् नवविधकालमानानि भवन्ति । सूर्यसिद्धान्ते मानाध्याये

---

***सम्पर्कसूत्रम्** - 7004022856, Email- brajeshpathak2@gmail.com

[१]फलित राजेन्द्र, पं. ब्रजेश पाठक ज्यौतिषाचार्य, पृ.सं. 9, Notion Press India 2021

[२]हारीतसंहिता, रविदत्तशास्त्री, स्थान 1, अ. 4, श्लो. सं. ९, पृ.सं. 18, खेमराज श्रीकृष्णदास मुम्बई, सम्वत् १९६२

[३]सम्पूर्ण चाणक्यनीति चाणक्यसूत्र और जीवनगाथा, विश्वमित्र शर्मा, अ.6 श्लो.6, पृ.सं.69 मनोज पब्लिकेशन्स,दिल्ली 2013

[४]सूर्यसिद्धान्त-तत्वामृतभाष्य, कपिलेश्वर चौधरी, मध्यमाधिकार श्लो. सं. 10, पृ.सं. 6, चौखम्बा संस्कृत सीरिज, बनारस 1946

[५]वेदांगज्योतिषम्, श्लो.३, पृ.सं.४७, डॉ,सुरेशचन्द्रमिश्र, रंजन पब्लिकेशन्स, नई दिल्ली, २०२०

[६]नारदसंहिता, अ.१, श्लो.सं.७, पृ.सं. २, वसतिरामशर्मा, श्रीवेङ्कटेश्वर मुद्रणालय, मुम्बई, संवत् १९६३

उक्तं वर्तते –

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यञ्च गौरवम् । सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव ॥ [१]

- 1. **ब्राह्ममानम्** – ब्रह्मणः मानं 'ब्राह्ममानम्' इत्युच्यते । तद् कल्पात्मकः भवति । ब्रह्मणः दिनम् एककल्पात्मकं भवति तद्वदेव ब्रह्मणः शर्वरी अपि एककल्पात्मिका एव । एवं कल्पद्वयात्मकं ब्रह्मण अहोरात्रं भवति । यथोक्तं सूर्यसिद्धान्ते –

  कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती । [२]

  तत्रैव सूर्यांशपुरुषेण **इत्थं युगसहस्रेण भूतसंहारकारकः**[३] इत्यनेन श्लोकेन व्यक्तीकृतं यत् 1000 महायुगम् = 1 कल्पः

  महायुगस्य मानविषये सूर्यसिद्धान्ते एवोक्तम् –

  तद्वादश सहस्राणि चतुर्युगमुदाहृतम् । सूर्याब्दसंख्यया द्वित्रिसागरैरयुताहता ॥ [४]

  अर्थात् – 432 × 10000 = 43,20000 = एकस्य महायुगस्य मानं भवति ।

  तर्हि एकस्य कल्पस्य मानम् = 43,20000 × 1000 = 43,20000000 सौरवर्षाणि

  ब्रह्मण अहोरात्रस्य मानम् = 4,320000000 × 2 = 8,640000000 सौरवर्षाणि

  यथाऽस्माकं 30 अहोरात्राणाम् एकः मासः भवति तथैव ब्रह्मण अपि भवति । स्कन्दपुराणस्य प्रभासखण्डे 30 कल्पानां नामानि प्राप्यन्ते ।[५] अत्र शङ्का भवति यत् एकस्मिन् मासे 60 कल्पाः भवन्ति तर्हि त्रिंशत्कल्पानामेव नामानि किमर्थम् ? यथा अस्माकं वासराणां नामानि दिनस्य कृते तथा रात्रेः कृतेऽपि समाना एव भवन्ति, सोमवासरस्य दिनस्य कृतेऽपि सोमवासरः तथा च रात्रेः कृतेऽपि सोमवासरः इत्येव व्यवहारः भवति तथैव कल्पानां नाम्नां विषयेऽपि चिन्तनीयम् । इदानीं जिज्ञासा भवति एतावान् बृहत्कालस्य प्रयोगः कुत्र भवति ? तदा उत्तरं लभ्यते संध्यापूजनादिसंकल्पेषु ।
- 2. **दिव्यमानम्** - एतत्तु देवतानामसुराणाञ्च दिनं भवति, देवलोके एतस्य प्रयोगः क्रियते । एतदस्माकं एकसौरवर्षात्मकं भवति । मेषराशितः कन्याराशिपर्यन्तं यावत् सूर्यः सञ्चरति तावत् सूर्य उत्तरगोले भवति, एतद्देवतानां दिनं भवति । यदा दक्षिणगोले सूर्यः भवति अर्थात् तुलाराशितः मीनराशिपर्यन्तं यावत् सञ्चरति तदा देवतानां रात्रिर्भवति ।
- 3. **पितृमानम्** – पितृणां कृते यस्य मानस्योपयोगः क्रियते तद्भवति 'पितृमानम्' इति । अस्माकं मासः पितृणामेकमहोरात्रं भवति । अस्माकं पञ्चदशतिथ्यात्मकः कृष्णपक्षः भवति एवञ्च पञ्चदशतिथ्यात्मकः शुक्लपक्षः भवति, एतदाहत्य अस्माकं कृते तु एकः मासः भवति परन्तु पितृलोके एकं दिनं भवति । पूर्णिमातिथिः देवतानाम् मध्याह्नकालः उच्यते तथा च अमावस्यातिथिः देवतानां मध्यरात्रि उच्यते । अष्टम्यां तिथौ तेषां सन्धिकालः भवति ।
- 4. **प्राजापत्यमानम्** – मन्वन्तरकाल एव 'प्राजापत्यमानम्' इत्युच्यते । इदानीं वैवस्वन्मन्वन्तरः चलति । एतस्य कालः कियद्भवतीति विषये सूर्यसिद्धान्ते उक्तम् –

  युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते । [६] सप्ततिः सैका अर्थात् 70 + 1 = 71, नाम एकसप्ततिः युगानामेकं मन्वन्तरं भवति । एतस्य संख्याविषये पुराणेषु कुत्रचित् चतुर्दशमन्वन्तराणि भवन्तीत्युक्तम् ।

[१]सूर्यसिद्धान्त-तत्वामृतभाष्य, कपिलेश्वर चौधरी, मानाध्यायः श्लो. सं. 1, पृ.सं. 288, चौखम्बा संस्कृत सीरिज, बनारस 1946

[२]सूर्यसिद्धान्ततत्वामृतभाष्य, कपिलेश्वर चौधरी, मध्यमाधिकार श्लो.सं. 20, पृ.सं. 12, चौखम्बा संस्कृत सीरिज, बनारस 1946

[३]सूर्यसिद्धान्ततत्वामृतभाष्य, कपिलेश्वर चौधरी, मध्यमाधिकार श्लो.सं. 20, पृ.सं. 12, चौखम्बा संस्कृत सीरिज, बनारस 1946

[४]सूर्यसिद्धान्ततत्वामृतभाष्य, कपिलेश्वर चौधरी, मध्यमाधिकार श्लो.सं. 15, पृ.सं. 9, चौखम्बा संस्कृत सीरिज, बनारस 1946

[५]स्कन्दपुराण प्रभासखण्ड, देवी दयालु मिश्र अ.103 श्लो.सं.44-53, पृ.सं.426-427, नवलकिशोर छापाखाना, लखनऊ 1910, https://archive.org/details/in.ernet.dli.2015.325718/page/n2606/mode/1up

[६]सूर्यसिद्धान्ततत्वामृतभाष्य, कपिलेश्वर चौधरी, मध्यमाधिकार श्लो.सं. 18, पृ.सं. 11, चौखम्बा संस्कृत सीरिज, बनारस 1946

 ISSN : 2249-538X

- 5. **गौरवमानम्**- सम्वत्सरकालः यदस्ति तद् गौरवमानेनैव प्रवर्तते । पुनश्च कुम्भपर्वविषये वयं जानीम एव, कुम्भपर्वः द्वादश-द्वादशवर्षेषु आगच्छति । द्वादशे वत्सरे महाकुम्भः भवति, षड्वर्षेषु अर्धकुम्भः भवति । कुम्भपर्वणः निर्धारणं गौरवमानेनैव क्रियते ।
- 6. **सौरमानम्** - सौरमानस्य प्रयोगस्तु अस्माभिः सर्वदैव क्रियते । प्रतिमासमेकः सौरसंक्रान्तिः भवति तेनैव सौरमानस्य गणना क्रियते । मकरसंक्रान्तिः सर्वैः श्रुतमेव स्यात्, केन मानेन तद् निर्णीतम् ? तत् सौरमानेन निर्णीतम् एवं वक्तुं शक्यते । एवमस्माभि अधिमासः क्षयमासः एवं प्रयोगः दृश्यते, तस्य मानस्यानयनं सूर्यचंद्रयोः मानेन क्रियते । तत्रापि सौरगणना प्रधानतया विद्यते । एवं सौरमानेन एव खरमासस्यापि गणना क्रियते । वर्षे यदा सूर्यः धनुराशौ भवति, तदा धन्वर्कदोष अथवा खरमास इत्युच्यते, यदा सूर्यः मीनराशौ भवति, तदा मीनार्कदोष अथवा खरमास इत्युच्यते ।
- 7. **सावनमानम्** - यदा सूर्यः उदेति तदारभ्य अग्रिमसूर्योदयं यावत् यः कालः तिष्ठति स एव सावनमानं भवति । पुनः स्पष्टीक्रियते द्वयोः सूर्योदययोः मध्ये यः कालः तिष्ठति, सैव कालः सावनमित्युच्यते । अस्माभिः कथ्यते, एकस्मिन् वर्षे 365 दिनानि भवन्ति एतद् सावनमानेनेव भवति । रविवासरः, सोमवासरः... एवं वासराणां गणना सावनमानेनैव भवति ।
- 8. **चान्द्रमानम्** –अस्माभिः चैत्र-वैशाख-ज्येष्ठादिमासानां नामानि श्रुतान्येव तानि चान्द्रमानेन व्यवह्रियन्ते । प्रतिपदादितिथयः याः सन्ति ताः चान्द्रमानेनैव परिगण्यन्ते ।
- 9. **नाक्षत्रमानम्** – नक्षत्राधारितं यद् मानं भवति तदेव नाक्षत्रमानमिति कथ्यते । नाक्षत्रमानस्य प्रभेदाः लभ्यन्ते । सूर्यसिद्धान्ते उक्तं यत् यदा चन्द्रः पूर्णिमायां चित्रानक्षत्रे आगच्छति तदा चैत्रमासः भवति, यदा चन्द्रः पूर्णिमायां विशाखानक्षत्रे आगच्छति तदा वैशाखमासः भवति । एवमेव सर्वेषां मासानां नामानि नक्षत्राधारितानि वर्तन्ते । अस्माकं हस्ते या घटी भवति तदपि नाक्षत्रमानाधारितं भवति अर्थात् घटीनां समयगणना नाक्षत्रमानेन भवति ।

एवं जिज्ञासूनां ज्ञानवर्धनाय संक्षेपतः मया कालप्रभेदानां विषये सप्रमाणं वर्णितम् । ये जिज्ञासव इतोऽपि अधिकतया एतद्विषये ज्ञातुमिच्छन्ति ते ग्रन्थान्तरे विषयममुमवलोकयन्तु । पुराणेषु बहुत्र एतद्विषये चर्चा अस्त्येव । विशिष्य श्रीमद्भागवत्-महापुराणे, स्कन्दपुराणस्य प्रभासखण्डे, विष्णुपुराणे च द्रष्टुं शक्यते । ज्योतिषग्रन्थेष्वपि बहुत्र एतद्विषये अस्माकं पूर्वाचार्या उक्तवन्तः । विशिष्य सूर्यसिद्धान्ते तु मानाध्याय एव लिखितः वर्तते, जिज्ञासवः तस्याध्ययनं कर्तुं प्रभवन्ति ।

## सन्दर्भग्रन्थसूचिः


1. फलित राजेन्द्र, पं. ब्रजेश पाठक ज्योतिषाचार्य, Notion Press India 2021
2. हारीतसंहिता, रविदत्तशास्त्री, खेमराज श्रीकृष्णदास मुम्बई, सम्वत् 1962
3. सम्पूर्ण चाणक्यनीति चाणक्यसूत्र और जीवनगाथा, विश्वमित्र शर्मा, मनोज पब्लिकेशन्स,दिल्ली 2013
4. सूर्यसिद्धान्त-तत्वामृतभाष्य, कपिलेश्वर चौधरी, चौखम्बा संस्कृत सीरिज, बनारस 1946
5. वेदांगज्योतिषम्, डॉ,सुरेशचन्द्रमिश्र, रंजन पब्लिकेशन्स, नई दिल्ली, 2020
6. नारदसंहिता, वसतिरामशर्मा, श्रीवेङ्कटेश्वर मुद्रणालय, मुम्बई, संवत् 1963
7. स्कन्दपुराण प्रभासखण्ड, देवी दयालु मिश्र, नवलकिशोर छापाखाना, लखनऊ 1910

# भूगर्भजलानां स्थानानि

डा. माचर्ल उमामहेश्वर रावु*
सहायकाचार्यः(अ.), के.सं.वि., रा.गा.परिसरः
शृङ्गेरी

***लेखसारः*** *– ज्ञानविज्ञानयोः निधिर्भवति भारतम् । वैज्ञानिकाः अद्यापि मानवजीवनविकासाय अध्यवसायं कुर्वन्ति । ते च विभिन्नक्षेत्रेषु प्रगतिं प्रादर्शयन् दर्शयन्ति दर्शयिष्यन्ति च । यद्यपि मौलिकजीवनाय अपेक्षितसामग्रीमसृजन् तथापि बहुधा तत्तद्वस्तु प्राप्तये यतमानाः सन्ति लोकाः । तादृग्वस्तुष्वन्यतमं जलम् ।*

***पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।***

*सुभाषितेऽस्मिन् जलम् विशिष्टं रत्नमिति प्रतिपादितम् । तज्जलरत्नमधुना सामान्यजनानां दुर्लभमेवास्ति । यतो हि तद्रत्नं खलु ! । अद्य मानवाः दैनन्दिनजीवनाय कृषिकार्ये - उद्योगादिनिर्वहणे जलसमस्याः बहुधा सम्मुखीकुर्वन्ति । तादृशप्रदेशा अनेकास्सन्दृश्यन्ते येषु जलस्य क्रयविक्रयादिकमपि जायमानं वर्तते । न केवलं मानवाः अपि तु तिर्यञ्चापि खिद्यन्ते जलाभावात् । पिपासाकुलास्सन्तः म्रियन्ते च । एवमधुना प्राणिकोटिः सङ्कटस्थित्यां विद्यते । । तस्माज्जलसमस्यायाः परिहाराय मानवाः बहूनुपायान् समाश्रयन्ति ।*

*अस्म्मत्पूर्वजाः जलस्रोतसां मार्गान् बहुषु शास्त्रेषु प्रतिपादिता आसन् । तत्र बृहत्संहितायां दकार्गलं नामकाध्याये बहूपायाः प्रोक्ताः वर्तन्ते । तेष्वत्र केचन सरलोपायाः प्रस्तूयन्ते ।*

***कूटशब्दाः*** *– दकार्गलम्, पुरुषः, निर्गुण्डी, मेघमथनम्, शिरा, कण्टकारिका ।*

## सलिलमाहात्म्यम्

**पानद्रव्यं तु सलिलं द्विपदां च चतुष्पदाम् । विहङ्गमानामपि स सर्पादीनां च सर्वतः ॥**
**सुखं तु परमं चोक्तं न व्याधिश्च भवेद्ध्रुवम् । पानद्रव्यं तु सलिलं द्विपदां च चतुष्पदाम् ।**[१]

## भारते वारिव्यवस्था

अद्यतन भारते जलसमस्यायाः परिहाराय भगीरथप्रयत्न एव प्रचलति । यथा –

- नदीनामनुसन्धानम् – (ILP- River Interlinking Project)
- नदीनां शुद्धिः - नमामि गङ्गे प्रकल्पः ।
- वर्षालस्य संरक्षणम् – जै शक्ति अभियानम् ।
- भूगर्भजलसंवर्धनम् – प्रधानमन्त्रिकृषिसञ्चयी योजना ।
- वृष्टिजलैस्सस्योत्पादनम् तथा वृष्टिजलैर्भूगर्भजलशक्तिसम्पादनम् - नेषनल् वाटर् मिषन् इत्यादयः ।

विशेषतः गङ्गा-यमुना-गोदावरी-कृष्णादि नदीजलानां सदुपयोगार्थं विनिर्मितसेतवः बहुधा वर्तन्ते । संशुद्धसमुद्र-जलानि ।एवञ्च सरोवराः कूपाः तडागाः कुल्यादयाः बहुस्रोतांसि विद्यन्ते । अपि च भूगर्भजलानि आधुनिकविद्युद्यन्त्रैः

***सम्पर्कसूत्रम्** - 9912578333, Email- maheswar.macharla@gmail.com

[१]का . कृषि १.३ ८६-८७

प्राप्य कृषिकार्यादिकं कुर्वन्ति । वैज्ञानिकयुगेऽस्मिन् मेघमथनमपि कृत्वा वृष्टिं साधयन्ति । ( Cloud Seeding & Artificial Rain Fall) इत्थं बहुप्रकारैः जलानि लभ्यन्ते । किञ्च बहुधनव्ययेन इमानि कार्याणि सर्वाणि साधनीयानि वर्तन्ते ।

## दकार्गलम्

संस्कृतवाङ्मये इहलोके सकलजन्तूनां सुखमयजीवनाय पारलौकिकसुखाय विश्वकल्याणाय च महर्षयः वेदान्त-व्याकरण–साहित्यादि बौद्धिकांशान् तथा न्याय-मीमांस-ज्योतिष-यौगिक-भूगोल-खगोलादि(प्रायोगिक) वैज्ञानिकांशान् तत्तच्छास्त्रेषु विशदतया प्रतिपादयामासुः । यत्र अल्पेनैव धनव्ययेन सुजलानि सुष्ठु प्राप्तुं प्रभवामः तथा जलस्त्रोतांसि निरुपितानि दृश्यन्ते शास्त्रग्रन्थेषु । तत्र षष्ठशतकप्रथमपादे एव ( First fourth of 6th Century) भूगर्भालानां सत्तायाः बहु प्रकाराः प्रोक्ताः वराहमिहिरेण बृहत्संहितायां चतुष्पञ्चाशत्तमाध्याये । स्थालीपुलाकन्याय्येन यथा –

**जम्बूवृक्षस्य प्राग्वल्मीको यदि भवेत् समीपस्थः । तस्माद्दक्षिणपार्श्वे सलिलं पुरुषद्वये स्वादु ॥**
**अर्धपुरुषे च मत्स्यः पारावतसन्निभश्च पाषाणः । मृद्भवति चात्र नीला दीर्घं कालं च बहु तोयम् ॥**[1]

अर्थात् जम्बूवृक्षस्य पूर्वस्यां दिशि तन्निकटे वल्मीकः स्यात् । तदा तस्माज्जम्बूवृक्षस्य दक्षिणस्यां दिशि त्रिभिः हस्तैरधः पुरुषद्वये खाते मिष्टं जलं भवति । तत्रापि सङ्केतमित्थं भवति । अर्धपुरुषे च खाते मीनः दृश्यते । ततः कपोतो वसति । तत्सन्निभः पाषाणो भवति । तथा नीलवर्णा मृच्च भवति । तदा तत्र चिरकालं यावत् प्रभूतं वारि समुपलभ्यते ।

**वाल्मीकोपचितायां निर्गुण्ड्यां दक्षिणेन कथितकरैः । पुरुषद्वये सपादे स्वादु जलं भवति चाशोष्यम् ॥**
**रोहितमत्स्योऽर्धनरे मृत् कपिला पाण्डुरता ततः परतः । सिकता सशर्कराऽथ क्रमेण परतो भवत्यम्भः ॥**[2]

वल्मीककृता मृत्स्तूपसंयुक्ता तत्र निर्गुण्ड्यां दक्षिणस्यां दिशि उक्तहस्तैः त्रिभिः पुरुषद्वये पादाधिके खाते अशेषमुदकं प्राप्यते ।

**जलपरिहीने देशे दृष्यन्तेऽनूपजानि चिह्वानि वीरणदूर्वा मृदवश्च यत्र तस्मिन् जलपुरुषे ।**
**भार्ङ्गी त्रिवृता दन्ती सूकरपादी च लक्ष्मणा चैव । नवमालिका च हस्तद्वयेऽम्बु याम्ये त्रिभिः पुरुषैः ॥**[3]

यस्मिन् प्रदशे किञ्चिन्मात्रमपि जलं नैव लभ्यते तस्मिन् स्थले वीरणतृणमथवा दूर्वातृणं वा परिचिनोति तद्भूगर्भे पञ्चसहस्त्रलीटर् परिमतजलं प्राप्तुं शक्यते । अपि च वृन्ताक-त्रिवृता-नागदन्ती- सूकरपदी-लक्ष्मणा-नवमालिकादिषु यत्किञ्चित् वर्धते तर्हि धरण्याः अन्तः पञ्चदशसहस्त्रलीटर् परिमितजलं ततः दक्षिणभागे सहस्त्रद्वयलीटर् परिमितजलञ्च समुपलभ्यते ।

**अतृणे सतृणा यस्मिन् सतृणे तृणवर्जिता मही यत्र । तस्मन् शिरा प्रदिष्टा वक्तव्यं वा धनं चास्मिन् ॥**[4]

यदि तृणरहिते क्षेत्रे तृणेनावृतभूभागो वा तृनयुक्ते प्रदेशे तद्विना कञ्चन प्रदेशो लक्ष्यते तर्हि तस्मिन् स्थले सजलप्रदेशो

[1] ५४. ९, १० बृ.सं
[2] ५४. १४, १५ बृ.सं
[3] ५४. ४७.४८ बृ.सं
[4] ५४. ५२ बृ.सं

वा निधिर्वा सन्दृश्यते ।

**यदिकण्टकारिका कण्टकैर्विना दृश्यते सितैः कुसुमैः । तस्यास्तलेऽम्बु वाच्यं त्रिभिर्नरैरर्धपुरुषे च ॥**[१]

अर्थात् यस्मिन् प्रदेशे विना कण्टकैः श्वेतकुसुमैर्युक्तवृन्ताकवृक्षक एधते तस्मिंस्तले सार्धसप्तदशसहस्रलीटर् परिमतजलस्रोतांसि परिदृश्यन्ते । दकार्गलनामकाध्यायेऽस्मिन् वृन्ताक, जम्बू, बदरी, वेतस, निर्गुण्डी, बिल्व, उदुम्बर, फल्गुवृक्षः, पलाश, कम्पिल्लकादिवृक्षाणामुल्लेखः वल्मीक परिसरे दृश्यते । एवञ्च तत्र मण्डूका, मत्स्य, गृहगोधिका, दुण्डुभ, मूषकादि प्राणिनः दृष्टिपथे भवन्ति । श्वेत, पीत.नीलादि वर्णयुक्त मृत्, विभिन्नवर्णपाषाण, सिकतादि पदार्थैस्सह त्तत्तद् वनस्पति-वृक्ष-प्राणिभिस्सह अस्तित्त्वं च सङ्केतितरूपेण सूचितं वर्तते । काश्यपीयकृषिपद्धतौ दकार्गलस्वरूपमेवं निरूपितम् -

**मृद्दोषदूषितेऽन्यत्र जलस्रावश्च नश्यति ।**
**अतः सैकतभूयिष्ठा जलपूर्णावसुन्धरा ॥**
**वापी कूपादियोग्येति निश्चिता तत्त्वदर्शिभिः ।**[२]

## निष्कर्षः

**यथा भूमौ गुहाच्छन्नं जलं तिष्ठति शाश्वतम् । इति ।**

महाभारते उद्योगपर्वणि एवं प्रोक्तमस्ति ।

तस्मात् प्रकृत्यां सिद्धवस्तुभिःअल्पैः साधनैः अल्पेन व्ययप्रयासैश्चानल्पं प्रयोजनं प्राप्तुं सरलान् मार्गान् सविस्तरं सम्यक् समुल्लेखनञ्चक्रुः वराहमिहिरादयः । तस्माद् संस्कृतक्षेत्रे न केवलं तत्तच्छास्त्राध्ययनेन साकं क्षेत्रीयानुशीलनं ततः प्रायोगिज्ञानार्जनायावसरोऽवश्यं कल्पनीय इति मे भावः ।

## परिशीलितग्रन्थसूची


- बृहत्संहिता – द्वितीयो भागः – डा. सुरकान्त झा (चौखाम्बा)
- काश्यपीयकृषिपद्धतिः (चौखाम्बा)
- कृषिपराशरः (चौखाम्बा)
- महाभारतम् – उद्योगपर्वम्


[१] ५४. ५७ बृ.सं
[२] १.४.१४६ का. कृषि

# क्षीरसागरात् चन्द्रोद्भवः - वैज्ञानिकविचारश्च

डा. एम्. श्रीनिवासमूर्तिः*
सहायकाचार्यः(सं.), के.सं.वि., नासिक् परिसरः
नासिक्

***लेखसारः*** *-पुराणानि लक्ष्यार्थप्रधानानि । पठितृषु रुचिमुत्पादयितुम् आलोचनाशक्तिं प्रेरयितुं दीर्घकालं यावत् प्रचारे संस्थापयितुं च पुराणसाहित्यं कथारूपेण प्रपञ्चितमस्ति । पुराणेषु तत्तत्कथासन्दर्भेषु तत्तत् - शास्त्रविषयाः बहुत्र प्रतीकात्मकतया निरूपिताः सन्ति । पुरा अपि नवं भवति इति पुराणम् । अर्थात् तत्तत्कालेषु यथा तत्तद्वैज्ञानिकविषयैः नावीन्यम् अनुभूयते पाठकैः तथा महर्षिभिः उपदिष्टं वाङ्मयम् इत्यर्थः । क्षीरसागर मन्थनं श्रीमद्भागवतमहापुरणे, श्रीमद्विष्णुमहापुराणे, श्रीगरुडमहापुराणे च सन्दृश्यते । आधुनिकविज्ञानशास्त्रानुगुणं तावत् चन्द्रस्योत्पतिविषये प्राधान्येन चत्वारः सिद्धान्ताः दृश्यन्ते । महाकाय- अभिहति- सिद्धान्तः(Giant Impact Theory) क्षीरसागरः नाम अस्माकं विशालः तारापुञ्जः एव । महाकाय - अभिहाति - सिद्धान्तानुगुणं वैश्विक कल्लोलेनैव भूमेः चन्द्रः जातः । विभिन्नैः अथावा विरुद्धैः पदार्थैः विश्वमेतत् कल्लोलितमिति ज्ञेयम् । तादृशानां विभिन्नपदार्थानां कल्लोलेनैव नूतननूतनपदार्थाः समुद्भूताः । तेषु चन्द्रः अपि अन्यतमः इति विषयः साम्प्रतिकविज्ञानशास्त्रस्य अव्यातिरेकतया क्षीरसागरमन्थनकथारूपेण पुराणेषु बहोः कालात् पूर्वमेव प्रोक्तः वर्तते ।*

भारतीयसंस्कृतौ वेदवाङ्मयानन्तरं पुराणसाहित्यम् अतीव प्राचीनं वर्तते । वेदाः तावत् वाच्यार्थप्रधानाः । पुराणानि तु लक्ष्यार्थप्रधानानि । पठितृषु रुचिमुत्पादयितुम् आलोचनाशक्तिं प्रेरयितुं दीर्घकालं यावत् प्रचारे संस्थापयितुं च पुराणसाहित्यं कथारूपेण प्रपञ्चितमस्ति । यद्यपि बाह्यदृष्ट्या तावत् कथा एव प्रधाना इति भाति तथापि तत्र अनेके सङ्क्लिष्टाः विषयाः प्रतीकात्मकतया निरूपिताः सन्ति । प्राचीनभारतीयपरम्परायां विभिन्नकारणैः तत्तद्प्रमुखविषयप्रतिपादनावासरे बहुत्र प्रतीकात्मकतया कथनं सन्दृश्यते, उदाहरणार्थं यथा -

**"गङ्गायमुनयोर्मध्ये बालरण्डा तपस्विनी ।**
**बलात्कारेण सङ्ग्राह्या तद्विष्णोः परमं पदम् ॥"**

इत्यस्मिन् श्लोके लक्ष्यार्थज्ञानं विना कथमपि वा तात्पर्यम् साधयितुं न शक्यते ।

एवमेव पुराणेषु तत्तत्कथासन्दर्भेषु तत्तत् - शास्त्रविषयाः बहुत्र प्रतीकात्मकतया निरूपिताः सन्ति । तत्र केचन विषयाः आधुनिकविज्ञानशास्त्रेण निरूपिताः केचन कालान्तरे निरूपणयोग्याश्च वर्तन्ते । पुरा अपि नवं भवति इति पुराणम् । अर्थात् तत्तत्कालेषु यथा तत्तद्वैज्ञानिकविषयैः नावीन्यम् अनुभूयते पाठकैः तथा महर्षिभिः उपदिष्टं वाङ्मयम् इत्यर्थः । तादृशे पुराणवाङ्मये निरूपितेषु बहुषु वैज्ञानिकांशेषु अन्यतमः वर्तते क्षीरसागरमन्थनम् इत्यंशः । क्षीरसागर मन्थनं श्रीमद्भागवतमहापुरणे, श्रीमद्विष्णुमहापुराणे, श्रीगरुडमहापुराणे च सन्दृश्यते । तत्र श्रीमद्विष्णुपुराणे प्रथमे अंशे नवमे अध्याये वर्णितम् अस्ति यत् देवाः दानवाश्च मिलित्वा अमृतप्राप्त्यै क्षीरसागरमंथनमकुर्वन् । तन्मंथनप्रक्रियायां अमृतस्य उद्भवात् पूर्वं उच्चैश्रवाः लक्ष्मीः चन्द्रः कौस्तुभमणिः इत्यादयः विविधाः दिव्यादिव्यपदार्थाः क्षीरासागरात् समुद्भूताः[१] इति । यथा -

**मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा च वासुकिम् ।**

---

***सम्पर्कसूत्रम्** - 8919933563, Email- dr.m.srinivasamurthy@csu.co.in
[१]श्रीविष्णुमहापुराणम् - Acharya Shiva Prasad Dwivedi, Choukhamba Surabharathi Prakashan, 2024

कृष्णेन वासुकेर्दैत्याः पूर्वकाये निवेशिताः ॥
मथ्यमाने ततस्तस्मिन् क्षीराब्धौ देवदानवैः ।
हविर्धामाभवत् पूर्वं सुरभिः सुरपूजिता ॥
जग्मुर्मुदं ततो देवा दानवाश्च महामुने ।
व्याक्षिप्तचेतसश्चैव बभूवुस्तिमितेक्षणाः ॥
किमेतदिति सिद्धानां दिवि चिन्तयतां ततः ।
बभूव वारुणी देवी मदाघूर्णितलोचना ॥
कृतावर्त्तात् ततस्तस्मात् क्षीरोदाद् वासयन् जगत् ।
गन्धेन पारिजातोऽभूद् देवस्त्रीनन्दनस्तरूः ॥
रूपौदार्य्यगुणोपेतस्ततश्चाप्सरसां गणः ।
क्षीरोदधेः समुत्पन्नो मैत्रेय परमाद्भुतः ॥
ततः शीतांशुरभवज्जगृहे त्वं महेश्वरः ।
जगृहुश्च विषं नागाः क्षीरोदाच्च समुत्थितम् ॥

एवं श्रीमद्विष्णुपुराणे चन्द्रः क्षीरसागरात् समुद्भूतः इति प्रोक्तम् ।

आधुनिकविज्ञानशास्त्रानुगुणं तावत् चन्द्रस्योत्पतिविषये प्राधान्येन चत्वारः सिद्धान्ताः दृश्यन्ते, यथा -

१. Capture Theory ( Harold Urey)
२. Fission Theory ( George Darwin)
३. Co- formation Theory (Various Scientists)
४. Giant Impact Theory (Alistair Cameron & William Ward)

एतेषु Giant Impact Theory[१] - महाकाय- अभिहति- सिद्धान्तः बहुजनैः समाहृतः वर्तते । अयमेव सिद्धान्तः Giant Impact Hypothesis इति नाम्ना Theia Impact इति नाम्ना च प्रसिद्धः ।

## महाकाय- अभिहति- सिद्धान्तः(Giant Impact Theory) :

एतत्सिद्धान्तानुसारं प्रायः सार्थचतुश्शतकोटिवर्षेभ्यः पूर्वम् (4.5 Billion years ago) अर्थात् भूमेः प्रारम्भदशायां (यदा भूमिः जीवावासयोग्या नासीत् = Hadean Eon इति दशायाम्) कुजग्रह परिमाणेन समः कश्चन (Theia) थीया - नामकः ग्रहसदृशपदार्थः भूमिं सङ्घट्टते स्म । तदा भूमेः पर्पट्याः( Crust) प्रावरणस्य ( Mantle) च गणनीयः भागः अन्तरिक्षे उत्क्षिप्तः । एवं थियानामकस्य तथा भूमेश्च उत्क्षिप्तः पदार्थः भूमिं परितः मण्डलत्वेन संस्थाय कालक्रमेण चन्द्रत्वं प्राप्तः । एतत्प्रक्रियायां अन्यान्यपदार्थसङ्गमः मुख्यं स्थानम् आवहति स्म । प्रारम्भकाले चन्द्रः द्रवरूपेण आसीत् । चन्द्रेण साम्प्रतिकरूपावाप्तौ प्रायः पञ्चदशकोटिवर्षेभ्यः अधिकः कालः स्वीकृतः । चन्द्रस्य तथा भूमेश्च पर्पटी (Crust) समानतया भवति । किन्तु अयसः न्यूनत्वात् चन्द्रे सान्द्रता न्यूना भवति । तथैव चन्द्रस्य भूमेश्च समस्थानिकनिष्पत्तिः[२]

[१] The origin of the Moon : An article by A.G.W. Cameron and W.R. Ward published in Lunar Sci. in 1976

[२] https://en.wikipedia.org/wiki/Giant-impact_hypothesis


ISSN : 2249-538X

(Ratio of Isotopes) समाना वर्तते । अयं विषयः अस्य सिधान्तस्य बलं संसाधयति । एवं (Giant Impact Theory) महाकाय - अभिहति - सिद्धान्तः भूमेः आरम्भकाले अन्तरिक्षपदार्थस्य भूमेश्च सङ्घट्टनेन चन्द्रः सञ्जातः इति संसूचयति । क्षीरसागरमन्थनस्य महाकाय - अभिहाति - सिद्धान्तस्य च मध्ये वस्तुतः अवैरुध्यमेव वर्तते । तत् कथमिति चेत् - क्षीरसागरः नाम अस्माकं विशालः तारापुञ्जः एव । तस्य मन्थनं नाम तत्तारापुञ्जे अथवा तात्तारापुञ्जगते अस्माकं सौरमण्डले कल्लोलः अथवा परिवर्तनम् एव । महाकाय - अभिहाति - सिद्धान्तानुगुणं वैश्विक कल्लोलेनैव भूमेः चन्द्रः जातः । क्षीरसागरात् चन्द्रो जातः इत्यनेन पुराणमपि एतत् सौरमण्डले कश्चन नूतनः ग्रहः सञ्जातः इति विषयं सूचयति । क्षीरसागरात् अन्ये अपि पदार्थाः समुद्भूताः अवाञ्छनीयाः वाञ्छनीयाः च इति पुराणे वर्णितम् । अर्थात् वैश्विककल्लोलेन न केवलं चन्द्रः अपि च अन्यान्यपदार्थाः परिणामाश्च सञ्जाताः इत्यर्थः । अयं च विषयः महाकाय -अभिहति -सिद्धान्तस्य अनतिरिक्तः एव । देवदानवयोः परस्परसहकारेण क्षीरसागरमन्थनम् अभवत् इत्यतेनापि विभिन्नैः अथावा विरुद्धैः पदार्थैः विश्वमेतत् कल्लोलितमिति ज्ञेयम् । तादृशानां विभिन्नपदार्थानां कल्लोलेनैव नूतननूतनपदार्थाः समुद्भूताः इति, तेषु चन्द्रः अपि अन्यतमः इति विषयः साम्प्रतिकविज्ञानशास्त्रस्य अव्यतिरेकतया क्षीरसागरमन्थनकथारूपेण पुराणेषु बहोः कालात् पूर्वमेव प्रोक्तः वर्तते ।

आधुनिकविज्ञानशास्त्रेण अनाविष्कृताः अनेके विषयाः, इतोऽपि तत्तत्कालेषु तात्कालिकविज्ञानशास्त्राधारेण अवगन्तुं शक्याः पुराणेषु प्रतिपादिताः इत्यत एव पुराणं पुराणं भवति इति कथने न काचित् विप्रतिपत्तिः भवितुमर्हति इति मे मतिः ।

## Bibliography :


1. Srimad Bhagavata Maha aha Purana - Srila Viswanatha Chakravarthi Thakkura,ISKON 2010.
2. श्रीविष्णुमहापुराणम् - Acharya Shiva Prasad Dwivedi, Choukhamba Surabharathi Prakashan, 2024
3. Sri Garuda Mahapuranam, M N Dutt, New Bharatiya Book Corporation, New Delhi.
4. 2.The origin of the Moon: An article by A.G.W. Cameron and W.R. Ward published in Lunar Sci. in 1976
5. https://en.wikipedia.org/wiki/Giant-impact_hypothesis

# गृहनिर्माणसमये द्वारस्थापनकाले अवधेयाः विचाराः

डा. गणेशकृष्णभट्टः*
सहायकाचार्यः(अ.), के.सं.वि., गुरुवायूर् परिसरः
केरलम्

***लेखसारः*** *– सर्वोऽपि मानवः कालेऽस्मिन् गृहनिर्माणसमये अनिवार्यरूपेण भूपरीक्षणम्, गृहारम्भः, द्वारस्थापनम्, गृहप्रवेशः इति नानाविषयेषु बहुधा चिन्तयन्ति । तदनु द्वारस्थापनसमये मुख्यतया अवलोकनीयाः चिन्तनीयाः च विषयाः के भवन्तीति ज्ञात्वैव तत्कार्यं साधनीयम् । अतः तादृशावलोकनेन कार्यः साधितश्चेदेव आभीष्टं प्राप्तुं शक्यते । तत्रापेक्षितानां मुख्यविचाराणां वास्तुविद्या-मनुष्यालयचन्द्रिकाग्रन्थयोः आधारेण सङ्ग्रहणमत्र कृतम् ।*

***कूटशब्दाः*** *– द्वारम्, स्थापनम्, उन्नतम्, निम्नम्, पदम्, पट्टिका, अवनतम् ।*

## उपोद्घातः

अस्माकं पूर्वजाः ऋषिमुनयः आश्रयार्थम् आवासार्थञ्च गृहादीनाम् आवश्यकतां तथा अनिवार्यताञ्च विशेषरूपेण ज्ञात्वा कानिचन सिद्धान्तान् प्रतिपादितवन्तः । ते च सिद्धान्ताः कालान्तरे वास्तुशास्त्रत्वेन निरूपिताः । तैरुक्ताः नानाविधसिद्धान्ताः वास्तुशास्त्रेऽन्तर्भाविताश्च । वास्तुशास्त्रमित्येतत् ज्योतिषशास्त्रेवान्तर्भूतं भवति । तत्रापि त्रिषु स्कन्धेषु अन्यतमे संहितास्कन्धे वास्तुविषयः विस्तररूपेण निरूपितः वर्तते ।

वास्तुशास्त्रे गृहनिर्माणोपयोगीभुवः चयनादारभ्य गृहनिर्माणपर्यन्तं विविधा आयामाः, नियमाः, सिद्धान्ताः, निर्देशाश्च समावेशिताः । आदौ तावत् शास्त्रस्यास्य जन्म वेदकाले यज्ञभूमिचयनार्थं तथा वेदीनिर्माणार्थं चाभवदित्युच्यते । कालान्तरे सर्वजनोपयोगीरूपेण लोकाय परिचितम् । परन्त्वेतदपि ज्ञातव्यमेव यत् यज्ञादीनां पूर्वमपि मानवानामावासस्य आश्रयस्य च कल्पना जातैवासीत् । पुनश्च मानवः वासभूमिनिश्चयार्थं चिन्तनमकरोत् ।

## विषयनिरूपणम्

तत्रादौ द्वारादिस्थाननिर्णयः प्रकटीक्रियते । पूर्वोक्तेषु चतुष्षष्टिपद-एकाशीतिपद-शतपदवास्तुकोष्टेषु द्वारादीनां निवेशन-क्रमं निरूपयति वास्तुविद्याकारः – **अथ द्वे प्राङ्मुखे द्वारे कुर्यात् द्वे दक्षिणामुखे । द्वारे प्रत्यङ्मुखे द्वे च द्वे च कुर्यादुदङ्मुखे**[1] इति । अर्थात् गृहनिवेशनसमये वास्तुकोष्ठे पूर्वस्यां दिशि द्वारद्वयम्, एवं दक्षिण-पश्चिमोत्तरदिशास्वपि द्वारद्वयं भवेत् । पुनः विप्रादिवर्णेषु विशेषः वर्तते एव । तत्रादौ विप्रस्य द्वारस्थापनमुच्यते – **माहेन्द्रे प्राङ्मुखं द्वारं प्रशस्तं शिष्टजातिषु । अपरं तु तथा द्वारं जयन्ते प्राह निश्चयात् ॥**[2] तन्नाम महेन्द्रपदे द्वारनिर्माणं शिष्टजातीनां कृते शुभं भवति । एतद्विहाय ब्राह्म-णानां कृते जयन्तपदे द्वारनिश्चयः कर्तुं शक्यते । एवं क्षत्रियाणां निवासार्थं गृहक्षतपदे द्वारं निर्मातव्यम् । तथा वैश्यानां निवासार्थं गन्धर्वपदे द्वारस्थानम् अभीष्टत्वेन स्वीकार्यम् । एवं शूद्राणां द्वारस्थापनस्थानं तु पुष्पदन्तपदे प्रोक्तम् । एवं सु-ग्रीवपदे, आपपदे तथा भल्लाटपदे च सर्ववर्णीयानां शुभदायकम् इत्युक्तम् । एवमेव तत्तद्देवतास्थानेषु स्थापितानां द्वाराणां फलं वास्तुविद्यायां पञ्चदशश्लोकैः निरूपितम् । तेषु श्लोकेषु प्रोक्तानि फलानि मया अत्र निरूप्यते । तत्र आदित्यपदे द्वारः स्थापिते सति पुत्रनाशः भवति । सत्यपदे स्थापितद्वारेण मैत्रीभङ्गः भवति । भृगुपदेन गृहपतिः पृथक् सम्भवति । एवम्

***सम्पर्कसूत्रम्** - 9481226114, Email- ganesh.krishnabhatag@gmail.com

[1]वा.वि. 4/1

[2]वा.वि. 4/2

अन्तरिक्षपदे कृते सति गृहपतिः विनाशमार्गमुपैति । अग्निपदे द्वारः स्थापिते सति यजमानस्य मृत्युः वाच्यः । तथैव पूष्णपदे शोषणम्, दारुणकष्टम्, नाशः च जायते । वितथपदे गृहपतेः मरणम्, गृहक्षतपदे सम्पदः अभिवृद्धिः, यमद्वारेण मरणतुल्यं कष्टम्, या मरणं सर्वनाशः वा वाच्यम् । एवं यदि गन्धर्वपदे द्वारः स्थापितः चेत् सर्वविधकर्मसु वृद्धिः सञ्जायते । भृङ्गराजपदे पशुधनस्य तथा सस्यादिनाशः, निर्ऋतिपदे मरणम्, तथा दौवारिकपदे लयश्च प्रोक्त । परं सुग्रीवपदस्थितेन द्वारेण सर्वसम्पत् लाभः, पुष्पदन्तद्वारेण च सर्वगुणानां प्राप्तिः भवति । वरुणपदे द्वारस्थापनेन मित्रेषु वैरम्, चोरेभ्यः भयं च जायते । असुरपदस्थाने नित्यं कष्टानुभूतिः, शोषणपदे शुष्यते परन्तु न विनश्यति इति च कथितम् । रोगपदे स्थितेन द्वारेण गृहपतिः पण्डुरोगी सञ्जायते । वातस्थाने तावत् गृहपतये वातेन जन्यमानाः व्याधयः जायन्ते । नागपदे सति तस्मिन् गृहे ये वासं कुर्वन्ति तेभ्यः शीघ्रमेव नागभयं भवेत् । तथा मुख्यपदे द्वारस्थापनेन शीघ्रमेव विप्रस्य प्राप्तिः एवं भल्लाटपदे गृहवासिभ्यः विशिष्टफलानां प्राप्तिः जायते । सोमस्थाने द्वारस्थापनेन व्यक्तिः सदैव याज्ञिकः धार्मिकश्च सम्भ-वति । अर्गलपदस्थितेन द्वारेण यजमानः जलेन म्रियते । अदितिपदे उदररोगः, दितिपदे तावत् सपत्नीककुलस्य विनाशश्च प्रोक्तः । रुद्रस्थाने यदि द्वारस्थापनं कृतं तर्हि गृहं वह्निना दह्यते । एवं पर्जन्ये धननाशः, जयन्ते च सर्वत्रजयमाप्नोति । ततश्च यदा माहेन्द्रपदे द्वारस्थापनं क्रियते तदा माहात्म्यं प्राप्नोति यजमानः । इत्थं पदेषु द्वारस्थापनस्य फलं विस्तरेण निगदितं ग्रन्थकारेण, शास्त्रकारैश्च ।

अधुना बहिर्द्वारनिवेशनस्थाने कथयति ग्रन्थकारः – **यत्रोन्नतं ततो द्वारं यत्र निम्नं ततो गृहम् । गृहे चाप्यष्टमे राशौ तत्र द्वारं न कारयेत् ॥**[१] इति । अर्थाद्यत्र औन्नत्यं वर्तते तत्र द्वारम्, तथा यत्र निम्नं विद्यते तत्र गृहस्य विन्यासः कार्यः । तथैव गृहकर्ता यजमानः यः वर्तते तस्य जन्मराशितः गणना कार्या । एवं गणनया यदा अष्टमराशिरायाति, तस्मिन् स्थाने कदापि द्वारविन्यासः स कार्यः इत्युक्तम् । ततः – **गृहक्षते च माहेन्द्रे ब्राह्मणानां प्रकीर्तितम्**[२] इति सार्धश्लोकेनैकेन विप्रस्य प्रतिनियतम् अपरं द्वारस्थापनं प्रोक्तम् ग्रन्थकारेण । अर्थादत्र ब्राह्मणानां कृते निर्मीयमाणगृहे गृहक्षतपदे या माहेन्द्रपदे एव द्वारं विन्यसेत् । महीधर-सोम-भल्लाट-अर्गलपदेषु अन्यतमभूते शयनगृहस्य निर्माणं कर्तुं शक्यते । पुनश्च शयने तावत् पूर्वस्यां दिशि शिखा भवेदिति ज्ञातव्यमेव । अधुना क्षत्रियस्य प्रतिनियतं प्रोक्तं वास्तुविद्यायाम् – **गृहक्षते पुष्पदन्ते द्वारं स्यात् क्षत्रियस्य तु । वितथे चान्नभूमिं च गोष्ठागारं तथासुरे । स्थानभूमिं च गन्धर्वे सदा कुर्यात् विशेषतः ॥** इति । तन्नाम क्षत्रियाणां कृते निर्मीयमाणे गृहे गृहक्षतपदे-पुष्पदन्तपदे वा द्वारस्थापनं कार्यम् । एवं वितथपदे भोजनगृहं तथा असुरपदे गोष्ठागारं विन्यसेत् । तथैव गन्धर्वपदे स्थानभूमिः निर्मातव्या । वैश्यस्य कृते द्वारादिस्थानं श्लोकद्वये कथ्यते । तस्मै भल्लाटपदे पुष्पदन्तपदे वा स्थापितं द्वारं शुभं जनयति । यमपदे वैवस्वतपदे गन्धर्वपदे गृहक्षतपदे वा शयनप्रकोष्ठः निर्मातव्यः । प्राक्शिरोभूत्वा शयनं प्रकर्तव्यमिति विदुषां वचनम् । पूषपदे अथवा वरुणपदे अथवा पूर्वदिशां प्रति प्रोक्तपदेष्वन्यतमे पाकशाला निर्मातव्या । एवं गन्धर्वपदे आस्थानमण्डपः तथा असुरपदे गोष्ठागारः करणीयः । पैतृकपदे तावत् गर्भभूमिः प्रकुर्यात् वैश्यः इति विदुषामभिप्रायः । शूद्राणां तु – **भल्लाटे च महेन्द्रे च द्वारे शूद्रस्य पूजिते** इति श्लोकत्रये द्वारादिस्थानं प्रोक्तम् । अर्थात् शूद्रेण भल्लाटपदे महेन्द्रपदे वा द्वारं स्थापनीयम् । सुग्रीव-पुष्पदन्त-मित्र-वरुणपदेष्वन्यतमपदे शयनगृहस्य द्वारं भवेत् । परन्त्वेषः नियमः न केवलं शूद्राणाम्, अपि तु सर्वसाधारणो वर्तते । दौवारिकपदप्रमाणानुसारं पैतृकभूमेः अर्थात् रुद्रभूमेः निर्धारणं कर्तव्यम् । पूषपदे पाकशाला, असुरपदे च गोष्ठागारः तस्य तस्य द्वारः वा विद्यात् । स्थानभूमिः अर्थात् आस्थानमण्डपः सर्वदा गन्धर्वपदे एव भवेत् इति प्रोक्तम् ।

[१]वा.वि. 4/20
[२]वा.वि. 4/21

पादाधिष्ठान-लुपाकरणादीनां कथनात्परम् अधुना द्वारविन्यासः निरूप्यते । तदङ्गतया अवनतयन्त्रेण भूमेः समीकरणमपि कथ्यते । तत्रादौ अवनतयन्त्रस्य लक्षणं कथयित्वा तेन समतलनिर्माणप्रकारं प्रतिपादयति वास्तुविद्याकारः यथा – **अथ कुर्यादवनतं पट्टिकाभिस्त्रिभिः पुनः**[१] । अत्रादौ अवनतयन्त्रस्य लक्षणोक्तप्रकारेण समतलकृते स्थाने पट्टिकात्रयम् अवनतरूपेण स्थापनीयम् । ताः पट्टिकाः त्रिकोणरूपेण पञ्चविंशत्यङ्गुलान्तरे संस्थापनीयाः । तदनन्तरं जलेन तलस्यार्थात् भूमेः समतलत्वं वीक्ष्य तत्र शङ्कुद्वयं स्थापयेत् । जलोपरि समानरूपेण कीलैः प्रमाणं स्वीकृत्य कोणत्रयात्मकयन्त्रस्य पार्श्वपट्टिकासु सम्भावयेत् । एवं क्रमेण अवनतयन्त्रविधिना शङ्कुं स्थापयित्वा सूत्रं प्रसारणीयम् । सूत्रमेतत् तिर्यक्पट्टिकायाः अङ्कत् गतेरवलोकनार्थमपेक्षितम् । अत्र पार्श्वयोः अन्तरमुन्नतं भवति । अङ्कस्य एवं सूत्रस्य संयोगं सूक्ष्मरूपेण ज्ञात्वा भूतलस्य निम्नोन्नती समीकुर्यात् । सामान्यः अर्थः एवं भवति यत् द्वारस्थाने भूमिः एकरूपा अथवा समतला कार्या इत्येव । इत्थं प्रथमं भूपृष्ठं समीकृत्य अनन्तरं गृहाधिष्ठानाधारतया उपपीठमित्येकमवयवं योजयेदिति पुनरुच्यते वास्तुविद्यायाम् – **अधिष्ठानस्य चाधस्तादुपपीठं प्रयोजयेत्**[२] । एवं पूर्वोक्तप्रकारेण भूपृष्ठं समीकृत्य परम् अधिष्ठानस्य अधोभागे उपपीठस्य प्रयोगः करणीयः । एवंरूपेण स्थापितमुपपीठं भवनस्य औन्नत्यर्थम् अत्यन्तं सुदृढरूपेण निर्मातव्यम् । तथा तदुपपीठं शोभाजनकमपि भवति । सम्प्रति अस्योपपीठस्य प्रमाणमुच्यते – **समं त्रिपादमर्धं वा पञ्चांशद्व्यंशमेव वा**[३] इति । उपपीठस्य प्रमाणम् - अधिष्ठानस्य समं, त्रिपादम्, अर्धं, पञ्चांशं, द्व्यंशं, सपादम्, सार्धं, पादोनं, द्विगुणं, पादोनद्विगुणं वा प्रमाणं स्वीकृत्य उपपीठस्य निर्माणं कार्यम् । एवमेव पादुकाख्य प्रथमावयवात् उपपीठस्य निष्क्रमणं कथ्यते – **आद्यङ्गपादुकस्य निष्क्रमं करमानतः**[४] इति । अत्र आद्यङ्गमिति अधिष्ठानस्यैव नामान्तरम् । निष्क्रामो नाम विस्तारः । तस्मात् आद्यङ्गात् अर्थात् अधिष्ठानात् करमानमितं, पादोनकरमितं, सपादकरमितं, सार्धकरमितं, पादोनद्वितयकरमितं, किष्कुद्वयकरमितं वा विस्तारयुक्तं उपपीठं रचनीयम् । इत्थमत्र षट् प्रकारकोपपीठविस्तृतिः निरूपिता । अग्रे जलप्रणालीस्थानम् **उपपीठबहिर्भागमवटाङ्गणमीरितम्**[५] इति श्लोकेनोक्तम् । जलप्रणालीत्यस्य जलमार्गमित्यर्थः । उपपीठस्य बहिर्भागात् अवटाङ्गणं कर्तव्यम् । तन्नाम गृहस्यान्तर्भागस्थमङ्गणमित्यर्थः । तच्च अवटाङ्गणम् उपपीठात् बहिर्भागे ईशान्यकोणे निर्मातव्यम् । कदाचित् प्राङ्मुखमपि भवितुमर्हति इति ग्रन्थकारेणोक्तं श्लोके दृश्यते ।

मनुष्यालयचन्द्रिकायां **कुर्याद् गृहाय कृतवास्तुपदं समस्तम्**[६] इति श्लोके गृहाय वास्तुपदं निर्मातव्यमित्युक्तम् । गृहस्य अधोभागात् बहिर्भागात् अन्तर्भागस्थे चाङ्गणे जलं यथा न तिष्ठेत् तथा कर्तुम् एवम् अन्तस्थाङ्गणे विद्यमानस्य निम्नत्वस्य निवारणार्थञ्च सम्पूर्णे निवासस्थाने मृत्तिकया, शिलया अथवा अन्येन वस्तुना वा अष्ट-द्वादश-षोडशाङ्गुलपरिमित्या औन्नत्यं कार्यम् । यतो हि भवननिर्माणे वास्तुपदं तावत् अतीवमुख्यम् । तद्यदि दृढं न भवति तर्हि निर्मितभवनं कदापि पतितुमर्हति । तस्मात् पञ्चाङ्गमपि दृढं भवेत् । तथैव निवेशनस्थानं दृढं विद्यते चेदपि तां भूमिं समतलात्मिकां कृत्वा सामान्यभूतलात् अष्ट-द्वादश-षोडशाङ्गुलमितरूपेण कर्तव्यम् । अनन्तरं तस्योपरि गृहनिर्माणं कार्यम् । अत्र भारतीयवास्तुशास्त्रज्ञैः न केवलं भित्तिनिर्माणस्थानम्, अपि तु सम्पूर्णं निवेशनमेव भद्रं दृढं च भवेदित्युक्तम्

[१] वा.वि. 13/1- 4
[२] वा.वि. 13/05
[३] वा.वि. 13/6-7
[४] वा.वि. 13/8-9
[५] वा.वि. 13/10
[६] म.चं. 05/01


ISSN : 2249-538X

इत्यवगम्यते । आधुनिककाले प्रधानतया जनाः स्तम्भ-भित्तिनिर्माणस्थानमेव भद्रं दृढं च कांक्षन्ति इत्यभिप्रायः ग्रन्थे प्रोक्तः । अग्रे उपपीठरचना तथा निवेशस्थजलमार्गं च कथ्यते – **रक्षाशोभोच्छ्रयार्थं सकलनिलयमासूरतोऽधः समन्तात्**[1] । अत्र सर्वेषां गृहाणां पञ्चाङ्गस्य अर्थात् अधिष्ठानस्य अधोभागे गृहस्य रक्षणार्थं सौन्दर्यार्थम् एवम् उन्नत्यर्थं च अष्टाष्टाङ्गुलानां संयोजनेन एकहस्तपरिमितं वा द्विहस्तपरिमितम् उपपीठं रचयेत् । अन्तः गर्ताङ्गणे तावत् दक्षिणोत्तरस्य आदितः आन्तमपि वृषभयोनिः ध्वजयोनिर्वा भूत्वा निवेशनस्य जलम् ईशान्यदिशि यथा गच्छेत् तथा उत्तरस्यां पूर्वस्यां वा दिशि जलमार्गं करणीयम् इत्युक्तम् । पुनः गेहाधिष्ठानोच्चतुल्यो रसादि इत्यत्र मनुष्यालयस्योपपीठस्य औन्नत्यम् अधिष्ठानस्यौन्नत्यं प्रति समानं स्यात् अथवा अधिष्ठानस्य औन्नत्यस्य षड्सु पञ्चभागमितम्, सप्तसु षड्भागमितम्, अष्टसु सप्तभागमितम्, नवसु अष्टभागमितम्, दशसु भागेषु नवभागमितं वा उपपीठस्य औन्नत्यं भवेदेव । पादुकादीतरावयवानां तस्य तस्य औन्नत्यं विभज्य रचयेत् इत्युक्तम् । इतरावयवास्तु पादुका, जगतिः, कुमुदः, गल इत्यादयः ।

## उपसंहारः

इत्थम् उपपीठरचना जलमार्गनिर्माणविधिश्च निरूपितः । तथैव द्वारविन्यासार्थं बहवो विषयाः प्रतिपादिताः । उक्तेषु पादाधिष्ठानम्, लुपाकरणम्, द्वारविन्यासः, आरम्भश्चेति प्रत्येकोऽपि विषयः सन्दर्भानुगुणं मुख्यं स्थानमावहतीत्यत्र नास्ति सन्देहः । दक्षिणभारते वास्तुविद्या-मनुष्यालयचन्द्रिकाग्रन्थयोः आधारेण सर्वाधिकतया आलयसम्बद्धकार्याणि प्रचलन्ति । तस्मात् तत्रोक्ताः विचाराः एव प्रधानतया अध्ययनार्थमत्र स्वीकृतम् । यदि सन्दर्भानुगुणं गृहनिर्माणसमये सर्वमवलोक्य कार्येषु अनुसरामः तर्हि दोषाः समस्याः वा समीपं नायान्ति इति वदन् अत्रैवोपसंहरामि ।

## अनुशीलितग्रन्थसूची

1. वास्तुविद्या
2. मनुष्यालयचन्द्रिका
3. रामायणम्
4. महाभारतम्
5. विश्वकर्मवास्तुशास्त्रम्
6. मत्स्यपुराणम्
7. अग्निपुराणम्
8. गृहवास्तु – एकमध्ययनम्
9. मयमतम्

[1] म.चं. 5/02

# भूवादयो धातवः*

डा. भारती मदनमोहन**
सहायकाचार्या(अ.), के.सं.वि., रा. गा. परिसरः
शृङ्गेरी

***लेखसारः*** *– क्रियावाचकत्वे सति भ्वादिगणपठितत्वमिति धातुलक्षणमेतावता पर्यवसितम् । तत्र क्रियावाचकत्वमिति दलनिवेशस्य मुख्यं प्रयोजनं 'वा' इति विकल्पार्थकस्य अव्ययस्य धातुत्ववारणम् । भ्वादिगणपठितत्वमिति दलं तु हिरुगाद्यव्ययेषु वर्जनक्रियावाचिषु साध्यस्वभावायाः क्रियायाः अभानात्, शिश्ये इत्यादिभावलकारस्थले अन्याभिहितक्रियाया एव लकारेण बोधनात्, आणवयतीत्यादेः शिष्टैरप्रयोगाच्च स्पष्टप्रतिपत्त्यर्थमेव इति । एवञ्च क्रियावाचकत्वं धातुत्वमिति सुस्थम् ।*

***कूटशब्दाः*** *– धातुः, क्रिया, भावः ।*

॥ नमः पाणिनिकात्यायनपतञ्जलिभ्यः ॥

भूवादयो धातवः इति सूत्रार्थविचारः यथामति किञ्चित् प्रस्तूयते । निखिलस्यापि शब्दप्रपञ्चस्य सुबन्ते तिङन्ते चेति द्विविधे पदे अन्तर्भावः सुशकः । तयोः प्रकृतिरपि द्वैविध्यं भजते – प्रातिपदिकं धातुश्चेति । तत्र क्वचिद् उणादीनामपि व्युत्पन्नतास्वीकारात् सकलशब्दमूलभूतत्वं धातोः अभिधातुं शक्यम् । धातुरित्ययं व्यवहारस्तावदनादिः, न तु पाणिनिना टिघुभादिवत् स्वशास्त्रे परिभाषितः कृत्रिमः कश्चित् संज्ञाविशेषः , "को धातुः ? किं प्रातिपदिकं? .." इत्याथर्वणे श्रूयमाणत्वात् । अथापि स्वशास्त्रीयमर्यादानुगुण्येन स्वशास्त्रप्रक्रियोपयोगितया च तन्निर्वचनं चकार सूत्रकारः – भूवादयो धातवः इति । अत्र प्रतिपिपादयिषिताः अंशाः इमे –

- सिद्धान्तभूतः सूत्रार्थः, तत्सम्पत्तिप्रकारः
- क्रियावचनो धातुः इति न्यासः, क्रियायाः पारोक्ष्यं च
- भाववचनो धातुरिति न्यासे मूलम्
- दलकृत्यम्

## सिद्धान्तभूतः सूत्रार्थः, तत्सम्पत्तिप्रकारश्च

तत्रादौ सूत्रेऽस्मिन् भाष्ये भ्वादयो धातवः इति वक्तव्ये भूवादयः इत्युक्तं सूत्रकारेण, अर्थात् 'भू' इत्यारभ्य ये पठिताः धातुपाठे एधादयः, ते धातुसंज्ञाः स्युः इत्येतावन्तमेवार्थं बोधयितुं क्षमते एतत् सूत्रम् इत्याशङ्कमानेन वार्तिककृता –

- भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते
- पाठेन धातुसंज्ञायां समानशब्दप्रतिषेधः
- परिमाणग्रहणं च
- क्रियावचनो धातुः
- भाववचनो धातुः

---

*अष्टाध्यायी 1.3.1

**सम्पर्कसूत्रम्** - 9448964446, Email- dr.bharti.mohan@csu.co.in

इत्यादीनि वार्तिकानि अभिहितानि सूत्रन्यासपरिष्कारपराणि । किन्तु भाष्यकारस्तावत् वार्तिकान्यमूनि सर्वाण्यपि व्याख्याय परस्तात् सर्वोऽप्ययमर्थः सूत्राक्षरैरेव स्वरस्तया लभ्यते इति प्रतिपाद्य वार्तिकानि प्रत्याख्यत् । स एव च सिद्धान्तभूतः सूत्रार्थः कौमुद्यादावुपवर्णितः । स चेत्थम् – इह आदिशब्दयोः व्यवस्थाप्रकारवाचिनोः एकशेषः । व्यवस्थाशब्दः प्रभृतिपर्यायः । प्रकारश्च सादृश्यम् । भूश्च वाश्च भूवौ, आदिश्च आदिश्च आदी । भूवौ आदी येषां ते भूवादयः । भूप्रभृतयो वासदृशाः इत्यर्थः । तत्र वासादृश्यं तावत् क्रियावाचकत्वेन । सोऽयमर्थः सङ्गृह्य उच्यते दीक्षितैः "क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः"[1] इति । एवं च भ्वादिगणपठितत्वे सति क्रियावाचकत्वं धातुत्वमित्यर्थः पर्यवस्यति ।

## क्रियावचनो धातुः इति न्यासः, क्रियायाः पारोक्ष्यं च

पूर्वोपपादितरीत्या सूत्राक्षरैरीदृगर्थः सिध्यतीत्येतदनाश्रित्य प्रवृत्तमेतद् वार्तिकम् (क्रियावचनो धातुः इति) । अस्य पूर्वपीठिका इयम् । इतः प्राक्तनं वार्तिकं वर्तते 'परिमाणग्रहणं च' इति । परिमाणग्रहणं कर्तव्यम् । इयानवधिर्धातुसंज्ञो भवतीति वक्तव्यम् । कुतो ह्येतद्भूशब्दो धातुसंज्ञो भवति, न पुनर्भ्वेधशब्द इति शङ्कामुद्भाव्य तत्र समाहितम् – "क्रियावचनो धातुः" इति वक्तव्यम् इति । क्रियावचनो धातुः इत्युच्यमाने तु 'भू' इतीयानेवावधिः क्रियां वक्ति, न तु भ्वेध इति । अतः न तस्य धातुत्वापत्तिः इति तात्पर्यम् । ततः क्रियायाः स्वरूपजिज्ञासां कृत्वा तदुपवर्णनं कृतम् । तत्र भाष्यपङ्क्तयः उच्यन्ते -

**"का पुनः क्रिया ? ईहा । का पुनरीहा ? चेष्टा । का पुनश्चेष्टा ? व्यापारः । सर्वथा भवान्छब्देनैव शब्दानाचष्टे – न किञ्चिदर्थजातं निर्दिशत्येवंजातीयिका क्रियेति । क्रिया नामेयमत्यन्तापरदृष्टा अशक्या च नाम पिण्डीभूता निदर्शयितुम् । यथा गर्भोऽनिर्लुठितः । साऽसावनुमानगम्या । कोऽसावनुमानः ? इह सर्वेषु साधनेषु संनिहितेषु कदाचित् पचतीत्येतद् भवति । कदाचिन्न भवति । यस्मिन् संनिहिते पचतीत्येतद् भवति सा नूनं क्रिया । अथवा यया देवदत्तः इह भूत्वा पाटलिपुत्रे भवति सा नूनं क्रिया ।**[2]

इति । अनेन क्रिया सर्वापि परोक्षा फलानुमेया च इति सिद्धम् । तथा हि देशान्तरप्राप्तिलक्षणेन कार्येण अबाधितेन क्रियाख्यं कारणमनुमीयते । इतरदेशसंयोगादिफलं कारणजन्यं, कार्यत्वादित्यनुमानम् । तच्च कारणं क्रियारूपमेव प्रसिद्ध्यतीति तात्पर्यम् । ननु अप्रत्यक्षायाः क्रियायाः कारणत्वानुमानमेव दुर्घटम्, सम्बन्धग्रहणाभावात् इत्ति चेदुच्यते – धातुवाच्यः (उदाहरणार्थं पच्धातुवाच्यः) अधिश्रयणाद्यश्रयणपर्यन्तः समूहः । तस्य च समूहस्य युगपदसन्निधानात् अप्रत्यक्षत्वेऽपि एकैकस्य क्षणस्य प्रत्यक्षत्वे बुद्ध्या तान् क्षणान् सङ्कलय्य 'पचति' इति प्रयोगः । यदापि एकस्मिन् क्षणे 'पचति' इति प्रयोगः तदा तत्र समूहरूपारोपणमेव । अर्थात् इतः प्राक्तनक्षणवर्तिनां समेषामपि व्यापारावयवानां प्रकृतक्षणे सङ्कलनात्मिकया एकत्वबुद्ध्या आरोपं विधाय पचति इति व्यवहारः उपपादनीयः । शब्दशक्तिस्वभावाच्च एकः क्षणः (अनारोपितसमूहरूपः) नैव धातुवाच्यः । एवं च यः एकक्षणवर्ती व्यापारावयवः प्रत्यक्षः सः नैव धातुवाच्यः । यश्च धातुपदवाच्यत्वेन अभिमतः व्यापारसमुदायः तस्य यौगपद्येन प्रत्यक्षम् असम्भवि । अतः तादृशक्षणसमूहनिर्वर्त्यस्यैव अर्थस्य क्रियात्वम् । सा च क्रिया अप्रत्यक्षा इति सिद्धम् । अथापि अधिश्रयणाद्यधिश्रयणपर्यन्ते अवधौ एकैकस्मिन् अपि क्षणे पचतीति व्यवहारस्तु उपपद्यते एव, समूहरूपारोपात् ।

[1]कौमुदीसूत्रसंख्या - 18

[2]महाभाष्यम् – पृ.सं – 114

## भाववचनो धातुरिति न्यासे मूलम्

‘क्रियावचनो धातुः’ इति न्यासे अस्तिभवतिविद्यतीनां स्थितिमात्राभिधायित्वेन तत्प्रयोगे व्यक्तं क्रियायाः अप्रतीतेः ईदृशलक्षणे अव्याप्तिः इत्यभिधाय ‘भाववचनो धातुः’ इति न्यासान्तरम् अकारि । भावस्तावद् व्यापकः, क्रिया च व्याप्या । तत्र क्रियाभावयोरियान् विशेषः - सपरिस्पन्दसाधनसाध्यः अर्थः क्रिया, सपरिस्पन्दापरिस्पन्दान्यतरसाधनसाध्यः अर्थः भावः इत्यतः भाववचनो धातुरित्युच्यमाने अस्त्यादिकं पच्यादिकं चेति सर्वमपि लक्ष्यं सङ्गृहीतं भवति इति वार्तिककृदाशयः । उभयसाधारणं लक्षणं तावत् भूत-भविष्यद्-वर्तमानकालव्यञ्जकत्वम् इति । अनेन लक्षणेन अस्त्यादीनामपि क्रियात्वं संसाधितं भाष्यकारैः ।

## दलप्रयोजनविचारः

सूत्रे वा इत्येतदभावे क्रियावाचिनः इत्यर्थो नोपलभ्येत । ततश्च याः पश्यसि इति यच्छब्दनिष्पन्ने ‘या’ इत्यस्मिन् स्वरूपे धातुलक्षणम् अतिव्याप्नोति । सति हि तस्मिन् “आतो धातोः[१]” इति आकारो लुप्येत । न चात्र लक्षणप्रतिपदोक्तपरिभाषया प्रतिपदोक्तस्यैव आकारान्तस्य धातोर्ग्रहणान्नातिव्याप्तिरिति वक्तुं शक्यम् । “नकारजावनुस्वारपञ्चमौ...”[२] इत्यभियुक्तोक्तेः लाक्षणिकानामपि भ्वादिष्ववलोकनेन धातुविषये तत्परिभाषायाः अप्रवृत्तेः । आतोऽनापः इति वार्तिककृन्मतानुसारेण ‘वा’ इति विकल्पार्थकमव्ययमेवात्र व्यावर्त्यम् । तस्य धातुत्वे सति अप्रातिपदिकत्वात् सुबभावे पदत्वं न सेत्स्यति । सूत्रे ‘वा’ इत्युक्तौ तु वार्थस्य विकल्पस्य भूतभविष्यद्वर्तमानकालसम्बन्धाभावेन क्रियात्वाभावात् न दोषः । भू इत्येतत्प्रत्युदाहरणं तावत् हिरुक्, पृथगित्याद्यव्ययं, शिश्ये इत्यादिभावार्थतिङन्तं च । तेषामपि वर्जनादिक्रियावाचकत्वात् प्राप्तिः, गणे निवेशाभावाच्च भूप्रभृतय इत्युक्तौ तन्निरासः । वस्तुतस्तु धातुना साध्यस्वभावाया एव क्रियाया बोधनेन हिरुगादौ तदसम्भवादेव धातुत्वं वारयितुं शक्यम् । शिश्ये इत्यादावपि वासादृश्यम् अन्यानभिहितक्रियावाचकत्वेन इत्युच्यमाने धातुत्वं सुवारम् । अतः ‘आणवयति’, ‘वट्टयति’ इत्याद्येव भू इत्यस्य मुख्यं व्यावर्त्यम् । सति च तस्य धातुत्वे शास्त्रविषयतया साधुत्वमापद्येत । तद्वारणाय भूप्रभृतयो धातुसंज्ञा भवन्तीति वक्तव्यम् । सूत्रशेषे भाष्ये तावत् इदमपि प्रयोजनं निराकृतं, शिष्टप्रयोगादाणवयत्यादीनां निवृत्तिमाश्रित्य ।

## सन्दर्भग्रन्थसूची

1. पाणिनिविरचिता अष्टाध्यायी । सं-गोपालदत्तपाण्डेयः । चौखम्बा सुरभारती प्रकाशन (१९९८) ।
2. व्याकरणमहाभाष्यम् (प्रदीप-उद्योत-छायासमेतम्) भागः - 2 । सं – भार्गवशास्त्री जोषी । चौखम्बा संस्कृत प्रतिष्ठान (१९९१) ।
3. भट्टोजिदीक्षितविरचिता प्रौढमनोरमा (बृहच्छब्दरत्न-लघुशब्दरत्नसहिता) । सं – प्रो. सीतारामशास्त्री । काशी हिन्दू विश्वविद्यालयः (१९९२)
4. भट्टोजिदीक्षितविरचिता सिद्धान्तकौमुदी (बालमनोरमा - तत्त्वबोधिनीव्याख्यासहिता) । भागाः १-४ । सं – परमेश्वरानन्दशर्मा भास्करः । मोतीलाल बनारसीदास (१९७७)

[१] अष्टाध्यायी 6.4.140

[२] मुग्धबोधव्याकरणम् (बोपदेवः)

 ISSN : 2249-538X

# प्रत्यक्तत्त्वप्रदीपिकोक्तदिशा स्वप्रकाशलक्षणविमर्शः

श्री ब्रह्मभट्ट नचिकेता सञ्जयकुमार्*
सहायकाचार्यः(अ.), के.सं.वि., रा. गा. परिसरः
शृङ्गेरी

***लेखसारः*** – *दर्शनानि परमपुरुषार्थसाधनानि इति समेषां नः विदितमेव । तत्रापि अस्ति इतरदर्शनापेक्षया अद्वैतवेदान्तदर्शनस्य विशिष्टं स्थानम् । वेदान्तो नाम उपनिषत्प्रमाणम् इति उक्त्या उपनिषदि पठितानां वाक्यानां तात्पर्यविचारणा क्रियते अस्मिन् शास्त्रे । उपनिषदः आत्मनः याथात्म्यप्रतिपादनेन लब्दप्रयोजनाः इति वेदान्तसमयः । तच्च याथात्म्यं बहुविधं नित्यत्वसत्यत्व-एकत्वादिरूपं तेषु अन्यतमं भवति स्वप्रकाशत्वम् इति । तत्र वेदान्तिनः चैतन्यस्वरूपम् आत्मानम् अभ्युपगच्छन्ति सत्यं ज्ञानमनन्तं ब्रह्म इति श्रुतेः । चैतन्यस्य (ज्ञानस्य) स्वप्रकाशत्वं तावत् प्राभाकराः अपि वदन्ति । भाट्टाः नैयायिकाः वा चैतन्यस्य स्वप्रकाशत्वं न वदन्ति । तस्मात् कर्तव्या अत्र विचारणा यत् आत्मनः स्वप्रकाशत्वं नाम किम् ? "लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः" इति न्यायेन स्वप्रकाशत्वे किं लक्षणं भवति इति विचारः अस्मिन् शोधपत्रे क्रियते । अत्र आदौ अन्यदार्शनिकानाम् आशयम् अनूद्य वेदान्तरीत्या तत्समाधानं प्रदीयते । तत्र च स्वप्रकाशत्वे लक्षणोपन्यासं कृत्वा तत्र आपततः प्रमाणमीमांसा अपि क्रियते ।१. स्वत्वे सति प्रकाशत्वम् २. स्वविषयकत्वे सति प्रकाशत्वम् ३. सजातीयप्रकाशाप्रकाश्यत्वम् ४. स्वसत्तायां प्रकाशनैयत्यम् ५. स्वव्यवहारहेतुत्वे सति प्रकाशत्वम् ६. ज्ञानाऽविषयत्वम् ७. ज्ञानाऽविषयत्वे सति अपरोक्षत्वम् ८. व्यवहारविषयत्वे सति ज्ञानाऽविषयत्वम् ९. स्वप्रतिबद्धव्यवहारे सजातीयपरानपेक्षत्वम् १०. अवेद्यत्वे सति अपरोक्षव्यवहारविषयत्वम् ११. अवेद्यत्वे सति अपरोक्षव्यवहारविषयत्वयोग्यत्वम् एवंरूपेण लक्षणानि उक्त्वा पूर्वपक्षे उद्भाविताः दोषाः समाधीयन्ते । यथा १. स्वत्वे सति प्रकाशत्वम् इति स्वप्रकाशवस्तुनः लक्षणं कृते चेत् इदं लक्षणं लक्ष्ये तु समन्वयं प्राप्नोति । वेदान्तरीत्या चैतन्ये स्वत्वं वर्तते प्रकाशत्वम् अपि अस्ति अतः लक्ष्ये लक्षणसमन्वयः । ननु स्वत्वमित्येव लक्षणम् अस्तु इति न च वाच्यम् । तथा सति घटे अतिव्याप्तिः घटस्य अस्वप्रकाशत्वं समेषां दार्शनिकानां सम्मतम् तस्मात् घटः लक्ष्यभिन्नः तस्मिन् स्वत्वं वर्तते इति कृत्वा अतिव्याप्तिः अतः तत्परिहाराय लक्षणे प्रकाशत्वम् इति निवेशनीयम् । तथा सति घटे अतिव्याप्तिः परिहृता भवति, तत्र स्वत्वस्य सत्त्वे अपि स्वत्वविशिष्टप्रकाशत्वस्याभावात् । नन्वेवम् अपि व्यवसायात्मकज्ञाने प्रदीपादौ च अतिव्याप्तिः तदवस्था प्रदीपादेः ज्ञानविषयत्वाङ्गीकारेण अस्वप्रकाशत्वं सिद्धम् । व्यवसायात्मकज्ञानस्यापि अनुव्यवसायात्मकज्ञानविषयत्वम् अभ्युपगतम् इति कृत्वा तस्यापि लक्ष्यभिन्नत्वं सिद्धम् । तथा च तत्र लक्षणसमन्वयात् अतिव्याप्तिः इति पूर्वपक्षः । अथ सिद्धान्तः - अवेद्यत्वे सति अपरोक्षव्यवहारविषयत्वयोग्यत्वम् इति लक्षणं स्वप्रकाशवस्तुनः निर्दुष्टं लक्षणं भवति । अवेद्यत्वं नाम फलव्याप्यत्वम् । तच्च भग्नावरणकचिद्विषयत्वरूपम् । अपरोक्षव्यवहारयोग्यत्वम् इत्यनेन अपरोक्षव्यवहारयोग्यत्वात्यन्ताभावानधिकरणत्वं विवक्षितम् । तथा च परिष्कृतलक्षणस्वरूपम् - भग्नावरणकचिद्विषयत्वभिन्नत्वे सति अपरोक्षव्यवहारयोग्यत्वात्यन्ताभावानधिकरणत्वम् इति । चैतन्यं चैतन्यस्यैव विषयः न भवति इति कृत्वा प्रथमं दलं लक्ष्ये समन्वितम् । चैतन्यं च अपरोक्षव्यवहारस्य विषयः भवति इति कृत्वा द्वितीयं दलम् अपि लक्ष्ये समन्वितम् । अपरोक्षव्यवहारयोग्यत्वमात्रस्य लक्षणत्वे शुक्तिरजते अतिव्याप्तिः अतः अवेद्यत्वमिति योजनीयम् । अवेद्यत्वमात्रोक्तौ नित्यानुमेयधर्मादिषु अतिव्याप्तिः अतः अपरोक्षव्यवहारयोग्यत्वं तेषां च धर्मादीनां कदापि अपरोक्षव्यवहारः नास्ति तस्मात् तत्र तद्योग्यत्वम् असिद्धम् ।*

***कूटशब्दाः*** – *आत्मा, स्वप्रकाशः , फलव्याप्यत्वम् , अपरोक्षव्यवहारः , निर्धर्मकत्वम्, अनिर्मोक्षः इति ।*

***सम्पर्कसूत्रम्** - 9427382683, Email- brahmbhatt.nachiketa@csu.co.in

## उपोद्घातः-

आत्मनः बहवः धर्माः श्रुत्या प्रतिपाद्यन्ते । तस्य ज्ञानरूपत्वं तादृशस्य च आत्मनः स्वप्रकाशत्वम् । तच्च स्वप्रकाशत्वम् अस्मिन् शोधपत्रे विचार्यते । लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः इति न्यायानुरोधेन स्वप्रकाशवस्तुनः साधनार्थम् आदौ तस्मिन् लक्षणोपन्यासः ततः परं प्रमाणोपन्यासः कर्तव्यः । तत्र इतरे दार्शनिकाः स्वप्रकाशवस्तुनः लक्षणं न संभवति इति । स्वप्रकाशवस्तु असिद्धं मन्यन्ते । तत्र स्वप्रकाशवस्तुनः लक्षणे एकादशधा विकल्पान् प्रदर्श्य तत्र सर्वत्र दोषोद्भावनं कृत्वा तेषामुक्तानां दोषाणां परिहारः अस्मिन् शोधपत्रे क्रियते ।

[1]नमस्कुर्मो नृसिंहाय स्वप्रकाशचिदात्मने । इति चित्सुखाचार्यैः प्रणीतः मङ्गलश्लोकः । अस्मिन् च मङ्गलपद्ये भगवतः नृसिंहस्य विशेषणम् उक्तम् स्वप्रकाशचिदात्मने इति अत्र को नाम स्वप्रकाशशब्दस्यार्थः इति विचारणा क्रियते । तत्र स्वप्रकाशवस्तुनः लक्षणं नैव संभवति इति ।

१. [2]स्वश्च असौ प्रकाशश्च इति । एतद्विकल्पानुसारं स्वत्वविशिष्टप्रकाशत्वम् इति लक्षणं भवति ।
२. स्वस्य स्वयमेव प्रकाशः । अस्मिन् विकल्पे स्वविषयकत्वविशिष्टप्रकाशत्वम् इति लक्षणम् ।
३. सजातीयप्रकाशाप्रकाश्यत्वम् इति तृतीयः विकल्पः ।
४. स्वसत्तायां प्रकाशव्यतिरेकविरहितत्वम् इति चतुर्थः । स्वविद्यमानतादशायां नियतप्रकाशमानत्वम् इति सामान्यः अर्थः ।
५. स्वव्यवहारहेतुत्वे सति प्रकाशत्वम् ।
६. ज्ञानाविषयत्वम् ।
७. ज्ञानाविषयत्वे सति अपरोक्षत्वम् ।
८. व्यवहारविषयत्वे सति ज्ञानाविषयत्वम् ।
९. स्वप्रतिबद्धव्यवहारे सजातीयपरानपेक्षत्वम् ।
१०. अवेद्यत्वे सति अपरोक्षव्यवहारविषयत्वम् ।
११. अवेद्यत्वे सति अपरोक्षव्यवहारविषयत्वयोग्यत्वम् ।

एतेषां विकल्पानां सामान्यार्थनिरूपणपुरस्सरम् आपाततः आत्मनि समन्वयः प्रदर्श्यते । प्रथमविकल्पः स्वाभिन्नप्रकाशः (स्वत्वे सति प्रकाशत्वम्) । अत्र चिदात्मनि स्वत्वम् अस्ति, तथैव प्रकाशत्वम् अस्ति इति लक्ष्ये लक्षणसमन्वयः । द्वितीयविकल्पे आत्मनः स्वविषयकत्वं चिदात्मनि अस्ति अर्थात् चिदात्मा अन्यस्य ज्ञानस्य विषयः न भवति तर्हि कथं तस्य प्रकाशः यतोहि यः पदार्थः ज्ञानस्य विषयः भवति सः एव पदार्थः प्रकाश्यते । चिदात्मा तु प्रकाशते इति सर्वसम्मतम् एव । यदि अयं ज्ञानान्तरस्य विषयः भवेत् तदा सः स्वप्रकाशः न स्यात् तथा च अनन्या गत्या चिदात्मनः स्वविषयकत्वं वक्तव्यम् । तथा च आत्मनि स्वविषयकत्वं प्रकाशत्वम् इति उभयमस्ति इति कृत्वा लक्ष्ये लक्षणसमन्वयः । तृतीयविकल्पः सजातीयप्रकाशाप्रकाश्यत्वम् इति । सजातीयः यः प्रकाशः तेन अप्रकाश्यत्वम् इति अर्थः । चिदात्मा सजातीयेन प्रकाशेन न प्रकाश्यते इति कृत्वा सः सजातीयप्रकाशाप्रकाश्यः

[1]चित्सुखी पुटसंख्या ४
[2]चित्सुखी पुटसंख्या ४ - ५

 ISSN : 2249-538X

भवति इति लक्ष्ये लक्षणसमन्वयः । चतुर्थः विकल्पः स्वसत्तायां प्रकाशव्यतिरेकविरहितत्वम् इति । यः पदार्थः स्वस्य विद्यमानतादशायां नियमेन प्रकाशते सः स्वप्रकाशः । चिदात्मा अपि स्वस्य वर्तमानतादशायां नियमेन प्रकाशते इति कृत्वा लक्ष्ये लक्षणसमन्वयः । पञ्चमः विकल्पः स्वव्यवहारहेतुत्वे सति प्रकाशत्वम् इति । आत्मा स्वस्य व्यवहारस्य हेतुरस्ति तस्मिन् प्रकाशत्वं च अस्ति अतः आत्मनि स्वव्यवहारहेतुत्वे सति प्रकाशत्वम् आयातम् । षष्ठः विकल्पः ज्ञानाविषयत्वम् । यः ज्ञानस्य विषयः भवति सः ज्ञानप्रकाश्यः अर्थात् अस्वप्रकाशः । ज्ञानाविषयस्तु स्वप्रकाशः । आत्मनि ज्ञानाविषयत्वम् अस्ति अतः लक्ष्ये लक्षणसमन्वयः । सप्तमः विकल्पः ज्ञानाविषयत्वे सति अपरोक्षत्वम् इति । आत्मनि ज्ञानाविषयत्वं पूर्वोक्तप्रकारेण अस्ति यत्साक्षात् अपरोक्षात् ब्रह्म इति श्रुत्या अपरोक्षत्वं च वर्तते । अष्टमः विकल्पः व्यवहारविषयत्वे सति ज्ञानाविषयत्वम् । आत्मा व्यवहारस्य विषयः भवति इति व्यवहारविषयत्वरूपं दलम् आयातम् । पूर्वोक्तप्रकारेण ज्ञानाविषयत्वम् आत्मनि अस्ति इति लक्ष्ये लक्षणसमन्वयः । नवमः विकल्पः भवति स्वप्रतिबद्धव्यवहारे सजातीयपरानपेक्षत्वम् । स्वप्रतिबद्धव्यवहारः नाम स्वसंबन्धिव्यवहारः तादृशव्यवहारं प्रति यस्य सजातीयः परः (अन्यः) न अपेक्ष्यते सः स्वप्रतिबद्धव्यवहारे सजातीयपरानपेक्षः तत्त्वं स्वप्रकाशत्वम् । तथा चिदात्मा स्वव्यवहारं प्रति सजातीयम् अन्यं न अपेक्षते इति कृत्वा तस्मिन् स्वप्रकाशलक्षणम् आगतम् । दशमविकल्पः अवेद्यत्वे सति अपरोक्षव्यवहारविषयत्वम् । वेद्यत्वं ज्ञानाविषयत्वम् अवेद्यत्वं तदविषयत्वं तथा च चिदात्मनि ज्ञानाविषयत्वम् अस्ति इति प्रथमं दलं समन्वितम् । अपरोक्षव्यवहारस्य च आत्मा विषयः भवति इति कृत्वा द्वितीयमपि दलं लक्ष्ये समन्वितम् । एकादशः विकल्पः अवेद्यत्वे सति अपरोक्षव्यवहारविषयत्वयोग्यत्वम् इति आत्मनि पूर्वोक्तप्रकारेण अवेद्यत्वं वर्तते तथा अपरोक्षव्यवहारविषयत्वयोग्यत्वं च अस्ति इति स्वप्रकाशलक्षणस्य आत्मनि समन्वयः भवति ।

इतः परं क्रमेण विकल्पेषु दूषणाभिधानं क्रियते । प्रथम विकल्पे आत्मनि लक्षणस्य यद्यपि समन्वयः भवति तथापि नैयायिकाभिमतव्यवसायात्मकज्ञाने अतिव्याप्तिः भवति । तथा च व्यवसायात्मकज्ञाने स्वत्वप्रकाशत्वयोः वृत्तित्वात् व्यवसायात्मकज्ञानस्य च अस्वप्रकाशत्वात् तस्मिन् यथोक्तलक्षणस्य समन्वये अतिव्यातिः । तस्मात् प्रथमः विकल्पः न सम्यक् । ननु व्यवसायात्मकज्ञाने अतिव्याप्तिवारणार्थं द्वितीयविकल्पानुधावनं युज्यते । तथा च व्यवसायात्मकज्ञानस्य स्वस्मात् भिन्नेन अनुव्यवसायज्ञानेन विषयीकरणात् तस्य स्वविषयकत्वं नास्ति इति न तत्र स्वविषयकत्वविशिष्टप्रकाशत्वरूपस्वप्रकाशलक्षणस्य अतिव्याप्तिः । तथापि अन्यः दोषः अस्मिन् पक्षे अस्त्येव । स्वस्य स्वविषयकत्वस्वीकारे कर्मकर्तृभावविरोधः प्रसज्यते । कर्तृत्वं कर्मत्वं चेति धर्मौ एकत्र न संभवतः इति कृत्वा तदा लक्षणमेव न संभवेत् इति असंभवः दोषः । एवं सति यदि तृतीयविकल्पानुधावनं क्रियते तदा लक्षणासंभवरूपः दोषः यद्यपि नास्ति तथापि प्रदीपे घटादौ च अतिव्याप्तिः अस्मिन् पक्षे दुष्परिहरा एव । तथा च लक्षणं सजातीयप्रकाशाप्रकाश्यत्वम् इति । प्रदीपादेः सजातीयः प्रकाशः भवति प्रदीपान्तरमपि तत् प्रकाश्यत्वं प्रदीपे नास्ति इति कृत्वा तस्मिन् सजातीयप्रकाशाप्रकाश्यत्वस्य वृत्तित्वात् अतिव्याप्तिः । नहि प्रदीपः स्वसजातीयेन प्रदीपान्तरेण प्रकाश्यते । किञ्च घटे अतिव्याप्तिः तथाहि घटः सजातीयेन घटत्ववता अपरेण घटेन न प्रकाश्यते अपितु विजातीयेन ज्ञानेन प्रदीपेन वा प्रकाश्यते इति तस्मिन् सजातीयप्रकाशाप्रकाश्यत्वरूपस्वप्रकाशलक्षणमस्ति इति अतिव्याप्तिः । प्रदीपः ज्ञानं वा घटसजातीयं तदा स्यात् यदा तयोः घटत्वजातिः स्यात् न चैतदस्ति इति यावत् । ननु घटे अतिव्याप्तिवारणार्थं सत्तया सजातीयत्वं वदामः । तथा च प्रदीपे ज्ञाने च सत्ता जातिः अस्ति इति घटः सत्तया सजातीयप्रदीपादिप्रकाशेन प्रकाश्यः एव भवति न तु अप्रकाश्यः इति न अतिव्याप्तिः इति न च वाच्यम् । यदि लक्षणे सत्तया सजातीयत्वम् इति विशेषणं दीयते तदा तस्य प्रदत्तस्य विशेषणस्य सार्थक्यं तदा भवति यदि तादृशः सत्तारहितः प्रकाशः वर्तते तस्य व्यावृत्तिः विवक्षिता परन्तु

तादृशस्य प्रकाशस्य एव असंभवात् तद्यावर्तकं विशेषणमपि व्यर्थं स्यात् तदा प्रकाशाप्रकाश्यत्वम् इत्येव लक्षणं स्यात् । तथा सति प्रदीपे दोषतादवस्थ्यं तथा प्रतिज्ञातलक्षणस्य हानिश्च स्यात् । यदि प्रदीपे दोषवारणार्थं चतुर्थविकल्पानुधावनं क्रियते तदा प्रदीपे अतिव्याप्तिः वारिता भवति । चतुर्थविकल्पोक्तं लक्षणं स्वसत्तायां प्रकाशव्यतिरेकविरहितत्वम् इति । स्वविद्यमानतादशायां नियतप्रकाशमानत्वम् इति यावत् । तथा च प्रदीपस्य विद्यमानतादशायां नियमेन प्रकाशमानत्वं नास्ति । प्रदीपः ज्ञातैकसत्ताकः नास्ति इति यावत् । परन्तु सुखादौ अतिव्याप्तिः एतल्लक्षणाभ्युपगमे दुष्परिहरा । तथाहि पर्यवसन्नं लक्षणं ज्ञातैकसत्ताकत्वम् । तच्च ज्ञाने इव सुखादिषु साक्षिवेद्येषु अपि वर्तते इति अतिव्याप्तिः । अथ पञ्चमपक्षाभ्युपगमः तदा न सुखादावतिव्याप्तिः । तथा च स्वव्यवहारहेतुत्वे सति प्रकाशत्वम् इति लक्षणम्, सुखादिषु स्वव्यवहारहेतुत्वस्य सत्त्वे अपि स्वव्यहारहेतुत्वविशिष्टप्रकाशत्वं नास्ति इति न अतिव्याप्तिः । परन्तु प्रदीपे अतिव्याप्तिः भवत्येव । एवञ्च प्रदीपः स्वस्य व्यवहारस्य हेतुः भवति इति कृत्वा तस्मिन् स्वव्यवहारहेतुत्वम् अस्ति । तथा प्रदीपे प्रकाशत्वम् अपि अस्ति । ननु प्रकाशत्वं नाम ज्ञानत्वं तदा तु प्रदीपे ज्ञानत्वं नास्ति इति अतिव्याप्तिवारणं संभवेत् परन्तु अत्र प्रकाशत्वम् इत्यनेन प्रकाशपदवाच्यत्वं विवक्षितम् । तच्च ज्ञानप्रदीपसाधारणमेव इति अतिव्याप्तिः । ननु स्वपदस्थाने ज्ञानपदं निवेश्य ज्ञानव्यवहारहेतुत्वे सति प्रकाशत्वम् इति परिष्क्रियतां तदा प्रदीपे दोषवारणं भवेत् इति न च वाच्यम् । अयं प्रदीपप्रकाश इति ज्ञानव्यवहारस्य प्रदीपः विषयविधया हेतुः भवति इति तस्मिन् ज्ञानव्यवहारहेतुत्वविशिष्टप्रकाशत्वम् अन्वितमिति अतिव्याप्तिः तदवस्था । किञ्च एतत्परिष्कारस्वीकारे अनुव्यवसायज्ञाने अतिव्याप्तिः अपि भवति । ज्ञानम् इत्यनेन व्यवसायज्ञानमादाय तादृशज्ञानव्यवहारस्य हेतुः अनुव्यवसायज्ञानं भवति तस्मिन् च प्रकाशत्वं वर्तते इति अतिव्याप्तिः । अनुव्यसायज्ञानस्य अपि वेद्यत्वात् तस्मिन् लक्षणसमन्वयः वेदान्तिना न इष्टः । पुनरपि अस्मिन् पक्षे दोषाभिधानं क्रियते । अत्र व्यवहारहेतुत्वं विशेषणमस्ति वा उपलक्षणम् इति । आद्ये पक्षे मोक्षदशायाम् आत्मानि धर्ममात्रस्याभावात् तदा व्यवहारहेतुत्वरूपः धर्मः मोक्षकालीनचिदात्मनि नास्ति इति अव्याप्तिः स्यात् । न द्वितीयः, व्यवहारहेतुत्वस्य उपलक्षणत्वे तेन उपलक्षितः चिदात्मा भवति तस्मिन् चिदात्मनि उपलक्षितत्वं भवति । इदम् उपलक्षितत्वं किं विशेषणम् आहोस्वित् विकल्पं कृत्वा आद्ये पक्षे मुक्तिप्रलयावस्थात्मनि अव्याप्तिः । द्वितीये तावत् स्वरूपमात्रे पर्यवसानं स्यात् तदा प्रकाशमात्रं लक्षणं भवेत् । न च इष्टापत्तिः लक्षणं लक्ष्यात् भिन्नं भवेत् यदि प्रकाशः इत्येव लक्षणं स्यात् तदा तस्य लक्षणत्वासंभवः इति दोषः । नहि पृथिव्याः लक्षणं पृथिवी इति भवति । प्रदीपे दोषवारणाय ज्ञानाविषयत्वम् इति षष्ठविकल्पस्य अभ्युपगमः तदा प्रदीपस्य ज्ञानविषयत्वात् तस्मिन् ज्ञानाविषयत्वं नास्ति इति न अतिव्याप्तिः । परम् लक्षणस्य असंभवदोषग्रस्तत्वम् आयाति । तथा च स्वयंप्रकाशसाधकं यत् अनुमानादिप्रमाणं तेन जनितायाः अनुमित्याः चिदात्मा विषयः एव भवति इति लक्ष्यमात्रे कुत्रापि ज्ञानाविषयत्वं नास्ति इति असंभवः । एतद्दोषपरिहाराय तस्य अनुमितिज्ञानविषयत्वं न स्वीक्रियते चेत् स्वप्रकाशकथाप्रवृत्तिः एव न स्यात् । किञ्च ज्ञानाविषयत्वं यदि स्वप्रकाशत्वं तदा शशशृङ्गे अतिव्याप्तिः तत्र विकल्पविषयत्वसत्त्वे अपि ज्ञानविषयत्वं नास्ति । सप्तमविकल्पे अपि षष्ठविकल्पोक्तः दोषः समानः एव । यदि अत्र विषयत्वम् इत्यनेन कर्मत्वं विवक्षितं तदा तु ज्ञानाविषयत्वं नाम ज्ञानस्य कर्म न भवति इति अर्थः लभ्यते । एवं च सति प्राभाकरमतरीत्या आत्मनि अतिव्याप्तिः । तेषां मते ज्ञानमेव स्वप्रकाशम् आत्मा तु न स्वप्रकाशः इति कृत्वा सः लक्ष्यभिन्नः भवति । तादृशि आत्मनि ज्ञानविषयत्वं नास्ति । ननु आत्मनः ज्ञानाविषयत्वे कथं तत्प्रकाशः इति न च वाच्यम् । स्वप्रकाशज्ञानस्य आश्रयतया तस्य सिद्धिः, प्राभाकरैः आत्मनः ज्ञानविषयं न अभ्युपगतम् । तथा च ज्ञानाविषयत्वम् अपरोक्षत्वं च प्राभाकराभ्युगतात्मनि अस्ति इति तत्र अतिव्याप्तिः । नापि अष्टमः पक्षः व्यवहारविषयत्वे सति ज्ञानाविषयत्वम् प्राभाकराङ्गीकृतात्मनि अस्ति इति अतिव्याप्तिः । व्यवहारविषयत्वं विशेषणं

 ISSN : 2249-538X

वा उपलक्षणं वा इति परीक्षायां पञ्चमपक्षोक्तदूषणप्रसङ्गः । अपि च अख्यातिवादिमते शुक्तिरजतसंसर्गे अतिव्याप्तिः स्यात् । तथा च शुक्तिरजतसंसर्गस्य ज्ञानविषयत्वे तस्य ज्ञानस्य भ्रमत्वापत्त्या अख्यातिवादिभिः तस्य ज्ञानविषयत्वं न स्वीक्रियते । लोके शुक्तिरजतसंसर्गस्य व्यवहारः अस्ति इति कृत्वा व्यवहारविषयत्वम् अस्ति इति तत्र अतिव्याप्तिः स्यात् । नापि नवमः स्वप्रतिबद्धव्यवहारे सजातीयपरानपेक्षत्वम् इति । तथा सति प्रदीपे घटादौ च अतिव्याप्तिः स्यात् । स्वं प्रदीपः स्वप्रतिबद्धव्यवहारः अयं प्रदीपः इति व्यवहारः तं प्रति सजातीयः परः अन्यः प्रदीपः न अपेक्ष्यते इति तस्मिन् सजातीयपरानपेक्षत्वम् आगतम् इत्यतः तत्र अतिव्याप्तिः । तथैव स्वं घटः तद्व्यवहारं प्रति सजातीयः अन्यः घटः न अपेक्ष्यते अपितु विजातीयः अन्यः प्रदीपादिः इति कृत्वा तत्र अतिव्याप्तिः स्यात् । ननु सत्तया सजातीयत्वं वदामः इति चेत् न तथा सति लक्षणासंभवः स्यात् । तथा च स्व(चिदात्मा)प्रतिबद्धव्यवहारं प्रति सत्तया सजातीयम् अन्यत् अदृष्टम् अपेक्षितम् इति लक्षणसमन्वयाभावात् असंभवः । नापि दशमः, अवेद्यत्वस्य ज्ञानाविषयत्वरूपत्वात् अनुमित्याद्यविषयत्वे कथानवतारप्रसङ्गः । अपि च यः ज्ञानस्य विषयः न भवति सः व्यवहारविषयः एव न भवति अपरोक्षव्यवहारस्य विषयः इति दूरनिरस्तम् । यदि पुनः अवेद्यत्वे सति अपरोक्षव्यवहारविषयत्वम् इति स्वप्रकाशलक्षणं तर्हि "मम माता वन्ध्या" इतिवत् व्याघातः अपि स्यात् । नापि एकादशः, अवेद्यत्वे सति अपरोक्षव्यवहारविषयत्वयोग्यत्वम् इति स्वप्रकाशलक्षणे पूर्वोक्तदोषाः भवन्त्येव । किञ्च अपरोक्षव्यवहारविषयत्वयोग्यत्वस्य धर्मत्वे मुक्तिप्रलयकालीनात्मनि अव्याप्तिः स्यात् । यदि मोक्षदशायाम् अपि आत्मनि धर्माः सन्ति चेत् अपसिद्धान्तः स्यात् । यदि उक्तः धर्मः आत्मनः स्वरूपं तदा तस्य व्यवहारनिरूप्यत्वात् सप्रतियोगित्वं स्यात् । न च इष्टापत्तिः अद्वैतहानेः । तथा च उक्तेषु सर्वेषु अपि विकल्पेषु दूषणसद्भावात् स्वप्रकाशलक्षणासिद्धिः इति ।

## सिद्धान्तः

[१]अपरोक्षव्यवहृतेः योग्यस्याधीपदस्य नः । संभवे स्वप्रकाशस्य लक्षणासंभवः कुतः ॥ इति ।

अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वम् इति लक्षणं भवितुम् अर्हति अस्मिन् पक्षे उक्ताः दोषाः परिहर्तुं शक्यन्ते । तत्र योग्यतालक्षणस्य धर्मस्य मोक्षदशायाम् अव्याप्तिः अभिहिता , मोक्षदशायां तादृशधर्मस्वीकारे सिद्धान्तहानिरपि स्यात् इति उक्तम् । तत्र नायं दोषः योग्यतालक्षणस्य धर्मस्य परिष्कृतत्वात् । तथा अपरोक्षव्यवहारयोग्यत्वं नाम अपरोक्षव्यवहारयोग्यतात्यन्ताभावानधिकरणत्वम् इति । यथा नैयायिकैः द्रव्यलक्षणं गुणाश्रयत्वम् इति उच्यते । तथा सति प्रथम क्षणावच्छेदेन द्रव्ये गुणस्य अभावात् अस्य लक्षणस्य अव्याप्तिः स्यात् । तत्परिहाराय गुणाश्रयत्वं नाम गुणात्यन्ताभावानधिकरणत्वम् इति परिष्कर्तव्यम् । अयम् आशयः- प्रागभावध्वंसाधिकरणे न तदत्यन्ताभावः इति प्राचीननैयायिकानां स्वीकृतः नियमः । तथा च प्रथमक्षणावच्छेदेन द्रव्ये गुणस्य प्रागभावाधिकरणत्वं वर्तते इति कृत्वा द्रव्यं कदापि गुणस्य अत्यन्ताभावाधिकरणं न भवति तथा च इदं लक्षणं प्रथमक्षणावच्छिन्ने द्रव्ये अपि वर्तते इति कृत्वा न अव्याप्तिः । यत् कदाचित् गुणस्य अधिकरणं भवति चेत् तदत्यन्ताभावानधिकरणमेव भवति । तथा प्रकृते अपि आत्मा मोक्षकालावच्छेदेन अपरोक्षव्यवहारयोग्यतायाः अनधिकरणं चेत् अपि संसारदशायां तादृशयोग्यताधिकरणस्य तत्र सत्त्वात् तत् सर्वदा अपरोक्षव्यवहारयोग्यतात्यन्ताभावानधिकरणमेव भवति इदं च परिष्कृतं लक्षणं मोक्षप्रलयकालावच्छेदेन आत्मनि अस्ति इति न अव्याप्तिप्रसङ्गः । नन्वस्तु मोक्षदशायाम् अपरोक्षव्यवहारयोग्यतात्यन्ताभावानधिकरणत्वं नाम संसारदशायां चिदात्मनि योग्यताधर्मस्य वृत्तित्वे अपसिद्धान्तः एव

[१]चित्सुखी पुटसंख्या १६

स्यात् । अत्रोच्यते - संसारदशायां काल्पनिकधर्माणां चिदात्मनि वृत्तित्वे अपि न कापि हानिः । तत्र प्रमाणं प्रदर्शयति – [1]“अक्षमा भवतः केयं साधकत्वप्रकल्पने । किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम् ॥” इति । अध्यासभाष्ये आक्षेपग्रन्थे [2]”विषयिणः तद्धर्माणाम् ” इति गृहीतम् । तत्र पञ्चपादिकाचार्यैः ननु विषयिणः चिदेकरसस्य कुतो धर्माः ये विषये अध्यस्येरन् इति आक्षेपं कृत्वा स्वयम् अग्रे परिहृतम् – [3]“आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः । अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते ॥” इति । ननु अस्तु संसारदशायां धर्माः मोक्षदशायां कथं ते स्युः इति न च वाच्यम् । योग्यातालक्षणधर्मस्य मोक्षदशायाम् अभावे अपि गुणाश्रयो द्रव्यम् इतिवत् कदाचित् तस्य धर्मस्य आत्मनि विद्यमानत्वात् अपरोक्षव्यवहारात्यन्ताभावानधिकरणत्वं मोक्षकालीनात्मनि वर्तते इति । ननु अभावस्य रूपस्य स्वातिरिक्तस्य धर्मस्य वर्तमानत्वात् अपसिद्धान्तः किं न स्यात् , मैवं - अभावस्य अतिरिक्तत्वानभ्युगमात् नायं दोषः । तथा च वार्तिकं प्रमाणम् – [4]“अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः” इति । तथा तादृशस्य धर्मस्य आत्मस्वरूपे पर्यवसानात् न अपसिद्धान्तापत्तिः ।

इतः परम् अस्य लक्षणस्य दलकृत्यं विचार्यते - अपरोक्षव्यवहारयोग्यत्वमात्रस्य लक्षणत्वे अपरोक्षव्यवहारयोग्य-घटादौ अतिव्याप्तिः स्यात् । अतस्तत्परिहारार्थम् अवेद्यत्वमिति लक्षणे निवेशनीयम् । तेषां ज्ञानविषयत्वात् अवेद्यत्वं नास्ति इति नातिव्याप्तिः । ननु अवेद्यत्वमेव लक्षणमस्तु तथा च घटादिषु अतिव्याप्तिः वारिता भवति इति चेत् - उच्यते , तथा सति अतीतानागतेषु नित्यानुमेयेषु च अतिव्याप्तिः स्यात् तत्र अवेद्यत्वस्य सत्त्वात् । ननु तेषां परोक्षज्ञानविषयत्वात् वेद्यत्वमेव तथा च अवेद्यमात्रस्य लक्षणत्वे न क्वाप्यतिव्याप्तिः । अत्र उच्यते - अत्र यथाश्रुतं वेद्यत्वं न ग्राह्यम् अपितु फ-लव्याप्यत्वरूपं वेद्यत्वं विवक्षितम् । तदभावः अवेद्यत्वं तच्च नित्यानुमेयेषु गुरुत्वादिषु अस्ति इति कृत्वा तत्र अतिव्याप्तिः स्यात् अतः अपरोक्षव्यवहारयोग्यत्वम् इति योजनीयम् । तथा च तत्र अतिव्याप्तिः वारिता भवति । अयमाशयः फलं नाम विषयावच्छेदेन भग्नावरणकचित् तद्विषयत्वं फलव्याप्यत्वम् इति । विषयावच्छिन्नचैतन्ये च आवरणभङ्गः अन्तःक-रणवृत्त्या भवति । परन्तु नित्यानुमेयेषु अदृष्टादिषु अन्तःकरणव्यापारः न भवति इति कृत्वा तेषां उक्तरूपवेद्यत्वाभावात् अवेद्यत्वमेव वर्तते अतः अवेद्यत्वमात्रस्य लक्षणत्वे तत्र अतिव्याप्तिवारकं दलम् अपरोक्षव्यवहारयोग्यत्वं भविष्यति इति । ननु अस्मदादि प्रत्यक्षविषयत्वाभावे अपि योगिप्रत्यक्षविषयत्वात् नित्यानुमेयगुरुत्वादीनां वेद्यत्वम् अस्ति इति न च वा-च्यम् । तेषां चोदनैकगम्यत्वात् । तथा च सूत्रं [5]“चोदनालक्षणोऽर्थः धर्मः” इति सूत्रे चोदना एव प्रमाणं यस्य धर्मस्य सः तथोक्तः इति तथा च धर्मे नित्यानुमेये न योगिप्रत्यक्षं प्रमाणम् । न च योगिनः सर्वदर्शित्वहानिः स्यात् इति वा-च्यम् । योगिनः सर्वदर्शित्वं नाम योग्यसर्वदर्शित्वम् इति धर्मस्य योग्यत्वाभावात् न तत्प्रत्यक्षता योगिनाम् । तथा च श्लोकवार्तिकम् – [6]“यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् । दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता ॥” इति । अतः धर्मादिव्यावृत्यर्थं चरितार्थम् अपरोक्षव्यवहारविषयत्वदलम् । ननु एवम् अपि शुक्तिरजतादिषु केवलसाक्षिवेद्येषु अति-व्याप्तिः । तेषाम् अपरोक्षव्यवहारदर्शनात् तत्र अपरोक्षव्यवहारयोग्यत्वम् इति समन्वितम् । तत्र च केवलसाक्षिवेद्यत्वात् अन्तःकरणवृत्तिव्यापाराभावात् अवेद्यत्वमपि सिद्धमिति कृत्वा अतिव्याप्तिः । अत्र उच्यते - तेषाम् अवेद्यत्वाभ्युपगमे

---

[1]बृहदारण्यकवार्तिकम् - १ ।४ ।१२१९
[2]ब्रह्मसूत्रभाष्यम्
[3]पञ्चपादिका
[4]बृहदारण्यकवार्तिकम्
[5]जैमिनिसूत्रम् - १ ।१ ।२
[6]श्लोकवार्तिकम् - २ ।११४

 ISSN : 2249-538X

अपि अपरोक्षव्यवहारयोग्यत्वं न स्वीक्रियते । कथं तर्हि तेषाम् अपरोक्षव्यवहारः इति चेत् साक्षिचैतन्ये अध्यस्तत्वात् तेषाम् अपरोक्षव्यवहारः सिद्धः भवति पृथक्तया तद्योग्यत्वं न कल्पनीयम् । नन्वेवं सति घटादीनामपि अध्यस्तत्वात् एव व्यवहारसिद्धिरस्तु इति चेत् न - तेषाम् प्रत्यक्षप्रमाणसिद्धसत्त्वान्यथानुपपत्या तत्र अपरोक्षव्यवहारयोग्यता कल्प-नीया । शुक्तिरजतादीनां तु न प्रमाणविषयता अतः एव न व्यवहारयोग्यताकल्पनम् अपि । तथा च सिद्धं लक्षणं – अपरोक्षव्यवहारयोग्यत्वात्यन्ताभावानधिकरणत्व-विशिष्टभग्नावरणकविषयावच्छिन्नचैतन्याविषयत्वम् । इदं च परिष्कृतं लक्षणम् चिदात्मनि वर्तते इति सर्वं सुस्थितम् ।

## सन्दर्भग्रन्थसूची-


१. तत्त्वप्रदीपिका (चित्सुखी) नयनप्रसादिनीसंस्कृतव्याख्यासहिता चौखम्बासंस्कृतसंस्थानम्

२. श्रीमद्धर्मराजाध्वरीन्द्रप्रणीता वेदान्तपरिभाषा श्रीदक्षिणामूर्तिमठ वाराणसी

३. ब्रह्मसूत्रशाङ्करभाष्यम् भाष्यरत्नप्रभादिव्याख्योपेतम् निर्णयसागर् मुम्बई

४. उपनिषद्भाष्यम् खण्डः १ महेश-अनुसन्धान-संस्थानम्

५. शारीरिकमीमांसाभाष्यम् खण्डः १ श्रीदक्षिणामूर्त्तिमठप्रकाशनम्

६. https://advaitasharada.sringeri.net/display/bhashyaVyakhya/BS?vyakhya=PP

७. https://advaitasharada.sringeri.net/display/bhashya/Brha/devanagari

८. सुरेश्वराचार्यप्रणीतं बृहदारण्यकभाष्यवार्तिकम् – आनन्दाश्रममुद्रालयः

# प्रागभावनिरूपणम्

श्री शशांक शिवराम भट्टः*
सहायकाचार्यः(अ.), के.सं.वि., रा.गा.परिसरः
श्रृङ्गेरी

***लेखसारः*** *– नैयायिकैरङ्गीकृतेषु सप्तपदार्थेषु अभावः इति अन्तिमपदार्थः । चतुर्विधाभावेषु अन्यतमः भवति इह घटो भविष्यतीति प्रतीतिविषयकः अनादिः सान्तः प्रागभावः । कार्योत्पत्तेः पूर्वं कार्यं समवायिकारणे भवति इति प्राचीननैयायिकाः । तत्र अतिरिक्तस्य प्रागभावस्य सत्त्वे प्रमाणं नास्तीति दीधितिकारप्रभृतयः नव्याः । तयोरत्र मतं समालोच्यते लेखेस्मिन् ।*

***कूटशब्दाः*** *– अभावः, प्रागभावः, अजन्याभावः, इह घटो भविष्यति*

अभावो हि प्रागभावप्रध्वंसाभावात्यन्ताभावान्योन्याभावभेदेन चतुर्विधः । तत्र इह घटो भविष्यतीति प्रतीत्या प्रागभावः इति कश्चनाभावः स्वीकर्तव्य इति हि सङ्गिरन्ते नैयायिकवैशेषिकाः । तत्र अतिरिक्तप्रागभावसत्त्वे किं प्रमाणम् इति प्रश्ने उच्यते- उत्पन्नस्य घटस्य पुनः उत्पत्तिवारणार्थं प्रागभावः स्वीकरणीयः इति । तत्स्वीकारे तद्घटं प्रति तद्घटप्रागभावस्यापि हेतुत्वात् तद्घटोत्पत्त्यनन्तरं तद्घटप्रागभावविरहात् उत्पत्तिः आपादयितुं न शक्यते । तथा च "अयं घटः स्वोत्पत्तिक्षणावृत्तिकारणजन्यः स्वोत्पत्तिद्वितीयक्षणानुत्पन्नत्वात्" इति अनुमानबलात् इतरेषां बाधसहकृतात् प्रागभावः सिद्ध्यति इत्याशयः । तद्घटप्रागभावस्य तद्घटसामग्रीनाश्यत्वेन तद्घटोत्पत्तिक्षणावृत्तित्वात् इति प्राचीनैः प्रागभावसिद्धिप्रकारः तत्र प्रदर्शितः ।

दीधितिकारास्तु अतिरिक्तं प्रागभावं न स्वीकुर्वन्ति, तेषामयमाशयः - "जातः घटः" इति प्रत्यक्षबलात् यथा घटः सिद्ध्यति, तथा "उत्पन्नः घटध्वंसः" इति प्रत्यक्षबलात् ध्वंसः सिद्ध्यति । परन्तु "इह इदानीं घटप्रागभावः" इति पण्डितपामरसाधारण्येन प्रत्यक्षाभावात् प्रागभावः प्रत्यक्षप्रमाणेन न साधयितुं शक्यते । ननु "अत्र घटो भविष्यति" इत्यादिप्रत्यक्षमेव प्रागभावे प्रमाणं वर्तमानप्रागभावप्रतियोगित्वमेव च तत्र भविष्यत्वम् इत्यपि वक्तुं न शक्यते, प्रागभावाघटितस्य वर्तमानकालध्वंसाधिकरणकालोत्पत्तिकत्वस्यैव भविष्यत्वरूपत्वाङ्गीकारात् । तथा च "अत्र घटः भविष्यति" इत्यस्य वर्तमानकालध्वंसाधिकरणकालोत्पत्तिकः घटः इत्यर्थः । तथा च भविष्यत्वप्रकारकप्रत्यक्षमपि ध्वंसे एव प्रमाणं स्यात्, न तु प्रागभावे ।

ननु प्रागभावानङ्गीकारे तद्घटोत्पादकतत्कपालतत्संयोगादीनां तद्घटोत्पत्तिकालेऽपि सत्त्वात् पुनरपि उत्पन्नस्य तद्घटस्य उत्पत्त्यापत्तिः । प्रागभावाङ्गीकारे च तद्घटप्रागभावस्यापि तद्घटोत्पत्तिं प्रति कारणतया तद्घटोत्पत्तिकाले तद्घटप्रागभावरूपकारणविरहादेव न पुनः तद्घटोत्पत्त्यापत्तिः इति चेत्, तत्रोच्यते - प्रागभावानङ्गीकारेऽपि उत्पन्नस्य घटस्य पुनरुत्पत्तिः कारणान्तरविरहादेव वारयितुं शक्यते । तथा हि - समवायसम्बन्धेन जन्यद्रव्योत्पत्तिं प्रति समवायसम्बन्धावच्छिन्नद्रव्यनिष्ठप्रतियोगिताकाभावः प्रतिबन्धकाभावविधया कारणम् इति कल्प्यते । तद्घटोत्पत्त्यनन्तरं कपाले समवायसम्बन्धेन तद्घटरूपद्रव्यस्य प्रतिबन्धकस्य विद्यमानतया समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्याभावरूपकारणं नास्ति इति समवायसम्बन्धेन घटरूपकार्यं न आपादयितुं शक्यते । प्रागभावकारणत्ववादिनापि अयं कार्यकारणभावः कल्पनीयः । अन्यथा यत्र एतद्घटनाशानन्तरं तदारम्भककपालाभ्यां घटान्तरम् उत्पद्यते, तत्र पूर्वघटोत्पत्तिद्वितीयक्षणे पुनः घटोत्पत्त्यापत्तिः । घटकारणीभूततत्प्रागभाव-कपालसंयोगादीनां सत्त्वात् ।

नन्वत्र समवायसम्बन्धेन जन्यद्रव्योत्पत्तिं प्रति समवायसम्बन्धेन जन्यद्रव्याभावः कारणं वा, जन्यद्रव्योत्पत्तिकालीनोत्पत्तिकध्वंसाभावः[1] वा कारणम् इत्यत्र विनिगमनाविरहेण समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्याभावस्य जन्यद्रव्योत्पत्तिकालोत्पत्तिकध्वंसाभावानां च कारणत्वं कल्पनीयम् इति गौरवम् । तदपेक्षया लाघवात् समवायसम्बन्धेन जन्यद्रव्योत्पत्तिं

***सम्पर्कसूत्रम्** – 9480037151, Email – shashanknyaya@gmail.com

[1]जन्यद्रव्योत्पत्तिकाले उत्पद्यमानाः ये ध्वंसाः तेषाम् अत्यन्ताभावस्य इत्यर्थः ।

प्रति जन्यद्रव्यप्रागभावः कारणम् इति एक एव कार्यकारणभावः कल्प्यते इति वक्तुमपि न शक्यते ।

एवं रूपेण प्रागभावस्य कारणत्वकल्पनेऽपि जन्यद्रव्यं प्रति जन्यद्रव्यप्रागभावस्य वा जन्यद्रव्योत्पत्तिकालोत्पत्तिकानन्तपदार्थप्रतियोगिकानन्तप्रागभावानां वा कारणत्वम् इत्यत्र विनिगमनाविरहेण अनन्तकार्यकारणभावकल्पनस्य आवश्यकत्वात् ।

कार्यतावच्छेदककोटौ द्रव्यपदम् अनिवेश्य सामान्यतः जन्योत्पत्तिं प्रति समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्याभावः कारणम् इत्युक्तौ यत्र कपाले रूपध्वंसस्य उत्पत्तिः, तत्र समवायसम्बन्धेन जन्यद्रव्याभावस्य असत्त्वात् व्यतिरेकव्यभिचारः ।

ननु समवायसम्बन्धस्य कार्यतावच्छेदकत्वस्वीकारादेव उक्तव्यभिचारः वारयितुं शक्यते, रूपध्वंसस्य समवायसम्बन्धेन अनुत्पत्तेः इति चेत्, एवमपि कपाले पाकवशात् समवायेन रूपोत्पत्तौ व्यतिरेकव्यभिचारः वारयितुं न शक्यते यतो हि कपाले समवायसम्बन्धेन घटरूपद्रव्यस्यैव सत्त्वात् ।

तर्हि उभयत्र मते साम्यमेव आगतमिति चेदुच्यते – भेदोस्ति, यतो हि प्रागभावरूपधर्मिणम् अधिकं कल्पयित्वा अनन्तप्रागभावानां कारणत्वमपि कल्पनीयम् । तदपेक्षया क्लृप्तस्य अत्यन्ताभावस्य अनेककारणत्वकल्पने लाघवात् । "धर्मिकल्पनातः वरं धर्मकल्पना" इति न्यायात् । अतः ध्वंसस्य प्रामाणिकत्वेऽपि प्रागभावः न प्रामाणिकः इति दीधितिकृताम् आशयः ।

प्रागभावस्य अतिरिक्तत्वमङ्गीकुर्वतां प्राचीनानां परम् अयमाशयः- प्रागभावस्य हेतुत्वानङ्गीकारे पटानधिकरणेषु तन्तुषु पटोत्पत्त्यापत्तिः । प्रागभावाङ्गीकारे तु पटानधिकरणेषु तन्तुषु पटप्रागभावविरहादेव न पटोत्पत्त्यापत्तिः । ध्वंसप्रागभावयोः स्वप्रतियोग्यधिकरणवृत्तित्वनियमात् ।

ननु तद्वारणाय समवायसम्बन्धेन तत्पटव्यक्तिं प्रति तत्पटाधिकरणतन्तूनां तत्संयोगानां च तद्व्यक्तित्वेन हेतुत्वात् तत्पटानधिकरणेषु तन्तुषु तादृशतद्व्यक्तित्वविरहात् न पटोत्पत्त्यापत्तिः । एवं च प्रागभावस्य हेतुत्वम् अनावश्यकम् इति चेत्, सहस्रतन्तुकपटस्थले तत्पटं प्रति तदधिकरणतन्तूनां तत्संयोगानां च तत्तद्व्यक्तित्वेन नानाहेतुत्वकल्पनापेक्षया तत्पटप्रागभावस्य एकस्य एकहेतुताकल्पनायां लाघवम् ।

अथ प्रागभावस्य हेतुत्वेऽपि सहस्रतन्त्वन्तर्गतेषु द्वित्रिचतुर्षु तन्तुषु सहस्रतन्तुकपटोत्पत्यापत्तिः, यतो हि द्वित्रिचतुर्णां तन्तूनाम् अपि तादृशपटसमवायिकारणतया तत्र तत्पटप्रागभावस्य सत्त्वात् ।

न च अत्र अन्तिमतन्तुसंयोगव्यक्तेः तत्पटं प्रति तद्व्यक्तित्वेन हेतुत्वात् द्वित्रिचतुर्षु तन्तुषु अन्तिमसंयोगव्यक्तेरभावात् न सहस्रतन्तुकपटोत्पत्यापत्तिः इति चेत्, तथा सति सहस्रतन्तुकपटानधिकरणेषु तन्तुष्वपि अन्तिमसंयोगाभावादेव पटोत्पत्तिवारणसंभवात् प्रागभावकल्पनायाः अनुचितत्वात् इति चेत्, न । समवायेन तत्पटव्यक्तिं प्रति समवायेन अन्तिमतन्तुसंयोगव्यक्तेः तद्व्यक्तित्वेन कारणत्वे अन्तिमसंयोगानधिकरणेष्वपि तन्तुषु सहस्रतन्तुकपटोत्पत्त्या व्यतिरेकव्यभिचारः भवति । तद्वारणाय समवायसम्बन्धेन तत्पटत्वावच्छिन्नं प्रति कालिकसम्बन्धेन अन्तिमसंयोगव्यक्तिः कारणम् इति वक्तव्यम् । तथा सति तत्पटानधिकरणेषु तन्तुषु समवायसम्बन्धेन अन्तिमसंयोगव्यक्तेः अभावेऽपि कालिकसम्बन्धेन तादृशसंयोगव्यक्तिः वर्तते, उभयोः समकालिकत्वात् इति न व्यतिरेकव्यभिचारः । एवं च सति तत्पटकारणभिन्नेषु तत्पटानधिकरणेषु तन्तुष्वपि कालिकसम्बन्धेन अन्तिमतन्तुसंयोगव्यक्तेः सद्भावात् तत्र तत्पटोत्पत्त्यापत्तिः । तद्वारणाय प्रागभावस्य हेतुत्वम् आवश्यकम् । तथा सति तत्पटानधिकरणतन्तुषु तत्पटप्रागभावविरहात् न तत्पटोत्पत्त्यापत्तिः इति प्राचीनानाम् आशयः ।

दीधितिकृताम् अभिप्रायस्तु ग्रन्थेषु एवं भाति - सहस्रतन्तुकपटस्थले स्वानधिकरणतन्तुषु पटोत्पत्तिवारणाय तत्र अविद्यमानः कश्चित् पदार्थः कारणत्वेन कल्पनीयः इत्यस्तु । तथापि सः अभावरूपः इत्यत्र न किञ्चिदस्ति प्रमाणम् । तथा च न प्रागभावसिद्धिः इति दीधितिकाराः ।

**आकरग्रन्थसूची** 1. तत्त्वचिन्तामणिः - गङ्गेशोपाध्यायः 2. दीधितिः - रघुनाथशिरोमणिः

# वर्तमानकाले ज्योतिषशास्त्रायुर्वेदयोः उपादेयता

डा. अभिषेकगौतमः*
सहायकाचार्यः(अ.), के.सं.वि., रा. गा. परिसरः
शृङ्गेरी

***लेखसारः*** *– अस्मिन् अनुसन्धानपत्रे अनुसन्धात्रा ज्योतिषशास्त्रायुर्वेदौ परस्परं कथम् अवलम्बिनौ पूरकौ सामर्थ्याभिवर्धकौ च वर्तेते । वर्तमानकाले च अनयोः का उपयोगिता वर्तते इत्येतयोः अत्यन्तमहत्वपूर्णप्रश्नयोः समाधानम् अन्वेषणाय समुचितार्थनिर्णयसाधनाय च ज्योतिषशास्त्रोक्तानुसन्धानप्रविधेः अनुसारम् एतच्छास्त्रस्य मूललक्ष्यम् आधारीकृत्य कश्चित् समसामयिकः प्रयासः चिकीर्षितो अस्ति । विषयविशेषतादृष्ट्यात्रादौ ज्योतिषशास्त्रस्य व्युत्पत्ति-परिभाषा निरूपणम् आयुर्वेदोद्देश्यकथनं रोगकारणविमर्शश्च सर्वेक्षणात्मक- अन्वेक्षणात्मक –विमर्शात्मकविध्याश्रयेण अतीव सरलशैल्या अभिनवछात्रोचितभाषया च प्रस्तुतो अस्ति ।*

*ततः एतस्मिन्नेव विषये ज्योतिषशास्त्रस्य आयुर्वेदस्य च प्रासंगिकता सिद्धान्तैक्यं तात्त्विकता कोषविवेचनं ग्रहस्थित्याधारेण व्याधिनिर्णयश्च समीक्षणात्मक –प्रयोगात्मक-निर्देशनात्मकानुसन्धानस्य माध्यमेन कथं कर्तव्यमिति प्रतिपादितं वर्तते । अन्ते च ज्योतिषशास्त्रोक्त विविधयोगाधारेण रोगनिदानं मणिमन्त्रौषधिभिश्च तत्परिहारोपायाश्च वर्णिताः सन्ति ।*

***कूटशब्दाः*** *– प्रज्ञापराधः, इत्यसात्म्येन्द्रियार्थसंयोगः, कालसम्प्राप्तिः, अतियोगः, अयोगः, मिथ्यायोगः, कर्मप्रकोपः, दोषप्रकोपः ।*

सूर्यादिग्रहाणां बोधकं ज्योतिषशास्त्रमस्ति । शब्दशास्त्रपारावारीणाः ऋषिकल्पाः वैयाकरणाः अस्य ज्योतिषशब्दस्य व्युत्पत्तिम् अनया विधया निरूपयन्ति, तद्यथा **द्युतेरिसिन्नादेश्चजः**[1] , इति धातोरिसिन् प्रत्यये दकारस्य जकारादेशे गुणे च कृते ज्योतिः पदस्य निष्पतिर्भवति ।

ग्रहनक्षत्रादीनां निर्देशः तथा सूर्यादिग्रहाणामश्विनीप्रभृतीनां नक्षत्राणां च गणितफलितरूपेण यत्र निरूपणं समुपलभ्यते तच्छास्त्रं ज्योतिषशास्त्रमस्ति । अर्थात् यस्मिन् शास्त्रे सूर्यादिनवग्रहाणां गतिसम्बन्धिनः सर्वे अपि नियमाः प्रतिपादिताः तथा हि अश्विन्यादिनक्षत्राणां फलनिरूपणं यत्र प्रतिपादितं तच्छास्त्रं ज्योतिश्शात्रम् इति ज्ञेयम् । ज्योतिष शब्दो अपि अधिकृत्य कृते ग्रन्थ इति पाणिनीयसूत्रेण अण प्रत्यये विहिते सिद्धयति । शबदोऽयं भारतीयज्योतिर्विज्ञानार्थे योगरूढत्वेन प्रसिद्धः ।

वैदिककाले विज्ञानशास्त्रस्य अन्वेषणं यदा क्रियते, तदा तत्र द्विविधं विज्ञानं प्राप्यते ।

1. तच्चायुर्वेदविज्ञानम् 2ज्योतिर्विज्ञानम्

ज्योतिषम् आयुर्वेदश्च उभौ अपि प्रायोगिके शास्त्रे स्तः । यतो हि आयुर्वेदशास्त्रस्य अपि उद्देश्यम् अस्ति**प्रयोजनं चास्य स्वस्थस्य स्वास्थयसंरक्षणमातुरस्य विकार प्रशमनं च**॥ 2 ॥[2] आयुर्वेदशास्त्रस्य माध्यमेन मानवस्य चिकित्सा सम्बन्धिनः सर्वे अपि नियमाः निदानोपायाः उपस्थाप्यन्ते । ज्योतिषशास्त्रंलोकोपकारकं अस्ति । आयुर्वेदे रोगस्य त्रीणि कारणानि परिगणितानि सन्ति । चरकः वा भवेत्,सश्रुतः वा भवेत् , माधवः वा भवेत् ।

---

***सम्पर्कसूत्रम्*** - 7876818321, Email- abhi.bhu.1991@gmail.com

[1]उणादिसूत्रम्,२६५,सिद्धान्तकौमुदी

[2]चारकसंहिता,अध्यायः ३०, पृष्ठसंख्या - ३६६

इत्यसात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधः परिणामश्चेति त्रयस्त्रिविधविकल्पाः कारणं विकारणं, समयोगयुक्तास्तु प्रकृतिहेतवो भवन्ति ॥ सर्वेषामेव भावानां भावाभावौ नान्तरेण योगायोगातियोगमिथ्यायोगान् समुपलभ्येते ॥ 3 ॥[१]
सरलभाषायां वदेम चेत् दोष प्रकोपः , कर्म प्रकोपः,कालसंप्राप्तिः ।

1. प्रज्ञापराधः । 2. असात्मयेन्द्रियार्थसंयोगः । 3.कालसम्प्राप्तिः ।

1 प्रज्ञापराधः- मनसा वाचा कर्मणा च बुद्धेः स्मृतेश्च शास्त्रनिषिद्धः सम्प्रयोगः प्रज्ञापराधः इति नाम्ना ज्ञायते ।

2. असात्मयेन्द्रियार्थसंयोगः-इन्द्रियाणां स्वविषयैस्सह अतियोगः,अयोगः ,मिथ्यायोगश्च त्रयोरेव रोगस्य कारणानि मन्यन्ते ।

यथोक्तं चरकसंहितायाम् **संग्रहेण चातियोगायोगवर्जं कर्म वाङ्-मनः शरीरजमहितमनुपदिष्टं यत् तच्च मिथ्यायोगं विद्यात्**॥4 ॥[२] ” इति त्रिविधविकल्पं त्रिविधमेव कर्म प्रज्ञापराध इति । व्यवस्येत् ॥ 5 ॥[३]

1 अतियोगः – अत्यन्ततीव्रमेघगर्जनम् इत्यादिनां उच्चशब्दानां श्रवणम् अतियोगः इत्युच्यते ।

2. अयोगः – शब्दानां सर्वदा अश्रवणम् अतिसूक्ष्मस्वरस्य वा श्रवणम् अयोगः इत्युच्यते ।

3. मिथ्यायोगः – कर्कशकठोरतिरस्कारसूचकशब्दानां श्रवणं मिथ्यायोगः इत्युच्यते ।

4. कालसम्प्राप्तिः –शीतोष्ण- वर्ष – लक्षणाः पुनर्हेमन्त –ग्रीष्म –वर्षाः संवत्सरः स कालः । तत्रादिमात्र-स्वलक्षणः कालः कालातियोगः ,हीन-स्वलक्षणः कालः कालायोगः ,यथास्वलक्षण- विपरीतलक्षणस्तु कालः कालमिथ्यायोगः । कालः पुनः परिणाम उच्यते ॥ 6 ॥[४] इति त्रिविधः विकल्पः ।

अतियोगः – शरदृतौ शैत्यप्राचुर्यम् अतियोगः इति उच्यते । ( Getting more cold in winter)

अयोगः - शरदृतौ शैत्याभावः अयोगः इति उच्यते । ( Reducing cold in winter)

मिथ्यायोगः- शरदृतौ उष्णोत्वदयः इति मिथ्यायोगः इति उच्यते । (Being warm in winter) एतानि कारणानि परिगणितानि सन्ति । अहं एतत् कथनं एतस्मात् कारणात् करोमि यत् ज्योतिषशास्त्रस्य वैज्ञानिक दृष्टया अवगमनम् अतीव आवश्यकम् अस्ति । परन्तु आयुर्वेदशास्त्रस्य आचार्यैः 95 प्रतिशततया यस्य चर्चा कृता अस्ति । सः वर्तते दोषप्रकोपः । आश्चर्यम् एतत् अस्ति यत् कारणानि त्रीणि प्रोक्तानि परञ्च चर्चा तु केवलं दोषप्रकोपस्य एव कृता । आयुर्वेद दृष्टया वातजन्याः अशीतिः व्याधिप्रकाराः कथिताः । पित्तजन्याः चत्वारिंशत् व्याधिप्रकाराः कथिताः । कफजन्याः विंशतिः व्याधिप्रकाराः कथिताः । परञ्च कर्मप्रकोपस्य तथा कालसम्प्राप्तेः च विषये किञ्चित् विस्तृतया न कथितम् । अन्ते च कथितम् यत् ज्योतिर्वैद्यौ निरन्तरौ ज्ञेयौ । अर्थात् ज्योतिषेण वैद्येन भवितव्यं वैद्येन च ज्योतिषेण भवितव्यं । यतोहि कर्मप्रकोपस्य कालसम्प्राप्तेश्च समुचितं ज्ञानं प्राप्तव्यं चेत् तत् ज्योतिषशास्त्रेण एव सम्भवम् अस्ति । यतोहि रोगाणाम् उत्पत्तिः कारणम् भेदः लक्षणञ्च इत्यादीनां विचारणे आयुर्वेदे ज्योतिषशास्त्रे च बहुशः समानता दृश्यते । तत्र उभयोःशास्त्रयोः रोगस्य प्रमुखं कारणं जन्मार्जितं कर्म एव सिद्धयति । यथोक्तं आचार्येण - **जन्मान्तरकृतं पाप व्याधिरूपेण बाधते**॥ 7 ॥[५] अर्थात् यत् मनुष्येण जन्मजन्मान्तरेषु विहितानां शुभाशुभकर्मणाम् प्रतिफलम् अस्मिन् जन्मनि केन क्रमेण ,कदा किं फलं प्राप्स्यति इत्यस्य ज्ञानाय एकमात्रं साधनं ज्योतिषशास्त्रम् अस्ति । वीरसिंहावलोक

[१]चरकसंहिता,अध्यायः-११, पृष्ठसंख्या - १४३,सूत्रसंख्या - ४३
[२]चरकसंहिता,अध्यायः 11, पृष्ठसंख्या - १४२,सूत्रसंख्या -३९
[३]चरकसंहिता, अध्यायः - ११, पृष्ठसंख्या - १४२,सूत्रसंख्या - ४०
[४]चरकसंहिता, अध्यायः - ११, पृष्ठसंख्या - १४२,सूत्रसंख्या - ४१
[५]प्रश्नमार्गः,अध्यायः- ९, श्लोकसंख्या - ९

अस्मिन् ग्रन्थे कर्मप्रकोप तथा दोषप्रकोपस्य चर्चा कृता अस्ति । यथोक्तं आचार्येण

कर्मप्रकोपेण कदाचिदेके दोषप्रकोपेण भवन्ति चान्ये ॥ तथापरे प्राणिषु कर्मदोषप्रकोपजाः कायमनोविकारः ॥ 8[१]

अर्थात् पूर्वजन्मार्जित कर्मणः वर्तमानजीवने परिणतिं द्योतयति । अर्थात् पूर्वजन्मनि विहितैः अशुभकर्मभिः उत्पन्नरोगाणां विचारणे इदं शास्त्रं महतां भजते । इदानीं अस्य शरीरस्य निर्माणे ग्रहाणां का भूमिका अस्ति ? ज्योतिषशास्त्रे पञ्च ताराग्रहाः सन्ति । यथा भौमः,बुधः, बृहस्पतिः,शुक्रः शनिश्च । एते ग्रहाः पञ्चानां तत्त्वानां कारकाः भवन्ति ।

भौमः – अग्नितत्त्वस्य कारकग्रहः बुधः –पृथ्वीतत्त्वस्य कारकग्रहः

बृहस्पतिः – आकाशतत्त्वस्य कारकग्रहः शुक्रः – जलतत्त्वस्य कारकग्रहः

शनिः – वायुतत्त्वस्य कारकग्रहः

एतैः पञ्चभिः तत्त्वैः देहः समुत्पद्यते । सूर्यसिद्धान्तस्य भूगोलाध्याये उक्तं अस्ति यत्

"अग्निषोमौ भानुचन्द्रौ ततस्वङ्गारकादयः । तेजोभूखाम्बुवातेभ्यः क्रमशः पञ्च यज्ञिरे ॥ 9 ॥[२]

देहस्य निर्माणानन्तरं मनसः कारकः चन्द्रः मनोरूपेण अस्मिन् शरीरे समाविष्टः अभवत् । विराटपुरुषस्य मनसः चन्द्रः समुत्पन्नः । यदा सूर्यः आत्मरूपेण आगतः तदा जातकः जीवनं प्राप्तवान् । सूर्यस्य आत्मरूपेण सञ्चारः तथा चन्द्रस्य मनोरूपेण सञ्चारः । इदानीं कस्यचित् अपि कुण्डल्यां द्रष्टुं शक्यते । पञ्चभौतिके शरीरे यदा मनुष्यः जातको वा समुत्पन्नः तदा तस्य जातकस्य जन्मकुण्डल्यां यः ग्रहः न्यूनबलयुक्तः भवेत्, तेन ग्रहेण सम्बद्धस्य तत्त्वस्य न्यूनता तस्य जातकस्य शरीरे सञ्जायते । तत्सम्बन्धि सन्तुलनं विकृतिं प्राप्नोति । तदा यः रोगी भवति तस्य नाम आयुर्वेदशास्त्रे आतुरः इति सम्प्रदत्तम् । आतुरशब्दः रोगिणः कृते प्रयुक्तः अभवत् । यदा मनुष्यः आतुरः भवति तदा सः मनुष्यः चिकित्सकस्य वा दैवज्ञस्य पार्श्वे गच्छति । इदानीं वयं यत् अन्नं गृहणीमः, दर्शनशास्त्रे अन्नात् आन्नदमयस्य कोशस्य यात्रा अस्ति ।

1. अन्नमयकोशः
2. प्राणमयकोशः
3. मनोमयकोशः
4. विज्ञानमयकोशः
5. आनन्दमयकोशः

तत्समतया आयुर्वेदशास्त्रे अपि अन्नात् ओज पर्यन्तं प्राप्तिविषयणी यात्रा अस्ति । तत्र सप्त धातवः विद्यन्ते । तत्र अन्नात् रसस्य ,रसात् रक्तस्य ,रक्तात् मांसस्य ,मांसात् मेदस्य ,मेदात् अस्थनः,अस्थनः मज्जायाः, मज्जायाः वीर्यस्य, वीर्यात् च ओजसः तेजसश्च निर्माणेन अर्थात् सप्तानां धातूनां निर्माणेन शरीरस्य निर्माणं सञ्जायते । ज्योतिषशास्त्रे एतेषां सप्तानां धातूनां कारकग्रहाः अपि सन्ति ।

मज्जास्नायुवसाअस्थिशुक्ररुधिरत्वग्धातुनाथाः क्रमाद् ॥ आरार्कीज्यदिनेशशुक्रशशभृत्तारासुताः कीर्तिताः ॥10 ॥[३]

धातुनां कारक ग्रहाः सन्ति -

1. मज्जा ( bone merrow ) इत्यस्य कारक ग्रहः भौमः
2. स्नायु ( Ligaments) इत्यस्य कारक ग्रहः शनिः

[१]वीरसिंहावलोकः,ज्वराधिकारः,श्लोकसंख्या - १९
[२]सूर्यसिद्धान्तः,भूगोलाध्यायः,श्लोकसंख्या - २४
[३]जातकपारिजातः,अध्यायः -२, श्लोकसंख्या -२८


ISSN : 2249-538X

3. वसा ( Fat) इत्यस्य कारक ग्रहः बृहस्पतिः
4. अस्थिः( Bone) इत्यस्य कारक ग्रहः सूर्यः
5. वीर्यः(sperm) इत्यस्य कारक ग्रहः शुक्रः
6 रुधिरः ( Blood) इत्यस्य कारक ग्रहः चन्द्रमा
7. त्वक(skin) इत्यस्य कारक ग्रहः बुधः

इदानीं रोगपरिज्ञानं कथं क्रियते इत्युक्ते यः ग्रहः पापाक्रान्तः भविष्यति अथवा बलहीनः भविष्यति तेन ग्रहेण सम्बद्धः धातुः निर्बलः भविष्यति । रोगश्चापि तद् धातुसम्बद्ध एव भविष्यति । तथा तद् ग्रह महादशायां अन्तर्दशायां जातकः रोगी भवति । अस्माकम् जातकग्रन्थेषु अनेकप्रकारकाः योगाः प्राप्यन्ते ।

देहाधीशः सपापो व्ययरिपुमृतिगश्चेत्तदा देहसौख्यं न । स्याज्जन्तोर्निजर्क्षेव्ययरिपुमृतिपस्तत्फस्यैव कर्त्ता ॥
मूर्तौ चेत्क्रूरखेटस्तदनु तनुपतिः स्वीयवीर्येण हीनो । नानातङ्काकुलः स्यादव्रजति हि मनुजो व्याधिमाधिप्रकोपम् ॥ 11 ॥[१]

अर्थात् यदि जन्मकाले लग्नस्य स्वामी पापग्रहेण युतो भूत्वा व्यय –षष्ठ उत् अष्टमभावगतो भवेत् अथवा व्ययषष्ठस्य अष्टमभावस्य च स्वामी स्वगृहे भवेत् तदा जातकः शारीरिकं सुखं न लभते । लग्ने यदि पापग्रहः लग्नेशश्च बलहीनौ भवेतां तदा जातकः अनेकविधाभिः चिन्ताभिः युक्तो भूत्वा नानाविध व्याधिभिः पाडितो भवति ।

भैषज्यज्योतिषानुसारेण( According to medical astrology) रोगाणां चिकित्सा – आचार्यवैद्यनाथेन अपि जातकपारिजाते उक्तं यत् यस्य ग्रहस्य धातुकोपेन जनिताः समुत्पन्नाः निखिलाः रोगाः तेषां शान्तयैः रोगाणां विमुक्तये तन्नाथं =रोगकर्तृधातुपतिं ग्रहं जपेन ,होमेन ,दानेन सर्वे मानवाः रोगशोकभयचिन्तादिभिः विरहिताः सन्ति ।

' यद्धातुकोपजनिताखिलरोगशान्तयेः तन्नाथमाशु जपतर्पणहोमदानैः । सम्पूज्य रोगभयशोकविमुक्तचिन्ताः सर्वे नराः सुखयशोबलशालिनः स्युः ॥ 12 ॥[२]

## सन्दर्भग्रन्थसूची –

1. चरकसंहिता,कविराज अत्रिदेव जी गुप्त, प्रकाशकः - भार्गव पुस्तकालयः, वारणासी, सं-२००५
2. प्रश्नमार्गः, गुरुप्रसाद गौरः, प्रकाशकः - चौखम्बा सुरभारती प्रकाशनम्, वारणासी, सं-२०१३
3. सिद्धान्तकौमुदी, कृष्णचन्द्र द्विवेदी, प्रकाशकः - संपूर्णानन्दसंस्कृतविश्वविद्यालयः वारणासी, सं-१९९६
4. सूर्यसिद्धान्तः, सुधाकर द्विवेदी, प्रकाशकः - संपूर्णानन्दसंस्कृतविश्वविद्यालयः वारणासी, सं-१९८७
5. जातकालङ्कारः, डा.सत्येन्द्रमिश्र, चौखम्बा सुरभारती प्रकाशनम्, वारणासी, सं-२०२०
6. जातकपारिजात, कपिलेश्वरशास्त्री, चौखम्बा संस्कृतसंस्थानम्, वारणासी, सं-२०१३
7. वीरसिंहावलोकः, चौखम्बा कृष्णदास अकादमी, वारणासी, सं-२०२२

[१] जातकालङ्कारः,अध्यायः-२, श्लोकसंख्या-२
[२] जातकपारिजातः,अध्यायः-२,श्लोकसंख्या-८३

# “अलम्” भूषणम् उत भावः

डॉ. आयुष दीक्षित
सहायकाचार्यः(अ.), के.सं.वि., रा. गा. परिसरः
शृङ्गेरी

***लेखसारः*** – अलङ्कारशास्त्रे बहुविवेचिते अलङ्कार इति शब्दे विद्यमानम् अलमिति पदविवेचनमस्मिन् शोधपत्रे शोधकर्त्रा विहितोऽस्ति। अलमिति शब्दस्य व्यापकार्थं चिन्तयामश्चेत् अस्मिन् अर्थे समग्रमेव सौन्दर्यशास्त्रमन्तर्भवति। अलमित्यस्य अमरकोशकारानुगुणं योऽर्थः, स निश्चयेन काव्यशास्त्रेऽस्मिन् संगच्छति। अलमिति कश्चित् भावविशेषः यः सौन्दर्यानुभवेनेव उत्पद्यते। तस्य भावस्य साक्षात्कर्तारः न केवलं सामाजिकाः अपितु कवयः नटाश्च वर्तन्ते। यः अलङ्करोति सोऽलङ्कारो अलङ्कृतिरेवालङ्कारो वेति व्युत्पत्तिः। अलङ्कृतिरेवालङ्कारः इति व्युत्पत्या यान्यपि काव्योशोभातिशायिनः तत्त्वानि काव्ये दर्शितानि, तानि सर्वाण्येव सौन्दर्यानुभवात् अलङ्कारस्य परिधौ सम्भवन्ति। अनुप्रासोपमादयो वा रसगुणरीत्यादयो वा, सर्वत्रापि अलङ्कारस्य प्राधान्यम्। अतः तद्विवेचनं युक्तिप्रमाणपुरस्सरमत्र शोधकर्त्रा प्रस्तुतम्।

***कूटशब्दाः*** – अलम्, अलङ्कारः, काव्यशास्त्रम्, भूषणम्, सौन्दर्यः, वारणम्, पर्याप्तिः, सामाजिकः, कविः, आचार्यराधवाल्लभत्रिपाठी, आचार्यरेवाप्रसादद्विवेदी।

“अलं” पूर्वकात् “कृ” धातोः “अलङ्क्रियतेऽनेन” “अलङ्करोति इति अलङ्करणम्” वेति व्युत्पत्त्या “घञ्प्रत्यये” निष्पन्नोऽलङ्कारशब्दोऽर्थद्वये प्रवर्तते, “सौन्दर्यार्थे” “सौन्दर्यसाधनार्थे” च। अलङ्कारशास्त्रे अलङ्कार इति शब्देन कोऽभिप्रायः? किं च द्योतितः? अयमलङ्कारः शब्दार्थयोः शोभावर्धकः अथवा सौन्दर्यम् एव इति।

अलङ्कारः काव्यशोभावर्धकरुपेण बहुभिराचार्यैः उपस्थापितः। तत्र काव्यस्य अङ्गरुपेण अलङ्काराणां प्रकल्पनं कृतम्। तेषु उपमा अनुप्रासादयः अलङ्काराः। अपरत्र केषांचित् मते सौन्दर्यमेवालङ्कार इति। काव्यशोभातिशायिनां पदार्थानां रसगुणरीत्यादीनां समेषामन्तर्भावः अलङ्कारे एव। अलमिति शब्दं भूषणार्थे प्रकल्पनेन एवं सिद्ध्यत एव। एते रसगुणादयः काव्यशोभां साधयन्ति। काव्यशास्त्रप्रकल्पनं भरतादारभ्यते, ततः पूर्वमपि अस्य अलङ्कारस्य वेदशब्दकोषपुराणवाङ्मयादिषु चर्चा विहिता।

- **वायवा याहि दर्शतेमे सोमा अरंकृताः। तेषाँ पाहि श्रुधी हवम्॥**[1]
- **त्वमग्ने द्रविणोदा अरंकृते।**[2]
- **का ते अस्त्यरंकृतिः सूक्तैः।**[3]
- **आदित्यानामरंकृते।**[4]
- **यज्ञकामोऽरंकृत्या तमसि क्षेष्यग्ने।**[5]

---

[1]ऋग्वेदः. १/२/१
[2]तत्रैव. २/१/७
[3]तत्रैव.७/२/३
[4]तत्रैव. ८/७/८
[5]तत्रैव १०/४/५

एतासु ऋचासु अरंकृतीति शब्दः अलङ्कृतिशब्दस्यैव अपरं रूपम् । पाणिनिनापि प्रोक्तम्-'कृपो रो लः'[१] इति । एवम् अन्यत्रापि ऋग्वेदे अरमिति पदं बाहुल्येन शोभार्थे एव प्रयुक्तम् । ऋग्वेदस्थऋचासु बह्वाधिकानाम् अलङ्काराणां दर्शनमपि जायते ।

अलङ्कारस्वरूपविचारे काव्यशास्त्रदृष्ट्या विचारस्तावद् अलङ्कारशास्त्रोपस्थापकेषु ग्रन्थेष्वेव दृश्यते । तत्रालङ्कारविचारो विभिन्नेषु ग्रन्थेषु विविधमत्या प्रकाशितः ।अलङ्कारं लक्षयन् काव्यादर्शे दण्डिना उक्तम् -

**काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते । ते चाद्यापि विकल्प्यन्ते कस्तान् कात्स्न्येन वक्ष्यति ॥**[२]

अलङ्कारस्वरूपस्य महद्दर्शनम् आचार्यवामनेन कृतम् । तेषाम्मते न केवलम् उपमादयः साधारणालङ्काराः एव अलङ्काराः इति ग्राह्यम्, अपितु **काव्यं ग्राह्यम् अलङ्कारात्** ।[३] यतोहि सौन्दर्यमलङ्कार इत्याशयो वामनस्य । **सौन्दर्यमलङ्कारः** ।[४] इयं विचारधारा वामनस्य अत्यन्तमेव गभीरा प्रतिभाति । बहव्यः कलाऽदयः सौन्दर्ये अन्तर्भवन्ति न केवलं काव्यशास्त्रम् । तथापि अस्य अलङ्कारस्य सङ्गतिः तासु अन्यासु कलास्वपि जायतेति नात्युक्तिः । यतोऽहि अलमिति शब्दः भूषणार्थे प्रयुक्त इति बहुधोक्तमेव, भुषणमेव सौन्दर्यम् । सौन्दर्यशास्त्रस्थाः कलाः वास्तुशिल्पचित्रादयोऽपि भूषणमेव । अमुमेव मतं केचन साम्प्रतिका आचार्या अपि स्वीकुर्वन्ति । प्रथमसूत्रस्य व्याख्यानं कुर्वता वामनेनोक्तम्-

**काव्यं खलु ग्राह्यमुपादेयं भवति अलङ्कारात् । काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः वर्तते । भक्त्या तु शब्दार्थमात्रवचनोऽत्र गृह्यते ।**[५]

अलङ्कारेण युक्तत्वात् काव्यमिदं ग्रहणयोग्यम् इति वामनस्याभिप्रायः ।

**'न कान्तमपि निर्भूषं विभाति वनिताननम्'** अलङ्कारप्रस्थानस्य प्रर्वतकालङ्कारिकेषु ऐतिहासिकदृष्ट्या प्रथमाचार्यो वर्त्तते भामहः । ये काव्यम् अनलङ्कृतीति मन्वते, ते तु अग्नेरपि अनुष्णत्वं मन्वते इति उक्तञ्च पीयूषवर्षजयदेवेन-

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती । असौ न मन्यते कस्मादनुष्णमनलङ्कृती ॥**[६]

प्राचीनाऽलङ्कारिकमतानुसारेण अलङ्कार एव काव्यस्य जीवनाधायकतत्त्वम् इति रुय्यकाचार्यः । 'तदेवमलङ्कारा एव काव्ये प्रधानमिति प्राच्यानां मतम् ।' इति । उत्तरोत्तरवर्तिभिः काव्यशास्त्रिभिः अलङ्कारसंख्या वर्धिता । ।

**शब्दार्थयोरस्थिराः ये धर्माः शोभातिशायिनः । रसादीनोपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ॥**[७]

कविराजविश्र्वनाथस्य अलङ्कारसामान्यलक्षणमिदम् । अनेन अलङ्काराः काव्यस्य अस्थिरधर्मा उक्ताः । किञ्च नायम् दृष्टिकोणः समेषाम् वर्तते । अलङ्कारवादिनस्तु अलङ्कारः काव्यस्य अपरिहार्यधर्म इत्यङ्गीकुर्वन्ति । कटककुण्डलादिवद् अलङ्काराणामुदाहराणि यथा अन्यैः दीयन्ते, ते च अमान्याः सन्ति । अलङ्काराः काव्ये समवेताः तिष्ठन्ति । तस्मात् समेषामेवालङ्काराणां काव्ये अपृथग्वर्तित्वमेव ।

अतः यैरुच्यते यदलङ्काराः कटककुण्डलादिवत् भवन्ति तेषामत्र निरासः। यतः कटककुण्डलादयस्तु शरीरेण संयोगसम्बन्धेन युज्यते। किञ्चालङ्काराणामुत्पत्तिस्तु काव्यजन्मना एव समवायत्वेन भवति, शरीरेण

[१]पाणिनिसूत्रम्८/२/१८
[२]काव्यादर्शः २/१
[३]काव्यालङ्कारसूत्राणि १/१/१
[४]तत्रैव १/१/२
[५]तत्रैव १/१/१ व्याख्या
[६]चन्द्रालोकः १८
[७]साहित्यदर्पणम् १०/1

अलङ्काराणामपाकरणं कर्तुं शक्यते, किञ्च काव्ये तदपाकरणं न सम्भवति । विषयेऽस्मिन् भट्टोद्भटेनोच्यते-

**समवायवृत्या शौर्यादयः संयोगवृत्या तु हारादयः गुणालङ्काराणां भेदः, ओजः प्रभृतिनाम् अनुप्रासोपमादीनां चोभयेषामपि समवायवृत्या स्थितिरिति गड्डलिकाप्रावहेणैवैषां भेदः ।** [१]

अत्र भट्टोद्भटेन तु गुणालङ्कारयोरभेदकथने उक्तमेतत्, किञ्चालङ्काराणां काव्ये अप्रथग्वर्तित्त्वम् अनयापि युक्त्या सिद्ध्यति एव । अमुमेव समर्थयन् आचार्यराधावल्लभना श्लोकमेकम् -

**पट इव चोतं प्रोतं सूत्रं सूत्रे यथा च वर्णास्ते । एवं काव्ये चेमेऽलङ्कारा आन्तरा बाह्याश्च ॥** [२]

साम्प्रतिकेष्वाचार्येषु अलङ्कारविषये प्रो.रेवाप्रसादद्विवेदिवर्याः, राधावल्लभत्रिपाठिवर्याश्च प्रमुखास्सन्ति ।

आचार्यराधावल्लभत्रिपाठिनः अस्मभ्यं किञ्चिन्नूतनमेव सिद्धान्तम् **"अलम्भावः"** इति प्रयच्छन्ति । लोकानुकीर्तन-रूपकाव्यस्यालङ्काररूपतायाः अनुभवः अलम्भावः । सिद्धान्तस्यास्योपस्थापनावसरे स्वकीये अभिनवकाव्यालङ्कारसूत्र-नामा ग्रन्थे– **"अलम्भावस्तु पूर्णता ॥"** इत्युक्त्या अलम्भावः आचार्यैः निर्दर्शितः । अस्यालम्भावस्य सत्ता काव्ये एवाचार्यैः स्वीकृता । तैरुच्यते यत् अलम्भावोऽयं काव्यमेव उन्मिषति । पुनश्च प्रमातृहृद्यपि अस्यालम्भावस्य प्रत्ययः स्यादिति । अस्यालम्भावस्य अधिष्ठानं यथा कविः तथैव काव्यमपि तथैव मनुष्यचैतन्योऽपि भवति इत्याचार्यैरुच्यते ।

**"अलङ्कारः काव्यजीवनम् ॥** [३] **आधिभौतिकाधिदैविकाध्यात्मिकविश्वत्रयमुन्मील- पुरस्सरं भूषणवारणपर्याप्त्याधायकत्वमलङ्कारत्वम् ॥"** [४]

काव्यात्मतत्त्वमलङ्कारम् इत्याचार्याणां मतम् । विचारेऽस्मिन् अलमिति पदस्यार्थः आचार्यैः अमरकोशकारानुगुणं स्वीक्रियते ।–

**अलं भूषणपर्याप्तिशक्तिवारणवाचकम्** [५]

इतः पूर्वम् अन्ये काव्यशास्त्रिणः अलम् इति शब्दस्य भूषणम् इति अर्थपर्यन्तं तु गताः आसन्, किञ्च आचार्यत्रिपाठिनां वैशिष्ट्यम् इदमेव यत् एतेन अन्ययोरपि द्वयोरर्थयोः संघटनं काव्यशास्त्रे युक्तिप्रमारपुरस्सरं कृतम् । भूषणवारणपर्याप्तेः परामर्शः उपमादीष्वलङ्कारेषु रस-गुण-रीत्यादिषु च सङ्गच्छते । आचार्याणां मते यः अलङ्करोति सोऽलङ्कारो वा अलङ्कृतिरेवालङ्कारः इति । इत्यनेन साक्षादवगम्यते यत् यान्यपि काव्यशोभातिशायिनः तत्त्वानि काव्ये दर्शितानि, तानि सर्वाण्येवालङ्कारे अन्तर्भवन्ति । अनुप्रासोपमादयो वा भवन्तु रस-गुण-रीत्यादयो वा । सर्वत्रैवालङ्कारः अलङ्कारस्य प्राधान्यात् ।

काव्येऽलङ्कारप्रक्रियावर्णनावसरे आचार्यैः चिन्त्यते यत् भूषणं साधयन् कविः काव्ये यमकादीनामलङ्काराणां विन्यासः विधास्यति । अनुप्रासेन च काव्यशब्दान् सुशोभयति । भूषणम् अलं शब्दस्य प्रथमोऽर्थः । द्वितीयार्थेन वारणेन कविः काव्ये तद्वदेव सौन्दर्यं सिद्धयति यथा शिल्पकारः पाषाणेन अभिरामाकृतिं निर्मातुम् अनपेक्षितं भागं निस्सारयति तथैव काव्येऽपि कविः अनावश्याकानि तत्त्वानि परित्यज्य आवश्यकानि तत्त्वानि स्थापयति । पुनश्च पर्याप्तिरेव काव्यस्य पूर्णावस्था सैवालङ्कारः । पर्याप्तेः भाव एव अलमिति भावः ।

---

[१] काव्यप्रकाशे विश्वेश्वटीकायां पृष्ठ ३७८ उद्धृतः

[२] अभिनवकाव्यालङ्कारसूत्रम् २/४/४ व्याख्याभागः

[३] अभिनवकाव्यालङ्कारसूत्रम् २ ।१ ।१ ॥

[४] तत्रैव २ ।१ ।२ ॥

[५] अमरकोशः-२८३९


ISSN : 2249-538X

यथोक्तमाचार्यत्रिपाठिवर्यैः यत्पूर्णतारूपी अलम्भावः कविनटसामाजिकैः सर्वैरेवानुभूयते। अनेनावगम्यते यत् या प्रक्रिया काव्यनिर्माणस्य दर्शिता तामेव सामाजिकोऽपि काव्यवीक्षणे अनुसरति। तत्र क्रमेण अलं शब्दस्य प्रथमोऽर्थः भूषणम्, काव्यगतं भूषणमनुभवन् सामाजिकः अनुप्रासोपमादीनामलङ्काराणां रसगुणरीत्यादिनाञ्च आनन्दमनुभवति। वारणं तावत् सामाजिकस्य प्रसङ्गे प्राबल्यमाप्नोति, यथा कविः वारणेन अनावश्यकानि तत्त्वानि त्यजति तथैव श्रोता पाठको वा अनावश्यकान् भावान् परित्यज्य आवश्यकान एव गृह्णाति। सामाजिकेन स्वाभाविकरूपेण अनुभूयते यत् रामादिवत् प्रवर्तितव्यं न तु रावणादिवत्। काव्ये नोपदिश्यते यत् कथमाचरणीयं कथन्नेति। तदनु तृतीयोऽर्थः पर्याप्तिः, पर्याप्तिरेव पूर्णता सैव परमावस्था अस्या पूर्णतायाः अनुभव एव अलम्भावः। अयमेव भावः सामाजिकस्य हृदये भवति।

अस्यालम्भावस्य प्रत्ययः नटेषु कथमिति चिन्तयामश्चेत् तत्रापि अलमितिशब्दस्य त्रयाणामेव अर्थानां सङ्गतिः। काव्ये नटः भूषणं साधयन् स्वीयां वाणीमलङ्करोति। वारणं तु कश्चिन्नटविशेषः अपरस्य चरित्रस्य क्रियाकलापानां वा करोत्येव। पर्याप्तेः भाव अलम्भावः नटः अनुभवति एव।

आचार्यरेवाप्रसादद्विवेदीवर्याणां काव्यालङ्कारकारिकायाम्, अलं ब्रह्म इत्याख्ये ग्रन्थे च अलमितिविषये महती चर्चा विद्यते, अलम् इति पदस्य ब्रह्मपदवाचकत्वं चोक्तम्। तत्र अग्निपुराणोक्तिः प्रमाणत्वेन स्थापिता। यथा वेदान्तिनां प्रसिद्धमेव महावाक्यम् अहं ब्रह्मेति, तद्वदेव साहित्ये अपूर्वमिदं महावाक्यम् अलं ब्रह्मेति अस्ति, अस्यापि तथैवार्थश्च वर्तते इति रेवाप्रसादमहोदयैः उच्यते। नूतनम् इदं महावाक्यम् अलं ब्रह्मेति। यथा अहम् इति वर्णसमाम्नाये प्रत्याहारो वर्तते, तथैव अलमपि प्रत्याहारत्वेनैव द्विवेदीमहोदयैः स्वीक्रियते। अतः वाङ्मयीसृष्टिरियं वर्णसमाम्नाये समवेताऽस्ति। उक्तञ्च-

**अपूर्वमिदं महावाक्यं यदुत 'अलं ब्रह्मे' -ति। वेदान्तानां प्रसिद्धमेव महावाक्यम् 'अहं ब्रह्मे'– ति। यस्तावत् तस्यार्थः स एवाऽस्यापि नूनस्य महावाक्यस्य 'अलं ब्रह्मेति स्वरूपस्य। अहमिति वर्णमातृकायाः प्रत्याहारः अकारादारभ्य हकारं यावत् प्रसृतायाः। यथा चेदं तद् अभिनवगुप्तग्रन्थेभ्यः स्पष्टम्। 'अल'–मित्यत्रापि प्रत्याहारत्वमेव पश्यामः। स च माहेश्वरस्य वर्णसमाम्नायस्य 'अइउ-ह' इत्येवंरूपेण प्रकाशितस्य। येयं वाङ्मयी सृष्टिः सा खलु वर्णसमाम्नायेऽस्ति समवेता। अर्थात्मिकाऽपि सृष्टिस्तादृश्येव। साप्यस्ति 'अल्'–प्रत्याहारसमवेता। य एव हकारान्तो वर्णसमाम्नायप्रत्याहारः स एव 'लकारान्तस्त्रिभुवनप्रत्याहारः।' यथा चेदं तदपि 'आगम'-प्रमाणकम्। साहित्यशास्त्रस्यागमः 'अहङ्कारागम' इत्युदीरितस्तत्रभगवता 'अग्नि पुराण'-कर्त्रा वेदव्यासेन। यथा चेदं तद्धि-**[1]

**अक्षरं परमं ब्रह्म सनातनमलं विभुम्। वेदान्तेषु वदन्त्येकं चैतन्यज्योतिरीश्वरम्॥**[2]

द्विवेदिवर्यैः काव्यालङ्कारकारिकायाः कारिकासु उच्यते यत्-

**अलं पदमिदं ब्रह्मवाचकत्वेन भाव्यते। ब्रह्मभूयमलङ्कारपदेनाप्यादियेत तत्॥**
**प्रत्यक्चैतन्यमात्मा चेद् ब्रह्माभिन्नं चमत्कृतिः। अलम्भावोऽप्यलङ्काररूपो ब्रह्मैव केवलम्॥**[3]

यदि अलमिति पदं ब्रह्मवाचकमस्ति चेत् अलङ्कारपदमपि ब्रह्मभावार्थे कथन्न गच्छेत्। आत्मनः ब्रह्मत्वम् अस्ति, आत्मा चमत्कारः, अतः अलङ्काररूपमलम्भावः ब्रह्मरुपे कथन्न गच्छेत् इति आचार्य रेवाप्रसादद्विवेदिनां भावः।

**वटस्य बीजं वृक्षश्च महाञ्छाखाशतैर् वृतः। तस्य चित्रं च यत् तत्राप्यलंभावोऽयमीक्ष्यताम्॥**

[1]अलं ब्रह्म पृष्ठ १
[2]अग्निपुराणम् ३३९.१
[3]काव्यलङ्कारकारिका कारिका क. १८७-१८८

**शैलः शिला तथा मूर्तिर्मृत्स्ना पिण्डस्तथा घटः । एतच्चितकेऽप्यलंभावः सुमनोभिरवेक्ष्यताम् ॥**[१]

रेवाप्रसादद्विवेदिवर्यैः उक्तं यत् विभिन्नशाखया आवृत्ते वटवृक्षेऽपि, पुनश्च तस्यैव चित्रेऽपि अलम्भावं दृष्टुं शक्यते । पुनश्च पर्वते, तस्य शिलायाञ्च, मृत्तिकायां तया निर्मितासु मूर्तिषु च, मृत्तिकायां तया निर्मिते घटे च अलम्भावस्यास्य दर्शनं कर्तुं शक्यते ।

आचार्यरेवाप्रसादद्विवेदिना अलमिति शब्दस्य विषये प्रोक्तं यत्-

**यदिदम् अलमिति पाठान्तरमिदमपि नितान्तं महत्वपूर्णम् । अस्य हि निष्पत्तिर्वैदिकाद् अरम पदादुत्प्रेक्षामहे । अरमिति अव्ययपदं संहितास्विवारण्यण्यकेष्वपि सुलभमेव । तस्यैवास्य विकासः अलम् इति भाषाविज्ञानवित्सु विदित एष पन्थाः । अस्य स एवार्थो यो हि अरम् इत्यस्य । पर्याप्तिरेष्वन्यतमोऽर्थः । लौकिके संस्कृतेऽपि अलधातुः प्रसिद्धि एव पर्याप्तये । पर्याप्तौ संपन्नायामनुभावो वारणम् अलम्, अलम् इति । सचायमर्थोऽमरकोषादिष्वपि प्रसिद्धः ।**[२]

इत्यत्र यदुक्तं तद्राधावल्लाभाचार्यैः अलमिति शब्दस्य माहात्म्ये प्रतिपादितम् । आचार्यराधावल्लभत्रिपाठिवर्याणाम् ग्रन्थे तेनैव प्रतिपक्षस्य विचारोपस्थापितः, तद्यथा- अलम्भावविचारे सन्देहोत्पद्यते यदलम्भावस्त्वनुभवविषयः तेन स तु प्रमातृहृद्येव स्यात्, न च काव्ये स्वाभाविकत्वेन । सर्वसामान्यमेव यत् ज्ञाता एव ज्ञेयम् अनुभवति नान्यः, तत्रापि काव्यं कथम् अलम्भावाऽख्यं भावमिमम् अनुभवितुं समर्थम्? तस्मादस्य सन्देहस्य निराकरणाय आचार्याः स्वग्रन्थे अभिनवकाव्यालङ्कारसूत्रे जयरथमतमुपस्थापयन्ति-

**"ननु अवभासमानत्वं प्रमातृधर्म इति कथं तदाश्रयो धर्मः काव्यालङ्कार इति चेत्, असदेतत् । अवभासमानस्य त्वाभास्यनिष्ठतया प्रतीतेरर्थधर्मत्वात् ।"**[३]

विमर्शेऽस्मिन् जयरथानुसारमवभासमानत्वमवभास्यवस्तुनो धर्म इति । येन यदवभास्यते स तस्येव धर्मः, तत्र तु किमपी भवतु प्रमाता वा अयं त्रिविधो लोको वा । तस्माद् प्रतीतिरपि अर्थस्यैव धर्मः । तस्मादाचार्यैः स्वीक्रियते यत् काव्यमेव सर्वम् उन्मिषति ।

पूर्णतायाः विषये काव्यालङ्कारकारिकायाम् आचार्यरेवाप्रसादद्विवेदिना उक्तं यत्-

**पूर्णतामीयुषो धर्मः काव्यस्यैको हि विद्यते । अलम्भावाभिधः कश्चिदलङ्कारः परात्परः ॥**[४]

इत्युक्ते पूर्णताप्राप्तः काव्यधर्म एक एव, स च अलङ्कारः, यस्यार्थः अलम्भाव इति वर्तते । पुनश्चोक्तम्-

**अपूर्णतानिरासेन दोषाभावात्मनोदिताम् । पूर्णतां गुणरूपां तु सेवतेऽलङ्क्रिया सखी ॥**

**अलङ्क्रियासखी चैषाऽप्यनवाप्तप्रपूर्णता । लक्षणत्वेन वीक्ष्येत भरतादिमनीषिभिः ॥**

**सा चैषा पूर्णता युक्ता सम्विन्नाम्नी नवा वधूः । सैव विच्छित्तिसम्पन्ना काव्यभावं प्रपद्यते ॥**[५]

अपूर्णता तु दोषरुपा, तस्य निरासत्वेनोक्तं गुणरुपी पूर्णता । अस्याः सेवनम् अलङ्क्रियासखी करोतीत्याशयः । इयमेव पूर्णतायुक्ता इत्युक्ते गुणैर्युक्ता सम्वित् नाम्नी काचित् नवीना वधूरस्ति । इयमेव विच्छित्तिसम्पन्ना इत्युक्ते उपमादिसम्पन्ना काव्यरूपं गच्छति । एवम् आचार्यरेवाप्रसादद्विवेदिवर्यैः पूर्णता नियोजिता । न तु सर्वं किञ्च किञ्चित्

[१]काव्यालङ्कारकारिका कारिका क्र. ३१-३२
[२]अलं ब्रह्म पृष्ठ २
[३]अलङ्कारसर्वस्वविमर्शिनी तृतीये सूत्रे
[४]काव्यालङ्कारकारिका कारिका क्र. १५६
[५]काव्यालङ्कारकारिका कारिका क्र. १६१-१६३

साम्यं तु द्रष्टुं शक्यते।

आचार्यअभिराजराजेन्द्रमिश्रमहोदयैः उच्यते यत् आचार्यराधावल्लभत्रिपाठी आचार्यरेवाप्रसादद्विवेदिमहोदयम् एव समर्थयन् अलङ्कारस्य काव्यत्वं काव्यात्मतत्त्वं च सिद्धयति। उक्तञ्च यत् अलङ्कारस्य पक्षधराणाम् आचार्याणां या स्थापनाऽस्ति तामपि अतिक्रामति आचार्यराधावल्लभस्य अलङ्कारे सर्वतंत्रस्वतंत्रश्रद्धा।[१]

अत एव अलमिति शब्दस्य व्यापकार्थं यदि चिन्तयामश्चेत् अस्मिन् शब्दे समग्रमेव सौन्दर्यं समागच्छति। अलमित्यस्य अमरकोशकारानुगुणं योऽर्थः स तु सर्वतया काव्यशास्त्रेऽस्मिन् संगच्छति। अलमिति कश्चित् भावविशेषः यः सौन्दर्यानुभवेनेव उत्पद्यते। तस्य भावस्य साक्षात्कर्तारः न केवलं सामाजिकाः अपितु कविः नटाश्च वर्तन्ते। यः अलङ्करोति सोऽलङ्कारो वा अलङ्कृतिरेवालङ्कारः इति। यान्यपि काव्योशोभातिशायिनः तत्त्वानि काव्ये दर्शितानि, तानि सर्वाण्येव सौन्दर्यानुभवात् अलङ्कारस्य परिधौ सम्भवन्ति। अनुप्रासोपमादयो वा रसगुणरीत्यादयो वा, सर्वत्रापि अलङ्कारस्य प्राधान्यम्।

श्लोकमाध्यमेन च उच्यते आचार्यराधावल्लभत्रिपाठिभिः-

**रसश्चापि गुणाश्चापि रीतयो वृत्तयस्तथा। सर्वे ध्वनिप्रभेदाश्च ये प्राचीनैरुदाहृता॥**
**सन्धिसन्ध्यङ्गवृत्यङ्गलक्षणानि तथैव च। अलङ्कारस्य परिधौ सर्वे चान्तर्भवन्ति ते॥**[२]

## सन्दर्भग्रन्थसूची


- कम्बोज, जियालाल (सं.), ऋग्वेदः, विद्यावारिधी प्रकाशन, देहली 2004
- झा, तारिणीश (अनु). अग्निपुराणम्, हिन्दी साहित्य सम्मेलन, इलाहबाद, 2007
- त्रिपाठी राधावल्लभ, पाण्डेय, रमाकान्त (व्या.), अभिनवकाव्यालङ्कारसूत्रम्, जगदीश संस्कृत पुस्तकालय, जयपुर, राजस्थान, 2009
- त्रिपाठी, कृष्णमणि (व्या.), चन्द्रालोक :, जयदेव, चौखम्बा सुरभारती प्रकाशन, 2014
- त्रिपाठी, ब्रह्मानन्द(व्या), अमरसिंह, अमरकोश :, चौखम्बा सुरभारती प्रकाशन वाराणसी 2022
- त्रिपाठी, राधावल्लभ, अभिनवकाव्यालङ्कारसूत्रम्, सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी, प्रथम संस्करण 2005
- द्विवेदी, रेवाप्रसाद(व्या.), अलङ्कारसर्वस्वम्, रुय्यक, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी, 2000
- द्विवेदी, रेवाप्रसाद, अलं ब्रह्म, कालिदास संस्थान वाराणसी, 2005
- द्विवेदी, रेवाप्रसाद, काव्यलङ्कारकारिका, कालिदास संस्थानम्, वाराणसी, प्रथमसंस्करण- 1997
- नगेन्द्र(सं.), मम्मट, काव्यप्रकाशः, ज्ञानमण्डल लिमिटेड, वाराणसी, 2017
- पाण्डुरङ्गी, केटी, ऋग्भाष्यम्, द्वेतवैदान्त स्टडीस् एण्ड रिसर्च फाउंडेशन, 2010
- मिश्र, अभिराजराजेन्द्र, अभिराजयशोभूषणम्, वैजयन्त प्रकाशन, इलाहबाद, प्रथम संस्करण, 2006
- शर्मा, रामानन्द(व्या.), भामह, काव्यालङ्कारः, चौखम्बा संस्कृत सीरीज, 2013
- शास्त्री, हरगोविन्द(व्या.), वामन, काव्यालङ्कारसूत्राणि, चौखम्बा सुरभारती प्रकाशन, 2015


[१]अभिराजयशोभूषणम्, तृतीयः, आत्मतत्त्वोन्मेषः, पृष्ठ १५५-१५६
[२]अभिनवकाव्यालङ्कारसूत्रम्, पृष्ठ ११७

# तस्यापत्यमिति सूत्रं किमर्थम् ?

डा. अरुणभट्टः*
सहायकाचार्यः(सं), के.सं.वि.,मुक्तस्वाध्यायपीठम्
रा. गा. परिसरः, शृङ्गेरी

***लेखसारः*** *– भगवता पाणिनिना अष्टाध्याय्यां तृतीये चतुर्थे पञ्चमे च अध्याये प्रत्ययाः विहिताः सन्ति । तत्र तृतीये धातुसम्बन्धिनः प्रत्ययाः, चतुर्थे सुप्रत्ययाः, स्त्रीप्रत्ययाः, तद्धितप्रत्ययाः, अन्ये तद्धितप्रत्ययाः पञ्चमे अध्याये च निरूपिताः । चतुर्थस्य प्रथमपादे 'तद्धिताः'[१] इति अधिकारसूत्रं पठ्यते । पञ्चमाध्यायसमाप्तिपर्यन्तम् एषः अधिकारः वर्तते । इतः आरभ्य पञ्चमाध्यायान्तं ये प्रत्ययाः विधीयन्ते ते तद्धितसंज्ञकाः भवन्ति इत्यर्थः । तद्धिताः इति अन्वर्थसंज्ञा । तेभ्यः प्रयोगेभ्यः हिताः तद्धिताः । अपत्याद्यर्थबोधनाय ये शब्दाः प्रयुज्यन्ते तेभ्यः हिताः । यथा गर्गस्यापत्यं गार्गिः । अत्र इञ्प्रत्ययः भवति ।*

## तस्यापत्यमिति सूत्रविचारः

तस्यापत्यम् इति द्विपदात्मकं सूत्रम् । चतुर्थे अध्याये प्रथमपादे द्विनवतितमं सूत्रम् । 'समर्थानां प्रथमाद्वा[२]' इत्यनुवर्तते । प्राग्दीव्यतः अण् अधिक्रियते । तस्य इति प्रथमोच्चारिता विभक्तिः, षष्ठीविभक्तिः । समर्थानामित्यस्य कृतसन्धिकार्यस्य इत्यर्थः । एवं च षष्ठ्यन्तात् कृतसन्धेः समर्थात् अपत्येऽर्थे उक्ताः वक्ष्यमाणाश्च प्रत्ययाः विकल्पेन भवन्ति इत्यर्थः प्रतिपदितः कौमुद्याम् । पूर्वं केचन प्राग्दीव्यतोऽणित्याद्या औत्सर्गिका प्रत्ययाः उक्ताः, ते अपत्यार्थेऽपि भवन्ति । अग्रेऽपि अत इञित्याद्या वैशेषिका बहवः प्रत्ययाः वक्ष्यन्ते, तेऽपि अपत्यार्थे भवन्ति इति उक्ताः वक्ष्यमाणाश्च इत्यस्य आशयः । 'समर्थानां प्रथमाद्वा' इत्यतः 'वा' इत्यनुवर्तनात् विकल्पः सिद्ध्यति । तेन तद्धितवृत्यभावे वाक्यमपि भवति । न पतन्ति नकरे पितरो येन तदपत्यमिति व्युत्पत्या अपत्यशब्दो हि नात्मजपर्यायः किन्तु पुत्रपौत्रादिसंततिपर्यायः[३] । तथा च पौत्रादयोऽपि पितामहादीनां नरकादुद्धर्तार इति तेषामपि अपत्यत्वमस्त्येव[४] । उपगोरपत्यम् इति विग्रहे उपगु ङस् इति षष्ठ्यन्तात् अपत्यार्थे प्राग्दीव्यतोऽण् इत्यनेन अण्प्रत्यये प्रातिपदिकत्वात् सुब्लुकि उपगु + अ इत्यत्र अणः णित्त्वात् 'तद्धितेष्वचामादेः' इति आदिवृद्धौ ओर्गुणः इति उकारस्य गुणे अवादेशे च औपगवः इति सिद्ध्यति ।

'समर्थानां प्रथमाद्वा' इति अधिकारसूत्रे प्रथमादित्यनेन प्रथमोच्चारितात् विभक्तत्यन्तात् प्रत्ययः भवति । 'तस्यापत्यम्' इत्यत्र तस्य इति प्रथमोच्चारिता षष्ठ्यन्ता विभक्तिरिति ततः प्रत्यय उत्पद्यते । प्रथमादित्यभावे 'तस्यापत्यम्' इति विधीयमानः प्रत्ययः अपत्यवाचकात् चैत्रादिशब्दात् षष्ठ्यर्थे उत्पद्येत । ततश्च उपगुः अपत्यं अस्य देवदत्तस्य औपगवदेवदत्तः इति प्रयोगः स्यात् । यथा इन्द्रो देवता अस्य इति ऐन्द्रं हविः इत्यत्र प्रथमान्तात् षष्ठ्यर्थे प्रत्ययो भवति तद्वदिहापि प्रसङ्गात् । तस्मात् एतदापत्तिवारणाय प्रथमादित्युच्यते । ततश्च तस्यापत्यमित्यत्र प्रथमोच्चारिता षष्ठी विभक्तिरिति षष्ठ्यन्तात् प्रत्ययो भवति । किञ्च प्रथमाद्वा इति वाग्रहणात् विकल्पार्थः प्रतीयते । तेन तद्धितप्रत्ययाः विकल्पेन भवन्ति इति ज्ञायते । औपगवः इति तद्धितान्तः । तद्धिताभावे उपगोरपत्यम् इति वाक्यम् । वाग्रहणाभावे

---

***सम्पर्कसूत्रम्** - 9449286828, Email- arun.bhat@csu.co.in

[१]अष्टाध्यायी- ४.१.७६

[२]अष्टाध्यायी- ४.१.८२

[३]पङ्क्तिविंशतित्रिंशत्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् – इति सूत्रभाष्यम्

[४]एको गोत्रे इति सूत्रभाष्यम्

तद्धितस्य नित्यत्वात् उपगोरपत्यम् इति वाक्यं न स्यात् । उपगोः अपत्यम् इति विग्रहे षष्ठीसमासे प्राप्ते तदपवादतया तद्धितवृर्त्तिर्भवति । ततश्च उपग्वपत्यम् इति समासः न स्यात् । समर्थानामित्यत्र वाग्रहणात् यद्यपि तद्धितप्रत्ययः विकल्पेन भवति तदभावे समासः इति वक्तुं शक्यम् तथापि यत्र उत्सर्गापवादौ महाविभाषया विकल्पेन तत्र अपवादेन मुक्ते पुनरुत्सर्गस्य प्रवृत्तिर्न भवति इति 'पारे मध्ये षष्ठ्या वा[१]' इति सूत्रे वाग्रहणेन ज्ञापितम् । अतः समासो न प्राप्नोति । किन्तु 'दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम्[२] इति सूत्रात् अन्यतरस्य ग्रहणस्यानुवृत्तिसामर्थ्यात् समासोऽपि भवति । तेन तद्धितेन विनिर्मुक्ते समासः वाक्यञ्चोभयमपि भवति । उपगोरपत्यम्, उपग्वपत्यम्, औपगवः इति च सिध्यति ।

## तस्येदमिति विहितोऽण् अपत्येऽर्थेऽपि भवति

ननु तस्येदम् इति सूत्रेणैव अणप्रत्यये औपगवादि प्रयोगे सिद्धे 'तस्यापत्यम्' इति सूत्रं नारम्भणियम् । तथा हि 'तस्यापत्यम् इत्यस्य औपगवः इति उदाहरणं प्रदर्शितम् । परं तु 'तस्येदम्' इति सूत्रमारभ्यते अण्विधानाय । इदमित्यर्थे षष्ठ्यन्तात् प्रत्ययाः भवन्ति इति अस्यार्थः । इदमर्थे अपत्यार्थोऽपि अन्तर्भवति इति कृत्वा 'तस्येदम्' इति विहितः अण् अपत्यार्थेऽपि भवति । एवमपत्यार्थे अण्प्रत्यये सिद्धे अण्विधानाय 'तस्यापत्यम्' इति सूत्रं नारम्भणीयम् इति आक्षेपः ।

## अस्य समाधानम्

अत्रोच्यते, 'तस्यापत्यम्' इति सूत्रं नारभ्येत यदि तर्हि 'अत इञ्' इत्यादिषु तस्य अपत्यमित्यर्थो न लभ्येत । अतः तस्यापत्यमिति सूत्रम् इति । परम् इदं प्रयोजनं भवितुं नार्हति । यदि अत इञ् इत्यादिसूत्रार्थं तस्यापत्यमिति चेत् 'तस्यापत्यमत इञ्' इति एकं सूत्रं कर्तुं शक्यते । तथा सति 'तस्यापत्यम्' इति पृथक् सूत्रकरणं व्यर्थं भवति ।तस्यापत्यम् इत्यस्य पृथक्सूत्रकरणस्य प्रयोजनं दर्शयति - यदि 'तस्येदम्' इति सूत्रेणैव अपत्यार्थे अण्विधीयेत तर्हि ये वृद्धसंज्ञकाः शब्दाः तेभ्यः अणं बाधित्वा 'वृद्धाच्छः' इति सूत्रेण छप्रत्ययः स्यात् । छप्रत्ययमपि बाधित्वा अणेव यथा स्यादित्येतदर्थं 'तस्यापत्यम्' इति पृथक् सूत्रं कृतम् इति ।

ननु 'तस्यापत्यम्' इति पृथक्सूत्रेण 'वृद्धाच्छः[३]' इति छप्रत्ययबाधनं न स्यात् । तथा हि 'वृद्धाच्छः' इति सूत्रं शैषिकप्रकरणे वर्तते । अपत्यादिचतुरर्थ्यन्तेभ्योऽन्यः शेषः । एवञ्च अपत्यार्थस्य शेषत्वाभावात् 'वृद्धाच्छः' इति शैषिकस्य प्राप्तिरेव नास्तीति कथं 'वृद्धाच्छः' इति सूत्रस्य बाधिनार्थम् अण्विधानं प्रयोजनं स्यात् ।

अदन्त-बाह्वादिप्रकृतिसंयुक्ताऽपत्यार्थ एव विनियुक्तो नतु तद्भिन्नप्रकृतिसंयुक्तापत्यार्थोऽपि । समाधानमुच्यते - 'तस्यापत्यमत इञ्' इति एकसूत्रकरणे उत्सर्गः अपत्यार्थः शेष एव भवति । अस्य इदं तात्पर्यम् - विनियुक्तादन्यः शेषः । 'तस्यापत्यमत इञ्' इति एकसूत्रे कृते अदन्तप्रकृतिसम्बद्धः, बाह्वादिप्रकृतिसम्बद्धः अपत्यार्थः उक्तश्चेदपि अदन्ताबाह्वादिभिन्नप्रकृतिसम्बद्धः अपत्यार्थः शेषः एव भवति । ततश्च तस्य शेषत्वात् तस्मिन्नपत्ये छस्य प्रसक्तत्वात् तद्बाधनार्थं तस्यापत्यमिति पृथक्सूत्रम् । एवं च पृथक् सूत्रारम्भे तु उपगु इत्यादिप्रकृतिसामान्यसम्बद्धस्य अपत्यार्थस्य विनियोगः कृतः एव भवतीति तस्य शेषत्वं न भवति । एवमपत्यार्थस्य शेषत्वाभावे 'वृद्धाच्छः' इति शेषाधिकारस्थस्य

---

[१]अष्टाध्यायी- २.१.१८

[२]अष्टाध्यायी- ४.१.८१

[३]वृद्धात् प्रातिपदिकात् छः प्रत्ययो भवति ।

प्राप्तिरेव न भवतीति अप्राप्तिसम्पादनद्वारा छस्य बाधकं तस्यापत्यमिति पृथक्सूत्रम् भवति । एतदेव उक्तम् -

**तस्येदमित्यपत्येऽपि बाधनार्थं कृतं भवेत् ।**
**उत्सर्गः शेष एवासौ वृद्धान्यस्य प्रयोजनम् ॥ इति ।**

अस्य अयं भावः - असति योगविभागे अदन्तबाह्वादिप्रकृतिसम्बद्धस्यैव अपत्यार्थस्योपयोगात् उपग्वादिप्रकृतिसम्बद्धः अपत्यार्थः शेष एव स्यात् । तथा च अणं बाधित्वा भान्वादिभ्यो वृद्धाच्छः प्रसज्येत । योगविभागे तु कृते प्रकृतिसामान्यसम्बद्धस्य अप्यपत्यार्थस्योपयोगाच्छेषत्वाऽभावेन छस्य प्राप्तिरेव नास्तीति ।

ननु उपगु इत्यादीनां वृद्धत्वं कथम् ? उपग्वादिप्रकृतिसामान्यस्य वृद्धत्वाभावात् 'वृद्धाच्छः' इति सूत्रस्य प्रसक्तिरेव नास्ति । 'वृद्धाच्छः' इति छबाधनाय तस्यापत्यम् इति कथनं कथं वक्तुं शक्यते? इति चेत् उपग्वादीनामपि 'वा नामधेयस्य'[1] इति वार्तिकेन वृद्धसंज्ञा अस्त्येव । यानि वृद्धसंज्ञकानि प्रातिपदिकानि तेभ्यः छप्रत्ययं बाधित्वा अण्विधानाय तस्यापत्यमिति सूत्रम् । भानोरपत्यं भानव इत्यादौ यानि भान्वादिप्रातिपदिकानि वृद्धानि, यानि उपग्वादिप्रातिपदिकानि नामधेयत्वाद्वृद्धानि, तेभ्यश्छप्रत्ययबाधनार्थं तस्यापत्यमिति पृथक्सूत्रमित्यलमतिविस्तरेण ।

यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे नहि ।
यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्नहि ॥

## अनुशीलितग्रन्थाः



| क्र.सं. | ग्रन्थनाम | लेखकःसम्पादकः | प्रकाशकः | वर्षम् |
|---|---|---|---|---|
| १. | अष्टाध्यायी | ईश्वरचन्द्रः | चौखम्बाविद्याभवन | 2004 |
| २. | वैयाकरणसिद्धान्तकौमुदी | गिरिधरशर्मा | मोतीलालबनारसीदास | 1979 |
| ३. | परिभाषेन्दुशेखरः | श्रीपादसत्यनारायणमूर्ति | राष्ट्रियसंस्कृतविद्यापीठम् | 2004 |
| ४. | व्याकरणमहाभाष्यम् | चारूदेवशास्त्री | मोतीलालबनारसीदास | 1968 |
| ५. | वाक्यपदीयम् | भर्तृहरि/सूर्यनारायणशुक्ला | चौखम्बा संस्कृत सीरिस | 1961 |



[1]नामवाचकस्य शब्दस्य वृद्धसंज्ञा विकल्पेन वक्तव्या


ISSN : 2249-538X

# भारतीयज्ञानपरम्परायां स्त्रीव्यक्तित्वविमर्शः

डॉ० छबिलालन्यौपानेः*
सहायकाचार्यः, ना.उ.सं.महाविद्यालयः
बिहारराजयम्

***लेखसारः*** *– अस्मिन् शोधपत्रे वैदिकयुगे पौराणिकयुगे च स्त्रीणां स्थितिः कीदृशी आसीदिति विवेचनं कृतं वर्तते । वैदिकयुगे स्त्रीणां विविधाः प्रकाराः आसन् - गृहपत्नी, ब्राह्मणपत्नी, राजकुमारी, ऋषिका, गृहिणी इत्यादि । वैदिककालस्य स्त्रियः धार्मिकसामाजिकजीवनयोः विविधपक्षेषु योगदानं दत्तवत्यः, समाजस्य संरक्षणे प्रगतौ च सहायकभूमिकां निर्वहन्ति स्म । समाजस्य विकासे सन्तुलने च तस्य योगदानं महत्त्वपूर्णम् आसीत् । पुराणकालः भारतीय-इतिहासस्य महत्त्वपूर्णः अध्यायः अस्ति, यः वैदिककालस्य अनन्तरम् आगच्छति । अस्मिन् कालेऽपि समाजे स्त्रीणां योगदानं महत्त्वपूर्णम् आसीत् । धार्मिकसामाजिकसाहित्यक्षेत्रेषु ताः स्वभूमिकां निर्वहन्ति स्म । पौराणिककालेषु स्त्रीणां देवी, सगुणदेवी, राजकुमारी, तपस्विनी इत्यादिप्रकाराः दृश्यन्ते । पौराणिककालस्य स्त्रीणां योगदानं धार्मिकसामाजिकसाहित्यक्षेत्रेषु अद्वितीयं महत्त्वपूर्णं च आसीत् । तासां कथाः आदर्शाः च समाजे नैतिकतायाः, धर्मस्य, संस्कृतेश्च आदर्शीकरणं कृतवत्यः । भारतीयज्ञानपरम्परायां स्त्रीणां विमर्शः विस्तृतरूपेण विहितं वर्तते । अत्र वैदिक-पौराणिककालयोः दिशा एव स्त्रीविमर्शः विवेचितं विद्यते ।*

कस्यापि सभ्यसमाजस्य स्थितिः तत्समाजे स्त्रीणां दशां दृष्ट्वा सारल्येन ज्ञातुं शक्यते। अनया दृष्ट्या यदि भारतीयसमाजस्याध्ययनं क्रियते चेत् ज्ञायते यत् समयसापेक्षं भारतीयसमाजे स्त्रीणां स्थितौ उन्नतिः अवनतिः च प्राप्यते। पाषाणयुगादारभ्य परमाणुयुगपर्यन्तं मानवसभ्यतया सफला यात्रा विहिता वर्तते। स्वतन्त्रताप्राप्तेरनन्तरं प्रगतिशीलभारतीयसमाजे नार्यः कृषिक्षेत्रादारभ्य अन्तरिक्षपर्यन्तं पुरुषाणां समं स्थानं प्राप्तवत्यः । स्वतन्त्रभारते राष्ट्रपतिः, प्रधानमन्त्री सदृशेषु विशिष्टपदेषु नेतृत्वं कृतवत्यपि अद्यापि मौलिकाधिकारैः वञ्चिता स्त्रीः दृश्यते। कन्याभ्रूणहननम्, लैङ्गिकभेदभावः, यौनोत्पीडनम्, गृहहिंसा, दायादहननम्, शोषणम्, बलात्कारः, तिरस्कारः प्रभृतीनां कुकृत्यानां दीर्घा श्रृङ्खला आधुनिके भारतीयसमाजे दृस्यते । परं वैदिकसमाजः पितृसत्तात्मकः आसीत्, पुत्री-पत्नी-मातृरूपेण स्त्रियः समाजे महत्त्वपूर्णं स्थानं नासीदिति तर्कः अनुचितः ।

वैदिकसमाजे नारीणां स्थानं पुरुषाणां सममेव आसीदिति विविधैः प्रमाणैः ज्ञायते । निघण्टौ[१] अपत्यवाचिनः 15 शब्दाः सन्ति । तत्र अपत्यस्यार्थः सन्तानमिति भवति यत्र पुत्रः पुत्री च उभेऽपि सम्मिलिते भवतः । वेदेषु सन्तानविषयिण्यः सर्वाधिक्यः प्रार्थनाः प्रजाशब्देन विहिता वर्तते । तत्र प्रजाशब्देन पुत्रः पुत्री उभयोरेव ग्रहणं क्रियते ।[२] वेदेषु बहुत्र स्पष्टरूपेण कन्यायाः (पुत्र्याः) कामना कृता दृश्यते ।[३] यजुर्वेदस्य सुप्रसिद्धायां राष्ट्रीयप्रार्थनायां यत्र विजयशील-सभ्य-वीरादिगुणवतां यूनामुत्पत्तये कामना कृता तत्रैव बुद्धिमतीनां नारीणां (पुरन्धिः योषा) उत्पत्तीनां प्रार्थनाऽपि विहिता दृश्यते ।[४] वेदेषु कन्याजन्मविरोधः अथर्ववेदे एव प्राप्यते । तत्र स्त्रीजन्म अन्यत्र भवतु, अस्मिन् गर्भे पुरुषसन्ततिरेव भवतु इति वर्णितं वर्तते ।[५] यस्यां सूक्तौ एतन्मन्त्रं पठितम्, तत्र त्रयो मन्त्राः सन्ति । अस्याः सूक्तेः गूढचिन्तनेन एतेषां मन्त्राणां तात्पर्यार्थोऽवबोद्धुं शक्यते । कस्याः स्त्रियः स्त्रीणामेव जन्म भवति स्म, तत्र समाधानाय प्रयोगाणां वर्णनमेषु मन्त्रेषु वर्तते । एषां मन्त्राणां तात्पर्यं कदापि

---

***सम्पर्कसूत्रम्** - 9560754554, Email- chhabilalneupane@hotmail.com

[१]निघण्टुः 2.2

[२]सं माग्ने वर्चसा सृज सं प्रजया समायुषा । ऋक्संहिता 1.23.24
आ नः प्रजां जनयतु प्रजापतिः । ऋक्संहिता 10.85.43 इमां नारीं प्रजया वर्धयन्तु । ऋक्संहिता 14.1.54

[३]१. मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट् ॥ ऋक्संहिता 10.159.3
२. पुत्रीणा ता कुमारिणा विश्वमायुर्व्यश्नुत ॥ ऋक्संहिता 8.31.8

[४]आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम् । यजुर्वेदः 22.22

[५]स्त्रैषूयम् अन्यत्र दधत् पुमांसम् उ दधदिह । अथर्ववेदः 6.11.3

एतन्नास्ति यत् कन्याजन्म क्वाचन अपराधोऽस्तीति। अन्यस्यामेकस्यां सूक्तौ पिङ्गशब्दस्यार्थः पतिरिति स्वीकृत्य आरोपः प्रदर्श्यते।[१] तत्र पिङ्गशब्दस्य 'श्वेतसर्षपः' इत्यर्थः सायणाचार्येन प्रस्तुतो येन तदापरोपः निराधारो भवति।

वेदेषु विवाहसंस्कारवर्णनप्रसङ्गे द्यौ-पृथिवीविवाहः[२], सोम-सूर्याविवाहः इत्यादिवर्णनं प्राप्यते येन ज्ञायते यदयं संस्कारः पवित्रः सर्वसुखहेतुश्च भवति। एतेनापि ज्ञायते यत् वेदेषु स्त्रियो महत्त्वं पुरुषापेक्षया न्यनं नास्तीति। वेदे प्रतिपादितं यत् ब्रह्मचर्याश्रमस्य समाप्तेरनन्तरमेव विवाहः कर्तव्यः।[३] ऋग्वेदस्य एकस्मिन् मन्त्रे आगतस्य 'पत्येसशन्ती'[४]शब्दस्य व्याख्यां कुर्वन् सायणाचार्यः तच्छब्दार्थः 'पतिकामा', 'पर्याप्तयौवना' वा इति प्रतिपादयति। एवमन्यस्मिन् मन्त्रे विवाहयोग्यायै स्त्रियै 'अशिश्वी'(या बालिका न भवति) इति शब्दः पठितः। तथैव 'नव्याः नव्याः युवतयः भवन्ति' इति प्रयोगः कृतो वर्तते।[५] स्वयंवरविवाहस्य अधिकारः यथा वराय तथैव वध्वै अपि समानः एव प्रदत्तः अस्ति।[६] विधवाविवाहस्यापि समर्थनं वेदः करोति।[७] विधवास्त्रियः द्वितीयो पतिः यो भवति तस्मै देवरः इति उच्यते।अतः देवरः द्वितीयो वरो भवतीति निरुक्तकारस्याभिमत्।[८]

## वैदिकसमाजे स्त्रीणां स्थितिः

वैदिककाले स्त्रीणां सामाजिक-मानसिक-बौद्धिक-सांस्कृतिकस्थितीनां ज्ञानाय स्त्रीणां कृते विभिन्नाः शब्दाः दृश्यन्ते।[९] नृधातोः निष्पन्नः नरशब्दस्य नारीशब्दस्य च वीरकर्मणि, दाने नेतत्वे चार्थेषु प्रयोगो दृश्यते।[१०] पारस्करगृह्यसूत्रानुसारं नारीशब्दस्य प्रयोगः विवाहकाले कन्यादाने, पाणिग्रहणानन्तरं च लाजाहोमावसरे प्रथमतया व्यवह्रियते स्म।[११] अथर्वसंहितायां नारिः इति प्रयोगः प्राप्यते।[१२] पुरुषैः आदृता स्त्री मेना इति कथ्यते।[१३] तथैव यस्यां पुनः जायते सा जाया[१४] इति भवति। लोके स्त्रीः[१५] (स्त्यायाति गर्भो यस्यामिति, अधिकरणसाधना लोके स्त्री स्त्यात्यस्यां गर्भ इति।) एव आधारो भवति। ऋग्वेदे उषादेव्याः कृते सूनरी[१६] (सुष्ठु उनत्ति आर्द्रीकरोति चित्तम्।) इति शब्दः प्रयुक्तः, यस्यार्थो भवति – शोभाधायिका इति। पुरन्ध्रिः (स्वजनसहितं पुरं धारयतीति पुरन्ध्रिः) इति स्त्रीपर्यायशब्दः नगरनेत्री-अर्थे प्रयुक्तः।[१७] पत्नी[१८] (पाति रक्षति) इति शब्दः सहधर्मिणीबोधकः।

[१] पिङ्ग रक्ष जायमानं पुमांसं स्त्रियं क्रन्। अथर्ववेदः 8.6.25

[२] ऊर्जं नो द्यौश्च पृथिवी च पिन्वतां पिता माता विश्वविदा सुदंससा। ऋग्वेदः 6.70.6

[३] ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्। अथर्ववेदः 11.5.18

[४] ऋक्संहिता 10.85.9

[५] ऋक्संहिता 3.55.16

[६] ऋक्संहिता 10.27.12

[७] कियति योषा मर्यतो वधूयो परिप्रीता पन्यसा वार्येण।
भद्रा वधूर्भवति यत् सुपेशा, स्वयं सा मित्रं वनुते जने चित्॥ ऋक्संहिता – 10.27.12

[८] विधवेव देवरं देवरः तस्माद् द्वितीयो वर उच्यते। निरुक्तम् 3.15

[९] नराः मनुष्याः नृत्यन्ति कर्मसु। निरुक्तम् 5.1.3

[१०] ऋग्वेदः 7.20.5, 7.55.8, 8.77.8, 10.86.10-11

[११] पाराशरगृह्यसूत्रम् 1.6.2

[१२] नृणां महावीरार्थीनाम् उपकारित्वात् नारिः। सायणाचार्यः।

[१३] मानयन्ति एनाः – निरुक्तम् 3.21.2, ऋक्संहिता 1.62.7, 1.95.6, 2.39.2

[१४] १. तज्जाया जाया भवति यदस्यां जायते पुनः।
२. जायेदस्तम् – ऋक्संहिता – 3.53.4

[१५] स्त्री ही ब्रह्मा बभूविथ – ऋक्संहिता 8.33.19

[१६] ऋक्संहिता 1.48.5

[१७] अग्निर्नारीं वीरकुक्षीं पुरन्धिम्। ऋक्-संहिता 1.48.5

[१८] ऋक्संहिता – 10.85.39, अथर्वसंहिता 9.3.7, तैत्तिरीयसंहिता 6.5.1-4


ISSN : 2249-538X

पत्युः यज्ञे संयोगो यया सा पत्नी इति कथ्यते ।

वैदिकवाङ्मयस्याध्ययनेन ज्ञायते यत् वैदिककाले ब्रह्मचर्याश्रमस्यानिवार्यता सर्वेषां बालिका-बालकानां कृते समाना आसीत् । समाजे सुव्यस्थिताः शिक्षणसंस्थाः आसन्, यासु समानरूपेण छात्र-छात्राः प्रविष्टाः भवन्ति स्म । एतदेव कारणं यत् ज्ञानार्जनाय ऋषिकुलेषु गुरुकुलेषु च बालिकानां प्रवेशः तासां ब्रह्मचर्यवर्णनं च वेदेषु स्पष्टतया उल्लिखितं प्राप्यते ।[१] पितरौ स्वपुत्री पण्डिता ब्रह्मवादिनी वा भवेदिति धिया भगवन्तं प्रार्थयेते स्म ।[२]

वैदिकसंहितायां 'सरस्वती'रूपेण बहुत्र विदुषीस्त्रीणां स्मरणं कृतं वर्तते । स्वश्रेष्ठज्ञानेन कर्मणा समाजे सद्गुणानां सत्कर्मणां च शिक्षाप्रदानाय सा (सरस्वती) प्रार्थ्यते ।[३] सरस्वतीशब्दस्य विद्या, वाणी, नदी, नाडी अर्थाः भवन्ति । एभ्योऽतिरिक्तः एकः अर्थः – 'विदुषी नारी' अपि अर्थो भवति ।[४] उक्तं च यजुर्वेदभाष्ये – **सरस्वतीम् – "बहुविधं सरो वेदादिशास्त्रविज्ञानं विद्यते यस्याः तां विज्ञानयुक्ताम् अध्यापिका स्त्रियम्"** इति ।[५]

यमस्मृतौ प्रातिपादनेन ज्ञायते यत् प्राचीनकाले नारीणां मौञ्जीबन्धनम् (उपनयनसंस्कारः) इष्टं आसीत् । ततः वेदानां सावित्रीवचनं चाध्यापनं भवति स्म ।[६] यज्ञोपवीतास्त्रियो गुणानां विस्तृतां चर्चां कर्वन्तीयं श्रुतिः कथयति यत् यज्ञोपवीता स्त्री दुष्टं पथभ्रष्टं च पतिं सन्मार्गे आनयने समर्था भवतीति ।[७] वैदिककाले उपनीताः स्त्रियः ब्रह्मवादिनी, सद्योवाहा चेति द्विविधा भवन्ति स्म । ब्रह्मवादिनीरूपा उपनीता स्त्रीः सा भवति या वेदाध्ययने यस्याः समयः व्यतीतो भवति । ब्रह्मचर्यस्य त्रयाणां नियमानां (१.अग्निबन्धम् २. वेदाध्ययनम् ३. भिक्षाचर्या) पालनं करोति स्म । सद्योद्वावाहारूपा उपनीता स्त्रीः उपनयनस्य किञ्चित्कालानन्तरं विवाहसंस्कारं करोति स्म ।[८] बृहद्देवतायां 27 मन्त्रद्रष्ट्र्यः ऋषिकाः वर्णिताः ।[९]

## प्रमुखपुराणेषु स्त्रीस्थितिः

पुराणेषु कन्यामपि सुखसाधनरूपेण स्वीकृतं वर्तते । पितृकुलस्य आपत्तिभिः रक्षणकार्यं पुत्रः पुत्री च कुरुतः – कुन्ती, लोपामुद्रा, माधवी, सुकन्या, शर्मिष्ठा । वामनपुराणस्यानुसारेण कन्यादर्शनं मङ्गलमयं भवति ।[१०] श्रीमद्भागवते वैवस्वतमनोः धर्मपत्न्या कन्यायाः याचनं कृतमासीत् ।[११] ब्रह्मवैवर्तपुराणे वर्णितं यत् राजा अश्वपतिः स्वपुत्र्याः सावित्र्याः जन्मना अतीव

---

[१]ब्रह्मचर्येण कन्या युवानं विन्दते पतिम् ॥ अथर्ववेदः 11.5.18

[२]अथ य इच्छेद् दुहिता मे पंडिता जाये त सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तं अश्नीयाता ईश्वरौ जनयितवै । बृहदारण्यकोपनिषत् 6.4.17

[३]पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥ यजुर्वेदः 20.84

[४]त्वे विश्वा सरस्वती श्रितायूंषि देव्याम् । शुनहोत्रेषु मत्स्व प्रजां देवी दिदिड्ढि नः ॥ ऋक्संहिता 2.41.17

[५]यजुर्वेदभाष्यम् 9.27

[६]पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते । अध्यापनं च वेदानां सावित्रीवचनं तथा ॥ यमस्मृतिः

[७]देवा एतस्यामवदन्त पूर्वे सप्त ऋषयस्तपसे ये निषेदुः ।
भीमा जाया ब्राह्मणस्योपनीता दुर्धा दधाति परमे व्यामन् ॥ ऋक्संहिता 10.109.4

[८]यत्तु हारीतेनोक्तं द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्योद्वाहाश्च । तत्र ब्रह्मवादिनीनामुपनयनमग्नीबन्धनं वेदाध्ययनं स्वगृहे च भिक्षाचर्य्येति । सद्योवधूनां तु उपस्थिते विवाहे कथञ्चिदुपनयनमात्रं कृत्वा विवाहः कार्यः । संस्कारमयूखः – पृ० ४०२

[९]घोषा गोधा विश्ववारा अपालोपनिषत् निषत् । ब्रह्मजया जुत्सूर्नाम अगस्तस्य स्वसा दितिः ॥
इन्द्राणी चेन्द्रमता च सरमा रोमशोर्वशी । लोपामुद्रा च नद्यश्च यमी नारी च शाश्वती ॥
श्रीर्लक्ष्मी सर्पराज्ञी वाक् श्रद्धा मेदा च दक्षिणा । रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः ॥
शौनकः, बृहद्देवता 2.89.95

[१०]वामनपुराणम् 14.35.36

[११]तत्र श्रद्धा मनोः पत्नी होतारं समयाचत । दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रतम् ॥
श्रीमद्भागवतमहापुराणम् 9.1.14

प्रसन्नः आसीदिति ।[१] गृहस्थाश्रमः सर्वाश्रमस्याधारः । स्त्रीः गृहस्थाश्रमस्याधारः । भारतीयसमाजस्य मेरुरिव स्त्रीः भवति । भविष्यपुराणे उक्तं यत् भार्यया विना पुरुषः अर्धपुरुष एव भवति ।[२] विष्णुपुराणानुसारं पुरुष-स्त्रियोः संयुक्तरूपा शक्तिरेव सृष्टेः मूलकारणं भवति ।[३] पुद्मपुराणानुसारं गृहस्थाश्रमः सुखाय भवति, तच्च सुखं पत्नीमूलकं भवति ।[४] मार्कण्डेयपुराणानुसारं गृहस्थाश्रमे पति-पत्न्योः परस्परानुकूलता त्रिवर्गसाधिका भवति ।[५] बृहद्धर्मपुराणे वर्णितं यत् पुरुषस्य परममित्रं तस्य भार्या भवति ।[६] स्कन्दपुराणे निरूपितं यत् स्त्रीः (भार्या) पुरुषस्य कृते महान् मार्गदर्शिका भवति ।[७]

पुराणेषु पतिव्रतास्त्रीविषये एतादृशं वर्णनं प्राप्यते । या स्त्रीः पतिव्रता भवति सा स्वपरिवारस्यैव गौरवभूता न भवति, अपितु राष्ट्रस्य संस्कृतेश्चापि गौरवभूता भवति । ब्रह्मवैवर्तपुराणे निगदितं यत् पृथिव्याः सर्वतीर्थानि स्त्रीचरणेषु विद्यमानानि भवन्ति ।[८] पतिव्रतास्त्रियो दर्शनमात्रेण गृहं पवित्रं भवति ।[९] पतिव्रतास्त्रीणां चरणानि यस्मिन् भूभागे पतति, सो भूभूगाः तीर्थमयो भवति ।[१०]

मातृरूपेणाऽपि स्त्रीमहत्त्वं पुराणे प्राप्यते । "मातृदेवो भव" इति वैदिकसाहित्यमिव पुराणेष्वपि मातुः स्थानं सर्वोच्चं भवति । बृहद्धर्मपुराणं निर्दिशति यत् सन्ततेः कृते मातुः सदृशो गुरुः अन्यो न भवति ।[११] पित्रोः प्रथमं मातुः चरणवन्दनं कर्तव्यम् ।[१२] यस्य गृहे माता प्रियवादिनी भार्या वा न भवति, तस्य गृहं अरण्यमिव शून्यं भवति । अतः वन-गृहयोः साम्यत्वात् सः वनं निवसेत् ।[१३]

स्त्रीशिक्षाविषये भविष्यपुराणे स्वर्णवतीनाम्नीस्त्रीविषये प्रतिपादितं यत् सा सर्वविद्यासु पारङ्गता आसीदिति ।[१४] स्त्रीणां सङ्गीतज्ञरूपेणापि वर्णनं पुराणेषु उपलभ्यन्ते । स्कन्दपुराणे नागकन्यायाः रत्नावल्याः सखीभ्यां सङ्गीतवर्णनं प्राप्यते ।[१५] स्त्रीणां सङ्गीत-नृत्यादिविषयेषु स्कन्दपुराणे अनेकानि उदाहरणानि दृश्यन्ते । यथा काश्यां वीरेश्वरलिङ्गपूजनसमये स्वपतिभिः सह स्त्रीणां नृत्यं गायनं च ।[१६] चित्रकलायाः सर्वप्राचीनस्रोतः विष्णुधर्मोत्तरपुराणं वर्तते । पद्मपुराणे चित्रकलासु रङ्गवेण्याः उल्लेखः प्राप्यते ।[१७]

राजनीतौ सैन्यशिक्षायाञ्चापि स्त्रीणां महद्योगदानविषयकं वर्णनं पुराणेषूपलभ्यन्ते । राजमहिषी-इन्द्रसेना स्वपुत्रं दमं राजनीतिविषयकोपदेशं दत्तवतीति मार्कण्डेयपुराणे दृश्यते । एकया स्त्रिया सह कल्केः युद्धवर्णनप्रसङ्गः कल्किपुराणस्य तृतीयांशे प्राप्यते ।[१८] वायुपुराणे महर्षिभृगोः पत्न्याः काव्यमातुः असुरान् विष्णुम्, इन्द्रञ्च युद्धाय आव्हानवर्णनप्रसङ्गो दृश्यते ।

---

[१] ब्रह्मवैवर्तपुराणम् 15.28
[२] पुमानर्द्धपुमाँस्तावद् यावद् भार्या न विन्दति । भविष्यपुराणम्, सप्तमोऽध्यायः ।
[३] अर्धनारी नरवपुः प्रचण्डोऽतिशरीरवान् । विभज्यात्मानमित्युक्त्वा तं ब्रह्मान्तर्दधे ततः ॥
[४] गृहस्थाश्रमः सुखार्थाय पत्नीमूलं हि तत् सुखम् । पद्मपुराणम् 223/36/7
[५] यदा भार्या च भर्त्ता च परस्परवशानुगो । तदा धर्मार्थकामानां त्रयाणामपि सङ्गतम् ॥ मार्कण्डेयपुराणम् 7/79
[६] नास्ति भार्यासमं मित्रम् । बृहद्धर्मपुराणम्, पूर्वखण्डः 2.36
[७] नरं नारी प्रोद्धरति मज्जन्तं भववारिधौ । स्कन्दपुराणम्, कुमारिकाखण्डः
[८] पृथिव्यां यानि तीर्थानि सतीपदेषु तान्यपि । ब्रह्मवैवर्तपुराणम् 3.5.119
[९] यथा गङ्गावगाहिनः शरीरं पावनं भवेत् । तथा पतिव्रतां दृष्ट्वा सदनं पावनं भवेत् ॥ स्कन्दपुराणम् 7.13
[१०] स्कन्दपुराणम् 7.19
[११] नास्ति मातृसमो गुरुः । बृहद्धर्मपुराणम्
[१२] गुरूणां चैव सर्वेषां माता परमो गुरुः । महाभारतम् 1.211.20
[१३] यस्य माता गृहे नास्ति गृहिणी वा सुशासिता । अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥ ब्रह्मवैवर्तपुराणम्
[१४] ज्ञात्वा स्वर्णवती देवी सर्वविद्या विशारदा । भविष्यपुराणम् 24.501
[१५] तिस्रोऽपि गीतं गायन्ति लगगान्धारसुन्दरम् । रासमण्डलभेदेन लास्यं तिस्रोऽपि कुर्वते ॥ स्कन्दपुराणम्, काशीखण्डः
[१६] गायन्ती सुस्वरं याता परौ निर्वाणभूमिकाम् । स्कन्दपुराणम्, काशीखण्डः ।
[१७] सारङ्गनाम्नो गोपस्य कन्याऽभूच्छुभलक्षणा । रङ्गवेणीति विख्याता निपुणा चित्रकर्मणि ॥ पद्मपुराणम्, पातालखण्डः 72.20
[१८] कल्किपुराणम् 15.9


ISSN : 2249-538X

यतः युद्धं स्थगितं जातमिति । [१]

प्रसिद्ध-पौराणिक-स्त्रीपात्रेषु माता अदितिः, आद्या शक्तिः दुर्गा, सती पार्वती, सती अनुसूया, सती सीता, सती शाण्डिलिनी, सती सुकन्या, सती मदालसा, सती गान्धारी, सती कुन्ती, सती द्रौपदी, सती शैव्या, सती सावित्री, शकुन्तला, कैकयी, सुदेवा, माद्री, उत्तरा – इत्याद्यः प्रसिद्धाः सन्ति ।

इत्थमेतावता विवेचनेनेदं खण्डितं भवति यत् भारतीयवैदिककालः पितृसत्तात्मकः एव आसीत् मातृसत्तात्मको नासीदिति । सामाजिकक्षेत्रेषु स्त्री-पुरुषयोः समानता आसीत् । स्त्रीः पुरुषः रथस्य चक्रद्वयमिव भवतः ।

## सन्दर्भग्रन्थसूची


1. ऋग्वेदसंहिता, विश्वेश्वरानन्द वैदिक शोध संस्थान, होशियारपुर, १९६५
2. युज्रवेद, दामोदर सातवलेकर, स्वाध्यायमण्डल, पारडी, १९५७
3. सामवेद, दामोदर सातवलेकर, स्वाध्याय मण्डल, पारडी, १९६५
4. अथर्ववेद, दामोदर सातवलेकर, स्वाध्याय मण्डल, पारडी, १९५८
5. वैदिक नारी, रामनाथ वेदालंकार, समर्पण शोध संस्थान, साहिबाबाद, गाजियाबाद, २०००
6. वैदिक संहिताओं में नारी, डा. मालती शर्मा, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, १९९०
7. वेदों में नारी, डा. कपिलदेव द्विवेदी, विश्वभारती अनुसन्धान परिषद्, ज्ञानपुर, भदोही, उ.प्र., २००५
8. Women in Ancient India, Clarisse Bader, Chowkhamba Sanskrit Series, Varanasi, 1964
9. The Position of Women in Hindu Civilisation, A.S. Altekar, Banaras, 1938


## Online Resources


- https://hindumantavya.blogspot.com/2017/03/chaturth-samullas-ki-samiksha.html
- Women in Veda Part – 1 by Dr. Vishvesh
  https://mgcub.ac.in/pdf/material/20200407005918c7267d7497.pdf
- Status of Women in Vedic Society (part-1) by Dr. Vishvesh
  https://mgcub.ac.in/pdf/material/202004160803003ac46dd2b4.pdf
- Study of women in Vedic Literature (Part-2) by Dr Vishvesh
  https://mgcub.ac.in/pdf/material/20200423004705ece0b00530.pdf
- Study of Women in Puranas by Dr. Vishvesh
  https://mgcub.ac.in/pdf/material/20200429022742d72ecc84c8.pdf
- Contribution of Women to Sanskrit Literature By M. Vijayasree
  https://www.wisdomlib.org/history/compilation/triveni-journal/d/doc71234.html


[१] वायुपुराणम् 35.135

# ब्रह्मसूत्ररीत्या ज्योतिश्शब्दार्थनिरूपणाधिकरणस्वरूपप्रतिपादनम्

श्री राहुलराजशेखरभट्टः*
सहायकाचार्यः(सं), के.सं.वि.,मुक्तस्वाध्यायपीठम्
रा. गा. परिसरः, शृङ्गेरी

***लेखसारः*** *– अधिकरणमिदं सूत्रप्रस्थाने ब्रह्मसूत्रे प्रथमाध्याये प्रथमे पादे दशमम् । इदं हि छान्दोग्ये श्रूयते "अथ यदतः परो दियो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषु समेषु लोकेषु इदं अस्मिन्नन्तः पुरुषे ज्योतिः" इति । अत्र संशयः भवति किं ज्योतिः शब्देन अत्र आदित्यादिकं ज्योतिः गृह्यते अथवा परमात्मा अपि । लोके आदित्यादिषु ज्योतिः शब्दः रूढः, वेदे परमात्मनि अपि अस्ति । अत्राशङ्का - "आकाशस्तल्लिङ्गात्" इत्यत्र आकाशशब्दः ब्रह्मार्थकः, एवं "अत एवं प्राणः इत्यत्र तथैव अतिदेशः), अतः तथा तेनेव अधिकरणेन इदम् अधिकरणमपि गतार्थम् इति । तत्रोच्यते, न तत्र ब्रह्मलिङ्गसद्भावात् एवं विचारः कृतः, अत्र तु तल्लिङ्गमेवास्ति नास्तीति विचार्यते, अतः नास्य अधिकरणस्य गतार्थत्यम् । यतो हि तत्र भूतादिपादान् व्यपदिशति श्रुतिः "पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि" इति पुरुषसूक्तेऽपि इयं ऋक ब्रह्मपरेव अस्ति । तथा च स्मृतिरपि विधत्ते - "विष्टभ्याहमिदं कृत्स्नं एकांशेन स्थितो जगत्" इति "उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्" पूर्वपक्षिणा सप्तमीनिर्दिष्टत्वात् एवं पञ्चमीनिर्दिष्टत्वात् उभयथाऽपि भिन्नत्वमेव प्रतीयते । अतः नात्र ब्रह्मणः प्रत्यभिज्ञानम् इति यदुक्तं तत् अत्र परिहियते । उभयथा उपदेशेऽपि दोषो नास्ति । यतो हि "वृक्षाचे श्येन" इति वृक्षसम्बद्धः श्येन उपदिश्यते, एवं च "वृक्षाग्रात् परतः श्येन" इत्यपि उपदिश्यते । एवं दिवि एव दिपः परः इत्यपि उपदिश्यते, अतः विरोधो नास्ति । इत्थम् इतः सर्वं सुस्थम् । अयमेव वेदान्ताभ्युच्चयः ।*

अधिकरणमिदं सूत्रप्रस्थाने ब्रह्मसूत्रे प्रथमाध्याये प्रथमे पादे दशमम् । इदं हि छान्दोग्ये श्रूयते [१]"अथ यदतः परो दियो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषु समेषु लोकेषु इदं अस्मिन्नन्तः पुरुषे ज्योतिः" इति । अत्र संशयः भवति किं ज्योतिः शब्देन अत्र आदित्यादिकं ज्योतिः गृह्यते अथवा परमात्मा अपि । लोके आदित्यादिषु ज्योतिः शब्दः रूढः, वेदे परमात्मनि अपि अस्ति । अत्राशङ्का - "आकाशस्तल्लिङ्गात्" इत्यत्र आकाशशब्दः ब्रह्मार्थकः, एवं "अत एवं प्राणः इत्यत्र तथैव अतिदेशः), अतः तथा तेनेव अधिकरणेन इदम् अधिकरणमपि गतार्थम् इति । तत्रोच्यते, न तत्र ब्रह्मलिङ्गसद्भावात् एवं विचारः कृतः, अत्र तु तल्लिङ्गमेवास्ति नास्तीति विचार्यते, अतः नास्य अधिकरणस्य गतार्थत्यम् । अत्र प्रत्युदाहरणसङ्गतिः । एवं स्ववाक्ये स्पष्टबद्धलिङ्गाभावेऽपि भूतपादादिलिङ्गमस्तीति पादसङ्गतिः । तर्हि किं प्राप्तम् इत्याशङ्कायां पूर्वपक्षी वदति ज्योतिरिति आदित्यादिकं ज्योतिः प्रसिद्धिबलात् । तमो ज्योतिः इति परस्परप्रतिद्वन्द्विविषयणी प्रसिद्धिः तावत् लोके । तर्हि अज्ञानतमोविरोधित्वात् आत्म- ज्योतिर्माह्यमिति चेत् न । अत्र तमः नाम चक्षुर्वृत्तेः निरोधकं शार्वरादिकम् एव तमः, लोके तथैव प्रसिद्धत्वात् । तद्विरोधिचक्षुर्वृत्तेः अनुग्राहकम् आदित्यादिकं ज्योतिः अस्ति । अतः ज्योतिः एव अत्र ज्योतिः शब्दस्य अर्थः । प्रसिद्धत्वेन हेतुना एवम् अथवा पुनः दीप्तिमत्त्वेन तदेव साध्यते । दीप्यते इति उक्तं तेनापि आदित्यादिकं ग्राह्यमिति ज्ञायते । यत् रूपवत् तदेव दीप्यते अतः रूपादिहीनं मा न दीप्यते इति कृत्वा ब्रह्म इत्यर्थो न ।

प्रथमं हेतुद्वयेन आदित्यादिकमेवार्थः इत्युक्त्या इदानीम् अग्रिमैः हेतुभिः ब्रह्म इत्यर्थः नास्ति इति साधयति पूर्वपक्षी । श्रुतिः दिवः परः इति मर्यादा सा मर्यादा परिच्छिन्नस्य भवितुमर्हति न तु अपरिच्छिन्नस्य ब्रह्मणः । अत्र एकदेशी

---

***सम्पर्कसूत्रम्*** - 7022849480, Email- rahulrbhat95@gmail.com

[१](छा. उ. ३ । १३ । ७)

आशङ्कते कार्यज्योतिरपि अत्र अस्यां सर्गे दीप्यमानत्यात् सर्वगता, अतः तस्या अपि चुमर्यादत्वविरोधः भक्त्येव इति । तर्हि अत्र अत्रिवृत्कृतं तेजः एव भवतु इति चेत् तस्य अत्र प्रयोजनमेव नास्ति । ध्यानमेव तस्य प्रयोजनम् इत्यपि न शक्यते । प्रयोजनान्तर प्रसिद्धस्यैव उपास्यत्वं भवति । एवं च वस्तुतः अत्रिवृत्कृतं तेजः एव नास्ति, यतो हि [१]"तासां त्रिवृतं त्रियुतमेकेकां करवाणि" इयं श्रुतिः अविशेषेण वक्ति । भवतु तर्हि त्रियुत्कृतमेव तेजः ज्योतिश्शब्दार्थः इति । तथाऽपि तस्य दिवः अर्वागपि दीप्तिमत्वात् कथं तद्गृह्यते इति चेत् तस्य उपासनार्थं प्रदेशविशेषपरिग्रहः न विरुध्यते । ब्रह्मणः तु निरवयवस्य प्रदेशकल्पना न युक्ता एवं च सर्वतः पृष्ठेषु अनुत्तमेषु लोकेषु इति आधारबहुत्वमपि आदित्यादिषु एव उपपद्यते, न ब्रह्मणि, कल्पनागौरवात् । एवं च परंज्योतिः कौक्षेये ज्योतिषि अदुध्यस्यते इति दृश्यते [२]"इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः" इत्यनेन वाक्येन । अध्यासः सर्वदा सादृश्यमपेक्षते कौक्षेयज्योतिः तु अब्रह्म । [३]"तस्यैषा दृष्टिः तस्यैषा श्रुतिः" इति चौष्ण्यघोषविशिष्टत्वस्य श्रवणात् । यथा तस्य भूरिति शिरः इत्यत्र एकत्वसाम्येन अध्यासः तथैव अत्रापि भवति । एवं च [४]"चक्षुष्यः श्रुतो भवति य एवं वेद" इति अल्पफलश्रवणमपि श्रूयते । ब्रह्मोपासनं तु महते फलाय भवति । अतः अपि नात्र ब्रह्म इत्यर्थः ग्रहीतुं शक्यते । एवम् अत्र स्ववाक्ये किञ्चिपि ब्रह्मलिङ्गमस्ति, पूर्वस्मिन् वाक्ये तु छन्दोभिधानमेव दृश्यते [५]"गायत्री वा इदं सर्वम्" इत्यत्र । यदि कथञ्चिदपि तत्र ब्रह्म निर्दिष्टमस्त्येव इत्युच्यते चेत् - तथापि तस्य अत्र प्रत्यभिज्ञानं न भवति । तत्र [६]"त्रिपादस्यामृतं दिवि" इति सप्तमीनिर्देशात् अधिकरणत्वं श्रूयते । अस्मिन् वाक्ये परो दिवः इति पञ्चमीनिर्देशात् द्यौर्मर्यादावत्वम् । तस्मात् प्राकृतं ज्योतिरिह ग्राह्यं न ब्रह्म । इत्येवं प्राप्ते सूत्रकारः वदति "ज्योतिश्चरणाभिधानात्" इति । ज्योतिरिति ब्रह्मैव ग्राह्यम्, कुतः ? चरणाभिधानात् नाम पादाभिधानात् इत्यर्थः । अयमाशयः पूर्वस्मिन् वाक्ये "पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि" इत्यत्र द्युसम्बन्धिरूपं यत् त्रिपादमृतं ब्रह्मणो रूपं निर्दिष्टं तदेवेह ज्योतिश्शब्देन निर्दिष्टं द्युसम्बन्धादेव इति प्रत्यभिज्ञायते । तस्मात् प्राकृतं ज्योतिः इत्यर्थे तु प्रकृतहानाप्रकृतप्रक्रिये प्रसज्येयाताम् । एवं सन्दंशन्यायेनाऽपि अत्र ब्रह्म इत्येव अर्थः ग्राह्यः, यतो हि अग्रिमे वाक्येऽपि "सर्वं खल्विदं ब्रह्म" इत्यनुवृत्तिः दृश्यते । यत्तु पूर्वपक्षिणा उक्तम् - "ज्योतिर्दीप्यते" इति कार्ये ज्योतिषि एव एतौ शब्दौ प्रसिद्धौ इति । तत्रोच्यते यत् पदेन द्युसम्बन्धात् ब्रह्म इत्यर्थे अवगते एतयोः अविशेषकत्वात् । दीप्यमानकार्यज्योतिरुपलक्षिते ब्रह्मण्यपि प्रयोगसम्भवात् । अथवा ज्योतिःशब्दस्य ब्रह्मण्यपि शक्तिः भवत्येव । 'वाचैवायं ज्योतिषास्ते', मनो ज्योतिर्जुषताम् इत्यादिषु स्थलेषु ज्योतिः शब्दः मुख्यया वृत्त्या दृश्यते । तस्मात् यद्यत्कस्य- चिदवभासकं तत् तत् ज्योतिः ज्योतिःशब्देन उच्यते । अतः ब्रह्मण्यपि समस्तजगदवभासकत्वात् उपपन्नः ज्योतिः शब्दः । "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति श्रुतेश्च । द्युमर्यादत्वश्रवणात् न ब्रह्म ग्राह्यम् इत्युक्तम् पूर्वपक्षिणा, तत्रोच्यते उपासनार्थं सर्वगतस्यापि ब्रह्मणः प्रदेशकल्पना कर्तुं शक्यते न तत्र कोऽपि विरोधः । निष्पदेशस्यापि ब्रह्मणः प्रदेशविशेषकल्पना उपाधिसम्बन्धविशेषात् दृश्यते । यथा आदित्ये चक्षुषि हृदये इत्यादिषु उपासनानि श्रूयन्ते एव । नामादिप्रतीकवत् कौक्षेयज्योतिष्मतीकत्वम् उपपद्यते अतः अध्यासार्थं सादृश्यस्यैव अपेक्षा इत्यपि नास्ति । अतः कौक्षेयज्योतिषि अध्यासः उपपद्यते । तथा च अल्पफलश्रवणम्

[१](छा. उ. ६ । ३ । ३)
[२](छा. उ. ३ । १३ । ७)
[३](छा. उ. ३ । १३ । ८)
[४](छा. उ. ३ । १३ । ८)
[५](छा. उ. ३ । १२ । १)
[६](छा. उ. ३ । १२ । ६)(छा. उ. ३ । १२ । ६)

इति यो हेतुः उक्तः सोऽपि अस्मत्पक्षे उपपद्यते एव । न हि इयते फलाय ब्रह्माश्रयणीयम् इयते न इत्यत्र नियमोऽस्ति । यत्र निरस्तसमस्तोपाधिसम्बन्धं ब्रह्मणः उपासनं श्रूयेत तत्र एकमेव मोक्षः इति फलम् । यत्र तु प्रतीकविशेषसम्बन्धं गुणसम्बन्धं वा ब्रह्म उपदिश्यते तत्र तु संसारगोचराण्येव उच्चावचाफलानि दृश्यन्ते । "अन्नादो वसुदानः ।" इत्यादिषु यद्यपि स्ववाक्ये किञ्चित् ब्रह्मणः लिङ्गमस्ति तथापि यच्छब्दात् नाम "अथ यदतः परो दिवः" इति पच्छब्दात् द्युसम्बन्धेन ब्राह्मज्ञाने तस्यैव अत्र परामर्शः क्रियते तथा सति यत् ज्योतिरिति सामानाधिकरण्येन ब्राह्म इत्यर्थौं लक्ष्यते इति । पूर्वस्मिन् वाक्ये तु छन्दोनिर्देश एव अस्तीति यदुक्तम् पूर्वपक्षिणा तत्रोच्यते "छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथाहि दर्शनम् । तत्र केवलं न छन्दोनिर्देशः, अपि तु तथापि ब्रह्मैव चतुष्पाद दर्शितम् । कथमिति चेत् गायत्री वा इदं सर्वम् इत्युपक्रम्य तस्या एव भूतपृथिवीहृदयवाक्प्राणप्रभेदैः भेदानुक्तत्वा [1]"सैषा चतुष्पदा षड्विधा गायत्री" इत्याद्युक्तम् । तत्र चेतोर्पणम् अपि व्याख्यातम् । चेतोऽर्पणं नाम चेतसः समर्पणम् । एवं च गायत्र्याख्यविकारानुगते ब्रह्मणि चित्तसमाधानम् उक्तम् । न केवलायाः गायत्र्याः तत् सम्भवति, अक्षरस्वरूपत्वात् । अतः सर्वात्मकब्रह्मणि एव वक्तव्यम् । तथा अन्यत्रापि "एतं ह्येव बाहृचा महत्युक्थे मीमांसन्ते" इत्यादिस्थलेऽपि विकारद्वारा ब्रह्मणः उपासनं दृश्यते । कार्यं च कारणाद् अव्यतिरिक्तम् इति च 'तदनन्यत्यमारम्भणशब्दादिभ्यः' इत्यत्र वक्ष्यते । अत्र वृत्तिकारमतेन साक्षादेव गायत्रीशब्देन ब्रह्म उच्यते न विकारद्वारा । सङ्ख्यासामान्यात् तथा च यथा गायत्रीसम्बद्धाक्षरैः चतुष्पदा एवं ब्रह्म अपि चतुष्पात् इति । अत्र न छन्दोऽभिधानम् । तथाच इदं सूत्रं भवति "भूतादिपाद्यपदेशोपपत्तेश्चैवम्" अनेनापि गम्यते यत् पूर्वस्मिन् वाक्ये प्रकृतं ब्रह्म इति । यतो हि तत्र भूतादिपादान् व्यपदिशति श्रुतिः [2]"पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि" इति पुरुषसूक्तेऽपि इयं ऋक ब्रह्मपरेव अस्ति । तथा च स्मृतिरपि विधत्ते - [3]"विष्टभ्याहमिदं कृत्स्नं एकांशेन स्थितो जगत्" इति "उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्" पूर्वपक्षिणा सप्तमीनिर्दिष्टत्वात् एवं पञ्चमीनिर्दिष्टत्वात् उभयथाऽपि भिन्नत्वमेव प्रतीयते । अतः नात्र ब्रह्मणः प्रत्यभिज्ञानम् इति यदुक्तं तत् अत्र परिहियते । उभयथा उपदेशेऽपि दोषो नास्ति । यतो हि "वृक्षाग्रे श्येन" इति वृक्षसम्बद्धः श्येन उपदिश्यते, एवं च "वृक्षाग्रात् परतः श्येन" इत्यपि उपदिश्यते । एवं दिवि एव दिपः परः इत्यपि उपदिश्यते, अतः विरोधो नास्ति । इत्थम् इतः सर्वं सुस्थम् । अयमेव वेदान्ताभ्युच्चयः ।

[1](छा. उ. ३ । १२ । ५)
[2](छा. उ. ३ । १२ । ६)
[3](भ. गी. १० । ४२)

 ISSN : 2249-538X

# संस्कृतरूपकेषु लौकिकन्यायाः

डा. रमेश चन्द्र बरमोला*
सहायकाचार्यः(सं), के.सं.वि.,मुक्तस्वाध्यायपीठम्
रा. गा. परिसरः, शृङ्गेरी

***लेखसारः*** *–संस्कृतसाहित्ये रूपकप्रकारः रसप्रधानत्वेन विशिष्टः समादृतः । अमीषां संस्कृतरूपकाणां विविधपात्रेषु संवादेषु च लौकिकन्यायाः विशेषेण प्रयुज्यन्ते । ये च सामान्यजीवने सततं प्रचलिताः व्यवहारनिष्ठाः युक्तिप्रयुक्ताः च सूक्तयः भवन्ति । तत्र प्रतिभावन्तः कवयः भावाभिव्यक्तिं सुस्पष्टयितुं, प्रमाणवृद्धिं च सम्पादयितुं लौकिकन्यायान् प्रयुञ्जते । अत्र कानिचन संस्कृतरूपकाणि परिशील्य एतादृशानां विशिष्टाः लौकिकन्यायाः तात्पर्यपुरस्सरं प्रदर्श्यन्ते । येन सहृदयाः रूपकानां गाम्भीर्यं रोचकताम् अधिगम्य सरलतया भावाभिव्यञ्जने प्रयोगकरणे च समर्थाः भविष्यन्ति इति मे विश्वासः ।*

***कूटशब्दाः*** *–छिन्नहस्तः, निरोधः, तित्तिरः, प्रतिकारः, कूपपातः, बन्धनभ्रष्टः, वरण्डः ।*

शास्त्रसमये महर्षिभिः सम्यगनुसन्धानपूर्वकं विविधानां सिद्धान्तानां स्थापनाय अनेकाः न्यायाः उपनिबद्धाः । एते न्यायाः केवलं तर्कशास्त्रादिषु न उपयोग्याः, अपि तु सामान्यजनानाम् दैनिकव्यवहारे अपि स्वाभाविकतया प्रयुज्यन्ते । एतेषु न्यायेषु ये केचन सर्वसामान्यजीवने अपि दृश्यन्ते, ते लौकिकन्यायाः इति प्रसिद्धाः । लौकिकन्यायाः स्वभावतः सूक्ष्मबुद्धिना निर्मिताः, ये गहनान् अर्थान् अपि लघुतया, चमत्कृत्या च प्रकाशयन्ति । तेषां साहाय्येन कथ्यते, केनचित् विशेषेण अथवा सामान्यदृष्ट्या कस्मिंश्चिद् विषये प्रमाणपूर्णं विश्लेषणं साधयितुं शक्यते । विशेषतः संस्कृतरूपकेषु, यत्र विविधपात्रेषु संवादेषु च लौकिकन्यायाः आकर्षकतया प्रयुज्यन्ते । ये च सामान्यजीवने सततं प्रचलिताः व्यवहारनिष्ठाः युक्तिप्रयुक्ताः च सूक्तयः भवन्ति । तत्र प्रतिभावन्तः कवयः भावाभिव्यक्तिं सुस्पष्टयितुं, प्रमाणवृद्धिं च सम्पादयितुं लौकिकन्यायान् प्रयुञ्जते । एतेषु रूपकेषु, पात्राणि स्वभावानुगुणं भावव्यञ्जनाय प्रयुक्तानि दृश्यन्ते, तत्र लौकिकन्यायानां यथासम्भवम् अनुप्रयोगः भावप्रकटनस्य सुलभोपायः सञ्जातः । अत्र लब्धेषु न्यायेषु केचन उपस्थाप्यन्ते -

## १. छिन्नहस्तो मत्स्ये पलायिते निर्विण्णो धीवरो भणति धर्मो मे भविष्यति

छिन्नहस्तो मत्स्ये पलायिते निर्विण्णो धीवरो भणति धर्मो मे भविष्यति[१] । धीवरस्य हस्तात् कथञ्चित् मत्स्ये पलायिते सति धीवरः वदति हे मत्स्य ! त्वं गच्छ तव जीवनरक्षणात् मह्यं धर्मप्राप्तिः भविष्यति । काशीराजपुत्री देवी उर्वश्याम् आसक्तं दुःखितं महाराजं प्रसादाय भणति - अद्य प्रभृति आर्यपुत्रः यां स्त्रियं प्राथयते या च आर्यपुत्रस्य समागमप्रणयिनी भविष्यति तया सह मया प्रीतिभावेन भवितव्यम् इति देव्याः वचनं श्रूत्वा विदुषकः तत् कथयति - छिन्नहस्तो मत्स्ये पलायिते निर्विण्णो धीवरो भणति धर्मो मे भविष्यति इति अस्य तात्पर्यं तावत् प्रेम्णि महाराजं स्वाधीने स्वनियन्त्रणे वा कर्तुं कृतेऽपि प्रयत्ने महाराजः पराधीनः जातः (उर्वश्याम् आसक्तः ) तस्मात् किमपि कर्तुं न शक्यते अत इतः परम् अहं तया उर्वश्या सह प्रीतिसम्बन्धेन भविष्यामि तत्रैव मम सुखम् इति ।

***सम्पर्कसूत्रम्** - 9449899733, Email - dr.rameshcb@gmail.com

[१]विक्रमोर्वशीयम्, ३ अङ्कः

## २. नीते रत्ने भाजने को निरोधः

नीते रत्ने भाजने को निरोधः[१] । रत्नस्य अपहरणाद् अनन्तरं तत्पात्रस्य रक्षणं किमर्थम्? यदा महती काचित् विपत्तिः सञ्जाता एव, ततः परं तत्सम्बद्धा जागरूकता व्यर्था इति वक्तव्ये एवंविधाः न्यायाः प्रयुज्यन्ते । एतत्सदृशाः न्यायाः - विक्रीते करिणि किमंशुके विवादः, निर्गते नीरे सेतुमेषा चिकीर्षति, न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ।

## ३. वरं तत्कालोपनतस्तित्तिरः न पुनर्दिवसान्तरितो मयूरः

तस्मादेहि देवीं प्रसादयावः, वरं तत्कालोपनतस्तित्तिरः,न पुनर्दिवसान्तरितो मयूरः[२] । अस्मिन् एव काले कुपिता देवी प्रसादयितव्या । यस्मिन् समये यत्करणीयं तस्मिन्नैव समये तत्करणीयम् , तदेव कार्यं कालान्तरे क्रियते चेत् निष्प्रयोजकं भवति तत्कार्यम् इति । तस्मात् कुपिता देवी सम्प्रत्येव प्रसादयितव्या इत्यत्र तात्पर्यम् विदुषकस्य । वस्तुतः अयं कश्चन न्यायः वर्तते - मयूरपक्षी तित्तिरपक्षिणः श्रेष्ठः । कश्चन पक्षिणः अभिलाषी शीघ्रं तित्तिरपक्षिणमेव लभते चेत् तदेव वरं न तु दिनान्तरे मयूरप्राप्त्याशया लब्धतित्तिरस्य त्यागः कर्तव्यः इति । यदा वयं किमपि उत्कृष्टं प्राप्तुं प्रयतामहे तदा किञ्चित् न्यूनं लभ्यते चेत् तदपि प्राप्तव्यं न तु उत्कृष्टप्राप्तेः आशया न्यूनरूपेणापि यत् प्राप्तं तत् त्यक्तव्यम् । यथा कश्चन सर्वकारीयविश्वविद्यालये प्राध्यापकः भवितुम् अभिलषति किन्तु यावत् पर्यन्तं तत्र नियुक्तिः न भवति तावत् पर्यन्तं यत्र कुत्रापि विद्यालये अध्यापकरूपेण उद्योगः लभ्यते चेत् तत्र गन्तव्यमेव । अन्यथा एतदपि न लभ्येत ।

## ४. हंस एव जलेभ्यो दुग्धमुद्धरति

हंस एव जलेभ्यो दुग्धमुद्धरति[३] । समर्थः जन एव तत्त्वं ज्ञातुं प्रभवति न तु अन्यः इति तात्पर्यम् ।

## ५. शिरसि फणी दूरे तत्प्रतीकारः

कथं न ज्ञायते नाम ? भोः श्रेष्ठिन् । शिरसि फणी दूरे तत्प्रतीकारः । सर्पः अत्यन्तं सन्निहितः अस्ति, किन्तु, तद्विषनिवारणार्थं चिकित्सा तु दूरे अस्ति । नन्दवंशनाशकस्य मम चाणक्यस्य सम्मुखे किमपि रहस्यम् मा आच्छादयतु, तथा करोति चेत् भवतः आत्मरक्षणं दुष्करं स्यात् मत्सकाशात् इति तात्पर्यम् । अत्र चाणक्येन पृष्टः चन्दनदासः राक्षसस्य स्त्रीविषये न सूचयति कथयति च न जानामि कुत्र गता इति तदा चाणक्यस्य वाक्यमिदम् । यत्र, विपत् अत्यन्तं सन्निहिता, तन्निवारणोपायः न किञ्चिदपि, तत्र अयं प्रयोगः ।

## ६. न घटस्य कूपपाते रज्जुरपि तत्र प्रक्षेतव्या

महाराज ! किं वा अयं लोकवादो वितथः न घटस्य कूपपाते रज्जुरपि तत्र प्रक्षेतव्या[४] । जलाहरणकाले घटः कूपे पतितः चेत् हस्तस्थिता रज्जुः अपि तत्र न क्षेपणीया । बहु किमपि नष्टं चेदपि यदवशिष्टं तत् रक्षणीयम् एव न तु तदपि नाशनीयम् । अत्र भ्रातृमरणात् परं मया कथं जीवितुं शक्यते इति दुर्योधनस्य वचनं श्रुत्वा सञ्जयः कथयति न घटस्य कूपपाते रज्जुरपि तत्र प्रक्षेतव्या इति । भ्रातरः मृताः इति कृत्वा भवान् प्राणत्यागं मा कुरुताम् इति अस्य अभिप्रायः ।

---

[१]प्रतिज्ञायौगन्धरायणम्, ४ अङ्कः
[२]वृद्धशालभञ्जिका, १ अङ्कः
[३]वृद्धशालभञ्जिका, ३ अङ्कः
[४]वेणीसंहारः, १ अङ्कः


ISSN : 2249-538X

## ७. मुखदोषं दर्पणे आरोपयसि

मुखदोषं दर्पणे आरोपयसि[१] । आत्मनः दोषम् अन्यस्योपरि आरोपयसि इति भावः ।

## ८. क्षते क्षारमिवाहितम्

क्षते क्षारमिवाहितम्[२] । व्रणे लवणनिक्षेपः । असह्यकष्टे अपरकष्टस्य पतनम् । एकस्य दुखस्य उपरि अपरदुखस्य दुखवज्रपातः । यदा जने महति कष्टे पतिते सति अत्यन्तं असह्यस्य अपरस्य कष्टस्य निपतनं भवति तदा एतादृशः प्रयोगः क्रियते , यथा हिन्द्याम् - घाव पर नमक छिडकना इति ।

## ९. विकारानुरूपः प्रतिकारः

विकारानुरूपः प्रतिकारः[३] । रोगानुसारेण औषधी भवितव्या । महर्षिवाल्मीकिः कथयति सीताम् - जनापवादभयेन त्वं निष्पापा सीता त्यक्ता रामेण , सम्प्रति सर्वेषाम् उपस्थितौ उच्चैः यथा सर्वे जना श्रुणुयुः तथा उद्घोष्यताम् अहं शुद्धा अस्मि इति । यतोहि विकारनुरूपः प्रतिकारः अर्थात् ये नागरिकाः तदा सीतां निन्दितवन्तः ते रोगग्रस्ताः भवत्याः वचनौषधं प्राप्नुयुः इति तात्पर्यम् । अस्माकं व्यवहारेऽपि वाक्कलहे जाते सति तस्य कथनानुसारेण प्रतिवचनं दातव्यमेव इति व्यवह्रियते ।

## १०. पत्तने सति ग्रामे रत्नपरीक्षा

पत्तने सति ग्रामे रत्नपरीक्षा[४] । विद्वत्जने विद्यमाने किमर्थं मुर्खेण जनेन रत्नपरीक्षा कार्यते । अर्थात् विद्वत्जनेन एव रत्नस्य परीक्षा कार्या ।

## ११. बन्धनभ्रष्टो गृहकपोतो विडालिकाया आलोके पतितः-

अहो ! अनर्थः सम्पतितः बन्धनभ्रष्टो गृहकपोतो विडालिकाया आलोके पतितः[५] । पञ्जरबन्धनात् मुक्तः पारावतः मार्जार्याः सम्मुखे आगतः । कथञ्चित् एकस्याः विपत्त्याः विमुक्त अपरस्यां महत्यां विपत्तौ पतितः । अत्र महता प्रयासेन विदुषकेण बन्धनगृहात् मोचिता मालविका साम्प्रतं महाराजं रममाणा मालविका इरावत्या गृहीता वर्तते । इति वक्तव्यं विदुषकः भङ्ग्यन्तरेण प्रस्तौति ।

## १२. अहं चण्डप्रवातलण्डित इव वरण्डः पर्वतात् दूरमारोप्य पातितोऽस्मि-

अहं चण्डप्रवातलण्डित इव वरण्डः पर्वतात् दूरमारोप्य पातितोऽस्मि[६] । तीव्रवायुना उत्क्षिप्तः वरण्ड=तृणसमूह इव पर्वतात् उच्चस्थानं नीत्वा पातितः अस्मि । उत्कटाभिलाषायाः भङ्गः जातः । अत्र सूत्रधारः नटीं पृच्छति अस्माकं गृहे प्रातराशः अस्ति किम् ? नटी कथयति - घृतं गुडः दधि तण्डुलाः च इति सर्वमस्ति । एतत् श्रुत्वा सूत्रधारः महान् सन्तुष्टः

[१]पादुकापट्टाभिषेकम्, १ अङ्कः
[२]कुन्दमाला, १ अङ्कः
[३]कुन्दमाला, ६ अङ्कः
[४]मालवीकाग्निमित्रम्, १ अङ्कः
[५]मालवीकाग्निमित्रम्, ४ अङ्कः
[६]चारुदत्तम्, १ अङ्कः

ISSN : 2249-538X

भवति । तस्य मनसि भोक्तुं महती अभिलाषा जायते किन्तु तस्मिन् काले एव नटी पुनः भणति तत्सर्वम् आपणे अस्ति इति । तदा भग्नाशः कुपितः तद्वचनं ब्रवीति । अस्य तात्पर्यम् इदं वर्तते- यथा पर्वतस्य जानुप्रदेशात् कश्चन पातयति चेत् तावती वेदना न भवति यावती पर्वतस्य शिखरात् पातनेन जायते ततः कदाचित् मरणमेव स्यात् । तथैव अत्रापि यदि साक्षात् गृहे भोजनं नास्ति इति कथनेन तावत् दुःखं न भवति यावत् सर्वमस्ति किन्तु आपणे इति भग्यन्तरेण कथनात् ।

## उपसंहारः (Conclusion)

इत्थं लौकिकन्यायाः न केवलं शास्त्रीयविचारे अपि तु लोकव्यवहारे अपि अत्यन्तं महत्वपूर्णं स्थानं भजन्ते । ते सूक्ष्मदर्शिनः ऋषयः कवयः वा, जीवनस्य गूढतत्त्वान् अल्पशब्दैः सारगर्भितया प्रकाशयन्ति । विविधरूपकेषु लौकिकन्यायानां प्रयोगः परस्परं संवादेषु पात्रचरित्रेषु अर्थगौरवं, भावगाम्भीर्यं च संवर्धयति ।

एते न्यायाः तत्त्वबोधकाः, युक्तिवर्धकाः च सन्ति । अतः, संस्कृतरूपकेषु लौकिकन्यायानाम् यथोचितः प्रयोगः साहित्यस्य सौन्दर्यं, कथावस्तुनः विशेषतां च साधयति ।

## सन्दर्भग्रन्थसूची


१. प्रतिज्ञायौगन्धरायणम् — विशाखदत्तकृतिः । सम्पादकः - रामकृष्णकवीन्द्रः । प्रकाशकः - चौखम्बा संस्कृत सीरीज कार्यालयम्, वाराणसी । २००७ ।

२. वृद्धशालभञ्जिका — अनिर्दिष्टकारकृता । (१ अङ्कः) सम्पादकः - के. आर. श्रीकृष्ण शास्त्री । प्रकाशकः - आदर्शसंस्कृतग्रन्थमाला, मद्रास । १९५८ ।

३. वृद्धशालभञ्जिका — (३ अङ्कः) सम्पादकः - डॉ. रामकुमार राय । प्रकाशकः - विश्वभारती विद्यापीठः, नागपुरम् । १९९५ ।

४. वेणीसंहारः — भट्टनारायणकृतिः । सम्पादकः - माणिकचन्द्रजैनः । प्रकाशकः - चौखम्बा विद्याभवनम्, वाराणसी ।

५. पादुकापट्टाभिषेकम् — बोधायनकृतिः । सम्पादकः - विद्यानिवास मिश्रः । प्रकाशकः - साहित्य अकादेमी, नवी दिल्ली ।

६. कुन्दमाला — श्रीहर्षकृतिः । (१ अङ्कः) सम्पादकः - पं. गङ्गासहाय शर्मा । प्रकाशकः - चौखम्बा विद्याभवनम्, वाराणसी ।

७. कुन्दमाला — (६ अङ्कः) सम्पादकः - श्रीरामशर्मा । प्रकाशकः - भारतसंस्कृतसंस्थानम्, दिल्ली । १९९२ ।

८. मालवीकाग्निमित्रम् — कालिदासकृतिः । (१ अङ्कः) सम्पादकः - रामकृष्ण गोपाल भण्डारकरः । प्रकाशकः - चौखम्बा सुरभारती प्रकाशनम्, वाराणसी । २००५ ।

९. चारुदत्तम् — भासकृतिः । (१ अङ्कः) सम्पादकः - श्रीधर पाठकः । प्रकाशकः - मोतीलाल बनारसीदासः, दिल्ली । १९९० ।

# मीमांसाशास्त्रीयः अभिधाविज्ञानविमर्शः

श्री प्रशांत गावकर*
सहायकाचार्यः, बि.एम्.के. आयुर्वेदमहाविद्यालयः
बेलगावि

***लेखसारः*** *– लेखे अस्मिन् शब्दस्य स्वरूपं अर्थविषये तस्य कार्यं विश्लेषयतः भाषाशास्त्रदृष्ट्या शब्दार्थयोः सम्बन्धं स्पष्टं कृतं विस्यते । तदर्थप्रतिपादकत्वं विज्ञाय लोकाः तमर्थं प्रत्याययितुं शब्दान् प्रयुञ्जन्ते । शास्त्रकाराणां दृष्टिकोणानुसारं शब्दार्थयोः द्विनिष्ठं सम्बन्धं निरूपितम्, यः सम्बन्धः शब्दस्य अर्थनिष्ठं च अर्थस्य शब्दनिष्ठं च प्रतिपद्यते । मीमांसकाः शब्दार्थयोः सम्बन्धं नित्यं स्वाभाविकं च मन्वते । शब्देभ्यः अर्थप्रतिपत्तिस्तु सम्बन्धं विना कदापि साध्यं न भवति इति तत्त्वं प्रतिपाद्य, शब्दशक्तिं अभिधाशक्तिं च विस्तरितमत्र । अपि च अभिधाशब्दस्य प्रत्यक्षवाचनसिद्धान्तं व्याख्यायते । अत्र श्रुतेः महत्वं स्पष्टं कृतम् अस्ति । त्रिविधश्रुतिं व्याख्याय, यथा शब्दस्य विवक्षावशेन कर्तृत्वं करणत्वं वा तद्वाचकत्वं दर्शितमस्ति । लेखे शब्दार्थसम्बन्धे विस्तृतं दृष्टिकोणं प्रस्ताव्य, यत्र शब्दाः केवलं भाषायां न, अपि तु धार्मिक-आध्यात्मिकदृष्ट्या अत्यन्तं महत्त्वं वहन्ति इति निरूपितम् ।*

***कूटशब्दाः*** *– अभिधा, श्रुतिः, विधात्री, अभिधात्री, विनियोक्त्री*

सर्वदा शब्दस्य स्वरूपं तावत् अर्थप्रतिपादकस्वभावेन फलवद् भवति । तदर्थप्रतिपादकत्वं विज्ञाय लोकाः तमर्थं प्रत्याययितुं तान् तान् शब्दान् प्रयुञ्जन्ते । तस्मादेव शब्दार्थयोः कश्चन सम्बन्धः अस्त्येवेति विज्ञायते । स च सम्बन्धः शब्दस्यार्थनिष्ठः अर्थस्य शब्दनिष्ठ इति उभयथा कथ्यते शास्त्रकारैः । एवं च एतादृशस्य सम्बन्धस्य द्विनिष्ठस्य विषये विवादाः शास्त्रेषु प्रथितास्तत्र तत्र अवलोक्यन्ते ।

औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः[१] इत्यादिजैमिनिसूत्रानुगुणं शब्दार्थयोः सम्बन्धं नित्यमित्यभ्युपगच्छन्ति मीमांसकाः ।

शब्देभ्यः अर्थप्रतिपत्तिस्तु सम्बन्धं विना शब्दशक्तिं विना वा नैव प्रसिध्यति इति तु सर्वविदितम् । एतादृशी शब्दशक्तिः शब्दस्य अर्थप्रतिपादनपरा सती अभिधा, शक्तिः, मुख्यशक्तिः इत्याद्यनेकैर्नामभिः सङ्कीर्त्यते ।

अभिधा, अभिधानम् इति प्रसिद्धं सत्पदं तत् ‘अभि’ उपसर्गपूर्वकस्य धा-धातोर्ल्युटि प्रत्यये निष्पन्नं कथनापरपर्यायवाचकं भवति । ल्युट्-प्रत्ययस्य भावार्थकत्वात् । करणव्युत्पत्त्या तु शब्दपरः अभिधानशब्दः । अभिधानापरपर्यायमिदं कथनं मीमांसायां श्रवणमात्रादेव अर्थाभिधानसमर्थैः अर्थापत्त्यादिप्रमाणत्रयनिरपेक्षैः शब्दैः श्रुत्याख्यैः परमप्रमाणभूतैः साक्षात् प्रतिपादनमेव । तस्मादेव श्रुतिः परमं प्रमाणं भवति मीमांसाशास्त्रे । युज्यते हि तत् ।

अत्र श्रुतिर्नाम शब्दानां श्रवणं यदुक्तम् भाष्ये - यदर्थस्याभिधानं शब्दस्य श्रवणमात्रादेवावगम्यते स श्रुत्या अवगम्यते । श्रवणं हि श्रुतिः ।[२] इति । भट्टपादास्तु – श्रुतिरेव ह्यत्रैकं प्रमाणम् । सा तु ग्रहणोपायषड्धानुसारेण षोढा अवतिष्ठते । तत्र प्रत्यक्षगृहीतानि यान्यक्षराणि निनियुञ्जते सा श्रोत्रवृत्तित्वात् श्रुतिरित्युच्यते[३] इति । इयं श्रुतिः त्रिविधा -

***सम्पर्कसूत्रम्** – 8880081062, Email – prashantpsjr@gmail.com

[१]जैमिनिसूत्रम् १.१.५

[२]मीमांसाशाबरभाष्यम् ३.३.१४

[३]तन्त्रवार्तिकम् ३.३.१४

विधात्री-अभिधात्री-विनियोक्त्री चेति । तदुक्तं कुमारिलभट्टपादैः-

**अभिधात्री श्रुतिः काचित् विनियोक्त्र्यपरा तथा । विधात्री च तृतीयोक्ता प्रयोगो यन्निबन्धनः ॥**[१] **इति ।**

प्रकृतिप्रत्ययश्रुत्योः स्वस्वार्थाभिधातृश्रुतित्वम् । पदस्य कारकविभक्तीनां च विनियोजकश्रुतित्वम् । लिङ्लोट्लेड्व्यानां तु विधिश्रुतित्वम् । त्रिविधा अपि इयं श्रुतिः मीमांसकानां मते अभिधाविज्ञाने अन्तर्भवति । वेदशब्दानां यथाश्रुतार्थाभिधायित्वात् श्रुतिशब्दोऽपि श्रवणार्थक इति कृत्वा वेदेऽपि श्रुतिशब्दव्यवहारः सङ्गच्छत एव ।

शब्दस्य विवक्षावशेन कर्तृत्वं करणत्वं वा तद्वाचकत्वमिति अभिधानविषयकमिति मतम् । वाचकत्वमेव अभिधायकत्वमिति अर्थाभिधानसामर्थ्यात् मन्त्रेषु शेषभावः स्यात् तस्मात् उत्पत्तिसम्बन्धः अर्थेन नित्यसंयोगात्[२], श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्[३] , भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेत एष ह्यर्थो विधीयते[४], अर्थाद्वा कल्पनैकदेशत्वात्[५] इत्येतेषु सूत्रेषु श्लोकवार्तिके च प्रतिपादितं दृश्यते ।

सर्वत्रैव हि कारणे कार्यानुकूलां सामर्थ्यरूपां शक्तिं पदान्तरात्मिकां मन्यमानाः भट्टपादाः गवादिपदानां न गवाद्यर्थे शक्तिः, अपि तु गवार्थकशाब्दबोधात्मके ज्ञाने, एवं वाचकत्वं च पुनः न तद्विषयकज्ञानानुकूलशक्तिमत्वम् इति मन्वते । तथा सति चक्षुरादेरपि घटाद्यर्थविषयकज्ञानजनकत्वेन घटादेर्वाचकत्वं प्रसज्येत । किन्तु तद्विषयकशाब्दत्वोभयधर्मावच्छिन्नजन्यतानिरूपितजनकतावत्वमेव तद्वाचकत्वम् । तस्मात् ज्ञानमात्रे प्रमेयस्य इव प्रमितिमात्रस्य भानेऽपि गवादिघटादिपदस्य न प्रमितिप्रमातृवाचकतापत्तिः ज्ञानसामान्यसामग्र्या एव प्रमितिप्रमातृभासकतया प्रमितिप्रमातृविषयकत्वस्य गवादिजन्यतावच्छेदककोटौ प्रवेशविरहात् ।

लाक्षणिकं गङ्गादिपदं च न लक्ष्यतीरार्थाशब्दानुभवजनकम् । अपि तु तत् स्मारकमात्रम्, अतः न लाक्षणिके लक्ष्यार्थवाचकत्वापत्तिः । यदुक्तं भट्टपादैः –

**शक्तिः कार्यानुमेयत्वात् यद्गतैवोपयुज्यते । तद्गतैवाभ्युपेतव्या स्वाश्रायान्याश्रयाणि वा ॥**[६] **इति ।**

अपि च भट्टपादमतानुसारं ज्ञानस्य शक्यत्वेऽपि तज्ज्ञानशक्यत्वमेव तद्वाचकत्वम् । तच्च वाचकत्वं तद्विषयशाब्दधीजनकतावच्छेदकधर्मवत्वरूपम् । वस्तुतः घटाद्यर्थविषयकज्ञानस्यैव घटादिपदशक्यत्वेऽपि तज्ज्ञाननिष्ठवाच्यत्वं तज्ज्ञानविषयीभूतेऽर्थे समारोप्य तदर्थे वाच्यत्वव्यवहारः । घटादिपदनिष्ठः शब्दधीजनकतावच्छेदको धर्मश्च वह्न्यादिनिष्ठदाहानुकूला शक्तिरिव शक्त्याख्यः पदार्थान्तरमेव ।

## सहायकग्रन्थसूची -

१. मीमांसाशाबरभाष्यम् – युधिष्ठिरो मीमांसकः – श्रीकामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः – दरभङ्गा- १९८७
२. तन्त्रवार्तिकम् – कुमारिलभट्टः – चौखम्बामुद्रणालयः – वाराणसी - १९०३
३. जैमिनीयन्यायमालाविस्तरः (मीमांसाधिकरणन्यायमाला) – श्रीमाधवाचार्यः – आनन्दाश्रममुद्रणालयः – पुण्यपत्तनम् - १८१४

[१]तन्त्रवार्तिकम् ३.१.१३
[२]जैमिनिसूत्रम् २.३.१
[३]जैमिनिसूत्रम् ३.१.१४
[४]जैमिनिसूत्रम् २.१.१
[५]जैमिनिसूत्रम् १.४.२५
[६]तन्त्रवार्तिकम् २.१.१५

 ISSN : 2249-538X

# ज्योतिश्शास्त्रदृशा वृत्तिचिन्तनम्

डॉ. विवेकशीलपाठकः*
सहायकाचार्यः(अ.), के.सं.वि., रा.गा.परिसरः
शृङ्गेरी

***लेखसारः*** – *अत्र हि फलचिन्तने आजीविकायाः निर्धारणं कथं भवेत् ? आजीविकाचिन्तनं ननु द्रव्यप्राप्त्यर्थम् एव अतः अस्माकं धनं कथम् आयाति ? कियद् आयाति ? कदा आयाति ? इत्येवं पृच्छन्ति खलु सर्वे जनाः ज्योतिर्विदम् । किमर्थम् एते अर्थविषये एव पौनःपुन्येन पृच्छन्ति इति चेत्* ***अर्थस्य पुरुषः दासः किल*** *। तदपि लोकावलोकनेन सर्वत्र अनुभूयते यत्* ***काञ्चनेनैव कार्यसिद्धिः*** *नान्यथा इति । अत एव उक्तम् –*

**ज्ञानवृद्धाः वयोवृद्धा शीलवृद्धाश्च ये जनाः । ते सर्वे धनवृद्धस्य द्वारे तिष्ठन्ति किंकराः ॥** इति ।

***सर्वे गुणाः काञ्चनमाश्रयन्ति*** *इत्यादिभिः सूक्तिसुधाभिः अर्थस्य प्राधान्यम् एव खलु जेगीयते ।* ***सुखस्य मूलं धर्मः, धर्मस्य मूलमर्थः*** *इति चाणक्यनीतिसूत्रोक्तप्रकारेण धर्मकामादयः पुरुषार्थाः अर्थं विना न सिद्ध्यन्ति एव । अत एव किल अर्थस्य प्राधान्यम् । अतः अर्थस्य प्राधान्यात् मानवेन जीवनयापनाय अर्थं तु प्राप्तव्यमेव येन केनापि कर्मणा । तदर्थमेव नः साहाय्यम् आचरति ज्योतिश्शास्त्रम् । पुनश्च कस्यापि जातकस्य आजीविकायाः निर्धारणार्थं आधुनिकयुगे ज्योतिश्शास्त्रस्य परमावश्यकता दैवज्ञैः सामान्यजनैश्च स्वीक्रियते । यतो हि कस्यापि मनुष्यस्य जातकस्य वा वृत्तेः निर्धारणं यदि प्रागेव सञ्जायेत तदा सः जातकः तस्मिन् क्षेत्रे, कार्ये, व्यापारे, उद्योगे वा कायेन, वचसा, कर्मणा च दत्तचित्तं भूत्वा सम्यग्रूपेण कार्यं कृत्वा अल्पे काले एव सफलः भवितुमर्हति, तस्मिन् एव क्षेत्रे च स्वकौशलम् अभिवर्धयति प्रकृष्टं च धनार्जनम् अपि कर्तुं समर्थः स्यात् । अतः अर्थाप्तेः मूलं कथं वेदितव्यम् इत्यत्र ज्योतिषशास्त्रोक्तग्रन्थेभ्यः कस्मिन् क्षेत्रे च आजीविका कार्या एतत्सर्वं सुष्ठु निर्दिष्टम् ।*

***कूटशब्दाः*** – *वृत्तिः, आजीविका, आस्पदः, अर्थाप्तिः, भम्, अर्कः*

**वृत्तिनिर्धारणम्** – येन कर्मणा मनुष्यः जीवति तत्कर्म वृत्तिः । यया वृत्त्या कर्मणा वा मनुष्यः जीवनं यापयति । प्राचीनकाले पूर्वमेव वृत्तिनिर्धारणं क्रियते स्म यदा शैशवास्थायाम् अन्नप्राशनकाले उपवेष्टुं योग्यः शिशुः भवति स्म । उक्तं मुहूर्तचिन्तामणौ तत्र जीविकापरीक्षा –

**तस्मिन् काले स्थापयेत्तत्पुरस्ताद् वस्त्रं शस्त्रं पुस्तकं लेखनी च ।**
**स्वर्णं रौप्यं यच्च गृह्णाति बालस्तैराजीवैस्तस्य वृत्तिः प्रदिष्टा ॥**

[१] इत्येकः विचारः । पुनश्च आजीविकाविचारः कुतः कर्तव्यः ? कः भावः तस्य कारकः ? अथ च कः ग्रहः वृत्तिनिर्धारणे महत्त्वपूर्णः इत्येतत् सर्वमपि ज्योतिश्शास्त्राधारेण जन्माङ्गचक्रस्य सम्यक्परिशीलनेन स्पष्टतया बोधयितुं शक्यते । जन्माङ्गचक्रे दशमः भावः कर्मभावः, आस्पदः, राजपदम्, मानम् इत्यादिभिः बहुभिः प्रकारैः शास्त्रेषु वर्णितः वर्तते । कर्म इति पदेन एव एतस्मात् भावात् कर्मविषयकं चिन्तनं करणीयम् इति अवबुध्यते । अर्थात् दशमः भावः आजीविकायाः निर्धारणे प्रमुखः भावः वरीवर्ति । ज्योतिश्शास्त्रे प्रायः आजीविकायाः निर्धारणे समानता दरीदृश्यते । तदुक्तं यथा –

**अर्थाप्तिः पितृपितृपत्निशत्रुमित्रभ्रातृस्त्रीभृतकजनाद्दिवाकराद्यैः । होरेन्द्वोर्दशमगतैर्विकल्पनीयाः ।**[२] इति ।

---

***सम्पर्कसूत्रम्*** - 7018588376, Email- kaushikviveksheel25191@gmail.com

[१]मुहूर्तचिन्तामणिः 5/22
[२]बृहज्जातकम् 10/1

अर्थात् लग्नात् चन्द्राद्वा दशमभावस्थः ग्रहः यः भवेत् सः ग्रहः धनप्रदायकः स्यात् । नाम लग्नात् चन्द्राद्वा दशमभावे यदा सूर्यः भवति तदा पितृसकाशात्, चन्द्रः भवति तदा मातुः सकाशात्, कुजः स्यात्तदा स्वाभाविकशत्रुतः, पितृव्यादिपक्षतः वा, यदि बुधः भवति तर्हि स्वजन-मातुल-बन्धु-बान्धवादिभ्यः, गुरुः भवेच्चेत्तदा भ्रातुः सकाशात्, शुक्रश्चेत्तदा पत्नीतः, यदा शनैश्चरः भवेत्तदा च प्रेष्य-कर्मकरादिभिः धनं प्राप्नुयात् इति । अथवा एते खेचराः आजीविकासहायकाः वाच्याः । पुनश्च यदि लग्नात् चन्द्राद्वा दशमे भावे अधिकग्रहाः भवन्ति तदा कथं धनलाभः भवेत्, अस्याः शङ्कायाः समाधाने बृहज्जातकस्य टीकाकारभट्टोत्पलाचार्याः गर्गवचनानि कथयन्ति यत् –

**उदयाच्छशिनो वापि ये ग्रहा दशमस्थिताः । ते सर्वेऽर्थप्रदा ज्ञेयाः स्वदशासु यथोदिताः ॥**

**लग्नार्करात्रिनाथेभ्यो दशमाधिपतिग्रहः । यस्मिन्नवांशे तत्कालं वर्तते तस्य यः पतिः ॥**

**तद्वृत्त्या प्रवदेद्वित्तं जातस्य बहवो यदा । भवन्ति वित्तदास्तेऽपि स्वदशासु विनिश्चितम् ॥**[१] इति ।

ततश्च यदि लग्नात् चन्द्राद्वा दशमे भावे कोऽपि ग्रहः न स्यात्तदा कथं धनं सः प्राप्नुयात् केन मार्गेण च तस्य आजीविका भविता ? कथं वा तत्र वृत्तिनिर्धारणं कार्यं तदर्थमुच्यते बृहज्जातकस्य कर्माजीवाध्याये प्रथमश्लोकस्य उत्तरार्धे – भेन्द्वर्कास्पदपतिगांशनाथवृत्त्या[२] इति ।

अर्थात् लग्न-चन्द्र-सूर्येषु यः बलवान् भवेत् तस्मात् दशमेशः यस्मिन् नवांशराशौ भवति स एव नवांशराशीशः ग्रहः जीविकायाः आधारो भवति तेन च जातकः धनोपार्जनं कुर्यात् । एवं प्रकारेण लग्न-चन्द्र-सूर्येषु यः सर्वाधिकबलयुक्तः ततः दशमस्थनवांशराश्यधिपतिवशात् आजीविकां विजानीयात् । उदाहरणं यथा – कल्प्यते यदि लग्न-चन्द्र-सूर्येषु लग्नं बलवान् ततः दशमस्थनवांशराश्याधिपतिः सूर्यश्चेत्तदा सूर्याधारेण तस्य वृत्तिः भविष्यति ।

आचार्यमन्त्रेश्वरेणापि तथैवोक्तं वर्तते फलदीपिकायां तद्यथा –

**अर्थाप्तिं कथयेद्विलग्नशशिनोः प्राबल्यतः खेचरैः- कर्मस्थैः पितृमातृशात्रवसुहृद्भ्रात्रादिभिः स्त्रीधनात् ।**

**भृत्याद्वा दिननाथलग्नशशिनां मध्ये बलीयांस्ततः- कर्मेशस्थनवांशराशिपवशाद्वृत्तिः जगुस्तद्विदः ॥**[३] इति ।

**अर्कांशे तृणकनकोर्णभेषजाद्यैः** - अर्थात् दशमेशः यदि सूर्यस्य नवमांशे भवेत्तदा फलपुष्प-स्वर्णवृक्षमन्त्रजपशठ-द्यूत-असत्यभाषण-कम्बल-औषधादिव्यवसायः, नृपपूज्यः, नृपसविधे वा वृत्तिः इत्येताभिः वृत्तिभिः स्वजीवनयापनं कर्तुं शक्नुयात् ।

**चन्द्रांशे कृषिजलजाङ्गनाश्रयाच्च** – दशमेशः चन्द्रस्य नवमांशे यदा स्यात्तदा तु जलोत्पन्नवस्तुभिः यथा – शंख-शृङ्गाटक-मत्स्य-शाकादीनां व्यापारेण, जलेन निर्मितपेयपदार्थैः, कृषिद्वारा, गो-महिषी-मृत्पात्र-कार्पास-वस्त्राणां क्रयविक्रयेण, तीर्थाटनेन, समुद्रलङ्घनं कृत्वा विदेशेषु आयातनिर्याताभ्याम्, कस्यचित् स्त्रियः वा आश्रयेण स्वीयाजीविकां करोति ।

**धात्वग्निप्रहरणसाहसैः कुजांशे** – दशमेशः कुजस्य नवमांशे यदा तदा धातु-लौह-ताम्र-रजत-सुवर्णादीनां कर्मभिः, कलह-युद्ध-तस्कर-भारतीयसेनादिषु, अग्निकर्माणि (पाचकादयः) अन्यान् पीडयित्वा, शस्त्रेण, साहसिककार्यैः, म्लेच्छाश्रयैः, गुह्यविभागे (आई.बी.) कर्म, आरक्षकः इत्यादिभिः दुष्टकार्यादिभिश्च वृत्तिं करोति ।

**सौम्यांशे लिपिगणितादिकाव्यशिल्पैः** – दशमेशः बुधस्य नवमांशे तदा काव्यरचना, कविः, काव्यशास्त्रादिलेखन-

[१]बृहज्जातकम् पृ.सं.261
[२]बृहज्जातकम् 10/1
[३]फलदीपिका 5/1


ISSN : 2249-538X

पठनवृत्त्या, ज्योतिषेण, पाण्डित्येन, नैमित्तिकवेदादिपठनेन, पोरौहित्यादिभिः चाजीविकां करोति ।

**जीवांशे द्विजविबुधकरादिधर्मैः** – दशमेशः गुरोः नवमांशे यदा तदा ब्राह्मणदेवताश्रयैः, अध्यापनेन, परामर्शदाता, पुराण-धर्मग्रन्थ-नीति-मार्ग-उपासना-धर्मोपदेशादिभिश्च धनोपार्जनं कुरुते ।

**काव्यांशे मणिरजतादिगोमहिष्यैः** – दशमेशः शुक्रस्य नवमांशे यदा तदा स्त्रीसम्बद्धकार्याणि श्रृङ्गार-नापित-ब्यूटीपार्लर-स्त्रीवस्त्र-अभिनेत्र्याः श्रृङ्गारः, अभिनयः, दुग्धान्वितपश्वाधारितं कार्यं, मिष्टान्ननिर्माणः, गोमहिष्यादिपशुकार्यं, गीतवाद्यनृत्यकार्याणि, सुगन्धितद्रव्यम् (कॉस्मेटिक, फैशनडिजाइनिंग), आभूषण-सज्जादिः, उत्तमवस्त्राणां व्यवसायः रेशमादीनां, मन्त्रीपदम्, परामर्शदाता, कविकर्मणा वा आजीविकां चालयति ।

**सौरांशे श्रमवधभारनीचशिल्पैः** – दशमेशः शनैश्चरस्य नवमांशे यदा तदा भूमेः अन्तःस्थितानां फलानां साहाय्येन शारीरिकपरिश्रमेण, उद्योगेन-स्वयमथवा अन्यस्य कृते उद्योगावसरः, दुष्टनीचादीनां धनेन, स्थूलान्नेन, भारवाहकरूपेण, नीचकर्मणा, काष्ठस्य क्रय-विक्रयद्वारा, मारण-पीडन-घातक-कर्तनादिभिः कर्मभिः, वा वृत्तिं करोति । एवं प्रकारेण ग्रहाणां नवांशाधिपतिवशेन तेषां प्रभावेन आजीविकायाः फलाफलविचारः क्रियते एवमेव च फलदीपिकादिग्रन्थेषु अपि आजीविकाविचारः कृतः ।[१]

किञ्च जैमिनीयसूत्रे आजीविकायाः निर्धारणविषये आत्मकारकस्य नवांशात् वृत्तेः चिन्तनं कर्तव्यमित्युक्तम् । अत्र च जैमिनिना प्रथमाध्यायस्य द्वितीयपादस्य चतुर्दशसूत्रतः विंशतिसूत्रपर्यन्तं नैकानि वृत्तिपरकसूत्राणि उद्धृतानि वर्तन्ते । तद्यथा –

**तत्र रवौ राजकार्यपरः, पूर्णेन्दुशुक्रयोर्भोगी विद्याजीवी च । धातुवादी कौन्तायुधो वह्निजीवी च भौमे ।**
**वणिजस्तनुवायाः, शिल्पिनो, व्यवहारविदश्च सौम्ये । कर्मज्ञाननिष्ठा वेदविदश्च जीवे ।**
**राजकीयाः कामिनः शतेन्द्रियाय शुक्रे । प्रसिद्धकर्माजीवः शनौ ।**
**धानुष्काश्चौराश्च जाङ्गलिका लोहयन्त्रिणश्च राहौ । गजव्यवहारिणश्चौराश्च केतौ ।**[२] इति ।

एवं प्रायः सर्वत्र ज्योतिषग्रन्थेषु आजीविकाविचारे फलकथने ऐकमत्यं दृश्यते समानता चास्ति किञ्च आजीविकानिर्धारणस्य तत्त्वानि एव भिन्नप्रकारेण प्रदर्शितानि दृश्यन्ते । अत्र तावद् नवांशपेन एव कारकग्रहद्वारा वृत्तिनिर्धारणं प्रतिपादितं वर्तते किन्तु आजीविकाविचारे ग्रहयोगद्वारा अपि जातकस्य वृत्तेः विचारः क्रियते । तदुक्तं वैद्यनाथेन जातकपारिजातग्रन्थे –

**चन्द्रात्कर्मगते रवौ सरुधिरे मत्तः परस्त्रीरतो- ज्योतिर्विच्च सचन्द्रजे जलधनस्त्रीभूषणादिप्रियः ।**
**सिद्धार्थो नृपसंमतश्च सगुरौ शुक्रेण युक्ते नृपः- प्रीतिस्त्रीधनवृद्धिभाक् शनियुते दीनो दरिद्रो भवेत् ॥**
**चन्द्रात्कर्मणि भूसुते बुधयुते शास्त्रोपजीवी भवेत्- सेज्ये नीचजनाधिपः सभृगुजे वैदेशिकः स्याद्वणिक् ।**
**सार्कौ साहसिकोऽसुतश्च शशिनः कर्मस्थिते बोधने- सेज्ये षण्ढतनुश्च दीनवचनः ख्यातो नृपालप्रियः ॥**
**माने चन्द्रमसो बुधे सभृगुजे विद्यावधूवित्तवान्- सार्कौ पुस्तकलेखकश्च विषमाचारप्रवृत्तोऽथवा ।**
**जीवे शुक्रयुते तु विप्रजनपो भूपप्रियः पण्डितः- सार्कौ सर्वजनोपतापचतुरो जातः स्थिरारम्भधीः ॥**
**सुगन्धनीलचूर्णादिचित्रकारो भिषक् वणिक् । कर्मस्थानगते मन्दे सासुरेज्ये निशाकरात् ॥**[३] इति ।

---

[१] बृहज्जातकम् 10/2-3 फलदीपिका 5
[२] जैमिनिसूत्रम् 1.2.14-22
[३] जातकपारिजातः 15/55-58

अत्र चन्द्रात् दशमे भौमादिसहितस्य सूर्यस्य, मंगलस्य, बुधस्य, गुरोः, शुक्रशन्योश्च आधारेण आजीविकाफलानि उक्तानि ।

पुनश्च यदस्माभिः लग्न-चन्द्र-सूर्येषु लग्नं बलिष्ठं प्राप्तं ततः दशमस्थनवांशराश्यधिपतिः सूर्यश्चेत्तदा सूर्याधारेण तस्य वृत्तिः भविष्यति । तेन कारकग्रहेण नाम ततः वृत्तिकारकग्रहस्य या दिगुक्ता तस्यां दिशि स पुमान् स्त्री वा वृत्तिं लभते । तत्रापि सः कारकग्रहः चरराशिस्थश्चेत् दूरप्रदेशे वृत्तिः, स्थिरराशिस्थश्चेत् समीपप्रदेशे एव, द्विस्वभावराशिस्थश्चेत् नातिदूरे नातिसमीपे च वृत्तिं प्राप्यत इति वक्तव्यम् ।

**धनागमज्ञानम् -** एवं चन्द्रलग्नयोः ये दशमस्थाः ग्रहाः, तदभावे च भेन्द्वर्कास्पदपतिगांशनाथाः ते यदि मित्रगृहे तदा मित्रतः, शत्रुक्षेत्रे शत्रुतः, स्वक्षेत्रे स्वतः एव अर्थप्रदाः भवन्ति । पूर्वप्रकारेण चेत् धनदायकः रविः स्वोच्चस्थश्चेत् स्वपरिश्रमेण धनमर्जयति, अपि च बलसहिताः शुभग्रहाः लग्नद्वितीयैकादशेषु स्थिताश्चेत् सः नरः बहुभिः प्रकारैः धनमर्जयति इति वाच्यम् । मिहिराचार्येण यथोक्तम् -

**मित्रारिस्वगृहगतैर्ग्रहैस्ततोऽर्थं तुङ्गस्थे बलिनि च भास्करे स्ववीर्यात् ।**
**आयस्थैरुदयधनाश्रितैश्च सौम्यैः सञ्चिन्त्यं बलसहितैरनेकधा स्वम् ॥**[1]

योगेष्वपि अस्ति दशमभावस्य प्रमुखं स्थानम् । यथा – कश्चन शुभग्रहः लग्नाच्चन्द्राद्वा दशमगतश्चेद् अमलाख्यो योगविशेषः । राजयोगेष्वपि कर्मलग्नयुतपाकदशायाम् इत्यादिना राज्यप्राप्तिकालनिर्णये दशमगृहमपि प्रमुखं साधनम् । महापुरुषादिषु योगान्तरेषु अपि भावस्यास्य अपेक्षा अस्ति एव । तदेवमसौ आजीविकाभावः भावेषु मुख्यतमः । सर्वविधफलचिन्तने नितान्तमुपकारकश्चेति ।

## निष्कर्षः-

मानुषाणां पूर्वजन्मार्जितसदादि-कर्मपरिपाकरूपं शुभाशुभफलमभिव्यञ्जयति होरास्कन्धः । यथोक्तम्– **कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति**[2] इति बृहज्जातकोक्तिः ।

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् । व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ॥**[3]

इत्यादिवचनैः स्कधोऽयम् पूर्वार्जितकर्मणः आधारेण शुभाशुभफलं प्रयच्छति । अत एव आजीविकाविचारेऽपि कदा कुत्र कस्यां च दिशि जातकः कया च वृत्त्या धनार्जनं करिष्यति एतत् सर्वमपि साङ्गोपाङ्गं वर्णयति ज्योतिषशास्त्रम् । पुराकाले धनोपार्जनस्य उपायाः न्यूनाः आसन् किञ्च सम्प्रति आजीविकासाधनस्य नैके विधाः दृग्गोचराः भवन्ति, नैकानि शिक्षासंस्थानानि उद्घाटितानि यैः आजीविकायाम् इतोऽपि व्यापकता वर्धमाना एव अस्ति, येन बहवः वृत्तयः सञ्जाताः किञ्च तथापि वयम् अनुशीलयामश्चेत्तर्हि तस्य मूले तु बृहज्जातकोक्तं सूत्रमेवास्ति । अद्य चिकित्सा-विज्ञानादिषु क्षेत्रेषु या काऽपि वृत्तिः वा भवतु तस्याः निर्धारणं तु पूर्ववर्णितग्रहाधारेणैव किल । यथा – अद्यत्वे अपि चिकित्साविज्ञानक्षेत्रे सूर्यचन्द्रयोः प्रभावः, यन्त्र-शस्त्रादिषु कुजप्रभावः, बुधस्य काव्यरचनादिषु, गुरोः अध्यापन-परामर्शादिषु, शुक्रस्य सज्जा-संगणकसम्बद्धकार्येषु, शनैश्चरस्य च श्रमिकादिकार्येषु च प्रभावः दृश्यते । अतः आधुनिके युगेऽस्मिन् सूर्यात् न केवलं पितुः सकाशादेव धनं प्राप्स्यति अपि तु सूर्येण तत्सम्बद्धाः सर्वेऽपि विषयाः अवलोकनीयाः । तद्यथा – सर्वकारीयपदवी,

[1] बृहज्जातकम् 10/4
[2] बृहज्जातकम् 1/3
[3] लघुजातकम् 1/3

 ISSN : 2249-538X

उच्चाधिकारः, स्वर्णकार्याणि, वित्तकरादीनां नैकविषयाणामपि विचारः कर्तव्यः भवति । एवमेव च अन्येषामपि ग्रहाणां विचारः कर्तुं शक्यते ।

सम्प्रति वैज्ञानिकयुगेऽस्मिन् व्ययस्य प्राचुर्ये च बाल्यकाले वृत्तिनिर्धारणस्य प्रक्रियेयं नूनमेव अत्यन्तम् उपयोगिनी लाभकरी चास्ति । यया च सम्यक्विद्निर्धारणं कृत्वा जातकः स्वविकासाय प्रयतमानः भवितुमर्हति ।

## सन्दर्भग्रन्थसूची -


1. मुहूर्तचिन्तामणिः आचार्य रामदैवज्ञ, विन्ध्येश्वरीप्रसादद्विवेदी चौखम्बा सुरभारती प्रकाशन
2. बृहज्जातकम् आचार्य वराहमिहिर, पं.केदार दत्त जोशी मोतीलाल बनारसीदास
3. फलदीपिका आचार्य मन्त्रेश्वर,डॉ.हरिशंकर पाठक चौखम्बा सुरभारती प्रकाशन
4. जैमिनीयसूत्रम् आचार्य जैमिनि, पं.गणपतिलाल शर्मा हंसा प्रकाशन जयपुर
5. जातकपारिजात आचार्य वैद्यनाथ, कपिलेश्वरशास्त्री चौखम्बा संस्कृत संस्थान
6. लघुजातकम् आचार्य वराहमिहिर, पं.लषणलाल झा चौखम्बा कृष्णदास अकादमी
7. बृहत्पाराशरहोराशास्त्रम् आचार्य पाराशर, पं. पद्मनाभ शर्मा चौखम्बा सुरभारती प्रकाशन
8. सारावली आचार्य कल्याणवर्मा, डॉ. सत्येन्द्र मिश्र चौखम्बा संस्कृत भवन

# ‘पूर्वत्रासिद्धम्’ इति सूत्रस्य अधिकारत्त्वप्रतिपादनपूर्वकं शास्त्रासिद्धत्त्व-कार्यासिद्धत्त्वमतनिरूपणम्

श्री नरसिंहगणेशभट्टः*
सहायकाचार्यः(सं.) गुरुवायूर्-परिसरः
तृश्शूर्

***लेखसारः*** *-लौकिकवैदिकशब्दव्युत्पत्तिप्रतिपादनात् सत्स्वपि अन्येषु व्याकरणेषु पाणिनीयव्यकरणमेव विशिष्टस्थानं भजत इति विदितमेव। तदिदं व्याकरणम् अष्टसु अध्यायेषु विभक्तमस्ति। यद्यपि विविधैः प्रकारैः अष्टाध्याय्याः विभागाः सम्भवन्ति, किन्तु प्रक्रिया निर्वाहाय सपादसप्ताध्यायी, त्रिपादी इत्येवं विभागः समाश्रीयते। तत्र पूर्वत्रासिद्धम् (८.२.१) इतीदम् अष्टमाध्यायस्य द्वितीयपादस्य आदिमं सूत्रं भवति। सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रम् असिद्धं स्यात् इति एतत्सूत्रार्थः। इदं सूत्रं पाणिनीयशब्दानुशासने अतीव महत्त्वपूर्णं सूत्रं भवति। अदः सूत्रमेव पाणिनीयसूत्राणां पौर्वापर्यस्य महत्त्वं ख्यापयति। सोऽयं विषयः अत्र प्रबन्धे स्पषटी कृतो वर्तते। किञ्च प्रकृतसूत्रस्य अधिकारत्वविमर्शनम्, अधिकारलक्षणम् इत्याद्युद्देश्यानां निरूपणपुरस्सरं लक्षणमिदं शास्त्रासिद्धत्वे अन्तर्भवति आहोस्वित् कार्यासिद्धत्वे इति विषयस्य सहेतुकं सोदाहरणञ्च निरूपणं लेखेऽस्मिन् अवर्ति।*

***कूटशब्दाः*** *-पूर्वत्र, असिद्धम्, अधिकारः, शास्त्रासिद्धत्त्वम्, कार्यासिद्धत्त्वम्, गोधुङ्मान्, मनोरथः।*

## भूमिका

व्याकरणशब्दस्य व्युत्पत्तिः ‘वि,आङ्’ इत्युपसर्गाभ्यां ‘कृ’ धातोः ”करणाधिकरणयोश्च” (3/3/117) इति सूत्रेण ‘ल्युट्-प्रत्यये, ‘व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः साधुशब्दाः अनेन’ इति व्याकरणम्। महाभाष्ये भगवता फणिनोक्तं ‘ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोध्येयो ज्ञेयश्चेति’। तथा च व्याकरणज्यौतिषनिरुक्तछन्दः शिक्षाकल्पेषु षड्सु वेदाङ्गेषु व्याकरणस्य प्राधान्यं भणितम्। प्रधाने च कृतो यत्नः फलवान् भवति। निखिलजगति वर्णात्मकं यज्ज्योतिः विद्योतते तस्य प्रकाशकं शब्दशास्त्रमेव इदं व्याकरणशास्त्रं समाजस्य महदुपकाराय भगवतापाणिनिना महता प्रयत्नेन प्रणीतम्। शब्दशास्त्रमिदम् अष्टाध्यायी नाम्ना ज्ञायते, अष्टाध्यायाः पूरकत्वेन भगवता कात्यायनेन वार्तिकानि व्यरचयिष्यत। अनयोः सूत्रवार्तिकयोः व्याख्यारुपेण भगवता पतञ्जलिना महाभाष्यं प्राणायि।

‘पञ्चाङ्गं व्याकरणम्’ सूत्रपाठः, धातुपाठः, गणपाठः, लिङ्गानुशासनम्, शिक्षा चेति पञ्चाङ्गानि पाणिनिना ग्रथितानीति हेतोः पाणिनीयव्याकरणस्य पञ्चाङ्गव्याकरणमिति प्रसिद्धिः। तत्र हि प्रथमं मुख्यञ्चाङ्गमष्टाध्यायीत्यपरनामकः सूत्रपाठः। नाम्नैव ज्ञायते एतस्मिन् ग्रन्थे अष्टौ अध्यायाः वर्तन्ते इति। प्रत्येकमध्यायः चतुर्भिः पादैः विभक्तोऽस्ति। तत्र अष्टमाध्यायस्य द्वितीयपादस्य प्रथमं सूत्रं वरीवर्ति पूर्वत्रासिद्धम्।

## तथ्यसङ्कलनं विश्लेषणञ्च

पूर्वत्रासिद्धम् (८.२.१) इति अष्टमाध्यायस्य द्वितीयपादस्यादिमं सूत्रं भवति। अदः सूत्रमेवाष्टाध्याय्यां प्रत्येकं सूत्राणां पौर्वापर्यस्य महत्त्वं ख्यापयति। पूर्वत्र, असिद्धम् इति पदच्छेदः। पूर्वत्र इति त्रलन्तमव्ययम्[१]। पूर्वस्मिन् इति सत्सप्तम्यन्तात् त्रल्प्रत्ययो बोध्यः। एवञ्च पूर्वस्मिन् सत्यसिद्धं स्यादित्यर्थः सम्पन्नः। पूर्वशब्दार्थसापेक्षत्वात्

---

***सम्पर्कसूत्रम्** - narasimhagbhat@gmail.com, 9480224652, 8217585012

[१]तसिलादिष्वाकृत्वसुचः इति सूत्रेण त्रलन्तस्य अव्ययसंज्ञा।

परमित्युपस्थितं भवति। तेन पूर्वस्मिन् कर्तव्ये परमसिद्धं भवतीत्यर्थो लभ्यते। अष्टमाध्यायस्य द्वितीयपादस्य आदावेव उपदेशात् अत्र पूर्वशब्देन सप्त-अध्यायाः, अष्टमाध्यायस्यैकः पादश्च ग्राह्यः, तावतः भागस्य एतत्सूत्रात् प्रागुपदेशात्। परशब्देन अवशिष्टाः द्वितीयतृतीयतुर्यपादाः ग्राह्याः, तावतः भागस्य एतत्सूत्रात् पश्चादुपदेशात्। सप्तानाम् अध्यायानां समाहारः सप्ताध्यायी पादेन सहिता सपादा, सपादा चासौ सप्ताध्यायी च सपादससाध्यायी। त्रयाणां पादानां समाहारः त्रिपादी। एवञ्च सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा इति सूत्रार्थः सम्पन्नः। अधिकारसूत्रमिति हेतोः आपादसमाप्तिपर्यन्तम् अधिक्रियते। अत एवोत्तरत्रानुवृत्तौ प्रत्येकेन सूत्रेणास्य सम्बन्धे त्रिपाद्यामपि पूर्वशास्त्रदृष्ट्या परं शास्त्रमसिद्धं भवतीत्यर्थो लभ्यते।

## सपादसप्ताध्यायीं प्रति त्रिपाद्याः असिद्धत्त्वे उदाहरणम्

मनस् रथः इति स्थिते सस्य 'ससजुषो रुः'[१] इति सूत्रेण रुत्वे कृते, मनर् रथः इति जाते, 'हशि च'[२] (६.१.११४) इति सूत्रेण हशि परे रेफल्य उत्वं प्राप्नोति, रो रि[३] (८.३.१४) इति सूत्रेण रेफे परे रेफल्य लोपः प्राप्नोति। 'हशि च' इत्यस्य सपादसप्ताध्यायीस्थत्वात् 'रो रि' इत्यस्य त्रैपादिकत्वात् पूर्वत्रासिद्धम् इति सूत्रेण उत्वविधायकशास्त्रं प्रति रेफलोप-विधायकशास्त्रस्य असिद्धत्वात् 'रो रि' इति सूत्रं बाधित्वा रेफस्य उत्वे कृते मन उ रथः इति जाते, ततः गुणे च 'मनोरथः' इति रूपं सम्पन्नम्।

## त्रिपाद्यामपि पूर्वं प्रति परमसिद्धम् इत्यत्र उदाहरणम्

किम् उ उक्तम् इत्यत्र 'मय उञो वो वा' (८.३.३३) इति सूत्रेण मयः परस्य उञः वकारादेशे किम् व् उक्तम् इति जाते, मान्तस्य पदस्य अनुस्वारः स्याद्धलि इत्यर्थकेन 'मोऽनुस्वारः'(८.३.२३) इति सूत्रेण हल्परकत्वात् मकारस्य अनुस्वारः प्राप्तः, अनुस्वारे कृते तु अनिष्टं स्यात्। परन्तु त्रिपाद्यामपि पूर्वं प्रति परशास्त्रस्यासिद्धत्वात् 'मोऽनुस्वारः'[४] (८.३.२३) इति सूत्रदृष्ट्या 'मय उञो वो वा' (८.३.३३) इति शास्त्रस्यासिद्धत्वात् तत्र वकारस्य असिद्धत्वात् हल्परकत्वाभावात् मकारस्य अनुस्वारः न भवति। तेन किम् व् उक्तम् इति इष्टं सिद्ध्यति। एतदप्यस्याधिकारत्वे फलम्।

## अस्याधिकारत्वव्यवस्थापनम्

## अधिकारलक्षणम्

किं नाम अधिकारसूत्रम्? स्वस्थले लक्ष्यसंस्कारकवाक्यार्थबोधाजनकत्वे सति स्वोत्तरवर्तिविधिशास्त्रैः सह एकवाक्यता-पन्नत्वमधिकारत्त्वम्[५] इत्यधिकारस्य लक्षणम्। यत्र सूत्रमुपदिष्टं तत्र विद्यमानं सत् लक्ष्यसंस्कारकवाक्यार्थबोधाजनकं सत् स्वस्मात् उत्तरत्र विद्यमानैः विधिसूत्रैः सह सम्बद्ध्य एकार्थबोधकं सूत्रम् अधिकारसूत्रमिति कथ्यते। स्वस्थले लक्ष्य-संस्कारकवाक्यार्थबोधाजनकत्वम् इति प्रथमदलाभावे स्वोत्तरवर्तिविधिसूत्रैः सह एकवाक्यतापनत्वम् इत्येतावन्मात्रोक्तौ

[१]पदान्तस्य सस्य सजुष्शब्दस्य च रुः स्यात्।
[२]अप्लुतादतः परस्य रोः उः स्याद्धशि।
[३]रेफस्य रेफे परे लोपः स्यात्।
[४]मान्तस्य पदस्य अनुस्वारः स्वाद्धलि।
[५]सिद्धान्तकौमुदाव्याख्यायां बालमनोरमायां पूर्वत्रासिद्धम् सूत्रे दृश्यमानं लक्षणम्।

विधिसूत्रेषु अतिव्याप्तिः । उदाहरणार्थम् 'अतो दीर्घो यञि'[१] इति सूत्रं 'सुपि च'[२] इति विधिसूत्रेण सह सम्बद्ध्य एकार्थं बोधयति । अतः अतो दीर्घो यञीत्येतादृशेषु विधिसूत्रेष्वतिव्याप्तिः । स्वोत्तरवर्तिविधिसूत्रैः सह एकवाक्यतापन्नत्वम् इति द्वितीयदलाभावे स्वस्थले लक्ष्यसंस्कारकवाक्यार्थबोधाजनकत्वम् इत्येतावन्मात्रं पर्यवस्यति, तथा सति संज्ञासूत्रेष्वतिव्याप्तिः । यतः वृद्धिरादैच् इत्यादीनां संज्ञासूत्राणां स्वस्थले लक्ष्यसंस्कारकवाक्यार्थबोधाजनकत्वात् अतिव्याप्तिः । तथा च स्वस्थले लक्ष्यसंस्कारकवाक्यार्थबोधाजनकत्वे सति स्वोत्तरवर्तिविधिसूत्रैः सह एकवाक्यतापन्नत्वमधिकारत्वम् इत्येव वक्तव्यम् । पूर्वत्रासिद्धम् इति सूत्रे चास्य लक्षणस्य समन्वयः । स्वस्थले लक्ष्यसंस्कारकवाक्यार्थबोधाजनकत्वं न वर्तते तस्य । स्वोत्तरविधिसूत्रैः सह सम्बद्ध्य पूर्वं प्रति परं शास्त्रम् असिद्धं स्यात् इत्यर्थबोधनेन लक्ष्यसंस्कारकत्वं च वर्तते तस्य ।

## अस्याधिकारत्वानङ्गीकारे प्रसक्तदोषः

अस्य अधिकारत्वानङ्गीकारे 'गोधुङ्मान्' इति रूपं न स्यात् । गां दोग्धीति गोधुक् । गोधुक् अस्य अस्तीत्यर्थे गोधुक्-शब्दात् मतुप्प्रत्यये कृते 'गोधुङ्मान्' इति रूपेण भाव्यम् । गोदुह् मत् इत्यवस्थायां 'दादेर्धातोर्घः'[३] (८.२.३२) इति सूत्रेण घत्वम् एवं 'झलां जशोऽन्ते'[४] (८.२.३९) इति सूत्रेण जश्त्वं च प्राप्तम्, अपादत्वात् आदौ घत्वे 'गोदुघ् मत्' इति जाते, 'झलां जशोऽन्ते' (८.२.३९) 'एकाचो बशो भष् झषन्तस्य स्ध्वोः'[५] (८.२.३७) इति सूत्राभ्यां क्रमात् जश्त्वभष्भावयोः प्राप्तयोः परत्वात् अन्तरङ्गत्वाच्च आदौ जश्त्वे 'गोदुग् मत्' इति जाते ततः पश्चात् 'यरोऽनुनासिके अनुनासिको वा'[६] (८.४.४५) इति सूत्रेण अनुनासिकादेशे गोदुङ्मान् इति रूपं स्यात् । 'गोदुग् मत्' इत्यवस्थायां झषन्तत्वाभावात् बशः दकारस्य भष्भावाभावेन गोधुङ्मान् इति रूपं न स्यात् ।

## अस्य अधिकारत्वाङ्गीकारे तद्दोषपरिहारः

'पूर्वत्रासिद्धम्' इत्यस्य अधिकारत्वे तु त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रम् असिद्धम् इत्यर्थः लभ्यते । तेन 'गोदुह् मत्' इत्यवस्थायां घत्वजश्त्वयोः प्राप्तयोः अपादत्वात् आदौ घत्वे गोदुघ् मत् इति जाते जश्त्वभष्भावयोः प्राप्तयोः, त्रिपाद्यामपि पूर्वं प्रति परस्यासिद्धत्वात् भष्भावस्य पूर्वत्वात् तद्दृष्ट्या जश्त्वस्यासिद्धत्वात् जश्त्वस्य बाधात् झषन्तत्वानपायात् आदौ भष्भावः सूपपन्नः । ततः परं जश्त्वानुनासिकयोः कृतयोः गोधुङ्मान् इति रूपसिद्धौ न काचित् क्षतिः ।

## शास्त्रासिद्धत्वव्यवस्थापनम्

अत्र अपरोऽपि विचारः प्रस्तूयते । पूर्वं प्रति परमसिद्धम् इत्यस्य सूत्रस्यार्थः उच्यते । किं पूर्वशास्त्रं प्रति परशास्त्रम् असिद्धम्? उत पूर्वकार्यं प्रति परकार्यमसिद्धम्? इति प्रश्नः ।

---

[१]अदन्तस्याङ्गस्य दीर्घः स्याद्यञादौ सार्वधातुके परे ।
[२]यञादि सुपि परे अतोऽङ्गस्य दीर्घः स्यात् ।
[३]उपदेशे दादेर्धातोः हस्य घः स्यात् झलि पदान्ते च ।
[४]पदान्ते झलां जशः स्युः ।
[५]धातोरवयवो य एकाज् झषन्तः तदवयवस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे पदान्ते च ।
[६]यरः पदान्तस्य अनुनासिके परेऽनुनासिको वा स्यात् ।


ISSN : 2249-538X

## कार्यासिद्धत्वपक्षे प्रसक्तदोषः

## कार्यासिद्धत्वपक्षे प्रथमदोषाभिधानम्

कार्यासिद्धत्वपक्षे पूर्वकार्यं प्रति परकार्यमसिद्धम् इति वक्तव्यं, पूर्वकार्यं प्रति परकार्यस्य असिद्धत्वे वक्तव्ये आदौ लक्ष्ये परकार्यस्य प्रवृत्तिः वक्तव्या। एवं सति मनोरथः इति रूपं न स्यात्। यतः मनस् रथः इति स्थिते सस्य ससजुषो रुः इति सूत्रेण रुत्वे कृते, मनर् रथः इति जाते 'हशि च' (६.१.११४) इति सूत्रेण हशि परे रेफस्य उत्वं प्राप्नोति, 'रो रि' (८.३.१४) इति सूत्रेण रेफे परे रेफस्य लोपः प्राप्नोति। उत्वकार्यं प्रति रेफलोपस्य असिद्धत्वं वक्तव्यं चेत् आदौ रेफलोपस्य प्रवृत्तिर्वक्तव्या। एवं चादौ रेफलोपे कृते मन रथ इति जाते रेफलोपस्यासिद्धत्वेऽपि "देवदत्तस्य हन्तरि हते सति न देवदत्तस्य उन्मज्जनम्" इति न्यायेन रेफलोपेन अपहृतस्य रेफस्य पुनः तत्रादर्शनात् न तत्र उत्त्वस्य प्रसक्तिः। तथा च मनोरथः इति रूपं न सिध्येत्। किञ्च "पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य" इति सिद्धान्तस्य भङ्गः स्यात्।

## कार्यासिद्धत्वपक्षे द्वितीयदोषाभिधानम्

कार्यासिद्धत्वपक्षे द्वितीयः दोषः प्रदर्श्यते। अस्ति किञ्चिदस्वारस्यमत्र प्रथमदोषे। तच्च "अभावाभावः प्रतियोगिस्वरूपः" इत्यतः रेफलोपे तस्य असिद्धत्वाश्रयणे अर्थात् रेफाभावाभावः रेफस्वरूपं भवतीति कारणात् तत्र रेफस्य उपस्थित्या तत्र उत्वप्रसक्तेः न किञ्चिद् बाधकं दृश्यते, अतः तत्र उत्वे कृते मनोरथः इति रूपसिद्धिः भवति। अतः कार्यासिद्धत्वपक्षाश्रयणे मनोरथः इत्यत्र न दोषः स्यात् इत्यापत्तौ द्वितीयः दोषः आरभ्यते। स च दोषः अमू, अमी इति रूपं न स्यात् इति। अदस्शब्दात् औप्रत्यये कृते अदस् औ इति स्थिते, त्यदाद्यत्वे, पररूपे, अद औ इति जाते, वृद्धौ अदौ इति जाते, 'अदसोऽसेर्दादु दो मः' इति सूत्रेण मुत्वे अमू इति रूपं सम्पन्नम्। एवम् अदस् शब्दात् जसि, त्यदाद्यत्वे, पररूपे, जसः शीभावे, अद ई इति जाते, गुणे अदे इति जाते, 'एत ईद् बहुवचने' इति सूत्रेण मीत्वे अमी इति रूपं सिध्यति। अत्र पूर्वोक्तोदाहरणद्वयेऽपि, त्यदाद्यत्वोत्तरम् अद अ औ, अद अ अस् इति च स्थिते, पररूपं मुत्वमीत्वे च प्राप्ते। मुत्वमीत्वविधायकं शास्त्रं त्रैपादिकम्। पररूपं सपादसप्ताध्यायीस्थम्। पररूपदृष्ट्या मुत्त्वमीत्वयोः असिद्धत्वं वक्तव्यं चेत्, कार्यासिद्धत्त्वपक्षे पूर्वं मुत्वमीत्वयोः प्रवृत्तिः वाच्या। अतः मुत्वमीत्वयोः आदौ प्रवृत्तौ अमु अ औ, अमी अ अस् इति जाते, ततः परं पररूपदृष्ट्या मुत्वमीत्वयोः असिद्धत्वेऽपि "देवदत्तस्य हन्तरि हते सति न देवदत्तस्य उन्मज्जनम्" इति न्यायेन मुत्वमीत्वाभ्यामपहृतस्य दत्वस्य तत्र असत्त्वात्, पररूपाप्रसङ्गः इति अमू, अमी इति रूपं न स्यात्। अतः कार्यासिद्धत्वपक्षे अमू, अमी इति रूपासिद्ध्या पक्षोऽयं त्याज्यः। एतद्दोषपरिहाराय शास्त्रासिद्धत्वपक्ष एव आश्रयणीयः।

## तद्दोषवारणाय शास्त्रासिद्धत्वपक्षाश्रयणम्

पक्षेऽस्मिन् पूर्वशास्त्रं प्रति परशास्त्रमसिद्धं भवतीत्यर्थः वक्तव्यः। एवं सति पक्षेऽस्मिन् परशास्त्रस्य आदौ प्रवृत्तावपि लक्ष्ये शास्त्रकृतसंस्कारः न दृश्यते। तेन पूर्वशास्त्रदृष्ट्या परशास्त्रासिद्धत्वेऽपि, त्यदाद्यत्वोत्तरम् अद अ औ, अद अ अस् इति च स्थिते, अतो गुणे इति पूर्वशास्त्रम्, 'अदसोऽसेर्दादुदो मः'[१], 'एत ईद् बहुवचने'[२] इति परशास्त्रञ्च प्रवृत्तम्। पररूपविधायकशास्त्रदृष्ट्या मुत्वमीत्वविधायकशास्त्रयोः असिद्धत्वेऽपि तत्र अद अ औ, अद अ अस् इत्यवस्थायाः सत्त्वात् पररूपप्रवृत्तौ न किञ्चिद् बाधकम्। एवम् आदौ पररूपे कृते अद औ, अद अस् इति जाते, वृद्धिशीभावगुणानां प्रवृत्त्युत्तरं

[१]अदसोऽसान्तस्य दात्परस्य उदूतौ स्तः दस्य मश्च।

[२]अदसः दात्परस्य एत ईत् स्यात् दस्य च मः बह्वर्थोक्तौ।

मुत्वमीत्वयोः प्रवृत्तौ अमू, अमी इति इष्टं रूपं सिद्ध्यति इति शास्त्रासिद्धत्वपक्षेऽस्मिन् न कश्चन दोषः इति अयं पक्ष एव आश्रयणीयः ।

## सूत्रारम्भस्यासाधारणं प्रयोजनं निष्कर्षश्च

न मु ने[1] इति हि सूत्रम् । नाभावे कर्तव्ये कृते च मुत्वम् नासिद्धम् इति अस्य सूत्रस्यार्थः । अदस्शब्दात् तृतीयैकवचने त्यदाद्यत्वे पररूपे च कृते अद आ इति स्थिते, नाभावं प्रति मुत्वं निमित्तं भवति इत्यतः आदौ मुत्वस्य प्रवृत्तिः भवति, तदुत्तरं तन्निमित्तकः नाभावः इति स्थितिः । एवं सत्यपि अमु आ इति स्थिते, नाभावविधायकशास्त्रदृष्ट्या मुत्वविधायकशास्त्रस्य त्रैपादिकस्य असिद्धत्वात् घिसंज्ञायाः आभावात् नाभावो न स्यात् इति नाभावे कर्तव्ये मुत्वस्य असिद्धत्वं निषिध्यते अनेन सूत्रेण । एवं मुत्वस्य असिद्धत्वे निषिद्धे घिसंज्ञायाः सत्त्वात् नाभावप्रवृत्तौ न काचित् क्षतिः । ततः परं नाभावे कृते अमु ना इति जाते सुपि च सूत्रदृष्ट्या च मुत्वस्यासिद्धत्वात् अद ना इति दर्शनात् सुपि च इति दीर्घः स्यात् इति नाभावे कृतेऽपि मुत्वस्य असिद्धत्वं निषिध्यते अनेन सूत्रेण । तेन मुत्वस्य तत्र सत्त्वात् अदन्तत्वाभावात् न तत्र दीर्घः । एतदेवास्य सूत्रारम्भस्य प्रयोजनम् ।

## सन्दर्भग्रन्थसूची


१. शर्मणा गिरिधरः शर्मणा परमेश्वरानन्दः.(२००४).वैयाकरणसिद्धान्तकौमुदी प्रथमभागः, भट्टोजिदीक्षितविरचिता, बालमनोरमातत्त्वबोधिनीव्याख्याद्वयोपेता.वाराणसी. मोतीलाल बनारसी दास.

२. दीक्षितः भ.( २००३). प्रौढमनोरमा शब्दरत्न भैरवी भावप्रकाशसरलाव्याख्याभिः संवलिता. वाराणसी.चौखम्भा संस्कृत संस्थान.

३. श्रीपादसत्यानारायण.(२००१). लघुशब्देन्दुशेखरव्याख्या श्रीबालबोधिनीसंवलितः पञ्चसन्ध्यन्तः भागः. तिरुपतिः. राष्ट्रियसंस्कृतविद्यापीठम्.

४. भट्ट नागेशः. (२००१). लघुशब्देन्दुशेखरस्य चन्द्रिकाव्याख्यायुतः, प्रथमभागः. वाराणसी. चौखम्भा संस्कृत-संस्थानम्.

५. जयादित्यवामनः. (१९८५). काशिकावृत्तिः न्यासपदमञ्जरीसहिता.वाराणसी. रत्ना पब्लिकेशनस्.


[1]नाभावे कर्तव्ये कृते च मूभावो नासिद्धः स्यात् ।

 ISSN : 2249-538X

# बृहच्छब्देन्दुशेखरदिशा भूवादिसूत्रस्य पदकृत्यविमर्शः

डॉ. सौमित्र आचार्यः*
सहायकाचार्यः(अ.), कें.सं.वि., गुरुवायूर्-परिसरः
केरलम्

***लेखसारः*** *- पाणिनीयव्याकरणशास्त्रे धातुसंज्ञाविधायकं सूत्रं वर्तते 'भूवादयो धातवः' (१.३.१) इति । समग्रसाधुशब्दाननायासेनानुशासितुं पाणिनिना पूर्णवैज्ञानिकरीत्या व्याकरणस्य निर्माणात् तत्प्रणीतं प्रत्येकमपि सूत्रं विशिष्टं प्रयोजनं बिभर्ति । अतः 'भूवादयो धातवः' इति सूत्रेऽप्युपयुक्तानां तत्तत्पदानां प्रयोजनविषयिणी चर्चा परिलक्ष्यते विविधटीकासु । क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युरित्यर्थके 'भूवादयो धातवः' इति सूत्रे क्रियावाचिनः इति भ्वादयः इति च पदयोः सार्थक्यं कथयति शब्देन्दुशेखरकृन्नागेशः विकल्पार्थकवाशब्दस्य धातुत्वव्यावृत्त्यर्थं क्रियावाचिनः इति, आणवयति, वट्टयतीत्यादौ धातुत्वव्यावृत्त्यर्थञ्च भ्वादयः इति । परन्तु दीक्षितादयो 'याः पश्यति' इत्यादौ धातुत्वव्यावृत्त्यर्थं क्रियावाचिनः इति, हिरुक्, पृथग् इत्याद्यव्ययानां, शिश्ये इति भावार्थतिङन्तस्य च धातुत्वव्यावृत्त्यर्थञ्च भ्वादयः इत्याचक्षते । एवं पदकृत्यविषये मतवैविध्यमवलोक्यते मतिमताम् । तत्र च नागेशभट्टेन बृहच्छब्देन्दुशेखरे यत् पदकृत्यं दर्शितं तदस्मिन्प्रबन्धे प्रस्तुत्य प्रौढमनोरमासिद्धान्तरत्नाकरादिग्रन्थैः तस्य समीक्षात्मकमालोचनं विधायान्ते निष्कर्षः प्रमाणपुरस्सरं प्रस्तूयते ।*

***कूटशब्दाः*** *- भ्वादयः, क्रियावाचिनः, धातुः, वाशब्दः, प्रातिपदिकम् ।*

## उपोद्घातः

पाणिनीयसूत्राणां विशदतया व्याख्यानात्मकेषु ग्रन्थेषु मूर्धन्यतां भजते भट्टोजिदीक्षितनिर्मितवैयाकरणसिद्धान्तकौमुद्याष्टीकाभूतो नागेशभट्टप्रणीतो नव्यव्याकरणस्य शिरोमणिभूतः शब्देन्दुशेखरापरनामधेयो बृहच्छब्देन्दुशेखर इत्याख्यो ग्रन्थः । पाणिनीयाष्टाध्याय्यां प्रथमाध्यायस्य तृतीयपादे धातुसंज्ञाविधायकं प्रथमं सूत्रं 'भूवादयो धातवः' इति । सूत्रमिदं वैयाकरणसिद्धान्तकौमुद्यां संज्ञाप्रकरणे समुपन्यस्तं भट्टोजिदीक्षितेन । सूत्रेऽस्मिन् प्रयुक्तानां पदानां सार्थक्यं दर्शयन्ति नैके ग्रन्थाः । तत्र च बृहच्छब्देन्दुशेखरे नागेशभट्टेन दर्शितस्य पदकृत्यस्य समीक्षात्मकमेकमालोचनमत्र प्रबन्धे क्रियते । सूत्रस्यास्य पदकृत्यविषये प्रौढमनोरमासिद्धान्तरत्नाकरादिग्रन्थैः सह ग्रन्थस्यास्य तुलनात्मकमालोचनं विधायान्ते निष्कर्षः प्रमाणपुरस्सरं प्रस्तूयते ।

## सूत्रार्थः -

भूश्च वाश्चेति द्वन्द्वे भूवौ, आदिश्च आदिश्चेति द्वन्द्वे आदी इति । अत्र प्रथमादिशब्दः प्रभृतिवचनः, द्वितीयादिशब्दः प्रकारवचनः । व्यवस्थाप्रकारवाचिनोः आदिशब्दयोरेकशेषः । भूवौ आदी येषां ते भूवादयः इति बहुव्रीहिः । तेन भूप्रभृतयो वासदृशा ये ते धातवः इत्यर्थो लभ्यते । सादृश्यं च क्रियावाचकत्वेन ग्राह्यम् । अतः सूत्रार्थः कथितः कौमुद्यां "क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः" इति । उदाहरणं यथा भू सत्तायाम्, एध वृद्धौ, वा गतिगन्धनयोः इत्यादीनां प्रकृतसूत्रेण धातुसंज्ञा भवति ।

***सम्पर्कसूत्रम्** - Phone No- 7384682456, Email- soumitrayear@gmail.com,

## क्रियावाचिनः इति पदविमर्शः -

सूत्रेऽस्मिन् क्रियावाचिनः इत्यर्थकरणस्य फलमाह बृहच्छब्देन्दुशेखरे "क्रियावाचिनः किम्? विकल्पार्थकनिपात'वा'-शब्दस्य धातुत्वे, प्रातिपदिकत्वाऽभावात् सुबभावे पदत्वाऽनापत्तेः । ततः 'शकधृष' इत्यादितुमुनापत्तेश्च, वार्थस्य क्रिया-काङ्क्षादर्शनेन तदर्थविकल्पस्य क्रियात्वाभावात् क्रियावाचिनः इत्युक्तौ न दोषः । न च प्रत्यासत्त्या धातुपाठपठिताऽर्थाना-मेव ग्रहणान्न दोषः । तद्रहितधातुपाठस्यैव प्रकृतसूत्रभाष्ये ध्वनितत्वात् । अर्थनिर्देशोऽपि तस्योपलक्षणत्वाच्च । अत एव 'पराभवति', 'केशान् वपति' इत्यादौ धातुत्वम् ।"[1] इति । अस्यायमाशयः सूत्रे आदिरित्यस्य सादृश्यमित्यर्थं कृत्वा, तस्य च क्रियावाचकत्वेन क्रियावाचिनः इत्यर्थकथनं किमर्थमिति जिज्ञासायामुच्यते क्रियावाचिनः इत्यभावे भ्वादिगणपठितश-ब्दस्वरूपं धातुसंज्ञमित्यर्थः स्यात् । तेन च भ्वादिगणपठितत्वमात्रोक्तौ विकल्पार्थकस्य वाशब्दस्यापि वारूपत्वाविशेषात् भ्वादिगणपठितवाधातुरूपतया धातुसंज्ञा प्रसज्येत । वाशब्दस्य धातुसंज्ञायाञ्च धातुभिन्नत्वाभावात् 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रे अधातुरिति पर्युदासेन प्रातिपदिकसंज्ञाया विरहेण प्रातिपदिकत्वाऽभावात् विभक्त्यनुत्पत्तौ 'सुप्तिङ-न्तं पदम्' इत्यनेन पदसंज्ञा न स्यात् । ततः 'शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् इति सूत्रेण तुमुन्प्रत्यया-पत्तिश्च स्यात् । तन्मा भूत्तदर्थं सूत्रे क्रियावाचिनः इत्यर्थकथनम् । क्रियावाचिनः इत्युपादाने तु वार्थस्य क्रियाकाङ्क्षादर्शनेन निपातवाशब्दार्थस्य विकल्पस्य भूतभविष्यत्कालसम्बन्धाभावेन 'क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका' इति हरि-वचनानुसारेण 'भूतभविष्यत्कालावच्छिन्नत्वं क्रियात्वम्' इति क्रियावाचकत्वविरहात् धातुत्वापत्तिरूपदोषो नास्ति ।

ननु क्रियावाचिनः इति पदाभावे प्रत्यासत्त्या वा गतिगन्धनयोः, या प्रापणे इति धातुपाठपठिताऽर्थानामेव ग्रहणान्न दोषः इति चेन्न, अर्थरहितधातुपाठस्यैव प्रकृतसूत्रभाष्ये ध्वनितत्वात् । अर्थनिर्देशोऽपि तस्योपलक्षणत्वाच्च । अत एव 'पराभवति', 'केशान् वपति' इत्यादौ धातुत्वम् ।

## समीक्षणम् -

सूत्रे क्रियावचनाः इत्यर्थकरणात् क्रियावचनानामेव भूवादीनां धातुसंज्ञा विधीयते । तस्मात् या-वा-दिव-इत्येवमादीनां सर्वनाम-विकल्प-स्वर्गाभिधायिनां धातुसमानशब्दानाम् अक्रियावचनानां न धातुसंज्ञा इति न्यासकृज्जिनेन्द्रबुद्धिः ।[2] ।

सिद्धान्तरत्नाकरकारेणोक्तं याः पश्यसि इत्यत्र 'आतो धातोः' इति आकारस्य लोपो मा भूत् । किञ्च वा मा इत्यादीनां निपातानां धातुत्वे सति वाति माति इत्यादिप्रयोगो विकल्पनिषेधयोर्मा भूत् इत्येतदर्थं क्रियावाचिनः इत्यर्थकरणम् ।[3] ।

शब्दकौस्तुभे भट्टोजिना भणितं 'याः पश्य' इत्यादौ धातुत्वं मा भूत्, धातुत्वे सति तत्र 'आतो धातोः' इति आकारलोपः स्यात् । अतस्तद्व्यावृत्त्यर्थं क्रियावाचिनः इति । ननु 'या प्रापणे' इत्याद्यर्थनिर्देशः अत्र नियामकः इति चेन्न, तस्यापाणिनीयत्वात् । भीमसेनादयो ह्यर्थं निर्दिदेशुरिति स्मर्यते । पाणिनिस्तु 'भ्वेध' इत्याद्यपाठीत् इति भाष्यवार्तिकयोः स्पष्टम् । किञ्च अभियुक्तैरपि कृतः अर्थनिर्देशो नार्थान्तरनिवृत्तिपरः सुखमनुभवतीत्यादौ अधातुत्वप्रसङ्गात् । अत एव 'कुर्द खुर्द गुर्द गुद क्रीडायामेव' इत्येवकारः पठ्यते, किञ्च 'श्लिष आलिङ्गने' इत्यादिसूत्राण्यप्यत्र ज्ञापकानि । तस्मात् 'याः पश्य' इत्यादिव्यावृत्त्यर्थं क्रियावाचिनः इति विशेषणं स्थितम् इति ।[4] ।

---

[1]बृहच्छब्देन्दुशेखरः, पुटसंख्या- ७९ ।

[2]काशिका द्वितीयभागः, न्यासः, पुटसंख्या- १

[3]वैयाकरणसिद्धान्तकौमुदी, सिद्धान्तरत्नाकरः, पुटसंख्या- ४८

[4]शब्दकौस्तुभः (द्वितीयभागः), पुटसंख्या- ४९


ISSN : 2249-538X

प्रौढमनोरमाकृताप्यत्रोक्तं भ्वादिगणपठितत्वमात्रोक्तौ याः पश्यति इत्यत्र यच्छब्दात् स्त्रीत्वे टापि सिद्धस्य याशब्दस्यापि या प्रापणे इति भ्वादिगणपठितत्वेन धातुत्वं स्यात् । तन्मा भूत् इत्येतदर्थं क्रियावाचिनः इत्यर्थकरणम् । यतो हि या इत्यस्य धातुत्वे सति 'आतो धातोः' इति सूत्रेण या इत्यस्य आकारस्य लोपापत्तिः स्यात् । तस्मात् क्रियावाचिनः इति पदम् । तेन या इत्यस्य क्रियावाचित्वाभावान्न दोषः ।[१] । एतन्मनोरमाकारमतमेव तत्त्वबोधिन्यामपि प्रोक्तम् ।[२] ।

परन्तु मनोरमामतमिदं लघुशब्दरत्नकृता निराक्रियते । तथाहि क्त्वः, श्वः इत्यादिषु आकारस्य लोपार्थम् 'आतो धातोः' इत्यस्य स्थाने 'आतोऽनापः' इति न्यासो वार्तिककृता कृतः । तेन वार्तिकमते तु आबन्तभिन्नाकारस्य लोपः इत्यर्थकरणात् याः इत्यादौ दोषो नास्तीत्यतः तन्नये विकल्पार्थकनिपातवाशब्दस्य धातुत्वापत्तिः स्यात् । धातुत्वे च प्रातिपदिकत्वाभावात् सुबभावे पदत्वानापत्तिरूपदोषः आपद्येत इति शब्दरत्नकारेण दर्शितम् ।[३] । एतेन मनोरमाकृद्वचनं न साधु । मनोरमामतस्य प्रत्याख्यानात् तदनुयायिनस्तत्त्वबोधिनीकृतो मतमपि प्रत्याख्यातं भवति । किञ्च याः पश्य इत्यादिव्यावृत्तये क्रियावाचिनः इति विशेषणमिति शब्दकौस्तुभमतमपि परास्तम् । अपि च एतेनैव सिद्धान्तरत्नाकरकारोक्तं याः पश्यसीति आलोपनिवृत्तिरूपं प्रथमप्रयोजनं परास्तमिति । तस्मादेवाह लघुशब्देन्दुशेखरस्य चिदस्थिमालाटीकायाम् "'आतोऽनाप' इत्युक्ते 'याः पश्यसी'त्यादावदोषान्मनोरमारत्नाकरदण्ड्यादिग्रन्थानामसाङ्गत्यम्"[४] इति । लक्ष्मीटीकायामप्यावादीत् "'आतो धातोः' इति लोपश्च 'आतोऽनापः' इति न्यासेन परिहृतः"[५] इति । पुनः वाति माति इत्यादिप्रयोगापत्तिरिति सिद्धान्तरत्नाकरकारोक्तं द्वितीयप्रयोजनमपि न साधु, यतो हि विकल्पनिषेधार्थयोः कालेन सह असम्बन्धात् लडादीनामप्राप्तिः । तथा चाचष्ट चिदस्थिमालायां "यत्तु वातीत्यादिप्रयोगापत्तिरिति रत्नाकरस्तन्न, तदर्थस्य कालासम्बन्धेन लडाद्यप्राप्तेः"[६] इति । अत एव बृहच्छब्देन्दुशेखरकारमतमेव साधु इति ।

तस्मात् शब्देन्दुशेखरकारमतमेव बालमनोरमाकृदब्रवीत् । तथाहि क्रियावाचिनः इत्यर्थाभावे धातुपाठे या इत्यस्य पाठात् याः पश्यन्ति इत्यत्र टाबन्तस्य यच्छब्दस्यापि धातुत्वं मा भूत्तदर्थं क्रियावाचिनः इति । यतो हि धातुत्वे 'आतो धातोः' इति सूत्रेण या इत्यस्य आकारलोपापत्तिः स्यात् । वस्तुतः प्रत्युदाहरणमिदं न युक्तम् । तथाहि 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति लक्षणप्रतिपदोक्तपरिभाषया टाबन्तस्य यच्छब्दस्येह न ग्रहणप्रसक्तिः । तस्मात् वाशब्दस्य विकल्पार्थस्य निपातस्य धातुत्वनिवृत्त्यर्थं क्रियावाचिनः इति पदम्, धातुपाठे वा इत्यस्य पाठात् । वा गतिगन्धनयोः, या प्रापणे इत्यर्थनिर्देशस्य आधुनिकत्वात् । क्रियावाचिनः इत्युक्तौ तु धातुत्वापत्तिरूपदोषो नास्ति । वार्थस्य विकल्पस्य, वा भविष्यति इति, वा अभवदित्येवं भूतभविष्यत्कालसम्बन्धस्याभावेन क्रियात्वाभावात् इति शब्देन्दुशेखरे स्थितम् इति ।[७] एतेन शब्देन्दुशेखरोक्तं प्रयोजनमेव साधु ।

[१] प्रौढमनोरमा, पुटसंख्या- १२६

[२] वैयाकरणसिद्धान्तकौमुदी, तत्त्वबोधिनी, पुटसंख्या- ३१

[३] "आतोऽनापः" इति वार्तिकमते तु विकल्पार्थकनिपातवाशब्दस्य धातुत्वे प्रातिपदिकत्वाभावात्सुबभावे पदत्वानापत्तिर्दोषः, लघुशब्दरत्नम्, पुटसंख्या-१३०

[४] लघुशब्देन्दुशेखरः, चिदस्थिमाला, पुटसंख्या- १४२

[५] वैयाकरणसिद्धान्तकौमुदी, लक्ष्मीटीका, पुटसंख्या- ६१

[६] लघुशब्देन्दुशेखरः, चिदस्थिमाला, पुटसंख्या- १४२

[७] वैयाकरणसिद्धान्तकौमुदी, बालमनोरमा, पुटसंख्या - ३३

## भ्वादयः इति पदविमर्शः -

सूत्रेऽस्मिन् भ्वादयः इति पदप्रयोजनमब्रूयत बृहच्छब्देन्दुशेखरे "भ्वादयः किम्? आणवयति, वट्टयतीत्यादौ धातुत्वे शास्त्रविषयतया साधुत्वापत्तेः । सूत्रशेषे भाष्ये स्पष्टमेतत् । स्तंभ्वादीनां तु सौत्राणामुदित्करणेन, तत्प्रकृतिकच्ल्यनुवादेनाऽङ्विधानेन च, सार्वधातुके परे विकरणविधानेन च धातुत्वं ज्ञाप्यते । 'जुचङ्क्रम्य' इत्यत्र पठितजोः, 'जपजभ' इत्यत्र पठितपसः, ऋतिप्रभृतीनां च धर्मिग्राहकमानात्, केषाञ्चिद् धात्वधिकारविहितकार्योद्देश्यत्वाद् बोध्यम् । 'चुलुम्प', 'ढुण्ढि', 'विक्लप्' इत्यादीनां 'बहुलमेतन्निदर्शनम्' इत्येनेनेति दिक् ।"[1] इति । अस्यायमाशयः सूत्रे भ्वादयः इति पदं किमर्थमित्यत उच्यते भ्वादयः इत्यभावे आणवयति, वट्टयति इत्यादीनां धातुत्वं प्रसज्येत । आणवयतीति आज्ञापयतीत्यस्य अपभ्रंशभूतम्, वट्टयतीति च वर्तयतीत्यस्य अपभ्रंशभूतम् । एतेषां क्रियावाचित्वेन धातुसंज्ञायां शास्त्रविषयतया साधुत्वापत्तिः स्यात् । परन्तु प्राकृतशब्दानां नास्ति साधुत्वं व्याकरणेनानिष्पन्नत्वात् । तस्मात् तत्र साधुत्वापत्तिरूपदोष आपद्येत । तद्वारणाय भ्वादयः इति पदम् । भ्वादिग्रहणे कृते तु एतेषां भ्वादिगणे पठितत्वाभावात् न धातुसंज्ञा । अत एव च न साधुत्वमिति न दोषः ।

ननु क्रियावाचिनां भ्वादिगणपठितानां धातुत्वाङ्गीकारे तत्रापठितानां स्तम्भ्वादीनां कथं धातुसंज्ञा इत्यत उच्यते स्तम्भ्वादीनां तु सौत्राणाम् उदित्करणेन, तत्प्रकृतिकच्लिप्रत्ययमुद्दिश्य 'जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च' इति सूत्रेण अङ्विधानेन, सार्वधातुके परे 'स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च' इति सूत्रेण श्नुश्नाविकरणयोः विधानेन च धातुत्वं ज्ञाप्यते । 'जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः' इति सूत्रे पठितस्य जोः, 'जपजभदहदशभञ्जपसां च' इति सूत्रे पठितस्य पसः, 'ऋतेरीयङ्' इत्यादौ ऋतिप्रभृतीनाञ्च धर्मिग्राहकमानात्, केषाञ्चित् 'धातोः' इत्यधिकारे विहितकार्योद्देश्यत्वात् धातुत्वं बोध्यम् । 'चुलुम्प', 'ढुण्ढि', 'विक्लप्' इत्यादीनां 'बहुलमेतन्निदर्शनम्' इति गणसूत्रेण संग्रहात् धातुत्वं बोध्यम् इति ।

एतच्च भूवादिसूत्रस्यान्ते भाष्ये स्फुटीकृतम् । तथाहि भाष्ये भ्वादिपाठस्य प्रयोजनरूपं वार्तिकमुक्तं 'भूवादिपाठः प्रातिपदिकाणवयत्यादिनिवृत्त्यर्थः'[2] इति । प्रातिपदिकनिवृत्त्यर्थः आणवयतीत्यादिनिवृत्त्यर्थश्च भूवादिपाठः कर्तव्यः इति अस्यार्थः । तथाहि भोक्तुं पाक इति क्रियाश्रयाणि तुमुनादीनि भावप्रधानानि प्रातिपदिकानि भवन्ति, अपि च हिरुक्, पृथग् इत्यादीनि क्रियाप्रधानानि अव्ययानि भवन्ति । तेषां धातुसंज्ञानिवारणाय भूवादिपाठः कर्तव्यः । किञ्च आणवयति, वट्टति, वड्डयतीत्यादीनि वर्तन्ते तेषां धातुसंज्ञानिवृत्त्यर्थं भूवादिपाठः कर्तव्यः इति । वस्तुतः वार्तिके प्रातिपदिकग्रहणं न कर्तव्यमिति प्रतिपाद्य उद्योते नागेशेनोदितं 'वार्तिके प्रातिपदिकग्रहणं तु प्रौढ्यैव । अत एव तदुदाहरणानुक्तिर्भाष्ये ।'[3] इति । एतेन आणवयति, वट्टयति इत्यादौ धातुसंज्ञानिवृत्त्यर्थं भ्वादिपाठः कर्तव्यः इति सिद्धान्तः ।

## समीक्षणम् -

सूत्रेऽस्मिन् भ्वादिप्रयोजनं न्यासे निगदितं क्रियावचनाः शब्दा भूवादयो धातुसंज्ञा भवन्तीत्युक्तम् । अतो गणपाठसामर्थ्यात् पाठोऽपि अङ्गीक्रियते । तस्मात् आणपयतीत्येवमादीनां क्रियावचनानामपि धातुसंज्ञा न भवतीति ।[4] ।

---

[1]बृहच्छब्देन्दुशेखरः, पुटसंख्या- ८०

[2]व्याकरणमहाभाष्यम् , द्वितीयखण्डम्, पुटसंख्या- १२ ।

[3]व्याकरणमहाभाष्यम्, द्वितीयखण्डम्, उद्योतः, पुटसंख्या- १२५

[4]गणपाठसामर्थ्यात् पाठोऽपि अङ्गीक्रियते । तेनाणपयतीत्येवमादीनां क्रियावचनानामपि धातुसंज्ञा न भवतीत्युक्तं भवति । न्यासः, पुटसंख्या - ४

प्रौढमनोरमायां हिरुक्, पृथग् इत्याद्यव्ययानां, शिश्ये इति भावार्थतिङन्तस्य च धातुसंज्ञा मा भूत् इत्येतदर्थं भ्वादय इति पदमिति भ्वादिपदप्रयोजनं वर्तते ।[१] एतदेव तत्त्वबोधिन्यामप्युक्तम् ।[२] । शब्दकौस्तुभेऽपि प्रोक्तं "गणपठिता इति किम्? हिरुक्, पृथक्, ऋते इत्याद्यव्ययानां 'शिश्ये' इति भावार्थतिङन्तस्य च मा भूत्"[३] इति । अपि चैतद्बालमनोरमायामप्यब्रूयत वर्जनक्रियावाचिनो हिरुक् इत्यस्य धातुत्वं मा भूत् इत्येतदर्थं भ्वादयः इति ग्रहणम् ।[४] ।

परन्तु शब्दरत्नकारेण मनोरमाकारमतमिदमुपस्थाप्य तन्निराकरणपूर्वकं स्वमतमन्ते प्रदर्शितम् । तथाहि हिरुगित्यादीनां क्रियासमानाधिकरणत्वात् लिङ्गाद्यनन्वयित्वाच्च एतद्योत्यस्य वर्जनाद्यर्थस्य क्रियात्वमस्तीति मनोरमाकृदभिमानः । सूत्रे भ्वादयः इत्यभावे एतेषां धातुत्वापत्तिः । वस्तुतः हिरुक् इत्येतेषां क्रियाकाङ्क्षादर्शनेन क्रियावाचकत्वं नास्ति । अतः हिरुक् इत्यादीनां क्रियावाचित्वाभावात् भ्वादय इति पदाभावेऽपि न दोषः । पुनः शिश्ये इति यत्प्रत्युदाहृतम्, तदपि निराक्रियते । तथाहि शिश्ये इत्यत्र कालोऽपि धात्वर्थ एवेति कारणात् क्रियावाचकत्वं वर्तते । तस्य च क्रियावाचित्वात् धातुत्वे 'आदेच उपदेशेऽशिति' इति सूत्रेण एकारस्य आत्वं स्यात् । तद्धि आत्वम् 'आदेच उपदेशेऽशिति' इत्यत्र अशितीति प्रसज्यप्रतिषेधात् अनैमित्तिकं, 'लिटि धातोरनभ्यासस्य' इत्यतो धातोरित्यस्यानुवर्तनात् धातुत्वनिमित्तकञ्चास्ति । एतेन धातुत्वे आत्वं प्रसज्येत तन्निवृत्त्यर्थं भ्वादयः इति यत् उच्यते, तदपि न । कारणं हि षष्ठे अध्याये 'आदेच उपदेशेऽशिति' इत्यत्र धातुग्रहणासम्बन्धो भाष्ये भाषितः इति आत्वं धातुत्वनिमित्तकं नास्ति । किञ्च अशीति प्रसज्यप्रतिषेधेऽपि शित्परत्वयोग्यस्यैवात्वं विधीयते, तेन शिश्ये इत्यत्र आत्वस्य प्रसक्तिर्नास्ति । अपि च 'वा'सादृश्यम् अन्यानभिहितक्रियावाचकत्वेनेति स्वीक्रियते, तेन शिश्ये इत्यत्र न धातुत्वापत्तिरूपदोषः । यतोहि शिश्ये इत्यत्र अन्याभिहितक्रियावाचकत्वं वर्तते । तस्मात् अन्यानभिहितक्रियावाचकत्वाभावात् शिश्ये इत्यत्र धातुत्वस्य प्राप्तिर्नास्ति । तस्मात् तत्र दोषवारणाय भ्वादयः इति पाठोऽयुक्तः । अतः 'भूवादयो धातवः' इति सूत्रस्य भाष्ये भ्वादय इति पदाभावे आणवयति, वट्टयति इत्यादिषु च धातुत्वे शास्त्रविषयतया साधुत्वापत्तिः स्यात् । तद्व्यावृत्तये भ्वादय इत्युक्तम् इति ।[५] एतेनैव तत्त्वबोधिनीकारादीनां मतमपि प्रत्याख्यातं भवति ।

किञ्चोच्यतेऽपि नागेशेनोदितं "हिरुगिति । क्रियान्तराकाङ्क्षादर्शनेनैषां क्रियावाचित्वं चिन्त्यम् । अत एव तद्धितश्चासर्वविभक्तिरिति सूत्रे क्रियामात्रविशेषणत्वात् क्रियाप्रधानत्वमेषां स्वयमुक्तम् । शिश्ये इत्यादिव्यावृत्तिस्त्वन्यानभिहितक्रियावाचकत्वेन सादृश्यग्रहणाद्बोध्या । वस्तुत एषां धातुत्वे फलाभावः । न च प्रातिपदिकत्वाभावः फलम् । कृदन्तत्वेन तदभावस्य वक्तुमशक्यत्वात् । उभयोः सत्त्वेऽपि लिडित्यादाविव परत्वात्सुपामेवोत्पत्तिसिद्धेः । वार्तिके प्रातिपदिकग्रहणं तु प्रौढ्यैव । अत एव तदुदाहरणानुक्तिर्भाष्ये ।"[६] इति ।

एतेन शब्देन्दुशेखरोक्तमतमेव समीचीनमिति । तेन आणवयति, वट्टयतीत्यादौ धातुत्वे शास्त्रविषयतया साधुत्वापत्तिरूपदोषनिवृत्त्यर्थं भ्वादयः इति पदमुपात्तमिति ।

[१]प्रौढमनोरमा, पुटसंख्या- १३१

[२]वैयाकरणसिद्धान्तकौमुदी, तत्त्वबोधिनी, पुटसंख्या- ३१

[३]शब्दकौस्तुभः, द्वितीयभागः, पुटसंख्या- ५०

[४]वैयाकरणसिद्धान्तकौमुदी, बालमनोरमा, पुटसंख्या- ३३

[५]सूत्रशेषभाष्योक्तेष्वणावयति, वट्टयतीत्यादिषु च धातुत्वे शास्त्रविषयतया साधुत्वापत्तिरिति तद्व्यावृत्तये तदिति भावः, लघुशब्दरत्नम्, पुटसंख्या - १३३

[६]व्याकरणमहाभाष्यम् द्वितीयखण्डम्, उद्योतः, पुटसंख्या- १२५

## उपसंहृतिः(endnotes) -

एवं क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युरित्यर्थके 'भूवादयो धातवः' इति सूत्रे क्रियावाचिनः इति भ्वादयः इति च पदयोः सार्थक्यं शब्देन्दुशेखरदिशा सविस्तरं प्रतिपादितम् । तत्र च विकल्पार्थकवाशब्दस्य धातुत्वव्यावृत्त्यर्थं क्रियावाचिनः इति, आणवयति, वट्टयतीत्यादौ धातुत्वव्यावृत्त्यर्थञ्च भ्वादयः इति पदमिति शब्देन्दुशेखरकारमतम् । यद्यपि दीक्षितादयो 'याः पश्यति' इत्यादौ धातुत्वव्यावृत्त्यर्थं क्रियावाचिनः इति, हिरुक्, पृथग् इत्याद्यव्ययानां, शिश्ये इति भावार्थतिङन्तस्य च धातुत्वव्यावृत्त्यर्थञ्च भ्वादयः इत्याचक्षते, तथापि तन्न समीचीनम्, तदुक्तदोषाणान्त्वन्यथापि परिहारसम्भवात् । तच्च पूर्वं निरूपितमेव । इत्थञ्च पर्यालोचनेन वक्तुं पार्यते यत् बृहच्छब्देन्दुशेखरमतमवश्यमेव दोषरहितमित्यत्र नास्ति संशीतिलेशः इति शिवम् ।

## अनुशीलितग्रन्थाः (Bibliography)


1 नागेशभट्टः, १९९६, बृहच्छब्देन्दुशेखरः, प्रथमो भागः, सीतारामशास्त्री (सम्पादकः) वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

2 नागेशभट्टः, १९९२, लघुशब्देन्दुशेखरः, अव्ययीभावान्तो भागः, षट्टीकोपेतः, प्रो.शास्त्री नन्दकिशोरः, सम्पादकः, काशी :भार्गवपुस्तकालयः

3 नागेशभट्टः, २००१, लघुशब्देन्दुशेखरः, भावबोधिनीबालबोधिनीव्याख्योपेतः, आचार्यः श्रीपादसत्यनारायणमूर्तिः, व्याख्याता सम्पादकश्च, तिरुपतिः :राष्ट्रियसंस्कृतविद्यापीठम्

4 नागेशभट्टः, २०१२, लघुशब्देन्दुशेखरः, पञ्चसन्ध्यन्तः सुबोधिनीहिन्दीव्याख्योपेतः, विश्वनाथमिश्रः, दिल्ली :, चौखम्बा संस्कृत प्रतिष्ठान

5 भट्टोजिदीक्षितः, २०१४, वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनीसहिता), गिरिधरशर्मा, परमेश्वरानन्दशर्मा (सम्पादकौ), दिल्ली : मोतिलाल बनारसीदास

6 भट्टोजिदीक्षितः, १९६६, वैयाकरणसिद्धान्तकौमुदी (पण्डितश्रीसभापतिशर्मोपाध्यायविरचितलक्ष्मीव्याख्ययोपेता) (प्रथमोऽंशः) श्रीबालकृष्णशर्मपञ्चोली (सम्पादकः) दिल्ली : मोतिलाल वनारसीदास

7 भट्टोजिदीक्षितः, १९८५, शब्दकौस्तुभः (द्वितीयो भागः), गोपालशास्त्री(सम्पादकः), वाराणसी : चौखम्बा संस्कृत सीरीज आफिस

8 भट्टोजिदीक्षितः, २०११, प्रौढमनोरमा, पञ्चसन्धिपर्यन्ता (लघुशब्दरत्नव्याख्योपेता), जयशङ्करलालत्रिपाठी, वाराणसी : चौखम्बा कृष्णदास अकादमी

9 भट्टोजिदीक्षितः, १९९५, वैयाकरणसिद्धान्तकौमुदी (सिद्धान्तरत्नाकरसहिता) (स्त्रीप्रत्ययान्तः प्रथमो भागः), आजादमिश्रः (सम्पादकः), लखनऊ : केन्द्रीयसंस्कृतविद्यापीठम्

10 पतञ्जलिः, १९८८, महाभाष्यम् (प्रदीपोद्योतोद्भासितेन समुल्लसितम्), (द्वितीयं खण्डम्), महामहोपाध्यायपण्डित-शिवदत्त-शर्मा (सम्पादकः), दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान

11 वामनजयादित्यौ, १९८६, काशिका (न्यासपदमञ्जरीभावबोधिनीव्याख्यासहिता) (द्वितीयो भागः) जयशङ्करलालत्रिपाठी, सुधाकर-मालवीयः, (सम्पादकौ), वाराणसी : तारा प्रिण्टिग वर्क्स

# स्तोकं पचति

श्री चन्द्रमौलि कल्याणः
शोधच्छात्रः, के.सं.वि., रा. गा. परिसरः
शृङ्गेरी

*लेखसारः –*

- *स्तोकं पचति इति प्रयोगविचारः सामान्येन ।*
- *उपपदविभक्तित्वप्रतिपादनम् ।*
- *फलस्य कर्मत्वात् द्वितीया ।*
- *फलस्य व्यपदेशिवद्भावेन फलाश्रयत्वात् कर्मसञ्ज्ञा, कर्मणि द्वितीया ।*
- *विक्लित्त्यादेः तादात्म्येन विक्लित्त्याश्रयत्वेन कर्मत्वात् तत्राभेदेन विशेषणवाचकस्तोकादिपदादपि द्वितीया ।*
- *स्तोकादेः फले अन्वये स्तोकं पाकः । व्यापारेऽन्वये च स्तोकः पाकः ।*
- *क्रियाविशेषणानां समासो महाभाष्यविरुद्धः ।*

## उपोद्घातः

व्याकरणशास्त्रानुसारं शब्दाः चतुर्धा इत्युच्यन्ते । यथा – नामाख्यातोपसर्गनिपाताः इति । तत्र आख्यातं नाम तिङन्तम् । तच्च धातुः + प्रत्ययः इति विभज्यते । तयोः अर्थनिर्धारणे मतबाहुल्यमस्ति । वैयाकरणैस्तावत् फलव्यापारौ धात्वर्थौ, कर्तृकर्मसंख्याकालाः तिङर्थाः इति स्वीक्रियते । तत्रापि क्रिया द्विधा भवति, साध्यक्रिया सिद्धक्रिया इति । धातुबोध्या क्रिया साध्यक्रिया । सा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मवती । तस्यामेव च क्रियायां साक्षात् परम्परया वा इतरेषाम् अन्वयः । यथा प्रत्ययार्थकालस्य धात्वर्थव्यापारे, प्रत्ययार्थसंख्यायाः प्रत्ययार्थकर्तरि कर्मणि वा, तयोश्च व्यापारे फले वा, धात्वर्थफलस्य च धात्वर्थव्यापारे । किञ्च कारकाणामपि धात्वर्थव्यापारे एव अन्वयः ।

## स्तोकं पचति इति प्रयोगविचारः

इदं विचार्यते यत् स्तोकं पचति, मृदु पचतीत्यादौ स्तोकादिपदोत्तरं द्वितीयाविभक्तिः केन सूत्रेण जायते ? अत्र क्रिया-विशेषणस्थले च न द्वितीयातिरिक्तविभक्तिरुत्पद्यते, "क्रियाविशेषणानां कर्मत्वं क्लीबता च"[1] इत्यनुशासनेन तत्र कर्म-त्वातिदेशादिति व्युत्पत्तिवादे प्रतिपादितम् । क्रियाविशेषणानां स्तोकादीनां धात्वर्थतावच्छेदकफलशालित्वरूपकर्मत्वस्य बाधितत्वात् अनेनानुशासनेन कर्मत्वातिदेशात् "कर्मणि द्वितीया"[2] इत्यनेनैव द्वितीया विभक्तिर्भवति ।

न चैवं स्तोकः पाक इत्यादावपि द्वितीयाप्रसङ्गः, तत्रापि स्तोकादेः क्रियायामेव विशेषणत्वाद् भावकृतां प्रयोगसाधु-त्वमात्रार्थकतया धातुनैव तत्र पाकादिप्रतिपादनादिति वाच्यम् । क्रियापदस्य तस्मिन्ननुशासने सार्थकप्रत्ययप्रकृतिभूतधा-तूपस्थाप्यार्थपरत्वात् ।

[1]व्युत्पत्तिवादः द्वितीयविभक्तिप्रकरणे
[2]पा.सू.- २.३.२

## उपपदविभक्तित्वप्रतिपादनम्

श्रीगोकुलनाथोपाध्यायेन पदवाक्यरत्नाकरे -

**उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥**[१]

इति कारिकायास्ततोऽन्यत्रापि दृश्यते इत्यंशं व्याकुर्वताऽन्यत्र स्तोकं पचतीत्यादौ क्रियाविशेषणे इत्युक्तम् । तेन क्रियाविशेषणवाचकात् पदाद् द्वितीया उपपदविभक्तिरेवेत्युक्तम् ।

द्वितीयाया उपपदविभक्तित्वञ्च शब्दशक्तिप्रकाशिकाटीकायां श्रीकृष्णकान्तभट्टाचार्येणाप्युक्तम् । तस्यायमाशयः स्तोकं पचतीत्यादौ क्रियाविशेषणं स्तोकादि न कारकम् । कारकत्वाभावे कारकत्वव्याप्यकर्मसञ्ज्ञापि न भवितुमर्हति खलु, तर्हि कर्मसञ्ज्ञाविरहे "कर्मणि द्वितीया" इत्यनेन द्वितीयापि न भविष्यतीति कथं क्रियाविशेषणवाचकात् प्रातिपदिकाद् द्वितीयेति विचिकित्सायां ततः "अन्यत्रापि दृश्यते" इत्यंशेन द्वितीया उपपदविभक्तिः भविष्यति इति । तथोक्तं शब्दशक्तिप्रकाशिकायां यादृशेन नामार्थेनावच्छिन्नस्य सुबर्थस्य यादृशधात्वर्थेऽन्वयः स एव तादृशधात्वर्थे कारकतया व्यपदिश्यते, स्तोकं पचतीत्यादौ क्रियायां प्रकारीभूतेऽपि स्तोकादिर्न कारकम् । द्वितीया तु तत्र क्लीबलिङ्गत्ववदानुशासनिकी एव । अनुशासनञ्च न किमपि निर्दिष्टम्, श्रीकृष्णकान्तभट्टाचार्येणात्र द्वितीयाया उपपदविभक्तित्वमुद्घोषितम् । गोकुलनाथोपाध्यायेन च ततोऽन्यत्रापि दृश्यते इत्यंशेन द्वितीया बोधिता ।

क्रियाविशेषणानां कर्मत्वमिति प्रसिद्धेर्व्याहृतत्वं पर्यालोच्य व्युत्पत्तिवादस्य गूढार्थतत्त्वालोकेऽपि -

**उभसर्वतसोः कार्या....ततोऽन्यत्रापि दृश्यते ॥**

इत्यंशीभूतेन ततोऽन्यत्रापि दृश्यते इत्यनेन क्रियाविशेषणं कर्मवद्भवतीत्यनुशासनं कल्प्यते इत्युक्तम् । तेन तत्रातिदिष्टं कर्मत्वं वर्तते, कर्मत्वातिदेशाच्च "कर्मणि द्वितीया" इति सूत्रेण द्वितीयाविभक्तिर्भवत्येव । अतिदेशस्थले च न सर्वं मुख्यकार्यं भवतीति न प्रकृते क्रियाविशेषणे कर्मणि लकारादीनां शङ्का कर्तव्येति मतान्तरम् ।

प्रौढमनोरमायां तु फलस्यापि कर्मत्वादिना व्यापारविशेषणत्वादर्थाध्याहारवादे कर्मत्वस्य व्यापारे विशेषणत्वात् कर्मत्वे च फलस्य विशेषणत्वाद् व्यवस्था । अत एव तत्समानाधिकरणे "शोभनं पचति" इत्यादौ द्वितीयैकवचनोत्पत्तिरित्युक्तम् । शब्देन्दुशेखरे नागेशभट्टैस्तु - फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात् "कर्तुरीप्सिततमं कर्म" इति सूत्रेणैव कर्मसञ्ज्ञायां तत्समानाधिकरण-स्तोकादिवाचकात् "कर्मणि द्वितीया" इत्यनेनैव द्वितीयेत्युक्तम् । कर्मणि द्वितीयेत्यस्य "कर्मवाचकात् कर्मसमानाधिकरणवाचकाच्च"[२] द्वितीयेति तदाशयः । अत एव "नीलं घटमानय" इत्यादौ कर्मवाचकाद् घटशब्दाद् घटरूपकर्मसमानाधिकरणवाचकान्नीलपदाच्च द्वितीयाविभक्तिर्भवति ।

अन्यैस्तु तादात्म्यफलतावच्छेदकसम्बन्ध-अन्यतरसम्बन्धेन फलाश्रयत्वेनेच्छाविषयस्य कर्मसञ्ज्ञा । तेन तादात्म्येन फलस्यापि फलाश्रयत्वात् "स्तोकं पचति" इत्यादौ विक्लित्त्यादेः तादात्म्येन विक्लित्त्याश्रयत्वेन कर्मत्वात्, तत्राभेदेन विशेषणवाचकस्तोकादिपदादपि "कर्मणि द्वितीया" इति वैयाकरणमतं स्फुटमिति ।

न च "स्तोकं तिष्ठति" इत्यादौ स्तोकपदाद् द्वितीया न स्यात्, स्थाधातोः अकर्मकत्वेन फलस्य धात्वर्थत्वाभावात् कर्मसञ्ज्ञाया अप्राप्तेरिति वाच्यम् । **"फलव्यापारयोर्धातुः"**[३] इति भूषणोक्तदिशा सर्वेषां धातूनां फलमन्तर्भाव्य

---

[१]पदवाक्यरत्नाकरे, वैयाकरणसिद्धन्तकौमुद्यां कारकप्रकणे च

[२]लघुशब्देन्दुशेखरः – कर्तुरीप्सिततमं कर्म सूत्रव्याख्याने

[३]भूषणसारः- २.कारिका


ISSN : 2249-538X

धात्वर्थत्वनिर्वचनात् ।

न चैवं सकर्मकत्वाकर्मकत्वयोर्व्यवस्था न स्यादिति वाच्यम् । स्वार्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम् । स्वार्थफलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वमित्येवंरीत्या सकर्मकत्वाकर्मकत्वयोर्विभागस्य भूषणादौ कृतत्वात् । न चैवं गौरवमिति वाच्यम्, "क्रियाविशेषणानां कर्मत्वम्" इति वचनस्यापूर्वत्वकल्पनापेक्षयोक्तविषये लाघवस्यातिस्फुटत्वात् । किञ्च क्रियाविशेषणानां कर्मत्वमित्यस्य क्रियते यत् तत् क्रिया इति व्युत्पत्त्या यौगिकक्रियापदेन फलस्यापि ग्रहीतुं शक्यत्वाच्च लाघवमेवेति स्पष्टम् ।

न च "भूवादयो धातवः"[१] इति सूत्रे भाष्ये क्रियापदस्य व्यापारे रूढिशक्तिस्वीकारात्, पूर्वमीमांसायां नवमाध्याये रथन्तराधिकरणे च सिद्धान्तितेन **"योगाद् रूढिर्बलीयसी"** इति न्यायेनोक्तानुशासने क्रियापदेन व्यापारस्यैव ग्रहीतुमुचितत्वेन क्रियाविशेषणानां कर्मत्वमित्यनुशासनस्यापूर्वत्वकल्पनाया गलेपतितत्वादिति वाच्यम् । असति तात्पर्ये योगाद् रूढेर्बलीयस्त्वेन सति तात्पर्ये यौगिकार्थस्यापि ग्राह्यत्वात् ।

अत एव –

**"सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः । निपतन्ति धार्तराष्ट्राः कालवशान्मेदिनीपृष्ठे"** ॥[२]

इति वेणीसंहारपद्ये हंसविशेषे रूढेनापि धार्तराष्ट्रपदेन यौगिकार्थस्य दुर्योधनादेर्ग्रहणदर्शनात् ।

एवमसतः अपूर्ववचनस्य कल्पयितुमशक्यत्वेन वैयाकरणमतमेव ज्यायः । अत एव स्तोकादेः फले अन्वये स्तोकं पाकः । व्यापारेऽन्वये च स्तोकः पाकः इति व्यवस्थोपपद्यते । तदुक्तं भूषणे -

**साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना । सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः** ॥[३]

अपि च अकर्मकाणां धातूनां फलमप्यर्थ इति न केवलं वैयाकरणैरेवाङ्गीक्रियते, किन्तु व्युत्पत्तिवादे व्यापारमात्रं धात्वर्थ इति प्राचीनमतं प्रदर्श्य नव्यमतेन फलव्यापारयोर्धात्वर्थत्वं प्रतिपादितं गदाधरभट्टाचार्यैरपि ।

किञ्च भू-सत्तायाम्, एध-वृद्धौ इत्याद्यनुशासनादकर्मकाणां फलवाचकत्वं निर्विवादमेव, व्यापारवाचकत्वं तु धातुत्वान्यथानुपपत्त्या अर्थापत्तिप्रमाणसिद्धमेवेत्यलम् । फलरूपायां क्रियायां तादात्म्येनान्वितस्य कर्मत्वम्, "जगाद मधुरां वाचम्" इत्यत्र वाचमिति क्रियाविशेषणमुपादेयं मधुरत्वादिविशेषणावच्छिन्नवाचस्तादात्म्येन गद्-धात्वर्थफलेऽन्वयेऽपि नीलघटो घट इतिवत् साकाङ्क्षत्वात् ।

परन्तु इदं नोचितं भाति द्वितीयाकारके गूढार्थतत्त्वालोके "नरकं पतितः" इत्यत्रापि ततोऽन्यत्रापि दृश्यते इत्यंशेन द्वितीयोपपत्तौ तस्यानुपपत्तिवर्णनस्यासङ्गत्यापत्तेः । किञ्चोपपदविभक्तीनां षष्ठीबाधकत्वेन षष्ठीप्राप्तिस्थले एव तासां प्रवृत्तिस्वीकारात् । किञ्च वार्तिकेन तत्र द्वितीयासम्पादनमेव नोचितम्, यतः वार्त्तिकघटकानामुभयत इत्यादीनां योगे द्वितीयायाः उदाहरणं प्रदत्तं भट्टोजिदीक्षितैः, किन्तु ततोऽन्यत्रापि दृश्यते इत्यंशस्योदाहरणं न दत्तम् । अपि तु **"अभितः-परितः-समया-निकषा-हा-प्रतियोगेऽपि"**[४] इति वार्तिकं पठितम् । वार्तिकोक्तानां पदानां योगे द्वितीयाघटितान्युदाहरणान्यपि दत्तानि, तेनेदमनुमीयते यदभितः-परितेत्यादिवार्तिकं 'ततोऽन्यत्रापि दृश्यते' इत्यंशस्य प्रपञ्चभूतमिति, स्पष्टमिदं तत्त्वबोधिन्याम् । तेन "स्तोकं पचति" इत्यादौ न तेनांशेन द्वितीया, अपि च वार्तिकोक्तानां

---

[१]पा.सू. १.३.१

[२]वेणीसंहारम् – १- अङ्के ६.श्लोकः

[३]भूषणसारः – १५.कारिका

[४]वैयाकरणसिद्धान्तकौमुदी – वार्तिकम् (कारकप्रकरणम्)

साहचर्यात् ततोऽन्यत्रापि दृश्यते, इत्यनेनाप्यव्यययोगे एव द्वितीया भवति । तस्मात् स्तोकमित्यादौ "कर्मणि द्वितीया" इत्यनेनैव द्वितीया साधनीया । धात्वर्थफले विशेषणवाचकाद् द्वितीयोत्पत्तौ स्तोकादेः फले एवान्वयः, न तु व्यापारे सुप्प्रकृतिभूत-धातूपस्थाप्येन विशेष्येण व्यापारेण अन्वयाभावेन न क्रियाविशेषणानां समास इति वैयाकरणानामुद्घोषो भवतीति ।

यत्तु शब्दशक्तिप्रकाशिकायां "स्तोकं पक्ता" इत्यादौ क्रियाविशेषणैः कर्मधारय एव, महाकविः, महाविज्ञ इत्यादौ कवित्वादाविव प्रकृतेऽपि नामार्थैकदेशे पचनादावपरनामार्थस्याभेदान्वयबोधकतया तथात्वसम्भवात् । क्रियाविशेषणैः समास एवाव्युत्पन्न इति तु न मन्तव्यम् । "स्तोकनम्रास्तनाभ्याम्" इत्यादेः कालिदासाद्यैः प्रयुक्तत्वादिति तत्तु **"अन्धस्यैवान्धलग्नस्य विनिपातः पदे पदे"** इति न्यायेन ग्रसितमपि च कवयो बहुलपाणिनीयान् शब्दान् प्रयुञ्जते तत्तु नाविदितं विदुषाम् ।

किञ्च, क्रियाविशेषणानां समासो महाभाष्यविरुद्धोऽप्यत एव **"पूजनात् पूजितम्.."**[१] इति सूत्रभाष्ये एव दारुणं यथा स्यात् तथा अध्यापको दारुणाध्यापक इत्यस्य साधुत्वार्थं मलोपवचनमारब्धम् । क्रियाविशेषणानां समासे तु समासत्वात् प्रातिपदिकसञ्ज्ञायां "सुपो धातुप्रातिपदिकयोः"[२] इति सुपो लुकि व्यर्थमेव म-लोपवचनं स्यादिति सुधियो विभावयन्तु ।

न च भिन्नपदत्वेऽपि, अर्थाद् वाक्येऽपि, तथा प्रयोगसाधुत्वार्थं म-लोपवचनमिति वाच्यम् । तथा सति "वाक्ये मलोपश्च वक्तव्यः" इत्यस्यैव वक्तव्यत्वात् । यत्तु स्तोकादिपदार्थस्य धात्वर्थफलसमानाधिकरणस्य कारकत्वाभावात् ततः औत्सर्गिकमेकवचनं प्रथमायाः अस्तु, नपुंसकत्वं चास्तु । न च 'जगाद मधुरां वाचम्' इत्यत्रानुपपत्तिर्जहल्लिङ्गस्थले नपुंसकत्वाङ्गीकारादिति वाच्यम्, 'निपुणस्त्वं पचसि', 'मृदु वा राजा द्रविणेन भोजयति' इत्यत्र "त्वामौ द्वितीयायाः"[३] इत्यस्यैव प्रवृत्तिर्भवति । प्रथमान्तत्वे तु **"सुपूर्वायाः प्रथमाया विभाषा"**[४] इत्यस्य प्रवृत्तिः स्यात् । तस्मात् स्तोकादिपदाद् द्वितीयैव स्वीकार्येत्याशयः ।

एवं स्थिते फलसमानाधिकरणवाचकाद् द्वितीया, सा चाकर्मकधातुयोगेऽपि क्रियाविशेषणं भवतीति किञ्चित् मतम् । केचित्तु क्रियाविशेषणानां कारकत्वं कर्मत्वञ्च । एवं च सति "कर्मणि द्वितीया" इत्यनेनैव क्रियाविशेषणवाचकपदाद् द्वितीयाविभक्तिर्भवतीति वदन्ति । किन्तु "ओजः सहोऽम्भसा वर्तते"[५] इत्यतो वर्तते इत्यनुवृत्य "तत् प्रत्यनुपूर्वमीपलोमकूलम्"[६] इत्यनेन द्वितीयान्तात् प्रतीपादिशब्दात् वर्तते इत्यर्थे ठक्, तत्र वर्तते इत्यस्याकर्मकत्वात् कथं द्वितीयेति, द्वितीयान्तात् ठग्विधानवैयर्थ्येन क्रियाविशेषणाद् द्वितीया इति कल्पनापि निरस्ता । अकर्मकधातुयोगेऽपि तादात्म्यसम्बन्धेन फलस्यापि फलाश्रयत्वात् कर्मत्वे सिद्धे द्वितीयोपपत्तेः उक्तरीतिरपि अकर्मकधातूनां फलवाचकत्वे मानम् । तस्माद् वैयाकरणमतमेव लघुसारल्येनोपपन्नं भवति ।

ननु वैयाकरणमते "कर्तुरीप्सिततमं कर्म"[७] इत्यनेन स्तोकादेः कर्मत्वे तादृशे कर्मणि लकारापत्त्या "स्तोकः पच्यते" इत्यपि प्रयोग आपद्येत इति चेन्न । कर्तृसाहचर्यात् कर्मणोऽपि भेदेन धात्वर्थान्वितस्यैव लकारादिप्रत्ययविधायकशास्त्रे ग्रहणेनाऽदोषात् । अत एव "स्तोकं पाकः" इत्यादौ षष्ठ्यपि न ।

[१]पा.सू.- ८.१.६७
[२]पा.सू.- २.४.७१
[३]पा.सू.- ८.१.२३
[४]पा.सू. – ८.१.२६
[५]पा.सू – ४.४.२७
[६]पा.सू -.४.४.२८
[७]पा.सू. – १.४.४९


ISSN : 2249-538X

न च “मन्दं वहति पवनः”, “द्रुतं गच्छति”, “मन्दं गच्छति” इत्यादौ व्यापारेऽभेदान्वयिमन्दादेः कर्मत्वानापत्त्या क्रियाविशेषणानां कर्मत्वमिति अपूर्ववचनं कर्तव्यम् । क्रियापदञ्च धात्वर्थमात्रपरमित्यपि वक्तव्यमिति वाच्यम् । व्यापारे मन्दतादिसत्त्वे तज्जन्यफलस्यापि मन्दत्वादिसत्त्वात् तत्रापि फले एव मन्दान्वयस्योपपादयितुं शक्यत्वात् । द्वितीयाविभक्तेः शक्यतावच्छेदकत्वे गौरवं तु नापादनीयम्, कर्मपदशक्यत्वस्य कर्मत्वशक्तिमत्वेनैव स्वीकारादित्यलं विस्तरेण ।

## निष्कर्षः

- स्तोकं पचति, अत्र द्वितीयाविभक्तिः “क्रियाविशेषणानां कर्मत्वं क्लीबता च” इत्यनुशासनेन कर्मत्वातिदेशादिति व्युत्पत्तिवादः ।
- श्रीकृष्णकान्तभट्टाचार्येणात्र द्वितीयाया उपपदविभक्तित्वमुद्घोषितम् । गोकुलनाथोपाध्यायेन च ततोऽन्यत्रापि दृश्यते इत्यंशेन द्वितीया बोधिता ।
- प्रौढमनोरमायां तु फलस्यापि कर्मत्वादिना व्यापारविशेषणत्वादर्थाध्याहारवादे कर्मत्वस्य व्यापारे विशेषणत्वात् कर्मत्वे च फलस्य विशेषणत्वाद् व्यवस्था ।
- शब्देन्दुशेखरे नागेशभट्टः- फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात् “कर्तुरीप्सिततमं कर्म” इति सूत्रेणैव कर्मसञ्ज्ञायां तत्समानाधिकरण-स्तोकादिवाचकात् “कर्मणि द्वितीया” इत्यनेनैव द्वितीयेत्युक्तम् ।
- किञ्च क्रियाविशेषणानां कर्मत्वमित्यस्य क्रियते यत् तत् क्रिया इति व्युत्पत्त्या यौगिकक्रियापदेन फलस्यापि ग्रहीतुं शक्यत्वाच्च लाघवमेवेति स्पष्टम् ।
- उपपदविभक्तीनां षष्ठीबाधकत्वेन षष्ठीप्राप्तिस्थले एव तासां प्रवृत्तिस्वीकारात् नरकं पतितः इत्यत्र द्वितीया उपपदद्वितीया न ।
- वार्तिकोक्तानां साहचर्यात् ततोऽन्यत्रापि दृश्यते, इत्यनेनाप्यव्ययोगे एव द्वितीया भवति । तस्मात् स्तोकमित्यादौ “कर्मणि द्वितीया” इत्यनेनैव द्वितीया साधनीया ।
- दारुणाध्यापक इत्यस्य साधुत्वार्थं मलोपवचनारम्भात् क्रियाविशेषणानां समासो महाभाष्यविरुद्धः ।
- स्तोकः पच्यते इत्यादयः कर्मणि प्रयोगाः, स्तोकं पाकः इत्यत्र षष्ठ्यपि न, “कर्तृकर्मणोः कृति”[१] इति सूत्रे कर्मपदस्य कर्तृपदसाहचर्यात्, कर्मणोऽपि भेदेन धात्वर्थान्वितस्यैव लकारादिप्रत्ययविधायकशास्त्रे ग्रहणात् ।
- मन्दं वहति इत्यादावपि व्यापारजन्यफले अन्वयात्, तत्राऽपि द्वितीया न दुष्टा ।

## उपयुक्तश्रोतांसि

I. पदवाक्यरत्नाकरः II. शब्दशक्तिप्रकाशिकाटीका III. व्युत्पत्तिवादः IV. गूढार्थतत्त्वालोकः
V. प्रौढमनोरमा VI. शब्देन्दुशेखरः VII. भूषणसारः VIII. वेणीसंहारम्

[१] पा.सू.- २.३.६५

# अद्वैतनयेऽर्थापत्तिप्रमाणम्

श्री लोकनाथ पण्डा*
शोधच्छात्रः, राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः

***लेखसारः*** *-भारतीयदर्शनेषु स्वप्रमेयसिद्ध्यर्थं प्रमाणानि स्वीकृतानि सन्ति। प्रमाणानां प्रयोजनं न्यायभाष्यकारेणोच्यते- प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तसामर्थ्यादर्थवत् प्रमाणमिति। अद्वैतसम्प्रदाये षड्प्रमाणेषु अन्यतमम् अर्थापत्तिप्रमाणम्। धर्मराजाध्वरीन्द्रविरचितवेदान्तपरिभाषानामकग्रन्थः प्रमाणपरः वर्तते। उपपाद्यज्ञानेनोपपादककल्पना अर्थापत्तिः इत्यस्मिन्विषये तद्भेदविषये तत्प्रमाणान्तरताविषये च वेदान्तपरिभाषाद्वैतामोदगूढार्थदीपिकातत्त्वालोकमतमाश्रित्य वेदान्तपरिभाषायाः विभिन्नटीकानामपि मतमुद्धृत्य च एतत्प्रमाणविषये प्रतुष्टूषामि यथामति।*

***कूटशब्दाः*** *-अर्थापत्तिः, उपपाद्यम्, उपपादकम्, कल्पनमित्यादयः।*

## भूमिका

इह खलु स्वप्रकाशपरमानन्दरूपे आत्मनि सर्वसंसारधर्मसंसर्गिणि स्थूलसूक्ष्मशरीरद्वयतत्कारणाविद्याख्योपाधित्रयविवेकेन मिथ्याभूतस्यापि संसारस्य सत्यत्वप्रतिभासो बन्धः, तन्निवृतिस्तु मोक्षः। उक्तञ्च-

**अनात्मभूते देहादावात्मबुद्धिस्तु देहिनाम्। साऽविद्या यत्कृतो बन्धस्तन्नाशो मोक्ष उच्यते॥**[१]

प्रमात्मकस्य[२] अद्वैतस्य ब्रह्मणः[३] ज्ञाने सति द्वैतरूपसंशयज्ञानस्य[४] नाशः भवतीति वेदान्तराद्धान्तः[५]। तच्च प्रमात्मकं ज्ञानं प्रमाणेन भवतीति न विदुषां तिरोहितम्।[६] प्रमाकरणं प्रमाणमिति सर्वेषां दार्शनिकानां मतैक्यम्। तत्र प्रमाकरणे विशेषणभूता या प्रमा, तस्याः अपि ज्ञानमपेक्षते नागृहीतविशेषणा बुद्धिः विशेष्यमवगाहते इति न्यायात्। प्रमायाः लक्षणम्- स्वोत्पत्त्यव्यवहितपूर्वक्षणे स्वकरणक्षणे च यदज्ञातमुक्तकालावच्छेदेन अबाधितञ्च तद्विषयकज्ञानत्वमिति[७] अनधिगताबाधितार्थविषयकज्ञानत्वमिति[८]। तत्करणं प्रमाणमिति। प्रत्यक्षानुमानोपमानागमैः[९] इति शाङ्करभाष्यम्। तच्च वेदान्तनये षड्विधं भवति। भगवत्पादीयभाष्यालोडनेन चत्वारि एव प्रमाणानि दृश्यन्ते न तु षट् तथापि व्यवहारे भाट्टनयः इत्यनुसारं षड्प्रमाणानि राराजति अद्वैतनिकाये। एतेषां प्रमाणानां शुद्धब्रह्मणः मिथ्यात्वस्य असाधारणभावरूपाज्ञानस्य च निरूपणावसरे उपयोगः।[१०] तथैवार्थापत्तेरपि।

---

***सम्पर्कसूत्रम्** – 8917555393, Email – loknathpanda77@gmail.com

[१]स्वरूपप्रकाशः- राष्ट्रियसंस्कृतसंस्थानतः प्रकाशितः २०१० – पु.सं. १

[२]प्रत्यक्षप्रमा त्वत्र चैतन्यमेव "यत्साक्षादपरोक्षात्" इति श्रुतेः- वेदान्तपरिभाषा राष्ट्रियसंस्कृतसंस्थानतः प्रकाशिता २०११ पु.सं. ३७-३८

[३]अद्वैतं ब्रह्म (तैत्तिरीयोपनिषदः शाङ्करभाष्ये २/५/१)

[४]अथवा द्वाभ्यामितं प्रकारद्वयेन विरूद्धत्वाद्भिन्नाधारवर्तिना युक्तं वस्तु द्वीतम्, तत्र भवं द्वैतम्, तदेव संशयज्ञानम्। (महाभाष्यप्रदीपे २/१/१)

[५]भिद्यन्ते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥ (मुण्डकोपनिषत् २/२/८)

[६]शास्त्रप्रतिपाद्यं ब्रह्म तत्प्रयोजनञ्च मोक्षसाधब्रह्मज्ञानञ्च प्रामाणाधीनम्- वेदान्तपरिभाषा शिखामणिटीका राष्ट्रियसंस्क्तसंस्थानतः प्रकाशिता २०११ पु.सं. १५,१६)

[७]सिद्धान्तबिन्दोः न्यायरत्नावल्यां (महेशानुसंधानसंस्थानतः प्रकाशितः पु.सं. १००)

[८]वेदान्तपरिभाषा राष्ट्रियसंस्कृतसंस्थानतः प्रकाशिता २०११ पु.सं. १७

[९]मुण्डकोपनिषदः प्रथममुण्डकस्य द्वितीयखण्डस्य द्वादशतममन्त्रस्य भाष्ये (ईशादि नौ उपनिषद् गीताप्रेस् पु.सं. ४६६)

[१०]अद्वैततत्त्वशुद्धिः अनन्तकृष्णशास्त्रिविरचिता कैरविणीक्षेत्रस्थभारतीविजयमुद्रणालयद्वारा मुद्रापिता प्रकाशिता च १९५८ पु.सं. २

## अर्थापत्तिप्रमाणम्-

तत्रादौ अर्थापत्तिप्रमाणस्वीकारस्य फलविषये श्लोकवार्त्तिके-

**स्मृत्या श्रुतिर्या परिकल्प्यतेऽस्मिन् लिंगादिभिर्या विनियोजिका च ।**
**फलादिभिर्यत् परिपूरणं च सम्बन्धदृक् तत्र न काचिदस्ति ॥**
**तत्सर्वमित्याद्यसमञ्जसं स्यान्न चेदियं स्यादनुमानतोऽन्या ।**
**एवं स्वभावाप्यनुमानशब्दं लभेत चेदस्तु यथेप्सितं नः ॥**[1]

अर्थापत्तेः द्वेधा व्युत्पत्तिः सम्भवति, यथा- अर्थस्य आपत्तिः यस्मात् सा अर्थापत्तिः इति बहुब्रीहिः । अर्थस्यापत्तिः वा अर्थापत्तिः इति तत्पुरुषः । अर्थस्य विवक्षितस्य पदार्थस्यापत्तिः कल्पना अनुपपत्तिः । बहुब्रीहिपक्षे यद्यपि आपद्यतेऽन्येति करणव्युत्तिराश्रीयते, बाहुलकत्वात् करणेपि क्तिन् प्रत्ययश्च क्रियते, तदा करणपरम् तथापि स्त्रियां क्तिनो भावाधिरणत्वेन बाहुलकत्वेन करणपरत्वाश्रयमयुक्तं मत्वा बहुब्रीहिसमासेनैव करणपरत्वमंगीकरणीयमिति वेदान्तपरिभाषकारस्य हृदयः । यतो हि बाहुलकस्यागतिकगतिकत्वाद् ज्ञापितव्यधिकरणकबहुब्रीहिसमासेनैव अर्थापत्तिशब्दस्य प्रमाणपरत्वं बोधयति इति[2] । अत्रापत्तिशब्द् भावव्युपत्तिपरः बोध्यः ।

- लक्षणम्- उपपाद्यज्ञानेनोपपादकज्ञानकल्पना ।
- विग्रहः- तत्रोपपाद्यत्वं नाम उपपादयितुं योग्यमुपपाद्यं (कार्यम्), तस्य ज्ञानम् (उपपाद्यस्य ज्ञानम्) इति उपपाद्यज्ञानम् (कार्यज्ञानमित्यर्थः), तेन (उपपाद्यज्ञानेन), उपपादकज्ञानम् एतस्य तात्पर्यं भवति । उपपादयति इति उपपादकः (कारणम्) तस्य ज्ञानमुपपादकज्ञानम्, तस्य कल्पनेति संहत्यार्थो जायते उपपाद्यज्ञानेनोपपादज्ञानकल्पना ।
- शाब्दबोधः- उपपाद्यज्ञानेनेति पदम्, स्वरूपकथनपरं न तु लक्षणघटकमिति विशेषः । उपपाद्यस्य ज्ञानम् इत्यत्र षष्ठ्यर्थः विषयित्वं विषयित्वसम्बन्धेनोपपाद्यं यद्विशेषणमुपाद्यविषयकज्ञाने अन्वेति, तच्च ज्ञानं तृतीयार्थजन्यत्व-सम्बन्धेनोपपादकज्ञाने अन्वेति । तथा बोधो जायते विषयित्वसम्बन्धावच्छिन्ना उपपाद्यत्वावच्छिन्ना या प्रकारता उपपाद्यनिष्ठा तादृशप्रकारतानिरूपिता या उपपाद्यज्ञानत्त्वावच्छिन्ना विशेष्यता तादृशविशेष्यतासमानाधिकरण-जन्यत्वसबन्धावच्छिन्ना ज्ञानत्वावच्छिन्ना या प्रकारतानिरूपिता या उपपादकज्ञानत्वावच्छिन्ना विशेष्यता तादृ-शविशेष्यतावद् यदुपपादकज्ञानम्, तस्य या कल्पना तदेवार्थापत्तिः । तथा च मणिप्रभायाम्- उपपाद्यज्ञानत्वाव-च्छिन्नोपपाद्यज्ञाननिष्ठोपपादकज्ञानीयजन्यतानिरूपितजनकतानिरूपितजन्यतावदुपपादकज्ञानमित्यर्थः[3] ।
- विग्रहार्थः- षष्ठीतत्पुरुषसमासपक्षे अर्थापत्तिशब्दार्थः प्रमाबोधकः । बहुब्रीहिसमासपक्षे अर्थापत्तिशब्दः प्रमाण-बोधकः । अर्थस्य रात्रिभोजनरूपस्योपपादक ज्ञानस्य आपत्तिः कल्पना तथा च रात्रिभोजनकल्पनमेवार्थापत्ति प्रमेत्यर्थः । प्रमाणपरः अर्थापत्तिशब्दः अर्थस्य रात्रिभोजनस्योपपादकज्ञानस्य कल्पना यस्माद् दिवाभोजनाभा-वविशिष्टपीनत्वज्ञानात् तदर्थापत्तिप्रमाणम्[4] ।

[1] मीमांसाश्लोकवार्तिकस्य अर्थापत्तिप्रकरणे श्लोकसंख्या ८७,८८
[2] प्रमाणकौस्तुभम् आचार्यभगवत्श्रणशुक्लमहोदयेन सम्पादिता २०१८ पु.सं. २१९
[3] वेदान्तपरिभाषा शिखामणिमणिप्रभाटीकासहिता राष्ट्रियसंस्कृतसंस्थानतः प्रकाशिता २०११ पु.सं. २७४
[4] वेदान्तपरिभाषार्थदीपिकायाम् अर्थापत्तिप्रकरणे आदावेव

इयमर्थापत्तिः द्विविधा - दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति ।

## दृष्टार्थापत्तिः-

दृष्टस्य अर्थस्य आपत्तिः कल्पनेति दृष्टार्थापत्तिः । तद्यथा भ्रमस्थले इदं रजतमिति पुरोवर्तिनि पदार्थे प्रतिपन्नस्य रजतस्य इयं शुक्तिः नेदं रजतमिति । तत्र निषिध्यमानत्वं निषेधप्रतियोगित्वं रजतस्य सत्यत्वेऽनुपपन्नमिति तत्र रजतस्य सद्भिन्नत्वमसत्यत्वात्यन्ताभाववत्त्वं वेत्यात्मकं मिथ्यात्वं कल्पयति इति । एतेनेदमागतम् शुक्तिरजतादिनिष्ठमिथ्यात्वाद्यभावव्यापकीभूतप्रमीयमाणनिषिध्यमानत्वाद्यभावप्रतियोग्यर्थविषयकज्ञानत्वम् । दृष्टार्थापत्तेः फलितार्थस्तु चक्षुरादिना परोक्षीभूतार्थानुपपत्त्यापत्तिरूपपादकार्थज्ञानं दृष्टार्थापत्तिः । यद्वा दृष्टार्थेन- इदं रजतमिति पुरोवर्त्तिप्रतिपन्नरजतनिष्ठं नेदं रजतमिति निषिध्यमानत्वरूपार्थेनापत्तिरुपपादकमिथ्यात्वरूपार्थस्य ज्ञानं दृष्टार्थापत्तिः । तथा च शुक्तिरजतादिनिष्ठनिषिध्यमानत्वादिरूपार्थाभावव्यापकमिथ्यात्वाद्यभावप्रतियोग्यर्थविषयकज्ञानत्वं दृष्टार्थापत्तित्वम् । श्लोकवार्तिकवचनम्-

**प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवेत् । अदृष्टं कल्पयेतदन्यं सार्थापत्तिरुदाहृता ॥**[1]

## श्रुतार्थापत्तिः-

तत्र श्रुतार्थापत्तिः श्रुतस्य श्रूयमाणस्य अर्थस्य स्वार्थस्य अनुपपत्तिः । अर्थात् स्वार्थानुपपत्तिमुखेनार्थान्तरकल्पनम् । एवं श्रुतार्थेन- बन्धनिष्ठज्ञाननिवर्त्यत्वार्थेनापत्तिरुपपादकमिथ्यात्वज्ञानं श्रुतार्थापत्तिः श्रुतबन्धनिष्ठज्ञाननिवर्त्यत्वाद्यभावव्यापकमिथ्यात्वाद्यभावप्रतियोग्यर्थविषयकज्ञानत्वं श्रुतार्थापत्तित्वमिति । वेदान्ते मुक्तिविषयकं वाक्यं प्रसिद्धम्- "तरति शोकमात्मविद्"[2] इत्यत्र श्रुतस्य श्रूयमाणस्य शोकशब्दवाच्यबन्धसमुदायस्य ज्ञाननिर्वर्त्यत्वस्यान्यथानुपपत्त्या बन्धजातस्य मिथ्यात्वं कल्प्यते । स चायं श्रुतिबोधितोऽर्थः शोकस्य सत्यत्वे नोपपद्यते, सत्यत्वस्य ज्ञाननिर्वत्तत्वायोगात्, मिथ्यात्वे तूपपद्यते एव । एतेनेदं बोध्यम्- शोकादिनिष्ठमिथ्यात्वाद्यभावव्यापकीभूतश्रूयमाणज्ञाननिवर्त्यत्वाद्यभावप्रतियोग्यिर्थविषयकज्ञानत्वम् । लोकप्रसिद्धः दृष्टान्तस्तु यथा वा जीवी देवदत्तो गृहे नेति वाक्यश्रवणान्नतरं जीविनो गृहासत्त्वं बोधयद् बहिःसत्त्वं कल्पयति ।

श्रुतार्थापत्तिश्चेति द्विविधा-अभिधाननुपपत्तिरभिहितानुनपपत्तिश्चेति ।

## अभिधानानुपपत्तिः-

अत्राभिधानशब्दः अभिधीयतेऽनेनेति करणव्युत्पत्त्याभिधानपदेन तात्पर्यमित्यर्थः ।[3] तात्पर्यस्य विवक्षित्वे सतीदं समाधानं फलितमित्याह तथा च द्वारकर्मकपिधानक्रियासंसर्गपरत्वं पिधानोपस्थापकपदं विनानुपपन्नमिति ज्ञानं तत्रापि संभाव्यते । यत्र वाक्यैकदेशश्रवणेऽन्वयाभिधानानुपपत्त्यान्वयाभिधानोपयोगिपदान्तरं कल्प्यते तत्राभिधानानुपपत्तिः । तद्यथा द्वारं पिधेहि वाक्यप्रयोक्तव्ये वाक्यैकदेशः द्वारमिति । अत्र द्वारनिष्ठाकर्मता क्रियात्मकनिरूपकमन्तरानुपपन्ना तत्र योग्यक्रियाबोधकं पदं कल्प्यते अर्थात् अध्याहारः क्रियाबोधपदस्य भवति ।

[1]मीमांसाश्लोकवार्तिकस्य अर्थापत्तिप्रकरणे श्लोकसंख्या १

[2]छान्दोग्योपनिषद् ७/१/३

[3]वेदान्तपरिभाषार्थापत्तिनिरूपणे टीका शिवदत्तकृतार्थदीपिका प्रकाशक चौखम्भासंस्कृतसीरिज सन् १९८४ ।

 ISSN : 2249-538X

## अभिहितानुपपत्तिः-

अभिहितानुपपत्तिस्तु यत्र वाक्यावगतोर्थोऽनुपपनत्वेन ज्ञातः सन्नर्थान्तरं कल्पयति। अनयोर्भेदकरणमेवं बोध्यम्- दृष्टार्थापत्तौ अर्थस्यैव कल्पनम्, श्रुतार्थापत्तौ तु शब्दस्य प्रमाणस्य कल्पनमिति वैषम्याद् भेदेन विभागः इति।[१] श्रुतार्थापत्तौ यदि अर्थस्यैव कल्पना स्यादिति, तर्हि श्रुतस्यैव वचनस्य सोऽर्थः कल्पनीयः परन्तु तन्न युक्तम्, तथा हि श्लोकवार्त्तिके-

**न तावत् श्रूयमाणस्य वचसोऽर्थोऽयमिष्यते। न ह्यनेकार्थता युक्ता वाक्ये वाचकता तथा॥**
**पदार्थान्वयरूपेण वाक्यार्थो हि प्रतीयते। न रात्र्यादिपदार्थश्च दिवावाक्येन गम्यते॥**
**न दिवादिपदार्थानां संसर्गो रात्रिभोजनम्। न भेदो येन तद्वाक्यं तस्य स्यात् प्रतिपादकम्॥**
**अन्यार्थव्याप्तत्त्वाच्च न द्वितीयार्थपल्पना। तस्माद् वाक्यान्तरेणायं बुद्धिस्थेन प्रतीयते॥**[२]

## अर्थापत्तेः प्रमाणान्तरत्वकथनम्-

नैयायिकाः तावत् अर्थापत्तेः अनुमाने अन्तर्भावमिच्छन्ति, न तस्याः प्रमाणान्तरत्वं स्वीकुर्वन्ति।यथा-

**अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते। व्यतिरेकव्याप्तिबुध्या चरितार्था हि सा॥**[३]

परं च ते प्रष्टव्याः यत् अर्थापत्तेः अन्वयिनि अन्तर्भावः व्यतिरेकिणि वा?

## अन्वयिनि अर्थापत्तेः न अन्तर्भावः-

अन्वयिनि अन्तर्भावः इति वक्तुं न शक्यम्। यदि बहिःसत्त्वजीवित्वसमानाधिकरणगृहासत्त्वयोः अन्वयव्याप्तिज्ञानं स्यात् चेत् अर्थापत्तेः अन्वयिनि अन्तर्भावः स्यात्। किन्तु नास्ति तादृशो व्याप्तिग्रहः। न हि चैत्रशरीरे तादृशव्याप्तिग्रहः, तस्य पक्षत्वात्, नापि अन्यत्र, अन्येषां पक्षसमत्वात्। न हि पक्षे पक्षसमे वा अन्वयव्याप्तिग्रहः, तत्र साध्यसहचारस्य अनिश्चयात्। अतः बहिःसत्त्वगृहाऽसत्त्वत्योः स्वव्यापकसाध्यसामानाधिकरण्यरूपान्वयव्याप्तिग्रहो नैव संभवति।

## व्यतिरेकिण्यपि अर्थापत्तेः न अन्तर्भावः-

व्यतिरेकिणि चेत् अन्तर्भावः, सोऽपि न वक्तुं शक्यः। यतः गृहाऽसत्त्वमात्रं न बहिःसत्त्वस्य अनुमापकम्, मृते बहिःसत्त्वाभाववति गुहाऽसत्त्वदर्शनेन व्यभिचारात्। जीवित्वविशिष्टन्तु गुहासत्त्वं बहिःसत्त्वस्य अनुमापकं भवेत्। तच्च अज्ञाते बहिःसत्त्वे ज्ञातुं न शक्यते। न च अज्ञातो हेतुरनुमापको भवति। एवं च अन्वयिनि व्यतिरेकिणि च अनन्तर्भावात् अर्थापत्तेः अनुमाने अन्तर्भावः न भवति।

व्यतिरेक्यनुमानाङ्गीकारे खलु अर्थापत्तिप्रमाणवैतथ्यम्; न तु तदङ्गीकृतम्; अतोऽर्थापत्तिप्रमाणान्तराङ्गीकार आवश्यक एव। न च विनिगमनाविरहादर्थापत्तेरेव निरासो भवत्विितिवाच्यम्; जीवतो देवदत्तस्य बहिःसत्त्वस्यान्योन्याश्रयेणाऽनुमानिकत्वाभावात्। न चार्थापत्तावपि समानोऽयं दोषः इति वाच्यम्; तत्र तस्य अदोषत्वात्। तदुक्तं न्यायरत्नाकरे- ईदृग्रूपमेव ह्येतत् प्रमाणम्, यदर्थं च यस्यासत्यर्थान्तरे मिथः

[१]वेदान्तपरिभाषार्थापत्तिनिरूपणे टीकोद्धृतोवाक्यम्- परिभाषाप्रकाशिका श्रीयुक्त-अनन्तकृष्णशास्त्रिकृता कलिकताविश्वविद्यालयेन प्रकाशिता सन् १९३०

[२]मीमांसाश्लोकवार्तिकस्य अर्थापत्तिप्रकरणे श्लोकसंख्या ५५-५८

[३]न्यायसिद्धान्तमुक्तावली गुणखण्डः श्लो.सं. १४४

प्रतिघातेनासांभवमालोच्यार्थान्तरकल्पनाप्रतिघातं परिहृत्य सम्भवतीत्यत एव विलक्षणसामग्रीत्वेन प्रमाणान्तरत्वम् ।[1] श्लोकवार्तिके-

**पक्षधर्मादिविज्ञानं बहिः संबोधतो यदि । तैश्च तद्बोधतोऽवश्यमन्योन्याश्रयता भवेत् ॥**

**अन्यथानुपपत्तौ हि प्रेमयानुप्रवेशिता । ताद्रुप्येणैव विज्ञानान्न दोषः प्रतिभाति नः ॥**[2]

## वेदान्तपरिभाषाकारमतम्-

न चेयमर्थापत्तिरनुमानेऽन्तर्भवितुमर्हति । अनेनेदं कल्पयामि इति अनुव्यवसायबलात् । यथा पृथिवी स्वेतरभिन्ना गन्धवत्वाद् । तत्र गन्धवत्त्वमितरभेदमन्तरानुपपन्नम् । तेन पृथिव्यामितरभेदः कल्प्यते । तथा चानुव्यवसायः पृथिवीतरभेदं कल्पयामि यदीतरभेदप्रमानुमितिः स्याद् अनुमिनोमि इत्यनुव्यवसायः स्याद् अनुव्यवसायस्यैव ज्ञानसाक्षित्वात् न च तथानुव्यवसायः, तस्मादितरभेदप्रमा नानुमितिः, किन्त्वर्थापतिः । तस्मादर्थापत्तिः प्रमाणान्तरम् ।[3] अस्य अनुमाने अन्तर्भावः न भवति उक्तानुव्यवसायविरोधात् एतच्च फलबलस्वभावेन कल्पनीयं भवति ।

नन्वर्थापत्तिस्थले इदमनेन विनाऽनुपपन्नमिति ज्ञानं करणमित्युक्त, तत्र किमिदं तेन विनाऽनुपपन्नत्वम् ? तदभावव्यापकीभूताभावप्रतियोगित्वमिति ब्रूमः[4] ।

उपपाद्यज्ञानरूपा अर्थापत्तिः इत्युच्यते, तत्र उपपाद्यलक्षणं प्रदर्शयति- "तदभाव व्यापकाभावप्रतियोगित्वम्" अत्र 'तत्' पदमुपपादकत्वेन अभिमतवस्तुपरम् । 'पीनो देवदत्तः' अत्र तत्पदेन उपपादकस्य रात्रिभोजनस्य परिग्रहः, तदभावव्यापकः दिवा अभुञ्जानत्वसमानाधिकरणपीनत्वाऽभावः, तत्प्रतियोगित्वं पीनत्वस्य, इति 'पीनत्वे' उपपाद्यलक्षणसमन्वयः । एवं "तदभावव्याप्याभावप्रतियोगित्वमुपपादकत्वम्" इति उपपादकलक्षणम् । अत्र 'तत्' पदमुपपाद्यत्वेन अभिमतताद्दशपीनत्वपरम् । तदभावव्याप्यः रात्रिभोजनाभावः, तत्प्रतियोगित्वं रात्रिभोजनस्य इति उपपादके रात्रिभोजने उपपादकलक्षणसमन्वयः ।

तदभावव्यापकीभूताभावप्रतियोगित्वस्य उपपाद्यत्वे सति अर्थापत्तेः व्यतिरेक्यनुमानत्वमेव किं न स्वीक्रियते यतः "तदभावव्यापकीभूताभावप्रतियोगित्वस्यैव व्यतिरेक्यनुमानत्वम्" इति पूर्वपक्षे समाधीयते व्यतिरेकिणः अनुमित्यकरणत्वात् नानुमानत्वम् किन्तु अर्थापत्तित्वमेव । "पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात् यन्नैवं तन्नैवं यथा जलम्" अत्र पृथिव्यां या इतरभेदप्रमा सा अर्थापत्तिरेव, नानुमितिः । यदि सा अनुमितिः स्यात्, अनुमिनोमीत्यनुव्यवसायः स्यात्, अनुव्यवसायस्यैव ज्ञानसाक्षित्वात् । किन्तु न तथा अनुव्यवसायः ।

## अद्वैतामोदकाराणां मतम्-

किंच "यद्यपि यत्र यत्र रात्रिभोजनाभावस्तत्र तत्र दिवाभुंजानत्वसमानाधिकरणपीनत्वस्याभावः यथा दिवा रात्रौ चाभोजीति व्याप्तिः संभवति तथापि न सा पीनत्वरात्रिभोजनयोर्हेतुसाध्ययोः । किंतु तदभावयोः । अथ चात्र व्याप्तिस्मृत्यादेरपेक्षापि न दृश्यते इत्यर्थापत्तिप्रमाणान्तरमेव साधीयः[5] ।

[1] वेदान्तपरिभाषार्थापत्तिनिरूपणे टीकोद्धृतोवाक्यम्- परिभाषाप्रकाशिका श्रीयुक्त-अनन्तकृष्णशास्त्रिकृता कलिकताविश्वविद्यालयेन प्रकाशिता सन् १९३० पु.ट. २३९,२४०

[2] मीमांसाश्लोकवार्तिकस्य अर्थापत्तिप्रकरणे श्लोकसंख्या २८-२९

[3] वेदान्तपरिभाषा शिखामणिमणिप्रभाटीकासहिता राष्ट्रियसंस्कृतसंस्थानतः प्रकाशिता २०११ पु.सं. २७४

[4] वेदान्तपरिभाषा शिखामणिमणिप्रभाटीकासहिता राष्ट्रियसंस्कृतसंस्थानतः प्रकाशिता २०११ पु.सं. २८०

[5] अभ्यंकरोपाह्ववासुदेवशास्त्रिप्रणीतः अद्वैतामोदः आनन्दाश्रममुद्रणालये प्रकाशितः१९१८ पु.ट. १८

 ISSN : 2249-538X

## गूढार्थदीपिकातत्त्वालोककाराणां मतम्-

अनुमिनोमीतिवदर्थापयामि कल्पयामीति विलक्षणप्रमासाधकानुभवस्य सत्त्वात् अर्थापत्तिरपि प्रमाणान्तरमेव। तादृशविलक्षणप्रमाकरणेन प्रमाणेनापि विलक्षणेन भवितव्यम् इत्यनुमानात्, भिन्नं प्रमाणमर्थापत्तिलक्षणमावश्यकम्। अर्थापत्तिः व्यतिरेक्यनुमाने नान्तर्भवति। यत्र यत्र हेतुस्तत्र साध्यमिति हेतुव्यापकं साध्यमिति यदा गृह्यते तदा व्याप्येन हेतुना व्यापकज्ञानेऽनुमिनोमीत्यनुव्यवसायो जायते। तत्सिद्धामनुमितिं प्रति हेतुव्यापकसाध्यसामानाधिकरण्यरूपसाध्यव्याप्तिज्ञानं हेतुरध्यवसीयते। यदा तु वह्निं विना धूमस्यानुपपद्यमानत्वस्य वह्न्यभावव्यापकाभावप्रतियोगित्वरूपस्य धूमे ग्रहः, तदा ह्यनुपपद्यमानेन धूमेन उपपादकवह्निज्ञाने धूमेन वह्निं कल्पयामीत्यनुव्यवसायः। तत्सिद्धा प्रमितिः न अनुमितिः। अनुमितिकारणस्य साध्यसाधनयोर्व्याप्यव्यापकभावग्रहः अर्थापत्तौ न भवति तस्मात् नान्तर्भवति। अनुमानस्थले तु कल्प्यकल्पकाभावयोः व्याप्यव्यापकभावस्य ग्रहात्। स च ग्रहः अनुमितिकारणविलक्षणो विलक्षणकल्पनाख्यप्रमितिकरणं भवत्येव हि मानान्तरं, तेन अगतार्थत्वात्। व्यतिरेक्यनुमानस्यैवाभावात् तत्रार्थापत्तेरन्तर्भावयितुमशक्यत्वात्। तदभावव्यापकीभूताभावप्रतियोगित्वमपि साध्यनिरूपिता व्याप्तिः व्यतिरेकव्याप्तिः उच्यत इत्यस्त्येव तत्रानुमितिसामग्रीत्यपि न शङ्कनीयम्। तत्र हि साध्याभावव्यापकता हेत्वभावे भासते, न साध्यस्य हेतुव्यापकतेति, हेत्वभावव्याप्यत्वं साध्याभावे गृह्येतापि, न साध्यव्याप्यत्वं हेतोः। अतो भासमानस्योक्ताभावप्रतियोगित्वस्य परिभाषया साध्यनिरूपितव्याप्तित्वोपगमेन प्रमाणाल्पत्वमिच्छतः तव, आकाङ्क्षादेरपि परिभाषया व्याप्तित्वाभ्युपगमेन अनुमान एव शब्दाद्यन्तर्भावेन महत्यभिमतसिद्धिः स्यात् इति, तस्य व्याप्तित्वस्यानुपेयत्वात्। न चोक्तप्रतियोगित्वं व्याप्यमात्रनिष्ठत्वात् व्याप्तित्वेनाभ्युपगन्तुमुचितं, न चाकाङ्क्षादिकमिति वाच्यम्। परिभाषया व्याप्तिपदाभिधेयस्य अनुमित्युपयोगित्वे परिभाषया व्याप्तिपदाभिधेयत्वस्याकाङ्क्षादेरपि संभवात्। न हि परिभाषा वाच्यधर्मसंबन्धमपि कथंचित्पुरस्करोति, अन्यथा नदीवृद्ध्यादेः तत्र तत्रार्थे परिभाषात्वानुपपत्तेः। अस्तु वा उक्तप्रतियोगित्वस्य व्याप्तित्वं, तथापि यदा कल्पयामीत्येव विलक्षणप्रमानुभवः तज्ज्ञानानन्तरं, तदा तज्ज्ञानस्य तत्करणत्वाद्, दुर्वारमेव प्रमाणान्तरत्वमिति।[१]

## अर्थापत्तिप्रमाणस्य विशेषोपपादनम्-

अत्र विशेषः तत्रोपपाद्यज्ञानं नाम उपपाद्याकारान्तःकरणवृत्तिःकरणं[२] व्यपारवदसाधारणकारणं करणमिति प्रकृते कः व्यापारः स्याद् येन व्यापारेणार्थापत्तिप्रमाणं स्याद्, अत्र व्यापारो नामेति उपपाद्याकारवृत्तेर्विषयेण साकं सम्बन्धः स एव व्यापाररूपः यतो व्यापारस्य लक्षणं तज्जन्यत्वे सति तज्जन्यजनकत्वव्यापारः यथा उपपाद्यज्ञानं पीनत्वज्ञानं तस्योपपादकविषयेण सह विषयताख्यसम्बन्धः तज्जन्यं यदुपपादकज्ञानं तत्फलम् तत्र यः व्यापारः विषयताख्यसम्बन्धः तस्मिन् उपपाद्यज्ञानजन्यत्वं सत् उपपादकज्ञानजनकत्वं वर्तते। तादृशव्यापारवदुपपाद्यज्ञानम् इति प्रमाणम्। रत्नप्रभाकारस्तु संस्कारव्यापारः अर्थापत्तौ प्रमाणम्, तत उपपाद्यज्ञानत्वेन तज्जन्यज्ञानत्वं फलभूतार्थापत्तिलक्षणं चार्थापत्तिप्रमाणलक्षणं तत्करणं च नान्तःकरणं न चान्यत्, किन्त्वनुमितौ व्याप्तिज्ञानमिव तत्संस्कारव्यापारकम् शिखामणौ।[३] एतस्य विवरणं तु मणिप्रभायाम्- तत्करणत्वं च उपपाद्यज्ञानरूपार्थापत्तिप्रमाकरणत्वम्। व्याप्तिज्ञानमिव तत्संस्कारव्यापारकम्- उपपाद्यज्ञानसंस्कारव्यापारकम्। यद्यपि सामान्यतः उपपादकज्ञानसिद्धावपि उपपाद्याधिकरणव्यक्तिविशेषवृत्तितया ज्ञानस्यासिद्धेः अतः अपूर्वभूतायाः प्रमायाः

[१]श्रीमद्भगवद्गीता श्रीमधुसूदनसरस्वतीस्वामिकृतया गूढार्थदीपिकाव्याख्यया श्रीधर्मदत्तशर्मविरचितेन गुढार्थदीपिकातत्त्वालोकेन च संयुता , केन्द्रीयसंस्कृतविश्वविद्यालयतः प्रकाशिता २०२१ पु.ट. ४५२

[२]वेदान्तपरिभाषार्थापत्तिनिरूपणे उद्धृतवाक्यम् वेदान्तपरिभाषार्थापत्तिनिरूपणे टीकोद्धतवाक्यम् - परिभाषासंग्रहाख्यटीका लेखकः श्रीपंचाननभट्टाचार्य।

[३]वेदान्तपरिभाषायाः रामकृष्णाध्वरिकृतशिखमणिटीकायाम् अर्थापत्तिनिरूपणप्रसंगे।

जनकत्वात् । अज्ञातज्ञापकत्वेन प्रमाणत्वं रक्षितं बोध्यम्[१] । उपपादकं व्यापकं भवति उपपाद्यो व्याप्यो भवति । अभावयोर्व्याप्तिः मध्ये विपरीतं भवति । तथा अर्थापत्तेः लक्षणं भवति । उपपादकाभावव्यापकीभूताभावप्रतियोगित्वमुपपाद्यत्वमिति । उपपाद्याभावव्याप्याभावप्रतियोगित्वमुपपादकम् । यत्र उपपादकाभावस्तत्रोपपाद्याभावः इति रीत्या उपपादकाभावस्य व्याप्यत्वमुपपाद्याभावस्य च व्यापकत्वं बोध्यम् । तस्मात्प्रमाणान्तरत्वमेवार्थापत्तेः ।

## उपसंहारः-

प्रमाणान्तरस्वीकारे न तावदाग्रहो विद्यते मीमांसकानां वेदान्तिनां वा । तथा च श्लोकवार्तिकवचनम् – "एवं स्वभावाप्यनुमानशब्दं लभेत चेदस्तु यथेप्सितं नः[२]" इति । अर्थापयामीत्यनुभवसिद्धजातिविशेषः तदवच्छिन्ना प्रमा, रूढ्या अर्थस्य आपत्तिः ज्ञानमिति, योगेन च अर्थस्य आपत्तिर्ज्ञानं यस्मात् प्रमाणात् तद् अर्थापत्तिः प्रमाणमिति । अर्थापत्तिर्नाम अन्यथानुपपत्तिज्ञानमिति । प्रभाटीकारस्तु- उपपाद्यज्ञानहेतुभूतमुपपाद्यज्ञानमर्थापत्तिः प्रमाणम् । उपपादकज्ञानमर्थापत्तिः प्रमा फलम् । यथा पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र पीनत्वं रात्रिभोजनानुपपत्त्यासम्भवीति रात्रिभोजनं कल्पयति । अत्रोपपादकज्ञानहेतुभूतं पीनत्वज्ञानमुपपाद्यं सदर्थापत्तिः प्रमाणम् । रात्रिभोजनज्ञानमुपपादकं सदर्थापत्तिः प्रमेति । तत्र योऽर्थोऽन्येन केनचित्कल्पनीयेन विना नोपपद्यते सोऽर्थः "उपपाद्यः" इति । यस्य च कल्पनयार्थस्याभावे सत्युपपाद्यं नोपपद्यते सोऽर्थः "उपपादकः" इति सर्वत्रावश्यमेव ध्येयमित्यलम् ।

## सन्दर्भग्रन्थसूची-


i. स्वरूपप्रकाशः- राष्ट्रियसंस्कृतसंस्थानतः प्रकाशितः २०१०
ii. वेदान्तपरिभाषा मणिप्रभाख्यटीकयासंवलितया शीखामणियुतया च राष्ट्रियसंस्कृतसंस्थानतः प्रकाशिता २०११
iii. ईशादि नौ उपनिषद् शाङ्करभाष्यसहिता गीताप्रेस्
iv. सिद्धान्तबिन्दुः न्यायरत्नावलीसहितः महेशानुसंधानसंस्थानतः प्रकाशितः १९७८
v. अद्वैततत्त्वशुद्धिः अनन्तकृष्णशास्त्रिविरचिता कैरविणीक्षेत्रस्थभारतीविजयमुद्रणालयद्वारा मुद्रापिता प्रकाशिता च १९५८
vi. मीमांसाश्लोकवार्तिक हिन्दीव्याख्याकार- प.दुर्गाधर झा, कामेश्वरसिंहदरभंगाविश्वविद्यालयतः प्रकाशिता १९७९
vii. प्रमाणकौस्तुभम् आचार्यभगवत्श्रणशुक्लमहोदयेन सम्पादिता २०१८
viii. वेदान्तपरिभाषा परिभाषाप्रकाशिकाव्याख्यासहिता, श्रीयुक्तान्तकृष्णशास्त्रिकृता कलिकाताविश्वविद्यालयेनप्रकाशिता १९३०
ix. वेदान्तपरिभाषा शिवदत्तकृतार्थदीपिकासहिता, चौखम्बासंस्कृतसीरिजेन प्रकाशिता १९८४
x. वेदान्तपरिभाषा श्रीपंचाननभट्टाचार्यकृतपरिभाषासंग्रहाख्यटीकासहिता तेनैव सम्पादिता
xi. न्यायसिद्धान्तमुक्तावली ज्वालाप्रसादगौडकृतविलासिनीहिन्दीसंस्कृतटीकाद्वयसहिता १९६०
xii. श्रीमद्भगवद्गीता श्रीमधुसूदनसरस्वतीस्वामिकृतया गूढार्थदीपिकाव्याख्यया श्रीधर्मदत्तशर्मविरचितेन गुढार्थदीपिकातत्त्वालोकेन च संयुता, केन्द्रीयसंस्कृतविश्वविद्यालयतः प्रकाशिता २०२१
xiii. अद्वैतामोदः, अभ्यंकरोपाह्ववासुदेवशास्त्रिप्रणीतः आनन्दाश्रममुद्रणालये प्रकाशितः१९१८


[१]सिद्धान्तबिन्दुग्रन्थे प्रमाणकथनावसरे

[२]मीमांसाश्लोकवार्तिकस्य अर्थापत्तिप्रकरणे श्लोकसंख्या ८८


ISSN : 2249-538X

# पूर्वमीमांसाशास्त्रदिशा क्षणभङ्गवादखण्डनम्

प्रभातकुमारमण्डलः*
शोधच्छात्रः, वि.शै.शोधसंस्थानम्
बेलुडमठः

***लेखसारः*** *– सौगताः बौद्धाः सर्वं क्षणिकं क्षणिकं, दुःखं दुःखं, स्वलक्षणं स्वलक्षणं, शून्यं शून्यम् इति चतुर्विधभावनया परमपुरुषार्थं कल्पयन्ति। एतद्भावनाचतुष्टयमवलम्ब्यैव योगाचारादयः चत्वारः सम्प्रदायाः प्रवृत्ताः। ते हि सर्वेपि भावाः क्षणिकाः इति मन्यन्ते। शब्दादिनित्यत्ववादिनो मीमांसकादयस्तु वादमिमं निराकुर्वते। यथा शास्त्रदीपिकायां शब्दनित्यत्वाधिकरणे पार्थसारथिमिश्रचरणैरुक्तम् – तस्मान्न सर्वभावानां क्षणिकत्वं नतरां शब्दस्य, तस्य ह्यन्तेपि विनाशो नास्ति यतः सूक्ष्मविनाशकल्पना स्यात्, तस्मान्नित्यः शब्दः[१] इति। तर्कभाषायामपि केशवमिश्रेण हेत्वाभासनिरूपणावसरे व्याप्तिग्राहकप्रमाणाभावात् क्षणिकत्वसाधकसत्त्वहेतोः व्याप्यत्वासिद्धत्वं निरूपयता क्षणभङ्गवादः निराकृतः – न च सत्त्वक्षणिकत्वयोर्व्याप्तिग्राहकप्रमाणमस्ति[२] इत्यादिना। प्रकृते तु प्रबन्धे बौद्धानां क्षणभङ्गवादे का युक्तयः, कथं च मीमांसकैः ताः खण्ड्यन्ते इति वितन्यते।*

***कूटशब्दाः*** *– क्षणिकत्वं, सत्ता, क्रमाक्रमौ, ध्रुवभाविता, विनाशः।*

## प्रस्तावना

सौगताः क्षणिकत्वशब्देन द्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वं परिभाषन्ते, न तु तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्। सर्वेपि घटपदादयः पदार्थाः क्षणिकाः क्षणभङ्गुराः इति क्षणिकत्ववादिनः। एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेत्[३] इति, लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः[४] इति च न्यायाभ्यामस्मिन् प्रतिज्ञाते विज्ञातलक्षणे च वस्तुनि भवति किं प्रमाणमिति जिज्ञासा। न तावत्प्रत्यक्षं तत्र प्रमाणम्। तद्धि कालान्तरं न निषेधति, अपि तु कालसत्तामेव बोधयति। यथा नीलप्रत्यक्षं नीलक्षणसत्तामेव बोधयति, न तु पीतिमानं निषेधति। दृश्यस्य निषेधः तददर्शनेनैव सम्भवः, सम्प्रति तु कालान्तरं दृश्यं नास्तीति कुतस्तस्य निषेधः। किञ्च क्षणिकत्वे भावानां सोयं घट इत्यादिप्रत्यभिज्ञानुपपत्तिः। तथाहि सोयं घटः इति प्रत्यभिज्ञा पूर्वोत्तरक्षणयोरैक्यं प्रतिपादयति। सा सदृशपरापरोद्भवात् भ्रम एवेति केचिन्निरूपयन्ति, तदयुक्तं मृद्दण्डादीनामभावे घटादेः पौनःपुन्येन सम्भवासम्भवात्। तत्र ज्ञानादेवोत्पत्तिरित्यपि न वाच्यं पूर्वमपि ज्ञानादेवोत्पत्त्युपपत्तौ मृदादीनां कुत्राप्यनुपयोगप्रसङ्गात्। अतो न प्रत्यक्षं क्षणिकत्वे मानम्। स्यादेतन्न स्यात्तत्र प्रत्यक्षप्रामाण्यमनुमानेन तु तत्सेत्स्यतीति चेत्सत्यं भवेदेवं यदि स्यात् लिङ्गं क्षणिकत्वसाधकं, न तु तदस्ति। इत्थं प्रमाणाभावात् क्षणिकत्वासिद्धिरिति केचित्।

## 1. बौद्धनये क्षणिकत्वसिद्धिः

तत्र सतो वस्तुनः स्वभाव एव प्रमाणमिति बौद्धाः वदन्ति। तथाह्यनुमानं – विमतं भावजातं क्षणिकं सत्त्वात् यथा जलधरपटलमिति। जलधरपटलं हि प्रतिक्षणमन्यथान्यथा प्रतीयते, तच्च तस्य क्षणिकत्वे एव सिध्यतीति, सति जलधरपटले क्षणिकत्वं प्रत्यक्षसिद्धम्। एतेन व्याप्तिग्राहकप्रमाणाभावात्सत्त्वं व्याप्यत्वासिद्धमिति मतं निरस्तम्। सत्त्वेन च व्याप्तिपक्षधर्मतावता सद्धेतुनान्येषां भावानां क्षणिकत्वमनुमीयते। तदुक्तं सर्वदर्शनसंग्रहे – तत्र क्षणिकत्वं नीलादिक्षणानां

---

***सम्पर्कसूत्रम्** – 8697911327, Email – PROVATKM0711@GMAIL.COM

[१]शास्त्रदीपिका, पत्रसंख्या 145
[२]तर्कभाषा, पत्रसंख्या – 117
[३]सर्वदर्शनसंग्रहे बौद्धदर्शनम्, पत्रसंख्या – 18
[४]सांख्यकारिका - 4, पत्रसंख्या - 95

सत्त्वेनानुमातव्यं यत्सत्तत् क्षणिकं यथा जलधरपटलं सन्तश्चामी भावा[१] इति। सत्त्वं च अर्थक्रियाकारित्वलक्षणम्। प्रयोजनभूता क्रिया अर्थक्रियेत्युच्यते तत्कारित्वमेव सत्त्वम्। तच्च घटादिषु प्रत्यक्षसिद्धम्। एतेन कैश्चित्सत्त्वस्य असिद्धत्वं यदाशङ्कितं तदप्यपास्तम्। जगति नास्ति कश्चिदपि पदार्थो योर्थक्रियाकारी न भवति, यतः स्वज्ञानस्यापि सर्वे भावाः कारणम्। उक्तञ्च शास्त्रदीपिकायां पार्थसारथिमिश्रैः पूर्वपक्षतया क्षणभङ्गवादं निरूपयद्भिः - नहि स भावः सत्तां लभते यो न कांचित् अर्थक्रियामारभते[२] इति। किञ्च अज्ञायमानमपि किञ्चित् सदस्तीति यत्सम्भाव्यते तदपि सर्वं विज्ञानं प्रत्यालम्बनं भवत्येवेति लब्धं अर्थक्रियाकारित्वम्।

## 2. न्यायेन क्षणिकत्वसिद्धिः

अपि च व्यापकव्यावृत्या व्याप्यव्यावृत्तिः इति न्यायोपि भावानां क्षणिकत्वे मानम्। तेन हि न्यायेन अर्थक्रियाकारित्वलक्षणा सत्ता क्षणिकत्वपक्षे एव भावानामुपपद्यते, नाक्षणिकत्वपक्षे इति निरूपयन्ति। तथाहीयमर्थक्रियाकारित्वलक्षणा सत्ता क्रमाक्रमाभ्यां व्याप्ता। क्रमाक्रमौ च क्षणिकत्वपक्षे एव सत्त्वं स्थापयतः न तु अक्षणिकत्वे। अत्र भावाक्षणिकत्ववादिनः बौद्धैः पृच्छ्यन्ते - अक्षणिकः स्थायी भावः किम् अक्रमेण नाम युगपत् सर्वाः अर्थक्रियाः करोति आहोस्वित् क्रमेण इति। यदि अक्रमेणैव सर्वाः अर्थक्रियाः करोतीत्युच्यते तदा द्वितीयक्षणे कृत्यभावादर्थक्रियाकारित्वविरहादसत्त्वापत्तेः क्षणिकत्वमेव स्यात्। इतरथा क्रमेण स्थायिनोर्थक्रियाः भवन्तीति पक्षे वर्तमानार्थक्रियाकरणवेलायां भावस्य अतीतानागतयोः क्रिययोः सामर्थ्यमस्ति न वेति प्रश्नः। आद्ये सर्वार्थक्रियासमर्थः स भावः किमर्थं कांचिदेव अर्थक्रियामारभते नान्यामित्यपरः प्रश्नः। नहि समर्थः कालक्षेपं सहते। यो यत्र समर्थः स तत्करोति एव। शास्त्रदीपिकायामप्युक्तं – स हि भावः सर्वक्रियासमर्थः किमिति कांचिदेवारभते नान्यां समर्थस्य क्षेपायोगात्[३] इति। इतरथा तु वर्तमानार्थक्रियाकरणकाले स्थायिनो भावस्य अतीतानागतयोः अर्थक्रिययोः सामर्थ्यं नास्तीति पक्षे स्थायिन एकस्मिन् कालेसामर्थ्ये कालान्तरेपि असामर्थ्यात्कदापि अतीतानागतार्थक्रिये न कुर्यात् भावः। अन्यथा असमर्थवस्तुस्वरूपापेक्षया समर्थवस्तुस्वरूपे भेदस्य अवर्जनीयत्वेन वस्तुनः स्थायित्वभङ्गः। अर्थक्रियाकारित्वं हि सामर्थ्यमात्रनिबन्धनम्। यद्यदा यन्न करोति तत्तदा तत्र असमर्थमेव यथा शिलाशकलमङ्कुरे। अत्र केचन सहकार्यपेक्षया बिलम्बः इति निरूपयन्ति। तथा च स्थायी भावः सदैव त्रैकालिकार्थक्रियाकरणसमर्थः, परन्तु यदा यादृशसहकारिसन्निधिः तदा तादृशकार्योत्पत्तिः। क्रमवत्सहकारिलाभाच्च स्थायी अतीतानागते अर्थक्रिये कुर्यादिति सहकारिक्रम एव कार्यक्रमनिबन्धन इत्यदोषः। तत्र बौद्धाः स किं सहकारी भावस्य उपकुरुते न वेति पृच्छन्ति। यदि अकिञ्चित्करास्ततस्ते उपेक्षणीयाः। यदि च भावमुपकुरुते इत्युच्यते तदा सहकारिजन्यः सोतिशयः भावात् भिन्नो वा अभिन्नो वेति विचारणीयम्। भिन्नश्चेत् अलं कार्यजनने भावेन, अतिशयेनैव कार्योत्पत्तिसम्भवे, भावोतिशयहेतुः स्यात्। किञ्च तत्रापि सहकारिजन्योतिशयः अतिशयान्तरमारभते न वेति संशयस्तु भवत्येव। प्रथमे अनवस्थाप्रसङ्गः। तेनापि अतिशयान्तरस्य जन्यत्वात्। द्वितीये च तस्यैव कारणत्वं स्यात् न भावस्य। सहकारिजन्योतिशयो भावादभिन्न इत्युक्ते तु तत्कालजन्मा भावः क्षणिक एव सिध्यति। तदुक्तं शास्त्रदीपिकायां – सहकारिणो ह्यकिंचित्करा अनपेक्ष्याः किंचित्कराश्चेद्यत्तैः क्रियते, तदेव कार्यसाधनं स्यात्, तदनन्तरं कार्यनिष्पत्तेः भावस्तत्कारणमेव स्यात् तदनन्तरं कार्यनिष्पत्तेः[४]...इत्यादि। न च ताभ्यामन्यः क्रमाक्रमोभयरूपः क्रमाक्रमोभयाभावरूपो वा प्रकारः सम्भवति। प्रकाशान्धकारयोरिवात्यन्तविरुद्धत्वस्वभावात्क्रमाक्रमयोरेकस्याभावेपरं तिष्ठत्येवेति उभयाभावः शशविषाणायमानः। मिथो विरुद्धयोः सामानाधिकरण्यासम्भवाच्च क्रमाक्रमोभयरूपोपि प्रकारोसम्भवः। तदुक्तं सर्वदर्शनसंग्रहे

[१]सर्वदर्शनसंग्रहे बौद्धदर्शनम्, पत्रसंख्या - 20
[२]शास्त्रदीपिका, पत्रसंख्या - 143
[३]तदेव
[४]तदेव

– न च क्रमाक्रमाभ्यामन्यः प्रकारः सम्भवति[1] इति । उदयनाचार्येणापि प्रत्यपादि न्यायकुसुमाञ्जल्याम् –

**परस्परविरोधे हि न प्रकारान्तरस्थितिः । नैकतापि विरुद्धानामुक्तिमात्रविरोधतः ॥[2] इति ।**

एवं क्रमाक्रमयोरन्यतरेणापि स्थायिनः अर्थक्रियाकारित्वासम्भवात्, क्षणिकस्य च सत्त्वसम्भवात् सर्वेपि भावाः क्षणिकाः एव इति क्षणिकत्वसिद्धिः । निरूपितं चैतत् ज्ञानश्रिया –

**यत्सत्तत्क्षणिकं यथा जलधरः सन्तश्च भावा अमी सत्ता शक्तिरिहार्थकर्मणि मितेः सिद्धेषु सिद्धा न सा ।**
**नाप्येकैव विधान्यथा परकृतेनापि क्रियादिर्भवेद्द्वेधापि क्षणभङ्गसंगतिरतः साध्ये च विश्राम्यति ॥[3] इति ।**

## 3. क्षणभङ्गवादनिराकृतिः

अत्र न तावदर्थक्रियाकारितैव सत्ता, सतः ह्यर्थक्रियाकारिता न तु सैव सत्ता[4] इति मीमांसकाः वदन्ति । सर्वोपि भावः अर्थक्रियाकारीति नियमोपि तैर्न स्वीक्रियते, अतत्कारिणोपि सम्भवात् । यच्च स्वज्ञानं प्रति सर्वस्यापि भावजातस्य कारणत्वं तु स्यादेवेत्युक्तं, तदप्यसत् अज्ञायमानस्यापि स्वरूपेण सद्भावसम्भवात् । किञ्च अप्रज्ञायमानत्वेपि सत्त्वेन सम्भावमानस्य विज्ञानं प्रति आलम्बनहेतुता तु स्यादिति बौद्धैर्यदुक्तं, तदप्यापातरमणीयमतीतानागतानां भावानां तदसम्भवात् । नहि अविद्यमानं वस्तु ज्ञानं प्रति हेतुर्भूयात् । अन्यथा सर्वज्ञाननिष्पत्तौ सर्वेषां व्यापृतत्वात् क्रमानभ्युपगमेन च पुनः व्यापारानुपपत्तिः । तेन सर्वज्ञानानन्तरमेव समस्तस्य जगतः शून्यताप्रसङ्गः ।

## 4. स्थायिनः क्रमेण सत्त्वोपपत्तिः

अपि चाक्षणिकस्य स्थायिनो भावस्य क्रमाक्रमयोः अन्तरेणापि अर्थक्रियाकारित्वं न सम्भवतीति हेतोः सत् क्षणिकमेव इति मतमसत् । अक्षणिकस्य भावस्य क्रमेणार्थक्रियाकारित्वसम्भवात् । सर्वक्रियासमर्थः स किमर्थं कांचिदेव अर्थक्रियामारभते नान्यामित्याशङ्कायां च सहकारिव्यपेक्षया तत्र बिलम्बः इति समादधते मीमांसकाः । ते च सहकारिणः किंचित्कराः एव न अकिंचित्कराः । अतो न उपेक्षणीयाः । सहकारिणो हि अतिशयमागन्तुकं भावाद् भिन्नाभिन्नं भिन्नमेव वा कुर्वन्ति, यथा बीजस्य क्षितिसलिलसंयोगेतिशयः । अतिशयालाभे च स्थायिनोपि बीजस्य प्राक् अङ्कुरानारम्भः लाभे च आरम्भ इति न कश्चिद्दोषः । ननु तथा सति स संयोग एव कारणं स्यान्न बीजम्, संयोगादेव तदुत्पत्तिदर्शनात् । तन्न, यतो हि केवलः क्षितिसलिलसंयोगः अङ्कुरं न जनयति । यदि च बीजविशिष्टः संयोगः कारणमिति स्वीक्रियते तत्रापि बीजस्य कारणत्वमङ्गीकृतमेव भवति । किञ्च समर्थस्य कालक्षेपः अयुक्त इति न्यायोप्यसाधु, अन्यथा क्षितिसलिलसंयोगानपेक्षात् कुसूलस्थादेव बीजादङ्कुरः कथं न जायते । अत्र बौद्धाः – एवं सति अन्त्यक्षणप्राप्तः समर्थ एव भावः अनपेक्षस्तत्र जनयितुम् । स च सहकारिणोन्तरा नास्ति, अतस्तैर्विना स्वक्रियां न सम्पादयति । तथा च स्वरूपलाभार्थमेव सहकारिण अपेक्षते भावः न कार्यजननार्थम् । कुसूलस्थं हि बीजमन्यदेव अन्यच्च इदं क्षितिसलिलसंयुक्तं यतोङ्कुरो जायते इति विवदन्ते । तत्र मीमांसकाः पृच्छन्ति - किमिदम् अन्त्यक्षणप्राप्तं क्षितिसलिलसंयुक्तम् अङ्कुरजनकं बीजं कृषीवलप्रयत्नविरहात् कुसूलस्थं स्यादपि चेत् अङ्कुरं जनयति अहोस्विन्नेति । यदि अन्त्यक्षणप्राप्तं क्षितिसलिलसंयुक्तं तत् बीजं कृषीवलप्रयत्नविरहेपि कुसूलस्थं सदङ्कुरं जनयतीति स्वीक्रियते तदा कृषीवलस्य प्रेक्षापूर्वकारिणः प्रयासो व्यर्थ एव भवति । एवं विदुषामपि स्वर्गापवर्गार्थं चैत्यवन्दनादिप्रयासः, तदुपदेशश्च देशिकानाम् सर्वं निरर्थकमेव सेत्स्यति, अन्त्यक्षणप्राप्तात् विज्ञानादेव धर्माधर्मानपेक्षात् मोक्षसिद्धेः । अतो भावः सहकारिणः अपेक्षत इति अकामेनापि स्वीकर्तव्यमेव । ततश्च सहकारिसन्निधिक्रमेण स्थायिनोपि भवास्य क्रमेण अर्थक्रियाः सम्भवन्ति ।

---

[1] सर्वदर्शनसंग्रहे बौद्धदर्शनम्, पत्रसंख्या - 20

[2] न्यायकुसुमाञ्जलिः – 3/8

[3] सर्वदर्शनसंग्रहे बौद्धदर्शनम्, पत्रसंख्या - 26

[4] शास्त्रदीपिका, पत्रसंख्या - 144

तेन क्षणिकत्वविपक्षे स्थायित्वे सत्त्वबाधाभावात् व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिः इति न्यायेन सत्ता क्षणिकत्वपक्षे एव संगच्छते इति यदुक्तम् तदपास्तम् ।

## 5. ध्रुवभावितया क्षणिकत्वसिद्धिः

स्यादेतत् । कृतकानां हि भावानां विनाशस्य अवश्यम्भावित्वादपि क्षणिकत्वं साधयन्ति सौगताः । तथाहि – यद्येषां ध्रुवभावि न तत्र तेषां हेत्वन्तरापेक्षा यथाग्नेः उष्णता ध्रुवभविनीति न सा हेत्वन्तरमपेक्षते । अतो ध्रुवभाविता निषिध्यमानेन हेत्वन्तरापेक्षित्वेन व्याप्ता । प्रकृते च कृतकानां ध्रुवभावी विनाशः । अथवा हेत्वन्तरसापेक्षाः वाससि रागादयः अध्रुवभाविनः । तेन च रागादीनाम् हेत्वन्तरापेक्षत्वम् अध्रुवभावित्वेन व्याप्तमिति ज्ञायते । तद्विरुद्धं च ध्रुवभावित्वं व्यापकविरुद्धोपलब्धिद्वारा विनाशस्य हेत्वन्तरापेक्षां निवारयति । स च निरपेक्षः स्वाभाविको जन्मानन्तरमेव भवति न हेत्वन्तरमपेक्षत इति सिद्धः क्षणभङ्गवादः । मुसलप्रहारादयस्तत्र घटादीनां विनाशे हेतवः सन्तीति केचिदाक्षिपन्ति । वस्तुतस्तु मुसलप्रहारादयः विसदृशसंतानहेतव एव, न विनाशकारणानि । परमार्थतस्तत्र प्रतिपत्तारः सदृशपरापरोत्पत्त्या क्षणानां भेदं लक्षयितुम् न प्रभवन्ति । अतस्तत्त्वभ्रान्त्या विनाशमजानन्तो यदा मुसलप्रहाराद्यनन्तरमेव विसदृशसंतानं वीक्षन्ते तदा तत्त्वतो विनाशो जात इति मत्वा मुसलप्रहारादीन्येव विनाशे हेतव इति वदन्ति । वस्तुतस्तत्र हेतुरेव नास्ति विनाशस्य । यदि विनाशो हेत्वन्तरजन्मा इति स्वीक्रियते तदा स किं भावात् भिन्नोथवाभिन्न इति संशयो जायते । तयोरभेदः कथंचिदपि प्रतिपादयितुमशक्यः, विनाशभावयोः हेतुभेदात् । भिन्ने च भावात् विनाशे, नाशानन्तरमपि पूर्ववदुपलभ्येत भावः । यथा पटात् भिन्ने घटे उत्पन्ने पटः प्रतीयते तद्वत् । तस्मात् स्वभावत एव भावाः विनाशस्वभावाः जायन्ते इति अङ्गीकार्यम् । किञ्च अन्तरापि मुसलप्रहारादिभिः प्रयत्नरक्षितानामपि घटादीनां कियतापि कालेन अवयवक्षयविश्लेषवशेन विनाशो लोके दृष्ट एव । तत्र भावस्य उत्पत्तिप्रभृति किंचित्किंचित् अन्यथात्वमेव हेतुरिति वक्तव्यमन्यस्य प्रकारस्य वक्तुमशक्यत्वात् । तच्च नानारूपत्वमेकस्य घटस्य न सम्भवति नानात्वैकत्वयोः विरोधात् । तस्मात् क्षणिकाः एव भावाः ।

## 6. ध्रुवभावितायाः क्षणिकत्वासाधकत्वम्

विनाशस्य हेत्वन्तरानपेक्षत्वे सद्धेतुत्वेनाभिमता ध्रुवभाविता तावदनैकान्तिकी, घटसंताने ध्रुवभाविनोपि कपालसन्तानस्य मुसलप्रहारादिहेत्वन्तरापेक्षादर्शनात् । ननु यदि हेत्वन्तरापेक्षः विनाशः तदा अवश्यं स भावाद् भिन्नः, ततो विनाशे जातेपि भावस्य पूर्ववदुपलब्धिरिति देषस्तु विद्यते एव । न च घटनाशात्परमपि घटप्रतीतिः लोके दृश्यते । तस्मात् स्वाभाविक एव एष विनाश इति अङ्गीकार्यम् । तत्रायं प्रश्नः किमिदं स्वाभाविको विनाशो नामेति । अथ भावस्वभावादेव विनाशो जायते न तु हेत्वन्तरादित्यर्थः । तत्र भावात् जातो विनाशः किं भावात् भिन्न उताभिन्न इति विचार्यमाणे भिन्नश्चेत् तुल्यो दोषः विनाशपूर्वकाले इव विनाशोत्तरकालमपि पूर्ववत् भावप्रतीतिः स्यादिति आपतति । न चाभिन्नः, अभिन्ने हि विनाशे विनाशस्याप्रत्यक्षत्वात् भावोप्यप्रत्यक्षः स्यात् । किञ्च न खलु अत्यन्तविरुद्धस्वभावयोः एकत्वोपपत्तिः । अपि च यदि विनाशो नाम न किंचित् भिन्नमभिन्नं वा तत्त्वम् अपि तु तुच्छं तत् इति स्वीक्रियते तदापि असति विनाशे जातस्य भावस्य नित्यत्वे क्षणभङ्गसिद्धिः । अतः भावाद् भिन्नः एव विनाशो नाम किञ्चित् अस्ति यः भावस्य उपलब्ध्यादि निरसयतीति अङ्गीकार्यमेव । तदुक्तं शास्त्रदीपिकायां – तस्माद्भिन्नेनापि विनाशेन भावस्योपलब्ध्यादि निरस्यत इत्यकामेनाभ्युपगन्तव्यम्[१] इति ।

## 7. दृष्टान्तासिद्धिः, प्रत्यभिज्ञया स्थायित्वसिद्धिश्च

यच्चोक्तं जलधरपटलमिव प्रतिक्षणमवस्थाभेदेन क्षणिकत्वं स्यात् भावानामिति तदप्यसाधु । नानावस्थानामविरुद्धानां युगपदेकस्मिन् धर्मिणि, विरुद्धानां च क्रमेण सम्भवादवस्थावतो भावस्य प्रतिक्षणं विनाशो नाङ्गीकार्यः । ततश्च नूतनाद्यवस्थाः

[१] शास्त्रदीपिका, पत्रसंख्या - 145

 ISSN : 2249-538X

क्रमेणानुभूय पुराणावस्थां प्राप्तः प्रयत्नरक्षितोपि घटः अवयवविश्लेषणात् विनश्यतीति कल्पनं युक्तमेव । तस्मात् क्षणभङ्गुराः सर्वे भावाः इति सौगतानां वादः कथञ्चिदपि न प्रमाणसहनीयः । प्रत्यभिज्ञानुरोधेनापि भावानां स्थायित्वसिद्धिः । यदेवाहमद्राक्षं तदेवाहं स्पृशामि इत्यादिप्रत्यभिज्ञया भावस्य स्थैर्यसिद्धेः । कुमारिलभट्टपादैः श्लोकवार्तिके महता परिकरेण प्रत्यभिज्ञा एकव्यक्तिनिबन्धनेति प्रतिष्ठापितम् । तथाह्युक्तं शब्दनित्यत्वाधिकरणे –

**प्रत्यभिज्ञा यदा शब्दे जागर्ति निरवग्रहा । अनित्यत्वानुमानानि सैव सर्वाणि बाधते ॥[१] इति ।**

किं बहुना सदेव सौम्येदमग्र आसीत्[२] इत्यादिश्रुतिभिः कथमसतः सज्जायेत[३] इत्यादिश्रौतयुक्तिभिश्च क्षणिकत्वानुमानस्य विरोधादपि न क्षणिकत्वसिद्धिः ।

## 8. उपसंहारः

एवमस्मिन् प्रबन्धे क्षणभङ्गवादः बौद्धैः कथं प्रतिष्ठाप्यते, मीमांसकैश्च तत्कथं निराक्रियते इति संक्षेपतः निरूपितम् । एतदतिरिच्यापि अन्यत्र दर्शनेषु तत्तदाचार्यैरेतन्निराकृतम् । यथा भगवता शङ्कराचार्येण माण्डूक्यकारिकाभाष्ये क्षणभङ्गवादं निराकुर्वतोक्तम् – क्षणिकत्वं च वस्तुनः, ते दूरत एव न्यायापेताः[४] इति । सुरेश्वराचार्योप्याह तैत्तिरीयोपनिषद्भाष्यवार्तिके – नैव साधयितुं शक्यं क्षणिकत्वं कथञ्चन[५] इति । बृहदारण्यकभाष्यवार्तिकेप्युक्तम् – क्षणिकत्वं न भावानां कथंचिदपि युज्यते[६] इति । उदयनाचार्यैरपि आत्मतत्त्वविवेके उक्तं – यत्सत्तत्क्षणिकं यथा घटः, संश्च विवादाध्यासितः शब्दादिरिति चेन्न, प्रतिबन्धिसिद्धेः[७] इति । तत्सर्वमत्र विस्तरभयात् न प्रपञ्चितम् ।

## आश्रितग्रन्थसूची


1. पार्थसारथिमिश्रः, शास्त्रदीपिका(मयूखमालिकाव्याख्यासहिता), सोमनाथः(टीकाकारः), श्रीधर्मदत्तसूरी(सम्पादकः), तृतीय-संस्करणम्, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2003
2. सायणमाधवः, सर्वदर्शनसंग्रहः(दर्शनाङ्कुरव्याख्यासहितः), वासुदेवशास्त्री(टीकाकारः सम्पादकश्च), द्वितीयसंस्करणम्, भाण्डार-करप्राच्यविद्यासशोधनमन्दिरम्, पुण्यपत्तनम्, 2019
3. उदयनाचार्यः, न्यायकुसुमाञ्जलिः(हिन्दीव्याख्योपेतः), विश्वेश्वरसिद्धान्तशिरोमणिः(व्याख्याकारः सम्पादकश्च), प्रथम-संस्करणम्, चौखम्बा विद्याभवन, वाराणसी, 1988
4. ईश्वरकृष्णः, सांख्यकारिका(तत्त्वकौमुदीसहिता), वाचस्पतिमिश्रः(टीकाकारः), पाण्डुरङ्ग जावजी(सम्पादकः), प्रथमसंस्करणम्, निर्णयसागरः, मुम्बाई, 1940
5. केशवमिश्रः, तर्कभाषा(हिन्दीव्याख्यायुता), बदरीनाथशुक्लः(व्याख्याकारः सम्पादकश्च), सप्तमसंस्करणम् मोतीलाल बनारसी-दास, दिल्ली, 2017
6. उदयनाचार्यः, आत्मतत्त्वविवेकः(हिन्द्यनुवादोपेतः), आचार्यकेदारनाथत्रिपाठी(अनुवादकः सम्पादकश्च), प्रथमसंस्करणम् श्रीविद्याप्रेस, वाराणसी, 1983
7. अद्वैतशारदा : https://advaitasharada.sringeri.net


[१] श्लोकवार्तिकम्
[२] छान्दोग्योपनिषत् – 6.2.1
[३] छान्दोग्योपनिषत् – 6.2.2
[४] माण्डूक्यकारिकाभाष्यम् – आगमप्रकरम् 21 कारिका ।
[५] तैत्तिरीयोपनिषद्भाष्यवार्तिकम्, वार्तिकसंख्या - 70
[६] तत्रैव, वार्तिकसंख्या - 618
[७] आत्मतत्त्वविवेकः, पत्रसंख्या – 4

# शौनककृत-दत्तपुत्रविधानमातृकायाः सन्दर्भे दत्तकपुत्रविधानस्य विश्लेषणम्
# (Analysis of Child Adoption System with Reference to Dattaputravidhanam Manuscript of Śaunaka)

सुश्रीः पूर्णिमा थापा*
शोधच्छात्रा, के.सं.वि.,
नवदेहली

***लेखसारः*** *– प्राचीनकालादेव भारतीयन्यायव्यवस्थायां दत्तकविषयकं विवादाधिक्यं दृश्यते । आचार्यमनुप्रोक्तेषु अष्टादशविवादपदेषु ऋणादान-निक्षेप-स्वत्वविक्रय-सम्भुयसमुत्थान- दत्तानपाकर्म-सीमाविवादसाहसादिषु सर्वाधिकविवादप्रदं दत्तकविषयकं भवति । प्रायशः समैरपि धर्मसूत्रकारैः स्मृतिकारैरपि दत्तकपुत्रस्य विधानविषयकः परामर्शो विहितः । द्वादशप्रकारकेषु पुत्रेषु अन्यतमः दत्तकः दत्त्रिमो वा । मातापितृभ्यां विधीयमानायाः दानक्रियायाः कर्मीभूतः पुत्रः दत्तकः इत्यभिधीयते । मनुना प्रोक्तं यत् - मातापितृभ्यां हस्ते जलं गृह्णन्त्यां सङ्कल्पपूर्वकं यः पुत्रः अन्यस्मै प्रदीयते, स दत्तकपुत्र इति उच्यते । हिन्दु-धर्मशास्त्रानुसारं कश्चिद् जनो यदि अपुत्रः सन्नेव म्रियते तर्हि पितृलोके इहलोकतः पारलौकिकप्राप्तिस्तस्य न संभवति, वंशरक्षा न भविष्यतीत्यादि । अपुत्रास्तथा मृतपुत्राश्चार्थात् येषां पुत्रो न जातः, जातश्चेदपि मृतो वा, तेभ्य एव पौत्रप्रपौत्रादीनामनुपस्थित्यवस्थायां दत्तकपुत्रस्य विधानं व्यवस्थाप्यते इति शौनकाचार्येण स्वप्रणीतायां शौनकस्मृत्यां दत्तपुत्रविधाने उक्तम् । समाजे चतुर्णां वर्णानां कृते दत्तपुत्रस्य विधानं भिन्नं वर्तते । ब्राह्मणानां सपिण्डेषु पुत्रग्रहणं कर्तव्यं तदाभावे असपिण्डेषु ग्रहणं कर्तुं शक्यते । अन्येषां क्षत्रिय-वैश्याणां कृते समगोत्रेषु वा गुरुगोत्रेषु वा पुत्रसंग्रहणं कर्तव्यम्, केवलम् शूद्रणां कृते समगोत्रे यदि न लभ्यते तर्हि भागिनेय-दौहित्रादिपुत्रग्रहणं शक्यते । पुत्रग्रहणात्पूर्वं गणेशादिषोडशमातृकायां पूजनं कर्तव्यम् अनन्तरं पुत्रसंग्रहणकाले दात्रे वस्त्रालङ्कारादिकं दत्वा पुत्रग्रहणकालानन्तरं ब्राह्मणेभ्यः मित्रेभ्यश्च भुयांसि उपायणानि दत्वा तान् भोजयेत्तदा एतत्कार्यं सम्पन्नं भवति । इत्थं शौनकविरचितस्य दत्तपुत्रविधानस्य मातृकाधारेण विश्लेषणात्मकेन शोधप्रविधिनाध्ययनं विधाय दत्तपुत्रविधानस्य प्राचीनभारतीयमन्तव्यानि तथा तेषामाधुनिकप्रासङ्गिकताश्च शोधपत्रेऽस्मिन् स्थालीपुलाकन्याय्येन यथाशक्यं संविवेच्यते ।*

***कूटशब्दाः*** *– दत्तकपुत्रविधानम्, प्राचीनभारतीयन्यायव्यवस्था, शौनकाचार्यः, व्यवहारपदम्, पुत्रदानम्, धर्मशास्त्रम्, स्मृतिशास्त्रम्*

## प्रस्तावना (Introduction)

दानार्थक-दाधातोः कर्मणि क्तप्रत्यये कृते दत्तशब्दो निष्पद्यते, तथा हि दानक्रियायाः कर्म दत्त-शब्देन उच्यते अर्थात् यो दानीयरूपेण दीयते सः दत्तः, तस्मिन्नेवार्थे स्वार्थे कप्रत्यये सति दत्तकशब्दो भवति । मातापितृभ्यां विधीयमानदानक्रियायाः कर्मीभूतः सन्तानः दत्तक इत्यभिधीयते । अस्माकं समाजः वंशपरम्परायां अग्रे गच्छति । जनाः स्वपुत्रैः वंशपरम्परां चालयन्ति । कश्चिद् जनः यदि अपुत्रकावस्थायां म्रियते तर्हि समाजे तस्य वंशवृद्धिः न भवति । वैदिककालतः मन्यते यत् मानवरूपेण गृहीतजन्मभिः देवताभ्यः, ऋषिभ्यः, पितृभ्यश्च गृहीतम् ऋणं क्रमशः यज्ञेन, ब्रह्मचर्यपालनेन, एवं पुत्रजन्मना आपूर्यते[1] । ऋग्वेदे उक्तं यत् योग्यपुत्रः वंशपरम्परां चालयित्वा मृतपितृव्याणां प्रति शान्तिकं कृत्वा स्वस्य जीवने परिपूर्णतां

***सम्पर्कसूत्रम्** - 8583034649, Email- thapapurnima460@gmail.com

[1]जयमानो वै ब्राह्मणस्त्रिभिर्न्वा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजाया पितृभ्य एषा वा अनृणो यः पुत्री यज्वा ब्रह्मचरिवसि ॥ (तैत्तिरीयसंहिता ६.३.१०.५)

प्राप्स्यति[१] । धर्मशास्त्रे स्मृतिशास्त्रे वा उक्तं यत् कोऽपि जनो यदि अपुत्रकस्तिष्ठति अथवा पुत्रजन्मनानन्तरं तत्पुत्रो म्रियते तर्हि परलोके तस्य गतिः न भवतीति । तर्हि तादृग्जनानां गत्यर्थं वा समाजे तेषां वंशपरम्परायाः रक्षार्थं सगोत्रीयाणां पुत्रः दत्तकरूपेण स्वीकर्तुं शक्यत इति । मानवधर्मशास्त्रं मनुस्मृत्यां वा पुत्रशब्दस्य व्युत्पत्तिमुक्त्वा तस्यावश्यकताऽपि उल्लिखिता[२] । याज्ञवल्क्येन उक्तं यत् पुत्रेण, पौत्रेण, प्रपौत्रेण स्वर्गलोकः प्रापयिष्यते[३] ।

## दत्तकपरम्परा

वेदेष्वपि दत्तकविषयकाः मन्त्राः दृश्यन्ते, अनेनावगन्तुं शक्यते यत् दत्तकस्य परम्परा वैदिककालादेव प्रवहमाना वर्तते । विषयेऽस्मिन् ऋग्वेदे १०.६२.६ तः पञ्च मन्त्राः निबद्धाः वर्तन्ते । शुक्लयजुर्वेदे १.२ मन्त्रस्य उपयोगः द्रष्टुं शक्यते । तैत्तिरीयसंहितायां पुत्रदाने अत्र्यृषेः कथा वर्णितास्ति यत् सः स्वस्य एकं पुत्रम् और्वर्षये दत्तवानिति । (७-१-७-१) पुत्रं दत्वाऽनन्तरम् आत्मानम् एकलम् अनुभूय चतुरात्रयज्ञं कृत्वा पुत्रं लब्धवान् । ऐतरेयब्राह्मणे शुनःशेपाख्याने विश्वामित्रस्य एकशताधिकपुत्रप्राप्त्यनन्तरं देवरातं दत्तपुत्ररूपेण स्वीकृतवान् । अनन्तरं स्मृतिपुराणादिषु दत्तकपुत्रस्य व्यापकरूपेण समुपबर्हणं क्रियते । द्वादशसु पुत्रेषु दत्तकपुत्रग्रहणस्य परम्परा अतिप्राचीना वर्तते ।

आधुनिकभारतवर्षे भारतीयहिन्दु-व्यवहारे तावन्तो विवादाः न वर्तन्ते, यावत् शास्त्रेषु दत्तकपुत्रेण सह सम्बद्धाः विवादाः व्यवहारशाखायां दृश्यन्ते । आधुनिकेऽपि विषयेऽस्मिन् विवादाः तावन्तस्तथैव दीर्घकालिकाः वर्तन्ते यत्, शक्त्यभावात् न्यायमूर्तिमण्डलैः केचन विवादास्तु त्यज्यन्ते । मध्यकालीनैः धर्मशास्त्रिभिः भिन्नाः स्मृतयः अथवा तत्तत्कालानुसारं तत्तद्देशानुसारं विभिन्नधर्मशास्त्रीयग्रन्थाः प्रमुखतो निबन्धाः विरचिताः । फलस्वरूपतः आधुनिकभारतदेशे दत्तकसम्बन्धानि व्यवहारपदानि क्षेत्रानुसारं पार्थक्यं भजन्ते । शास्त्री गोपालचन्द्रः एवं श्री कपूरः इत्यादिभिर्महोदयैस्तु दत्तकविषयमाधारीकृत्य विशालकाया ग्रन्थाः व्यरच्यन्त ।

प्रकृतशोधपत्रे शौनकविरचितस्य दत्तपुत्रविधानमित्याख्यस्य ग्रन्थस्य मातृकायाः ससम्पादनं ग्रन्थानुसारं प्राचीनभारत-देशे प्रचलितायाः पुत्रदानव्यवस्थायाः दत्तकपुत्रविधानस्य वा विश्लेषणं क्रियते ।

## दत्तपुत्रविधानग्रन्थकर्तुः परिचयः

वेद-पुराणादिग्रन्थेषु सप्तानां ऋषीणां गणनाऽस्ति - वशिष्ठः, विश्वामित्रः, भारद्वाजः, काश्यपः, अत्रिः, वामदेवः, शौनकश्चेति । (भिन्न भिन्न पुराणेषु सप्तर्षिणां नामानि भिन्नानि वर्तन्ते) । ऋषिः शौनकः भृगुवंशीयर्षेः शुनकस्य पुत्र आसीत् । इन्द्रोतः तथा स्वैदायनः इति शौनकर्षेः नामान्तरं प्राप्यते । शौनकः दशसहस्रविद्यार्थिणां गुरूकुलस्य कुलपतिः प्रधानाचार्यो वा आसीदिति श्रूयते । कात्यायनाश्वालायनादीनां गुरुत्वेनापि शौनको ज्ञायते[४] । शौनकेन ऋग्वेदस्य शाकलस्य तथा बाष्कल-शाखायाः

---

[१]मो शु देवा अदाः स्वरव पदि दिवसस्परि
मा सोमस्य शंभुवः शुने भुम कदा चना वित्ति मे अस्य रोदसि ॥ (ऋ.वे. १.१०५.३)

[२]पुन्नाम्नो नरकाद्यस्मात्त्रयति पितरं सुतः ।
तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयन्भुव ॥ मनुस्मृति(९.१३८)

[३]लोकानन्त्यं दिवाः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः - याज्ञवल्क्यस्मृतिः

[४]"शौनक m. ( patr. fr. शुनकg. बिदा-दि)N. of various authors and teachers (also with इन्द्रोतand स्वैदायन; esp. of the celebrated grammarian , author of the ऋग्-वेदप्रातिशाख्य, the बृहद्-देवता, and various other works ; he is described as the teacher of कात्यायनand especially of आश्वलायन; he is said to have united the बाष्कलand शाकलशाखाs , and is sometimes identified with the Vedic ऋषिगृत्स-मद; but according to the विष्णु-पुराण, -S3 शौनकwas a son of गृत्समद, and originated the system of four castes ; he is quoted in A1s3vS3r. APra1t. and VPra1t. ; the various legends about him are very confused) S3Br. Up. MBh. etc." - Monier-Williams

एकत्रीकरणमकारि । सः राज्ञो जन्मेजयस्य अश्वमेधयज्ञस्य ऋषिरासीत् । ऋषेः शौनकस्य यज्ञे उग्रश्रवा महाभारतस्य कथां श्रावितवान् । ऋक्प्रातिशाख्य-ऋग्वेदछन्दानुक्रमणी-ऋग्वेदऋष्यानुक्रमणी-ऋग्वेदकथानुक्रमणी-ऋग्वेदअनुवाकानुक्रमणी-ऋग्वेदसूक्तानुक्रमणी-बृहद्देवता-शौनकस्मृति-चरणव्यूह-ऋग्विधान-शौनकगृह्यसूत्रादयः ग्रन्थाः शौनकविरचितत्वेन ज्ञायन्ते । आधुनिके शौनककृताः प्रायशो ग्रन्थाः प्राप्यन्ते चेदपि "शौनकस्मृतिः" इत्यस्य मातृका न लभ्यते, धर्मशास्त्रेतिहासग्रन्थेषु स्मृतिकाराणां तालिकायां तस्य नामाऽपि न लभ्यते । परन्तु बहवो धर्मशास्त्रकाराः शौनकस्मृत्याः नामोल्लेखम् तत्रत्यमतोल्लेखञ्च कृतवन्तः । दत्तकमीमांसायाम् एवं दत्तकचन्द्रिकायामपि शौनकस्य मतमुल्लिखितमस्ति[1] । पि. वि. काणे महोदयोऽपि स्वग्रन्थे शौनकस्य बहूनि मतानि उल्लिखितवन्तः[2] परन्तु तस्य शौनकस्मृतिरित्याख्यस्य ग्रन्थविषये न किमप्युक्तम् तत्र केवलं अष्टादशेषु उपस्मृतेषु शौनकस्मृत्याः उल्लेखः वर्तते । अस्मिन् शोधकार्ये शौनककृतस्य दत्तपुत्रविधानस्य मातृकायाः पुष्पिकायामपि शौनकस्मृतिः इति नाम अस्ति परन्तु लिपिकर्तुः परिचयः न प्राप्यते ।

---

"A renowned ācārya. He is believed to be the author of the famous works–"Ṛgveda Anukramaṇī", "Āraṇyakam", "Ṛkprātiśākhya", etc.

The famous Āśvalāyanācārya was Śaunaka's disciple. Ācāryas like Kātyāyana, Patañjali and Vyāsa belonged to his class. Śaunaka's real name was "Gṛtsamada". It was because he was the son of Śunaka that he got the name "Śaunaka".

2) Birth. Śaunahotra, the son of the sage Śunahotra, once performed a yāga. Indra attended that yāga. At that time Śaunahotra rescued Indra from an attack of the Asuras. Indra who was pleased at this, blessed Śaunahotra that he would be born in his next birth in the Bhṛgu family under the name "Śaunaka".

3) Genealogy In Vāyu Purāṇa his genealogy is given in two forms.

i) Ruru (Pramadvarā)-Śunaka-Śaunaka-Ugraśravas

ii) Dharmavṛddha–Śunahotra–Gṛtsamada– Śunaka–Śaunaka. (Vāyu Purāṇa, 92, 26).

4) Important works. Śaunaka is believed to be the author of numerous works. The most important of them are given below :– (1) Ṛkprātiśākhya (2) Ṛgvedacchandānukramaṇī (3) Ṛgvedarṣyanukramaṇī (4) Ṛgveda Anuvākānukramaṇī (5) Ṛgvedasūktānukramaṇī (6) Ṛgvedakathānu- kramaṇī (7) Ṛgvedapādavidhāna (8) Bṛhaddevatā (9) Śaunakasmṛti (10) Caraṇavyūha and (11) Ṛgvidhāna. Matsya Purāṇa, Chapter 252 mentions that Śaunaka had written a work on the science of architecture.

5) Disciples. The chief disciple of Śaunaka was Āśva- lāyana. Once Āśvalāyana wrote and dedicated to his Guru (master) two treatises entitled "Gṛhyasūtra" and "Śrautasūtra" to please him. After reading it, Śaunaka destroyed his own work on "Śrautaśāstra". Āśvalāyana wrote his treatise after having studied the ten works of Śaunaka on Ṛgveda.

Kātyāyana, the disciple of Āśvalāyana later received the ten books written by Śaunaka and the three books written by Āśvalāyana. Kātyāyana gave his disciple Patañjali, the two works, "Yajurvedakalpasūtra" and "Sāmaveda Upagrantha" which were written by him- self. From this we may infer that the series of Śaunaka's disciples was as follows :–Śaunaka–Āśvalāyana–Kātyāyana–Patañjali–Vyāsa." - Purana Encyclopedia

[1] "पुत्रच्छाया पुत्रसादृश्यं तच्चनियोगादिना स्वयमुत्पादनयोग्यत्व यथा भ्रातृसपिण्डसगोत्रादिपुत्रस्य ।...."(द. मी. पृ-१४४-४५ ), (द. च. पृ-२१)

[2] History of Dharmasastra Part-2, pg- 897

## मातृकायाः परिचयः

| मातृकायाः प्राप्तिस्थानम् | गङ्गानाथझा-पाण्डुलिपि-ग्रन्थागारः, प्रयागराजः |
|---|---|
| लिपिः | देवनागरी |
| भाषा | संस्कृतम् |
| विषयः | धर्मशास्त्रम् |
| आधारः | कर्गदम् |
| अधिगमसंख्या | ५०७३८ |

## विश्लेषणमवाप्तिश्च (Findings and Analysis)

## मातृकायाः सम्पादनम्

॥ श्रीगणेशाय नमः ॥

अथ दत्तपुत्रविधानम् ॥

तथा च शौनकीयस्मृतौ ॥ इदानीं सम्प्रवक्ष्यामि पुत्रसङ्ग्रहमुत्तमम् । वन्ध्या मृतप्रजावापि पुत्रार्थं समुपोष्य च ॥ ब्राह्मणानां सपिण्डेषु कर्त्तव्यः पुत्रसंग्रहः । तदलाभेऽसपिण्डेष्वपिसंग्रहः ॥ क्षत्रियाणां स्वजातौ वा गुरुगोत्रसमोऽपिवा । वैश्यानां वैश्यजातौ च दत्तपुत्रविधिः स्मृतः । शूद्राणां शूद्रजातौ च कर्त्तव्यः पुत्रसंग्रहः ॥ तथा हि ॥ नैकपुत्रेण कर्त्तव्यं पुत्रदानं कथं च न । बहुपुत्रेण कर्त्तव्यं पुत्रदानं यथाविधि ॥ अथ प्रयोगः ॥

तत्र पुत्रपरिग्राहको यजमानः कृतनित्यक्रियः गामदेशस्वामिबान्धवादीनां श्रावयित्वा । अनुज्ञां गृहीत्वा । शुद्धासने पत्न्या सह उपविश्य । आचम्य प्राणानायम्य देशकालौ स्मृत्वा मया कृतस्य जन्म-जन्मान्तर-पातकस्य तत्सम्भावित अपुत्रवतां ये निरयस्तं निरसनार्थं सन्ततिविच्छेद-जनित-प्रत्यवायपरिहारार्थं सनातन कुलधर्माणाम् उत्पत्तिश्च पितृणां शाश्वतब्रह्मलोकनिवासार्थं स्वस्योद्धर्त्तुकामोहं स्वयं कुलादुत्पादनवत्पुत्रवत्ता समत्वसिद्धर्थंदत्तपुत्रविधानं करिष्ये ।इति सङ्कल्प्य ॥ तत्र आदौ गणपतिपूजनं स्वस्ति पुण्याहवानं विप्रैः सह वाचयित्वा ।अथवा मातृपूजनादिनांदीश्राद्धांतंकृत्वा ॥ आचार्यं कृत्वा संप्रार्थ्य मधुपर्कं वाससी कुण्डले छत्रमुष्णीष अंगुलीय क्रादिभिःसंपुज्य ॥ आचार्यः प्राणानायम्य आचार्यकर्म करिष्ये ॥ यद त्रेति दि बन्धनं हस्तमात्रं स्थंडिलंकृत्वा । तत् प्रागदेशे अष्टदलं निर्माय तत्र महीघौरित्यादिकलश स्थापनं पूर्णादर्वीति पूर्णपात्रं निधाय वरूणपूजनं तस्योपरि स्वर्णमयीं प्रजापति मूर्तिं प्राणप्रतिष्ठापूर्वकं संपूज्य ॥ ततः स्वगृह्योक्त विधिना अग्निं संस्थाप्य ॥ ग्रहपक्षे सूर्यादि दिक्पालान्तं पूजयेत् वरूण कलशं संस्थाप्य ग्रहन(ण) यः कार्यः ॥ इति केचित् पक्षः ॥ ब्रह्मणोगमनमित्यादि आज्य भागान्तंकृत्वा ॥ ग्रहपक्षेसमित्तिल चर्वाज्यहोमः ॥ प्रधानं प्रजापतिं आज्यमिश्रपायसेन अष्टोत्तरशत संख्या होमः ॥ प्रजापतेनत्वदेताणां ॥ मन्त्रः स्विष्टकृदादिहोमशेषं समाप्य ॥ आचार्याय गां अन्येभ्यो दक्षिणां दत्वा कर्मांगदेवतायाः प्रीयं तां न मम ॥ ततः सपत्नीको यजमानः ब्राह्मणै सह दार्तु गृहे गच्छेत् । दातुः समीपं गत्वा अथ पुत्रं देहीति याचयेत् । मे पुत्रं देहीति वाचयित्वा । दातुर्ये पुत्रं यज्ञेनेति पंचर्चे नैदधातू । प्रतिगृहीतापि देवस्यत्वेति उपक्रम्य हस्ताभ्यां प्रतिगृह्णामीति प्रतिगृह्णीयातु ॥ अङ्गादङ्गात् सम्भवसीति मन्त्रेण शिशुमूर्धनि त्रिश जिघ्रेतु । अथः स्पृष्ट्वा । दातुः वस्त्रालंकारादिभिः संपूज्य ॥ शिशुं वस्त्रादिभिरलंकृत्य छत्रच्छायायां निषणंकृत्वा मंत्रघोषपुरःसरं मंगल गीत-वाद्य-पुरस्कृत्य स्व गृहमागत्य श्वासने संस्थाप्य स्वयं पुनः स्थंडिलं विधाय ॥ पुत्र स्वीकृतांगभूतं विहितहवनं करिष्ये ॥ इति संकल्प्य अग्निमुपसमाधाय ॥ ब्रह्मणोगमनमित्यादि आज्यभागांतं कृत्वा । प्रधानं द्विवारमग्निं सूर्या साव्त्रिीं पंचवारं च आज्येन होमः ॥ यस्त्वाव्ददेति मंत्रेण द्वाभ्यां तथा सोमोददं गंधर्वेति पंचभिर्हुत्वास्विष्ट कृदादि होम शेषं समाप्य ॥ ब्राह्मणानां गंधादिभिः

**संपुज्य भूयसीं दत्वा ॥ असंस्कृतशिशोर्जातकर्मादिकं विधाय संस्कृतश्चेति आवृत्तिर्वाकार्या ॥ ब्राह्मणान् भोजयित्वा सुहृद्युक्तो भुञ्जीतेति ॥ इति शौनकोक्तदत्तपुत्रविधानं समाप्तं ॥ छ ॥**

## मातृकायाः सन्दर्भे प्राचीनभारतीय-दत्तकग्रहणस्य विश्लेषणम्

आचार्यः शौनकः शौनकीयस्मृत्यां ग्रन्थारम्भे गणेशस्य वन्दनं कृत्वा दत्तपुत्रविधानम् आरभते । शौनकीयस्मृत्यां दत्तकपुत्रस्य विधानार्थं उत्तमपुत्रस्य संग्रहार्थं आचार्यशौनकेन विधिः दीयते । अपुत्रेण (यस्य पुत्रः नास्ति) अजातपुत्रेण (यस्य पुत्रः, पौत्रः, प्रपौत्रोऽपि नास्ति) मृतपुत्रेण (जन्मनान्तरं यस्य पुत्रो मृतः) वा पुत्रार्थं दत्तकपुत्रस्य ग्रहणं कर्तव्यमिति । मनुना उक्तं यत् - पुत्रहीनमनुष्याणां श्राद्ध-तर्पण-नामप्रसिद्ध्यर्थं यत्नेन कृत्रिमपुत्रस्य ग्रहणं कर्तव्यम्[1] । ऋषिरत्रिरपि आह यत् - पुत्रहीनमनुष्यानां श्राद्धतर्पणादिक्रियार्थं पुत्रप्रतिनिधिः आवश्यकः[2] । आदौ बोध्यते यत् यस्य पुत्रो न जायते अथवा जातो मृतो भवेत् तस्य पुत्रसंग्रहणं कर्तव्यम् तर्हि मनुप्रोक्तवचनानुसारं प्रथमपुत्रे उत्पन्ने मनुष्यः पितृऋणतः मुक्तो जायते तर्हि यस्य पुत्रजन्मनानन्तरं पुत्रमरणं स्यात् तस्यापि पितृ-ऋणतः मुक्तिस्तु परन्तु श्राद्धतर्पणादिक्रियाहेतोः पौत्र-प्रपौत्रादयोऽपि यदि न स्युः तस्य कृते पुत्रसंग्रहणं कर्तव्यमेव । आचार्यमनुना द्वादशविधाः पुत्राः उल्लिखिताः - औरसः, पुत्रिकापुत्रः, क्षेत्रजः, गुढोत्पन्नः, कानीनः, पौनर्भवः, दत्तकः, क्रीतः, कृत्रिमः, स्वयंदत्तः, सहोढः, अपविद्धश्चेति[3] । क्षेत्रजादयः एकादश पुत्रप्रतिनिधयः वर्तन्ते । आचार्यबृहस्पतिः मनुवचनस्य तात्पर्यम् उक्तवान् यत् औरसश्च पुत्रिकापुत्रश्च वंशरक्षायाः प्रधानं कारणम् एवं घृतस्य प्रतिनिधिर्यथा तैलं भवति तथैव औरसपुत्रिकापुत्रद्वयस्य प्रतिनिधयः क्षेत्रजादय एकादश पुत्राः भवन्ति[4] । ऋषिपराशरोऽप्याह यत् औरसं तथा दत्तकम् अन्तरेण अन्येषां न पुत्रत्वेन संग्रहणमिति[5] । दत्तकचन्द्रिकाकारः मनुवचनं उद्धृतं यत् - दत्तकग्रहणं वा पुत्रीकरणस्य उद्देश्यद्वयं पिण्डोदकक्रीयाहेतुः, नामसङ्कीर्तनहेतुः[6] । दत्तकमीमांसाकारः दत्तकः इति पदस्य स्थाने गृहीतकः इति नामान्तरं प्रयुङ्क्ते[7] मातृपितृकर्तृकः पुत्रकर्मको दानविधिर्जायते, आदान-प्रदानरूपोऽयं व्यवहारो जायते, यत्रादौ दानं अनन्तरं ग्रहणं, अतः ग्रहणक्रियायाः पश्चाद्वर्तित्वात् दानक्रियानिमित्तकं दत्तकाभिधानं गृहीतकापेक्षयाऽधिकं प्राधान्यं भजते ॥

समाजे ब्राह्मणवर्णानां कृते आदौ सपिण्डे पुत्रसंग्रहणं कर्तव्यं, यदि सपिण्डे पुत्रः न लभ्यते तर्हि असपिण्डेष्वापि पुत्रस्य संग्रहणं कर्तुं शक्यते । अन्यत्र कुतोपि न ग्रहणीयम् अर्थात् ब्राह्मणेन क्षत्रियादिभिन्नवर्णेभ्यः पुत्रग्रहणं न कर्तव्यम् । अत्र सपिण्डशब्दः सामान्यार्थे उच्यते । अत्र समानगोत्रीयसपिण्डः केवलं न बुध्यते असमानगोत्रीयसपिण्डोऽपि उच्यते, शाकलर्षिणा प्रोक्तं यत् सपिण्डे यदि न लभ्यते तर्हि असपिण्डेषु पुत्रग्रहणं कर्तव्यं तदाभावे (दौहित्रं भागिनेयं मातृष्वसृसुतं विना) भिन्नगोत्रीयपुत्रसंग्रहणं कर्तव्यम्[8] । मनुस्मृतेः टीकाकारः मेधातिथिः वदति यत् ब्राह्मणाः क्षत्रियकुले पुत्रसंग्रहणं कर्तुं

---

[1] "अपुत्रेणसूतःकार्यो यादृकतादृक प्रयत्नतः । पिण्डोदकाक्रियाहेतोर्नामसंकीर्तनाय च" ॥ (मनुस्मृति)

[2] "अपुत्रेणैवकर्तव्यः पुत्रप्रतिनिधिः सदा । पिण्डोदकक्रियाहेतोर्यस्मात्प्रयत्नतः" ॥(अत्रिस्मृति)

[3] औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च । गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥ कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा । स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः ॥ - मनुस्मृतिः ९.१५९-१६०

[4] बृहस्पतिः-" पुत्रास्त्रोदश प्रोक्ता मनुना येऽनुपूर्वशः । सन्तान कारणन्तेषामौरसः पुत्रिका तथा । आज्यं विना यथा तैलं सद्भिः प्रतिनिधि कृतम् तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना" ।

[5] "दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः" ।

[6] तत्राह मनुः अपुत्रेण सुतः कार्यो यादृक तादृक प्रयत्नतः । पिण्डोदकक्रीयाहेतोर्नामसङ्कीर्तनाय च । (द. च. पृ.२)

[7] "दत्तकपदस्य स्थाने गृहीतपदमप्रयुञ्जानानां को वाभिप्रायः संख्यावतामाचार्याणाम्" इति ।

[8] "तथाच सपिण्डाभावेऽसपिण्डः सगोत्र स्तदभावे भिन्न गोत्रोऽपिग्राह्य इत्याह शाकलः ।सपिण्डमपत्यकञ्चैव सगोत्रजमथापि वा ।अपुत्र द्विजो यस्मात् पुत्रत्वे परिकल्पयेत् ।समानगोत्रजाभावे पालयेदन्यगोत्रजम् । दौहित्रं भागिनेयं मातृ-स्वसृ सूतं विना" इति ।

शक्नुवन्ति[१] । क्षत्रियवर्णानां कृते स्वस्य गुरुगोत्रे पुत्रसंग्रहणं कर्तव्यं, वैश्यादि-अपरवर्णैः स्वगोत्रेषु पुत्रसंग्रहणं कर्तव्यम्, अन्येभ्यः कुतोपि न ग्रहणीयम्, केवलं शूद्रवर्णीयाः दौहित्रं वा भागिनेयमेव दत्तपुत्ररूपेण ग्रहीतुं शक्नुवन्ति । रूद्रधर-वाचस्पत्येन शूद्राः पुत्रीकरणं कर्तुं न शक्नुवन्ति । अत्र विशिष्टं यत् ब्राह्मणानां स्वगोत्रे पुत्रग्रहणं भविष्यति अन्येषां सर्वेषां गुरुगोत्रे वा तद्गोत्रे वा भविष्यति[२] ।

यस्य केवलमेक एव पुत्रोऽस्ति तेन पुत्रदानं कथमपि न कर्तव्यम्, यस्य बहवः पुत्राः सन्ति तेनैव पुत्रदानं कर्तव्यम् । मिताक्षराकारः आह यत् - ज्येष्ठपुत्रस्य ग्रहणं न कर्तव्यम्[३] । व्यवहारमयूखे ज्येष्ठपुत्रस्य ग्रहणं दानं वोभयमपि कर्तुं शक्यत इति[४] । संस्कारकौस्तुभेऽपि ज्येष्ठपुत्रस्य ग्रहणं वर्जितम्[५] ।

अथ यो जनः पुत्रं परिग्रहीतुमिच्छति स नित्यकर्मानन्तरं बान्धवान्, आत्मीयान्, स्वजनान्, ग्रामस्य देशस्य वाऽधिपतीन् इमां वार्तां श्रावयित्वा सर्वेभ्योऽनुमतिग्रहणानन्तरं शुद्धासने सज्जीभूत्वा स्वस्य पत्न्या सह उपविश्य देशस्य तथा कालस्य स्मरणं कृत्वा आचमनं कृत्वा इह जन्मनि पूर्वजन्मनि वा कृतदोषजन्यायाः पुत्रहीनतायाः अवसानार्थं सन्तानविच्छेदजनितस्य पापस्य निरसनार्थं सनातनधर्मे जन्मार्थं चिरन्तनब्रह्मलोके पितृपुरुषस्य निवासार्थमेवं स्वस्य इहलोकतः ब्रह्मलोके उद्धारेच्छार्थं स्वस्य गोत्रे उत्पन्नवत् स्वपुत्रवत् पालनार्थं दत्तकपुत्रस्य विधानं कुर्युः । इति सङ्कल्प्य । पितरौ हस्ताभ्यां जलग्रहणं कृत्वा पुत्रग्रहणं कुरुतामिति मनसि संकल्पं कुरुताम् । मनुना प्रोक्तं यत् - मातापितृभ्यां हस्ते जलं गृह्णभ्यां सङ्कल्पपूर्वकं यः पुत्रोऽन्यस्मै प्रदीयते, सः दत्त्रिमपुत्रः इति उच्यते[६] । याज्ञवल्क्येनाचार्येण उक्तं यत् - मात्रा वा पित्रा वा मिथः अनुज्ञया यः पुत्रः प्रदीयते स दत्तपुत्र इत्युच्यते[७] ।सर्वकार्यारम्भे यथा गणपतिपूजनं भवति तथैव मङ्गलं कृत्वा ब्राह्मणं पुण्येन आह्वानेन वाचनं कृत्वा अथवा षोडशमातृकायाः पूजनं वा पितृपुरुषस्य कृते नान्दीश्राद्धस्य पश्चात् कृतकर्माणि सम्पूर्णं कृत्वा होमस्य कृते हस्तमात्रां वेदीं निर्माय, वेदविहितविधिवत् मन्त्रोच्चारणेन वरुणदेवतायाः विधिवत् पूज्याह्वानेन तत्पात्रस्योपरि स्वर्णनिर्मितायाः प्रजापतिदेवतायाः मूर्त्याः प्राणप्रतिष्ठां कृत्वा पूजनं तदनन्तरं स्वस्य गृहस्य विधिवत् वेद्याम् अग्निस्थापनम् । ब्रह्मणद्वयस्य गमनमादि शुद्धघृतमिश्रितकलायां ग्रहादिपक्षे समिधातिलयुक्तशुद्धघृतेन होमकार्यं करणीयम्, प्रधानप्रजापतिः (ब्रह्मा) देवतां शुद्धघृतमिश्रेण अष्टोत्तरशतसंख्याहोम करणीयम्, कृत होमस्य आचार्याणां दक्षिणारूपेण गां अन्येभ्योऽपि दक्षिणां दत्वा अत्र कृत कर्मस्य मुख्यदेवतां प्रति प्रीतिं ददनीयं न कर्तां प्रति । यजमानः यः पुत्रसंग्रहणं करोति सः स्वस्यपत्न्या ब्राह्मणेन च सह पुत्रदातुर्गृहे गन्तव्यम् दातुः समीपे गत्वा पुत्रं देही इति याचनीयम् अनन्तरं मां पुत्रं देहि इति वाक्येन वाचनीयम्, दातुः यस्मै पुत्रं पंचयज्ञेन दातव्यम् । शिशुं वस्त्रं अलंकारादिं सज्जीकृत्या स्वस्य पुत्रवत् पालनं करिष्यामि इति उक्त्वा मन्त्रोच्चारणात्परं माङ्गलगीतं गायनं वाद्य वादनानन्तरं पुत्रेन सह स्वस्य गृहे आगमनमेवं आसनग्रहणाधिष्ठानात्परं स्वयमेव होमस्यवेदीं निर्मीत्वा पुत्रस्वीकृतार्थं शास्त्रप्रोक्तं यत् विहितं तद् कर्तव्यमिति निश्चयमेव करोति अग्नेः समीपे ब्राह्मणानां समीपे उपविष्ट्वा शुद्धघृतेन प्रधानं अग्नाय वारद्वयं,सूर्या च साव्त्रिीं पञ्चवारं नामोच्चारणपूर्वकं होमं करणीयम् । मन्त्रोच्चारणपूर्वकं होमं समाप्य करणीयम् । शिशोः जन्मनात्परं यदि दानकार्यं न अभवत् तस्य संस्कारः इतोपि न जातं तर्हि शिशोः ग्रहणात्परं संस्कारकार्यं तथा मन्त्रोच्चारणावृत्तिं करणीयम् । सर्वकार्य समापनान्तरं ब्राह्मणान् मित्रवान्धवादिनां च भोजनं करणीयमिति शौनकेन उक्त दत्तपुत्रविधानम् समाप्तम् ।

---

[१]सदृशं न ज्ञातितः किं तर्हि कुलानुरूपैर्गुणैः क्षत्रियादिरपि ब्राह्मणस्य दत्तको युज्यते ।(मेधातिथि, मनु ९-१६८)

[२]गुरूगोत्रसमेपि वे ति क्षत्रियाणां प्रातिस्विकगोत्राभावात् गुरूगोत्र निर्देशः । पौरहित्यान् राजन्य विशां प्रावृणोतेति सुत्रेण तस्य पुरोहितगोत्रभागितयोक्तेः ।

[३]याज्ञवल्क्य (२-१३०)

[४]व्यावहारमयुख(पृ. १०८)

[५]संस्कारकौस्तुभ(पृ. १५०)

[६]मातापितृभ्यां हस्तेन अर्घ्यं गृहीत्वा

[७]याज्ञवल्क्य (२-१३०)

## निष्कर्षः (Conclusion)

यथाऽद्यत्वे दत्तकपुत्रग्रहणकाले न्यायालयात् सम्मतिः, शासनाधिकारात् सम्मतिः आवश्यकी तथैव तस्मिन्नपि काले बन्धु-बान्धवानां, स्वजनानां, राज्ञश्चानुमतिं प्राप्य पुत्रग्रहणं कर्तुं जनाः शक्नुवन्ति । वर्तमाने न्यायालये सर्वेभ्यः वर्णेभ्यः जनाः दत्तकरूपेण पुत्रं वा पुत्रीं ग्रहीतुं शक्नुवन्ति । प्राचीनकालादेव केवलं वंशरक्षार्थं तथा पितृतर्पणादिक्रियार्थं पुत्रः आवश्यकः । तत्र अपवादोऽपि दृश्यते यथा रामायणस्य बालकाण्डे दशरथस्य पुत्रीं शान्ताम् ऋषिः लोमपादः दत्तकरूपेण गृहीतवान्[1], शूरस्य कन्यां पृथां राजाकुन्तिभोजः दत्तकरूपेण गृहीतवान्[2], पन्नालालः स्वस्य पुस्तके कुमायूँपरम्परां उल्लिखितवान् यत् कन्याः दत्तकरूपेण ग्रहणं प्रचलने आसीदिति[3] । वर्तमाने जनाः आधुनिकाः जाताः, शिक्षिताः जाताः सततविकासस्य लक्ष्यं दृष्ट्वा विवाहिता अविवाहिता वा जनाः दत्तकं गृह्णन्ति । तत्र वंशरक्षार्थं वा पितृतर्पणार्थमेव दत्तकं न गृह्णन्ति, पुत्रः पुत्री वेत्येवं भेदो न कल्प्यते ।

## सन्दर्भग्रन्थसूची (Reference)

### प्राथमिकस्त्रोतः


पाण्डुलिपिः स्वीकृताः

- शौनक.().दत्तपुत्रविधानम्(अधिगमसंख्या५०७३८). गङ्गानाथझा पाण्डुलिपिः पुस्तकालयः, प्रयागराजः, भारतवर्षम् ।
- कौटिल्य अर्थशास्त्र. आर.पि.काङ्ले.देहली. मोतिलाल वनारसीदास पब्लिसार्स.
- देवलस्मृति. डॉ. एम्. एल. वाडेकर. देहली. कोशल पुस्तकभाण्डगारः ।
- पराशरस्मृति. सम्पादक.एम्.एम्.चन्द्रकान्त.तर्कालङ्कार.देहली. ओरियेन्टाल बुक सेन्टार ।
- मनुस्मृति(मेधातिथि मनुभाष्यसमेता). सम्पा.महामहोपाध्यायः प. गङ्गानाथझा. देहली. परिमल पब्लिकेशन्.१९९८.
- याज्ञवल्क्यस्मृति.(मिताक्षरा भाष्य समेता). राय बहादुर श्रीशचन्द्र विद्यार्णव.वाराणसी.चौखम्बा संस्कृत सिरिज. २००३.


### गौणस्त्रोतः


- डॉ.पंवार.कौ.(२०१०) धर्मशास्त्रीय शूद्र अवधारणा.विद्यानिधि प्रकाशन,दिल्ली ।
- ओझा,हीराचाँद.गौरीशंकर()भारतीय प्राचीन लिपिमाला.
- मिश्रा,जयकृष्ण()नन्दपण्डितकृत-दत्तकमीमांसा(हिन्दी अनुवाद) दिल्ली.चौखम्वा प्रकाशन ।
- भट्टाचार्य,ऋषिकेश.(१८८२) दत्तकचन्द्रिका or Hindu Law on Adoption लाहोर.पञ्जाव विश्वविद्यालय ।
- मणि,वि.एन.(१९८९) Laws 0f Dharmashastras.देहली.नवरंग.
- डॉ. पाण्डेय. राजबली.(१९७८) हिन्दु धर्मकोश (भाग-१,२) पुनरुत्थान प्रकाशन सेवा ट्रस्ट, अहमदाबाद ।


[1]रामायण, वालकाण्ड (९ अध्यायः)
[2]हरिवंशपुराण आदिपर्व (१११.२-३)
[3]कुमायूँ द्या लोकाल कॉस्टम्- पन्नालाल


ISSN : 2249-538X

# श्लेषालङ्कारः

एस् माधवी*
शोधच्छात्रा, मद्रपुरी संस्कृतमहाविद्यालयः
चेन्नै

***लेखसारः*** *– काव्यशास्त्रे रसपोषकाणामलङ्काराणां मध्ये श्लेषस्य प्रमुखं स्थानं वर्तते । श्लेष: अनुप्रासादिवच्छब्दद्वारा अपि चोपमादिवदर्थद्वारा काव्यस्य शोभावर्धनार्थं भवति । श्लेषालङ्कारविषये बहव: विचाराः सन्ति । श्लेषस्थले शाब्दबोधः कीदृशः ? श्लेषस्य कथं शब्दालंकृतिषु अर्थालंकृतिषु चेत्युभयत्रापि अन्तर्भूतता ? एतादृशै: विषये: घटितोयं लेखः ।*

**"उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् । हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥"**[1]

इति काव्यप्रकाशे अलङ्कारलक्षणं प्रोक्तम् । ये शब्दानां अर्थानां वा उपस्करणेन काव्यस्याङ्गिनं रसं पोषयन्ति ते एव अलङ्कारा इति आचार्यैः प्रतिपादितम् । अलङ्काराणां मध्ये श्लेषस्य प्रमुखं स्थानं विद्यते । श्लेषः अनुप्रासादिवत् शब्दद्वारा अपि चोपमादिवदर्थद्वारा काव्यस्य शोभावहो भवति ।

## श्लेषालङ्कारस्य भेदलक्षणोदाहरणानि

तत्र शब्दश्लेषस्य लक्षणं काव्यप्रकाशे प्रोक्तम् –

**"वाच्यभेदेन भिन्ना यद्युगपद्भाषणस्पृशः । श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा ॥"**[2]

अर्थश्लेषस्य च लक्षणम् – "श्लेषः स वाक्ये एकस्मिन् यत्रानेकार्थता भवेत् ।"[3] इति च प्रोक्तम् ।

'श्लिष्यन्तः शब्दाः अर्था वा अस्मिन्नि'ति व्युत्पत्त्या 'श्लेष' इत्यस्य 'एकत्र संयोग' इति अर्थः । यदा एकवारमुच्चारितेन शब्देन भिन्ना अर्था लभ्यन्ते, तदा बहूनामर्थानामेकस्मिन्नेव शब्दे स्वरूपं प्रच्छाद्य स्थितत्वात् काव्ये वैचित्र्यजननेन श्लेषो नामालङ्कृतिः काव्यज्ञैः स्वीकृतास्ति ।

श्लेषालङ्कारविषये बहवः विचाराः सन्ति । श्लेषस्थले शाब्दबोधः कीदृशः ? श्लेषस्य कथं शब्दालङ्कृतिषु अर्थालङ्कृतिषु चेति उभयत्रापि अन्तर्भूतता ? श्लेषः कथं संलक्ष्यक्रमव्यङ्ग्यध्वनेर्भिन्नः ? श्लेषस्य अलङ्काराणां मध्ये स्थानं चेत्येतादृशाः विचाराः अलङ्कारग्रन्थेषु प्रस्तुताः विद्यन्ते ।

अनेकार्थशब्दानां प्रयोगेण काव्ये श्लेषालङ्कृतिर्निवेश्यते कविभिः । यथा -

**अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति । सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः ॥**[4]

इति पद्ये वक्ष्यति इति पदस्य धारयिष्यति, कथयिष्यतीति द्वावर्थौ क्रमेण हृदि ज्ञेषु चेति पदाभ्यां सह अन्वयं प्राप्नुतः । 'सामर्थ्यकृत्' इति पदस्य, 'सामर्थ्यं कृन्तति' इति सामर्थ्यच्छेत्ता इति, सामर्थ्यं करोतीति सामर्थ्यकारकश्चेति उभावर्थौ क्रमेणामित्राणां, मित्राणां चेति पदाभ्यां सहान्वयं प्राप्नुतः । अत्र वक्ष्यतीति पदस्य सामार्थ्यकृदिति पदस्य च सकृदुच्चारणेनैव एकाधिकस्यार्थस्य लाभः ।

'सकृदुच्चारितः शब्दः सकृदेवार्थं गमयति' इति प्राचीननियमो वर्तते । अतः कथं वक्ष्यतीत्यादिपदानामुच्चारणेन उभयोरर्थयोर्लाभः इति पृष्टे, तस्य समाधानं मम्मटाचार्यैः प्रोक्तम् – यद्यपि द्वयोः वाच्यार्थयोः प्राप्तौ द्वयोः शब्दयोरपि स्थितिः वर्तते, तथापि उभयोः शब्दयोः युगपदुच्चारणेन भिन्नं स्वरूपं प्रच्छाद्यते, वर्णानां एकानुपूर्वीकत्वात् ।

अत एव श्लेष इति व्यवह्रियते एतादृशेषु स्थलेषु । एकस्मादेव शब्दात् द्वयोरर्थयोर्बोधोऽस्तु, एकस्य शक्त्या, अपरस्य

***सम्पर्कसूत्रम्** - 917376748632, Email – smadhavi263@gmail.com

च व्यञ्जनया चेति न वाच्यम् । अत्र हि द्वयोरर्थयोर्बोधे प्रकरणादिकं समानरूपेण स्थितं वर्तते, अतः शक्त्यैवोभयार्थबोधः शब्दभेदश्चाङ्गीकार्यः ।

नानार्थकशब्दानाम् संयोगविप्रयोगप्रभृतयः एकस्मिन्नर्थे वाच्यत्वं निर्धारयन्ति, परन्तु प्रकृतोदाहरणे 'वक्ष्यति', 'सामर्थ्यकृदि'ति पदयोः प्रत्येकस्यापि उभयोरर्थयोः तात्पर्यग्राहकं प्रकरणमस्ति, अन्यथा पद्ये प्रयुक्तानाम् अन्येषां पदानामन्वयलाभः एव न स्यात् । अतः सकृदुच्चारितेन द्वयोरर्थयोर्बोधः शक्त्यैव जायते ।

सकृदुच्चारितः शब्दः सकृदेवार्थं गमयतीति नियमानङ्गीकर्तृणां मते शब्दभेदे चासति, एकवृन्तगतानेकफलन्यायेन एकदा गृहीतनानातात्पर्यकः शब्दः एव श्लेषः ।

**"योऽसकृत्परगोत्राणाम् पक्षच्छेदक्षणक्षमः । शतकोटिदतां बिभ्रद्विबुधेन्द्रः स राजते ॥"[5]**

अस्मात् पद्यात् राजपरस्य देवेन्द्रपरस्येति द्वयोरर्थयोः बोधो जायते ।

यः विबुधेन्द्रः पण्डितश्रेष्ठो परगोत्राणां शत्रुवंशानां पक्षस्य सहायकस्य छेदने विनाशने क्षणेन क्षमः समर्थः, सः शतकोटिदतां शतकोटीनां (द्रव्यधनादीनां) दातृतां बिभ्रत् राजत इति राजपरोऽर्थः बोध्यते ।

यः विबुधेन्द्रः देवेन्द्रः परगोत्राणां श्रेष्ठपर्वतानां पक्षस्य छेदने क्षणेन अल्पकालेनैव क्षमः, सः शतकोटिना वज्रेण द्यति खण्डयतीति शतकोटिदः, तस्य भावः शतकोटिदता, तां धारयन् राजते शोभते इति च इन्द्रपरोऽर्थः बोध्यते ।

पद्यस्यास्य उभयोरर्थयोर्मध्ये कुत्रापि प्रकरणस्य तात्पर्यग्राहकस्याभावात्, युगपदेव अर्थद्वयस्यापि उपस्थितिः, उच्चरितानां शब्दानां द्वयोरर्थयोः शब्दभेदं वा स्वीकुर्वन्तु, अथवा एकवृन्तगतफलद्वयन्यायेन अर्थद्वयोपस्थितिं वा गृह्णन्तु ।

## श्लेषस्य शब्दशक्त्युत्थाभिधामूलध्वनितो भेदः –

**"भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य ।**
**यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् ॥"[6]**

इति पद्यं शब्दशक्त्युत्थाभिधामूलध्वनेरुदाहरणरूपेण प्रस्तुतं काव्यप्रकाशे । कस्यचित् राज्ञः वर्णनप्रकरणे प्रस्तुतमिदं पद्यम् । यस्य प्राकरणिकस्य राज्ञः करः दानाम्बुसेकेन, वितरणार्थं दानार्थं गृहीतेनाम्बुना जलेन वारिणा आर्द्रीभावेन सुभगः शोभनोऽभूत् । भद्रात्मन इत्यादिपदानि पूर्वार्धगतानि राज्ञः विशेषणानि । यस्य राज्ञः भद्रः शोभन आत्मा स्वरूपमन्तःकरणं वा, यश्च दुरधिरोहतनुः, शत्रुभिः अनभिभवनीया तनुः यस्य तादृशः, विशाले महति वंशे कुले ख्यातिर्यस्य, तादृशस्य, कृतशिलीमुखसङ्ग्रहस्य कृतः शिलीमुखानां बाणानां सङ्ग्रहः अभ्यासेन दृढता येन तस्य इति । अस्मात् पद्यात् मदगजपरः अन्योऽपि अर्थः लभ्यते । यस्य परवारणस्य श्रेष्ठगजस्य अनुपप्लुतगतेः अबाधितगतेः करः शुण्डा सततं निरन्तरं दानाम्बुसेकसुभगः मदजलसेचनेन सुन्दरोऽभूत् । भद्रात्मन इत्यादिपदानि पूर्वार्धगतानि मदगजस्य विशेषणानि । भद्रात्मा भद्रजातीयः (अष्टसु गजयोनिषु), दुरधिरोहतनुः, अत्युन्नतत्वात् दुःखेन आरोढुं योग्यं शरीरं यस्य सः, कृतशिलीमुखसङ्ग्रहः मदजलगन्धवशात् येन भ्रमराणाम् आकर्षणम् कृतमिति ।

एवं राजपरस्य मदगजपरस्येति च उभयोरर्थयोरुपस्थितावपि राजपरेऽर्थे प्रकरणेनाभिधायाः नियमनमस्ति । अतः मदगजपरस्यार्थस्य प्रतीतिः व्यञ्जनया जायते । अत्र नाभिधया उभयोरर्थयोर्बोधः । अतोऽयं शब्दशक्त्युत्थाभिधामूलध्वनेर्विषयः न तु श्लेषस्य । राजपरस्यार्थस्य अभिधया, मदगजपरस्यार्थस्य च व्यञ्जनया प्रतीतिः ।

**"उदयमयते दिङ्मालिन्यं निराकुरुतेतराम् नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः ।**
**रचयतितरां स्वैराचारप्रवर्तनकर्तनं बत बत लसत्तेजःपुञ्जो विभाति विभाकरः ॥"[7] इति अर्थश्लेषस्योदाहरणपद्यमस्ति ।**

विभाकराख्यराजपरः सूर्यपरश्चेति द्वावर्थावस्मात् पद्यात् लभ्येते । तत्र राजपक्षे विभाकरो नाम राजा उदयं प्रगतिं प्राप्नोति, दिङ्मालिन्यं परितः सर्वासु दिक्षु जनानां मालिन्यं क्लेशं दूरीकरोति, निद्रासदृशीं मुद्रां निरुत्साहतां दूरीकरोति, सत्कार्याणि प्रवर्तयति, स्वेच्छया क्रियमाणानि निषिद्धाचरणानि खण्डयति, अतः, लसत्तेजसः पुञ्जः यस्य कीर्तिः मनागप्यनिरुद्धास्ति, तथा प्रकाशते इति । सूर्यपक्षे – विभाकरः पूर्वदिशायां उदेति, उदयेन च दिशासु सर्वासु अन्धकारमपाकरोति, सर्वेषां जनानां निद्रां समापयति, सर्वत्र क्रियाश्च गमनागमनादीः प्रवर्तयति, अभिसारादिनिषिद्धस्वैरव्यवहारान् नाशयति, एवं रूपेण प्रकाशमानानां तेजसां समूहरूपः सूर्यः विभातीति ।

अत्र राजपरस्य सूर्यपरस्य चेति उभयोरर्थयोः ज्ञानं प्रकरणादेर्नियामकस्याभावात् युगपदेव जायते । उदयमालिन्यस्वैरादिपदानि सामान्यवाचकानि उभयोः पक्षयोः विशिष्टानर्थान् बोधयन्ति ।

योऽसकृदित्यादावपि प्रकरणादेरभावात् उभयार्थबोधो जायते । अत्रापि, अतः कुतः शब्दगतः अर्थगतश्चेति भेदः इति न वाच्यम् । योऽसकृदित्यादिस्थले गोत्रपक्षपरशतकोटिदतामिति पदानि पर्यायवाचकपदैः वंशादिभिः परिवृत्त्या नार्थद्वयं बोधयन्ति, अत्र उदयदिङ्मालिन्यम् इत्यादीनि पदानि तु प्रगत्याशान्धकारादिभिः पदैः परिवृत्त्यापि द्वयोरर्थयोर्बोधं कुर्वन्त्येव । शब्दपरिवृत्तिसहत्वासहत्त्वाभ्याम् शब्दगतः अर्थगतश्चेति भेदः स्वीकृतः ।

## श्लेषस्य गुणप्रधानभावविचारः –

काव्यस्य अलङ्कृतिरूपेण श्लेषस्य कीदृशं स्थानमिति काव्यप्रकाशसाहित्यदर्पणादिग्रन्थेषु विचारः विस्तृतरूपेण प्रस्तुतः । उपमाविरोधाभासश्लिष्टपरम्परितरूपकप्रभृतिषु अलङ्कारेषु उपमादीनां प्रतीतिकारणरूपेण सङ्करताया विषय एव श्लेषः, एवं च अङ्गभूततया व्यवस्थितेः श्लेषस्य सर्वत्रापि अप्रधानतैव, अतः श्लेषो न प्रमुखोऽलङ्कार इति केषाञ्चित् पक्षः ।

उपमादिष्वलङ्कारेषु श्लेषस्य व्यवस्थितेः उपमादीनां प्रतीतिः श्लेषेण प्रतिबध्यते इति केषाञ्चिन्मतमस्ति ।

शब्दश्लेषोऽर्थश्लेषश्चेति श्लेषस्य द्वेधा विभागो न युक्तः । यतो हि अर्थद्वयप्रतीतिस्थले सकृदुच्चरितेन श्लेष उच्यते, अतोऽयमर्थसापेक्ष एव, अतः अर्थालङ्कृतिरेव न शब्दालङ्कृतिरिति केषाञ्चिदभिप्रेतम् ।

यद्यपि बहुत्र श्लेषः साङ्कर्यविषयभूत एव भवति, तथापि काव्येषु चमत्काराधायकत्वेनास्य स्वतन्त्ररूपेणापि प्रयोगो दृश्यते । "सकलकलं पुरमेतज्जातं सम्प्रति सुधांशुबिम्बमिव ।"

इत्यत्र श्लेषोपमयोः साङ्कर्यं दृश्यते । सकलकलमिति समानधर्मसमर्पकम् । सुधांशुबिम्बस्य विशेषणरूपस्य सकलकलशब्दस्य सकलाभिः कलाभिः सहितमित्यर्थः । पुरस्य विशेषणरूपस्यास्य पदस्य कलकलनादेन सहितमित्यर्थः । उपमानोपमेयभूतयोः सुधांशुबिम्बपुरयोः साधारणो धर्मः सकलकलमिति पदेन वाच्येन विशेषणेन युक्ततैव । सकलकलमिति शब्दात् सकृत्प्रयुक्तात् युगपदेवार्थद्वयप्रतीतिं विना वाक्यार्थस्यैवासङ्गतिः स्यात्, अतः अस्मिन् पदे श्लेषः स्वीकरणीयः, तद्द्वारैव चोपमा निरूपणीया । अतः श्लेषः अङ्गम् उपमा च प्रधानभूता अत्र, यतो हि 'इव' शब्दस्य श्रवणेन किमनयोः प्रकृताप्रकृतयोः साम्यमित्यपेक्षायां सकलकलमिति पदे श्लेषः बुद्धिमारोहति ।

**"स्वप्नेऽपि समरेषु त्वां विजयश्रीः न मुञ्चति । प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा ॥"**[8]

इत्याद्युपमास्थलेषु साधारणधर्मे श्लेषस्वीकारेणैव उपमा उपपद्यमाना भवति । अत्र स्वाधीनपतिका उपमानम् विजयश्रीश्च उपमेयभूता वर्तते । प्रभावप्रभवस्य कान्तस्य अपरित्याग एव उभयोः साधारणो धर्मः । प्रभावप्रभवमिति पदस्य राजपक्षे प्रभुत्वस्य उत्पत्तिहेतुमित्यर्थः, स्वाधीनपतिकाया भर्तृपक्षे च प्रकृष्टस्य भावस्यानुरागस्य प्रभवमुत्पत्तिकारणमित्यर्थः । एवं प्रायः यत्र यत्र साधारणधर्मप्रयोगो भवति, तत्र तत्र श्लेषो भवत्येव । तथापि कमलमिव मुखमित्यादिषु

श्लेषव्यतिरेकेणापि उपमा भवति । अतः श्लेषः न उपमाया बाधकः अपि तु श्लेषोपस्थित्या उपमायाः साहाय्यमेव भवति । बहूनाम् अलङ्काराणां श्लेषः सहायको भवति ।

[9]"यदुक्तमन्यथा वाक्यमन्यथान्येन योज्यते । श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिरि"त्युक्तस्य वाक्यस्य श्रोत्रा अन्यथा योजने श्लेष एव कारणम् । यथा –

**"के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाश्रयः किं ब्रूते विहगः स वा फणिपतिः यत्रास्ति सुप्तो हरिः ।**
**वामा यूयमहो विडम्बरसिकः कीदृक्स्मरो वर्तते येनास्मासु विवेकशून्यमनसः पुंस्वेव योषिद्भ्रमः ॥"[10]**

के इति प्रश्नवाचकस्य किंशब्दस्य पुंसि प्रथमायां बहुवचनरूपस्य अर्थस्य, जले इत्यर्थस्य च श्लेषः । विशेषाश्रय इति पदात् विशेषव्यक्त्याश्रय इत्यर्थः वक्तुरभिप्रेतः, परन्तु, उक्ते पदे विभागं कृत्वा श्रोत्रा अन्योऽर्थः प्राप्तः – विः पक्षी, शेषः फणिपतिः, गरुडफणिपती आश्रित्य स्थितो विशेषाश्रयः श्रीमन्नारायण इति । वामा इति पदस्य विरोधिन इति योषित इति च द्वावर्थौ वक्तृश्रोत्रोः बुद्धिस्थौ दृश्येते । एवंरूपेण श्लेषस्य स्थित्या द्वयोर्मध्ये सञ्जातं संभाषणमिदं स्वारसिकं सम्पन्नम् । परन्तु श्लेषस्वीकारेऽपि श्रोत्रा अन्यथा योजनेन विना न एतादृशं चमत्कारि संभाषणं संभवितुमर्हति, अतः श्लेषे स्थितेऽपि प्रमुखा वक्रोक्तिरेव ।

**"आदाय चापमचलं कृत्वाहीनं गुणं विषमदृष्टिः । यश्चित्रमच्युतशरो लक्ष्यमभाङ्क्षीन्नमस्तस्मै ॥"[11]**

अत्र अचल-हीन-विषमदृष्टि-अच्युतपदानां निश्चल-निकृष्ट-लक्ष्यभिन्ननिहितदृष्टि-अनिर्गतरूपानर्थानादाय विरोधः प्रतीयते । श्लेषेण अचल-अहीन-विषमदृष्टि-अच्युतपदानां पर्वत-वासुकि-त्रिनेत्र-नारायणरूपाणाम् अर्थानां च बोधानन्तरं च विरोधपरिहारः, कवेः पाठकाकर्षकं पदचयनं, तेन सञ्जातं काव्ये मनोज्ञत्वं च रसिकैः ज्ञायते । अत एव श्लेषे स्थितेऽपि विरोधाभास एव प्रमुखः ।

**"विद्वन्मानसहंस ! वैरिकमलासङ्कोचदीप्तद्युते ! दुर्गामार्गणनीललोहित ! समित्स्वीकारवैश्वानर ! ।**
**सत्यप्रीतिविधानवृक्ष ! विजयप्राग्भावभीम ! प्रभो ! साम्राज्यं वरवीर ! वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ॥"[12]**

इति पद्यं श्लिष्टपरम्परितरूपकस्योदाहरणम् । अत्र प्रयुक्तानि मानस-कमलासङ्कोच-दुर्गामार्गणप्रभृतीनि पदानि प्रत्येकं स्वान्त-मानसरोरूपयोः, पद्मविकासवैरिसम्पद्विनाशयोः, दुर्गाणामनुलङ्घनपार्वत्यन्वेषणयोः इति रीत्या द्वयोरर्थयोः वाचकानि सन्ति । एकेन पदेन प्रतिपाद्ययोर्द्वयोरर्थयोः आहार्यभेद एवात्र रूपकालङ्कारस्य कारणमस्ति । एवं श्लेषः रूपकस्य अत्र सहायको वर्तते ।

**"देव त्वमेव पातालमाशानां त्वं निबन्धनम् । त्वं चामरमरुद्भूमिरेको लोकत्रयात्मकः ॥"[13]**

इति शुद्धस्य श्लेषस्य (असङ्कीर्णस्य) उदाहरणमस्ति । हे देव विष्णो ! त्वमेव पातालमधोभुवनं, त्वमेव दिशां नियमनस्थानम् भूलोकः, त्वमेव देवानां मरुतां च स्थानं स्वर्गलोकोऽसि, अतस्त्वमेकोऽपि लोकत्रयात्मकोऽसि इति विष्णुपक्षे पद्यस्यास्यार्थः । हे देव राजन् ! त्वमेव अलं पाता रक्षिता, त्वमेव आशानां निबन्धनं जनानाम् इच्छापूर्तिविधायकः, त्वं चामरवायूनां पात्रमिति रक्षणदानभोगानां पात्रं सत् जनत्रयात्मकोऽसि इति राजपक्षे पद्यस्यास्यार्थः । प्रकरणेन एकस्मिन् पक्षे अर्थस्य नियमनाभावात् द्वावप्यर्थौ युगपदेव वाच्यौ स्तः, अतोऽत्र श्लेषोऽलङ्कारः ।

"ध्वनेरित्थं गुणीभूतव्यङ्ग्यस्य च समाश्रयात् । न काव्यार्थविरामोऽस्ति यदि स्यात् प्रतिभागुणः"[14] इति ध्वनिकारोक्तरीत्या प्रतिभावद्भिः कविभिः श्लेषसमाश्रयेण अल्पमात्रेण शब्दप्रयोगेणैव बहूनामर्थानां प्रतिपादनं सहृदयेभ्यः


ISSN : 2249-538X

क्रियते । श्लेषविषये जगन्नाथपण्डितैः प्रोक्तम् – "अयं च उपमेव स्वतन्त्रोऽपि तत्र तत्र सकलालङ्कारानुग्राहकतया स्थितः सरस्वत्याःनवं सौभाग्यम् आवहन् नानाविधेषु लक्ष्येषु सहृदयैः विभावनीय" इति ।

एवं बह्वर्थकपदप्रयोगेण जायमानायाः श्लेषाख्यायाः चमत्कृतेः प्रयोगपठनयोः अवकाशः संस्कृतभाषाद्वारैव अत्यधिकं लभ्यते इति अस्माकं सौभाग्यम् ।

## उल्लेखमूलम्

1. काव्यप्रकाशः, अष्टमः उल्लासः, कारिका संख्या - 67
2. काव्यप्रकाशः, नवमः उल्लासः, कारिका संख्या - 84
3. काव्यप्रकाशः, दशमः उल्लासः, कारिका संख्या - 96
4. काव्यप्रकाशः, नवमः उल्लासः, उदा.श्लो. सं. - 373
5. काव्यप्रकाशः, नवमः उल्लासः, उदा.श्लो. सं. - 376
6. काव्यप्रकाशः, द्वितीयः उल्लासः, उदा.श्लो. सं. - 12
7. काव्यप्रकाशः, दशमः उल्लासः, उदा.श्लो. सं. - 433
8. काव्यप्रकाशः, दशमः उल्लासः, उदा.श्लो. सं. - 393
9. काव्यप्रकाशः, नवमः उल्लासः, उदा.श्लो. सं. - 78
10. साहित्यदर्पणः, दशमः परिच्छेदः, नवम्याः कारिकाया उदाहरणम्
11. काव्यप्रकाशः, नवमः उल्लासः, उदा.श्लो. सं. - 383
12. काव्यप्रकाशः, दशमः उल्लासः, उदा.श्लो. सं. – 425
13. काव्यप्रकाशः, नवमः उल्लासः, उदा.श्लो. सं. - 379
14. ध्वन्यालोकः, चतुर्थः उल्लासः, कारिकासंख्या. - 6

# भाषावृत्त्यनुसारेण स्थानेऽन्तरतमः इति सूत्रपरिशीलनम्

श्री संखा सुभ्रा गच्छित्*
सहायकाचार्यः(अ.), सी.वे.आ.सं.महाविद्यालयः
कोलकता

***लेखसारः*** *– सम्प्रदायप्रसिद्धेषु नवविधव्याकरणेषु लौकिकवैदिकोभयविधशब्दानां नितरां व्युत्पादकतया पाणिनीयव्याकरणं जगतीह प्रथतेतमामिति निश्चप्रचं विपश्चिताम् । भगवन्तं महेश्वरं प्रसाद्य तदनुग्रहेण मन्त्ररूपवर्णसमाम्नायं समवाप्य महता अवधानेन सूत्रमयीम् अष्टाध्यायीं निर्ममे पाणिनिराचार्यः । पाणिनिमहर्षेः अनन्तरम् अस्मिन् व्याकरणशास्त्रे भर्तृहरि-वामन-हरदत्त-कैयट-भट्टोजिदीक्षित-नागेशादयो बहवो विद्वासः आविर्भूताः । ते च स्वस्ववैदुष्यप्रतिभया व्याकरणशास्त्रमिदम् अलंचक्रुः । अस्यामेव परम्परायां द्वादशशतके समभूत् पुरुषोत्तमदेवाख्यः बङ्गीयः वैयाकरणमूर्धन्यः । तैः सम्पूर्णस्य अष्टाध्यायीग्रन्थस्य उपरि काचित् लघ्वी वृत्तिः व्यरचि । सा च वृत्तिः कालान्तरे भाषावृत्तिरिति नाम्ना प्रख्यातिम् अगात् । सम्प्रति भाषावृत्तिग्रन्थदिशा "स्थानेऽन्तरतमः (१.१.५०)" इति सूत्रस्य विस्तरेण पर्यालोचनं क्रियते ।*

***कूटशब्दाः*** *– अष्टाध्यायी, भाषावृत्तिः, पुरुषोत्तमदेवः, स्थाने, अन्तरतमः ।*

स्थाने, अन्तरतमः इति पदविभागः । द्विपदात्मकं सूत्रमिदम् । "षष्ठी स्थानेयोगा (१.१.४९)" इत्यस्मात् सूत्रात् स्थाने इति पदमत्र अनुवर्तते । स्थानशब्दः प्रसङ्गवाची । अतिशयेन अन्तरः इति अन्तरतमः । "अतिशायने तमबिष्ठनौ (५.३.५५)" इत्यनेन तमप्प्रत्ययः । अन्तरतमः नाम सदृशतमः । यद्यपि स्थानशब्दस्य प्रसङ्गार्थकत्वं कोशादिषु न दृश्यते, तथापि भाष्यादिप्रामाण्यात् सदृशार्थकः अन्तरशब्दः स्वीक्रियते । अत्रायं प्रश्नः- "षष्ठी स्थानेयोगा (१.१.४९)" इत्यस्मात् सूत्रात् इह स्थाने इति पदस्य अनुवृत्तिसम्भवात् पुनः अत्र स्थानेग्रहणं किमर्थम् । तत्र उच्यते एकस्मिन् सूत्रे निर्दिष्टानां परस्परसम्बद्धार्थानां पदानाम् अनुवृत्तिप्रसङ्गश्चेत् तर्हि सहैव तेषां प्रवृत्तिः, सहैव वा निवृत्तिः इति । एवमेव एतन्मूलिका न्यायसिद्धा परिभाषा वर्तते 'एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः' इति । तेन स्थानेयोगा इति समस्तपदस्य एकदेशः स्थाने इत्यस्य अनुवृत्तिः अत्र कर्तुं न शक्यते इति चेत् उच्यते- तन्न । एवं वक्तुं न शक्यते । 'क्वचिदेकदेशोऽप्यनुवर्तते' इति परिभाषा अपि तत्र उपतिष्ठते । अस्याः च परिभाषायाः उपस्थित्या एकदेशे स्वरितत्वप्रतिज्ञाबलात् क्वचित् तस्य एकदेशस्यापि अनुवृत्तिः सम्भवति इति चेदुच्यते- चारु एव । स्थाने इत्यस्य पूर्वसूत्रात् अनुवृत्तिसम्भवे अत्र सूत्रे पुनः स्थानेग्रहणं 'यत्र अनेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' इति इमां परिभाषां ज्ञापयति । अस्मिन् प्रसङ्गे भाष्यकारैः न्यगदि- "अथ स्थान इति वर्तमाने पुनः स्थानग्रहणं किमर्थम् । यत्र अनेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयो यथा स्यात् ।"[१] इति । कथं च इयं परिभाषा लभ्यते इत्यस्मिन् प्रसङ्गे कैयटाचार्यैः अवादि- "स्थानग्रहणे अनुवर्तमाने वाक्यभेदः क्रियते- स्थाने अन्तरतमो भवति, यत्र च अनेकमान्तर्यम् अस्ति तत्र स्थानकृतम् एव आन्तर्यम् आश्रीयत इति । वाक्यभेदस्य च तमग्रहणमेव लिङ्गम् । स्थानकृत एव हि सादृश्ये गृह्यमाणे सादृश्यान्तरपरित्यागात् तमग्रहणम् अनर्थकमेव स्यात् ।"[२] इति । यत्र स्थानकृतमपि सादृश्यं तत्र परवाक्येन गृह्यमाणे स्थानकृतमात्रसादृश्ये, यत्र च स्थानकृतसादृश्याभावस्तत्र पूर्ववाक्येन गृह्यमाणे अर्थगुणप्रमाणकृतान्यतमसादृश्ये अतिशयलाभार्थे तमग्रहणमिति भावः ।[३] अत्र प्रसङ्गे भट्टनागेशाः इत्थम् अब्रुवन्-

---

***सम्पर्कसूत्रम्** -9123020789, Email- Sankhasubhra96@gmail.com

[१]व्याकरणमहाभाष्यम् (राजलक्ष्मीसहितम्), पत्रम्- ३९३ ।

[२]व्याकरणमहाभाष्यम् (सम्पा- जयशङ्करलालत्रिपाठी), प्रदीपे, पत्रम्- ३९३ ।

[३]महाभाष्यम्, (तत्त्वालोकयुतम्), तत्त्वालोके, पत्रम्- ३७२ ।

"अनुवृत्तप्रसङ्गवाचिस्थानशब्देनैकं वाक्यम्, ताल्वादिवाचीहत्यस्थानशब्देनापरम् । अत्र च स्थाने इति तृतीयार्थे सप्तमीति भावः ॥[1] इति । "स्थानेऽन्तरतमः (१.१.५०)" इति सूत्रे स्थानपदस्य प्रसङ्गवाचकत्वे "षष्ठी स्थानेयोगा (१.१.४९)" इति सूत्रात् प्रसङ्गार्थकस्थानपदस्य अनुवृत्त्या सिद्धे स्थानपदं व्यर्थम् । व्यर्थीभूय ज्ञापयति अत्र स्थानपदं ताल्वादिस्थानपरम् । "स्थानेऽन्तरतमः (१.१.५०)" इति सूत्रघटकं स्थाने इति पदं तृतीयान्तेन विपरिणम्यते । तथा च वाक्यभेदेन बोधः । अन्तरतमः इति एकं वाक्यम् । स्थाने इति अपरं वाक्यम् । पूर्वस्मिन् वाक्ये एकस्य स्थाने अनेकेषाम् आदेशानां प्रसङ्गे सति सदृशतमः आदेशः स्यात् इत्यर्थः भवति । द्वितीये च वाक्ये एकस्य स्थाने नैकेषाम् आदेशानां प्रसङ्गे सति स्थानेन स्थानघटितधर्मेण सदृशतमः आदेशः भवति इत्यर्थः सञ्जायते । तथा च प्रथमवाक्येनैव कार्यनिर्वाहे द्वितीयवाक्यं व्यर्थं सत् ज्ञापयति प्रमाणादिना सदृशे स्थानेन च सदृशे आदेशे प्राप्ते स्थानेनैव सदृशतमः आदेशो भवति नान्येन । तेन चेता स्तोता इत्यादौ "सार्वधातुकार्धधातुकयोः (७.३.८४)" इत्यादिना प्रमाणेन आन्तर्येण मात्रिकेकारोकारयोः स्थाने मात्रिकः अकारः गुणः प्राप्तः, स च नियमेन वार्यते । स्थानकृतसादृश्येन ताल्वोष्ठस्थानयोः इकारोकारयोः ताल्वोष्ठस्थानकौ एकारौकारौ एव भवतः न अकारः इति । एवमेव चिधातोः तृचि "सार्वधातुकार्धधातुकयोः (७.३.८४)" इत्यनेन गुणे प्रमाणतः आन्तर्यात् ह्रस्वस्य इकारस्य ह्रस्वः अकारः प्राप्नोति । तत्र स्थानतः आन्तर्यात् तालुस्थानिकस्य इकारस्य तालुस्थानिकः एकारः प्राप्नोति । अनया परिभाषया स्थानकृतस्य आन्तर्यस्य बलवत्तात् इकारस्य एकारादेशो भवति । तत्र पुनः पृच्छ्यते 'सकृदुच्चारितः शब्दः सकृदेवार्थं गमयति' इति परिभाषया कथमत्र द्विविधो वाक्यार्थबोधः एकेनैव सूत्रेण क्रियते । तत्र उच्यते- आवृत्त्या एव द्विविधः अर्थबोधो जायते अत्र । सम्प्रति प्रश्नः क्रियते- सूत्रे तमब्ग्रहणं किमर्थं कृतम् । सूत्रे तमब्ग्रहणाभावे प्रसङ्गे सदृश आदेशः स्यात् इत्येव अर्थो भविष्यति । तदा- वाग् हसति, त्रिष्टुप् हसति इत्यादौ "झयो होऽन्यतरस्याम् (८.४.६२)" इत्यनेन हकारपूर्वसवर्णे प्राप्ते हकारस्य सवर्णी सर्वोऽपि कवर्गः स्थानसाम्यात्, द्वितीयवर्णस्य खकारस्य उष्मसंज्ञकत्वात् हकारस्यापि उष्मसंज्ञकत्वात् खकारस्य प्राप्तिः, हशः संवारा नादा घोषाश्च इत्यनेन गकारस्य तृतीयवर्णस्य प्रसक्तिः इति नेष्टसिद्धिः । तमब्ग्रहणे कृते सदृशतमः एव आदेशः इत्यर्थे हकारस्य भवेत् इति ऊष्मसंज्ञकस्य नादसंज्ञकस्य महाप्राणसंज्ञकस्य तादृश एव घकारो भवति । तत्र वाग् घसति, त्रिष्टुब्भसति इत्यादौ हकारस्य स्थाने "झयो होऽन्यतरस्याम् (८.४.६२)" इत्यनेन पूर्वसवर्णः सादृश्यात् खगघङाः चत्वारः प्राप्ताः । महाप्राणस्य हकारस्य महाप्राणः खकारः अन्तरः, संवारनादघोषस्य च तस्य संवारनादघोषा गघङाः अपि अन्तराः । अत्र केन भाव्यम् इति अनियमे अन्तरतमः आदेशः स्यात् इत्युक्तौ सदृशेषु तेषु आन्तरतम्यात् घ एव भवति । तेन वाग्घसति इति रूपं सिद्ध्यति । तथैव त्रिष्टुब्भसति इत्यत्रापि हकारस्य पूर्वसवर्णः भकारः प्रवर्तते । एवं सूत्रे तमब्ग्रहणं प्रदर्शितम् । इदानीं शङ्का क्रियते- "स्थानेऽन्तरतमः (१.१.५०)" इति सूत्रं स्वतन्त्रं सूत्रम् अथवा नियामकं सूत्रम् । यदि अयं स्वतन्त्रः विधिः तर्हि सर्वेषां शब्दानां स्थाने अन्तरतमः आदेशः अनेन विधीयते इत्यर्थः आगच्छति । तथा च सर्वस्थानिनां निवृत्तिः प्रसज्येत । यथा दधि, मधु इत्यादीनाम् अपि निवृत्तिः प्राप्यते इति दोषः । तस्य दोषस्य निरासनं क्रियते- दधि-मधु-शब्दयोः कश्चित् अन्यः आदेशो न निर्दिष्टो वर्तते इत्यतः दधिशब्दस्य दधिशब्दः, मधुशब्दस्य मधुशब्द एव आदेशो भविष्यति इति दोषपरिहारः । सूत्रस्य स्वतन्त्रविधित्वे सर्वस्थाननिवृत्तिरूपदोषपरिहारसम्भवे अपि तत्र क्वचित् शब्दस्वरूपे वैरूप्यरूपो दोषो जायते । यथा- बिसं मुसलम् इत्यादौ बिसशब्दस्थाने बिसशब्दादेशे मुसलशब्दस्थाने मुसलशब्दादेशे च सकारस्य सकारादेशस्वीकरणे इण्कोः परस्य सकारस्य "आदेशप्रत्यययोः (८.३.५९)" इत्यनेन सूत्रेण मूर्द्धन्यादेशः प्राप्नोतीति षत्वप्राप्त्या वैरूप्यरूपो दोषः सम्पद्यते । अतः सूत्रस्यास्य स्वतन्त्रविधित्वं न सम्भवति । अस्तु स्वतन्त्रविध्यसम्भवे

[1]महाभाष्यम् (छायासहितम्), उद्योते, पत्रम्- ४१४ ।

नियमविधिः भवतु इति परिप्रश्नः क्रियते । अर्थात्, सूत्रान्तरेण प्रवृत्तानाम् आदेशानां विषये सूत्रेण अनेन नियमः क्रियते । तत्र अन्तरतम एव साधुः, नान्यः इति । तेन विहितादेशानां प्रतिपादकत्वे अभिमतस्य शब्दस्य निर्वृत्तिः साधुत्वप्रतिपत्तिः न सिद्ध्यति । सर्वे आदेशा सर्वत्र प्राप्नुवन्ति । इष्टा व्यवस्था न सिद्ध्यति, यतो हि सर्वे आदेशाः सर्वत्र नैव इष्यन्ते । अतः अयमपि पक्षः दुष्टः । तथा च "अकः सवर्णे दीर्घः (६.१.१०१)" इत्यनेन यदा सर्वे अकः दीर्घाः कृताः तदा तेषां साधुत्वं विज्ञातम्, न च अनेन तेषाम् असाधुत्वं प्रतिपादयितुं शक्यते । यथा लोके कृतभोजनस्य कृते भोजनं मा कुरु इति निषेधः व्यर्थः, तथैव अत्रापि कृतकार्यस्य निवृत्तिः नैव कर्तुं शक्यते अनेन इत्यतः सूत्रमिदं व्यर्थम् इति नियमसूत्रत्वमपि अस्य न सिद्ध्यति । अतः "षष्ठी स्थानेयोगा (१.१.४९)" इत्यतः षष्ठी इति पदस्य अनुवृत्तौ यत्र स्थाननिरूपितसम्बन्धार्थिका षष्ठी तत्रैव इयं परिभाषा उपतिष्ठते इति बोध्यम् । तथा च विधिवाक्येन सह एकवाक्यतया अनेन सूत्रेण विधिवाक्यानाम् इति विधानकाले एव अन्तरतमः आदेशो विधीयते इति न दोषः । हरदत्तोऽप्याह- "तेन विधिवाक्यानामनेन सूत्रेणैकवाक्यत्वात् विधानकाल एवान्तरतम आदेशो विधीयते" इति ।[१] एवमेव भाषावृत्तौ सूत्रार्थं न्यरूपयत् - "स्थाने प्राप्यमाणानां सदृशतमः आदेशः स्यात् ।" इति ।[२] तेन स्वतन्त्रविधिनियमविध्योः असम्भवे इदं परिभाषासूत्रं भवति । 'अनियमे नियमकारिणी परिभाषा' । तथा च- सुधी उपास्यः इत्यत्र "इको यणचि (६.१.७७)" इति सूत्रेण ईकारस्य स्थाने यणादेशो विधीयते । तत्र यवरलां चतुर्णामपि लक्ष्ये प्राप्तिरस्ति इत्यनियमः । तत्र अनियमे प्रसक्ते इयं परिभाषा "इको यणचि (६.१.७७)" इत्यत्र उपस्थाय अन्तरतमो यण् भवति इति नियमयति । तथा च स्थानकृतान्तर्यात् तत्र तालव्य-ईकारस्य स्थाने तालव्ययकारः एवादेशो भवति । यद्यपि "इको यणचि (६.१.७७)" इत्यत्र "यथासङ्ख्यमनुदेशः समानाम् (१.३.१०)" इत्यनेन यथासङ्ख्यबलेनापि इष्टसिद्धौ ऋकारस्य स्थाने जायमानो रेफः ऋऌवर्णयोः आन्तरतम्यात् ऌकारस्यापि प्रसज्येत, एवं ऌकारस्यापि भाव्यमानः लकारः ऋकारस्यापि प्रसज्येत इति दोषवारणाय पृथक्तया ऋदित्-ऌदित्-करणसामर्थ्यात् ऋऌवर्णयोः सावर्ण्यानित्यत्वं प्रकल्पनीयं स्यात् तत्र च गौरवं स्यात् इत्यतः परिभाषया अनया निर्वाहः क्रियते । सम्प्रति सूत्रस्य पाठमादाय विप्रतिपत्तिः जायते । कतरः पाठः स्वीकरणीयः । द्वेधा पाठः सम्भवति । 'स्थानेऽन्तरतम उरण् रपरः' इति संहितापाठः । अतः 'स्थानेऽन्तरतमे' इति सप्तमीविभक्त्यन्तं वा, 'स्थानेऽन्तरतमः' इति प्रथमाविभक्त्यन्तं वा इति जायते संशयः । सप्तम्यन्तपाठे षष्ठी इत्यनुवर्तते । तथा च आदेशस्य अन्तरतमः यः स्थानी तत्रैव षष्ठी, यत्रैव षष्ठी तत्रादेशः इति स्थानिनः नियमः क्रियते । अत्र तु एकारस्य अयादेशे यकारस्य वैकल्पिकलोपः । 'स्थानेऽन्तरतमः' इति प्रथमान्तपाठे अन्तरतमः आदेशो भवति इति आदेशस्य नियमः क्रियते । अत्र पदान्तसकारस्य रुत्वं, यत्वं, यलोपश्च । एवमत्र संशीतिः सप्तम्यन्तपाठः आश्रयणीयः उत प्रथमान्तपाठः इति । सप्तम्यन्तपाठस्वीकारे प्रकृतसूत्रे "षष्ठी स्थानेयोगा (१.१.४९)" इत्यस्मात् षष्ठी इत्यनुवृत्तौ अन्तरतमे स्थानिनि षष्ठी इति वाक्यम् आदेशस्य यः अन्तरतमः स्थानी तत्र षष्ठी षष्ठीनिर्दिष्टस्य च आदेशा भवन्ति इत्यर्थकं स्यात् । तथा च "इको यणचि (६.१.७७)" इत्यत्र यणाम् अर्धमात्रिकाणां सदृशाः एकमात्रिकाः इकः, न तु दीर्घाः । तथा च दधि अत्र, मधु अत्र इत्यादौ ह्रस्वानाम् इकामेव स्थाने यण्भवति, कुमारी अर्थम्, ब्रह्मबन्धू अर्थम् इत्यत्र दीर्घाणाम् इकां स्थाने तु न स्यात् इति प्रथमो दोषः । तत्र प्रथमान्तपाठस्वीकारे तु ह्रस्वानाम् दीर्घाणां च इकां स्थाने यण्प्रवर्तते इति इष्टसिद्धिः । किञ्च "सार्वधातुकार्धधातुकयोः (७.३.८४)", "अचो ञ्णिति (७.२.११५)" इत्यादिषु गुणवृद्धिविधायकेषु सूत्रेषु "इको गुणवृद्धी (१.१.३)" इति परिभाषा उपतिष्ठते । तेन गुणवृद्ध्योः ये अन्तरतमाः इकः इत्युक्ते ए-ओ-ऐ-औ इत्येतेषां गुणवृद्धिपदबोध्यानां द्विमात्रिकत्वात् दीर्घाः एव । तेन

[१]काशिका, पदमञ्जर्याम्, पत्रम्- १५२

[२]भाषावृत्तिः, पत्रम्- १० ।


ISSN : 2249-538X

नीधातोः "ण्वुल्तृचौ (३.१.१३३)" इति तृचि, गुणे, नेता इत्यत्र लूधातोः "ण्वुल्तृचौ (३.१.१३३)" इत्यनेन ण्वुलि, "अचो ञ्णिति (७.२.११५)" इत्यनेन वृद्धौ लविता इत्यत्र च दीर्घाणामेव गुणवृद्धी स्याताम् । चेता, स्तोता, चायकः, स्तावकः इत्यादिषु इकां ह्रस्वत्वेन द्विमात्रिकत्वाभावात् गुणवृद्धी न स्याताम् एव इति द्वितीयदोषः । प्रथमान्तपाठस्वीकारे तु नायं दोषः । ह्रस्वानां दीर्घाणां च स्थाने गुणवृद्धी प्रवर्तेते एव इत्यदोषः । पुनः दोषान्तरं प्रदर्शयति- सप्तम्यन्तपाठस्वीकारे कर्ता हर्ता इत्यादौ ह्रस्वस्यैव ऋकारस्य गुणः स्यात् । किन्तु आस्तरिता, निपरिता इत्यत्र ॠकारस्य न स्यात् गुणः । एवमेव वृद्धिप्रसङ्गे दीर्घस्यैव ॠकारस्य वृद्धिः स्यात् । तेन आस्तारकः, निपारकः इत्यादौ "अचो ञ्णिति (७.२.११५)" इत्यनेन दीर्घस्य स्थानिनः ॠकारस्यैव वृद्धौ "उरण् रपरः (१.१.५१)" इति रपरत्वे आर् इति वृद्धिः स्यात् । कारकः, हारकः इत्यत्र ह्रस्वस्य ऋवर्णस्य वृद्धिः न स्यात् इति तृतीयदोषः । प्रथमान्तपाठस्वीकारे तु आदेशः अन्तरतमः इति यत्र षष्ठी तत्रादेशा भवन्ति इति ह्रस्वदीर्घयोः उभयोरपि ऋवर्णस्वरूपयोः प्रसङ्गे सति यथाशास्त्रं गुणवृद्धी स्याताम् । प्रथमान्तपाठे ऋकारस्य गुणवृद्धिप्रसङ्गे न दोषः । किन्तु प्रथमान्तपाठस्वीकारे "वान्तो यि प्रत्यये (६.१.७९)" इति सूत्रे स्थानिनिर्देशः कर्तव्यः इत्येको दोषः समापतति । सर्वेषाम् एज्वर्णानां स्थाने वान्तादेशो मा भूत् इति ओकारस्य औकारस्य च स्थाने एव स्यात् एकारस्य ऐकारस्य मा भूदिति वान्तादेशप्रसङ्गे स्थानिनिर्देशः कर्तव्यः इति प्रथमदोषः । सप्तम्यन्तपाठस्वीकारे तु नायं दोषः । एक्षु या अन्तरतमा प्रकृतिः ओदौतौ, तत्रैव षष्ठी, यत्र षष्ठी तत्रादेशाः इति स्थानिनिर्देशं विनापि ओकारौकारयोरेव वान्तादेशो भवति इति न दोषः । तत्र प्रथमान्तपाठपक्षे प्रथमदोषस्य परिहारः "वान्तो यि प्रत्यये (६.१.७९)" इति सूत्रे वान्तग्रहणं विना यि प्रत्यये इति सूत्रस्वीकारेण क्रियते । यि प्रत्यये इति सूत्रस्वीकारे चेयम्, जेयम् इत्यादौ अपि अयादेशः प्राप्नोति इति पुनराक्षेपः । तत्रोच्यते- "क्षय्यजय्यौ शक्यार्थे (६.१.८१)" इति क्षिज्योरेवैचः तयोश्च शक्यार्थे एव इति उभयतो नियमेन क्रियते । रायमिच्छति रैयति इत्यत्र ऐकारस्य आय्प्राप्तिरूपदोषस्य वारणं छन्दसि दृष्टानुविधित्वेन भाष्यकारेण कृतम् । तत्र द्वितीयदोषः उच्यते- "ऊदुपधायाः गोहः (६.४.८९)" इत्यत्र ऊदादेशस्य स्थानिदर्शनाय उपधाग्रहणं कर्तव्यं भवति । सप्तम्यन्तपाठे तु नात्र क्लेशः । गुहधातुसम्बन्धिनः अन्तरतमा प्रकृतिः इत्युक्ते उकार एव नान्यः । आदेशतः अन्तरतमनिर्वृत्तौ गुहधातौ यः कोऽपि वर्णः स्थानी स्यात् । कदाचित् गकारः, हकारश्च तयोः स्थानिवत्त्वनिवृत्तये उपधाग्रहणं कर्तव्यं भवति इति गौरवमिति आक्षेपः । तत्रोच्यते- अत्र उपधाग्रहणं नापेक्षितम् । स्वयं सूत्रकृता उपधायाः इत्युक्तमेव । अन्यथा परत्वात् "अलोऽन्त्यस्य (१.१.५२)" इति हकारस्य स्थाने ऊकारादेशापत्तिः । अतः उपधायाः इति सूत्रकृता एव उक्तम् इत्यतः नात्र दोषः । "रदाभ्यां निष्ठातो नः पूर्वस्य च दः (८.२.४२)" इति सूत्रे तकारग्रहणं कर्तव्यं भवति इति प्रथमान्तपाठस्वीकारे तृतीयदोषः । तत्र गीर्णः, भिन्नः इत्यादौ "निष्ठा (३.२.१०२)" इत्यनेन क्तप्रत्यये, "ॠत इद्धातोः (७.१.१००)" इत्यनेन ॠकारस्य इकारादेशे रपरत्वे "र्वोरुपधाया दीर्घः इकः (८.२.७६)" इति इकारस्य दीर्घे, "रदाभ्यां निष्ठातो नः पूर्वस्य च दः (८.२.४२)" इत्यनेन तकारस्य नकारादेशे, णत्वे गीर्णः इति रूपम् । एवमेव भिदधातोः क्तप्रत्यये, तकारस्य नकारे भिन्नः इति रूपं सिध्यति । अत्र प्रथमान्तपाठे आदेशतः अन्तरतमनिर्वृत्तौ स्थानिनः लाभाभावात् तद्बोधनाय तकारग्रहणं कर्तव्यम् इति दोषः । तत्रापि समाधानं पूर्ववत् एव । अर्थात्, तग्रहणस्य नास्ति आवश्यकता । स्वयं सूत्रकारेण एव तग्रहणं कृतं विद्यते । तेन प्रथमान्तपाठः एव आश्रयणीयः इति भाष्याशयः । भगवता भाष्यकारेण सूत्रमिदं दृष्टार्थतया प्रत्याख्यातम् । यथा- यः यस्य अन्तरतमः स एव तस्य स्थाने यथा स्यात् अन्यस्य अन्तरतमः अन्यस्य स्थाने मा भूत् इत्यर्थं प्रत्यात्मम् इति न वक्तव्यम् । यथोक्तं वार्त्तिकृता एव "प्रत्यात्मवचनमशिष्यं स्वभावसिद्धत्वात् ।"[१] इति । स्वभावतः एव एतत्सिद्धम् यत् यो यस्य अन्तरतमः स एव तस्य

[१]व्याकरणमहाभाष्यम् (ज्योत्स्नासहितम्), पत्रम्- ६६६

स्थाने भवति, अन्यस्य अन्तरतमोऽन्यस्य स्थाने न भवति । "तद्यथा- समाजेषु समाशेषु समवायेषु च आस्यतामित्युक्ते न चोच्यते प्रत्यात्ममिति, प्रत्यात्मं चाऽऽसते ।"[१] इति । अर्थात्, समाजेषु समाशेषु समवायेषु च आस्यताम् इत्युक्ते 'प्रत्यात्मम्' इत्यनुक्तेऽपि स्वभावत एव जनाः स्वस्वसमाजेषु एव आसते । एवं स्वभावसिद्धत्वादेव कस्यचित् स्थाने अनेकादेशप्रसङ्गे आदेशेषु य आदेशः स्थानिनोऽन्तरतमः स एव भवेत्, नासदृशोऽपि । "तद्यथा- समाजेषु समाशेषु समवायेषु च आस्यतामित्युक्ते नैव कृशाः कृशैः सहासते, न पाण्डवः पाण्डुभिः । येषामेव किञ्चिदर्थकृतमान्तर्यं तैरेव सहासते॥ तथा गावो दिवसं चरितवत्यो यो यस्याः प्रसवो भवति, तेन सह शेरते॥"[२] इति । एवमचेतनेष्वपि सजातीयाकर्षणसिद्धान्तो दृश्यते । "तद्यथा- लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति, नोर्ध्वमारोहति, पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः । तथा- या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः । स आकाशदेशे निवाते नैव तिर्यग्गच्छति न अवागवरोहति, अब्विकार अप एव गच्छत्यान्तर्यतः॥ तथा ज्योतिषो विकारोऽर्चिराकाशदेशे निवाते सुप्रज्वलितो नैव तिर्यग्गच्छति नावागवरोहति । ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः॥"[३] इति । एवम् अन्तरतम आदेशो भवति, यत्रानेकविधमान्तर्यमिति च न्यायसिद्धम् । न तदर्थमिदं सूत्रं विधेयम् । तत्र स्थानसादृश्यस्य उदाहरणं भवति- लताग्रम् इति । लतायाः अग्रम् इति विग्रहे "षष्ठी (२.२.८)" इति सूत्रेण समासे, "कृत्तद्धितसमासश्च (१.२.४६)" इत्यनेन प्रातिपदिकसंज्ञायाम्, सुब्लुकि, लता अग्र इति स्थिते, आकार-अकारयोः स्थाने "अकः सवर्णे दीर्घः (६.१.१०१)" इत्यनेन सवर्णदीर्घे, "स्थानेऽन्तरतमः (१.१.५०)" इति परिभाषाबलात् कण्ठ्ययोः कण्ठ्यः एव इति स्थानसादृश्यात् आकारे, प्रक्रियायाम्, लताग्रम् इति रूपं सिद्ध्यति । एवमेव अर्थसादृश्यस्य उदाहरणं भवति- तरुणयुवतिः । तरुणस्य स्त्री इत्यर्थे गौरादिगणपठितत्वात् तरुणशब्दात् "षिद्गौरादिभ्यश्च (४.१.४१)" इत्यनेन सूत्रेण ङीषि, प्रक्रियायाम्, "यस्येति च (६.४.१४८)" इत्यनेन अकारस्य लोपे, तरुणी इति सिद्ध्यति । तरुणी चासौ युवतिश्चेति विग्रहे, "पोटायुवतिस्तोककतिपयगृष्टिधेनु-वशावेहत्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः (२.१.६५)" इत्यनेन सूत्रेण समासे, "पुंवत्कर्मधारयजातीयदेशीयेषु (६.३.४२)" इत्येनन पुंवत्त्वात् रूपातिदेशेन तरुणीशब्दस्य स्थाने पुंलिङ्गादेशे कर्त्तव्ये अर्थप्रत्यासत्त्या तरुणशब्दः एव आयाति । तेन प्रक्रियाकार्ये तरुणयुवतिः इति रूपं सिद्ध्यति । गुणसादृश्यस्य उदाहरणं भवति- पाकः, त्यागः इति । अत्र "चजोः कुघिण्ण्यतोः(७.३.५२)" इति सूत्रेण कुत्वे अल्पप्राणस्य अघोषस्य चकारस्य घोषवतः नादवतः महाप्राणस्य जकारस्य च यथाक्रमं तादृशौ एव ककारगकारौ । यद्यपि गुणः अत्र बाह्यप्रयत्नः, तथैव भाष्ये दर्शनात्, तथापि गुणशब्दः अत्र स्थानार्थप्रमाणभिन्नधर्ममात्रपरः । अत एव अत्रैव सूत्रे भाष्ये आन्तरतम्याभाववत्त्वरूपमेव ऋकारशकारयोः सादृश्यम् इत्याशयेन अनान्तर्य्यमेवानयोरान्तर्य्यम् इत्युक्तिः सङ्गच्छते । प्रमाणसादृश्यस्य उदाहरणं भवति- अमुष्मै, अमूभ्याम् इति । अत्र अदसः चतुर्थ्यैकवचने भ्यामि च परतः त्यदाद्यत्वम्, "सर्वनाम्नः स्मै (७.१.१४)" इति सूत्रेण स्मैभावः । भ्यामि "सुपि च (७.३.१०२)" इत्यनेन दीर्घः, ततः "अदसोऽसेर्दादु दो मः (८.२.८०)" इत्यनेन एकमात्रकस्य एकमात्रकोकारः । द्विमात्रकस्य द्विमात्रकः । तथा अन्यत्रापि बोध्यम् ।

एवमत्र विस्तरेण भाषावृत्ति-काशिका-भाष्यादिग्रन्थदिशा "स्थानेऽन्तरतमः (१.१.५०)" इति सूत्रं यथामति व्याख्यायि । तत्र प्रसङ्गे प्राप्ते विविधानाम् आचार्याणां मतान्यपि परिशीलितानि । अस्मिन् लघुशोधप्रबन्धे आदितः क्रमेण स्थानेपदार्थविचारः, अन्तरतमशब्दार्थपरामृष्टिः, स्थानेपदस्य अनुवृत्तिप्रसङ्गः, 'यत्र अनेकविधमान्तर्यं तत्र

---

[१]व्याकरणमहाभाष्यम् (व्याख्याता- युधिष्ठिरमीमांसकः), पत्रम्- १४९ ।
[२]व्याकरणमहाभाष्यम् (तत्त्वालोकसहितम्), पत्रम्- ३८० ।
[३]व्याकरणमहाभाष्यम् (राजलक्ष्मीसहितम्), पत्रम्- ४०३ ।


ISSN : 2249-538X

स्थानत आन्तर्यं बलीयः' इति परिभाषार्थविचारः, तमब्ग्रहणविचारः, अन्तरतम-इति प्रथमान्तपाठः स्वीकर्तव्यः उत सप्तम्यन्तपाठः इति विमर्शः, सूत्रस्य अस्य स्वतन्त्रविधित्वम् उत नियमविधित्वं चेत्यादयः सर्वेऽपि विषयाः इह प्रतिपादिताः सन्ति ।

## अनुशीलितग्रन्थाः (Bibliography)


१. व्याकरणमहाभाष्यम्, भाष्यप्रदीपोद्योतसमुल्लसितम्, प्रथमः खण्डः, संशो. भार्गवशास्त्री जोशी, देहली : चौखाम्बासंस्कृतप्रतिष्ठानम्, २०१५ ।

२. व्याकरणमहाभाष्यम्, कैयटप्रणीतेन भाष्यप्रदीपेन, तद्व्याख्यानभूतेन नागेशभट्टविरचितेन उद्योतेन, भाष्यव्याख्यानभूतेन भट्टोजिदीक्षितविरचितेन शब्दकौस्तुभेन च सहितम्, गुरुप्रसादशास्त्रिविरचितया भाष्यादिव्याख्यानभूतया अभिनवराजलक्ष्मीटीकया चालङ्कृतम्, प्रथमो भागः, संस्कर्त्ता गुरुप्रसादशास्त्री, संपा. नन्दकिशोरशास्त्री, देहली : प्रतिभा प्रकाशन, १९९९ (पुनर्मुद्रितम्) ।

३. व्याकरणमहाभाष्यम्, प्रदीपोद्योत-भावबोधिनी-हिन्दी-व्याख्योपेतम्, ६-९ आह्निकानि, सम्पा. जयशङ्करलालत्रिपाठी, वाराणसी : कृष्णदास-एकादमी, २००२ ।

४. व्याकरणमहाभाष्यम्, ज्योत्स्ना समुद्भासितम्, नवाह्निकम्, सम्पा. हरिनारायणतिवारी, वाराणसी : चौखम्बा-विद्याभवन, २००९ ।

५. व्याकरणमहाभाष्यम्, प्रदीपोद्योत-तत्त्वालोकव्याख्यासहितम्, नवाह्निकम्, सम्पा. रुद्रधरझा, वाराणसी : चौखम्भा-संस्कृत-संस्थान, २०१० ।

६. काशिका, न्यास-पदमञ्जरी-भावबोधिनी-सहिता, प्रथमो भागः, सम्पा. जयशङ्करलालत्रिपाठी, वाराणसी : तारा-बुक-एजेन्सी, १९८६ ।

७. महाभाष्यम्, हिन्दीव्याख्यासहितम्, प्रथमो भागः, द्वितीयः खण्डः, ६-९ आह्निकम्, व्याख्या. युधिष्ठिर-मीमांसकः, सम्पा. प्रदीपकुमार-शास्त्री, हरियाणा : रामलाल-कपूर-ट्रस्ट, २०१९ ।

८. काशिका, सटिप्पण-प्रकाशहिन्दीव्याख्योपेता, प्रथमो भागः, व्याख्या. नारायण-मिश्रः, वाराणसी : चौखम्भा-संस्कृत-संस्थान, १९९६ ।

९. वैयाकरणसिद्धान्तकौमुदी, तत्त्वबोधिनी-बालमनोरमा-शेखरव्याख्यात्रयविराजिता, पूर्वार्द्धा, सम्पा. गुरुप्रसादशास्त्री-सीतारामशास्त्री-बालशास्त्री, वाराणसी : चौखम्बा-सुरभारती-प्रकाशन, २०२२ ।

# पाराशरोपपुराणे अद्वैततत्त्वानुरोधेन जडचेतनविचारः

श्री शक्तिप्रसादः महापात्र*
शोधच्छात्रः, रा.सं.विश्वविद्यालयः
तिरुपतिः

***लेखसारः*** *– दर्शनीयतमे शास्त्रे वेदान्तदर्शने विचारितेषु पदार्थेषु द्विधैव प्राधान्येन विभागः स्फुटं दृश्यते । दृग्दृश्याविति विभागेन विचारमिमम् अवगन्तुं शक्नुमः । सोऽयं विचारः उपनिषदां तात्पर्यं सम्पादयितुम् अतीव आवश्यकः । यदा तु वेदाध्ययनमेव दुःशकं तदा उपनिषदां तात्पर्यावगमः कथं वा पर्यवस्येत । अतः तदधिगमे सर्वेषां साह्यं सिध्यतु इति महर्षिभिः व्यासादिभिः पुराणानि उपपुराणादीनि संरचितानि सन्ति । तथा च परमपुरुषार्थभूतस्य मोक्षस्य प्राप्तिमार्गे साधनभूतस्य तत्त्वाधिगमस्य सम्पादनार्थं पुराणग्रन्थराशिरपि बहुधा उपकरोति । तादृशग्रन्थरत्नसमुदाये राराजते इदमपि पुराणं पाराशरनामकम् । अस्मिन्नपि उपपुराणे दार्शनिकतत्त्वानाम् अन्तर्भावपूर्वकं प्रबोधनम् अत्यन्तं सुचारुतया दृश्यते । तादृशस्य दृग्दृश्यविवेकस्य विचारः एव अयं पाराशरोपपुराणे अद्वैततत्त्वानुरोधेन जडचेतनविचारः । स च यथानुसन्धानं प्रतिपाद्यते ।*

***कूटशब्दाः*** *– पुराणप्रसङ्गः, अद्वैततत्त्वम्, समीक्षा, चेतनतत्त्वं, जडतत्त्वम्*

## पुराणप्रसङ्गः –

उपपुराणेषु अन्यतमम् इदं पुराणं पराशरोपपुराणम् । पराशरोपपुराणे आहत्य अष्टादश अध्यायाः सन्ति । तेषु दार्शनिकाः विचाराः वैविध्येन निरूपिताः दृश्यन्ते । इदं शिवतत्त्वप्रतिपादकं शैवपुराणम् इत्यपि प्रसिद्धम् । अद्वैततत्त्वनिरूपणपराः नैके श्लोकाः मुनिना निवेशिताः । येषाम् अध्ययेनन वेदान्ततत्त्वस्य अधिगमः सुगमः स्यात् । तेषु अध्यायेषु अन्तिमः विशिष्टश्च अध्यायः अष्टादशः । अत्र शास्त्रस्य संक्षेपः कारिकाभिः प्रदर्शितः अस्ति महर्षिणा पराशरेण ।

पारमार्थिकचैतन्यं, परमः पुरुषार्थः, तत्प्राप्तिः, तत्प्राप्तिमार्गे अपेक्षितानि साधनानि, तदन्तर्गतः विवेकः, विवेकविषयाः इत्येवमादीनां विमर्शः कृतः दृश्यते । तेषु विचारेषु अन्तर्गते विवेके विषयभूतमिदं तत्त्वद्वयं जडं चेतनञ्च ।

तयोरन्यतरत् चेतनात्मकं तत्त्वं कृत्स्नस्य जगतः स्वरूपभूतमस्ति । यतः अस्य जगतः सृष्टिः, स्थितिः, यत्र च लयः भवति तदेव हि इदं तत्त्वम् । तच्च चैतन्यं ब्रह्मैव तदतिरिक्तं सर्वं दृश्यं जडभूतं चेतनस्य एव भासा विभाति । अयं च विचारः वेदान्तदर्शने औपनिषदे साहित्ये राराजते ।

## अद्वैततत्त्वम् –

**"सत्यं ज्ञानम् अनन्तं ब्रह्म"**[१] इति हि श्रुतिः चैतन्यस्य आत्मत्वं ब्रह्मस्वरूपं च प्रदर्शयति । अस्यां श्रुतौ ज्ञानशब्देन चैतन्यमेव अभिहितं भवति । ब्रह्म च एतादृशं उपनिषत्सु वर्णितं सर्वेषां साधकानां परमं लक्ष्यभूतमस्ति । तद्ब्रह्म तावत् सर्वज्ञरूपं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणभूतं वेदान्तशास्त्रादेव स्फुटम् अवगम्यते । तथा च सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येण एव एतस्य अर्थस्य प्रतिपादकत्वेन समनुगतानि सन्ति । तानि च एवम् उपलभ्यन्ते **'सदेव सोम्येदमग्र**

---

***सम्पर्कसूत्रम्*** – 7735699517, Email – shaktiprasadmahapatra340@gmail.com

[१] तैत्तिरीयोपनिषत् – २.१

**आसीत् एकमेवाद्वितीयम्'**[१], **'आत्मा वा इदमेक एवाग्र आसीत्'**[२], **'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्अयमात्मा ब्रह्म सर्वानुभूः'**[३] **'ब्रह्मैवेदममृतं पुरस्तात्'**[४] इत्यादीनि वेदान्तवाक्यानि तात्पर्येण ब्रह्म बोधयन्ति ।

इदमेव चैतन्यं लोके त्रिधा विकल्पेन अध्यासपूर्वकं परिगृह्यते । यथा प्रमातृचैतन्यं, प्रमाणचैतन्यं, विषयचैतन्यम् इति त्रिधा विभागाः द्रष्टुं शक्यन्ते । अत्र अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम् । अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं भवति प्रमाणचैतन्यम् । एवं सर्वेषां विषयाणाम् आधारभूतं विषयावच्छिन्नं भवति विषयचैतन्यम् ।

इदमेव हि चैतन्यं सर्वस्य नियन्तृ । यदेतदक्षरं तत् सर्वान्तरं साक्षादपरोक्षाद्ब्रह्म, य आत्मा अशनायादिधर्मातीतः, एतस्यैव चैतन्यस्य प्रशासने — यथा राज्ञः प्रशासने राज्यमस्फुटितं नियतं वर्तते, एवम् एतस्यैव अक्षरस्य प्रशासने सूर्याचन्द्रमसौ, अहोरात्रयोर्लोकप्रदीपौ विधृतौ तिष्ठतः । अर्थात् नियतदेशकालनिमित्तोदय-अस्तमयवृद्धिक्षयाभ्यां वर्तेते । एवमेतयोः उभयोः प्रशासितृ वर्तते चैतन्यभूतम् अक्षरम् । एवमेव अस्य अक्षरस्य एव प्रशासने द्यावापृथिव्यौ सावयवत्वात् स्फुटनस्वभावे चेदपि गुरुत्वात्पतनस्वभावे संयुक्तत्वाद्वियोगस्वभावे चेतनावदभिमानिदेवताधिष्ठितत्वात् स्वतन्त्रे चेदपि विधृते तिष्ठतः । अतः एतदक्षररूपं चैतन्यं सर्वव्यवस्थासेतुः सर्वमर्यादाविधरणम् । अत्र च प्रमाणत्वेन **'येन द्यौरुग्रा पृथिवी च दृढा'** इत्यादयः मन्त्रवर्णाः अवलोक्यन्ते ।

तुल्यया रीत्या एतस्यैव चैतन्यस्य प्रशासने निमेषाः मुहूर्ताः इत्येते कालावयवाः सर्वस्यापि अतीतानागतवर्तमानस्य कलयितारः तिष्ठन्ति । यथा लोके प्रभुणा नियतो गणकः सर्वम् आयं व्ययं च अप्रमत्तो गणयति, तथा प्रभुस्थानीय एषां कालावयवानां नियन्ता चेतनः । तथा श्वेतेभ्यः हिमवदादिभ्यः पर्वतेभ्यः गिरिभ्यः याः पूर्वदिग्गमनाः नद्यः स्रवन्ति गङ्गाद्या नद्यः ताश्च यथा प्रवर्तिता एव नियताः प्रवर्तन्ते, अन्यथापि प्रवर्तितुमुत्सहन्त्यः तदेतल्लिङ्गं प्रशास्तुः चेतनस्य । एवं प्रतीच्यः अन्याः सिन्ध्वाद्या नद्यः अपि चेतनस्यास्य अधीने वर्तन्ते । तादृशमिदं चेतनतत्त्वं सर्वस्यापि प्रपञ्चस्य मूलभूतम् ।

अपरं च तत्त्वमस्ति यत् निरूप्यते तत् दृश्यम् । दृशा चैतन्येन सम्बद्धमिदं दृश्यं जडतत्त्वम् । अर्थात् कल्पितं समस्तमपि दृशि चैतन्ये आरोपितमस्ति । सत्यभूते चैतन्ये मिथ्यात्मकं सकलमपि आरोपितम् अस्ति । तस्मिंश्च दृश्ये पञ्चभूतानि, तैः जनितानि सकलानि अपि अन्तर्भवन्ति । सूक्ष्मेभ्यः पञ्चभ्यः अपि भूतेभ्यः आरभ्य स्थूलानि शरीराणि सर्वाण्यपि अन्तर्भवन्ति । तादृशं तत्त्वद्वयमिदं अद्वैतसाहित्येषु बहुधा सुष्टु निरूपितमस्ति । तमंशं पाराशरोपपुराणे यथानिरूपणं पश्यामः ।

## समीक्षा –

**अस्ति स्वात्मैव नैवान्यद्वस्तु तत्त्वनिरूपणे । व्यावहारिकदृष्ट्यैव विभाति स्वात्मनः पृथक् ॥**[५]

तत्त्वनिरुपणे आत्मातिरिक्तम् अन्यत्किमपि तत्त्वं नास्ति इति पराशरः शुकं प्रत्युपदिशति । ननु "अयं घटः", "अयं पटः" इत्यादयः प्रत्यक्षप्रमाणेनैव आत्मातिरिक्तपदार्थाः सिद्धाः इति चेत्, न । व्यवहारिकदृष्ट्या सर्वेऽपि पदार्थाः आत्मनः पृथक् प्रतीयन्ते वस्तुतस्तु आत्मैव सत्यभूतः चेतनात्मकः सकलाधारः अस्ति । प्रत्यक्षादीनां प्रमाणादीनां लौकिकम्

[१]छान्दोग्योपनिषत् – ६.२.१
[२]ऐतरेयोपनिषत् – १.१.१
[३]बृहदारण्यकोपनिषत् – २.५.१९
[४]मुण्डकोपनिषत् – २.२.१२
[५]पराशरोपपुराणम् – १८-२८

अतत्त्वावेदकं प्रामाण्यं सम्पादयितुम् एवं रूपेण जडतत्त्वमिदं व्यावहारिकं परिकल्प्यते । ननु व्यावहारिकदृष्ट्या आत्मनः सकाशात् पृथक् प्रतीयमानानां पदार्थानां आत्मत्वं कथमिति चेत्,

## चेतनतत्त्वम् –

**समस्तव्याप्तिभावत्वाद्भावः स्वात्मैव केवलम् ।**

सर्वेष्वपि पदार्थेषु आत्मनः व्याप्तत्वात् एव । यथा च श्रुतौ इदं निरूप्यते – **"तत्सृष्ट्वा तदेवानुप्राविशत्"**[1] इति । अनेन वाक्येन सर्वव्यापित्वात् दृश्यस्यापि दृगात्मकत्वम् अवगम्यते । एतद्धि चेतनतत्त्वं वेदान्तैः प्रतिपदं प्रतिपिपादयिषितम् । अनेनैव हि सर्वत्र स्पन्दः अनुभूयते । अस्मादेव हि कारणात् जडतत्त्वस्य व्यवहारः सम्भवति । अतः अस्य सर्वव्याप्तिः महत्त्वपूर्णा या सर्वस्यापि अपेक्षिता । तदानीमेव हि लोकव्यवहारः निरूपयितुं शक्यते ।

**अस्यैवोपाधिभेदेन विभेदः कल्पितः स्वयम् ॥**[2] **नैव स्वाभाविको भेदो यतो दृश्यस्य आत्मनः ।**

ननु 'अयं पुत्रः' 'इयं माता' इति भेदकल्पनं कथमिति चेत्, उपाधिभेदेन तत्र भेद कल्पितः यथा आकाशः एकोऽपि घटपटाद्युपाधिभेदेन घटाकाशः पटाकाशः रूपेण विभज्यते तद्वत् आत्मा एकैव उपाधिभेदेन विभज्यते न तु स्वाभाविकः । अस्य आत्मनः विभुत्वात् अल्पेन उपाधिना अवच्छेदः यदा जायते तदा दृश्यत्वं परिकल्प्यते । तावता स्वाभाविकः भेदस्तु न सिध्यति । सः भेदोऽपि परिकल्पित एव भवति । अतः वास्तविकः अभेदः एव मनसि कृत्वा एवं व्यवस्था लोके सिध्यति ।

**स्वभावादेव यस्साक्षी स एव परमश्शिवः ॥**

तर्हि कीदृशः अयम् आत्मा इति विचारे सति अस्य चेतनस्य साक्षिस्वरूपम् इति कथयन्तः अत्र शिव इति नाम्ना चैतन्यमेव उक्तं भवति । साक्षी इत्यनेनापि ज्ञानं चैतन्यस्वभावम् इति साक्षादेव अवगम्यते । शिवः इति शब्दोऽपि माण्डूक्योपनिषदि ब्रह्मचैतन्यपरतया बोधं जनयति ।

**तदैक्यं परमा मुक्तिः जीवसंज्ञस्य देहिनः ।**

यदा जीवस्य परमात्मना सह ऐक्यं भवति तदा मोक्षः इति कथ्यते । देहः यस्य अस्ति सः देही अर्थात् जीवः । अत्र एवं विचारः आवश्यकः अस्ति । जीवन्नेव देही इति नार्थः । देहेन्द्रियमनोबुद्ध्यादिषु अभिमाने सत्येव तस्य देहित्वं युज्यते । अतः तादृशस्य अभिमानः यदा नश्यति तदैव हि मोक्षः ।

**स्वत एव त्वभिन्नस्य तदैक्यं परमात्मना ॥**[3] **तदैक्याज्ञाननाशेन स्वत एव प्रकाशते ।**

ननु जीवः परमात्मनः भिन्नमिति चेन्न, यथा महाकाशादभिन्नयोः घटपटाकाशयोः घटपटरूपोपाध्ययोः नाशेन स्वतः एव महाकाशे ऐक्यत्वं तथैव अज्ञानरूपोपाधि नाशेन जीवस्यापि परमात्मना सह ऐक्यत्वम्, तेन जीवस्य मोक्षः इति ।

## जडतत्त्वम् –

**महदादि जगच्छून्यपर्यन्तमखिलं जडम् ॥**[4] **ब्रह्मात्मैक्यापरिज्ञानमहामायाविजृम्भणम् ।**

[1]तैत्तिरीयोपनिषत् – २.६
[2]पराशरोपपुराणम् – १८-२९
[3]पराशरोपपुराणम् – १८-५९
[4]पराशरोपपुराणम् – १८-६०

 ISSN : 2249-538X

महामायाविजृम्भणं परिणामरूपं ब्रह्मात्मैक्यापरिज्ञानं महदादिजगत्पर्यन्तमखिलं जडतत्त्वम् । अत्र जडतत्त्वनिरूपणकृतम् । ब्रह्मात्मैक्यपरिज्ञानम् अस्ति चेत् दृक्स्वरूपमेव सिद्ध्यति । परन्तु तस्य परिज्ञानाभावात् एव दृश्यस्य अस्य व्यवस्था भवति । अत्रैव हि पञ्च भूतानि, तेषां कार्याणि, चतुर्दश भुवनानि, तदन्तर्गतशरीराणि ।

**संसारहेतुभूतस्य मूलाज्ञानस्य बाधकम् ॥**[१] **ब्रह्मात्मैक्यपरिज्ञानं वेदादेव विजायते ॥**[२] **इति ।**

ननु ब्रह्मात्मैक्यमज्ञानं कथं नश्यतीति चेत् यदा संसारहेतुभूतस्य मूलाज्ञानस्य बाधकं ब्रह्मात्म्यैक्यं परिज्ञानं जायते तदा तन्नश्यति। पारशरोपपुराणे तु ब्रह्मात्म्यैक्यज्ञानं वेदादेव जायते इत्युक्तम्। प्रकृते च तादृशः वेदभागो नाम **अखण्डार्थप्रमितिजनकं** वाक्यम्। यच्च तत्त्वमस्यादिरूपं ब्रह्मज्ञानं शाब्दापरोक्षं जनयति। इत्येवं पराशरोपपुराणस्थवैदिकविषयस्य अद्वैतदृष्ट्या समीक्षणात्मकम् उदाहरणमेकं प्रदर्शितम् ।

## सहायकग्रन्थसूची –


1. पराशरोपपुराणम्
2. बृहदारण्यकोपनिषत्
3. तैत्तिरीयोपनिषत्
4. ऐतरेयोपनिषत्
5. मुण्डकोपनिषत्


[१]पराशरोपपुराणम् – १८-६१

[२]पराशरोपपुराणम् – १८-६२

# दुहादिद्विकर्मकधातुविमर्शः

श्री सौरव पोरेल्*
शोधच्छात्रः, रामकृष्णमिशन्
कोलकता

***लेखसारः*** *– देवभाषा*[१] *संस्कृतम् । इयञ्च सर्वमतेन बह्वीनां भाषाणां मातृत्वं भजते । छन्दो-वृत्ति-सन्ध्य-लंकारादिभिः अलंकृता संस्कृतभाषा साधारणजनमनांसि मोमुद्यते । एतानि व्यतिरिच्यापि कारकादिष्वन्येषु केषुचिद्वैचित्र्येष्वन्यतमस्तावद् द्विकर्मकधातुः । सामान्यतो द्विकर्मकधातुरिति पदश्रवणेन यस्य सकर्मकधातोः कर्मद्वयं स एव द्विकर्मकः इत्यर्थलाभात् छात्रः पुस्तकं लेखनीं च नयति, यानं मनुष्यं पशुं च वहति, नरः अन्नं व्यञ्जनं च खादति चेत्यादिवाक्ये क्रमशः नी-धातोः, वह्-धातोः, खाद्-धातोः च द्वयोः कर्मणोः विद्यमानत्वात् नी-वह्-खाद्-धातवः तद्वदन्ये च सकर्मकधातवः द्विकर्मकाः इति ज्ञायते । परन्तु पानिनीयव्याकरणानुसारेण मुख्यगौणकर्मवान् धातुरेव द्विकर्मकः इति यथार्थाभिप्रायः । तत्र मुख्यकर्मणः गौणकर्मणः च किं लक्षणम्, कदा मुख्यं गौणं च कर्म लभ्यते, कर्मणि प्रथमा मुख्यकर्मणः उत गौणकर्मणः, मुख्यगौणकर्मणः वाक्ये सत्त्वात् कथं शाब्दोबोधः चेत्यादिविषये जनाः विबंभ्रम्यन्ते । अतः प्रकृतशोधप्रबन्धेन विश्लेषणात्मकशोधपद्धत्या यथामति द्विकर्मकधातुविषये विस्तरशः आलोच्यते । अयं लघुशोधप्रबन्धः भगवतः परमहंसश्रीरामकृष्णदेवस्य चरणकमलयोः समर्पितोऽस्तु ।*

***कूटशब्दाः*** *– द्विकर्मकः, कर्मणि, कर्तरि, प्रथमा, द्वितीया, कर्ता, कर्म, मुख्यकर्म, गौणकर्म, णिजन्तः, अणिजन्तः ।*

## भूमिका

द्वे कर्मणी यस्य सः द्विकर्मकः धातुः । कर्मवत्त्वात् सकर्मकधातूनाम् एकम् एकाधिकं वा कर्म सम्भवेदेव । अतः द्वे कर्मणी यस्य सः द्विकर्मकः इति सामान्यतः विग्रहे स्वीक्रियमाणे सर्वेषामपि सकर्मकधातूनां द्विकर्मधातुत्वापत्तिः । तस्मादिदम् आदौ अवधार्यं यत् द्विकर्मकधातुपदेन मुख्यगौणकर्मवद्धातुः विवक्षितो न तु एकेनैकाधिकेन वा कर्मणा युक्तः सकर्मकधातुः । न च द्विकर्मकत्वं सर्वेषां धातूनां सर्वदा च सम्भवति । अतः केषां धातूनां द्विकर्मकत्वं कस्यां विशेषस्थितौ सम्भवति इति निर्धारणार्थं भगवता पाणिनिमुनिना स्वयं कानिचन सूत्राणि व्यरचिषत, तानि - अकथितञ्च (पा.सू. १-४-५१), गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ (पा.सू. १-४-५२), हृक्रोरन्यतरस्याम् (पा.सू. १-४-५३) चेति । अत्र अकथितञ्चेति सूत्रस्याशयनानुसारम् द्विकर्मकधातूनां विषये आलोच्यते ।

## अकथितं च इति सूत्राशयः

अकथितम् इति प्रथमैकवचनान्तं पदम्, च इति अव्ययपदम् । एतत्सूत्रे कर्तुरीप्सिततमं कर्म (पा.सू. १-४-४९) इति सूत्रात् संज्ञाबोधकं कर्म इति प्रथमान्तं पदम्, कारके (पा.सू. १-४-२३) सूत्रस्थस्य कारके इति पदस्य प्रथमार्थकसप्तम्यन्तत्वात्[२] कारकम् इति संज्ञाबोधकं[३] पदञ्च अनुवर्तेते । कर्मसंज्ञायाः सत्त्वात् पुनः कारकम् इति शब्देन कारकसंज्ञायाः अनुवृत्तिसामर्थ्यात् कर्म इति विशेषसंज्ञया कारकसंज्ञायाः समावेशः भवति । तेन च वाक्यं भित्त्वा सूत्रस्थितपदानां

***सम्पर्कसूत्रम्** – 8327656233, Email – souravporelvedvid@gmail.com

[१]संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः । - काव्यादर्शे १.३३

[२]तत्र हि व्यत्ययेन प्रथमार्थे सप्तमी । - कर्तुरीप्सिततमं कर्म (१-४-४९) इति सूत्रस्य प्रौढमनोरमायाम् ।

[३]किमिदं कारके इति संज्ञानिर्देशः । - कारके (पा.सू. १-४-२३) इति सूत्रस्य महाभाष्ये ।

वाक्ययोजना लभ्यते - अकथितं कर्मसंज्ञं सत् कारकसंज्ञं भवति इति। ततः किम् अकथितं सत् कारकसंज्ञं कर्मसंज्ञं च भवति इति जिज्ञासायाम् अपादानादिविशेषैः इति पदम् आक्षिप्यते। अपादानादिशब्दः भावप्रधाननिर्देशेन अपादानत्वादिपरः। तेन च अपादानत्वादिविशेषैः अकथितं कर्मसंज्ञं सत् कारकसंज्ञं भवतीति लभ्यते। आदिपदेन सम्प्रदानाधिकरणयोः ग्रहणम्।

इह अकथितम् इत्यस्य न कथितम् अकथितम् अथवा कथयितुम् अनिष्टं वा नार्थः, अपि तु तत्तद्रूपेण अभासमानम् इत्यर्थः। तेन अपदानादिरूपेण अपादानत्वादिना वा भासमानं कारकं यदा अपादानत्वादिना अभासमानं भवति तदा अभासमानं तत् सम्प्रदानापादानाधिकरणादि कारकसंज्ञं सत् कर्मसंज्ञं भवति इत्यस्य सूत्रस्य स्पष्टार्थः। वस्तुतः अपादानादिकारकाणां अविवक्षायां सत्यां सम्बन्धसामान्यविवक्षायां षष्ठी शेषे (पा.सू २-३-५०) इति सूत्रेण प्राप्तां षष्ठीं प्रबाध्य प्रकृतेन सूत्रेण कर्मसंज्ञा विधीयते। कर्मसंज्ञाविधानाच्च कर्मणि द्वितीया (पा.सू. २-३-२) इत्यनेन द्वितीयाविभक्तिः सिध्यति।एवञ्चास्य सूत्रस्य निष्कृष्टार्थः भवति – अपादानत्वादिविशेषैः भासमानस्य कारकस्य अपदानत्वादिना अविवक्षायां, कर्मत्वेन विवक्षायाम् अथ च अविवक्षितानाम् अपादानादीनां मुख्यकर्मणा साकं योगात्[१] अविवक्षितापादानादिकारकं कर्मसंज्ञकं सत् कारकसंज्ञकम् भवति इति। यथा गां दोग्धि पयः।

गोः पयः दोग्धि इति वाक्यघटकस्य दुह्-धातोः क्षरणानुकूलव्यापारः अर्थः। क्षरणानुकूलव्यापारः गोपे तिष्ठति, अतः व्यापाराश्रयत्वात् गोपः कर्ता। गोपनिष्ठक्षरणानुकूलव्यापारजन्यस्य क्षरणरूपफलस्य आश्रयः भवति पयः, अतः फलाश्रयत्वात् पयः कर्म। क्षरणेन पयसः गोः विभागः भवति, अतः विभागाश्रयात् गौः अपादानं च भवति। तस्मात् गोः अपादानसंज्ञा, पञ्चमी च। इदानीम् गोः अपादानत्वेन अविवक्षायां, कर्मत्वेन विवक्षायाम् अथ च अविवक्षितापादानस्य गोः पयोरूपकर्मणा सह सम्बन्धात् प्रकृतेन सूत्रेण गोः कर्मसंज्ञा, ततः कर्मणि द्वितीया इत्यनेन द्वितीयया गां पयः दोग्धि इति प्रयोगोपपत्तिः।

एतच्छास्त्रोपदिष्टः अकथितशब्दः अविवक्षितार्थकः न तु अप्रधानार्थकः। अकथितशब्दस्य अप्रधानर्थकत्वे तु गोः पयः दोग्धि इत्यस्मिन्वाक्ये उद्देश्यताश्रयस्य पयसः प्रधानत्वात् गोः अप्रधानत्वाच्च सर्वदा प्रकृतसूत्रेण अप्रधानभूतस्य गोः एव कर्मसंज्ञा भवेत्। तेन च गां पयः दोग्धि इति एकमेव वाक्यमुत्पद्येत, न तु गोः पयः दोग्धि, गां पयः दोग्धि इति वाक्यद्वयम्। अविवक्षितार्थकत्वे तु यदा अपादानसंज्ञायाः विवक्षा तदा विभागाश्रयस्य गोः अपादानसंज्ञया पञ्चमीविभक्तौ गोः पयः दोग्धि, यदा च अपादानत्वेन भासमानस्य गोः अपादानत्वेन अविवक्षा तदा गोः प्रकृतसूत्रेण कर्मसंज्ञया द्वितीयाविभक्तौ गां पयः दोग्धि चेति वाक्यद्वयमुपपद्यते।

## दुहादिद्विकर्मकधातूनां गणना

न च सर्वेषां धातूनां प्रयोगे अपादानादीनाम् अविवक्षया प्रकृतसूत्रेण कर्मसंज्ञा, अपि तु गणितानां केषाञ्चित् विशिष्टानां धातूनां प्रयोगे एव प्रकृतशास्त्रविहितकर्म सम्भवति। के च ते धातवः इति जिज्ञासाप्रशमनार्थं सिद्धान्तकौमुद्यामेव कारिकया ते धातवः प्रस्तुताः। तथाहि-

**दुह्-याच्-पच्-दण्ड्-रुधि-प्रच्छि-चि-ब्रू-शासु-जि-मथ्-मुषाम्। कर्मयुक् स्यादकथितं तथा स्यात् नी-हृ-कृष्-वहाम्॥**[२]
**इति।**

[१]कर्मयुक् स्यादकथितम्। - अकथितं च (पा.सू. १-४-५१) इति सूत्रस्य सिद्धान्तकौमुद्याम्।
[२]अकथितं च (पा.सू. १-४-५१) इति सूत्रस्य सिद्धान्तकौमुद्याम्।

अदादिगणीयस्य प्रपूरणार्थक-दुह्धातोः[१], भ्वादिगणीयस्य प्रार्थना[२]र्थक-याच्धातोः[३], भ्वादिगणीयस्य पाकार्थक-पच्धातोः[४], चुरादिगणीयस्य दण्डनिपातार्थक-दण्ड्धातोः[५], रुधादिगणीयस्य आवरणार्थक-रुध्धातोः[६], तुदादिगणीयस्य जिज्ञासार्थक-प्रच्छ्धातोः[७], चुरादिगणीयस्य चयनार्थक-चिधातोः[८], अदादिगणीयस्य व्यक्तवागर्थक-ब्रूधातोः[९], अदादिगणीयस्य अनुशिष्टार्थकशास्धातोः[१०], भ्वादिगणीयस्य अभिभवार्थक-जिधातोः[११], क्र्यादिगणीयस्य विलोडनार्थक-मथ्धातोः[१२], क्र्यादिगणीयस्य स्तेयार्थक-मुष्धातोः[१३], भ्वादिगणीयस्य प्रापणार्थक-नीधातोः[१४], भ्वादिगणीयस्य हरणार्थक-हृधातोः[१५], भ्वादिगणीयस्य विलेखनार्थक-कृष्धातोः[१६], भ्वादिगणीयस्य प्रापणार्थक-वह्धातोः[१७] च प्रयोगे एव यत् अकथितं अपादान-सम्प्रदानाधिकरणरूपत्वेन अविवक्षितम् अभासमानं वा सत् कर्मयुक् स्यात् तस्यैव प्रकृतसूत्रेण कर्मसंज्ञा भवतीति कारिकार्थः । धात्वर्थव्यापारात् पूर्वं परं वाऽपि यत्कारकं धात्वर्थव्यापारस्य कर्मणा युक्तं भवति तदेव अकथितम् भवति इति तात्पर्यम् ।

महाभाष्ये तु –

**दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ।**
**ब्रुविशासिगुणेन च यत् सचते तदकीर्त्तितमाचरितं कविना ॥**
**नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च । द्विकर्मकेषु ग्रहणं कर्तव्यमिति निश्चयः ॥**[१८]

इतीयं कारिकाद्वयं पठितम् । प्रथमकारिकायाम् उपयोगपदेन मुख्यं कर्म इत्युक्तम्, निमित्तम् इत्यनेन च धात्वर्थव्यापारात् प्राक् कर्मणा संबद्धत्वम् उक्तम् ।[१९] दुह्-याच्-रुध्-भिक्ष्-चिञ्-धातूनाम् उपयोगस्य यन्निमित्तं तस्यापूर्वविधौ कर्मसंज्ञा भवति, अपि च ब्रू-शास्-धात्वोः प्रधानकर्मणा यत्संयुक्तं भवति तत् कवेः क्रान्तदर्शिनः पाणिनेः मते अकथितमिति प्रकृतकारिकार्थः । यथा दुह्-धातोः उपयोगः दुग्धम्, तस्य निमित्तम् अस्ति गौः । एतत् निमित्तं यदा अकथितं भवति तदा

---

[१]दुह प्रपूरणे (उभयपदी, द्विकर्मकः, अनिट्) । - द्विषश्च (पा.सू. ३-४-११२) इति सूत्रस्य सिद्धान्तकौमुद्याम् ।
[२]याच्ञाभिशस्तिर्याचनार्थना – अमरकोशः २-७-३४
[३]टुयाचृ याञ्चायाम् (उभयपदी, द्विकर्मकः, सेट्) । - शदेः शितः (पा.सू. १-३-६०) इति सूत्रस्य सिद्धान्तकौमुद्याम् ।
[४]डुपचष् पाके (उभयपदी, सकर्मकः, अनिट्) । - न दृशः (पा.सू. ३-१-४७) इति सूत्रस्य सिद्धान्तकौमुद्याम् ।
[५]दण्ड दण्डनिपातने (उभयपदी, सकर्मकः, सेट्) । - हनस्तोऽचिण्णलोः (पा.सू. ७-३-३२) इति सूत्रस्य सिद्धान्तकौमुद्याम् ।
[६]रुधिर् आवरणे (उभयपदी, सकर्मकः, अनिट्) । - रुधादिगणस्य सिद्धान्तकौमुद्याम् ।
[७]प्रच्छ ज्ञीप्सायाम् (परस्मैपदी, सकर्मकः, अनिट्) । - अचि विभाषा (पा.सू. ८-२¬-२१) इति सूत्रस्य सिद्धान्तकौमुद्याम् ।
[८]चिञ् चयने (उभयपदी, सकर्मकः, अनिट्) । - सुनोतेः स्यसनोः (पा.सू. ८-३-११७) इति सुत्रस्य सिद्धान्तकौमुद्याम् ।
[९]ब्रूञ् व्यक्तायां वाचि (उभयपदी, सकर्मकः, सेट्) । - ऊर्णोतेर्विभाषा (पा.सू. ७-२-६) इति सूत्रस्य सिद्धान्तकौमुद्याम् ।
[१०]शासु अनुशिष्टौ (परस्मैपदी, सकर्मकः, सेट्) । - सिपि धातो रुर्वा (पा.सू. ८-२-७४) इति सूत्रस्य सिद्धान्तकौमुद्याम् ।
[११]जि अभिभवे (परस्मैपदी, सकर्मकः, अनिट्) । - हुश्नुवोः सार्वधातुके (पा.सू. ६-४-८७) इति सूत्रस्य सिद्धान्तकौमुद्याम् ।
[१२]मथे विलोडने (परस्मैपदी, सकर्मकः, सेट्) । - हलः (पा.सू. ६-४-२) इति सूत्रस्य सिद्धान्तकौमुद्याम् ।
[१३]मुष स्तेये (परस्मैपदी, सकर्मकः, सेट्)) । - निरः कुषः (पा.सू. ७-२-४६) इति सूत्रस्य सिद्धान्तकौमुद्याम् ।
[१४]णीञ् प्रापणे (उभयपदी, सकर्मकः, अनिट्) । - ह्रस्वादङ्गात् (पा.सू. ८-२-२७) इति सूत्रस्य सिद्धान्तकौमुद्याम् ।
[१५]हृञ् हरणे (उभयपदी, सकर्मकः, अनिट्) । - तत्रैव
[१६]कृष विलेखने (परस्मैपदी, सकर्मकः, अनिट्) । - न दृशः (पा.सू. ३-१-४७) इति सूत्रस्य सिद्धान्तकौमुद्याम् ।
[१७]वह प्रापणे (उभयपदी, सकर्मकः, अनिट्) । - वचिस्वपियजादीनां किति (पा.सू. ६-१-१५) इति सूत्रस्य सिद्धान्तकौमुद्याम् ।
[१८]अकथितं च (पा.सू. १-४-५१) इति सूत्रस्य महाभाष्ये ।
[१९]उपयोगपदेन मुख्यं कर्मेत्युक्तम् । 'तस्य निमित्तमि'त्यनेन धात्वर्थव्यापारात्प्राक्तत्संबद्धत्वमुक्तम् । - अकथितं च (पा.सू. १-४-५१) इति सूत्रस्य भाष्योद्योते ।

 ISSN : 2249-538X

तस्य कर्मसंज्ञा भवति। एवं याच्-प्रभृतीनां धातूनामपि बोध्यम्। ब्रू-शास्-धात्वोः च प्रधानं कर्म अस्ति धर्मः। तेन संयुक्तो भवति माणवकः। अतः माणवकः यदा अकथितः भवति तदा तस्य कर्मसंज्ञा भवति। द्वितीयकारिकयापि उच्यते यत् नी-वह्-हृ-धातूनां प्रयोगे अपि भवति पूर्वोक्तं कार्यं भवति, तेन सहैव गत्यर्थानां धातूनामपि द्विकर्मकधातुषु ग्रहणं कर्तव्यमिति। यद्यप्यत्र कारिकाद्वये पच्-मथ्-मुष्-दण्ड्-जि-नी-हृ-कृष्-वह्-धातवः अनिर्दिष्टाः, तथाप्येते कारिकास्थचकारेण गृह्यन्ते इत्यत्र कैयटमतम्।[1]

माधवीयधातुवृत्तौ तु द्विकर्मकधातूनाम् गणनावसरे –

**जयतेः कर्षतेर्मन्थेर्मुषेर्दण्डयतेः पचेः।**
**तारेर्ग्राहेस्तथा मोचेस्त्याजेर्दीपेश्च संग्रहः॥**
**कारिकायां चशब्देन सुधाकरमुखैः कृतः।**[2]

इतीयं कारिका पठिता। तत्रापि नीवह्योर्हरतेश्चापि... इति कारिकास्थेन चकारेण जि-कृष्-मथ्-मुष्-दण्ड्-पच्-धातूनामेव ग्रहणमित्येव प्रतिपादितम्। परन्तु अत्र कारिकायाम् द्वितीयपङ्क्तौ तारि[3]-ग्राहि[4]-मोचि[5]-त्याजि[6]-दीपि[7]-इति पञ्चानां णिजन्तधातूनां ग्रहणमतिरिक्ततया कृतम्। एतेषां धातूनां प्रयोगे अण्यन्तवाक्यस्य यः कर्ता, तस्य विषये णिजन्तवाक्ये कर्तृत्वस्य अविवक्षा कर्तुं शक्यते इति सायणाचार्यमतम्। अस्यां स्थितौ अन्यैः कारकैः अकथितः अण्यन्तकर्ता णिजन्तप्रयोगे प्रकृतसूत्रेण कर्मसंज्ञकः भवति। यथा –

| धातुः | अण्यन्तावस्था | ण्यन्तावस्था | ण्यन्तावस्थायाः कर्तुः अविवक्षया प्रकृतसूत्रेण कर्मसंज्ञा |
|---|---|---|---|
| तारिः | शिशुः नदीं तरति | पिता शिशुना नदीं तारयति | पिता शिशुं नदीं तारयति |
| ग्राहिः | पुत्रः वस्त्रं गृह्णाति | पिता पुत्रेण वस्त्रं ग्राहयति | पिता पुत्रं वस्त्रं ग्राहयति |
| मोचिः | शिष्यः कोपं मुञ्चति | गुरुः शिष्येण कोपं मोचयति | गुरुः शिष्यं कोपं मोचयति |
| त्याजिः | छात्रः कोपं त्याजति | गुरुः छात्रेण कोपं त्याजयति | गुरुः छात्रं कोपं त्याजयति |
| दीपिः | छात्रः शास्त्रं दीप्यते | गुरुः छात्रेण शास्त्रं दीपयति | गुरुः छात्रं शास्त्रं दीपयति |

## दुहादिद्विकर्मकधातूनां शाब्दबोधप्रक्रिया

इयञ्चाविवक्षा द्वेधा, प्राप्तिपूर्विका अप्राप्तिपूर्विका चेति। प्राप्तानामपादानादीनाम् अविवक्षा प्राप्तिपूर्विका अविवक्षा, अथ च सर्वथा अप्राप्तानाम् अपादानादीनां अविवक्षा अप्राप्तिपूर्विका अविवक्षा इत्युच्यते। प्राप्तिपूर्विकायाः अविवक्षायाः उदाहरणं यथा गां दोग्धि पयः इति। अत्र प्राप्तस्य अपादानस्य अविवक्षया प्रकृतसूत्रेण तस्य कर्मसंज्ञा भवति। अतः प्राप्तिपूर्विकायाम् अविवक्षायाम् प्राप्तानाम् अपादानादीनाम् कर्मसंज्ञया बाधः एव फलम्। अथ च अप्राप्तिपूर्विकायाः अविवक्षायाः उदाहरणं यथा तण्डुलान् ओदनं पचति इति। अत्र तण्डुलान् इत्यत्र तण्डुलानाम् इति प्राप्तषष्ठ्याः बाधेन प्रकृतसूत्रेण कर्मसंज्ञा

[1]चकारेण जयत्यादयः समुच्चीयन्ते इत्याहुः। - अकथितं च (पा.सू. १-४-५१) इति सूत्रस्य भाष्यप्रदीपे।
[2]माधवीयधातुवृत्तौ, भ्वादिप्रकरणे, पृष्ठसंख्या - ५३
[3]तॄ प्लवनतरणयोः (भ्वादिः, परस्मैपदी, सकर्मकः, सेट्) – स्थाघ्वोरिच्च (पा.सू. १-२-१७) इत्यस्य कौमुद्याम्।
[4]ग्रह उपादाने (क्र्यादिः, उभयपदी, सकर्मकः, सेट्) – च्छ्वोः शूडनुनासिके च (पा.सू ६-४-१९) इत्यस्य कौमुद्याम्।
[5]मुच्लृ मोक्षणे (तुदादिः, उभयपदी, सकर्मकः, सेट्) – अचि विभाषा (पा.सू ८-२-२१) इत्यस्य कौमुद्याम्।
[6]त्यज हानौ (भ्वादिः, परस्मैपदी, सकर्मकः, अनिट्) – निसस्तपतावनासेवने (पा.सू. ८-३-१०२) इत्यस्य कौमुद्याम्।
[7]दीपि दीप्तौ (दिवादिः, आत्मनेपदी, अकर्मकः, सेट्) – जनिवध्योश्च (पा.सू. ७-३-३५) इत्यस्य कौमुद्याम्।

भवति। अप्राप्तिपूर्विकायाम् अविवक्षायाम् प्राप्तायाः षष्ठ्याः बाध एव फलम्। उभयथापि कारकव्याप्यानाम् अपादानादीनां कर्मत्वेनैव बोधो भवति। अत एव गां पयो दोग्धि इति वाक्यात् गोकर्मक-पयःकर्मक-दोहनानुकूलव्यापारः इति शाब्दबोधो जायते।

प्राचीनैस्तु वैयाकरणैः अकथितं च इति शास्त्रेण अपादानादिकारकाणाम् अविवक्षया प्राप्तषष्ठ्याः बाधपूर्वकं कर्मसंज्ञायाः विधानात् अकथितमिति शास्त्रेण विहिते कर्मणि द्वितीयायाः सम्बन्धत्वेन बोधः स्वीक्रियते। तेन च गां पयः दोग्धि इत्यादितः गोसम्बन्धि-पयःकर्मकं दोहनमित्येवं शाब्दबोधः भवेत् इति चेदुच्यते तन्न युक्तम्। अपादानत्वादिविशेषरूपेण अविवक्षायां कर्मत्वेन च विवक्षायाम् प्रकृतसूत्रेण कर्मसंज्ञाविधानात्, कारकत्वव्याप्यकर्मादिसंज्ञानां स्वबोध्यार्थे स्वं कर्मसंज्ञा, तद्बोध्यार्थः संज्ञी गवादिः, तस्मिन् कर्मत्वादिशक्तिमत्त्वबोधकत्वात् कर्मत्वादिनैव बोधात् गोकर्मकं पयःकर्मकं दोहनमित्येव बोधः[1]। प्राचीनानां मतानुसारेण अकथितञ्चेति शास्त्रस्य शेषषष्ठ्याः अपवादत्वमात्रेण सम्बन्धार्थकत्वं यदि स्वीक्रियेत तर्हि ध्रुवमपायेऽपादानमित्यादिशास्त्राणामनुपदेशे सर्वत्र षष्ठीविभक्तेरेव प्राप्त्या[2] सर्वासाम् अपादानादिसंज्ञानां तदपवादत्वेन सम्बन्धबोधकतापत्तिः। न च कर्मादिकारकाणां क्वचिदपि सम्बन्धत्वेन बोधो दृश्यते। अतः अपादानादिकारकाणाम् अविवक्षास्थले अकथितमिति शास्त्रेण विधीयमानायाः कर्मसंज्ञायाः समागतायाः द्वितीयाविभक्तेरपि कर्मत्वेनैव बोधः स्वीकरणीयः, न तु सम्बन्धत्वेन। तेन च न कर्मणि द्वितीया (पा.सू. २.३.२) इति शास्त्रेण विहितायाः द्वितीयायाः वैरूप्यापत्तिः। अकथितमिति कर्मसंज्ञकात् जातायाः द्वितीयायाः सम्बन्धत्वेन, कर्तुरीप्सिततममिति शास्त्रेण विहितायाः कर्मसंज्ञायाः जातायाः द्वितीयायाः च कर्मत्वेन बोधे स्वीक्रियमाणे तु कर्मणि द्वितीयेति शास्त्रेण विहितायाः द्वितीयायाः वैरूप्यापत्तिः अवश्यम्भाविनी।

भाष्ये तु कर्तुरीप्सिततमं कर्म (पा.सू. १-४-४९), तथायुक्तं चानीप्सितम् (पा.सू. १.४.५०), अकथितं च (पा.सू. १.४.५१) इति सूत्रत्रयेण विहितायां कर्मसंज्ञायां सर्वस्थलेषु कर्मत्वशक्तिमत्त्वेनैव बोधकता स्वीकृता। तेन च हरिं भजति, ग्रामं गच्छन् तृणं स्पृशति इति उदाहरणद्वयेपि अकथितञ्चेति प्रकृतशास्त्रेणैव कर्मसंज्ञासिद्धौ अन्यतरत् सूत्रद्वयं व्यर्थमिति आपतति। तत्र ईप्सितमात्रस्य अपि अनेन कर्मसंज्ञायां वारणार्थानामीप्सितः (पा.सू. १-४-२७) इति शास्त्रस्यापि अनावकाशत्वे माणवकात् अपि पञ्चमी स्यात् अतः अन्यतरत् सूत्रद्वयमपि आरम्भणीयम् इति समाहितम्। यदि च प्राचीनमतानुसारम् उभयत्र कर्मसंज्ञायाः अर्थभेदः स्यात् तर्हि कर्तुरीप्सिततमं कर्म, तथायुक्तं चानीप्सितं चेति प्रवर्तमानाभ्यां सूत्राभ्यां कर्मत्वविवक्षायाम्, अकथितञ्चेति प्रवर्तमानेन सूत्रेण सम्बन्धत्वविक्षायां उभयोर्मध्ये सामानाधिकरण्याभावात् एकार्थस्य वाचकत्वाभावाद्वा सूत्रद्वयस्य व्यर्थापत्तेरेव अनुत्थानात् भाष्यकारेण प्रदत्तः व्यर्थतायाः समाधानोपायः विफलः स्यात्।

## दुहादिद्विकर्मकाणां कर्तरि कर्मणि लकारव्यवस्था

दुहादिद्विकर्मकधातूनां कर्तरि कर्मणि लकारव्यवस्थायै सिद्धान्तकौमुद्याः "दुह्याच्पच्दण्ड्..." इति कारिकायां गणितानां षोडशधातूनां भागद्वयं कल्पितम्। दुहादिमुषन्ताः द्वादश धातवः प्रथमभागे नीप्रभृतिवहन्ताः चत्वारः धातवः द्वितीयभागे च वर्तन्ते। सर्वेषामेव धातूनां प्रयोगे कर्तरि तु समानः नियमः, सः च – कर्तरि प्रथमा, अनुक्ते कर्मणि द्वितीया, गौणकर्मणि द्वितीया अन्येभ्यः कारकेभ्यः यथानियमं विभक्तयः च भवन्ति, धातोश्च पुरुषवचनादयः कर्तारमनुसृत्यैव भवति। कर्मणि

[1]कारकत्वव्याप्य संज्ञानां स्वबोध्यार्थे कर्मत्वादिशक्तिमत्त्वबोधकत्वात्। - अकथितं च (पा.सू. १-४-५१) इति सूत्रस्य शेखरे।

[2]तत्तच्छास्त्राभावे सर्वत्र षष्ठीप्राप्त्या...। – तत्रैव।


ISSN : 2249-538X

च धातुः कर्मानुसारी, कर्तृकारकात् तृतीया कर्मणश्च प्रथमा भवति, अन्येभ्यः कारकेभ्यः यथानियमं विभक्तयः च भवन्ति । तथाह्युक्तं -

**कर्तृवाच्यप्रयोगे तु प्रथमा कर्तृकारके । द्वितीयान्तं भवेत् कर्म कर्त्रधीनं क्रियापदम् ॥**

**कर्मवाच्यप्रयोगे तु तृतीया कर्तृकारके । प्रथमान्तं भवेत्कर्म कर्माधीनं क्रियापदम् ॥[1] चेति ।**

परन्तु एतेषां द्विकर्मकधातूनां कर्मणि लकारव्यवस्थायां किञ्चिद्वैशिष्ट्यं वर्तते । यतो हि द्विकर्मकधातूनां प्रयोगे मुख्यं गौणं चेति कर्मद्वयं प्राप्यते । अतः कर्मणि मुख्यकर्मणि प्रथमा उत गौणकर्मणि प्रथमा इति शंका । तन्निवारणार्थमुच्यते – गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् ।[2] अर्थात्, दुहादिद्वादशानां प्रयोगे गौणे कर्मणि नीप्रभृतिचतुर्णां प्रयोगे मुख्ये प्रधाने वा कर्मणि प्रथमा भवति । शेखरकारस्तु – प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ॥[3] इत्यनेन कारिकया द्विकर्मकधातूनां विषये लकारव्यवस्थां प्रकटितवान् । तन्मते दुहादिधातूनां व्यापारद्वयार्थकत्वे कर्मणि लकारविवक्षायां कारिकायाः प्रथमपङ्क्तेरनुसारेण प्रधानकर्मणि गवादौ, एकव्यापारार्थकत्वे तु अप्रधाने दुहादीनामिति नियमानुसारेण अप्रधाने गवादौ एव लादिप्रत्ययः । एतेषामेव द्विकर्मकाणां धातूनां ण्यन्ततया प्रयोगे अण्यन्तावस्थायाः यः कर्ता ण्यन्तावस्थायां कर्म जायते तस्मात् कर्मणः प्रत्ययः ।

## दुहादिधातूनां व्यापारद्वयार्थस्य विचारः

गोः पयः दोग्धि इत्यत्र दुह्-धातोः विभागानुकूलव्यापार इति एकस्मिन् व्यापारे स्वीकृते तस्य व्यापारास्य आश्रयः गोपः, गोपनिष्ठव्यापारजन्यविभागरूपफलाश्रयः पयः, विभागावधिः च गौः । अतो गोपस्य कर्तृसंज्ञा, गोः अपादानसंज्ञा, पयसश्च कर्तुरीप्सिततमं कर्म इत्यनेन कर्मसंज्ञा । यदा तु वाक्येऽस्मिन् अपादानभूतस्य गोः अपादानत्वेन अविवक्षापूर्वकं कारकत्वेन विवक्षायाम् अकथितञ्चेति सूत्रेण कर्मसंज्ञा तदा गां पयः दोग्धि इति वाक्यं सिध्यति ।

किन्तु यदा दुह्-धातोः विभागानुकूलव्यापारानुकूलव्यापारः इति व्यापारद्वयं स्वीक्रियते तदा दुह्-धातोः प्रधानभूतः विभागानुकूलव्यापारः गोपनिष्ठः, तज्जन्यविभागानुकूलव्यापाररूपं फलं गोनिष्ठम् । यतो हि गोपः यदा गोवत्सं गोः समीपे त्यक्त्वा, पुनः बद्ध्वा गोस्तनप्रक्षालनादिव्यापारान् करोति तदा गौः विभागानुकूलव्यापारान् करोति । गोनिष्ठव्यापारजन्यविभागरूपफलस्य आश्रयः पयः । एवं विभागः विभागानुकूलव्यापारश्च फलप्रधानीभूतव्यापारप्रयोज्यौ भवतः । तस्मादेव दुह्-धात्वर्थप्रधानीभूतव्यापारवाचकधातुवाच्यविभागाश्रयस्य पयसः, विभागानुकूलव्यापाररूपफलाश्रयस्य च पयसः कर्तुरीप्सिततमं कर्म इत्यनेनैव कर्मसंज्ञायाम् अकथितञ्चेति इत्यस्य व्यर्थत्वम् । तस्य च व्यर्थत्वे अप्रधाने दुहादीनामिति नियमेन कर्मणि लकारव्यवस्थायां द्वयोः कर्मणोः कतरकर्मणः प्रधानत्वेन प्रथमा भवेदिति शंका । तत्रोच्यते यत् अकथितसूत्रेण यस्य कर्मसंज्ञा तद्गौणकर्म इत्युच्यते । तेन अप्रधाने दुहादीनां इत्युक्तेः अप्रधानगवि एव प्रथमा तदनुसारञ्च धातुरूपम् । अप्रधानकर्मत्वञ्च उक्तप्रधानकर्मभिन्नत्वम्, अर्थात् कर्तृप्रत्ययसमभिव्याहारे धात्वर्थप्रधानीभूतव्यापारे साक्षाद्विशेषणीभूतफलाश्रयभिन्नकर्मत्वम-प्रधानकर्मत्वम् । विभागानुकूलव्यापारार्थकत्वपक्षे धात्वर्थप्रधानीभूतव्यापारे साक्षाद्विशेषणीभूतं फलं विभागः, अतो विभागाश्रयः पयः प्रधानं कर्म, अपि च तद्भिन्नं गाम् इति अप्रधानं कर्म । ततश्च च कर्मणि प्रथमायां गौः पयः दोग्धि इति वाक्यं सिध्यति ।

---

[1]अभियुक्तोक्तिः

[2]लघुपाणिनीयम्, विभक्त्यर्थप्रकरणम्, परिनिष्ठाकाण्डः, १२४७ सूत्रम्, पृष्ठसंख्या - ३२०

[3]अकथितं च (पा.सू. १-४-५१) इति सूत्रस्य शेखरे ।

ISSN : 2249-538X 

## दुहादिधातूनां द्विकर्मकत्वविमर्शः

**दुहिः** - कर्मयुक्तत्वं च धात्वर्थव्यापारात् पूर्वं परं वा सम्भवति। यत्र अपादानादिकारकाणां धात्वर्थव्यापारात् अनन्तरं पूर्वं च कर्मणा सह योगो भवति तत्र धात्वर्थव्यापारात् पूर्ववर्तिनाम् अपादानादिकारकाणां कर्मणा सह योगः एव स्वीक्रियते। यत्र च धात्वर्थव्यापाराद् अनन्तरमेव अपादानादीनां कर्मणा सह योगः तत्र उपायान्तराभावात् धात्वर्थव्यापारानन्तरं जायमानानाम् अपादानादीनां कर्मणा साकं योगः स्वीक्रियते। गणितेषु षोडशधातुषु ब्रू-शास्-धात्वोः विषये अपादानादिकारकाणां धात्वर्थव्यापारात् अनन्तरं कर्मणा सह योगः भवति। यतो हि व्यक्तिः कथयिष्यति चेदेव भाषणक्रियया सम्प्रदानादीनां योगः भवेत्। तद्धातुद्वयं व्यतिरिच्य अन्येषां गणितानां धातूनां विषये तु अपादानादिकारकाणां धात्वर्थव्यापारात् पूर्वमेव कर्मणा सह योगः तिष्ठति। यथा – गोः सकाशात् पयः दोग्धि इत्यत्र पयसः दुह्-धात्वर्थस्य दोहनव्यापारात् पूर्वमपि गवा साकं योगोऽस्ति, दोहनव्यापारात् अनन्तरमपि।

यत्र च धात्वर्थव्यापारादनन्तरं धात्वर्थव्यापात्पूर्वम् उभयथापि अपादानादीनां कर्मणा सह योगस्तत्र धात्वर्थव्यापारात् पूर्ववर्तिनाम् अपादानादीनां कर्मणा योगे स्वीक्रियमाणे सति हस्तेन गां पयो दोग्धि इत्यत्र दोहनव्यापारानन्तरं पयस्-कर्मणा हस्तकरणस्य, स्थाल्यां गां पयो दोग्धि इत्यत्र दोहनव्यापारानन्तरं पयस्-कर्मणा योगात् स्थालीरूपाधिकरणस्य च अधिकरणत्वेन अविवक्षया कर्मत्वेन विवक्षया क्रमशः हस्तं गां पयो दोग्धि, स्थालीं गां पयो दोग्धि इति वाक्यद्वयं नोपपद्यते। अतः अपादानादिविशेषैरविवक्षितम् इति वाक्यघटकापादानादिशब्देन दुहादिधात्वर्थव्यापारानन्तरकर्मयुक्त-दुहादिधात्वर्थव्यापारपूर्वकर्मयुक्तस्थलयोः दुहादिधात्वर्थव्यापारपूर्व-कर्मयुक्तानाम् अपादान-सम्प्रदान-अधिकरणादीनां ग्रहणं भवति। तेन हस्तेन गां पयो दोग्धि, स्थाल्यां गां पयो दोग्धि इति इष्टं वाक्यद्वयं सिध्यति न तु अनिष्टं हस्तं गां पयो दोग्धि, स्थालीं गां पयो दोग्धि इति अनिष्टं वाक्यद्वयमपि।वस्तुतस्तु हस्तकरणं दुह्धात्वर्थव्यापारात् अनन्तरमपि पयस्-कर्मणा अयुक्तं सत् गोस्तनेन दोहनक्रियया वा युक्तं भवति।

**याचिः** - याच्-धातोः उदाहरणं भवति बलिं याचते वसुधाम् इति। बलेः वसुधाम् प्रार्थयति इत्यर्थः। याच्-धातोः परस्वत्वनिवृत्तिपूर्वकस्वस्वत्वोत्पत्त्यनुकूलव्यापाररूपोऽर्थः। स्वत्वं वसुधायाम्, स्वत्वनिरूपितस्वामित्वं बलौ। वसुधाम् इति कर्म। वसुधया बलिनः स्वस्वामिभावसम्बन्धत्वात् सम्बन्धसामान्ये षष्ठ्याः प्राप्तत्वादत्र अप्राप्तिपूर्वकाविवक्षा सिद्धा भवति। ततः बलेः प्रकृतसूत्रेण कर्मसंज्ञा, कर्मसंज्ञत्वात् द्वितीयाविभक्तिश्च।

ननु बलेः वसुधायाः विभागेन विभागावधेः बलेः अपादानसंज्ञकत्वात् प्राप्तिपूर्वकाविवक्षैवात्रास्ति इति चेत् उच्यते यत् याच्-धातोः प्रार्थना अर्थः। प्रार्थनामात्रेण वसुधा बलेः पृथक् न भवति, बलेः वसुधायाः पृथक्त्वं दानादनन्तरमेव सम्भवति। विभागश्च याच्धातोरर्थोऽपि न। अतः उदाहरणमिदम् अप्राप्तपूर्वकाविवक्षायाः एव।

व्यापारद्वयार्थपक्षे तु याच्-धातोः परस्वत्वनिवृत्तिपूर्वकः स्वस्वत्वोत्पत्त्यनुकूलव्यापारानुकूलव्यापारः अर्थः। याच्धात्वर्थप्रधानीभूतव्यापारः याचकनिष्ठः, तज्जन्यस्य याचकस्वत्वोत्पत्त्यनुकूलव्यापारस्य आश्रयः अस्ति बलिः, अपि च याचकस्वत्वोत्पत्तिरूपफलस्याश्रयः अस्ति वसुधा। एवं बलेः वसुधायाः च कर्तुरीप्सिततमं कर्म इति सूत्रेणैव कर्मसंज्ञा सिध्येत।

अविनीतं विनयं याचते इति याच्-धातोः द्वितीयम् उदाहरणम्। अविनीतस्तु विनयं प्रथमत एव जानाति। यथा रावणे विनयः आसीदित्यत एव तेन भगवन्तं शङ्करं प्रसाद्य स्वाभीष्टं साधितम्, रामं प्रति अविनयः उद्दण्डता वा ज्ञात्वैव विहितः। इह याच्-धातोः स्वीकारानुकूलव्यापारः अर्थः। अविनीतस्य प्रथमतः एव विनयस्य ज्ञानात्

 ISSN : 2249-538X

विनयमिति कर्मणा अविनीतस्य स्वविषयकज्ञानवत्त्वसम्बन्धः। लघुशब्देन्दुशेखरकारः नागेशभट्टः विनयं प्रधानकर्म मत्वा अविनीताय इत्यत्र तादर्थ्यचतुर्थ्याः अविवक्षया कारकत्वेन विवक्षायां तत्पदस्य विनयमिति कर्मणा योगाच्च प्रकृतसूत्रेण कर्मसंज्ञया ततः द्वितीयाविभक्तौ अविनीतं विनयं याचते इति प्रयोगोपपत्तिं प्रमाणयति। तत्त्वबोधिनीकारस्तु अविनीतं प्रधानकर्म, विनयाय तादर्थ्यचतुर्थ्यन्तं चेति मत्वा विनयाय इत्यत्र तादर्थ्यचतुर्थ्याः अविवक्षया कारकत्वेन विवक्षायां तत्पदस्य अविनीतमिति कर्मणा योगाच्च प्रकृतसूत्रेण कर्मसंज्ञया ततः द्वितीयाविभक्तौ अविनीतं विनयं याचते इति प्रयोगोपपत्तिं प्रमाणयति[1]। एवं शेखरकारः विनयम्, तत्त्वबोधिनीकारश्च अविनीतं प्रधानकर्मत्वेन स्वीकरोति। याच्-धात्वर्थ-स्वीकारानुकूलव्यापारघटकस्य स्वीकाररूपस्य फलस्य फलतावच्छेदकसम्बन्धः विषयता इति स्वीक्रियमाणे विनयम् इति प्रधानकर्म, अपि च फलतावच्छेदकसम्बन्धः समवायः इति स्वीक्रियमाणे अविनीतम् इति प्रधानकर्म इति भावः।

**पचिः** – तण्डुलान् ओदनं पचति इति पच्-धातोः उदाहरणम्। एतच्च अप्राप्तिपूर्विकायाः अविवक्षायाः उदाहरणम्। तण्डुलानाम् ओदनं पचति इत्यत्र तण्डुलस्य सम्बन्धरूपेण अविवक्षापूर्वकं कारकत्वेन विवक्षायां प्रकृतसूत्रेण कर्मसंज्ञया ततः द्वितीयाविभक्तौ तण्डुलान् ओदनं पचति इति प्रयोग उपपद्यते। इयं तु प्रक्रिया पच्-धातोः विक्लित्यनुकूलव्यापारः इति एकव्यापारात्मकस्यार्थस्य स्वीकारे सम्भवति। व्यापार्यद्वयार्थस्वीकारे तु कैयटमतानुसारेण पच्-धातोः विक्लित्ति-निर्वृत्त्यु-भयफलानुकूलव्यापाररूपः अर्थः सम्भवति। तण्डुले विक्लेदनात् अनन्तरमेव ओदनस्य निर्वर्तनं भवति। अतः विक्लेदनरूपफलाश्रयस्य तण्डुलस्य, निर्वर्तनरूपफलाश्रयस्य ओदनस्य च कर्तुरीप्सिततमं कर्म इति सूत्रेणैव कर्मसंज्ञया ततः द्वितीयाविभक्तौ तण्डुलान् ओदनं पचति इति प्रयोगः उपपद्येत। तेन प्रकृतसूत्रस्य पच्-धातोः तण्डुलान् ओदनं पचति इति उदाहरणं साधु नास्ति इति शेखरकारस्याशयः।

**दण्डिः** – गर्गान् शतं दण्डयति इति दण्ड्-धातोः उदाहरणम्। गर्गेभ्यः शतं दण्डयति इत्यत्र गर्गाणां सम्प्रदानत्वरूपेणाविवक्षायां प्रकृतसूत्रेण कर्मसंज्ञया ततः द्वितीयाविभक्तौ गर्गान् शतं दण्डयति इति वाक्यं सिद्ध्यति। इदं वाक्यं तु यदा दण्ड्-धातोः शासनानुकूलव्यापारः इति एकव्यापारात्मकस्यार्थस्य स्वीकारे सम्भवति। यदा तु दण्ड्-धातोः स्वसम्प्रदानकदानानुकूलव्यापारानुकूलव्यापाररूपार्थः स्वीक्रियते तदा दानरूपफलाश्रयस्य शतस्य दानानुकूलव्यापाररूपफलाश्रयस्य गर्गस्य च कर्तुरीप्सिततमं कर्मेत्यनेनैव कर्मसंज्ञा सम्भवेत्। तस्मात् व्यापारद्वयार्थकानां समस्तधातघटितवाक्यानां कर्तुरिति सूत्रेणैव कर्मसंज्ञासिद्धौ अकथितश्चेति शास्त्रं व्यर्थं भवति।

**रुधिः** – व्रजम् अवरुणद्धि गाम् इति रुध्-धातोः उदाहरणम्। रुध्-धातोः निर्गमप्रतिबन्धपूर्वकयत्किञ्चिदधिकर-णचिरस्थित्यनुकूलव्यापारोऽर्थः। व्रजे गाम् अवरुणद्धि इत्यत्र व्रजनिष्ठस्य अधिकरणत्वस्य अविवक्षायाम् अकथितसू-त्रेण कर्मसंज्ञायां व्रजमवरुणद्धि इति प्रयोगोपपत्तिः। रुध्-धातोः यदा यत्किञ्चिदधिकरणकरस्थित्यनुकूलव्यापारः अर्थः तदा व्रजम् गौणकर्म, यत्किञ्चिदधिकरणकस्थित्यनुकूलव्यापारानुकूलव्यापाररूपे व्यापारद्वयार्थात्मके पक्षे यत्किञ्चिदधिक-रणकस्थित्यनुकूलव्यापाररूपफलाश्रयः गौः प्रधानकर्म। अतः अकथितश्चेति सूत्रोपदेशपक्षे "अप्रधाने दुहादीनाम्" इति नियमेन कर्मणि प्रत्ययविवक्षायां व्रजरूपे गौणकर्मणि प्रत्ययः। व्यापारद्वयार्थकेपक्षे तु "प्रधानकर्मण्याख्येये लादीनाहु-र्द्विकर्मणाम्" इति नियमेन गोरूपे प्रधानकर्मणि प्रत्ययः। एवं प्रत्याख्यानाप्रत्याख्यानपक्षयोः फलभेदः। अथवा रथो गच्छतीति वाक्यघटके अचेतने रथे यथा व्यापारस्य वृत्तिता स्वीक्रियते तथैव स्थित्यनुकूलव्यापारः व्रजनिष्ठः इति स्वीकृते

[1] अनुनयार्थस्य याचेरविनीतो मुख्यं कर्म, अविनीतं विनयाय अनुनयतीत्यर्थः। विनयस्य तादर्थ्याविवक्षायाम् अकथितश्चेति कर्मसंज्ञा। - अकथितं च (पा.सू. १-४-५१) इति सूत्रस्य तत्त्वबोधिन्याम्।

सति अकथितञ्चेति सूत्रोपदेशपक्षे अपि व्रजरूपगौणकर्मणि, अथ च व्यापारद्वयार्थकपक्षे अपि व्रजरूपप्रधानकर्मणि एव प्रत्ययविधानात् फलभेदो नास्ति ।

**प्रच्छिः** – माणवकं पन्थानं पृच्छति इति प्रच्छेरुदाहरणम् । जिज्ञासाविषयः यः पन्थादिरूपोऽर्थः तद्विषयकज्ञानानुकूलः 'केन पथा गन्तव्यम्' इत्येवंप्रकारकः कथनरूपव्यापारः पृच्छ्-धातोरर्थः । ज्ञानविषयः पन्थाः, माणवकस्य पन्थानम् इति कर्मणा साकं पथविषयकज्ञानविषयत्वरूपः सम्बन्धः । अतः माणवकस्य पन्थानं पृच्छति इत्यत्र सम्बन्धस्य अविवक्षायां कारकत्वेन विवक्षायां प्रकृतेन अकथितञ्चेति सूत्रेण कर्मसंज्ञायां द्वितीयाविभक्तौ माणवकं पन्थानं पृच्छति इति वाक्यमुपपद्यते । पृच्छायाः उपरान्ततया पथः कल्पितः विभागो भवति । प्रश्नमात्रेण च कल्पितविभागस्यासम्भवात् अपादानत्वं माणवकस्य न । भाष्येपि प्रश्नमात्रेण न पथो विभागः, अपि तु पृच्छायाः उपरान्ततया मार्गविषयकनिरूपणेन कल्पितविभागो भवति ।[1] माणवके कर्मणा सम्बन्धकरणस्येच्छायाः असत्त्वात् माणवकः सम्प्रदानमपि भवितुं नार्हति । प्रच्छेः जिज्ञासाविषयार्थज्ञानानुकूलव्यापारानुकूलव्यापारः इति व्यापारद्वयात्मके अर्थे स्वीकृते जिज्ञासाविषयाश्रयस्य पथः, अथ च जिज्ञासाविषयार्थज्ञानानुकूलव्यापाराश्रयस्य माणवकस्य कर्तुरित्यनेन कर्मसंज्ञा च सिद्ध्यति ।

**चयतिः** – वृक्षमवचिनोति फलानीति चयतेरुदाहरणम् । विभागपूर्वकादानं पात्रस्थापनानुकूलव्यापारश्च चिञ्-धातोरर्थः । वृक्षात् अवचिनोति फलानि इति मूलं वाक्यम् । विभागपूर्वकपात्रस्थापनानुकूलव्यापारः अर्थात् फलमादाय पात्रस्थापनरूपो व्यापारः कर्तरि, विभागरूपफलाश्रयः आम्रादिफलम्, विभागावधिश्च वृक्षः । अतो वृक्षादित्यत्र अपादानत्वस्याविवक्षया प्रकृतसूत्रेण कर्मसंज्ञायां वृक्षमवचिनोति फलानीति वाक्यम् उपपद्यते ।

**ब्रूञिः शासिः च** – माणवकं धर्मं ब्रूते शास्ति वेति ब्रू-शास्-धात्वोरुदाहरणम् । शास्त्रे लिखितम् इत्याकारकः ज्ञानानुकूलः शब्दप्रयोगरूपः व्यापारः ब्रूञ्-धातोरर्थः । अथ च शास्त्रोपदिष्टं धर्मं त्वमाचर इत्याकारकः प्रवृत्तिपर्यवसायी ज्ञानानुकूलव्यापारः शास्-धातोरर्थः । शासनञ्च विषयतासम्बन्धेन धर्मे तिष्ठति । एवं फलतावच्छेदकसम्बन्धः विषयता इति सिद्ध्यति । धर्मश्च माणवकाय, अतः माणवकः सम्प्रदानम् । माणवकस्य च धर्मम् इति कर्मणा साकं ज्ञानवत्त्वसम्बन्धः । अयं च सम्बन्धः "धर्मं कुरु" इत्याकारकोपदेशात् अनन्तरं सम्भवति । तादृशविषयताश्रयत्वाद्धर्मस्य कर्तुरित्यनेन कर्मसंज्ञा, अथ च माणवकायेत्यत्र कर्मयुजः सम्प्रदानस्य अविवक्षायाम् अकथितञ्चेति कर्मसंज्ञा । तेन माणवकं धर्मं ब्रूते शास्ति वेति प्रयोगोपपत्तिः ।

**नयतिः हरतिः कर्षतिः वहतिश्च** – ग्रामम् अजां नयति, हरति कर्षति, वहति वा इत्येतेषामुदाहरणम् । ग्रामात् अजां नयति, हरति कर्षति, वहति वा इत्यत्र अपादानभूतस्य ग्रामस्य अपादानत्वेन अविवक्षायां प्रकृतसूत्रेण कर्मसंज्ञायां ग्रामम् अजां नयति, हरति कर्षति, वहति वा इति प्रयोगोपपत्तिः ।नीधातोः संयोगानुकूलव्यापारः, स्कन्धग्रहणादिपूर्वकसंयोगानुकूलव्यापारः वह्-धातोः, गत्यनुकूलव्यापारः कृष्-धातोः, बलाद्ग्रहणपूर्वकदेशान्तरप्रापणानुकूलव्यापारः हृधातोः चार्थः । एतेषां च धातूनां क्रमाद् संयोगानुकूलव्यापारानुकूलव्यापारः, स्कन्धग्रहणादिपूर्वकसंयोगानुकूलव्यापारानुकूलव्यापारः, गत्यनुकूलव्यापारानुकूलव्यापारविशेषः, बलाद्ग्रहणपूर्वकदेशान्तरप्रापणानुकूलव्यापारानुकूलव्यापारः इत्येवं व्यापारद्वयात्मके अर्थे स्वीकृते कर्तुरित्यनेनैव ग्रामस्य अजायाः च कर्मसंज्ञा सिद्ध्येत । अतः नैतेषां धातूनामुदाहरणानि अकथितञ्चेति सूत्रस्य । भाष्ये दुहियाचिरुधिप्रच्छिभिक्षिचिञ्ब्रूविशासीनामेव ग्रहणात् प्राचीनवैयाकरणानुरोधेन एतेषां धातूनां ग्रहणं कृतम् ।

[1] न प्रश्नादेवापायो भवति, पृष्टोऽसौ यदाचष्टे तदाऽपायेन युज्यते । - अकथितं च (पा.सू. १-४-५१) इति सूत्रस्य महाभाष्ये

 ISSN : 2249-538X

अकथितसूत्रविहितायाः कर्मसंज्ञायाः अर्थनिबन्धनत्वम् – प्रकृतसूत्रेण विहिता कर्मसंज्ञा अर्थनिबन्धना।[१] परिगणितधात्वर्थकैः अन्यैः धातुभिः योगादपि कर्मसंज्ञा स्यादिति अर्थनिबन्धनसंज्ञायाः भावः। यथा – माणवकं धर्मं भाषते अभिधत्ते वक्ति वा, बलिं भिक्षते वसुधाम् चेत्यादि। अत्र भाष्-धातोः, अभिपूर्वक-धा-धातोः, वच्-धातोः च ब्रूधातुना समानर्थत्वात्, भिक्ष्-धातोः च याच्-धातुना समानार्थकत्वात् तेषामपि धातूनां योगे सम्बन्धादीनां सम्प्रदानादिकारकाणां च अविवक्षया प्रकृतसूत्रेण कर्मसंज्ञा सिध्यति।

अर्थनिबन्धनस्य स्वीकारात् द्विकर्मकधातूनां परिगणनं व्यर्थीभूय एकदेशानुमोदनद्वारा अर्थनिबन्धनसंज्ञायाः एव बोधकः। परिगणनातिरिक्तानां परिगणितधात्वर्थकानाम् अन्येषां धातूनां योगेऽपि अकथितञ्चेति शास्त्रद्वारा कर्मसंज्ञा भवतीति आशयः। एतच्च मतं कैयटानुरोधेन। "अहमपीदमचोद्यं चोद्ये"[२] इति महाभाष्यकृतः प्रयोगः, अस्य चार्थस्तावत् अहमपि अस्मिन् अप्रष्टव्यविषये पृच्छ्यः इति। अतोऽत्र पृच्छिपर्यायचुदिधातोः गौणकर्मणि लटः प्रयोगात् प्रकृतसूत्रविहिता कर्मसंज्ञा अर्थनिबन्धना इति कैयटमतम्।

परन्तु परिगणनातिरिक्तानां परिगणितधात्वर्थकानाम् अन्येषां धातूनां योगेऽपि अकथितञ्चेति शास्त्रद्वारा कर्मसंज्ञाविधानात् "आख्यातोपयोगे" एतच्छास्त्रभाष्योक्तं परिगणनं व्यर्थं भवेद्, अपि च याच्-भिक्ष्-धात्वोः समानार्थकत्वात् अन्यतरधातोरेव परिगणनेन कार्ये सिद्धे उभयधातूपदेशोऽपि व्यर्थो भवेत् अतः अर्थनिबन्धनसंज्ञेति कैयटमतानुसारमेव केवलम्। वस्तुतस्तु येषां दुहाद्यर्थकधातूनां द्विकर्मकत्वमिष्टं तेषां व्यापारद्वयार्थकं स्वीकृत्यैव कर्तुरीप्सिततममिति सूत्रेणैव कार्यं सेत्स्यति।

अतः कैयटानुसारम् स्वीकृतायाः अर्थनिबन्धनसंज्ञायाः कानिचन अन्यान्युदाहरणानि –

| धातुः | अर्थः | तत्समानार्थकः धातुः | समानार्थकधातुप्रयोगेणोदाहरणम् |
|---|---|---|---|
| याच् | प्रार्थना | सम्+अनु+नी (भ्वादिः) | बलिं समनुनयति वसुधाम् |
| रुध् | आवरणम् | कूल् (भ्वादिः), वृश् (दिवादिः), वृ तुत्थ् (चुरादिः) | गां व्रजं कूलति, वृश्यति, वारयति, तुत्थयति वा |
| ब्रूञ् | व्यक्तवाक् | गद् शच् जप् जल्प् रप् लप् वद् (भ्वादिः), चक्ष् (अदादिः), ह्लप् क्लप् (चुरादिः) | माणवकं धर्मं गदति, शचते, जपति, जल्पति, रपति, लपति, वदति, चष्टे, ह्लापयति, क्लापयति वा |
| जि | अभिभवः | ज्रि (भ्वादिः) | शतं ज्रयति देवदत्तम् |
| मन्थ् | विलोडनम् | मन्थ् लुट् गाह् मथ् (भ्वादिः), लुठ् (दिवादिः) | सुधां क्षीरनिधिं मन्थति, लोटति, गाहते, मथति, लुठ्यति वा |
| मुष् | स्तेयम् | रुण्ट् लुण्ट् मूष् (भ्वादिः), चुर् लुण्ठ (चुरादिः) | देवदत्तं शतं रुण्टति, लुण्टति, मूषति, चोरयति, लुण्ठयति वा |
| हृ | हरणम् | हुण्ड् (भ्वादिः), वस् (चुरादिः) | ग्रामम् अजां हुण्डते वासयति वा |
| कृष् | विलेखनम् | रद् हल् कुच् (भ्वादिः), कृष् क्षुर् (तुदादिः) | ग्रामम् अजां रदति, हलति, कोचति, कृषति, क्षुरति वा |

[१] अर्थनिबन्धनेयं संज्ञा। - अकथितं च (पा.सू. १-४-५१) इति सूत्रस्य सिद्धान्तकौमुद्याम्।

[२] तद्राजस्य बहुषु तेनैवास्त्रियाम् (पा.सू. २.४.६२) इति सूत्रस्य भाष्ये।

## आश्रितग्रन्थसूची


- अ. रा. राजराजवर्मा, लघुपाणिनीयम्, त्रिवान्द्रम् : वि. भी. बुक् डिपो, १९११
- कौण्डभट्टः, वैयाकरणभूषणसारः (सावित्री-हिन्दीव्याख्योपेतः), व्याख्या. सम्पा. मिश्रः आद्याप्रसादः, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, द्वितीयं संस्करणम्, २०१६
- दण्डी, काव्यादर्शः (प्रकाशसंस्कृतहिन्दीव्याख्याद्वयोपेतः), व्याख्या. मिश्रः रामचन्द्रः, वाराणसी : चौखम्बा विद्याभवनम्, द्वितीयसंस्करणम्, १९९६ ।
- नागेशभट्टः, लघुशब्देन्दुशेखरः (भैरवीसहितः हिन्दीभाष्योपेतश्च - कारकप्रकरणम्), हिन्दी.भा. सम्पा. शर्मा तेजःपालः, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, प्रथमसंस्करणम् – २००२ ।
- पतञ्जलिः, पाणिनीयव्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतेन भाष्यप्रदीपेन च समुल्लसितम्), शास्त्री श्रीभार्गवः, दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, १९८७ ।
- भट्टोजिदीक्षितः, प्रौढमनोरमा (अव्ययीभावान्ता – लघुशब्दरत्नाख्यव्याख्यया समेता), प्रथमः भागः, व्याख्या. दीक्षितः हरिः, बनारस चौखम्बा : संस्कृत सीरिज आफिस, १९९२ ।
- भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनीटीकोपेतः प्रथमो भागः), सम्पा. शर्मा गिरिधरः शर्मा परमेश्वरानन्दः च, दिल्ली : मोतीलाल बनारसीदास,२०१२ ।
- भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी(मूलमात्रम्), सम्पा. गोविन्दाचार्यः, वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१७ ।
- सायणाचार्यः, माधवीया धातुवृत्तिः (पाणिनीयधातुपाठव्याख्यानात्मिका), सम्पा. शास्त्री स्वामी द्वारिकादासः, वाराणसी : प्राच्यभारतीप्रकाशनम्, १९६४ ।



ISSN : 2249-538X

# अभिराजराजेन्द्रमिश्रविरचितस्याभिराजयशोभूषणकाव्यशास्त्रस्यादिमोन्मेषस्याभिनवदृष्ट्या पर्यालोचनम्

श्री सुमन्तपात्रा*
शोधच्छात्रः, रा. विद्यामन्दिरम्
बेलूरुमठम्

***लेखसारः*** *– अस्मिन् शोधपत्रे आधुनिकालङ्कारिकस्य अभिराजराजेन्द्रमिश्रमहोदयस्य च तदीयकाव्यशास्त्रस्य अभिराजयशोभूषणस्य सामान्यः परिचयः प्रदत्तः। ततः कवेः काव्यस्य च प्रशंसनं विहितम्। एवं काव्यस्य प्रयोजनम्, हेतुः, लक्षणम्, शाखा इत्यादयो विषयाः वर्णिताः। सर्वत्रैव मिश्रमहोदयः स्वकीयताम् अवलम्बते। तदत्र समासेनोपस्थापितम्। यथास्थानं मया स्वकीयं मतम् अपि प्रदत्तम्।*

***कूटशब्दाः*** *– अभिराजयशोभूषणम्, काव्यप्रशंसा, काव्यप्रयोजनम्, काव्यहेतुः, काव्यलक्षणम्, काव्यशाखा इति।*

## उपोद्घातः

आधुनिककाव्यशास्त्रनभसि काव्यजगति च ये खलु क्रान्तदर्शिनः सुचारुकवयः स्वकाव्यमहिमभासा विविधशास्त्रज्ञानवैभवनैपुण्येन च राराज्यन्ते, तेषु मूर्धन्यभूतो विद्वद्विद्यार्थिपरिषदि लब्धयशस्कः प्राप्तपद्मश्रीक आधुनिककालस्य कालिदासो वाग्देवीकृपाधन्यस्त्रिवेणीकविः मिश्रोऽभिराजराजेन्द्रमहाभागो दिनमणिरिव संस्कृतसाहित्यसुरवर्त्मनि विशिष्टस्थानं बिभर्ति। सन्ति केचन रमणीयकाव्यविलेखने सिद्धहस्ता महाकवयश्चापरे केचन काव्यशास्त्रविनिर्माणे पारङ्गमाः। सरस्वत्याः द्वयोः वर्त्मनोः लब्धकीर्तयस्तु विद्वांसः सुदुर्लभा एव। प्रतिभोद्भवे काव्यकर्मणि वा प्रज्ञासम्भवे काव्यशास्त्रकर्मणि तेन तुल्यं विद्वान् तु गजमुक्ता इव सुविरला। कविरसौ त्रिचत्वारिंशदधिकोनविंशशततमे ईशवीयाब्दे उत्तप्रदेशस्य जौनपुरजनपदे दुर्गाप्रसाद-अभिराजीदेव्योः सुपुत्ररूपेण जनिमलभत। शैशवे एव पितास्य दिवङ्गतः। मात्रा एव पालितस्य अस्य राजेन्द्रस्य मातृभक्तिस्तु सत्यमतुला। अस्य नाम वस्तुतो राजेन्द्रमिश्रः, किन्तु मातृभक्तिवशतो मातुर्नामतः पूर्वभागं स्वीकृत्य अभिराजराजेन्द्रमिश्रः साधितः। अनेनैव नाम्ना विश्वख्यातो मातृदेवोऽयं महाकविः। तदुक्तमपि तेन-

**अभिराजी नाम्नासि जननी तस्मादहमप्यभिराजः त्वमसि मदर्थं यमुनागङ्गा वरदधराजलराजः।**
**यत्किञ्चिदपि कुतोऽपि कदापि क्वचिदपि ममानुकूलं भूतभाविभवतां ननु तेषां त्वमसि जननी सुखमूलम्॥**[१] **इति।**

आबाल्यादेव मेधावी अयं विविधविषये पारदर्शी आसीत्। पितामहेनानुप्राणितस्यास्य संस्कृतविषये प्रीतिरजायत। एवं चतुर्दशवयसि एव विनयमञ्जरी कंग्रेसप्रगतिः इति ग्रन्थद्वयं प्रणीतवान्। बाल्यशिक्षां समाप्य इलाहवादनगरं समागत उच्चशिक्षायै। एवं चतुष्षष्ठ्यधिकैकोनविंशशततमे ईशवीयाब्दे स्नातकोत्तरपरीक्षायां स्वर्णपदकादिकं प्राप्नोत्। एवम् अन्योक्तिविषये गवेषणाकार्यमकरोत्। ततः प्राच्यपाश्चात्त्ययोः विविधप्रदेशेष्वध्यापकपदमलङ्कृत्यान्ते सम्पूर्णानन्दविश्वविद्यालये कुलपतिपदमभूषयत्। राजेन्द्रमिश्रमहाभागो दीर्घाध्ययनाध्यापनजीवने बहुविधकाव्यं व्यरचयत्। प्रायेणानेन पञ्चशदधिकद्विशतं काव्यान्यलिख्यन्त। एवम् कौमारग्रन्थस्य च इक्षुगन्धाग्रन्थस्य कृते साहित्य-एकाडेमिपुरस्कारेण, विद्योत्तमारूपकस्य कृते कल्पवल्लीपुरस्कारेण, महाकाव्यानां कृते वाचस्पतिसम्मानेन, पद्मभूषणेन, राष्ट्रपतिपुरस्कारेण चासौ विद्वान् सुवक्ता मधुरगायको महाकविरभिराजो विभूषितः। सौमित्रनन्दनपन्तमहाभागमयं काव्यगुरुरूपेण मन्यते स्म।

---

***सम्पर्कसूत्रम्** – 7864022344, Email – sumanta.patra.vvv@gmail.com
[१] राजेन्द्रमिश्रेणैकस्मिन् साक्षात्कारे कथितं पद्यमिदम्।

काव्यस्य शाखाचतुष्टयेऽप्ययमासीन्निष्णातः । काव्यशास्त्रस्य प्रसिद्धग्रन्थस्तावदस्य अभिराजयशोभूषणम् इति ।

## अभिराजयशोभूषणम्

आधुनिककाव्यशास्त्रेतिहासेषु अभिराजयशोभूषणमेकं राजेन्द्रमिश्रस्य भावयितृप्रतिभाया विशिष्टं निदर्शनम् । ग्रन्थस्यैवंविधनामकरणे किं कारणमिति चेदुच्यते यत् अभितो धरित्र्यां स्वर्गलोके च राजन्ते ये यशःकायाः कवयस्सहृदयाश्च तेऽभिराजाः । तेषां यश एव भूषणं यस्य तन्नूतनं काव्यशास्त्रम् अभिराजयशोभूषणम्[१] इति । काव्यप्रकाश इवायमपि ग्रन्थः कारिका-वृत्ति-उदाहरणभागेन विभक्तः । पूर्वाचार्याणां मतानि सश्रद्धमुद्धृत्य समुचितं स्वमतमपि यथास्थानं विवेच्य प्रदीयतेऽनेन । ग्रन्थेऽस्मिन् सप्तषष्ट्याधिकपञ्चशतं कारिकाः सन्ति, उदारणपद्यानि प्रायः स्वकीयानि एव, कानिचन समसामयिककाव्येभ्यः सङ्गृहीतानीति विशेषः, कालोपयोगिना सहजसरलमाध्यमेन काव्यतत्त्वानां विवेचनमस्मिन् ग्रन्थे दरीदृश्यते । ग्रन्थोऽयम् इलाहबादस्य वैजन्तप्रकाशनतः षडधिकद्विसहस्रशतशते ईशवीयाब्दे प्रकाशपदमवाप ।

## अभिराजयशोभूषणस्यानुबन्धाः

अभिनवशास्त्रस्यास्याधिकारी तु काव्यचिकीर्षुः नवीनकविः, काव्यशास्त्रजिज्ञासुर्वा । एवं ग्रन्थस्य विषयवस्तु अधः समासेनोपस्थाप्यते । तत्र पञ्चोन्मेषा विलसन्ति यथा-

१. काव्यपरिचयोन्मेषः(काव्यस्य प्रशंसा-लक्षण-हेतु-प्रयोजन-विभाजनानि पर्यालोचितानि)
२. शरीरतत्त्वोन्मेषः(शब्दशक्ति-वृत्ति-रीति-गुण-अलङ्काराश्चालोचिताः)
३. आत्मतत्त्वोन्मेषः(काव्यस्य आत्मरूपेण प्रतीयमानार्थस्य स्थापना विहिता)
४. निर्मितितत्त्वोन्मेषः(गद्य-पद्य-मिश्रभेदात् पद्यबन्धाः वर्णिताः)
५. प्रकीर्णतत्त्वोन्मेषः(गीतकाव्य-गलज्जलिका-छन्दोमुक्तादिरचनानां सलक्षणमुदाहरणानि दर्शितानि)

एवं विषयेण सह अभिनवकाव्यशास्त्रस्यास्य सम्बन्धस्तु ज्ञाप्यज्ञापकभावसम्बन्धः । ननु बहुषु काव्यप्रकाशादिकाव्यशास्त्रेषु सत्सु किमस्ति प्रयोजनमस्याभिनवस्य काव्यशास्त्रस्य अभिराजयशोभूषणस्येति चेदुत्तरति स्वयम् अभिराजराजेन्द्रमिश्रमहाभागो यथा प्रथमं तावदिदं यत्प्रतिष्ठापिते खलु साम्प्रतिकलोकतन्त्रेऽपगते च राजतन्त्रे नृपैकमात्रकृतीनां विषये किं क्रियेत ? द्वितीयञ्चापि कारणमिदं यत्संस्कृतेऽप्यधुनाऽन्यभारतीयभाषोपयुक्ता लोकप्रियाः काव्यप्रकारा निर्मीयन्ते नव्यैः कविभिः । तेषां कृते नोपलभ्यते कश्चित् काव्यशास्त्रावलम्बः । अतएव कथा-नाट्यादिसम्बद्धानां नूतनकाव्यप्रकाराणामपि नियमनिर्देशार्थं किञ्चिदभिनवकाव्यशास्त्रमपेक्षितमेव । एवं विद्वच्छिरोमणिः सन्नपि कालिदास इव विनयी महामहोपाध्यायो राजेन्द्रमिश्रः प्रयोजनान्तरमपि कथयति यथा-

**क्व सूर्या मम्मटाद्यास्ते क्व चाहं लघुदीपकः । तुल्यं किन्तूभयोर्लक्ष्यं शासदासौधकाशनम् ॥[२] इति ।**

अतः सप्रयोजनमेवेदमभिनवकाव्यशास्त्रमिति शास्त्रस्यास्यानुबन्धचतुष्टयम् ।

अस्मिन् शोधपत्रे केवलं काव्यपरिचयनामकस्य प्रथमोन्मेषस्य यथासामर्थ्यं पर्यालोचनं विधास्यते ।

---

[१]अभिराजयशोभूषणम्, परिचयोन्मेषः, पृष्ठा-१२ ।
[२]प्रागेव,नान्दीमुखे,पृष्ठा-८ ।

## अभिराजयशोभूषणे काव्यप्रशंसाप्रकरणम्

महामहोपाध्यायेनाभिराजराजेन्द्रेण अभिराजयशोभूषणग्रन्थस्य आदौ मङ्गलाचरणे भरतमुनितो रेवाप्रसादद्विवेदीं पर्यन्तं समेषां काव्यशास्त्रकृतां कृते प्रणामाञ्जलयो विनिवेद्यन्ते । ततस्तेन काव्यस्य प्रशंसा-प्रयोजन-हेतु-लक्षण-विभाजनविषयाः सङ्कलिताः । काव्यप्रशंसाप्रकरणे काव्यस्य काव्यशास्त्रस्य कवेश्च प्रशसनं विधीयते । काव्यस्य प्रशंसाविषये तेन नैके श्लोकाः उदिताः । तत्रोक्तं यद् वाजपेयप्रमुखयागैरपि यादृशं प्रभुतं यशो न लभ्यते तादृशमक्षय्यं यशस्तु काव्यादनायासेनैव लभ्यम् । तदुक्तमपि यथा-

**वाजपेयमखैश्चापि भूरिदानसमन्वितैः । लभ्यं नैव यशोऽक्षय्यं तथा कवितया यथा ॥**[1] इति ।

अन्यच्च काव्याच्चतुर्वर्गफलप्राप्तिर्यदुच्यते तत्कथं सम्भवतीत्यच्यते काव्यान्निश्चितरूपेण धर्म-अर्थ-कामरूपाणां पुरुषार्थानां सिद्धिर्भवति । त्रिवर्गसाधनं नाट्यम् इति प्रसिद्धभणितिरग्निपुराणे । किञ्च त्रिवर्गसिद्धौ तेषां वियोगकातरः सहचररूपो मोक्षोऽपि स्वयमेव सिध्यति । तदुक्तमपि राजेन्द्रमहाभागैर्यथा-

**त्रिवर्गेऽसंशयं सिद्धे काव्यनाट्योपसेवनैः । तिष्ठत्येव स्वयंसिद्धस्तुर्यो विरहकातरः ॥**[2] इति ।

एवञ्च कवेर्विषये कथ्यते यत् कवयः क्रान्तदर्शिनो भवन्ति, ते अदृष्टं द्रष्टुं शक्नुवन्ति, अचिन्तनीयमपि चिन्तयितुं पारयन्ति । तदुक्तं यथा-

**अचिन्त्यचिन्तने शक्तोऽप्यदृष्टदर्शने क्षमः । स्वहस्तामलकीकृत्य ब्रह्माण्डं कविरीक्षते ॥**[3] इति ।

अपरञ्च यः कविर्भवति तस्य बान्धवौ शब्दार्थौ, भार्या तु काव्यम्, मुक्तिस्तु रस एव । एवंभूतस्य कवेरन्यस्य वस्तुनः किं वा प्रयोजनमस्ति, नास्तीत्यर्थः । तदुक्तमपि-

**बान्धवौ ननु शब्दार्थौ कविता प्राणवल्लभा । रसो मुक्तिसुखं हन्त किमन्यदिह काङ्क्षितम् ॥**[4] इति ।

एवं काव्यस्य भुरि प्रशंसनं कृत्वा काव्यप्रयोजन-कारण-लक्षण-विभाजनादिविषयाणां सविस्तरमालोचनं क्रियते ।

## अभिराजयशोभूषणे काव्यप्रयोजनप्रकरणम्

मिश्रभागैर्मङ्गलाचरणात्परं काव्यप्रशंसा, ततः काव्यप्रयोजनविषये भामह-भोजराज-कुन्तक-वाग्भट्ट-मम्मट-विश्वनाथादीनां मतानि सश्रद्धमुल्लिख्य स्वमतं प्रदीयते । यथा- नाट्यशास्त्रकारो भरतमुनिः काव्यप्रयोजनविषये कथयति यत्-

**धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम् । लोकोपदेशजननं नाट्यमेद् भविष्यति ॥**[5] इति ।

अपरञ्च काव्यप्रकाशकारो भट्टमम्मटः काव्यप्रयोजनं कथयति यथा-

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥**[6] इति ।

काव्यादर्थप्राप्तिरिति यदुक्तं तत्तु चिन्त्यमेव । यतोहि नहि सर्वे कवयो राजाश्रये आसन्, किञ्च धनार्थी कविः कुतो वा स्वाभिमानी ? दिल्लीश्वरो वा जगदीश्वरो वेत्युक्त्या दिल्लीश्वरं निजाश्रयदातारं शाहजाहानं महामहिमशालिना जगदीश्वरेण

[1]प्रागेव, पृष्ठा-१५ ।
[2]तत्रैव ।
[3]तत्रैव ।
[4]अभिराजयशोभूषणे,प्रथमोन्मेषे, पृष्ठा-१६ ।
[5]नाट्यशास्त्रे, प्रथमाध्याये, चतुर्दशी कारिका ।
[6]काव्यप्रकाशे, प्रथमोल्लासे, पृष्ठा-६ ।

सह समीकुर्वन् पण्डितराजो जगन्नाथस्तु च्युतगौरव एव परिलक्ष्यते। प्रकृत्यैव निरीहो भवति कविः। निरीहाणां कवीनामीशस्तु तृणमिव तिरस्कारविषय इति तु श्रुतमस्माभिः। मनसि च परितुष्टे को धनी को वा द्ररिद्रः? आत्मरामतया जीवितां कवितलल्लजानां क्वापरितोषः? इति मिश्रभागस्याभिमतम्।

अपरञ्च काव्यस्य प्रयोजनत्वेन यद् व्यवहारज्ञानमुक्तं तत्तु सन्दिग्धत्वान्न देयमिति राजेन्द्रमिश्रमहोदयस्याभिमतम्। यतोहि काव्यात् कस्य व्यवहारज्ञानं जायेत? काव्यकारस्य? पाठकस्य? श्रोतुर्वा? इति मम्मटमते सन्दिग्धता।

अत्रेदं विचार्यं यट्टीकाकारैः स्पष्टतयैवोक्तं यद् काव्यव्यवहारज्ञानं नहि कवेः, पाठकस्य वा श्रोतुः वा सहृदयस्यैव भवति। अतोऽत्र राजेन्द्रमिश्रमहोदयैर्यदुक्तं सन्दिग्धमिति तत्तु असन्दिग्धमेवास्ति।

अपरञ्च काव्यप्रयोजनविषये शिवेतरक्षतिर्वा अमङ्गलनाश इति यदुक्तं तदपि कादाचित्कः क्वाचित्कश्च। यतोहि देवताराधनपराणां स्तुतिस्तोत्रादीनां विरचनेन शिवेतरक्षतिः केषाञ्चित्कवीनामभवदिति अङ्गीकृतेऽपि तस्याः शिवेतरक्षतेः काव्यप्रयोजनौचित्यं सङ्कीर्णमेव परिलक्ष्यते। नहि सर्वाणि महाकाव्य-खण्डकाव्य-चम्पूकाव्य-दशरूपकादीनि देवाराधनपराणीति। यथा प्रहसनं तु बण्डभाण्डेतिवृत्तप्रधानम्। एवं भाणरूपकमपि वेशवाटवर्णने पर्यवसितः। एवं स्थिते सहस्रधारतामुपगते काव्यवर्ण्यविषये स्तोत्रमात्रसाध्या शिवेतरक्षतिः कथं काव्यस्य प्रयोजनमिति वक्तुं शक्नुमः?

अपरञ्च सद्यःपरनिर्वृतिः अर्थात् काव्यश्रवणसमनन्तरमेव परमानन्दप्राप्तिरिति यदुक्तं तदपि विचिन्तनीयम्। अत्र मिश्रमहाभागस्य मते काव्यपरिशीलनेन सद्यःपरिनिर्वृतिरपि पाठकस्य श्रोतुर्वा सहृदयतामपेक्षते। नातिपरिपुष्टविद्यासंस्कारोऽसहृदयः काव्यार्थावगमे एवासमर्थः स्यात् तर्हि कथं स परमानन्दमाप्नुयात्? विशेषतः प्रतीयमानार्थप्रधाने काव्ये नैतत्सम्भवति इति। धनदेवस्य मते कवीनां सुभाषितवचनेन सहृदयाः एव परितुष्टा भवन्ति। यथा चन्द्रकिरणैः यथा समुद्रे जलतरङ्गा हसन्ति तथा न कूपे इति। तथाहि तेन गदितं यथा-

**कवयः परितुष्यन्ति नेतरे कविसूक्तिभिः। नह्यकूपारवत्कूपा वर्धन्ते विधुकान्तिभिः॥[1] इति।**

अत्रैवं राजेन्द्रमिश्रमहाभागैर्यदुक्तं तदपि किञ्चित् सुधीभिश्चिन्त्यम्। यतोहि काव्यात् परमानन्दप्राप्तिस्तु सर्वजनविदितः सकलजनानुभवसिद्धश्च। स्वमातृभाषया लिखितं काव्यं साधारणः सामाजिकोऽप्यवगच्छति। गृहेषु पितामहादयोऽपि दूरदर्शनेषु मातृभाषयाभिनीतानां रामायणादिकाव्यानां दर्शनात् सानन्दमश्रुसिक्ताश्च जायन्ते, एवं सहृदयो नाम केवलम् अतिपरिपुष्टविद्यासंस्कारवान् कश्चन विद्वान् इति न। काव्यार्थग्रहणे पटुः सहृदयः। संस्कृतकाव्यादर्थावगमेऽस्माकं क्लेशहेतुस्तु कोशव्याकरणादिशास्त्रेष्वज्ञानतैव। तस्यैव संस्कृतकाव्यस्यानुवादं पठामश्चेत् काव्यमवगच्छामः, ततश्चाहो काव्यम् अहो काव्यमिति नन्दिताः सन्तो गदामः। एवम् अभिराजमिश्रेण यथा काव्यात् आनन्दलाभः कादाचित्कः इति कथयति, तदङ्गीक्रियते चेत् काव्याद्यशःप्राप्तिरपि क्वाचित्क एव स्यात्। नहि सर्वस्मादपि काव्याद्यशःलाभः। अतः काव्यात् परमानन्दप्राप्तिस्तु भवत्येव इति यद् भट्टमम्मटेनोक्तं तत्तु न दोषयुक्तम्।

अपरञ्च काव्यं कान्तासम्मिततयोपदेशयुजे अर्थात् काव्यात् कान्तासम्मिततयोपदेशलाभो भवतीति मम्मटभट्टाभिमतम्। परन्तु राजेन्द्रमिश्रमहाभागस्य नये तु तन्न समीचीनम्। यतोहि काव्यं सदपि भट्टिकाव्यम् अर्थात् रावणवधमहाकाव्यम् व्याकरणमनुशास्ति। एवं कविराजप्रणीते राघवनैषधीये वा मेघविजयोपाध्यायप्रणीते सप्तसन्धानमहाकाव्ये श्लेषप्रयोगग्रहिले क्व नु कान्तासम्मितोपदेशत्वम्? अतः काव्यात् कान्तासम्मितोपदेशलाभस्तु चिन्त्यमेव।

अत्रैतदपि विचार्यं यद् व्याकरणप्रधानं वा श्लेषप्रधानं काव्यं केवलं व्याकरणमेवानुशास्तीति न, तत्रापि

[1] अभिराजयशोभूषणे,प्रथमोन्मेषे, पृष्ठा-१४।


ISSN : 2249-538X

व्याकरणादप्यधिकतया भूयशः कान्तासम्मितोपदेलाभ एव दरीदृश्यते। एवं काव्यात् कान्तासम्मितोपदेशलाभस्तु सकलजनविदितः। किं बहुना रावणवधमहाकाव्यमपि भूयशः कान्तासम्मितोपदेशमेव प्रयच्छति। यथैकमुदाहरणपद्यं प्रदीयते-

**प्रभातवाताहतिकम्पिताकृतिः कुमुद्वतीरेणुपिशाङ्गविग्रहम्।**
**निरास भृङ्गं कुपितेव पद्मिनी न मानिनी संसहतेऽन्यसङ्गमम्॥**[1] **इति।**

एवं परम्परानुपालनपरैः मिश्रभागैः काव्यप्रयोजनविषये मम्मटमतस्यासारतां प्रतिपाद्य स्वकीयमतमपि प्रस्तूयते यथा-

**न धनाय न पुण्याय व्यवहाराय नापि वा। न च सद्यः सुखार्थाय काव्यं निर्मात्ययं कविः॥**[2] **इति।**

अत्र स्पष्टीभवति यत् राजेन्द्रमिश्रेण भट्टमम्मटकृतकाव्यप्रयोजनस्यासारतां प्रतिपाद्यते इति। वस्तुतः प्रयोजनं विनैव स्वभावत एव कवयः काव्यानि सृजन्ति, काव्यनिर्माणं विना प्रकृतकविः शान्तिमेव न प्राप्नोति। अतः काव्यं लिखति। तदुक्तमपि यथा-

**वस्तुतस्तस्य कर्मैतत् संस्कारोत्थं स्वभावजम्। यदकृत्वा क्षणं यावन्नासौ शममधिगच्छति॥**[3] **इति।**

एवं यथा द्विरेफो गुञ्जनं विना तुष्णीं स्थातुमेव न शक्नोति तथा कविः काव्यं विना जीवितुं नार्हति। अतः काव्यं लिखति। काव्यं तु कवेः स्वभावजं जन्मजन्मान्तरस्य पुण्यसत्फलम्। लोके यदस्वाभाविकं कर्म तस्य प्रयोजनमन्विष्येत किन्तु यत्स्वाभाविकं कर्म अर्थात् निद्रा-क्षुधा-पिपासादयः इत्येतेषां प्रयोजनान्वेषणं तु काकदन्तगणना। कवेः स्वभावस्तु काव्यरचना, अतस्तत्र प्रयोजनचिन्तनं व्यार्थमेव। तथापि विद्वद्भिर्यदि तदीष्यते चेत् काव्यप्रयोजनं केवलं यशः एव स्वीक्रियताम्। तदुक्तं यथा-

**पश्यन्त्येव यदि प्राज्ञाः काव्यसृष्टौ प्रयोजनम्। परत्रेह च निर्व्याजं यशस्तन्मेऽभिरोचते॥**[4] **इति।**

एवमभिराजराजेन्द्रमिश्रमहाभागस्य नये तु काव्यस्य परमं फलं केवलं यशः कीर्तिर्वा। किन्तु परमानन्दलाभस्याखिल-जनविदितत्वाद् काव्यात् यशःप्राप्तिः, आनन्दलाभश्च सम्भवत इति मदीया मतिः।

## अभिराजयशोभूषणे काव्यहेतुप्रकरणम्

त्रिवेणीकवी राजेन्द्रमिश्रमहोदयस्तदीयेऽभिराजयशोभूषणे काव्यप्रयोजनं समालोच्य काव्यहेतुं विवेचयति। तत्रापि पूर्वाचार्याणां मतानि सश्रद्धं संस्मृत्य स्वकीयं मतमपि प्रददाति। काव्यहेतुविषये प्रायः पक्षत्रयं श्रूयते। यथा दण्डि-रुद्रट-मम्मटादिभिः काव्यकारणत्वेन प्रतिभा-शास्त्रज्ञान-काव्याभ्यासाः अङ्गीक्रियन्ते। तत्र भट्टमम्मटाचार्येण कथितो यथा-

**शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्। काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुभवे॥**[5] **इति।**

[1]भट्टिकाव्ये, द्वितीयसर्गे, षष्ठं पद्यम्।
[2]अभिराजयशोभूषणे,प्रथमोन्मेषे, पृष्ठा-२८।
[3]तत्रैव।
[4]तत्रैव।
[5]काव्यप्रकाशे, प्रथमोल्लासे, पृष्ठा-११।

अन्यच्च भामह-राजशेखर-कुन्तक-महिमभट्ट-जगन्नाथ-जयदेवादिभिः काव्यकारणत्वेन केवलं प्रतिभा स्वीक्रियते। तत्र जयदेवो भणति यथा-

**प्रतिभैव श्रुताभ्याससहिता कवितां प्रति। हेतुर्मृदम्बुसम्बद्धबीजोत्पत्तिर्लतामिव॥[1] इति।**

अपरञ्च वामनेन हेतुषट्कं गृह्यते। तत्रोक्तिस्तस्य यथा तत्र काव्यपरिचयो लक्ष्यत्वम्। काव्यबन्धोद्यमोऽभियोगः। काव्योपदेशगुरुशुश्रूषणं वृद्धसेवा। पदाधानोद्धर णमवेक्षणम्। कवित्वबीजं प्रतिभानम्। चित्तैकाग्र्यमवधानम्। तद्देशकालाभ्यामिति।

वस्तुतः काव्यं तु कस्यचित् कदाचित् प्रतिभात एव जायते। अर्थात् कवित्वबीजं तु प्रतिभानमेव। प्रतिभैव च कवीनां काव्यकारणकारणम्। वस्तुतः काव्यकारणहेतुः द्विविध इति ग्राह्यः। लौकिकोऽलौकिकश्चेति। तत्रालौकिकहेतुर्दैवायत्तः। स हेतुरेव शक्ति-प्रज्ञा-प्रतिभा-प्रभृतिपदवाच्यः। आचार्यः आनन्दवर्धनः प्रतिभां दैवायत्तामेव मन्यते। द्वितीयो लौकिकहेतुः। स तु व्युत्पत्त्यभ्यासयुगलसमन्वितः प्रयत्नसाध्यः। एतौ द्वौ पुनः प्रतिभाया एव संस्कारकौ, न तु काव्यहेतू स्वतन्त्ररूपेणेति। अनयोरभावेऽपि लोकोत्तरचमत्कारकारि काव्यं प्रतिभामात्रबलेन समुद्भवितुं शक्यते। किन्तु प्रतिभां विना काव्यं न प्रसरेत्, प्रसृतं वोपहसनीयतां यायात्।

अतः काव्यहेतुविषये मिश्रमहाभागस्तु आनन्दवर्धनादेर्मार्गमेवानुसरति। अतस्तन्मते काव्यकारणं केवला प्रतिभा। वस्तुतः कविः काव्यं न लिखति, काव्यदेवी भारती एव कविना काव्यं लेखयति। कविस्तु यन्त्रस्वरूपको निमित्रमात्रम्। यन्त्री तु वाग्देवी स्वयम्। तदुक्तमपि-

**नाहं करोमि कवितामिह शारदैव सात्मानमञ्जयति मत्कवनच्छलेन।**
**गन्धं तनोति जलजं न निजप्रभावाद् विस्फूर्जितं सकलमेव तदर्कलक्ष्याः॥[2] इति।**

## अभिराजयशोभूषणे काव्यलक्षणप्रकरणम्

अस्ति काव्यलक्षणप्रसङ्गे काव्यशास्त्रकृतां वैमत्यम्। केचन शब्दार्थवादिनः, अपरे केचन शब्दवादिनः। आभामहान्मम्मटं यावत् सर्वे आचार्याः शब्दार्थवादिनः। महामहिमपण्डितराजस्तु शब्दवादी। आधुनिककाव्यशास्त्रकारोऽभिराजराजेन्द्र-मिश्रमहाभागस्तु काव्यलक्षणप्रसङ्गे मम्मटपन्थानमवलम्बते। तेन काव्यलक्षणमुक्तं यथा-

**काव्यं लोकोत्तराख्यानं रसगर्भं स्वभावजमम्। परत्रेह च निर्व्याजं यशोऽवाप्तिप्रयोजनम्॥**
**शब्दार्थसङ्गमेनैव किञ्चिदाख्यातुमिष्यते। ततश्चोभयसाहित्यं काव्यपर्यायगोचरम्॥[3] इति।**

अर्थात् स्वभावजं रसगर्भं लोकोत्तराख्यानं काव्यं भवतीति सरलार्थः। काव्यं स्वभावजं स्यात्, नाम प्रबलप्रयाससाध्यं न स्यात्, स्वाभाविकतया कवेरल्पप्रयासेनैव निष्पन्नं स्यात्काव्यम्, अर्थात् काव्यं तावद्विमृश्य विमृश्य ध्यायं ध्यायं शास्त्रमिव सायासं न लिख्यते। काव्यं रसगर्भं स्यात्, नाम काव्यं रसप्रधानकम् अर्थात् सरसं स्यात्। काव्यं लोकोत्तराख्यानं स्यात्, अर्थात् लोकोत्तस्य आख्यानम् स्यात्, लोकोत्तरत्वं नाम चमत्कारत्वम्, तस्य आख्यानं नाम आख्यायते शब्दार्थसमष्ट्येत्याख्यानम्। अनेनाभामहान्मम्मटं यावच्छब्दार्थयोः काव्यत्वाङ्गीकरणस्याविच्छिन्नपरम्पराया अनुमोदनम्। अन्यच्च रमणीयार्थप्रतिपादनपरस्यापि शब्दस्याङ्गीकारे शब्दार्थौ एव काव्यमिति स्फुटं भवति। एवञ्च

[1]चन्द्रालोके, प्रथममयूखे, षष्ठं पद्यम्।
[2]अभिराजयशोभूषणे,प्रथमोन्मेषे, पृष्ठा-३७।
[3]प्रागेव, पृष्ठा- ३८।


ISSN : 2249-538X

काव्यलक्षणप्रसङ्गे पुनरपि कथितम्-

**सगुणत्वमदोषत्वं निष्प्रयत्नाप्यलङ्कृतिः । प्रज्ञा चापि नवोन्मेषा लोकोत्तरत्वकारणम् ॥**[१] **इति ।**

साम्प्रतं काव्यस्य लोकोत्तरत्वे कारणं विवृणोति ग्रन्थकारो यथा सगुणत्वं रसाभिव्यञ्जकानां माधुर्यादिगुणानां साहचर्यम् । अदोषत्वं पदवाक्यरसादिदोषाणां मुख्यार्थहतिपर्यवसितानामभावः । निष्प्रयत्ना प्रयत्नरहिता स्वाभाविकी वालङ्कृतिः । नवोन्मेषा नित्यस्फुरणा प्रज्ञा प्रतिभा । एतत्सर्वं सम्भूय काव्यलोकोत्तरत्वकारणम् इति ।

काव्यप्रकाशकारस्य मम्मटभट्टस्य मतेन सार्धमभिराजराजेन्द्रमिश्रमहाभागस्य मतसाम्यं दृश्यते । मम्मटेन काव्यलक्षणप्रसङ्गे कथितं यत्- तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि इति ।

एवं न केवलं शब्दः काव्यपदमीमाप्नोति नो वा अर्थः । तर्हि किं काव्यमिति जिज्ञासायामुच्यते यत् स्वभावजं रसगर्भं लोकोत्तराख्यानमेव काव्यमिति । अत्र रसगर्भपदेन वाक्यं रसात्मकं काव्यमिति कविराजविश्वनाथमतस्यानुमोदनम् । लोकोत्तरपदेन पण्डितराजजगन्नाथमन्तव्यस्यानुमोदनम् । एवं काव्यलक्षणकथनात्परमुदाहरणपद्यमप्युद्धरति समसामयिककवेः बटुकनाथशास्त्रिणः काव्याद् यथा-

**चलद्रुचिरहंसका परमहंससंसेविता जडप्रकृतिधारिणी सकलजाड्यविध्वंसिनी ।**
**पतन्त्यथ विहायसः शुभमतीन् नयन्ती दिवं स्वतन्त्रगुणगौरवा जयति जह्नुराजात्मजा ॥**[२] **इति ।**

## अभिराजयशोभूषणे काव्यशाखाप्रकरणम्

इदानीं काव्यभेदप्रकरणमालोच्यते । दृष्टमस्त्यस्माभिर्यदाचार्यैः काव्यं प्रायेणोत्तम-मध्यम-अधमभेदेन त्रिधा विभक्तम् । तत्र व्यङ्ग्यार्थप्रधानं काव्यं भवत्युत्तमकाव्यम् । गुणीभूतव्यङ्ग्यार्थप्रधानं काव्यं भवति मध्यमकाव्यम् । एवं स्फुटव्यङ्ग्यार्थरहितं काव्यं भवत्यधमकाव्यमिति । एवंविधभेदप्रपञ्चे मानदण्डस्तु व्यङ्ग्यार्थ एव । किन्त्वभिराजराजेन्द्रमहाभागैः काव्यभेदप्रपञ्चे किञ्चिद्भिन्नं चिन्तितमस्ति । तन्मतेन काव्यभेदे मानदण्डस्तु काव्यपाठक एव । तन्मते काव्यं त्रिधा भवति यथा सहृयस्वाद्यम्, कोविदस्वाद्यम्(पण्डितास्वाद्यम्), लोकास्वाद्यमिति । उक्तञ्च तेन यथा-

**काव्यं सहृदयास्वाद्यं कोविदास्वाद्यमेव च । लोकास्वाद्यमिति ख्यातं त्रिविधं रोचते मम ॥**[३] **इति ।**

ननु परम्परयागतं काव्यभेदं व्यतिरिच्य कथं नूतनं पन्थानमाश्रयति प्रकृतग्रन्थकारः? ग्रन्थकृदैवोक्तं यत् काव्यं खलु काव्यदेव्याः सरस्वत्याः आशीर्वादस्वरूपम्, अंशभूतश्चेति । वाग्देव्याः आशीर्वादभूतस्य काव्यस्य कथं वा सम्भवत्यधमत्वं मध्यमत्वं वेति । एवमनर्थकल्पनेन काव्यवाङ्मयस्य तु नूनं गौरवहानिरेव भवति । एवं काव्यं सदपि व्यहरणं किमपि यदि मध्यमाध्यमसंज्ञं तर्हि पामरालपनमेव वरं न पुनः काव्यम् । काव्यीभवदेव वचः प्रसरणमुत्तमं जायते । तदुक्तं यथा-

**सृष्टिस्सारस्वती पूता प्रोच्यते यदि वाऽधमा । मध्यमा चेति तन्मन्ये वाङ्मयं गौरवं हतम् ॥**[४] **इति ।**

एवमधस्त्रिविधकाव्यानां सोदाहरणं निरूपणं क्रियते-

---

[१]तत्रैव ।
[२]तत्रैव, पृष्ठा-४२ ।
[३]तत्रैव, पृष्ठा- ५० ।
[४]तत्रैव, पृष्ठा- ५१ ।

## सहृदयास्वाद्यकाव्यम्

वस्तुतस्तु काव्यस्य त्रैविध्येऽस्मिन् क्रमवतां सहृदयकोविदलोकानां प्राधान्यमेव निर्णायकं तत्त्वम्। अत्रैतदपि चिन्त्यं यद् ये सहृदयास्ते न कोविदा इति न। वा ये कोविदास्ते न सहृदया इत्यपि न। वस्तुतः कोविदत्वे सत्यपि सहृदयत्वं यस्मिन् प्राधान्येन तिष्ठति स सहृदयः, तैः आस्वाद्यं काव्यं तूत्तमकोटिकं सहृदयस्वाद्यमित्युच्यते। तदुदाहरणं यथा वेङ्कटरामराघवस्य-

**वृन्ते यान्ति पिपीलिकाः कतिपया रोहावरोहश्रमं कीटाः केचन मूढमेव च दले स्वापं समातन्वते।**
**केऽप्यन्ते शलभा विधूय वदनैस्ताम्यन्ति किञ्जलककान् एकः केवलमेव सून! मधुपो लेढि त्वदीयं मधु॥**[1] **इति।**

अर्थात् अत्र गुणग्रहणशीलस्य विवेकिनः कस्यचित् महापुरुषस्य प्रस्तुतभूतस्य वर्णना कविना प्रस्तूयते व्यञ्जनामुखेन। अप्रस्तुतभूतो मधुकरो वाच्यमुखेनात्रोपस्थापितः। तेन प्रस्तुतभूतस्य महापुरुषस्य वर्णनायाः प्राधान्यम्, तच्च केवलसहृदहृदयसंवेद्यम्। एवञ्च पद्येऽस्मिन् राजतेऽन्योक्तिर्वा प्रतीयमानार्थः। अतोऽयं सहृदयस्वाद्यकाव्यमित्युच्यते।

## कोविदास्वाद्यकाव्यम्

एवं सहृदयत्वापेक्षया यस्मिन् कोविदत्वस्यैव प्राधान्यं दृश्यते ते कोविदाः, तैश्चास्वाद्यं काव्यं कोविदास्वाद्यम्। यथा राजेन्द्रमिश्राणामेव-

**धत्ते यो वारिधारां तमिह सविनयं मन्महे भोजमेघं धत्ते यो वाऽरिधारां तमिह सविनयं मन्महे भोजभूपम्।**
**धत्तेऽयोवारिधारां तमिह सविनयं मन्महे भोजखङ्गम् धत्ते यो वा रिधारां तमिह सविनयं मन्महे भोजदेशम्॥**[2] **इति।**

अत्र वारिधारां दधतो भोजमेघस्य, अरिधारां शत्रुसैन्यं विदलतो भोजभूपस्य, अयोवारिधारां दधतो भोजखङ्गस्य, रिधारां च दधतो भोजदेशस्य परिकल्पनया सभङ्गाभङ्गश्लेषमहिम्ना च जायत एव कश्चित्कोविदानन्दविषयः।

## लोकास्वाद्यकाव्यम्

एवं सहृदयत्वकोविदत्वपरिपाकवञ्चितैः सामान्यमनीषैः लोकैरास्वाद्यं काव्यं लोकास्वाद्यमिति कथ्यते। यथा-

**धम्मिल्लं स्वं घनवनगतं सस्मितं धुन्वती सा स्कन्धे धृत्वा हरितहरितं शाद्वलानां दुकूलम्।**
**प्रातःकाले जलधिजपयश्शुल्लके स्वे प्रगृह्य माताऽऽयाता तनयवदनक्षालनार्थं समीपम्॥**[3] **इति।**

पद्येऽस्मिन् सान्द्रकाननहरितदूर्वातलिच्छकमण्डितायाः सागरजलपरीतायाः शार्मण्यधरित्र्या लोकोत्तरवर्णनं समेषामेव सामाजिकानां प्रतिभाऽप्रतिभाजुषां पाण्डित्याऽपाण्डित्यसमुल्लसितानां हृदयं प्रसह्य बध्नातीति लोकास्वाद्यमिदं काव्यमिति राजेन्द्रमिश्रः।

एवं सोदाहरणम् अभिराजराजेन्द्रमिश्रमहाभागैः काव्यभेदान् प्रदर्शयति। अनेनैव क्रमेण परिचयोन्मेषस्य समाप्तिर्जायते।

[1]तत्रैव, पृष्ठा- ५२।
[2]तत्रैव, पृष्ठा- ५४।
[3]तत्रैव, पृष्ठा- ५७।

## उपसंहृतिः

सन्ति कालिदासादिरिवात्यल्पा एव कवयः, ये तावत् स्वमहिम्ना विश्वविख्याताः, स्वकृतिना सहृदयमनोहारिणः, स्वप्रज्ञया विद्वद्गोष्ठ्यां शंसिताः। एवंविधेषु प्रशंसितेषु महाकविषु आधुनिककाव्यकानने मलयजतरुरिव स्वकृतियशसा काव्यकाष्ठसुरभिणा सदसद्विवेकिनः सहृदयहृदयान् ह्लादयति महामहोपाध्यायो लब्धपद्मश्रीपुरस्कारो मिश्रोऽभिराजराजेन्द्रमहाभागः। वस्तुत उत्तमा जना आत्मनैव ख्याता भवन्ति। तदुक्तमपि-

**उत्तमा आत्मनः ख्याता पितुः ख्यातास्तु मध्यमाः। अधमा मातुलात् ख्याता श्वशुरादधमाधमाः॥[1] इति।**

अस्मिन् शोधपत्रे कवेः काव्यशास्त्रकारस्य चाभिराजराजेन्द्रमहाभागस्यात्मपरिचयप्रदानपुरःसरं तत्प्रणीतस्य अभिराजयशोभूषणम् इति आधुनिककाव्यशास्त्रस्य प्रथमोन्मेषस्य क्रमेण पर्यालोचनं विहितमस्ति। तत्र क्रमेण काव्यप्रशंसाप्रकरणम्, काव्यप्रयोजनप्रकरणम्, काव्यहेतुप्रकरणम्, काव्यलक्षणप्रकरणम्, काव्यशाखाप्रकरणम् इत्येषां प्रकरणानां पर्यालोचनं विहितमस्ति। पूर्वाचार्याणां मतानि श्रद्धादृष्ट्या विलोक्य तानि मतानि राजहंस इव नीरक्षीरदृष्ट्या विवेच्य यथास्थानं तेषां मतानां वर्जनं ग्रहणं वा कृतमनेन। यथासामार्थ्यं मिश्रमहाभागस्य मतं मया अस्मिन् शोधपत्रे पर्यालोचितम्, समीक्षितं वा। यथास्थानं स्वकीयमपि मतम् अभिराजमहोदयं प्रति श्रद्धां विज्ञाप्य प्रदत्तम् इति शम्।

## सहायकग्रन्थाः


- दाधीचः, डॉ. रामकुमारः। अलङ्कारशास्त्रेतिहासः। जयपुरम्: हंसा प्रकाशन, २०१९।
- पण्डितराजजगन्नाथः। रसगङ्गाधरः। विद्युत् वरण घोषः,कलकाता:, पश्चिमवङ्गराज्यपुस्तकपर्षत, २०१९।
- पीयूषवर्षश्रीजयदेवः। चन्द्रालोकः।वाराणसी: चौखम्बा संस्कृतसीरीज आफिस, १९६०, चतुर्थसंस्करणम्।
- भट्टमम्ममटः। काव्यप्रकाशः। भट्टवामनाचार्यः, दिल्ली: परिमलपब्लिकेशन्स,२०२२।
- भट्टाचार्यः विष्णुपदः। साहित्यमीमांसा। कलिकाता: विश्वभारती ग्रन्थनविभागः, १३८२।
- महाकविभट्टिः। भट्टिकाव्यम्। वासुदेवशर्मा, मुम्बाइ: निर्णयसागरा, १९३४, अष्टमं संस्करणम्।
- मिश्रः, अभिराजराजेन्द्रः। अभिराजयशोभूषणम्। इलाहाबाद: वैजन्तप्रकाशनम्,२००६, प्रथमसंस्करणम्।
- मुखोपाध्यायः, अञ्जलिका। नाट्यशास्त्रम्। कलकाता: संस्कृतपुस्तकभाण्डारः,१०१८।
- वन्द्योपाध्यायः, श्रीसत्यरञ्जनः। संस्कृत अलङ्कार साहित्ये समालोचनार धारा। कलकाता: संस्कृत बुक डिपो,२०१३, चतुर्थसंस्करणम्।
- शर्मा, श्रीरामजीलालः। काव्यप्रकाशरहस्यम्। वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०२१।
- सेनः, शुभ्रजित्। भारतवर्षे आधुनिकसंस्कृतसाहित्यम् विहङ्गमदृष्ट्या परिशीलनम्। कोलकाता: सस्कृतपुस्तकभाण्डारः,२०१९, प्रथमसंस्करणम्।


[1]सुभाषितरत्नसमुच्चये।

# अग्निपुराणान्तर्गतसमासस्वरूपविमर्शः

श्री तिलकरामः*
शोधच्छात्रः, के.सं.वि., रा.गा.परिसरः
श्रृङ्गेरी

## प्रस्तावना

संस्कृतवाङ्मये छन्दसां प्रथमं मुखस्थानीयमङ्गं व्याकरणमुच्यते । उक्तञ्च मुखं व्याकरणं स्मृतम् (पा.शि. ४२ ) । किञ्च प्रधानं षडङ्गेषु व्याकरणम् ( म.भा.१.१.१ ) । इह जगति निखिलव्यवहारस्य साधनं शब्दो वर्तते । यदि शब्दनामकं तत्त्वमस्मिन् जगति नाभविष्यत् तर्हि किंकर्त्तव्यविमूढस्यास्य जगतः स्थितिः नाभविष्यत् । इदं वाक्तत्त्वमनादिनिधनं विद्यते , नामरूपात्मकमिदं जगत् तस्यैव विवर्तो विद्यते । शब्दस्य इमां महनीयतां व्याचक्षाणः दार्शनिकाग्रेसरो भर्तृहरिः कथयति –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ ( वा.प. १.१ )**

एवंभूतस्य विलक्षणशब्दस्य याथार्थ्यबोधः व्याकरणेन विना उपायान्तरेण असाध्यो वर्तते । आह च भर्तृहरिः –

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् । तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥ (वा.प.१.१३ )**

यद्यपि नित्यब्रह्मात्मकशब्दस्य व्याक्रिया व्याकरणस्य सीम्नः परे विद्यते, तथापि रेखागवयन्यायेन असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते इति अभियुक्तोक्त्यनुसारेण व्याकरणेन शब्दस्य व्याक्रिया क्रियते । एवञ्च व्याकरणशास्त्रं शब्दस्य व्युत्पादनद्वारा सर्वशास्त्रोपकारकं भवति । तस्मादेवोच्यते – काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम् इति ।

व्याकरणशास्त्रोत्पत्तिः कदाऽभवदिति तु वक्तुं नैव पार्यन्तिकं पार्यते, तथापीदं तु निःसन्देहं वक्तुं शक्यते यत् व्याकरणशास्त्रस्योत्पत्तेर्मूलकारणं वेद एव । यतो हि जगति यावज्ज्ञानं सर्वं वेदसम्भवमिति आब्रह्मणो भारतीयसर्वविदुषामथ च केषाञ्चन पाश्चात्त्यविपश्चिदामपि मतम् । व्याकरणाध्ययनस्य प्रधानं प्रयोजनमपि वेदानां रक्षणमेव । यथा प्रतिपादितं व्याकरणप्रयोजनानि प्रदर्शयता भगवता पतञ्जलिना महाभाष्ये- रक्षोहागमलघ्वसन्देहाः प्रयोजनम् इति । पञ्चसु प्रयोजनेषु प्रथमं वेदानां रक्षैव । अत्रैव विवरणे पतञ्जलिना व्याहृतम्- रक्षार्थं वेदानामध्येयं व्याकरणम् । लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यतीति । एतेन सुस्पष्टं यत् वेदानां रक्षार्थं व्याकरणस्याविर्भावः समभवत् । न च वेदेभ्यः पूर्वं तेषां रक्षार्थं व्याकरणस्य परिकल्पना विहितासीदिति वक्तव्यं, वेदवाङ्मयस्य अनादिनिधनत्वेन दिव्यत्वेन च सर्वसम्मतत्वात् ।

एवञ्च केचन प्रसिद्धाः वैयाकरणाः शाब्दिका परिगणिताः –

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् । सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥**

अतो व्याकरणस्यापि आदिकर्ता ब्रह्मैवेति निश्चप्रश्चम् । इयं च व्याकरणपरम्परा महर्षिणा पाणिनिना स्थिरीकृतेति । अथवा पाणिनिव्याकरणं सर्वेषां व्याकरणानामपेक्षया अत्यधिकं पल्लवितं पुष्पितं तस्मात् सम्प्रत्यपि तद्वदेव विलसति ।

---

***सम्पर्कसूत्रम्** – 8988022080, Email – trsharma258@gmail.com

## अग्निपुराणस्य संक्षिप्तपरिचयः

पुराणेषु विशिष्टं स्थानं भजते अग्निपुराणम् । तत्र हि नैके व्याकरणविषयाः चर्चितास्सन्ति । अग्निना वशिष्ठाय पुराणमिदं प्रोक्तमित्यतः पुराणस्यास्याग्निपुराणमिति नाम । अत्र ३८३ अध्यायाः सन्ति । भगवतः श्रीविष्णोः अवताराः, पूजाविधानञ्च अत्र वर्ण्यते । लिङ्गपूजा-दुर्गापूजयोः रहस्यात्मकपद्धतेः प्रतिपादनमत्र क्रियते । तान्त्रिकसाधना, मूर्त्तिनिर्माणकला, प्राणप्रतिष्ठा, पुनर्जन्म, धर्मशास्त्रम्, आयुर्वेदः, वनस्पतिशास्त्रम्, रत्नशास्त्रम्, धनुर्वेदः, भवननिर्माणकला, ज्योतिषशास्त्रम्, राजधर्मः (राज्यम्, राजा, राज्ञः कार्यम्, कर्तव्यम्, योग्यता, अधिकारः, सचिवः, गुप्तचरः, दूतः, चत्वारः नीत्युपायाः, षट्नीतितत्त्वानि, दुर्गम्, सेना, युद्धम्, मण्डलम्, व्यूहम्, युद्धप्रयाणः इत्यादयः) ; भूगोलविज्ञानम्, पुष्कर-कुरुक्षेत्र-वाराणसी- राजगृहादिस्थलानि ; व्याकरणम्; कोषविचारः, अष्टाङ्गयोगसाधनानि; वेदान्तशास्त्रम्, गीतातत्त्वञ्च सर्वमेकत्रितमस्ति । अतः उच्यते - "आग्नेये हि पुराणेऽस्मिन् सर्वाः विद्याः प्रदर्शिताः" (अ.पु. 383/52) इति ।

## विषयप्रवेशः

अग्नौ (अग्निपुराणे) ३४६ तमाध्यायतः ३५६ अध्यायपर्यन्तमिदं प्रकरणम् । कातन्त्र (कलाप) व्याकरणाश्रितमिदमिति व्यक्तं प्रतीयते । स्कन्देन (कुमारेण) प्रोक्तमिदं कात्यायनायेति उक्तमादौ[१] । कातन्त्र-व्याकरणं कुमारप्रोक्तमिति सांप्रदायिकाः । कुमारप्रसादेन शर्ववर्मणेदं शास्त्रं प्रथितमिति प्रसिद्धिः[२] । मतमिदं तर्कासहमिति वेदितव्यम् वस्तुतस्तु कुमाराणामिदं कौमारम्, सुकुमारमतीनां बालानामेवेदं व्याकरणमत्युपयोगीति मतमिदं विस्तरेण प्रत्यपादि श्रीयुधिष्ठिर- मीमांसकेन[३] । यद्यपि प्रकरणमिदं कातन्त्रानुसारि, तथापि पाणिनीयां पद्धतिमपीदमनुसरतीति पाणिनीयप्रत्याहारादिदर्शनादनुमीयते । गरुडेऽपि कुमारकात्यायनसंवादे व्याकरणं प्रोक्तम् । एतत् प्रकरणमपि अग्निपुराणोक्तव्याकरणसादृश्यं भजते ।

स्कन्देन व्याकरणमिदं कात्यायनाय प्रोक्तमित्युक्तम् । कात्यायननामधेयेन विदुषा केचन कातन्त्रभागा निर्मिता इति विज्ञायते, यथोक्तं - "वृक्षादिवदमी रूढाः कृतिना न कृताः कृतः कात्यायनेन ते सृष्टा विबुद्धप्रतिबुद्धये" । एतद्विषये संस्कृतव्याकरणशास्त्रेतिहासग्रन्थे कातन्त्रप्रकरणं द्रष्टव्यम् ।

एषु अध्यायेषु यादृशी शब्दशास्त्रीया प्रक्रियाऽभिहिता सा न अष्टाध्यायीमनुसरति, प्रत्युत कातन्त्रपद्धतिम् । सन्धि-सुबन्तादिरूपेण यः क्रमोऽत्र दर्शितः, तस्य सर्वप्राचीनमुपदेष्टृ कलापव्याकरणमेवेति इति वृत्तविदः । किञ्च प्रक्रियासु यानि उदाहरणानि 'प्रोक्तानि (तवेदम्, सकलोदकम्, दण्डाग्रम्, सागता, दधीदम् इत्यादीनि) तानि कातन्त्र- वृत्तौ अविकलरूपेण उपलभ्यन्त इति । सुब्विभक्ति-कारकादिषु अपि यानि उदाहरणानि प्रदत्तानि तान्यपि कातन्त्रवृत्तादिषु बहुलं प्राप्यन्ते ।

अग्निपुराणे ३४९तः३५९ अध्यायपर्यन्तं व्याकरणसम्बद्धाविविधाः विषयाः वर्णिताः विद्यन्ते । यथा – ३४९ व्याकरणम् , ३५० सन्धिसिद्धस्वरूपम् , ३५१ सुब्विभक्तिसिद्धरूपम्, ३५२ स्त्रीलिङ्गशब्दादिसिद्धरूपम् , ३५३ नपुंसकशब्दसिद्धरूपम्, ३५४ कारकम्, ३५५ समासः, ३५६ तद्धितम्, ३५७ उणादिसिद्धरूपम्, ३५८

[१] मन्त्राः पृथक् पृथक् वा स्युर्द्विरेफ द्विर्मुखाक्षिणः ।
कात्यायनं स्कन्द आह यत् तद् व्याकरणं वदे ॥(३४८/२४)

[२] (वृत्तिटीकापरिशिष्टे पृ० ४६६)

[३] (संस्कृतव्याकरखे शास्त्र का इतिहास पृ० ५०२)

तिङ्विभक्तिसिद्धरूपम्,३५९ कृतसिद्धरूपम् । तत्र एतेषु व्याकरणविषयकाध्यायेषु पञ्चपञ्चाशदधिकत्रिशततमोऽध्यायः (३५५) समासविषयकः । अत्र समासानां वर्गीकरणं विभागो वा एवं विद्यते ।

## अग्निपुराणोक्तदिशा समासनिरूपणम्

समसनं समासः । द्वयोः पदयोः बहूनां पदानां वा मिलित्वैकपदीभवनं समासो भवति । अत्र अग्निपुराणोक्तदिशा समास स्वरूपं प्रतिपाद्यते । अग्निपुराणवर्णितव्याकरणे समासस्य षट् प्रकाराः वर्णिता । पुनः तेषां षण्णामवान्तरभेदानादाय अष्टाविंशतिधा विभागं कृत्वा प्रदर्शिताः सन्ति । षड् भेदा इत्थं सन्ति –

समासः - स्कन्द उवाच[1]

**षोढा समासं वक्ष्यामि अष्टाविंशतिधापुनः । नित्यानित्यविभागेन लुगलोपेन च द्विधा ॥१॥**

**कुम्भकारश्च नित्यः स्याद्धेमकारादिकस्तथा । राज्ञः पुमान् राजपुमान् नित्योऽयञ्च समासकः ॥२॥**

**कष्टश्रितो लुक्समासः कण्ठेकालादिकस्त्वलुक् ।**

१. नित्यसमासः – कुम्भकारः , हेमकारः ।
२. अनित्यसमासः – राजपुमान् ।
३. लुकसमासः – कष्टश्रितः ।
४. अलुकसमासः – कण्ठेकालः ।

अन्तिमयोः द्वयोः भेदयोः सुबन्तोत्तरपदतिङ्गन्तोत्तरपदसमासयोः साक्षात् नाम्ना वा उल्लेखः यद्यपि अग्निपुराणे नास्ति । तथाप्युदाहरण द्वारा अवगमो जायते ।

५. सुबन्तोत्तरपदसमासः – जहिस्तम्बः ।
६. तिङ्न्तोत्तरपदसमाससः – अनुव्यचलत् ।

तथा च पाणिनीयव्याकरणेऽपि समासस्य षड् प्रकाराः सन्तीति उल्लेखः प्राप्यन्ते[2] । अग्निपुराणे समासस्य पूर्वोक्तषड्प्रकाराणां सत्वेऽपि प्रकारान्तरेण अन्यषड्भेदानामुल्लेखः विद्यते । यथा –

१. तत्पुरुषसमासः ।
२. कर्मधारयसमासः ।
३. बहुव्रीहिसमासः ।
४. द्विगुसमासः ।
५. द्वन्द्वसमासः ।
६. अव्ययीभावसमासः ।

---

[1]अग्निपुराण (अध्यायः ३५५)

[2]सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा ।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥ (वै.भू.सा.)


ISSN : 2249-538X

## १.तत्पुरुषसमासः

**स्यादष्टधा तत्पुरुषः प्रथमाद्यसुपा सह ॥३॥**
**प्रथमा तत्पुरुषोऽयं पूर्वं कायस्य विग्रहे । पूर्वकायोऽपरकायो ह्यधरोत्तरकायकः ॥४॥**
**अर्द्धं कणाया अर्द्धकणा भिक्षातूर्य्यमथेदृशम् । आपन्नजीविकस्तद्वत् द्वितीया चाधराश्रितः ॥५॥**
**वर्षम्भोग्यो वर्षभोग्यो धान्यार्थश्च तृतीयया । चतुर्थी स्याद् विष्णुबलिर्वृकभीतिश्च पञ्चमी ॥६॥**
**राज्ञः पुमान् राजपुमान् षष्ठी वृक्षफलं तथा । सप्तमी चाक्षशौण्डोऽयमहितो नञ्समासकः ॥७॥**

प्रथमान्तादयः शब्दाः (पदानि) सुबन्तैः समस्यन्ते । यथा –

१. प्रथमातत्पुरुषः – पूर्वकायः (कायस्य पूर्वम्) , अर्द्धकणा (कणायाः अर्धम्) ,भिक्षातुर्यम् (भिक्षायाः तुर्यम्) ।
२. द्वितीयातत्पुरुषः – आपन्नजीविकः (जीविकाम् आपन्नः) , अधराश्रितः ( अधरम् आश्रितः ) ।
३. तृतीयातत्पुरुषः – वर्षभोग्यः (वर्षेण भोग्यः ), धान्यार्थः (धान्येन अर्थः ) ।
४. चतुर्थीतत्परुषः - विष्णुबलिः (विष्णवे बलिः ) ।
५. पञ्चमीतत्पुरुषः – वृकभीतिः (वृकाद् भीतिः) ।
६. षष्ठीतत्पुरुषः – राजपुमान् ( राज्ञः पुमान्) , वृक्षफलम् (वृक्षस्य फलम्) ।
७. सप्तमीतत्पुरुषः – अक्षशौण्डः (अक्षेषु शौण्डः) ।
८. नञ्तत्पुरुषः – अहितः (न हितः) ।

## २. कर्मधारयसमासः

**कर्मधारयः सप्तधा नीलोत्पलमुखाः स्मृताः । विशेषणपूर्वपदो विशेष्योत्तरतस्तथा ॥८॥**
**वैयाकरणखसूचिः शीतोष्णं द्विपदं शुभम् । उपमानपूर्वपदः शङ्खपाण्डुर इत्यपि ॥९॥**
**उपमानोत्तरपदः पुरुषव्याघ्र इत्यपि । सम्भावनापूर्वपदो गुणवृद्धिरितीदृशम् ॥१०॥**
**गुण इति वृद्धिर्वाच्या सुहृदेव सुबन्धुकः । अवधारणपूर्वपदो ———**

अग्निपुराणे कर्मधारयसमासस्य सप्तभेदाः प्रतिपादिताः । तेषामुदाहरणानि एवं प्रतिपादितानि विद्यन्ते । यथा –

१. विशेषणपूर्वपदकर्मधारयः – नीलोत्पलम् ( नीलञ्च तदुत्पलम्) ।
२. विशेष्यपूर्वपदकर्मधारयः – वैयाकरणखसूचिः (वैयाकरणश्च असौ खसूचिः) ।
३. विशेषणोभयपदकर्मधारयः – शीतोष्णम् ( शीतञ्च तदुष्णम्) ।
४. उपमानपूर्वपदकर्मधारयः – शङ्खपाण्डुरः (शङ्ख इव पाण्डुरः ) ।
५. उपमानोत्तरपदकर्मधारयः – पुरुषव्याघ्रः (पुरुषः व्याघ्र इव ) ।
६. सम्भावनापूर्वपदकर्मधारयः – गुणवृद्धिः । ( गुण इव वृद्धिः ) ।
७. अवधारणपूर्वपदकर्मधारयः - सुहृदेव सुबन्धुकः । ( बन्धुरेव ) ।

## ३. बहुव्रीहिसमासः

**——बहुव्रीहिश्च सप्तधा ॥११॥ द्विपदश्च बहुव्रीहिरारूढभवनो नरः । अर्चिताशेषपूर्वोऽयं बह्वङ्गिः परिकीर्त्तितः ॥१२॥**
**एते विप्राश्चोपदशाः सङ्ख्योत्तरपदस्त्वयम् । सङ्ख्योभयपदो यद्वद् द्वित्रा द्वयेकत्रयो नरः ॥१३॥**
**सहपूर्वपदोऽयं स्यात् समूलोद्धृतकस्तरुः । व्यतिहारलक्षणार्थः केशाकेशि नखानखि ॥१४॥**
**दिग्लक्ष्या स्याद् दक्षिणपूर्वा ——**

अग्निपुराणे बहुव्रीहिसमासस्यापि सप्तभेदाः उल्लिखिताः सन्ति । ते यथा –

१. द्विपदबहुव्रीहिः – आरुढभवनः ( आरुढं भवनं येन सः ) ।
२. बहुपदबहुव्रीहिः – अर्चिताऽशेषपूर्वः ( अर्चितः अशेषः पूर्वो यस्य सः ) ।
३. संङ्ख्योत्तरबहुव्रीहिः – उपदशाः ( दशानां समीपे ये सन्ति ते उपदशाः ) ।
४. सङ्ख्योभयपदबहुव्रीहिः – द्वित्राः ( द्वौ वा त्रयो वा ) ।
५. सहपूर्वपदबहुव्रीहिः – समूलः ( मुलेन सह वर्तते ) ।
६. व्यतिहारलक्षणार्थबहुव्रीहिः – केशाकेशि ( केशेषु केशेषु प्रगृह्य इदं युद्धं प्रवृत्तम् ) ।
७. दिग्लक्षणार्थबहुव्रीहिः – दक्षिणपूर्वा ( दक्षिणस्यापूर्वस्याश्च दिशोरन्तरालं दिक् ) ।

## ४. द्विगुसमासः

**द्विगुराभाषितो द्विधा । एकवद्भावि द्विश्रृङ्गं पञ्चमूली त्वनेकधा ॥१५॥**

अग्निपुराणे द्विगुसमास्य द्वौ भेदौ स्तः । यथा –

१. एकवद्भावद्विगुः – द्विश्रृङ्गम् ( द्वयोः श्रृङ्गयोः समाहारः ) ।
२. अनेकवद्भावद्विगुः (अनेकधा ) – पञ्चमूली ( पञ्चानां मूलानां समाहारः ) ।

## ५. द्वन्द्वसमासः

**द्वन्द्वः समासो द्विविधो हीतरेतरयोगकः । रुद्रविष्णू समाहारो भेरीपटहमीदृशम् ॥२६॥**

द्वन्द्वः द्विविधः । यथा –

१. इतरेतरयोगद्वन्द्वः – रुद्रविष्णू ( रुद्रश्च विष्णुश्च ) ।
२. समाहारद्वन्द्वः – भेरीपटहम् ( भेर्यश्च पटहाश्च तेषां समाहारः ) ।

## ६.अव्ययीभावसमासः

**द्विधाख्यातोऽव्ययीभावो नामपूर्वपदो यथा । शाकस्य मात्रा शाकप्रति यथाऽव्ययपूर्वकः ॥१७॥ उपकुम्भञ्चोपरथ्यं——**

अव्ययीभावसमासस्यापि द्वौ भेदौ स्तः । यथा –

१. नामपूर्वपदाव्ययीभावः – शाकप्रति ( शाकस्य लेशः ) ।


ISSN : 2249-538X

२. अव्ययपूर्वपदाव्ययीभावः – उपकुम्भम् ( कुम्भस्य समीपम् ।

**—प्राधान्येन चतुर्विधः । उत्तरपदार्थमुख्यो द्वन्द्वश्चोभयमुख्यकः ॥**
**पूर्वार्थेशोऽव्ययीभावो बहुव्रीहिश्च बाह्येशः ॥१८॥**

अग्निपुराणेऽपि अन्ते प्राधान्येन चतुर्विधः समासः कथितः यथा – उत्तरपदार्थप्रधानः तत्पुरुषः , उभयपदार्थप्रधानः द्वन्द्वः , पूर्वपदार्थप्रधानः अव्ययीभावः , बाह्यपदार्थप्रधानः बहुव्रीहिरिति । अयं पक्षः भूषणसारेऽपि प्राचीनाचार्याणां मतरूपेणोद्धृतः दोषग्रसतत्वात् पर्वपक्षत्वेन स्वीकृतः तद्वदत्रापि प्रतिभाति ।

## उपसंहारः

एवमत्र समासानां विभागक्रमः कश्चन विशिष्टः विद्यते । अतः अस्यानेन क्रमेणाध्ययनं कर्तुं शक्यते । कश्चन नुतनः पन्थाः अवगतः भविष्यति समासाध्ययनस्य । पुराणसाहित्येऽपि एतादृशाः विषयाः विशदतया सरलया शैल्या प्रतिपादिताः इत्यपि छात्रेषु शोधार्थिषु विषयः ज्ञातो भवति । अत्र च समासानामध्ययनं पद्यमाध्यमेन सारल्येन कर्तुं शक्यते इति । पुनश्च ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् इत्यत्र कौमारव्याकरणरूपेण दृश्यते , तदपि इदमिति वक्तुं शक्यते । यतोहि अत्र वक्ता स्कन्दः कुमारकार्तिकेयः एतत् व्याकरणं कात्यायनं प्रत्युवाच इति ।

## सहायकग्रन्थाः

१. अग्निपुराणम् - महर्षिवेदव्यासविरचित – क्लाइव रो कलकत्ता -१९५७ ।
२. अग्निपुराण - गीताप्रेस, गोरखपुर २०७३ सं. ।
३. अग्निपुराण में शास्त्रीय तत्व एक अनुशीलन – डॉ . बबीता , नवराज प्रकाशन दिल्ली ,2006 ।
४. पाणिनीय व्याकरण एवं अग्निपुराण में निरूपित व्याकरण – डॉ . श्री प्रकाश शुक्ल , जी.पी. पब्लिसिंग हाउस , दिल्ली ,1990 ।
५. वैयाकरणसिद्धान्तकौमुदी(बालमनोरमा-तत्त्वबोधिनीसहिता) – भट्टोजिदीक्षितः - गिरिधरशर्मा चतुर्वेदः, परमेश्वरानन्दशर्मा विद्याभास्करः- मोतीलाल बनारसीदास, वाराणसी (२०१०) ।
६. अष्टाध्यायीसूत्रपाठः(प्रह्लादटिप्पणीसहितः) – महर्षिपाणिनिः – पं. सत्यनारायणशास्त्री खण्डूडी (सम्पादकः) –कृष्णदास अकादमी, वाराणसी (चौखम्बा प्रेस, वाराणसी) (२००८) ।
७. व्याकरण-शास्त्र का इतिहास – पं. युधिष्ठिर मीमांसकः – शान्तिस्वरूप कपूर ,रामलालकपूर ट्रस्ट प्रेस बहालगढ,सोनीपत हरयाणा (१९८४)




योऽनूचानः स नो महान् ।
केन्द्रीयसंस्कृतविश्वविद्यालयः

# Central Sanskrit University

Established by an Act of Parliament
Accredited with A++ grade by NAAC

## Shri Bharati Teertha Center for Excellence in Shastras

Shri Rajiv Gandhi Campus, Menase, Sringeri - 577139